सरस्वतीभवन-

श्रीमम्मटाचार्यप्रणीतः

काव्यप्रकाशः

दीपिकाव्याख्यया विभूषितः

सम्पादकः

आचार्यश्रीरामगोविन्दशुक्लः

सम्पूर्णानन्द संस्कृत विश्वविद्यालयः

वाराणसी

SARASVATĪBHAVANA-GRANTHAMĀLĀ

[Vol. 46]

KĀVYAPRAKĀŚA

OF

MAMMAṬĀCĀRYA

With the Commentary

'DĪPIKĀ'

BY

CAṆḌĪDĀSA

EDITED BY

ĀCĀRYA ŚRĪ RĀMAGOVINDA ŚUKLA

Ex-Research Assistant

Sampurnanand Sanskrit University

Varanasi

VARANASI

1990

SARASVATĪBHAVANA-GRANTHAMĀLĀ

[Vol. 46]

KĀVYAPRAKĀŚA

OF

MAMMAṬĀCĀRYA

With the Commentary

'DĪPIKĀ'

BY

CAṆḌĪDĀSA

EDITED BY

ĀCĀRYA ŚRĪ RĀMAGOVINDA ŚUKLA

Ex-Research Assistant

Sampurnanand Sanskrit University

Varanasi

VARANASI

1990

Research Publication Supervisor —
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

●

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

●

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002.

●

Second Edition—1000 Copies
Price Rs. 132·00

●

Printed by—
Dr. Ram Manohar Mishra
O. S. D.
Sampurnanand Sanskrit University Press
Varanasi.

सरस्वतीभवन-ग्रन्थमाला

[४६]

मम्मटाचार्यप्रणीतः

काव्यप्रकाशः

आचार्यचण्डीदासकृतया

दीपिकाटीकया विभूषितः

सम्पादकः

आचार्यश्रीरामगोविदशुक्लः

अनुसन्धानसहायकचरः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणस्याम्

२०४७ तमे वैक्रमाब्दे   १९१२ तमे शकाब्दे   १९९० तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः—
निदेशकः अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी।

●

प्रकाशकः—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१ ००२.

●

प्राप्तिस्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१ ००२

●

द्वितीयं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम्—१३२.०० रूप्यकाणि

●

मुद्रकः—
डॉ० राममनोहरमिश्रः
विशेषाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयमुद्रणालयस्य
वाराणसी

प्ररोचना

काव्यप्रकाशस्य टीका अपरिमिताः सन्ति, तासु चण्डीदासकृता 'दीपिका' बहुश उद्ध्रियते। सैषा सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन पूर्वं प्रकाशिता, प्रचारातिशयात्पुनर्मुद्रणमधुना सम्पद्यते। अस्य संस्करणस्यायमपरो विशेषो यद् अनुसन्धातॄणां कृते उपयोगीनि परिशिष्टान्यप्यत्र निबद्धानि सन्ति। तद्यथा—काव्यप्रकाशोदाहृतनिदर्शनानां वर्णक्रमानुसारिणी सूची, यथासम्भवमाकरस्थलनिर्देशः, काव्यप्रकाशे प्रमाणोद्धृतयः, काव्यप्रकाशे तद्वृत्तौ च स्मर्णमाणानि प्रमाणानि (ग्रन्थकारनामानुक्रमेण सूची), काव्यप्रकाशदीपिकाधृतानि निदर्शनानि, काव्यप्रकाशदीपिकायामुद्दिष्टानि धृतानि वा प्रमाणानि, पारिभाषिकशब्दसूची, ग्रन्थनामसङ्केतपञ्जी – प्रभृतीनि। एभिः परिशिष्टैः काव्यप्रकाशग्रन्थस्यान्यैरलङ्कारग्रन्थैर्लक्ष्यग्रन्थैश्च सह टीकाग्रन्थस्य चान्यैः सजातीयैः ग्रन्थैश्च सह सङ्गतिः स्फुटतामानीता।

एतत्कृते अस्य टीकाग्रन्थस्य सम्पादकाः **स्व० पण्डित रामगोविन्दशुक्लाः** साधुवादार्हाः।

वाराणस्याम्

वसन्तपञ्चम्याम्,

२०४७ वैक्रमाब्दे

(२१.१.१९९१ खैस्ताब्दे

विद्यानिवासमिश्रः

कुलपतिः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

विषय–सूची

प्रथम उल्लासः

(काव्यप्रयोजनम् कारणम् स्वरूपञ्च)

द्वितीय उल्लासः

(शब्दार्थस्वरूपनिर्णयः)

तृतीय उल्लासः

(अर्थव्यञ्जकतानिर्णयः)

चतुर्थ उल्लासः

(ध्वनि-निर्णयः)

पञ्चम उल्लासः

(ध्वनिगुणीभूतव्यङ्ग्यसङ्कीर्णभेदनिरूपणम्)

षष्ठ उल्लासः

(शब्दार्थचित्रनिरूपणम्)

सप्तम उल्लासः

(दोषनिरूपणम्)

अष्टम उल्लासः

(गुणालङ्कारभेदनिर्णयः)

नवम उल्लासः

(शब्दालङ्कारनिर्णयः)

दशम उल्लासः

(अर्थालङ्कारनिर्णयः)

प्रस्तावना

अलङ्कारशास्त्रोद्गमः—

लोकोत्तरवर्णनानिपुणं कविकर्म काव्यं इति काव्यशास्त्रविद्भिः निरूपितोऽयं कविशब्दः कदा प्रभृति प्रचलितोऽभवत् इति विचारणायां विश्वग्रन्थेषु वेदे आदिभूते श्लोकाः दृश्यन्ते, वेदः स्वयमेव काव्यात्मकम्। अत्र कविः साक्षात् भगवान् एव। वेदे काव्यस्य सम्पूर्णं सौन्दर्यं प्राप्यते। वेदस्य विषये वेदे एव लिखितं विद्यते 'देवस्य पश्य काव्यं न ममार न जीर्यतिद्धवेद रूपं काव्यं उत्पत्तिविध्वंसरहितं विद्यते अत एव वेदस्य अपौरुषेयत्वं लोकः जानाति। यतः वेद एव नित्यः तस्य ज्ञानमपि नित्यं तदाधारभूतं काव्यं वेदः अपि नित्यः भवितुमर्हति, वेदेषु गुणरीत्यलंकारध्वन्यादितत्वा न निवेचितानि सन्ति। अत्र प्रसादादिगुणानां उदाहरणानि अनेकस्थानेषु दृष्टिपथमायान्ति इमं गुणं एव आधारीकृत्य रीतयः प्रकाशिताः। उपमादीनां अलङ्काराणां वेदेषु आधिक्यं दृश्यते यथा—

उत त्वः पश्यन् न ददर्श वाचं उतत्वः श्रृण्वन् न श्रृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्ये उषतीः सुवासाः॥

अत्र जायेव पत्ये उषती सुवासाः इति उपमावाक्यम्। अमुमर्थं अनेके पठन्ति रहस्यं न जानन्ति, अनेके महत्वं श्रृण्वन्ति किन्तु नहि अवगच्छन्ति अपरे ईदृशाः सन्ति येषां हृदये वाणी तथा आत्मानं प्रकाशयति यथा सुवस्त्रालङ्कृता कामनी जाया पत्ये इव। एवं—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकषीति॥

मन्त्रेस्मिन् अनेकशास्त्रीयाणां कथानकानां च प्रतिपादनं दृश्यते। राजशेखरेण काव्य-मीमांसायां अस्य साहित्यशास्त्रपरत्वं महाभाष्ये च व्याकरणसिद्धान्तपरत्वं प्रतिपादितं विद्यते। दर्शनेषु जीवेश्वरयोः निरूपणं दृश्यते। पुराणेषु कृष्ण श्रीदाम्नोः कथानकं समाविष्टं वर्तते। इत्थं अत्र रूपकालङ्कारः सर्वथा प्रतिपादितः अस्ति।

एवं सयुजा सखाया इत्यत्र अनुप्रासः। जीवनं प्रति भोजनं कारणं भोजनाभावः दौर्बल्यकारकः अत्र यः अत्ति स दुर्बलः यः नात्ति स अभिचाकसीति विभावना विशेषोक्त्योरपि एकत्र संग्रहः। अत्र माधुर्यगुणः पदद्योत्योध्वनिः हृदयं प्रह्लयति। एवमेव—

सक्तुमिव तितउना पुनन्तः यत्राधीरा मनसा वाचमक्रत।
अत्रासखायः सख्यानि जानते भद्रैषा लक्ष्मीर्निहिताधिवाचि॥

अत्रापि उपमादीनां अलङ्काराणां प्रस्फुटः अवभासः इत्थं । अलङ्काराणां अनादिकालादेव प्रयोगः दृश्यते ।

नामकरणम्—

काव्यसौन्दर्यमीमांसा शास्त्रस्य काव्यशास्त्रमिति संज्ञा। काव्यशास्त्रस्य प्रथमं काव्यालङ्कारः इति प्रयोगः दृश्यते। उद्भटः रुद्रटः भामहः, वामनः स्वस्व ग्रन्थान् काव्यालङ्कार नाम्ना व्यपदिदिषुः। अलङ्कारशब्दस्य वामनेन सौन्दर्यार्थकत्वं सौन्दर्यमलङ्कारः इति वदता स्वीकृतम्। अन्यैरपि काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते अनेन पुष्टिं कुर्वन्ति। अनन्तरं अलङ्कारशास्त्रनाम्ना अस्य व्यपदेशः प्रतापरुद्रीयादिषु दृश्यते। अस्यायमर्थः—यत् छत्रिन्यायेन शास्त्रे अलङ्कारप्राधान्यात् ईदृषः व्यपदेशः।

काव्यशास्त्रशब्दप्रयोगः—

पूर्वं काव्यालङ्कारशास्त्रनाम्ना काव्यशास्त्रनाम्ना च व्यपदिष्टोऽभवत्।
वेदान्तदर्शने संशनात् शास्त्रम् इति व्युत्पत्तिं स्वीकृत्य काव्यस्याऽपि शास्त्रत्वं जातम्।

एकादशशतके सरस्वतीकण्ठाभरणकर्त्रा भोजदेवेन काव्यशास्त्रशब्दस्य प्रयोगः कृतः।

काव्शास्त्रेतिहासौ च काव्यशास्त्रं तथैव च।
काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधः॥

साहित्यशब्दप्रयोगः—

पूर्वं अलङ्कारपदं सौन्दर्यपरकमासीत्। अनन्तरं अलङ्कारेषु रूढं अतएव अनन्तरं काव्यशब्दस्थाने साहित्यशब्दप्रयोगः प्रचलितः। विश्वनाथमहापात्रः चतुर्दशताब्द्यां भवः साहित्यदर्पणस्य कर्ता अभूत्। रुय्यकोऽपि साहित्य-मीमांसा ग्रन्थरचनया साहित्य शब्द प्रयोगः एकादश शताब्द्यां कृतः। अयं शब्दः अधुना काव्य शास्त्रस्थाने साहित्य शास्त्रेति प्रसिद्धिमाप। दशमशतके कुन्तकोऽपि—

साहित्यमनयोः शोभाशालितां प्रतिकाव्यसौ।
अन्यूनानातिरिक्तत्वं मनोहारिण्यवस्थितिः॥

कुन्तकः काव्यलक्षण प्रस्तावे—

शब्दार्थौ सहितौ वक्रकविर्व्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥

अतः भामहकुन्तकौ द्वौ अपि काव्यशास्त्रशब्दस्थाने साहित्यशब्दप्रयोगः विहितौ। राजशेखरेणापि नवम शतके पञ्चमी साहित्यविद्येति साहित्य शब्दप्रयोगः कृतः। तदनु अन्येऽपि इत्थं साहित्यशब्दप्रयोक्त्रः प्रथमः राजशेखर इति वक्तुं शक्यते—

कालविभागः—

यद्यपि काव्यशास्त्रतत्त्वानां वेदादारभ्य भामह कालतः पूर्वं कश्चन विवेचनात्मकः ग्रन्थः नोपलभ्यते। अस्य निरूपणं भरतकालतः प्रारब्धः इति विद्वांसः कथयन्ति किन्तु भरतकालसम्बन्धे अस्ति विदुषां मतभेदः। इत्थं विद्वद्भिः काव्यकालः चतुर्षु भागेषु विभक्तः।

(१) प्रारम्भिककालः (अज्ञातकालात् भामहान्तः) । ६००-८०० वैक्रमः)

(२) रचनात्मकः कालः (अभिनवगुप्तपादतः मम्मटान्तः (८००-१७५०-वैक्रमः।

(३) व्याख्याकालः (मम्मटकालात् परं विश्वेश्वरपण्डितान्तः १०००-१७५०-वैक्रमः।

साहित्य शास्त्रस्य सम्प्रदायः—

साहित्य शास्त्रं चतुर्धा विभक्तं—(१) अलंकार सम्प्रदायः (२) रीति सम्प्रसम्प्रदायः (३) रस सम्प्रदायः (४) ध्वनि सम्प्रदायः (५) वक्रोक्ति सम्प्रदायश्च। एते सम्प्रदायाः काव्यात्मविवादे समुत्पन्नाः।

ये काव्यस्यात्मा रस इति कथयन्ति ते रससम्प्रदायान्तर्गताः। ये अलङ्कारान् काव्यात्मत्वेन स्वीकुर्वते ते अलङ्कारसम्प्रदायानुयायिनः। ये रीतिरात्माकाव्यस्य इति कथयन्ति ते रीतिसम्प्रदायानुयायिनः। ये काव्यस्यात्माध्वनिः इति कथयन्ति ते ध्वनिसम्प्रदायानुयायिनः। ये वक्रोक्ति काव्यजीवितं स्वीकुर्वन्ति ते वक्रोक्तिसम्प्रदायानुयायिनः

(१) अलङ्कार-सम्प्रदाय :--

भामहः अलङ्कारसम्प्रदायप्रवर्तकः इति विदुषां मतं तदनन्तरं उद्भटः, दण्डी, रुद्रटः प्रतिहारेन्दुराज-, जयदेवादयश्च अस्य सम्प्रदायस्य अनुयायिनः। जयदेव :--

अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मात् अनुष्णमनलं कृती॥

मम्मटस्य 'अनलङ्कृतीपुनः क्वापि' इत्युक्ति कटाक्षयन् जयदेवः अवोचत्।

(२) रीतिसम्प्रदाय :—

अस्य सम्प्रदायस्य स्थापकः वामनः अयं अलङ्कारप्राधान्यं निरस्य रीति-प्राधान्यं स्वीकृतवान् (रीतिरात्मा काव्यस्येति) वामनः काव्यशोभायाः कर्तारो-धर्माः गुणाः तदतिशयहेतवश्च अलङ्काराः इति गुणालङ्कारयोः भेदं प्रतिपादयामास। मम्मटस्तु रीतयः अवयवसंस्थानविशेषवत इति वदन् रीतेः काव्यात्मत्वं निरस्तवान्।

(३) रससम्प्रदाय :—

अस्य सम्प्रदायस्य प्रवर्तकः भरतः। यद्यपि राजशेखरः काव्यमीमांसायां नन्दिकेश्वरं रससम्प्रदायप्रवर्तकं मन्यते तथापि ग्रन्थानुपलब्धिवलात् भरत एव संस्थापकत्वेन मन्यते। भरतश्च **विभावानुभावव्यभिचारि संयोगाद्रसनिष्पत्तिः** इति सूत्रयामास। भरतनाटयशास्त्रे षष्ठे अध्याये रसविवेचनं कुर्वतो भरतमुनेरपि व्याख्याकारैः भट्टनायक, भट्टलोल्लटः-शङ्कुक-अभिनवगुप्तः आचार्येषु प्रसिद्धि गताः। एषां मतानां चर्चा काव्यप्रकाशग्रन्थे कृता विद्यते।

(४) ध्वनि सम्प्रदाय :—

अस्य सम्प्रदायस्य प्रवर्तकः आनन्दवर्धनाचार्यः। अनेन ध्वन्यालोकाख्ये स्वग्रन्थे काव्यस्यात्मा ध्वनिः इति कथयन् ध्वनिं प्रवर्तयति। तत्र च ध्वनिवादिनः वैयाकरणान् गौरवेण स्मरन्ति। अन्ये साहित्यिकाः वेदान्तिनः, मीमांसकाः, नैयायिकाश्च विरुद्ध-वादिनः काव्यप्रकाशेखण्डिताः। अतएव मम्मटः ध्वनिप्रतिष्ठापकपरमाचार्यशब्देन व्यवह्रियते।

(५) वक्रोक्ति सम्प्रदाय :—

आचार्य कुन्तकः अस्य सम्प्रदायस्य प्रवर्तकः। अयं वक्रोक्तिजीविताख्ये स्वग्रन्थे रीतिं अप्रधानीकृत्य वक्रोक्तिं प्रधानतया स्वीकृतवान्। भामहोपि वक्रोक्तेः मूल्यं स्वीचकार—

सैषा सर्वत्र वक्रोक्तिरनयार्थोविभाव्यते।
यत्नोऽस्यां कविनाऽकार्यः कोऽलङ्कारोऽनया विना॥

दण्डिरपि काव्यादर्शे स्वभावोक्तिः वक्रोक्तिश्चेति वाङ्मयं द्विधा भिन्नं इति प्रतिपादयामास। वामनः सादृश्याल्लक्षणा वक्रोक्तिः इति काव्यालङ्कारसूत्रवृत्तौ उल्लिख्य वक्रोक्तिं स्वीचकार किन्तु आधुनिकाः इदमपि विचारयन्ति यत् जीवितं जीवनशक्तिः जीवश्च ज्ञानाश्रयः ज्ञानरूपोवेति अन्यत् अतः आत्मसम्बन्धे वक्रोक्तेः प्रक्षेपोनावश्यक इति वदन्ति। कुन्तकः वामनस्य रीतिसिद्धान्तमपि देशं आधारं अस्वीकृत्य रचना शैलीमेव स्वीकृतवान्। अनेन रीतिशब्दस्थाने मार्गशब्दप्रयोगः कृतः। यथा वामनः वैदर्भी रीतिं मनुते। कुन्तकः सुकुमारमार्गमि इति। एवं वामनः

रीतिरिति कुन्तकः मध्यममार्ग इति वदति । भरतात् जगन्नाथान्तं विवादविषयीभूतस्य अस्य शास्त्रस्य आचार्यान् नामग्राहं कथयामि ।

साहित्यशास्त्रीयाचार्याणां परिचयः

(१) भरतमुनिः

साहित्यशास्त्रे भरतनाम्ना अनेके जनाः संस्कृतसाहित्ये श्रूयन्ते (१) दशरथपुत्रः (२) दुष्यन्तपुत्रः (३) मान्धात्रिप्रपौत्रः (४) जडभरतः (५) नाट्यशास्त्रप्रवर्तकः । अत्राऽहं केवलं नाट्यशास्त्रकर्तुः भरतस्य चर्चां करोमि ।

भरतमुनेः कालनिर्णयः दुष्करः । केचन भरतं काल्पनिकपुरुषं मन्यन्ते । डा० मनमोहनघोषः स्वीये नाट्यशास्त्राङ्ग्लानुवादे भरतं काल्पनिकं मन्यन्ते । नाट्यरङ्गशालायां ये पात्रान् सज्जयन्ति तेपि भरताः भवन्ति । अन्ते कश्चन पुरुषः स्वीकृतः । मत्स्यपुराणे २४ तमे अध्याये २७-३२ तमे श्लोके भरतस्य चर्चा दृश्यते । इत्थं कथा तत्र वर्तते यतः भरतः देवलोके लक्ष्मीस्वयम्बरं नाम नाटकं अभिनयति । तत्र उर्वशी लक्ष्म्याः अभिनयं करोति । तत्र देवसभायां इन्द्रेण सह पुरूरवा अपि उपस्थित आसीत् । यं दृष्ट्वा उर्वशी मुग्धा सती अभिनयं विस्मृतवती । ततः कुपितो भरतः पुरूरवसं उर्वशीं च शशाप । इयं चर्चा विक्रमोर्वशीये नाटके २।१८ अङ्के अकरोत् ।

अनेके विद्वांसः भरतं विक्रमात् पञ्चशतकपूर्वं मन्यन्ते । अश्वघोषस्य सारिपुत्रप्रकरणाख्ये अधुनैव खण्डितावस्थायां मिलिते नाट्यशास्त्रस्य प्रभावं पश्यन्ति ।

भरतः केवलं नाट्यशास्त्रस्यैव रचयिता । अयं ग्रन्थः नाट्यशास्त्रेण सह समस्तकलानां विश्वकोषः इति वक्तुं शक्यते । स्वग्रन्थविषये भरतोऽपि कथयति—

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
नासौ योगो न तत्कर्म नाट्येस्मिन् यन्न दृश्यते ॥

वर्तमानकाले नाट्यशास्त्रं ६००० श्लोकानां ग्रन्थः । एनं षट्साहस्रीसंहितापि कथयन्ति । इतः पूर्वं श्लोकानां द्वादशसाहस्री आसीत् । अयमपि शारदातनयेन स्वीये भावप्रकाशने उल्लिखितः । तेषां मते वृद्ध भरतः द्वादशसाहस्रीसंहिता रचिता अयं भरतस्तु षट्साहस्रीसंहितायाः कर्ता तेन लिखितमपि ।

एवं द्वादशसाहस्रैः श्लोकैरेकं तदर्धतः ।
षड्भिः श्लोकसहस्रैः यो नाट्यवेदस्य संग्रहः ॥

अभिनवगुप्तपादाचार्याः ३६ अध्यायानां वर्णनं कृतवन्तः ।

(२) रीतिसम्प्रदाय :—

अस्य सम्प्रदायस्य स्थापकः वामनः अयं अलङ्कारप्राधान्यं निरस्य रीतिप्राधान्यं स्वीकृतवान् (रीतिरात्मा काव्यस्येति) वामनः काव्यशोभायाः कर्तारोधर्माः गुणाः तदतिशयहेतवश्च अलङ्काराः इति गुणालङ्कारयोः भेदं प्रतिपादयामास। मम्मटस्तु रीतयः अवयवसंस्थानविशेषवत इति वदन् रीतेः काव्यात्मत्वं निरस्तवान्।

(३) रससम्प्रदाय :—

अस्य सम्प्रदायस्य प्रवर्तकः भरतः। यद्यपि राजशेखरः काव्यमीमांसायां नन्दिकेश्वरं रससम्प्रदायप्रवर्तकं मन्यते तथापि ग्रन्थानुपलब्धिवलात् भरत एव संस्थापकत्वेन मन्यते। भरतश्च **विभावानुभावव्यभिचारि संयोगाद्रसनिष्पत्तिः** इति सूत्रयामास। भरतनाटयशास्त्रे षष्ठे अध्याये रसविवेचनं कुर्वतो भरतमुनेरपि व्याख्याकारैः भट्टनायक, भट्टलोल्लटः-शङ्कुक-अभिनवगुप्तः आचार्येषु प्रसिद्धिं गताः। एषां मतानां चर्चा काव्यप्रकाशग्रन्थे कृता विद्यते।

(४) ध्वनि सम्प्रदाय :—

अस्य सम्प्रदायस्य प्रवर्तकः आनन्दवर्धनाचार्यः। अनेन ध्वन्यालोकाख्ये स्वग्रन्थे काव्यस्यात्मा ध्वनिः इति कथयन् ध्वनिं प्रवर्तयति। तत्र च ध्वनिवादिनः वैयाकरणान् गौरवेण स्मरन्ति। अन्ये साहित्यिकाः वेदान्तिनः, मीमांसकाः, नैयायिकाश्च विरुद्धवादिनः काव्यप्रकाशेखण्डिताः। अतएव मम्मटः ध्वनिप्रतिष्ठापकपरमाचार्यशब्देन व्यवह्रियते।

(५) वक्रोक्ति सम्प्रदाय :—

आचार्य कुन्तकः अस्य सम्प्रदायस्य प्रवर्तकः। अयं वक्रोक्तिजीविताख्ये स्वग्रन्थे रीतिं अप्रधानीकृत्य वक्रोक्तिं प्रधानतया स्वीकृतवान्। भामहोपि वक्रोक्तेः मूल्यं स्वीचकार—

सैषा सर्वत्र वक्रोक्तिरनयार्थोविभाव्यते ।
यत्नोऽस्यां कविनाऽकार्यः कोऽलङ्कारोऽनया विना ॥

दण्डिरपि काव्यादर्शे स्वभावोक्तिः वक्रोक्तिश्चेति वाङ्मयं द्विधा भिन्नं इति प्रतिपादयामास। वामनः सादृश्याल्लक्षणा वक्रोक्तिः इति काव्यालङ्कारसूत्रवृत्तौ उल्लिख्य वक्रोक्तिं स्वीचकार किन्तु आधुनिकाः इदमपि विचारयन्ति यत् जीवितं जीवनशक्तिः जीवश्च ज्ञानाश्रयः ज्ञानरूपोवेति अन्यत् अतः आत्मसम्बन्धे वक्रोक्तेः प्रक्षेपोनावश्यक इति वदन्ति। कुन्तकः वामनस्य रीतिसिद्धान्तमपि देशं आधारं अस्वीकृत्य रचना शैलीमेव स्वीकृतवान्। अनेन रीतिशब्दस्थाने मार्गशब्दप्रयोगः कृतः। यथा वामनः वैदर्भी रीतिं मनुते। कुन्तकः सुकुमारमार्गमि इति। एवं वामनः

रीतिरिति कुन्तकः मध्यममार्ग इति वदति। भरतात् जगन्नाथान्तं विवादविषयी-भूतस्य अस्य शास्त्रस्य आचार्यान् नामग्राहं कथयामि।

साहित्यशास्त्रीयाचार्याणां परिचयः

(१) भरतमुनिः

साहित्यशास्त्रे भरतनाम्ना अनेके जनाः संस्कृतसाहित्ये श्रूयन्ते (१) दशरथ पुत्रः (२) दुष्यन्तपुत्रः (३) मान्धात्रिप्रपौत्रः (४) जडभरतः (५) नाट्यशास्त्र प्रवर्तकः। अत्राऽहं केवलं नाट्यशास्त्रकर्तुः भरतस्य चर्चा करोमि।

भरतमुनेः कालनिर्णयः दुष्करः। केचन भरतं काल्पनिकपुरुषं मन्यन्ते। डा० मनमोहनघोषः स्वीये नाट्यशास्त्राङ्गलानुवादे भरतं काल्पनिकं मन्यन्ते। नाट्यरङ्गशालायां ये पात्रान् सज्जयन्ति तेपि भरताः भवन्ति। अन्ते कश्चन पुरुषः स्वीकृतः। मत्स्यपुराणे २४ तमे अध्याये २७-३२ तमे श्लोके भरतस्य चर्चा दृश्यते। इत्थं कथा तत्र वर्तते यतः भरतः देवलोके लक्ष्मीस्वयम्बरं नाम नाटकं अभिनयति। तत्र उर्वशी लक्ष्म्याः अभिनयं करोति। तत्र देवसभायां इन्द्रेण सह पुरूरवा अपि उपस्थित आसीत्। यं दृष्ट्वा उर्वशी मुग्धा सती अभिनयं विस्मृतवती। ततः कुपितो भरतः पुरूरवसं उर्वशीं च शशाप। इयं चर्चा विक्रमोर्वशीये नाटके २।१८ अङ्के अकरोत्।

अनेके विद्वांसः भरतं विक्रमात् पञ्चशतकपूर्वं मन्यन्ते। अश्वघोषस्य सारिपुत्र-प्रकरणाख्ये अधुनैव खण्डितावस्थायां मिलिते नाट्यशास्त्रस्य प्रभावं पश्यन्ति।

भरतः केवलं नाट्यशास्त्रस्यैव रचयिता। अयं ग्रन्थः नाट्यशास्त्रेण सह समस्तकलानां विश्वकोषः इति वक्तुं शक्यते। स्वग्रन्थविषये भरतोऽपि कथयति—

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येस्मिन् यन्न दृश्यते॥

वर्तमानकाले नाट्यशास्त्रं ६००० श्लोकानां ग्रन्थः। एनं षट्साहस्त्रीसंहितापि कथयन्ति। इतः पूर्वं श्लोकानां द्वादशसाहस्त्री आसीत्। अयमपि शारदातनयेन स्वीये भावप्रकाशने उल्लिखितः। तेषां मते वृद्ध भरतः द्वादशसाहस्त्रीसंहिता रचिता अयं भरतस्तु षट्साहस्त्रीसंहितायाः कर्ता तेन लिखितमपि।

एवं द्वादशसाहस्त्रैः श्लोकैरेकं तदर्धतः।
षड्भिः श्लोकसहस्त्रैः यो नाट्यवेदस्य संग्रहः॥

अभिनवगुप्तपादाचार्याः ३६ अध्यायानां वर्णनं कृतवन्तः।

(२) मेधावी

साहित्यशास्त्रेतिहासे भरतमुनेः पश्चात् भामहात् पूर्वं अनेके आचार्याः सम्भवन्ति किन्तु मेधावी अथवा मेधाविरुद्र नामा कश्चन आचार्यः अभवत्। यस्य चर्चा भामह रुद्रटयोः व्याख्याकारेण नमि साधुना राजशेखरेण च कृता। मेधाविना उपमा दोषाणां विवेचना स्वग्रन्थे कृता। यथा (१) हीनता (२) असम्भवः (३) लिङ्ग-भेदः (४) वचन भेदः (५) विपर्ययः (६) उपमानाधिक्यं (७) उपमानासादृश्यं एषां सप्तप्रकारकाणां उपमादोषाणां भामहेन नमि साधुना वामनेन च चर्चा कृता। यथा—

हीनता सम्भवदोलिङ्गवचोभेदो विपर्ययः।
उपमानाधिकत्वं च तेनासदृशतापि च॥
त एत उपमादोषाः सप्तमेधाविनोदिताः।
सोदाहरणलक्ष्माणो वर्ण्यन्ते च पृथक् पृथक्॥

(—भामहः काव्यालङ्कारे २-३९, ४०)

अस्य मूलग्रन्थः नोपलभ्यते।

(३) भामहः

भरतमुनेरनन्तरं यस्य ग्रन्थः लभ्यते स भामहः। अस्य समयः विद्वद्भिः षष्ठशतकस्य पूर्वार्धोङ्गीकृतः। अस्य ग्रन्थे प्रत्यक्षं कल्पनापोढं इति दिङ्नागसूत्रेण अस्य पश्चाद्वर्तित्वं वक्तुं शक्यते। सप्तमशतकीये धर्मकीर्तिग्रन्थे प्रत्यक्षलक्षणं कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकं इति लिखितं। भामहः तन्न जानाति अतः षष्ठशतक एव इति वक्तुं शक्यते।

(४) दण्डी

भामहात् परं दण्डिनः कालः विक्रमस्य अष्टमशतकः इति वक्तुं शक्यते अयं अवन्ति सुन्दरी कथायां महाकवेः भारवेः प्रपौत्रं मात्मानम् अलिखत्। अतः अयं अष्टम शतकस्येति वक्तुं शक्यते।

दण्डिनः ग्रन्थाः

शाङ्‌र्गधरपद्धतौ १७४ श्लोके राजशेखरः उद्धरति

त्रयोऽग्नयस्त्रयो वेदा त्रयो देवास्त्रयो गुणाः।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः॥

तेषु प्रथमः काव्यादर्शः द्वितीयः, दशकुमारचरितम्, तृतीयः अवन्तिसुन्दरी कथा च।

अस्य सम्बन्धे

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्॥

(—काव्यादर्शः १-७)

अनेन दण्डी काव्ये दोषं सर्वथा न्यक्करोति। ग्राम्यत्वदोषप्रकरणे—

कन्ये कामयमानं मां न त्वं कामयसे कथम्।
इति ग्राम्योऽयमर्थात्मा वैरस्याय प्रकल्पते॥

(काव्यादर्शः १–६३)

अस्य श्लोकस्य स्थाने यदि ब्रूयात्—

कामं कन्दर्पचण्डालो मयि वामाक्षि निर्दयः।
त्वयि निर्मत्सरो दिष्ट्येत्यग्राम्योऽर्थो रसावहः॥

(काव्यादर्श १–६४)

दण्डिनः प्रभावः

भामहात् परं उत्पन्नः दण्डी अधिकां ख्यातिं प्राप्तवान्। दण्डिनः देशः दक्षिण-भारतमिति सिंहलकन्नड़भासयोः अस्य व्यापकप्रभावः सूक्तिमुक्तावल्यां शार्ङ्गधर-पद्धतौ। राजशेखरः लिखति—

सरस्वतीव कार्णाटी विजयाका जयत्यसौ।
मा वैदर्भगिरां वाचः कालिदासादनन्तरम्॥

(शा० प० १८४)

इयं विजयाङ्का विज्जिका नाम्नाऽपि प्रसिद्धिमाप। यथा दण्डी काव्यादर्शस्य प्रथमश्लोके सर्वशुक्लासस्वती इति लिलेख। विज्जिका तस्य खण्डने लिखति यत्--

नीलोत्पलदलश्यामां विज्जिकां मामजानता।
वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती॥

(—शा० प० १८०)

दक्षिणदेशेषु दण्डिनः प्रभावात् अयं दाक्षिणात्यः इति निर्णयं कुर्वन्ति।

(५) भट्टोद्भट

दण्डिनः परं भट्टोद्भटस्य नाम गौरवेण गृह्यते। अयं कश्मीरजो ब्राह्मणः इति नाम साम्यात् कल्प्यते। कश्मीरस्य राज्ञः जयादित्यस्य राजसभायां अयं सभापति-रासीत्। राजा एनं प्रतिदिनं एक लक्षदीनारेण सत्करोति। यथा—राजतरङ्गिण्यां-

विद्वान् दीनारलक्षेण प्रत्यहं कृतवेतनः।
भट्टोऽभूदुद्भटस्तस्य भूमिभर्तुः सभापतिः॥

(४–४९५)

जयापीडस्य कश्मीरे शासनकालः ७७९ ई० तः ८१३ ई० यावत् मन्यन्ते। अयमेव समयः उद्भटस्य।

काव्यालङ्कारसंग्रहः

उद्भटस्य अयं ग्रन्थ एव दृष्टिपथमायातः । अत्र ७९ कारिकाः सन्ति यासां वर्णनं अनेन प्रकारेणास्ति ।

प्रथम वर्गः (१) पुनरुक्तवदाभासः (२) छेकानुप्रासः (३) त्रिविधोऽनुप्रासः (४) लाटानुप्रासः (५) रूपकं (६) उपमा (७) त्रिविधदीपक (८) प्रतिवस्तूपमा

द्वितीय वर्गः (१) आक्षेपः (२) अर्थान्तरन्यासः (३) व्यतिरेकः (४) विभावना (५) समासोक्तिः (६) अतिशयोक्तिः ।

तृतीय वर्गः (१) यथासंख्यं (२) उत्प्रेक्षा (३) स्वभावोक्तिः ।

चतुर्थ वर्गः (१) प्रेयः (२) रसवत् (३) ऊर्जस्वित् (४) पर्यायोक्तं (५) समाहितः ।

पञ्चम वर्गः (१) अपह्नुतिः (२) विशेषोक्तिः (३) विरोधः (४) तुल्ययोगिता (५) अप्रस्तुतप्रशंसा (६) व्याजस्तुतिः (७) निदर्शना (८) उपमेयोपमा (९) सहोक्तिः (१०) सङ्करः (चतुर्विधः) (११) परिवृत्तिः ।

षष्ठ वर्ग—(१) अनन्वयः (२) ससन्देहः (३) संसृष्टिः (४) भाविकं (५) काव्यलिङ्गम् (६) दृष्टान्तः ।

एते अलङ्काराः कारिकाभिः वर्णिताः यत्र उदाहरणरूपेण कुमारसम्भवः उद्धृतः ।

(१) पुनरुक्तवदाभासः (२) काव्यलिङ्गम् (३) छेकानुप्रासः (४) दृष्टान्तः (५) सङ्कर एते पञ्च अलङ्काराः भामहस्य काव्यालङ्कारे न सन्ति किन्तु उद्भटः एव एतन् स्थापयामास । काव्यादर्शेऽपि एते न सन्ति ।

(१) उत्प्रेक्षावयवः (२) उपमारूपकम् (३) यमकं एते त्रयः अलङ्काराः भामहेन दण्डिना च उपमायां अन्तर्भाविताः । उद्भटः एवं न करोति ।

(१) लेशः (२) सूक्ष्मं (३) हेतुः एते त्रयः अलङ्कारा, दण्डिना स्वीकृता-भामहः निषेधति । उद्भटोपि तथैव—

(१) रसावत् (२) प्रेयः (३) ऊर्जस्वित् (४) समाहितः (५) श्लेषः एषां पञ्चालङ्काराणां वर्णनं भामहेन दण्डिना च कृतः किन्तु लक्षणं अस्पष्टम् । उद्भटः स्पष्टरूपेण प्रस्तौति इत्थं उद्भटस्य अनयोः वैशिष्ट्यं प्रतीयते ।

६. वामनः

उद्भटात् परं वामनस्य नाम अलङ्कार शास्त्रेतिहासे जागर्ति । अयं रीतिसम्प्रदायाचार्यः इति लोकः कथयति । अयमपि कश्मीराभिजनः । अयं कश्मीरराजस्य जयादित्यस्य मन्त्री आसीत् । यथा राजतरङ्गिण्यां उक्तम्—

मनोरथः शंखदत्तश्चटकः सन्धिमांस्तथा ।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ।।
(—४—४९७)

जयादित्यस्य राज्यकालः ७७९तः ८१३ ई० यावत् मन्यते । अतः अस्य कालः अष्टमशतकस्य अन्तिमः नवमशतकस्य आरम्भकालयोर्मध्ये आपतति । अयं स्वसूत्राणां कविप्रियानाम्नी वृत्तिर्विरचिता । यथाह स्वयमेव—

प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया ।
काव्यालङ्कारसूत्राणां स्वेषां वृत्तिर्विधीयते ।।

अस्य ग्रन्थस्य प्रथमः सूत्रभागः । द्वितीयः वृत्तिभागः । तृतीयः उदाहरण-भागः । उदाहरणेषु स्वरचिता अपि श्लोकाः उदधृताः अधिकांशतः अन्यग्रन्थानाम् ।

७-रुद्रटः--

वामनानन्तरं रुद्रटस्यनाम आयाति । अस्य द्वितीयं नाम शतानन्दः आसीत् । नाम्ना एतेऽपि कश्मीराभिजनाः आसन् । अयं स्वनाम अनेन प्रकारेण उक्तंवान्—

शतानन्दपराख्येन भट्टवामुकसुनुना ।
साधितं रुद्रटेनेदं समाजा धीमता हितम् ।।
(काव्यालङ्कारः ५।१२-१४ टीकायाम्)

अयमपि नवमशतकीयः इति राजशेखरकालादनुमीयते ।

८—आनन्दवर्धनाचार्यः—

साहित्यशास्त्रे रुद्रटात् परं आनन्दवर्धनाचार्यस्य नाम गृह्यते । राजशेखर एनं कश्मीराधिपतेः अवन्तिवर्मणः समकालिकं स्वीकरोति । यथा—

मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः ।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिबर्मणः ।।
(-राजतरङ्गिणी ५—४)

अयम् ईस्वीये नवमशतके जातः इति अवन्तिवर्मणः राज्यसमयपरिज्ञानम् सिद्धयति । अवन्ति वर्मणः समयः ८५५--८८४ ईस्वीयान्तं आसीत् । आनन्दवर्धना-चार्यस्य पञ्चग्रन्थाः उपलभ्यन्ते (१) विषमवाणलीला (२) अर्जुनचरितम् (३) देवीशतकम् (४) तत्त्वालोकः (५) ध्वन्यालोक' । अस्य ध्वन्यालोक ग्रन्थः ध्वनिसम्प्रदायस्य आधारभूतः अतीव महत्वं लभते । ध्वन्यालोकग्रन्थे काव्यस्यात्मा ध्वनिः स्वीकृतः । अत्र लोचनं नामग्रन्थः अभिनवगुप्तस्य । मन्ये ध्वन्यालोककारः लोचनकारस्य वंशजः आसीत् । ध्वन्यालोकस्य प्रशंसकेन लोचनकारेण लिखितम्—

किं लोचनं विनालोको भाति चन्द्रिकयापि हि ।
अतोऽभिनवगुप्तोऽत्र लोचनोन्मीलितं व्यधात् ।।

अत्र टीकाकारेण स्वटीकां विशेषयता अस्य माहात्म्यं सूचयामास ।

(९) अभिनवगुप्ताचार्यः—

ध्वन्यालोकस्य लोचनटीकाकारः अभिनवगुप्तः काश्मीरकः आसीत् ब्राह्मणश्च किन्तु अस्य अभिजनः कश्मीरे नासीत् । अभिनवगुप्तजन्मनः शतकद्वयात्पूर्वं उत्तरप्रदेशस्य कन्नौज नगरे निवसन्ति स्म । तदा अत्र यशोवर्मा राजा आसीत् । तस्मिन् समये कश्मीरे ललितादित्यः राज्यमकरोत् । एकदा कश्मीराधिपः कन्नौज देशं पराजित्य यशोवर्मणः सकाशात् अभिनवगुप्तं स्वदेशं निनाय । तत्र गृहादिकं निर्माय अत्रिगुप्तं भूम्यादिप्रदानेन समाजर्थां चकार । द्विशतकात्परं अस्यव वंशे अभिनव-गुप्तस्य जन्म । इदं सर्वं अभिनवगुप्तः स्वकीये तन्त्रालोकग्रन्थे अलिखत् । यथा—

निःशेषशास्त्रसदनं किलमध्यदेश-
स्तस्मिन्नजायत गुणाभ्यधिको द्विजन्मा ।
कोऽप्यत्रिगुप्त इति नामनिरुक्तगोत्रः
शास्त्राब्धिचर्वणकलोद्यदगस्त्यगोत्रः ॥

तमथ ललितादित्यो राजा स्वकं पुरमनायत ।
प्रणयरभसात् काश्मीराख्यं हिमालयमूर्धगम् ॥

तस्मिन् कुवेरपुरचारुसितांसुमौलि-
साम्मुख्यदर्शनबिरूढपवित्रभागे ।
वैतस्तरोधसि निवासममुष्य चक्रे
राजा द्विजस्य परिकल्पितभूमिसम्पत् ॥

तस्यान्वये महति कोऽपि बाराहगुप्त-
नामा बभूव भगवान् स्वयमन्तकाले ।
गीर्वाणसिन्धुलहरीकलिताग्रमूर्धा
यस्याकरोत् परमनुग्रहमाग्रहेण ॥

तस्यात्मजः चुलुखकेति जने प्रसिद्ध-
श्चन्द्रावदातधिषणो नरसिंहगुप्तः ।
यः सर्वशास्त्ररसमज्जनशुभ्रचित्तं
माहेश्वरीपरमलंकुरुते स्म भक्तिः ॥

नरसिंहगुप्तस्य पुत्रः अभिनवगुप्तः आसीत्। स्वकालसम्बन्धे (१) बृहती विमर्शिनी (२) क्रमस्तोत्रम् (३) भैरवस्तोत्रम्। एषां रचनाकालः कश्मीरप्रसिद्धः सप्तर्षिसंवत्सरः कलिसंवत्सरश्च लिलेख। तदनुसारं क्रमस्तोत्रस्य रचना कालः ९९० ई०।

भैरवस्तोत्रस्य रचना कालः ९६२ ईस्वीयः। बृहती विमर्शिनी ग्रन्थस्य रचना-कालः १०१४ ईस्वीयः आयाति। अस्य निर्देशः अभिनव गुप्तः इत्थं चकार।

इति नवतितमेऽस्मिन् वत्सरान्त्ये युगांशे,
तिथिशशिजलधिस्थे मार्गशीर्षावसाने।
जगति विहितबोधां ईश्वरप्रत्यभिज्ञां,
व्यवृणुत परिपूर्णां प्रेरितः शम्भुपादैः॥

१० राजशेखरः

दशमशतकीयस्य नाटककारस्य काव्यशास्त्रविवेचकस्य च राजशेखरः नामास्ति। राजशेखरः विदर्भदेशभवः। अस्य प्रतिहारबंशीयराजानौ महेन्द्रपालः महिपालश्च कन्नौजदेशीयौ शिष्यौ आस्ताम्। बालरामायणनाटके राजशेखरः इमौ प्रशंसितौ। अयं स्वं यायावरीयः लिखति। महाराष्ट्रे प्रसिद्धस्य अकालजलदाख्यस्य पौत्रः आसीत्। अस्य पितुः नाम दुर्दुक इति माता च शीलवती। अस्य पत्नी अवन्तिसुन्दरी आसीत्। काव्यमीमांसायां कर्पूरमञ्जर्यां च राजशेखरेण स्वपत्याः परिचयो दत्तः। अस्य ग्रन्थः (१) बालरामायणम् (२) बालभारतम् (३) विद्धशालभञ्जिका (४) कर्पूरमञ्जरी (५) काव्यमीमांसाच।

११ मुकुलभट्टः

प्रतिहारेन्दुराजः मुकुलभट्टं गुरुत्वेन स्वीचकार। अस्य समयः नवमशतकः। अस्य पितुः नाम कल्लटभट्टः। अयं कल्लटभट्टः अवन्ति वर्मणः समकालिकः। अस्य समयः ८५५-८८४ ईस्वीयान्तं स्वीकृतः। तदैव आनन्दवर्धनोप्यभूत्। मुकुलभट्टेन स्वग्रन्थे आनन्दवर्धनोद्भट विज्जिका प्रभृतीनां उल्लेखो विहितः। अयं मीमांसा शास्त्रस्य विद्वान् व्याकरणतर्कसाहित्यशास्त्रेप्येषां अधिकारः। अस्य अभिधावृत्ति-मातृका इति एक एव ग्रन्थ श्रुतिपथमायाति। अस्य मतं अवसरे अवसरे मम्मटः खण्डयति।

१२ धनञ्जयः

द्वादशशतके धनञ्जयः महान् साहित्यकः आसीत् किन्तु अस्य सम्बन्धः अलङ्कारशास्त्रतः अन्यत्र नाट्यशास्त्रे आसीत्। अस्य एक एव ग्रन्थः दशरूपकः अस्ति। भरतमुनेः नाट्यशास्त्रात् परं नाट्यशास्त्रसम्बन्धे अतिप्रसिद्धः महत्त्व-

पूर्णश्च ग्रन्थः अस्ति। भरतस्य नाट्यशास्त्रं विशालः विश्वकोशः अस्ति। अस्मिन् नाट्यस्य मुख्यविषयाणां यादृशी वर्णना अस्ति तेभ्यः अधिका अन्यसम्बद्धविषयाणां विस्तृतं वर्णनं दृश्यते। नाट्यस्य पारिभाषिकशब्दानां विशेषविषयाणाञ्च जिज्ञासुः यदि नाट्यशास्त्रमधीयीत तर्हि अतिपरिश्रमः काठिन्यं च प्रतीयेत। अत-एव धनञ्जयः नाट्यशास्त्रमाधारीकृत्य नाटकस्य भेदोपभेद सहितं दशप्रकारकरूपक-सम्बद्धं लघुना उपायेन दशरूपके लिखितम्। येन नाटकसम्बन्धिनः विषया सारल्येन बुद्धौ आयान्ति। अत एव अयं ग्रन्थः विद्वद्भिः आदृतः अध्ययने अध्यापने च प्रचारमलभत। अयं ग्रन्थः कारिकाणां त्रिशत्या लिखितो दृश्यते। अत्र चत्वारः प्रकाशाः। प्रथमप्रकाशे प्रयोजनप्रतिपादनप्रसङ्गे ग्रन्थकारेणोक्तम्, नाट्यानां किन्तु किञ्चित् गुणरचनाया लक्षणं संक्षिपाभि, तदनन्तरं पञ्चसन्धीनां अर्थोपक्षेपकानां आख्यानवस्तुभेदानां वर्णनाद् दृश्यते। द्वितीयप्रकाशे नायक नायिका भेदाः, कैशिक्या-दि वृत्तिभेदाः वर्णिता। तृतीयप्रकाशे नाटकलक्षणं प्रस्तावना अंक संविधानं कथा-भागानां औचित्यदृष्ट्या परिवर्तनम्। नाट्यरसाः पात्र संख्याः प्रवेशनिर्गमयोः नियमः वर्णितः। चतुर्थ प्रकाशे रसः स्थायिभावः व्यभिचारिभावानां विवेचनं रसनिष्पत्ति-प्रकारः रसास्वादे शान्तरसस्यानुपयोगिता अन्य रसानां स्थितिः विवेचिता। अन्ते-आत्मपरिचयविषये धनञ्जयः लिखति—

> विष्णोः सुतेनाऽपि धनञ्जयेन विद्वन्मनोरागनिबन्धहेतुः।
> आविष्कृतं मुञ्जमहीशगोष्ठी वैदग्ध्यभाजा दशरूपमेतत्॥

अनेन ज्ञायते अस्य पितुः नाम विष्णुः। अयं मालवादेशस्य परमारवंशीयस्य राजा मुञ्जस्य राजसभायां पण्डितः आसीत्। तत्रैव अमुम् ग्रन्थं लिलेख। मुञ्जस्य राज्य कालः ९७४–९९४ ईस्वीये असीत्। अयमेव धनञ्जनस्य कालः। रस निष्पत्तिविषये धनञ्जयः न व्यञ्जनावादी यतः चतुर्थप्रकाशे अस्याः खण्डनात् धनञ्जयस्य लघुभ्राता धनिकः दशरूपके अवलोक नाम्नी टीका लिखिता। अनेकाः टीकाः दशरूपकस्य सन्ति। आशु बहुरूपमिश्रस्य टीका महत्वं प्रकाशयति। एताः टीकाः हस्तलिखितरूपेण उपलभ्यन्ते किन्तु प्रकाशिताः न सन्ति।

१३—भट्टनायकः

भट्टनायकः दशमशतके प्रसिद्ध आसीत्। अस्य एक एव ग्रन्थः हृदयदर्पणं अद्यापि नोपलभ्यते। साहित्य क्षेत्रे ध्वनि विरोधिषु अस्य मतं अधिकं महत्वं प्रकाश-यति। अस्य हृदयदर्पणे ध्वन्यालोकसिद्धान्तस्य खण्डनं वर्तते। येनायं आनन्दवर्धना-चार्यात् अनन्तरं यातः इति कल्प्यते। अभिनवगुप्तेन ध्वन्यालोकलोचने हृदय-दर्पणस्य खण्डनं कृतम्। अतः आनन्दवर्धनाभिनवगुप्तयोः अन्तराले दशमशतके भट्नायकः आसीत् इति वक्तुं शक्यते। ध्वनिखण्डकः महिमभट्टः लिखति।

सहसायशोऽभिसतुं समुद्यताऽदृष्टदर्पणा मम धीः ।
स्वालङ्कारविकल्पप्रकल्पने वेत्ति कथमिवावद्यम् ।।

महिमभट्टः हृदयदर्पणं दिदृक्षुः नावलोकयामास इति तस्य मनसि महती चिन्ता । भट्टनायकः ध्वनिविरोधेन रसनिष्पत्तिविषयकप्रकारेण च महतीं ख्यातिं प्राप्तवान् । अभिनवगुप्तः ध्वन्यालोके नाट्यशास्त्रे च अस्य विरोधः कृतः भट्टनायकः रसं न खण्डयति किन्तु ध्वनिसिद्धान्तम् । अतएव अभिनवगुप्तः लोचने । अस्य उपहासो विहितः (वस्तु ध्वनिं दूषयता रसध्वनिं तदनुग्राहिकां समर्थयते इति सुष्ठुतरां ध्वनिध्वं सोऽयम्) ।

रसनिष्पत्तिसम्बन्धे भट्टनायकस्य मतं—

अभिधाभावना चान्या तद्भोगीकृतिरेव च ।
अभिधाधामतां याते शब्दार्थालङ्कृती ततः ।।
भावनाभाव्य एषोऽपि शृङ्गारादिगणो मतः ।
तद्भोगीकृतिरूपेण व्याप्यते सिद्धिमान्नरः ।।

अस्य अलङ्कारसर्वस्वे टीका इत्थं अस्ति ।

भट्टनायकेन तु व्यंङ्ग्यव्यापारस्यैव प्रौढोक्त्याऽभ्युपगतस्य काव्यांशत्वं ब्रुवतान्यग्भावितशब्दार्थस्वरूपस्य व्यापारस्यैव प्राधान्यमुक्तम् । तत्रापि अभिधाभावकत्वलक्षणव्यापारद्वयोत्तीर्णो रसचर्वणात्मा भोगापरपर्यायो व्यापारः प्राधान्येनविश्रान्तिधामतयाऽङ्गीकृतः ।'

१४. कुन्तकः—

साहित्ये वक्रोक्ति सम्प्रदायस्य संस्थापकः । अस्य समयः आनन्दवर्धनस्य अनन्तरं राजशेखर महिमभट्योरन्तराले मन्यते । अनेन स्वकीये वक्रोक्तिजीवितग्रन्थे भवभूतिराजशेखर कालिदास विरचितेषु वन्धसौन्दर्यसुमनेःषु मुक्तकेषु परिदृश्यते इति राजशेखरः महिमभट्टेन–

काव्यकाञ्चनकशाश्ममानिना कुन्तकेन निजकाव्यलक्ष्मणि ।
यस्य सर्वनिरवद्यतोदिता एष एव विनिर्दशितो मया ।।
(व्यक्तिविवेकः ।

अनेन ज्ञायते कुन्तकः महिमभट्टात् पूर्वमासीत् । राजशेखरस्य समयः कन्नौज राज्यस्य राजा महेन्दपालस्य तत्पुत्रस्य महिपालस्य च आधारेण दशमशतकस्य आरम्भभागः निर्धारयितुं शक्यते । महिभट्टस्य कालः एकादशशतक । यतः अलङ्कार सर्वस्वकारेण एकादशशतकभवेन महिमभट्टमतस्य उल्लेखः कृतः । तेन कुन्तकः दशमशतकस्यान्तिमेभागे आसीदिति मन्यते । कुन्तकः स्वीयेन एकमात्रवक्रोक्तिजीवितग्रन्थेन नाम्नः अमरत्वं ख्यापितवान् । महिमभट्टगोपालभट्टौ साहित्यसौदामिनीग्रन्थे लिखतः—

वक्रानुरंजिनीमुक्तिं शुक एव मुखे वहन्।
कुन्तकः क्रीडति सुखं कीर्तिस्फटिकपंजरे ॥

ध्वन्यालोकवत् अत्रापि कारिकावृत्त्युदाहरणानि इति त्रयः भागाः सन्ति। प्रथमे उन्मेषे प्रयोजनं लक्षणं विषयः सामान्यतया उल्लिखितः। द्वितीये उन्मेषे षड्विधवक्रतासु (१) वर्णविन्यासवक्रता, (२) पदपूर्वार्द्धवक्रता, (३) प्रत्यय-वक्रतानाम् प्रतिपादनं वर्तते। तृतीये उन्मेषे वाक्यवक्रता विस्तरेण विचारिता अस्यामेव अलङ्काराणां अन्तर्भावः। चतुर्थ उन्मेषे वक्रोक्तेः द्वौ भेदौ प्रकरणवक्रता, प्रबन्धवक्रता च निरूपितौ।

यद्यपि कुन्तकः अभिधावादी आचार्यः तथापि स लक्ष्यार्थं व्यङ्ग्यार्थावपि स्वीकरोति किन्तु तौ वाच्यार्थे अन्तर्भावयन्ति। यथा 'यस्मादर्थप्रतीतिकारित्वात् उपचारात् तावपि वाचकावेव। एवं द्योत्यव्यङ्ग्ययोरर्थयोः प्रत्येयत्वसामान्यादुप-चारात् वाच्यत्वमेव (का० १-८ तक) अस्य वाचकत्वस्य इदं लक्षणं 'कविविवक्षित-विशेषाभिधानक्षमत्वमेव वाचकत्वलक्षणम्' इति।

१५ महिमभट्ट :

कुन्तकात्परं महिमभट्टस्य ध्वनिविरोधिषु गणना भवति। अनेन एकादशशत-केजातेन अलङ्कारसर्वस्वकारेण रुय्यकेन कृतः वक्रोक्तिजीवितकारस्य कुन्तकस्य उल्लेखात् कुन्तकरूय्यकयोः मध्ये दशमशतकस्य अन्तिमे भागे महिमभट्ट आसीत्। अयं मीमांसकः। तत्र व्यञ्जनाध्वन्योः स्थानं नास्ति आत्मत्वस्वीकारे कुतः एतेषां प्रवृत्तिः स्यात्। अस्य ग्रन्थः व्यक्ति विवेकः। अयं ध्वनेरेवानुमाने अन्तर्भावयति —

अनुमानान्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम्।
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम् ॥

अयं व्यक्तिविवेकस्य रचयिता। यत्र त्रयः विमर्शाः। प्रथम विमर्शे ध्वनेः खण्डनं ध्वन्युदाहरणानां अन्तर्भावं लिलेख। द्वितीयविमर्शे काव्यदोषनिरूपणं अनौचित्यस्यमुख्यदोषत्वम्। तृतीये विमर्शे ध्वनेः उदाहरणानां अन्तर्भावं लिलेख।

१६. क्षेमेन्द्र :

क्षेमेन्द्रः साहित्यशास्त्रे औचित्यसम्प्रदायस्य संस्थापकः। अनेन कश्मीर नरेशस्य एकादशशतकारम्भे भवस्य अनन्तराजस्य नामोल्लेखः कृतः। अतः अस्य समयः एकादशशतकस्य आरम्भ एव निश्चीयते। अनेन अनेके ग्रन्था लिखिताः। ते सर्वे उपलब्धाः न शन्ति कतिपय ग्रन्था, उपलभ्यन्ते येषां नामानि इत्थं सन्ति। (१) वृहतकथामञ्जरी, (२) औचित्यविचारचर्चा, (३) समयमातृका एते उपलब्धाः सन्ति। अत्रयेषां उल्लेखः ते अष्टादश यथा (१) अवसरसारः (२) अमृततरङ्गकाव्यम् (३) कनकजानकी (४) कविकर्णिका (५) चतुर्वर्गसंग्रहः (६) चित्रभारतनाटकम्

(७) देशोपदेशः (८) नीतिलता (९) पद्यकादम्बरी (१०) बौद्धावदानकल्पलता (११) मुक्तावलीकाव्यम् (१२) मुनिमतमीमांसा (१३) ललितरत्नमाला (१४) लावण्यवतीकाव्यम् (१५) वात्स्यायनसूत्रसारः (१६) विनयवती (१७) शशिवंशः ।

अस्य ग्रन्थेषु औचित्यविचारचर्चा अलङ्कारशास्त्रग्रन्थः । अनेन औचित्यं रसस्य प्राणस्थानीयं अमानि—

औचित्यस्य चमत्कारकारिणश्चारुचर्वणे ।
रसजीवितभूतस्य विचारं कुरुतेऽधुना ।।

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ।।

क्षेमेन्द्रः स्वं व्यासदास नाम्ना लिखति यथा दशवतारचरिते—

इत्येष विष्णोरवतारमूर्तेः काव्यामृतास्वादविशेषभक्त्या ।
श्री व्यासदासान्यतमाभिधेन क्षेमेन्द्रनाम्ना विहितः प्रबन्धः ।।

(१०—४१)

१७. भोजराज :

धारानरेशः राजाभोजः विदुषां आश्रयः उदारः दानशीलश्च भारतेतिहासे प्रसिद्धः । अस्य शासनकालः एकादशः शतकः । अस्य गुणानां प्रशंसा राजतरङ्गिण्या दृश्यते । कश्मीर देशस्य राजा अनन्तराजः भोजदेवश्च समकालिकौ । अनयोः विद्वत् प्रियतायाः चर्चा राजतरङ्गिण्यां सप्तमे तरङ्गे एवं दृश्यते—

स च भोजनरेन्द्रश्च दानोत्कर्षेण विश्रुतौ ।
सूरी तस्मिन् क्षणे तुल्यं द्वावास्तां कविबान्धवौ ।।

अस्य समयस्य प्रमाणत्वेन एकः शिलालेखः उपलभ्यते । यत्र भोजराजः गोविन्दभट्टस्य पुत्रं धनपतिभट्टं ग्रामदानमकरोत् । यत्र अयं तस्य स्वहस्तः । इति । संवत् १०७८ चैत्र सुदि स्वयमाज्ञा मङ्गलं महाश्रीः । स्वहस्तोऽयं भुजदेवस्य ।

अत्र संवत् १०७८ वैक्रमः, ईस्वीयः सन् १०२१ उल्लिखितः अस्ति । अस्य द्वौ ग्रन्थौ एकः सरस्वतीकण्ठाभरणम् । अपरः शृङ्गारप्रकाशः । सरस्वतीकण्ठाभरणं अलङ्कार-शास्त्रस्य ग्रन्थः । द्वितीयः शृङ्गारप्रकाशः विशालकायः ग्रन्थः । अत्र ३६ प्रकाशाः प्रथम अष्टौ प्रकाशेषु अर्थविषयकं अनेकेषां वैयाकरणानां मतं नवमदशमप्रकाशयोः दोषाणां विवेचनं एकादश द्वादशप्रकाशयोः महाकाव्यनाटकयोः लक्षणादिवर्णनं अन्येषु २४ प्रकाशेषु रसविवेचनं उदाहरणसहितं विचारितं वर्तते । अयं शृङ्गारं प्रधानमलङ्कारं मनुते । यथा—

शृङ्गारवीरकरुणाद्भुतरौद्रहास्यबीभत्सवत्सलभयानकशान्तनाम्नः।
आम्नासिषुर्दशरसान् सुधियो वयं तु शृङ्गारमेव रसनाद् रसमामनामः ॥

१८. स्वामिश्रीहरिहरानन्द सरस्वती :

अयं भक्तिरसस्य संस्थापकः। भक्तिरसार्णकस्य कर्ता विंशतितमशतके जातः १९८२ ईस्वीये वाराणस्यां केदारघट्टेमुक्तोऽभवत्।

अनेन संस्कृते हिन्द्यां च ग्रन्थाः लिखिताः। तत्र संस्कृते १. समन्वय-साम्राज्यसंरक्षणम् २. भक्तिरसार्णवः ३. वेदस्वरूपविमर्शः ४. चातुर्वर्ण्य-संस्कृतिविमर्शः ५. भारतीय राजनीतिदर्शनम् ६. वेदार्थपारिजातः, ७. वेदभाष्यम्। ८. श्रीविद्यार्णवः ९. श्रीविद्यावरिवस्या च।

अयं महताटोपेन भक्तेः रसत्वं स्थापयामास।

१९. मम्मटः काव्यप्रकाशकारः—

भोजराजात् परं अस्य कालः। अयं कश्मीरजः कश्मीराभिजनानां पण्डितानां लोकचर्चया अयं नैषधीयचरितरचयितुः श्रीहर्षस्य मातुलः किन्तु अयं प्रवादः न सत्यः श्रीहर्षः न कश्मीराभिजनः। भीमसेनेन सुधासागरटीकायां अयं कश्मीरदेशीयस्य जैय्यटस्य पुत्रः आसीत्। अयं वाराणसीस्थः, छात्रः उव्बट कैय्यटौ मम्मटानुजौ इति भीमसेनः लिखति—

शब्दब्रह्म सनातनं न विदितं शास्त्रैः क्वचित् केनचित्।
तद्देवी हि सरस्वती स्वयमभूत् कश्मीरदेशे पुमान्॥
श्रीमज्जैयटगेहिनीसुजठराज्जन्माप्य युग्मानुजः।
श्रीमन्मम्मटसंज्ञयाश्रिततनुं सारस्वतीं सूचयन्॥
मर्यादां किल पालयन् शिवपुरीं गत्वा प्रपठ्यादरात्
शास्त्रं सर्वजनोपकाररसिकः साहित्यसूत्रं व्यधात्।
तद्वृत्तिं च विरच्य गूढमकरोत् काव्यप्रकाशं स्फुटं
वैदग्ध्यैकनिदानमर्थिषु चतुर्वर्गप्रदं सेवनात्॥
कस्तस्य स्तुतिमाचरेत् कविरहो को वा गुणान् वेदितुं।
शक्तः स्यात् किल मम्मटस्य भुवने वाग्देवतारूपिणः॥
श्रीमान् कैयट औवटौ ह्यवरजौयच्छात्रतामागतौ।
भाष्याब्धिं निगमं यथाक्रममनुव्याख्याय सिद्धिं गतः॥

अनेन विवरणेन भीमसेनस्य—

आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना।
मन्त्रभाष्यमिदं क्लृप्तं भोजे पृथ्वी प्रशासति॥

इति श्लोकेन खण्डितं भवति । अतः मम्मटेन कैय्यट उव्वट जैय्यटानां नास्ति सम्बन्धः । एवं सम्भवति भोजरात्परं भोजराजस्य अन्तिमे वा काले मम्मटः आसीत् । भीमसेनस्य मतं प्रमाणकोटिं नार्हति ।

मम्मटात् किञ्चिदधिकार्धशताब्द्या अर्वाग्भवो माणिक्यचन्द्रः संङ्केताख्ये स्वकीये विवरणे इममेव ग्रन्थं—'सर्वालङ्कृतिभालभूषणमणिः' इति विशेषितवान् । नवीनतराः केचन ग्रन्थकृतं वाग्देवताऽवतारत्वेनापि व्यपदिदिशुः । सम्प्रदाय-शोधितां सरणिमनुसरतां बहूनां विमर्शकानां मते कारिकावृत्त्युदाहरणभेदभिन्नस्य ग्रन्थावयवत्रयस्य परिपाटीसामग्री परां कोटिमधिरूढा ।

कृतः श्रीमम्मटाचार्यवर्यैः परिकरावधिः ।
प्रबन्धः पूरितः शेषो विधायालकसूरिणा ॥

इति काश्मीराभिजनस्य ग्रन्थकर्तृविषये तद्देशीयो विदुषां मध्ये प्रचरन् प्रवादः प्राचीनतमटीकाकृतां तत्रत्यानां रुचकाचार्याणां स्वल्पपरिसरादप्यनर्घ्यादन्वर्थनाम्नः संकेताख्यविवरणात् समर्थ्यते । ते खलु ग्रन्थमिमं 'महामतीनां प्रसरणहेतुम्' इत्यभ्य-र्चयन्त उपसंहारे'—एष ग्रन्थो ग्रन्थकृताऽनेन कथमप्यसमाप्तत्वात् परेण च पूरितशे-षत्वाद् द्विखण्डोऽप्यखण्डतया यदवभासते तत्र सङ्घटनैव साध्वी हेतुः । नहि सुघटितस्य सन्धिबन्धः कदाचिल्लक्ष्यत इति तात्पर्यपूर्णं मन्तव्यं विदधुः । ग्रन्थान्ते ग्रन्थकृन्निर्देशः—'समाप्तमिदं काव्यलक्षणम्' इति ग्रन्थपरिपूरकेण श्रीमदलटसूरिणा शास्त्रनाम्नैव ग्रन्थपरिचयो विहितः । नाविदितं व्युत्पत्तिमतां यत् प्राचीनैरस्य शास्त्रस्य 'काव्यलक्षणम्' इति व्यपदेशः कृतः । न तु ग्रन्थस्यास्य काव्यलक्षणमिति विशिष्टा संज्ञा । समग्रैव वृत्तिरलटकृतिरिति साधयितुं केषामप्यधुनातनानां प्रयासोऽविवेकविजृम्भितमिति नादर्तव्यः । ग्रन्थकृतोरतिसन्निकृष्टभाविनः काव्या-नुशासनकर्तुराचार्यहेमचन्द्रस्य समग्रग्रन्थस्य ग्रन्थकृत्कृतत्वेऽनुज्ञानमत्र बलीयः प्रमाणम् ।

यश्चापि मध्यकालीयानां केषामपि[१] वृत्तिग्रन्थस्यैव कर्ता मम्मटो न कारि-काग्रन्थस्येति दुःसाहसप्ररूढो निर्घोषः, सोऽपि तत्कालसुलभधृष्टताया एव सूचको न तत्त्वतो ग्राह्यः । ग्रन्थकालस्तावद् विक्रमशकीयद्वादशशताब्द्याः पूर्वार्धान्त्यदशकम् इत्यधुनोपलभ्यमानतत्त्वतो ग्रहणीयम् । मूलग्रन्थे निपुणैरूहनीयं संघटनाप्रवणत्वं तत्र च व्यापारे तस्य पारङ्गमत्वं ग्रन्थपरिपूरकेणानुल्लिखितमपि समर्थयतां प्राचीनानां टीकाकृतां श्रीधरादीनां दृष्टिभङ्गिरभ्यर्थनीयतामर्हति ।

---

१. महेश्वरन्यायालङ्कारविरचिते काव्यप्रकाशादर्शे समग्रा०.ामपि कारिका०ण एवं नवीनतराणां गौडीयवैष्णवबलदेवविद्याभूषणानां भरतमुनिप्रणोतप्वख्यापनम् । साहित्यकौमुद्याख्ये काव्यप्रकाशविवरणे ।

काव्यस्वरूपनिरूपणपरा विविधवाद-विसंवादनिदानभूता तत्रत्या कारिका—
"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः॥' इति।

इयं प्रायः कारिकाद्वयत्वेन भिन्नतया पठ्यते। अत्र पूर्वार्धे 'तत्' इति सर्वनाम्ना कालतो दूरवर्तिभिः प्राचीनैर्भामहोद्भटादिभिरलङ्कारमाहात्म्यवादिभिः परिगृहीतं काव्यस्वरूपम्, उत्तरार्धे च 'इदम्' इति सन्निकृष्टैर्नव्यप्रस्थानमास्थितवद्भिरानन्दवर्धनाभिनवगुप्तादिभिरनुशीलितं काव्यस्वरूपमुद्दिष्टमिति व्याख्याभङ्गिरितस्त्रिशव्याख्याभङ्गिरितस्त्रिशद्वर्षादपि प्रागस्माभिर्निरदेशि (का०प्र० सङ्केते, पृ०४)। इत्थं ग्रन्थसूचनायामेव मतद्वयसङ्घटनेति निरपलपं भवति। निवेश एव न पुनः समन्वय इत्याकूतं मनसिकृत्य सन्देहदोलायमानतां कल्पयित्वा केचन एतामेतदाश्रयग्रन्थं च दूषयामासुः। अत्र सम्पाद्यमानटीकायाः कर्ता चण्डीदास एषामन्यतमः कालत आदिमश्चेति प्रतिभाति।

वस्तुतस्तु ग्रन्थेऽस्मिन् नव्यप्रस्थाने आस्थावत्ता तदुचितविन्यासवैदग्धी चेति प्रेक्षावतां कस्यापि न काऽपि विप्रतिपत्तिः। तथाहि— द्वितीयोल्लासतः पञ्चमोल्लासपर्यन्तं तथोत्तरार्धे दोषगुणालङ्कारस्वरूपनिरूपणपरे नवीनप्रस्थानस्यैव निर्देशकत्वसंस्था सुस्थिता। एवं वस्तुस्थित्यामपि भङ्गीवैचित्र्यस्य नापहस्तितत्वमिति सङ्घटनापदव्याख्याने विवेककृता श्रीधरेण स्फुटमेवास्माभिरपि दिग्दर्शनन्यायेनात्र 'ग' परिशिष्टे चेष्टितम्। अत्र ग्रन्थकृदनुसृतमार्गं भामहोद्भटवामनरुद्रटानन्दवर्धनाभिनवगुप्तादीनां सुप्रथितानां तथा भट्टनायककुन्तकमहिमभट्टादीनामप्रथितानामपि महीयसामलङ्कारकृतां मतानि क्वचिदनुरणनतया बहुशश्चाविकलेन तत्तद्ग्रन्थसङ्कलनेनोपह्रियमाणानि लक्ष्यन्ते। तथा च भट्टनायकमन्तव्यस्य 'काव्ये रसयिता सर्वः' इति, तथा 'रसस्य च द्रुतिविकाशविस्ताररूपभागत्रयम्' इति च तन्मतस्यानन्दवर्धनानुमोदितं गुणानां त्रैविध्यमवतारयतापि ग्रन्थकृताऽनुरणनरूपेणोपयोगः साधितः।

वक्रोक्तिजीविते (१।२-१०) विच्छित्तेरेव सौन्दर्यहेतुतेति घोषणं स्पष्टतो मम्मटेन वैचित्र्यमलङ्कारः' इत्यलङ्कारनिदानतायामनेकशः स्मृतम्। न च भामहमन्तव्यं 'सैषा सर्वैव वक्रोक्तिः' इति तत्त्वे प्रकल्पतामिति वाच्यम् तस्याः प्रकरणादतिशयोक्तिरूपालङ्कारविशेष एव चारितार्थ्यात्। कुन्तकमतस्यानुरणनकल्पेन सप्तमोल्लासे उदाहरणप्रसङ्गे 'सदा मध्ये यासाम्' इत्यादिपद्योपरि वृत्तिः सुकुमारमार्गमवतारयन्ती वक्रोक्तिजीवितस्य 'सन्ति तत्र त्रयो मार्गाः' (१।२४) इत्यारब्धे मार्गप्रकरणे लक्षितं सुकुमारमार्गमाक्षिपतीति टीकाकृतां श्रीधरसोमेश्वरप्रभृतीनां निर्देशतः प्रतिपाद्यते। उदाहरणसमृद्धावपि

ग्रन्थत इतः प्राचां ग्रन्थानां बहूनामधुना लुप्ततयैव मतानां मुखप्रेक्षिता कक्षीकृतेति नतिरोहितं विपश्चिताम्।

महिमभट्टप्रभाव इत ऊर्ध्वं प्रघट्टकान्तरे सूचयिष्यते। टिप्पण्यां च यथास्थानमनुशीलितश्च सः। इममेव कल्पमनुगृह्णानश्चण्डीदासादव्यवहितप्राक्तनः प्रथितो मैथिलः सान्धिविग्रहिकः श्रीधरो ग्रन्थस्यान्तिमवाक्यव्याख्याया अवतरणिकाम् अस्य ग्रन्थस्य व्यापकत्वमितरग्रन्थेभ्यो वैचित्र्यं दर्शयतीति निर्दिशन् 'विक्षिप्तानां सुखबोधायैकत्र संग्रहः सङ्घटना तद्वशादेवैकात्मताप्रतिभासात्' इति व्याचष्टे (का० प्र० वि० ४३९ पृ०)।

एवं विचार्यमाणे यदिदानीन्तनैर्निबन्धकृद्भिः कैश्चिद् विमर्शकैः काव्यप्रकाशकृतां मौलिकत्वमुद्घुष्यते तत् सर्वथा साबाधं भवतीत्यङ्गीकर्तव्यमेव। परन्तु निबन्धकृतां सम्प्रदायप्रहतवर्त्मानुशीलने सिद्धान्तनिष्ठायां च प्रयासिनां तेन किं तावदगौरवमित्यास्माकं न सुबोधम्। न च ग्रन्थस्य कुत्रापि काव्यस्वरूपनिरूपणावसरे प्राचीनमतध्वंसे कोऽप्याटोपो लक्ष्यते।

न च गुणलक्षणे (का. प्र. ८ म उ.) वामनोद्भट्योर्मतयोराक्षेपरता मौलिकत्वेनोद्भावनीया तस्या आनन्दवर्धनोपज्ञत्वात्। अन्वयव्यतिरेकानुविधायितया परिवृत्तिसहत्वनयस्य ध्वनिदोषगुणालङ्काराश्रये प्रस्तावितस्य मम्मटादर्वाचीनानां ग्रन्थेषु साधारण्येन पुनः सर्वतः स्वीकृतत्वेननानुग्राह्यतया तत्पूर्वभाविनामभिनवगुप्तावधीनां ग्रन्थेष्वदर्शनहेतुर्यदि तावन्मौलिकत्वकल्पे निदर्शनं मन्यते (यदभ्युपगमवादकल्पेऽस्माभिरुपस्थापितम्) तत्तूपायस्यैव गौरवत्वेन न त्वौपयिकस्येति सन्तोष्टव्यम्।

तत्रापि विचिकित्सा सम्भवेद् वामनकृतायाँ काव्यालङ्कारसूत्रवृत्तौ (१।३।२५) पदस्य तस्योपलम्भात् बहुनामाकरग्रन्थानामधुनाऽलाभाच्च। यद् द्वितीयोल्लासेऽभिधाऽदिवृत्तिविवेचनं स्वच्छं प्रकृतोपयोगि तत् पूर्वनिबन्धृभी रुद्रटाद्यैरनुत्थापितमपि न मौलिकत्वेनोदाहर्तुमुचितमिति 'ग' 'घ' परिशिष्टीयसंग्रहतः सूच्यते।

एवमेव पञ्चमोल्लासीये व्यञ्जनास्थापने प्रवृत्तिदार्ढ्यपक्षे योहनीया सिद्धान्तनिष्ठा यन्मतसमावेशसौष्ठवं च एते एव निबन्धग्रन्थानामादरणीयत्वे प्रभवतः। शास्त्रे प्रतिष्ठितान् ग्रन्थान् प्रति कालवशात् तदुच्छेदाशङ्कयोपचीयमानः पक्षपातो ग्रन्थकृतो मूलोपचयमेव साधयति तेषामनुशीलनेन ग्रन्थस्य चरितार्थतैव स्यात्।

यदाहुः—कलिकालसर्वज्ञा हेमचन्द्राचार्याः प्रमाणमीमांसायाम्— अनादय एवैता विद्याः संक्षेपविस्तरविवक्षया नवनवीभवन्ति, तत्कर्तृकाश्चोच्यन्ते। किं नाश्रौषीर्न च कदाचिदनीदृशं जगत्' इति। एवं कृते संग्रहे संक्षिप्ताकारेण सन्निवेशेन विषयविन्याससैलीसौष्ठवेन च काव्यप्रकाश एव ग्रन्थान्तराण्यतिशेते। ध्वन्यालोक-

प्रवर्तितेनालङ्कारशास्त्रीयपदार्थविशदनेन तमेव ग्रन्थं परिष्कुर्वता परिपूरयता चानेन न केवलं शास्त्रप्रचारे शृङ्खला संहतिश्च साधिता, अपि तु शास्त्रार्थमधिजिगमिषूणामसमं साहाय्यं कृतम् । मम्मटस्याव्यवहितपूर्ववर्तिनां कुन्तकमहिमभट्टादीनां स्वस्वक्षेत्रे सार्थकप्रयासानामपि स्थूलतोऽवस्तुनिर्बन्धपरत्वमेकदेशदृष्टिदुष्टिः प्रगल्भभाषित्वं चानपह्नवनीयानींति न ते तस्य गौरवमपहरेयुः ।

अपरथाऽप्यनवद्यरूपा काव्यप्रकाशकर्तुः स्वकीयशास्त्रस्य परिधिविषये सचेतनता । मम्मटस्यान्यतरे शब्दव्यापारविचाराख्यप्रकरणग्रन्थे पातञ्जलमहाभाष्य शबरभाष्य-वाक्यपदीय-भट्टकुमारिल,मुकुलभट्टादिपरिशीलतां मीमांसकवैयाकरणतार्किकमतविसंवादधारामतीत्य योऽलङ्कारनिबन्धकृतो भङ्गीभेदः काव्यमर्हितोदाहरणलोचनद्वारा लक्ष्यते (श. व्या. वि. पृ. ४–२०), येन च समग्रस्य तस्य काव्यप्रकाशीयद्वितीयोल्लासस्योद्धारतयेव परिचयो न पर्याप्त इति प्रतीयते, तत्रालङ्कारिकवर्याणां महत्तराणामुद्भटानां यथा भामहविवरणग्रन्थतो सूचितं साहाय्यकं तत्त्वेनातिरिच्यते शास्त्रमिदं व्याकरणच्छन्दोविचितिवत् प्रयोगशास्त्रम् । लक्ष्याणि चात्र लक्षणांशतो न हीयन्ते, यथाऽन्यत्र शुष्कतर्कमीमांसादौ । एतदर्थमेव तत्सहचारितया प्रचरतां काव्यग्रन्थानामुपयोगास्तदनुविधायिनी लक्ष्यघटना च सुतरां वर्तते ।

प्रायशः सर्वेऽपि ग्रन्थकृतस्ततः प्राञ्चस्ततोऽर्वाञ्चश्च काव्यलक्षणमेतच्छास्त्रमिति प्रत्यभिजानन्ति । काव्यप्रकाशमेवादर्शत्वेनोपकल्प्य विभिन्नप्रान्तेषूपजीव्यतया स्थितामलङ्कारनिबन्धानाम् आचार्यहेमचन्द्रकृतकाव्यानुशासन–विद्याधरकृतैकावली – विद्यानाथकृतप्रतापरुद्रीयविश्वनाथकृतसाहित्यदर्पण- गौडीयकविकर्णपूरकृतालङ्कारकौस्तुभान्ध्रीयपण्डितराजजगन्नाथकृतरसगङ्गाधरविश्वेश्वरपण्डितकृतालङ्कारकौस्तुभादीनां विरचनमजनि । सर्वे एवैते प्रायशो वृत्तिनिरूपणप्रकरणे ध्वनिभेदोपस्थापनविषये दोषगुणयोरालोचने चमम्मटमार्गमेवानुसरन्ति । काव्यलक्षणनिरूपणे बहुभिस्तदानुषङ्गिककाव्यविभागाप्रकल्पेन च कैरपि यो मम्मटमतखण्डने आडम्बरः प्रदर्शितः, स खलु मम्मटनिर्दिष्टकाव्यस्वरूपस्यायथाघोषणस्तेषां नवीनमानित्वख्यापनतश्च समुद्भूत इत्यपक्षपातया सूक्ष्मेक्षिकया स्फुटीभवति । अधुनोपलभ्यमानानां द्वित्राणां काव्यप्रकाशखण्डनसन्दर्भाणां विषयेऽपीयमेव वार्ता ।

एतत्तु काव्यप्रकाशमधीयनानां कोविदानां निश्चप्रचः सिद्धान्तो यदर्थालङ्कारनिरूपणांशोऽस्य न तथा मनोज्ञो यथेतरेंऽशाः । यद् विद्यानाथविश्वनाथादिभिरलङ्कारविवेचने मम्मटमहायालङ्कारसर्वस्वकृतोऽनुसरणं तत् तस्य तत्रायोगक्षेमतामेव सूचयति । प्राचीनाष्टीकाकृतः श्रीधरादयः सर्वस्वकृतं रुचकमेव प्रामाणिकतया मेनिरे । चण्डीदासस्यापि तथैव प्रवृत्तिरिति काव्यप्रकाश-

दीपिकातः प्रतिभाति। अर्वाग्भवानामालङ्कारिकाणामग्रिमत्वेन स्वीक्रियमाणः पण्डितराजजगन्नाथोऽपि न सर्वथाऽत्र विषये मम्मटपक्षपाती। न च सर्वस्वकारमाक्षिपन्नपि नासावुद्देशादिप्रकल्पेनानुसृतः। एतदालोचनं प्रकृतानुपयोगात्यत्रैव विरम्यते।

सम्प्रदायानुबन्धिनो नवीनस्यापि मम्मटस्य यदत्र क्षेत्रे प्रथितनाम्ना भामहोद्भटानन्दवर्धनादीनामिव यशः सौभाग्यभोगिता, तत्र कारणनिराकरणं नातीव दुरूहम्। प्रथमं तावत् स्वल्पं तथायुः' इति नयेनैकदा लब्धलक्ष्याणामपि नैसर्गिकपञ्चभूतक्रियाप्रतिक्रियातो ध्वंसप्रवणानां बहूनां मतसङ्कलनामयं गौरवं तया च दिशा तेषामेकाधारे प्रत्युज्जीवनं तेषाञ्जसा प्रावर्ति।

न चानया युक्तिपरम्परया नवीनतमानामेवेतरातिशायिगौरवाशंसेति वाच्यम्, यतः प्रवाहपतितास्ते न सर्वथा सामग्र्येण तमतिशेरते। केचन विशदतया, केचिद् युक्तिसंभारेणोदाहरणमहिम्ना वा केऽपि च प्रत्यग्रया परिनिष्ठितार्थविषयोन्मेषया दृष्टया चाधिकतरामभ्यर्थनीयतामर्हन्ति, परन्त्वखण्डैकान्तिकसौष्ठवेन नैतत्समकक्षास्ते भवितुमर्हन्ति। सुश्लिष्टता विषयविन्यासपरम्परायाम्, स्वल्पपरिसरतः कारिकारचनायामतर्कितपूर्वा योजना वृत्तिग्रन्थे स्वयं सम्पूर्णता चैता वस्तुतन्त्रे ग्रन्थमिममनन्योपमं साधयन्ति।

अनुपयोगिनोऽनपेक्षितस्य वा परिहारं यथाऽर्थबोधेऽपोहवादस्य, विभागदृशा भेदप्रपञ्चस्य च शास्त्रजीवातोरपि 'तेषामन्यत्र विस्तरः' इत्याद्याभाणकेनोपेक्षितस्य रसभावादितत्त्वस्य नियोजनम्, काव्यालङ्कारतन्त्रयोर्जलधिकल्पयोरुन्मथनेन रत्नमिवोदाहरणानां विनिवेशम्, केषामपि प्राचीनानां व्याकरणमीमांसादिविश्लेषणतया परस्मात् शास्त्रादुत्कृष्य चमत्कृतितत्त्वस्य समवधाने समाहिततां च सममेव विदधदयमपूर्वतयोद्भासते। सत्काव्यतत्त्वविषयस्यानन्दवर्धनाचार्यैर्व्याकरणे या दिगुन्मीलिता तस्या एव परिपूरकतयाऽयं प्रावर्तत इति टीकाकृताऽस्य ध्वनिप्रकरणरहस्यत्वेन निर्देशः।

यत् केषाञ्चिन्मुष्टिमेयानां विवरणभङ्गिरेनं कदर्थयितुमुद्युक्ता खद्योतकल्पा स्फीतालोकसम्मुखीनेव भजते निष्प्रभतामेवेति दूरे चास्य दोषविमर्शनम्।

'न तावत् स्थाणोरयं दोषो यदन्धो नैनं पश्यतीति'न्यायेन ते दोषदर्शिनोऽन्धा गुणविषयेष्विति। आधुनिककालपरिप्रेक्षितेन चाध्येतृणामनुसन्धातृणां च युगपन्मुदमादधानोऽयं ग्रन्थः काव्यसमालोचनक्षेत्रेऽनन्यसामान्य एव। अन्यैरयमाशय एतद्ग्रन्थप्रसरणग्रहश्च संग्रहश्लोकेनेतरत्रेत्थं निष्कृष्टो यथा—

सुश्लिष्टसूत्रैः श्रितशास्त्रसारा ससौष्ठवौदार्यमितप्रकारा।
पाण्डित्यवैदग्ध्यविचित्रमूर्तिः प्रकाशतां मम्मटकीर्तिपूर्तिः॥

काव्यप्रकाशटीकाकृतः

'काव्यप्रकाशस्य कृता गृहे गृहे टीका' इति महेश्वरकृतः स्वकृतटीकाऽवतरणिकायामुक्तिः। श्रीमद्भगवद्गीताग्रन्थरत्नं विहाय सुरभारतीनिबद्धेषु ग्रन्थेषु नान्यस्य कस्योपरि एतादृशी टीकाविरचनप्ररोचना श्रुता दृष्टा च। ग्रन्थस्य मुख्यतस्तत्कारिकावृत्तिविभागयोरुभयोरप्यतिमिततया दुर्गमप्रायता यथेतत्कल्पे प्रयोजिका तथैव ग्रन्थस्य व्यापकत्ववैचित्र्यादिद्वाराऽसामान्यलोकप्रियता। बृहत्तरभारतवर्षे चाप्यस्य प्रचारः समजनीति प्रत्नग्रन्थाविष्कारसिकैः पण्डितवर्यैं राहुलसांकृत्यायनैः प्रार्दशि।

नवीनतरकोविदानां परस्परं वादजिगीषा चात्र तथा प्राबल्यमनीयत यथा न केवलं स्वकवंशीयैर्यदत्र प्राचीनानामलङ्कारग्रन्थटीकारचने स्वाग्रहव्याग्रिमा स्वपितु टीकया सह पुत्रो विजयगौरवलोभेऽचेष्टत। साकल्येनाधुनैकशतं टीकानां ज्ञायते। काश्चन प्राकाश्यं नीता बहुतराश्च मातृकातो लब्धपरिचया वर्तन्ते। महदिदं कोतुकावहं यदीदृक्तया विदितास्वेतासु ग्रन्थकृतः प्रान्तप्रस्थानां कृतयोऽत्यल्पसंख्यकाः। प्राचीनतमतयाऽद्यत्वे परिचितस्यान्वर्थसंज्ञकस्य काव्यप्रकाशसङ्केतस्य कर्तू राजानकरुचकात् प्राचीनतरः कोऽपि टीकाकृदासीदिति निःसंशयँ वक्तुं न पार्यते। रुचक ग्रन्थश्च मूलग्रन्थादर्धशताब्द्या व्यवहितः। रुचकव्यतिरिक्तानां प्राचीनानां काश्मीरकाणां द्वित्राणां ग्रन्था एवोपलभ्यन्ते, यथा शैवागमकोविदस्यानन्दकवेः तथा काव्यप्रकाशनिदर्शनाकृतो राजानकरत्नकण्ठस्य सारसमुच्चयः। उभावेन संग्रहग्रन्थस्थानीयौ।

मैथिलानां कृतयो न्यूनकल्पे पञ्चविंशतिष्टीका ज्ञायन्ते यासां प्राचीनतमा वाचस्पतिमिश्रकृता या रुचककृतसङ्केतात् किञ्चिदर्वाचीनेति संभाव्यते। अस्मन्निबन्धे एतस्योद्देशो विवरणं च। सेयमधुना विलुप्तैव संभाव्यते। श्रीधरचण्डीदासविश्वनाथादयः पूर्वप्रान्तीयानामधुना विदिता टीका न्यूनकल्पे विंशतिर्यासां प्राचीनतमा वामनीयकाव्यालङ्कारसूत्रवृत्तिभट्टिकाव्यकलापव्याकरणटीकाद्यनेकग्रन्थकर्तुः पुण्डरीकविद्यासागरनाम्नो विद्यासागरीत्याख्या टीका। नैषाधुनोपलभ्यते, परमुत्धृतयस्तस्यास्तन्निर्मितग्रन्थान्तरेषूपलभ्यन्त एव। तदुत्तरभाविनां काव्यप्रकाशटीकाकृतां मध्ये विभिन्नदेशीयानामपि टीकाग्रन्थेषूपलभ्यमानोद्धारा गौडीयेन न्यायनयप्रवीणेन परमानन्दचक्रवर्तिना कृता नाम्नैव सूचितपरिमाणा काव्यप्रकाशविस्तारिका प्रायेण तत्समानकालिकैवेत्यनुमीयते। इयं प्रकाशिता सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानविभागतः। आन्ध्राणामौत्कलानां महाराष्ट्राभिजनानां तथाऽन्येषामपि ग्रन्थाः केचन प्रकाशिताः केचिच्च मातृकाबद्धास्तिष्ठन्ति। दक्षिणात्यानां मध्ये केचन सरस्वतीतीर्थकमलाकरनागेशभट्टादयो वाराणसीवास्तव्या अभवन्।

टीकास्वेतासु पूर्ववर्तिटीकाकृतां मतालोचनं क्वचित् क्वचित् तदुद्धारश्च समुपलभ्यते। तत्र खलु सर्वत्रैव प्रायः स्वप्रान्तस्था अवस्थानतो विद्याप्रचारकृते संपर्किणश्च स्मर्यन्ते समालोच्यन्ते च। अतितरामादृतानां ग्रन्थानां विषये देशकालगतोऽप्यसन्निधिर्न गौरवहानाय प्रभवति। पूर्वप्रघट्टके उल्लिखिता मिथिलावङ्गोत्कलीयाष्टीकास्तु एकपर्यायान्तर्भाविनः। काव्यप्रकाशे विशेषतस्तद्वृत्तिभागे (१) पाठभेदम् (२) ग्रन्थसङ्गतिसरणिम् (३) विवरणप्रसङ्गे कारिकावृत्तिकृतोरन्यत्वमनन्यत्वं वेत्यादिकमुपजीव्यैव वादविसंवादो वरीवर्ति। (४) क्वचिदुदाहरणादिनिवेशे युक्तिस्तद्व्याख्याने च तारतम्यमपि विवादपदतामापद्येते यथाभूयस्तयाऽर्वाचीनटीकाकृतां कृतिषु।

आदिमस्योद्देशो द्वितीयोल्लासे 'शब्दार्थानवच्छेदे विशेषस्मृतिहेतूनां' निर्देशपरायां वृत्तौ 'वेदे इव न काव्ये स्वरविशेषः प्रतीतिकृत्' इति निर्धारण१२े। प्राचीनैष्टीकाकृद्भिस्तथा प्राचीनतम काव्यप्रकाशमूलमातृकास्वप्ययमेव पाठः स्वीकृतः। अर्वाग्भवैर्विश्वनाथकविराजप्रभृतिभिः सह तदुपजीव्यस्य चण्डीदासस्य मतभेद एतन्मूल एव', एवं तृतीयोल्लासावसानवृत्तौ द्विकत्रिकाद्यन्तर्भावसंक्रान्तो मतभेदः प्राचीनैर्न पठितो न वाऽप्यर्वाग्भवैः सर्वैः। दशमोल्लासे मूलग्रन्थस्योदाहरणपरिपूरकत्वेन प्राचीनैः रुचकादिभिः पठितानि निदर्शनानि परवर्तिभिर्बहुभिर्ग्रन्थमध्य एवान्तर्भुक्तानि। द्वितीये विषये प्रमापकाणि 'माला तु पूर्ववत्' इति रूपकप्रकरणे पठितायां कारिकायां पूर्ववदित्यस्य व्याख्यानभङ्गी तत्रैव 'समस्तवस्तुविषयं श्रौती आरोपिता यदा' इत्यादिकारिकायां वृत्तिसङ्गमनादि च। एवं ग्रन्थावसाने इत्येष मार्गः' 'निःशेषच्युतचन्दनम्' इत्यादिश्लोकस्य चतुर्थपादाशयनिर्णये तद्घटितेऽभिधामूललक्षणामूलध्वन्योर्वस्तुध्वनिभावध्वन्योश्च निराकरणे इत्यादिकारिकायां वृत्तिसङ्गमनादि च एवं ग्रन्थावसाने 'इत्येष मार्गः' इत्यादिपद्ये 'सङ्घटना' पदस्य तत्त्वोद्घाटने दृष्टिभेद ऊहनीयः।

तृतीये प्रसङ्गे 'निःशेषच्युतचन्दनम्' इत्यादिश्लोकस्य चतुर्थपादाशयनिर्णये तद्घटितेऽभिधामूलध्वन्योर्वस्तुध्वनिभावध्वन्योश्च निराकरणे। 'त्वामालिख्य' इत्यादिमेघदूतीयपद्ये चतुर्थोल्लासोदाहृते प्राचीनानां वाचस्पतिमिश्राणां व्याख्यानोपयोगे तत्रैव 'परिमृदितमृणाली' इत्यादिभवभूतिपद्ये 'क्रियासु' इति प्रचलितपाठस्थले 'क्रियायाम्' इति पाठात् तत्संबन्धिविवरणे व्याख्या सामञ्जस्यकल्पे, तथा दशमोल्लासे 'स्वप्नेऽपि' इत्युपमाप्रकरणीयश्लोके 'न मुञ्चति' इति क्रिययाऽन्वयविधाने, एवमादिषु चातुरीचर्चावैमत्यं विपश्चितां विचारमपेक्षते। एतच्च टीकाकृतां व्याख्यानवैचित्र्यमधुनातनानामपरिणतप्रज्ञानां कुत्र कुत्रापि मतिभ्रमकरं संपद्यत इति महद्वैशसं टीकाकृत्कृतमनुभूयते।

कालनिर्देशक्रमेण काव्यप्रकाशटीकाकृतां त्रिधा विभागः स्वत एवायाति। तत्र प्रथमकक्षायां मम्मटग्रन्थात् किञ्चिदधिकसार्धशतवर्षाभ्यन्तरे प्रादुर्भाविनो रुचकमणिक्यचन्द्रसान्धिविग्रहिकश्रीधरा एवास्मदुपलभ्यमानानामेतत्कालिकानां प्रतिनिधिभूताः। एतेषां दर्शने ग्रन्थकृदयं संप्रदायनिबद्धा न संप्रदायकर्ता तत्पूर्ववर्तिनां महतां सिद्धान्तानुपजीव्य तेषां विषदने परिपूरणे च यतते। एषां टीकासु पूर्वतनानामुद्देशः क्वचिदाभासतः, क्वचित् ग्रन्थोद्धारेण तन्मतप्रतिष्ठा-द्वारेण वा तत्तदग्रन्थोपयोगः। क्वचिद् ग्रन्थपूरकत्वेन मूलग्रन्थस्यानुल्यमेभिः साध्यते।

अलङ्कारसाहित्ये विवर्तनक्रमानुसन्धायिना पक्षेऽयमेव समीचीनः पन्था ग्रन्थतात्पर्यपर्यालोचने। अत्र प्रयोगशास्त्रतया गृहीतस्यालङ्कारशास्त्रस्य चङ्क्र-मणभङ्गी लक्ष्यलक्षणसंगत्या सहकारिणी परिपोषिका चेत्यभ्यर्थ्यते। एष्ववर्गिभवाः प्राग्भवानामानुकूल्यमनुजानन्ति। न च पुरोभागित्वसूचन एव तेषां तात्पर्यम्। कालतो व्यवहिता अपि कान्यकुब्जीयः सोमेश्वरो गुर्जरवास्तव्यो जयन्तभट्टो दक्षिणा-त्यत्वेन सम्भाव्यमानः साहित्यचूडामणिकृल्लौहित्यभट्टगोपालश्चैतेषां मार्गमनुस-रन्तो बहूनि विस्मृतप्रायाणि प्राचां मतानि सञ्जगृहुरिति परं प्रावीण्यं प्रकटितमेतैः।

यद्यप्येतेषां केन केनापि क्वचिद् ग्रन्थकृतां पौर्वापर्यनिर्धारणे विप्रतिपत्तिः (यथा राजानरुचकस्य मम्मटात् प्राचीनतरत्वकथने) तदानुषङ्गिकी आक्षेपपरोक्तिश्च ग्रन्थकृदुद्देशे लभ्यते, तथापि मुख्यतस्ते प्राचीनानां गौरवलाभेऽधिकारिण इत्य-स्माकं मतिः। यद्यपि मैथिलो वाचस्पतिमिश्रः खलु कुत्रापि मूलोच्छेदपरां काश्मीरीयनव्यप्रस्थानप्रवर्तनापवादिनीं दृष्टिभङ्गीं प्रकटयितुमुत्सुको यथा गुण-स्वरूपविवेचने (का० प्र० वि० २७८ पृ०), तथापि कालतः प्राचीनतया तस्यात्रैव मुख्यतया ग्रहणं कथमपि सोढव्यम्। दाक्षिणात्य सरस्वतीतीर्थस्तु एतत्कालवर्त्यपि न शास्त्रमाहात्म्यं तथा ग्रन्थगौरवमुपलभते, यथा कथञ्चिद् ग्रन्थलगन एव तस्य चरितार्थता।

द्वितीयकक्षायां समयाभिव्याप्तिः किञ्चिदधिकशतद्वयेन परिच्छिन्ना। तावता कालेन भारतभूमेः सर्वेष्वेव प्रान्तेषु काव्यप्रकाशस्य पठनपाठनप्रचारोऽनु-मीयते। प्राचीनमतोपजीव्यमविगणय्यैव नव्यमत आस्थावन्तष्टीकाकृतो युक्तिम-दुक्तिसमुल्लासेन ग्रन्थपङ्क्तिलगन एव परामैकान्तिकतामुपयन्ति। द्वित्राः सम्प्रदाय-बहिर्भूतानां भोजराजादीनां मतमाश्रयन्त एते समन्वयसाधने तैरेषां परिपूरणे चात्मनो नियोजयन्तीत्यपि लक्ष्यते।

विरलाः केऽपि नव्यमार्गप्रतिष्ठापयितुरभिनवगुप्तस्य ध्वन्यालोकलोचनतो निष्कृष्टं रसात्मवादं मण्डयन्तो ग्रन्थं विवृण्वते। एषु उत्कलीयौ दीपिका-

कृच्चण्डीदासकाव्यप्रकाशदर्पणकृद्विश्वनाथदासमहापात्रौ प्रसिद्धौ । साधारण्येनैते ध्वनिमार्गानुसारिणो यथा मैथिलो बहुरूपमिश्र-पण्डितराजरघुनाथमिश्रौ, आन्ध्रो नरहरिसूरिः सरस्वतीतीर्थापरनामा दाक्षिणात्यः, श्रीविद्याचक्रवर्ती, गौडीयो-विद्यासागरः, परमानन्दचक्रवर्ती चैषु सप्रश्रयमुल्लेखमर्हन्ति । न केवलं कारिकावृत्तिमयग्रन्थसंलगने परं तदुदाहरणव्याख्याने चासमं प्रावीण्यं कैश्चिदेतैः प्रकटितं यत् खलु सर्गबन्धादिव्याख्यातृणां कृतिषूपलभ्यते ।

एवं कालक्रमेण यत् शास्त्रमिदं प्रसरप्रवाहरूपं स्वरूपमपहाय सिद्धकल्पसिद्धान्त-प्रपञ्चने प्रवर्तनां विदधदस्याम्नायक्रमतः स्फूर्तिं जिहासुः जडिमानमापद्य वैफल्यपदे समापतितं तस्य सूचना शास्त्रतत्त्वराशिनिधानभूतस्य काव्यप्रकाशस्यैतत्कक्षीयानां टीकाकृतां कृतितः स्फुटैवोन्मिषति । प्राचीनग्रन्थानामनुशीलनात् क्रमोपचीयमानया तत्तदाञ्चलिकसुलभयात्मम्भरितया 'नाहं तु दृष्टिविकलो धृतश्चिन्तामणिर्मया' इत्याद्यप्रकृतायां स्वोत्कर्षख्यापनायां च समुल्लासन्नैतिहासिकदृष्टेर्विलोपं विद-धतीयं भङ्गिः सकलमेवालङ्कारशास्त्रं पङ्गु संकोचविवशं च चकारेति केषाञ्चिदा-धुनिकानामुद्घोषो न तत्त्वतोऽतिशयोक्तिदूषित इव प्रतिभाति ।

अन्तिमकक्षायामद्यावधि प्रचरन्त्यां प्राचीनानां चिन्ताजलधितो मथ्यमानं रत्नमिव सत्काव्यतत्त्वकलाकोविदत्वं हेलया समुत्सृजन्तष्टीकाकृतस्तर्कजालजटिले फल्गुवादकुतूहले तथा शुष्कवैयाकरणोचितव्युत्पत्तिशाब्दबोधादिविश्लेषणभास्वरे स्वमनीषामन्यथयन्तः शास्त्रस्यापि कदर्थने परमार्थतया व्यापृताः परस्परकलङ्क-लेपनपरा इव प्रतिभान्तीति नात्र किमपि वैचित्र्यम् । एषां बहूनां स्वकीयपाण्डित्या-विष्करणपराणां टीकास्वायोजनयोजना बह्वारम्भे लघुक्रियेव व्यर्थश्रमतया पर्यवसी-यत । एषां बहुजनमान्यत्वेन विश्रुतत्वेन च शिरोधार्यतया गृह्यमाणो गोविन्दठक्कुरः काव्यप्रदीपकर्तैवात्र निदर्शनम् ।

काव्यप्रकाशग्रन्थस्य वृत्तिभागे आपातविशदे परिवर्तनपरिवर्धनसाध-नेनावतारितस्तस्य काव्यप्रदीपः काव्यप्रकाशार्थप्रकाशायैव प्रयतित इत्यपातत आभाति, परं प्राचीनग्रन्थानां रहस्यं छादयत् क्वचित् क्वचित् तत्पूर्ववर्तिनां महानुभावानां साधुव्याख्यानं यथा तथा दूषयन् न विपश्चिन्मान्यतामयमर्ह-तीतीतरत्र उद्घाटितम् । मैथिलभवदेवमिश्र वैद्यनाथतत्सत्प्रमुखैः, गौडीयैर्म-हेश्वरन्ययालङ्कार-जयरामन्यायपञ्चानन-श्रीवत्सलाञ्छनभट्टाचार्य-नैयायिकवरेण्य-गदाधरभट्टाचार्य-निबन्धरचनानिष्णातस्मार्तजगदीशभट्टाचार्यादिभिः, कान्य-कुब्जीयेन भीमसेनदीक्षितेन, दक्षिणप्रान्तीयेनापि वाराणसीवास्तव्येन प्रथितयशसा कमलाकरभट्टेन नानाशास्त्रपारङ्गमेनैकाधिकालङ्कार ग्रन्थटीकाकृता नागोजि-भट्टेन च विरचितासु टीकास्वयमेव परिणामः ।

एवं प्रदीपकृत्प्रमुखानामेषां प्रज्ञा युक्त्युज्ज्वला झटिति क्वचित् क्वचित् पाठकं विच्छुरणेनाभिभूतमिव करोति। सरलकाव्यप्रकाशतयोदाह्नियमाणा गौडीयवैष्णव-वलदेवविद्याभूषणस्य साहित्यकौमुद्यपि उदाहरणभागे श्रीजीवगोस्वामिनामिव सरल साहित्यदर्पणे रसमृताशेषाभिधे एतैः क्षुण्णमेव मार्गमनुसरति। परं तेनान्यत्रा-लङ्कारनिबन्धे किमपि प्राचीनतरग्रन्थप्रवीणत्वं प्रकटितम्। अत्यन्तसन्निकृष्टेषु टीकाकृत्सु मैथिलहरिशंकरमिश्रवङ्गीयमहेशचन्द्रन्यायरत्नयोष्टीकाग्रन्था-नन्दकविकृतसारसमुच्चय इव क्वचित् प्राचीनानां मतमाकलयतइति किमप्युल्लासस्थानम्।

एवं कालक्रमेण टीकाकृद्भिः स्वकृत्ये कदर्थितेऽपि टीकासाहित्यस्योपयोगिता न केवलमनुसन्धित्सूनामपि तु पाठकसामान्यस्यापि कृते सुतरां दुरपलपेति सुस्थितमेव। पाठकसामान्यस्य महाभारतादिग्रन्थेषु श्लोककूटानामिव कारिकायां वृत्तौ च यानि सन्दर्भकूटानि विद्यन्ते तेषां परिष्कारायैवैषामाश्रयो विधिबोधितो भवति। अनुसन्धित्सूनां पक्षेऽस्मिन् ग्रन्थे कृतोपयोगानां विस्मृतचराणां शास्त्र-रहस्यभूतानां तत्त्वानां निधानानि कानिचिद् ग्रन्थरत्नान्यधुनातनपाठकानां सुलभसंयोगानि। प्राक्लुप्तप्रायाणामपि वक्रोक्तिजीविताभिनवभारतीभामहविवर-णादीनामिव केषाञ्चिदुपलम्भो गणितशास्त्रव्यवसायिनां नवतमग्रहाविष्कार इव शास्त्रभित्तिदार्ढ्याय कल्पते। अन्यच्च यदा पाठतालिकामध्ये द्वित्राणां ग्रन्थपाठे-नालङ्कारशास्त्रपरिचयः संपूर्यते यथाऽधुना तदालङ्कारशास्त्रचूडामणेरस्य ग्रन्थस्य सर्वतः साहाय्यं सुतरामपेक्षणीयं भवति। एतत्कल्पेऽधुना महाविद्यालया-धिकारिणां तथा साहित्यप्रकाशनसंस्थानां च प्रतिदिनं वर्धमान उत्साहो निरति-शयानन्दहेतुः। यदि स्वशास्त्रे निष्ठायास्तत्रत्यलुप्तरत्नोद्धार एव कर्तव्यतयाऽ-नुसन्धानरसिकत्वे निदर्शनं स्यात् तदा लुप्तकल्पानामेतत्सजातीयग्रन्थसंपादनेनापि महदुपकृतं स्यात्। यदत्र काव्यप्रकाशटीकामधिकृत्योक्तं तन्मूलतः काव्यप्रकाश-खण्डनत्वेन रचितानामधुनोपलभ्यमानानां द्वित्राणामपि पक्षे योज्यमित्यलमत्र पल्लवितेन।

टीकाकृत्संक्रान्तः वृत्तान्तः

उत्कलीयानां काव्यप्रकाश टीकाकृतां मध्ये चतुर्णामिव व्याख्यानान्यद्योपलभ्यन्ते। चण्डीदासकृता काव्यप्रकाश दीपिका, तदुपजीविनो विश्रुतकीर्तेर्विश्वनाथकविराजस्य काव्यप्रकाश दर्पणः, विश्वनाथतनूजानन्तदासतः किञ्चित् प्राग्भवानां गोपीनाथमहा-पात्राणां सुमनोमनोरमा, विश्वनाथेतिसंज्ञकस्यान्यस्य नवीनस्य काव्यप्रकाशविवरण-मिति च। अन्तिमस्य काचित् खण्डिता प्रतिलिपिर पुरुषोत्तमक्षेत्रात् तत्र-त्यराजकीयसंस्कृतमहाविद्यालयऽधिकारिणो माध्यस्थ्येन दृष्टा। इयं त्वति-साधारण्येव। विश्वनाथकविराजात् प्राग्भवेन कवित्वकीर्तिभाजा सान्धिविग्रहिकेण

राघवानन्दमहापात्रेणापि काचित् काव्यप्रकाशटीका विरचितेति सम्भाव्यते। अनन्तदासकृते साहिय दर्पण लोचने बहुत्रालोचितात् तन्मतजातादियं संभावना जागर्ति। तस्य च कुत्र कुत्रापि प्राचीनमतानुसरणमितरत्र च काव्यप्रकाशकृतो मम्मटस्य पक्षसमर्थनतत्परता च लक्ष्यते।

चण्डीदासात् पूर्ववर्ती कोऽपि तत्रत्यो व्याख्याता चण्डीदासेनैकाधिकस्थले-स्मृतो यः खलु श्रीधरात् स्वतन्त्र इत्यनुमीयते, यथा लक्षणाप्रकरणे गौणशुद्ध-व्यपदेशभेदसमर्थने, एतच्च व्याख्यानं प्राचीनटीकाऽनुरोधेन द्रष्टव्यम्' (का. प्र. दी.) इति। बालरामायणीयश्लोके दोषविवेचनावसरे 'परशुनिन्दया भार्गवनिन्दा बुद्धिपूर्विकेत्याधुनिकाः पण्डिताः समादधते' इति समर्थनं स्थगनं न तु सर्वथा निरवद्यमिति (का० प्र० दी०) ग्रन्थार्थमनुभवमपहस्तितवन्त इति वामनीयमतस्य विवरणप्रसङ्गे च।

यत्तु चण्डीदास एवोत्कलीयटीकाकृतां वरेण्य इति तदिदं धारावाहिकतया पूर्वप्रान्तीयटीकाकृद्भिरपरैश्च क्वचित् तन्मतानुशीलनेन स्फुटीभवति। अनन्त-दासस्यापि स्वकृते सा० द० लोचने 'यत्रैषां मान्यानां मते बहुतरमस्खलित-मवधार्यापि किञ्चित् किञ्चिदेव दूषणमुद्घुष्यते तत्र ध्वनिकारप्रभृतिचण्डीदास-पण्डिताचार्यपर्यन्तप्रयत्नप्रणीतविमलतरप्रमेयजातभङ्गभीरुणा तदतिक्षमध्व-मविध्वस्तबुद्धयो बिबुधाः' (सा० द० लो० ६३५ पृ०) इति सानुनयनिवेदनं तत्पितुर्विश्वनाथकविराजस्य 'मान्यानामस्मदुपजीव्यानाम्' इत्यादिसंभ्रमविशोधितं चण्डीदासस्योद्देशमेव दृढीकरोति। काव्यप्रकाशदर्पणो विश्वनाथेन साहित्यदर्पणा-दर्वाग्रचित इति तद्ग्रन्थे साहित्यदर्पणोद्धारादवगम्यते। स च स्वल्पपरिसरश्चण्डी-दासमार्गमेव मुख्यतयाऽनुसरन्नपि क्वचित् क्वचिद् यथा काव्यमार्गे स्वरभेदास्वीकारे मम्मटसमर्थिते श्लेषस्याष्टविधत्वस्वीकारे चण्डीदासेन काव्यप्रकाशदीपिकायामरुचि-प्रकटनेन खण्डिते (का० प्र० दी०), भाषाभेदमाश्रित्यार्थभेदेऽपि भाषाश्लेषस्वीकारे (का०प्र०दी०) तथा 'अरातिविक्रमे'त्यादि श्लोकव्याख्याने (का० प्र० दी०)।

चण्डीदासकृतकाव्यप्रकाशदीपिकातो भिन्नाश्चत्वारो दीपिका उपलभ्यन्ते।

(१) तासु गर्जरजयन्तभट्टकृतां काव्य प्रकाश दीपिकाऽपि बहुलमादृता चण्डीदासग्रन्थात् किञ्चिदर्वाग्भवा न कमपि टीकाकृतं स्मरति। निर्बन्धवता केनापि निबद्धम्—

श्रीमद्भरद्वाजपदाम्बुजीयप्रसादतो ग्रन्थरहस्यमेतत्।
विज्ञाय किञ्चित् कृतवान् जयन्तस्तत्र प्रमाणं सुधियां वितर्कः॥

तत्र ग्रन्थमातृकाया लब्धतथ्यतस्तस्य—

भारद्वाजकुलोत्तसभट्टदेवकसूनुना ।
सोमेश्वरेण रचितः काव्यादर्शः सुमेधसा ॥

इति वृहत्सङ्केतेत्यपरनाम्नो व्याख्यानस्य साहाय्यं तेनाधिगतमिति न निश्चितं वक्तुं पार्यते। श्लोकोऽयं जयन्तभट्टोपज्ञो न स्यात्। कथमपि तथाऽभ्युपगमे च तत्र 'वितर्क' इति पदेनास्य सिद्धान्तस्य निश्चय आक्षिप्तो भवति। यथा सोमेश्वरः प्राचीनानां निबन्धकृतां मतानि संजग्राह तथा नवीनतराणां का० प्र० रुचकादीनां तथैव जैनाचार्य हेमचन्द्रस्यापि मतजातम्।

(२) द्वितीया वङ्गीयत्वेन सम्भाव्यमानेन शिवनारायणदासेन।

(३) तृतीया सारदीपिकाभिधा जैनाचार्येण गुणरत्नगणिना सङ्कलनरीत्या सम्पादिता। एते द्वे दीपिके का० प्र० टीकारचनायास्तृतीयकक्षाविभागे एव रचिते।

(४) चतुर्थी तूदाहरणदीपिकेति नाम्ना बहुलप्रचारा विविधशास्त्रनिष्णातेन काव्यप्रकाशोद्द्योत-रसगङ्गाधरमर्मप्रकाशादिकृता नागोजीभट्टेन वाराणसीवास्तव्येन मैथिलगोविन्दठक्कुरकृतस्य काव्यप्रदीपस्योदाहरणानां (प्रायः सर्वाण्येव मूलकृतो मम्मटस्यैव निदर्शनानि) विवरणरूपा।

चण्डीदासेन स्वदीपिकाया अवतरणिकायामेवमभाणि—

श्रीमल्लक्ष्मणभट्टानां सुहृदामनुशासनात्।
ध्वनिप्रकरणस्यास्य रहस्यं वर्णयामहे॥

क एते लक्ष्मणभट्टा इति न विदितम्। मन्मटात् प्राचीनतरस्य व्यक्तिविवेककर्तुर्महिमभट्टस्याप्येवमनुगतानां व्युत्पत्त्याधानमेव ग्रन्थरचने प्रयोजनमासीत्। अनुशासनपदस्यानुरोधपरत्वेनात्र प्रयोगो न प्रसिद्धतरार्थे। अन्यथा 'अनुशासनात्' इति पञ्चमी विभक्तिर्न सुसमाधेयेति मन्तव्यम्।

काव्यप्रकाशदीपिकायाः 'ग' मातृकायाः पुष्पिकायाम् "इति कापिञ्जलकुलतिलकषड्दर्शनचक्रवर्ति–महाकविचक्रकूडामणि– सहृदयगोष्ठीगरिष्ठ–महामहोपाध्यायमहापात्र--श्रीचण्डीदासकृतकाव्यप्रकाशदीपिकायाम्" इति ग्रन्थकृतः परिचयो निबद्धः। एषु दास इत्युत्कलीयब्राह्मणोपाधिः कपिञ्जल इति वंशभेदः, महापात्र इति राजनियोगनिर्देशः, महामहोपाध्याय इति सम्भवत्सम्मानसूचक उपाधिः, शेषास्तु तन्माहात्म्यख्यापनपराः। तत्राद्येन विशेषणेन स्ववंशाभिजात्यख्यापनम्। यथा दीपिकायामेव तदुदाहृते (२१४ पृ०) पद्ये—

नैसर्गगुणविनीतं जनयति कापिञ्जलो वंशः।
आजन्मनो ह्यपूर्वं सूते रत्नाकरो रत्नम्॥

पद्यमिदं वाच्यालङ्कृतेर्व्यङ्गस्फुटतयोपमितेर्ध्वन्यङ्गताप्रदर्शनव्याजेन 'यथा

ममैव' इति परिचयेनोदाहृतम् । एतद्वंशीयो विश्वनाथकविराजः स्वकीयं परिचयमेवमुपन्यस्यति 'श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्यार्णवकर्णधारध्वनिप्रस्थानपरमाचार्य......सान्धिविग्रहिक-महापात्रश्रीविश्वनाथकविराज'' इति । पुष्पिकायां ग्रन्थपरिचयप्रसङ्गे द्वयोरेव समाना शैली ।

यावत् प्रसन्नेन्दुनिभाननाश्रीनारायणस्याङ्कमलङ्करोति ।
तावन्मनःसम्मदयन् कवीनामेष प्रबन्धः प्रथितोऽस्तु लोके ॥

इति साहित्यदर्पणे 'लक्ष्मीर्वक्षो मुरारेः' इत्यादि 'व्याख्या विख्यातिमेषा कविमुकुटमणेर्विश्वनाथस्य यायात्' इत्यवसानीये पद्ये काव्यप्रकाशदर्पणे । अत्र विषये परमताक्षेपं विधायापि विश्वनाथस्तदुपजीव्यस्य चण्डीदासस्य स्वकृतिप्रशस्तिपरं 'काव्यप्रकाशतरुरेष' इत्यादिश्लोकमनुसरति । एषां स्वकीयवंशगौरवे सचेतनता सुतरां प्रकटा । चण्डीदासः स्वपितामहनारायणमहापात्रमित्थं परामृशति इत्यस्मत्पितामहश्रीमन्नारायणपादैस्त्रिकलिङ्गेन्द्रश्रीनृसिंहदेवचक्रवर्तिगोष्ठीगरिष्ठानां पुरतो धर्मदत्तमहाकविः स्थगितः'' (का० प्र० दी०) इति । विश्वनाथेनापि प्रसङ्गस्य तस्य तथैवोद्देशे विस्तरेण विहितो यथा ''चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्यायः । तत्प्राणत्वञ्चास्मद्वृद्धप्रपितामह-सहृदयगोष्ठीगरिष्ठ-कविपण्डितमुख्य-श्रीमन्नारायणपादैरुक्तम् । तदाह धर्मदत्तः स्वग्रन्थे—

रसे सारश्चमत्कारः सर्वत्रैवानुभूयते ।
तस्माददद्भुतमेवाह कृती नारायणो रसम् ॥'' इति ।

एतदुद्धारोऽस्मद्वृद्धपितामह इति प्रचलितः पाठो द्वयोः प्रामाणिकयोर्मातृकालिप्योरनुमोदितोऽप्ययथैव परित्यक्तः साहित्यदर्पणस्य टीकाद्वयसमेतस्य सम्पादकैरधुनातनैः श्रीकरुणाकरमहोदयैः । तस्य स्थानेऽस्मत्पितामहेत्यसङ्गतः पाठः प्रदर्शितः । विश्वनाथोऽपि चण्डीदासं सा० द० ग्रन्थे (४५४ पृ०) 'अस्मत्प्रपितामहानुजः' इति निर्दिशति ।

वस्तुतस्तु प्रपितामहानुजसूनुरिति पाठः संभवी । नारायणदाससंबन्धे करुणाकर-महोदयधृतपाठं समर्थयतो व्यवहाराजीवमुख्यस्य सुधीवरेण्यस्य महामहोपाध्यायपाण्डुरङ्गवामनकाणेमहोदयस्य युक्तिः 'पितामहस्य नाम पौत्रेऽपि क्वचिद् दृष्टम्' इति । परं पितामहस्यावदानं पौत्रेऽपि दृष्टमिति तु अत्युत्कटा संभावना । नारायणदासमहापात्रस्य द्वौ तनयावुल्लासदासविलासदासनामानाविति काव्य प्रकाश दीपिकात एव ज्ञायते । विलासदासस्तत्पिता उल्लासदासस्तज्ज्येष्ठतातः । एवं वर्णितो बिलासदासः—

श्रीनृसिंहमहीपाल स्वस्त्यस्तु तव बाहवे ।
आहवे लसदुदण्डराजमण्डलराहवे ॥

(का० प्र० दी०) इत्यादिपद्यानां रचयिता । साहित्य दर्पणे त्वयं श्लोकः पूर्वार्धोत्तरार्धयोर्विपर्यासेन पठितः । चित्रमिदं यत् सा० द० सम्पादकेन करुणाकरमहोदयेनास्य विश्वनाथकृतित्वमाख्यायते ।

श्रीनृसिंहदेवस्य कविराजश्रीमदुल्लासदासपादेष्वस्माकं ज्येष्ठतातेषु—

पाटवं वचसि तावकं स्मरन् विहास्यति सचेतनो हि कः ।
पिञ्जरे सुखनियन्त्रितो वसन् राजकीर ननु मास्म गाः शुचम् ॥

इति का० प्र० दी० पठ्यते । व्याजस्तुतिमयमिदं पद्यम् । स्वकीय गुरोरप्युल्लासदासस्य स्वकीयराजसचिवपदे नियोगमुपक्षिपतीति नावद्यमनुमानम् । उल्लासदासस्य पौत्रश्चन्द्रशेखरमहाकविचन्द्रोऽपि सान्धिविग्रहिकतया नियुक्तः आसीदिति । तथैव तत्पुत्रो विश्वनाथ इति साहित्यदर्पणतो ज्ञायते । विश्वनाथ-पितामहस्य विश्वनाथकृतग्रन्थे नोद्देशः कुत्रापि लभ्यते । एवमपि स्यात् स खलु नैतेषां समकक्ष इति मौनमाश्रितम् ।

एतद्वंशधारायां टीकाकृतश्चण्डीदासस्य स्थानं यथाऽत्र प्रस्तुतं तत् तथैव प्रकारान्तरेण समर्थ्यते प्रत्नतत्त्वानुसन्धायिभिरिदानीन्तनैस्तदुत्साहयितॄणां भूपानां समयनिर्धारणेन । नारायणदासस्य पौत्र उल्लासदासो द्वितीयनरसिंहदेवस्य राज्यकाले आसीत् । विश्वनाथकविराजस्तु तृतीयनरसिंहदेवराज्यकाले कञ्चिदपि कालं तत्पितुर्भानुदेवस्य राज्ये सान्धिविग्रहिकत्वेन प्रादुर्भूतो यथा तदीयनाटिकायां चन्द्रकलायां प्रस्तावनायामभिहितम् । तत्पुत्रोऽनन्तदासस्तृतीयभानुदेवस्य सभा मण्डनमासीदित्यपि (सा० द० लो० ४५६ पृ०, ५१९ पृ०) संभाव्यते । एका-वलीत्याख्योऽलङ्कारनिबन्धो द्वितीयनृसिंहदेवप्रशस्तिपरः । तत्कर्ता परममाहेश्वरो विद्याधरः स्वग्रन्थे मम्मटग्रन्थमनुसरन्नपि चण्डीदासस्य नाम तन्मतं वा न स्मरति । तद्ग्रन्थे चण्डीदासमतस्य मम्मटविषये विलक्षणं जरद्गौरवमतनियन्त्रि-त्वमपि नावकाशं लभते । अलङ्कारलक्षणप्रसङ्गे काश्मीरशैवदर्शनमतविन्यासो यथाऽलङ्कारसर्वस्वटीकायामलङ्कारविमर्शिन्यां जयरथेन वचनोद्धारपुरःसरं दृढी-कृतस्तथैवोक्तस्तत्रभवता विद्याधरेण । स चोत्कलवास्तव्यस्य विद्याधरस्य ग्रन्था-दुद्बोधितेन विश्वनाथेन साहित्यदर्पणे निवेशित उल्लेखालङ्कारप्रसङ्गे (५६१ पृ०)[१] । संभाव्यते चात्र विषये उत्कलीयसहृदयगोष्ठ्याः काश्मीरदर्शनविषये आग्रहवत्त्वमेव सूचयतीदमिति । चण्डीदासस्य विक्रमशकीयचतुर्दशशताब्द्याः प्रथम-

१. विश्वनाथेन प्रत्यभिज्ञाविमर्शिनीग्रन्थो यथा राजानकजयरथेनोद्धृतस्तथैवोद्ध्रियते । विद्याधरेण तु (एकावल्यां २२८ पृ०) 'तत्र रुच्यर्थित्वव्युत्पत्तयो यथायोगं प्रयोजकाः' इति संकलितम् ।

पादे प्रादुर्भावः विश्वनाथस्तस्यैवान्त्ये पादे प्रादुर्भूत इत्यभियुक्तैर्निर्धारितसमये नास्माकं विमतिः ।

सम्प्रत्येव राजगुरुमहोदयैश्चन्द्रकला नाटकोपोद्घाते निर्दिष्टं विश्वनाथसमय-संबन्धिनिरूपणमलङ्कारान्तरग्रन्थीययुक्त्या खण्डचमानं न तत्त्वमिति का० प्र० विवेकोपोद्घाते निर्धारितम् । गङ्गवंशानुचरितचम्पूकाव्ये केनाप्युत्कलीय-कविना विरचिते प्रथमनरसिंहदेवतो नरपतीनां राज्यकालपरिमाणेन नेदमसमञ्ज-समिति चावगम्यते ।

'ग'मातृकायामुद्दिष्टानां सोपयोगतया ग्राह्यस्य विशेषणचतुष्कस्य मध्ये द्वयोः 'कापिञ्जलकुलतिलक' 'सहृदयगोष्ठीगरिष्ठ' इत्यभिधानयोः प्रसङ्गो विवे-चितः । कविचक्रचूडामणीत्यस्य टीकाकृतः कविपण्डितनाम्ना विश्वनाथादिभिरस-कृदुद्देशेन समर्थनं भवति । कविपण्डित इति मध्ययुगे प्रचरन्ती गौरवमयी संज्ञा न सहजलभ्येति तन्नाम्ना विश्रुतस्य नैषधचरितखण्डनखण्डादिकृतो निदर्श-नेनानुमीयते । का० प्र० दीपिकाकृतः 'कवित्ववक्तृत्वफला सरस्वती' इत्यत्र दर्शितान्मूलग्रन्थविवरणपाटवाद् तद्भाषासौष्ठवाच्च सा सर्वथैवान्वर्था: तस्य कविकर्मनिपुणता 'उग्र तिमिरेति' (२०–२२ पृ०) गीत्यार्यया, तथा 'कण्ठे लसत्' (१६३–४२८ पृ०) इति, 'तत्तद्रसामृत' (४३२ पृ०) इति, 'यं स्वाश्रयान्त-मपि' (४३२ पृ०) इत्यादिभिः पद्यैः समर्थिता ।

मुक्तके कवयोऽनन्ताः सङ्घाते कवयः शतम् ।
महाप्रबन्धे तु कविरेको द्वौ यदि वा त्रयः ।।

इत्यभियुक्तोक्त्या मुक्तकादन्यत्र तस्य रचनाऽपि लब्धप्रतिष्ठेति स्वयमेतदुक्ति-सूचितविभागद्वयेऽपि प्रयासवतो विश्वनाथकविराजस्य कविपण्डितेति तत्पुत्रेणा-नन्तदासेन च यत् तथैव तस्य विशेषणं दत्तं तेन च नासमर्थितं स्यात् । का० प्र० दीपिकायां निर्दशितानि कान्यपि पद्यानि 'शोच्यामग्निमुखक्षिप्ते'त्यादि (का० प्र० दी०) 'त्वद्वियोग परिक्लेश' इत्यादीनि (का० प्र० दी०) तत्कृतदृश्यकाव्ये नाटकादौ संभाव्यमानानि तथा 'क्षिप्रप्रशान्यत्' (का० प्र० दी०) इति, प्रचण्डशीत्कारेति (का० प्र० दी०), वनेषु यस्येति (का० प्र० दी०) पद्यानां सर्गबन्धैऽन्तर्भाव ऊहनीयः । काव्यप्रकाश-दीपिकायां मम विलासमञ्जरीकाव्ये ग्रीष्मवर्णने (४२९ पृ०) इत्यवतरणिकाया तस्मिन्नेव पत्रे निर्दिष्टं पद्यं कुत्रापि क्षुद्रकाव्ये चम्पूकाव्ये वा भवितुमर्हति । उत्कलीयानामेतद्वंशीयत्वेन सामान्येन संभाव्यमानानां राघवानन्द चन्द्रशेखर-गोविन्दानन्द-विश्वनाथकविराज-गोपीनाथकविराजप्रभृतीनां बहूनामुदाहरणानि साहित्यदर्पणे तदुपरि सा० द० लोचने च लभ्यन्ते । एतेन टीकाकृत्पितुर्विलास-

दासस्य तथा तज्ज्येष्ठतातस्योल्लासदासस्यापि कवित्वस्फूर्तिरनवद्यैवेति का० प्र० दीपिकोद्देशतोऽनुमीयते।

'कवित्ववक्तृत्वफले'ति विशेषणेन व्याख्यातृत्वमपि परामृष्टं कविना अभिनन्देन स्वकृतकादम्बरीकथासारे। चण्डीदासपितामहो नारायणदासो गीतगोविन्दस्य प्राचीनः कोऽपि टीकाकृदिति बहूनामनुमानम्। चण्डीदासेनापि प्रबोधचन्द्रोदयनाटकोपरि व्याख्यानं व्यरचि। टीकेयं प्रचरद्भ्यो व्याख्यानान्तरेभ्यो विलक्षणा प्राचीनतरा च। विचित्रवस्तुनिबन्धमये देशकालव्युत्क्रमात् समाजधर्मविप्लवं सूचयति परमार्थानुख्यानपरेऽस्मिन्नाटके विवेचनासापेक्षं बह्वपि प्रकाममस्तीति कविविपश्चिदत्र निर्बन्धबाहुल्यं प्रकटितवान्। यद्यपि—

प्रणम्य सर्वामरवृन्दवन्द्यं मायामृगेन्द्रं कविचण्डिदासः।
प्रबोधचन्द्रोदयदुष्प्रबोधपदार्थजातं विशदीकरोति॥ इति।

यद्यपि च "इहानाद्यविद्यामूढत्वेन सहजसान्द्रानन्दमयमात्मस्वरूपमनुसन्धाय संसारवासनासहस्रव्याप्तानपि मोक्षोपायपराङ्मुखानपि प्राणिनः प्रेक्ष्य परमकारुणिकः श्रीकृष्णमिश्रः सततसंसारसुखासक्तमपि जनं नृत्यप्रेक्षाप्रसञ्जनद्वारेणैव निर्विण्णचेतसं विधास्यामीत्यभिसन्धाय नाटकरचनाव्याजेनोपनिषद्विवेकेनात्मबोधे जाते उपसत्ति स्थिरीकृत्यात्मतत्त्वे ध्यायमाने वीतावरणं तद्रूपं मृष्टकलङ्कदर्पणचित्स्वरूपेणावतिष्ठत इति वक्तुमुपक्रमते" इत्यारम्भवाक्यं परमार्थपरम्, तथापि दुष्टदेशाचाराणां तथा प्राकृतजनानामिव मनीषावन्मानिनामपि प्रकृतेरपरोक्षः परिचयो वस्तुविन्यासेन समञ्जसपात्रकल्पनेन च नाटककृतो दृष्टिवैशिष्ट्योद्घाटने भरतादिशास्त्रोपलक्षितस्य रूपकस्वरूपस्य तस्याङ्गानाञ्च परीक्षणे सममेव टीकाकृतस्तात्पर्यमवभासते। प्रतिनायकस्य महामोहमहाराजस्य दम्भाहङ्कारयोरनुचरयोरधिष्ठानं गौडराष्ट्रे दक्षिणराढाविभागे एवेति तत्कालिकवृत्तमनुधावतां मन्तव्यमभिज्ञतया समर्थयामास स "राढीयानामहङ्कारिता तत्रापि दक्षिणभागे आधिक्यमुक्तम्" इति मन्तव्येन। काव्यनिर्माणकाले नवीनतया बहुमतस्य तथाकथितस्य कौलीन्याचारस्योत्कर्षनिदर्शने टीकाकृत्—

नास्माकं जननी तथोज्ज्वलकुला सच्छ्रोत्रियाणां पुन–
र्व्यूढा काचन कन्यका खलु मया तेनास्मि ताताधिकः॥

इत्यादिश्लोके प्रस्तुतां विकत्थनाय स्मरति। तथा "अहो मूर्खबहुलं जगत्" इत्यास्फालनस्य पक्षे तत्र प्रभाकरमीमांसाप्रचारस्य वस्तुस्थितिं मन्यमानः स महोदधिमहाव्रतयोर्ग्रन्थकृतोराचार्ययोर्महाव्रतीति तन्त्रोक्तप्रयोगाणां वस्तुगतिमभिजानाति। का० प्र० दीपिकायाञ्च प्राभाकरमतालोचनप्रसङ्गे "यदि तु प्राभाकरैः सार्धं विजिगीषुकथाकण्डूदुर्धरो दाहस्तदा तानेव मृगयितुं राढादिराष्ट्रं गच्छ" (का० प्र० दी०) इति निदर्शनेन सैव वस्तुस्थितिः स्मारिता।

'गौडं राष्ट्रमनुत्तमम्' इत्यादिपद्यं व्याचक्षाणेन तेन भूरिश्रेष्ठस्य "धाम स्थानं ग्राममिति यावत्" इति व्याचक्षाणेन तेन "राढापुर्यां भूरिश्रेष्ठक इति नाम यस्य तस्य परमं धामोत्कृष्टं गृहमित्यनभिज्ञानामवग्भिवानां व्याख्याने देशसंस्थानविषये इदानीन्तनपाठकसकाशं घोषिता भ्रान्तिरपास्ता। अस्यैव प्रस्तावनायां नाटकमिति ग्रन्थकृत्कृतसंज्ञाव्याख्याने—"यद्यपि इतिहासकथोद्भूतमितरद्वा सदाश्रयम्" इत्युक्त्वा[1] सत्यार्थमेव नाटकं कविरात्मनस्तु शक्त्या वस्तु स्वकीयमिति भरतीयमतानुवादेन 'इदं प्रकरणप्रायं विवेकमहामोहादिराजवृत्तान्तस्यासत्यत्वात्, तथाप्याहार्यस्याप्युभयप्रकृत्याश्रयत्वादिना नाटकधर्मग्रहणात् तथा व्यवहारः" इति तत्रैव सूत्रधारस्य "तदलं शान्तरसप्रयोगाभिनयेन" इति पङ्क्तिव्याख्यायां 'शान्त-पर्यवसायिनो रसा इति नेयम्', 'पुष्टिर्नाटचेषु नैतस्य' इति दशरूपकवचनमनु-ध्याय शान्तरसस्य नाटकादौ प्रायिकत्वात्।

अत एवाहार्यं वृत्तान्तमाश्रित्य धीरश्शृङ्गारादिरस एव प्रायोऽभिनेष्यत इति मन्तव्यमालङ्कारिकाणामुद्भटभट्टनायकादीनां शान्तरसस्य मूलत्वेन स्वीकारे आनन्द-वर्धनेन च तस्य सूचनामये सूचने आलङ्कारिकसिद्धान्ततात्पर्यं प्रकटयन् ग्रन्थकारः स्वस्यालङ्कारिकगोष्ठी भुक्ततां सूचयति। चण्डीदासकृतग्रन्थेषु प्र०च०टीका,का०प्र० दीपिकेव सुलभामात्मप्रत्ययशीलतामनुद्दिशन्ती तस्यानतिपरिणतावस्थाया एव रचनेत्यनुमापयति। अत्र विशेषतस्तावत् टीकाकृतः स्वनामसन्निवेशे ह्रस्वेकार-प्रयोगेनानुशासनव्यतिक्रमः का० प्र० दीपिकायामुपसंहारपद्ये चतुर्थपादे 'श्रीचण्डिदास-कविवागमृतप्रवाहैः" इति प्रयोगं स्मारयति। वयं तु ब्रूमः—चण्डिनः शिवस्य दासः, चण्ड्याः दास इति 'ङ्यापोः संज्ञाछन्दसोः' इति पाणिनिसूत्रेण ह्रस्वे रूपं साध्वेव कालिदासवत्।

एतदालोचनत एव तस्य षड्दर्शनचक्रवर्तीति विशेषणस्य प्रसङ्ग आयाति। पार्यन्तिके उपनिषत्समर्थितोत्तरमीमांसाप्रवीणता नाटकव्याख्यासूचनायां नाटकीय-पात्राणां विवेक-मति-यम-नियमादीनां तथा काम-रति-लोभ-तृष्णादीनां संबधितत्त्व-दर्शनोपादानर्निर्णयेन प्रकटिता वैदान्तिनामेकजीववादित्वानेकजीववादित्व-प्रतिबिम्बवादित्वादिभेदतया विभक्तानामपि ग्रन्थे स्वकीयपरिचयस्य निदर्शनं प्रबोध-चन्दोदयव्याख्याने सुस्पष्टमेव।

---

१. वस्तुतस्त्विदं सर्गबन्धमहाकाव्यस्य लक्षणं काव्यादर्शे स्थितं न नाटकस्येति मन्तव्यम्। एवं काव्यप्रकाशदीपिकायामपि 'पुष्टिर्नाटचेषु' इत्यादि दशरूपकम् ध्वनिकारमतत्वेन दर्शितम् (का० प्र० दी०)। न च धनिकेति स्थाने ध्वनिकारेति लिपिका-रकृतं स्खलनमिति वाच्यम्, पुष्टिरित्यस्य दशरूपककारिकायामेव लाभात्। कारिकाकृत्तु धनञ्जयो न धनिक इति तत्त्वात्।

पूर्वमीमांसायामपि भाट्ट-प्राभाकररूपेण द्विधा प्रथितायां तस्य प्राधान्यं का० प्र० दीपिकायां च स्थाने स्थाने सूचितम्। कुत्र कुत्र च भट्टमतक दर्शनासूचने प्रवृत्तिराहिता। का० प्र० दीपिकायां 'नास्माभिर्भट्टपादप्रसाद-प्राप्तविज्ञान-लवगर्वदुर्विदग्धैः सार्धमसमो विग्रहः कार्यः" (१२३ पृ०) इति। व्यक्तिषु द्वितीयलक्षणया संसर्गबोधनमिति स्वीकुर्वतां भट्टानां गौरवनियन्त्रितेन ग्रन्थकृतो-क्तम्, न तु पारमार्थिकम्" (४५ पृ०) इत्यादि तन्निर्शनम्। परन्त्वनेकत्रान्विताभि-धानवादिनां प्रभाकराणां मते चण्डीदासेन भङ्ग्या पक्षपातः सूचितः (२९ पृ०)।

एवमपि 'पारिभाषिकं गुणत्वम्' इति वृत्तिव्याख्याने परिमाणादिभेदतया तत्पठननयेनैव संग्रहः, रूपादिचतुर्विंशतौ परमाण्वादीनामगणनादिति का० प्र० दीपि-कायाम् (३६-३७ पृ०) 'अनैकान्तिकसव्यभिचारी हेतुस्तल्लक्षणैकदेशयुक्तः। असिद्धः स्वरूपासिद्धो वा सर्वमेव साधारण्येन योज्यम्" (२५४-२५५) इति "परस्परविरोधेऽपि न प्रकारान्तरस्थितिः" इत्युदयनकृतन्यायकुसुमाञ्जलिपङ्क्तेरुपयोगेन (का०प्र०दी० पृ० ३१९), तथा "क्रमवृत्तित्वाद्वाचः" इति न्यायवार्त्तिककृदुद्योतकरवर्णनानुसारेण च न्यायवैशेषिकनये प्रावीण्यं सुस्पष्टमेव। खण्डनकृताम् "अन्यथाऽनुपपत्तिश्चेत्" का०प्र०दी० पृ० ११८) इत्यादि मन्तव्योद्धारेऽपि स्वस्य न्यायोपबृंहितवेदान्तनिष्णा-तता सूचिता। सांख्ययोगयोर्भूयोभूय एव मतोद्देशः का० प्र० दीपिकायां तथा प्रबोध-चन्द्रोदयव्याख्याने वरीवर्ति।

अपरञ्च बौद्धजैनादिनयेऽपि विशेषतो विज्ञानवादोद्देशे स्वकीये परिचये प्रमाणं प्र० च० उ० व्याख्याने वर्तते। एवं स्थितेऽपि तस्य षड्दर्शनचक्रवर्तीति विरुदस्य न सर्वतन्त्रस्वतन्त्रत्वसूचने केवलं दार्शनिकमतव्युत्पत्तावेव तात्पर्यमिति मन्यामहे।

चण्डीदासस्यालङ्कारिकत्वेनैव प्रतिष्ठेति सर्ववादिसंमतो निर्णयः। अलङ्कार-तन्त्रे तस्य द्वौ ग्रन्थौ ध्व० सि० संग्रहः, काव्यप्रकाशदीपिका च। यथा प्राचीनानां केषाञ्चिदुद्भट्टाभिनवगुप्तादीनां तथा नवीनतराणां गम्भीरविषयावगाहे प्रवृत्तिः परिणते वयस्येव। चण्डीदासस्य ध्वनिसिद्धान्तसंग्रहस्तथा विश्वनाथस्य साहित्यदर्पण-ग्रन्थः पूर्वतरा कृतिरित्युभयत्र पाश्चात्त्यायाः पूर्वस्यामुद्धारदर्शनादवसीयते तत्रोभयो-रेवैतयोरुत्कर्षो मतसंकलनेन मतदाढर्चद्वारा च निवेदितः। अयं च ग्रन्थः कारिका-वृत्तिरूपेण द्विधैव स्थित इति प्रायशो वृत्त्युद्धारात् क्वचिच्च 'साधारणत्वा-कारोऽपि तत्र नोन्मिषति स्फुटम् (का० प्र० दी० पृ० १०४) इत्यादिकारिको-द्धारात् प्रतीयते। विश्वनाथेन साहित्यदर्पणे—"अत एवात्र प्रधानेतरेषु रसेषु स्वातन्त्र्यविश्रामराहित्यात् पूर्णरसभावमात्राच्च विलक्षणतया सञ्चारिरसनाम्ना व्यपदेशः प्राच्यानाम्। अस्मत्प्रपितामहानुज [सूनू] कविपण्डितमुख्यश्रीचण्डी-दासपादानां खण्डरसनाम्ना—

अङ्गं वाध्योऽथ संसर्गाद् यद्यङ्गी स्याद्रसान्तरे।
नास्वाद्यते समग्रं यत् ततः खण्डरसः स्मृतः ॥ इति ॥
(पृ० ४४४-४५५)

तत्तनूजेनानन्तदासेन सा० द० लोचने (पृ० ६३५) चायमेव ग्रन्थ उद्दिष्टः। चण्डीदासेन स्वयं का० प्र० दीपिकायाञ्च— यस्तु रसादिहीनेऽपि क्वचन काव्यव्यपदेशः स बन्धादिसाम्याद् गौण एव। तच्च सर्वमुक्तं बितत्याशिवप्रसाद-शर्मभिसिद्धान्तसंग्रह इत्येव दिक्' (पृ० १३), 'न नात्र गङ्गाविषयभावध्वनन-प्रत्याशा ज्यायसी। यत्र सर्वात्मना तन्मात्ररूपा रतिः प्रतीयते तस्य तद्वर्णन एव हि रतिर्ध्वनिव्यपदेशो न तु दैवतोपनिबन्धमात्रेणेत्यादि विस्तरान्निर्णीतं ध्वनि-सिद्धान्तसंग्रहे"। "सर्वस्यैव काव्यरूपस्य वाच्यार्थनियतप्रामाण्यस्यापि स्वप्रकाश-रसाद्यास्वादप्रमित्ययोगव्यवच्छेदेन प्रामाण्यनियम इति सिद्धान्तरहस्यसूत्रणपरम्। एतच्च सिद्धान्तसंग्रहे निपुणं निरूपितम् (का० प्र० दी० ८६ पृ०) इत्यादिभिर्बहु-शस्तस्योपयोगः। आनन्दवर्धनसूचिताभिनवगुप्तोपस्कृतमतपरिष्कारेणैव ध्व० सि० संग्रहस्य वैशिष्टयम्। परं महदिदं वैशसं यद् ग्रन्थोऽयमिदानीं लुप्त एव। भूयसा प्रयासेनाप्यस्माभिरस्य न काऽपि मातृकालिपिरधिगता।

अन्ते च कौतुकावहबृत्तमेकमुपस्थापनमर्हति। प्राक्तनैः कैश्चित् साहित्य-दर्पणसम्पादकैर्बिश्वनाथकविराजस्य वङ्गीयत्वेन कृतो निर्देशः पाश्चात्यपण्डित-वरेण्यैः मैकडोनेलमहोदयैः स्वकीये संस्कृतसाहित्येतिहासग्रन्थे समर्थितः। का० प्र० दीपिकायाः 'ग' मातृकाया अबसाने पुष्पिकायां लब्धं 'सायं सूर्यात्मजाया' (मातृ-कालिपिपरिचये सामाग्र्चेण उद्धृतम्) इत्यादि पद्यमन्यूनं शतत्रयवर्षात् प्राग् वङ्गी-यानामेतत्संबन्धिदेशनिर्णये मतमेतत् परामृष्टमित्यापाततो धारणा। परन्तु वङ्गीय-भाषाकबिमुख्यानां चण्डीदासमहोदयानां प्रान्तवासिना लिपिकारेण स्वदेशगौरव-मनुबध्नता इदं घोषितं स्यात्। इदममूलकमेवेति काव्यप्रकाशदीपिकायामुत्कलनृप-वरनरसिंहदेवादिसभ्यानां चण्डीदासस्य पितामहत्वनिदेशपरात् (का० प्र० दी० ११२ पृ०) काश्मीरभाषायाऽसभ्यतावोधकं रुचिं कुर्वित्यादि च उत्कलभाषया तु तवाण्डमार्वंप्यादि (का० प्र० दी० २४१ पृ०) 'कलिङ्गाः साहसिकाः' (का० प्र० दी० पृ० ४२, सा० द० पृ० ३६) इति च बहुश एषां तदीयग्रन्थेषु उपलम्भादुत्क-लीयाविमाविति न सन्देहलेशावकाशः। उक्तं च पद्यं लिपिकाराणामितरग्रन्थतः परिचितानां निवेशनपरशीलतया लिपिकारस्यैव योजनेति नातिरिक्तमालोचन-मर्हति।

काव्यप्रकाशदीपिका

काव्यप्रकाशदीपिकायां टीकाकृत् स्वयंवृत्ते कृत्ये आत्मनियोगविषये तत्पूर्व-वर्तिनां दुर्व्याख्यानमेव प्रयोजकत्वेन मन्यमानस्तान् कटाक्षयति— 'काव्यप्रकाश-

तरुरेष कुसंप्रदायव्याख्याविलोलमरुदाकुलितप्रतानः'' इति। तत्र कीदृशं तद् दुर्व्याख्यानं के च विशिष्य तत्कटाक्षलक्ष्यीभूताः, किञ्च तैः सह तस्य काव्यतत्त्वनिरूपणे वैमत्यमिति काव्यप्रकाशदीपिकात आभासेनानुमीयते। यदि संप्रदायपदस्य प्रसिद्धार्थयोगस्तस्येष्टस्तदैतत्संप्रदायस्य निराकरणं न सुकरम्। टीकाप्रारम्भे एव ''निरतिशयसुखास्वादरूपत्वादेक एव रसः, न तु त य विशेषः संभवति। अतस्तन्मात्रजीवातोः काव्यस्य ध्वन्यादिरूपेण यद्भेदगणनं तदपि खरविषाणैरायव्ययकल्पनमेवेति ये मेनिरे तन्मन्दम्'' (का० प्र० दी० पृ० ३) इत्यादि शिथिलशिथिलया निर्देशभङ्ग्या यदि तावत् कस्यचित् संप्रदायस्योद्देशष्टीकाकृदभिमतः स्यात् स खलु मूलग्रन्थकृतामानन्दवर्धनादीनां गतिमनुसरतां निन्दावाद एव। न च स स्वकीये टीकारचनव्यापारे घटकतामियात्। न चास्य जरतां गौरवबन्धनियन्तृत्वं मूलकृतो यद्बहुशस्तेनाक्षिप्तं तेनैव गतार्थता। यस्याभियोगस्य अस्मदुपलब्धासु का० प्र० दीपिकातः प्राचीनतरटीकासु रुचकमाणिक्यचन्द्रश्रीधरकृतासु तन्मतस्य समर्थनवार्तापि न श्रुता। अभ्युपगमवादेनैतन्मतस्य ध्वन्यालोकचतुर्थोद्द्योते सूचितस्वीकृतेरपि भोजराजेन स्वग्रन्थयोर्विशेषतः शृङ्गारप्रकाशे—''आम्नासिषुर्दश रसान् सुधियो वयं तु शृङ्गारमेव रसनाद् रसमामनामः'' इति, ''वीराद्भुतादिषु च येह रसप्रसिद्धिः सिद्धा कुतोऽपि वटयक्षवदाविभाति'' इति च निर्बन्धतो घोषितस्य टीकाकृदभिप्रायेणायोग्योद्घाटनस्य, न चाऽपि तैस्तथा कृतमिति यतो योग्यानामेव कालप्रभावातिक्रमः प्रसारश्च इति सार्वकालिकै रभियुक्तैरनुमोदितेननयेनैतादृशीनां टीकानां परामर्शयोग्यता युक्ता। यदि कुत्र कुत्राप्यंशे कैरपिटीकाकृद्भिः सह स्वमतविसंवादस्तमेवालम्ब्य चण्डीदासप्रयासः (टीकाकृत्कृतदूषणतस्तादृश्येव वस्तुस्थितिरित्याभाति), तदा संप्रदायनिन्दाऽनवसरहतैव।

एवं सति—

''भारती कालिदासस्य दुर्व्याख्याविषमूर्छिता।
एषा सञ्जीवनी टीकातामद्योज्जीवयिष्यति॥''

इति प्रथितटीकाकृतो मल्लिनाथस्य स्वावदान घोषणेव ततः प्राचीनस्य चण्डीदासस्येयं निन्दा स्वकृतिश्लाघात्वेन यदि पुरोभागिभिरुच्यते तदा न तन्मनीषिगर्हणामर्हति। इयं च श्लाघा तस्य स्ववंशाभिजात्यगौरवोल्लासितस्य सर्वथाऽऽत्मप्रत्ययशीलस्य नायोग्येत्यालङ्कारिकचक्रे प्रथितनाम्नां रसगङ्गाधरकृतां दृष्टान्तेनोहनीया।

टीकाकृत्कृतकाव्यलक्षणालोचनं ग्रन्थकृत्परिप्रेक्षितमाक्षिपति, न तु केवलं कारिकापरिप्रेक्षितमिति स्पष्टः काव्यप्रकाशग्रन्थे बहुत्र। ग्रन्थः कारिकावृत्त्यवयवाभ्यामुभयात्मकः। चण्डीदासः प्राचीनानामत्र मतं विवादोत्थापनावर्जितमेव गृह्णातीति मते पक्षपातिनो वयम्। यत्र यत्र वृत्तिकृतो मतं कारिकाकृतो भिन्नमिव

प्रतीयते तत्र तद्विशदनेन मतानैक्यं न वरीवर्तीति प्रतिपादनापरत्वेन व्याख्येयं भङ्गयाऽन्यथा नेयेति मन्यामहे। विरलतयैकस्मिन्नपि स्थले यत्र एतदन्यथा प्रतिपाद्यत इति सूच्यते यथा 'आह्लादकत्वं माधुर्यम्' इति कारिकायां 'शृङ्गारेऽर्थात् संभोगः' इति वृत्तिः। शृङ्गारशब्दः संभोगमेवाहेत्याह वृत्तिकृदिति चण्डीदासमन्तव्यम् (का० प्र० दी० ३५७ पृ०) तत्रापि तदपरिहारो न दुःशकः। 'शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्' इत्यत्र शृङ्गारपदं रसोपलक्षणम्' इत्यालङ्कारिकवर्याणां निर्धारणमत्र प्रमाणम्। एतदभियोगसमर्थने टीकाकृता कारिकावृत्तिकृतोर्मतवैलक्षण्येन किमपि विरुद्धं सूचितम्। परन्तु इतरथैव तस्य व्याख्यानावतरणिका यथा लक्ष्यं न मुख्यम्' इति कारिकाभागे श्रीधरमतमाक्षिपता चण्डीदासेन 'नेदं मुख्यं नाप्यत्र लक्ष्ये बाध इति हि लाक्षणिकार्थविषय एव कारिकाभाग इत्यलं पलालचर्वणेन' इति।

लक्ष्य इति। एतस्मिन्मते कारिकाप्रतीक पूरणमिति बदता तथैव कण्ठतः घोषितम्। जातेरेव शब्दबोध्यत्वं व्यक्तिस्तत्राक्षेपेणायातीति मीमांसकमतं परिष्कुर्वता चण्डीदासेन—'व्यक्तिषु द्वितीयलक्षणया संसर्गबोधनमिति स्वीकुर्वतां भट्टानां गौरवनियन्त्रितेन ग्रन्थकृतोक्तम्'' (का० प्र० दी० पृ० ४५) इति, न तु पारमार्थिकमिति। गौणीलक्षणयोर्भेदप्रसङ्गे टीकाकृतैवं व्यपदिष्टम्—'अलीक एव एतावानुपचारकैतवविवेचनाय प्रयास इति चेत्, सत्यमेतत्। किन्तु प्राचीनप्रणयमनुरुन्धानेन ग्रन्थकृतेत्थमभिहितम्।

वस्तुतस्तु सम्बन्धस्वरूपभेदमाश्रित्य कथञ्चिन्निर्वाह्यो गौणशुद्धविभागः'' (का०प्र०दी०पृ०४८) इति। काव्यलक्षणेऽपि कारिकायामेव 'अनलङ्कृती पुनः क्वापि' इति विशेषणे यस्य सर्वत्र सालङ्काराविवत्यादि वृत्तौ विश्लेषणम् (का०प्र०दी०पृ०१३) तदेव सामग्र्येण कटाक्षितं चण्डीदासेन। नात्र चण्डीदासेन प्राचीनानां टीकाकृतामस्मदुपलब्धानां मतं दुर्व्याख्यानतया ख्यापनत्वे समर्थितम्। यतस्तैः एवं चात्र पदपञ्चकेन उल्लासदशकं सूत्रितम्'' इति रुचकश्रीधरमतनिर्यासोऽस्यां काव्यप्रमाणपरत्वेन न काव्यलक्षणपरत्वेनोपयोगः। चण्डीदासेनोत्तरार्धस्य 'इदमुत्तमम्' इत्यस्यावतरणिकायां विशेषलक्षणं च वक्तव्यम्' इति श्रीधरमतमनुवदता तदभेदेन क्रमेणैतस्य विवरणे क्रमेणेत्याह पूर्वं लक्षणमिति शेषः' इति कथयता चैतैः साहचर्यमेव विधीयते न विरोधः। कविकर्मेति पदं विवृण्वता तेन श्रीधरादिमतं भट्टनायकग्रन्थोदितव्यापारपक्षमनुमोदमानेन च व्यापारप्रवणतयेत्यस्य व्याख्याने 'विशिष्टविभागादिसंयोजकं तत्प्रवणतया तदङ्गतया उपादीयमानत्वेन' इति च परिष्कुर्वता (का० प्र० दी० पृ० ३६) स्वानुमताश्रयत्वेन वृत्तिरपि समर्थिता। अतः काव्यरहस्योद्घाटने तेषामौदासीन्येन चण्डीदास एतान् प्राचीनटीकाकृतो दुर्व्याख्यातृत्वेन सूचयतीत्यपि स्यात्। दृष्टिभङ्ग्यां निर्बन्धतारतम्येनैष कल्प इति पुरस्ताद् वक्ष्यते।

काव्यप्रकाशटीकाकृतां पक्षे पूर्वतरटीकाकृतामुल्लेखे शैली प्रागेव निरदर्शि। सा चाव्यवहितपूर्ववर्तिनां समानाञ्चलभाविनां च सममाक्षेपपरा। काव्यप्रकाशटीकासाहित्ये प्रथमस्तरे नैषा प्रकटा। सा खलु सामान्यतः संप्रदायसिद्धं मतं तदन्ते च ग्रन्थोक्तयुक्तिमेवोज्जीवति। रुचकमाणिक्यचन्द्रश्रीधरा एतदर्थे निदर्शनानि। मध्यकक्षायामेतस्याक्षेपप्रवणत्वस्याविर्भावश्चरमकक्षायां तस्योत्कटत्वम्। अस्मदुपलभ्यमानग्रन्थसंभाराद् एतदेवोपोद्बल्यते यत् चण्डीदासस्याव्यवहितपूर्ववर्ती प्रथितटीकाकृन्मैथिलः श्रीधरः। एषाऽऽक्षेपप्रवणता कुत्राप्यसहमानतापर्यायभूता सोपहासोत्प्रासन्नाश्रयति. यथा काव्य प्रकाशदीपिकायाम्—"वाक्याभिप्रायेण मुख्यार्थबाध इति ब्रुवाणः श्रीधरसान्धिविग्रहिकः सन्धिविग्रहव्यवसायव्यग्रः सम्यगबुद्धवान् इति, "नेदं मुख्यं नाप्यत्र लक्ष्ये बाध इति हि लाक्षणिकार्थविषय एव कारिकाभाग इत्यलं पलालचर्वणेन' (पृ० ५९-६०) इति।

"यत्तु स्वात्मन्यविकल्पः' इति न्यायादिति श्रीधरेणोक्तं तन्न युक्तम्, प्रकाशमात्रे निर्विकल्पकत्वस्य अंशान्तरे च विकल्पस्य प्रसङ्गात्। यदि त्वेकरूपतया परिहारः स्तदा विकल्पत्वे सत्येव स्वात्मवत् निर्विकल्पकत्वं स्यात्। एतच्चोभयमङ्गीकुर्वतामुपनीय वाससि बद्धो ग्रन्थिः' (११७–११८ पृ०) इति गुणीभूतव्यङ्ग्यप्रकरणे सन्दिग्धप्राधान्यपदविवरणावसरे "वक्त्रभिप्रायरूपस्य व्यङ्ग्यस्य वाच्येन सह क्षीरजलवत् क्रोडीभावः. न तु स्फुटतया पृथक् प्राधान्यम्। अतोऽस्फुटमिति वदन् सान्धिविग्रहिकः स्वभवनोत्सवाय तदेव विक्रीतवान्" (पृ० २१०) इत्यादौ। कुत्र वा ग्रन्थलग्ने श्रीधरस्य त्रुटिरभिख्यायते। यथा "उल्लास्य कालकरवाल" इति मूलोदाहृतस्य कप्फिणाभ्युदयीयपद्यस्य व्याख्यानावसरे "कालकरः कृष्णकान्तिः बालः प्रत्यग्रः" इति श्रीधरः कष्टं सृष्टवान् (पृ० १५३) इति। सप्तमोल्लासे कथितपदतादोषस्य गुणत्वपक्षे '"उदाहरणालोचनप्रसङ्गे—' पक्षे पौरुषकमला पौरुषलक्ष्मीः पौरुषमेव कमलं यस्याः' इति कमलाविशेषणत्वं वदन् सान्धिविग्रहिको भिन्नार्थतया लाटानुप्रासभङ्गप्रसङ्गेन भाषणीयः' (पृ० ३२७) इत्यादौ। कदाचित् श्रीधरस्य तार्किकमीमांसकत्वेन परिचितस्याक्षेपो यथा द्वितीयोल्लासविवरणे भट्टादिमते निर्बन्धं प्रदर्शयतः मीमांसासाधारणनयनिपुणत्वघोषणेन शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्याधिकृत्य एतेन ऋणक्रियेत्यादिवृत्तिरपि जातिरेवेति पक्षनिक्षेपविक्षिप्तः श्रीधरः सान्धिविग्रहिकोऽपि समपास्तो बोद्धव्यः (पृ० ३९) इति।

भेदहेतुर्वेति पञ्चमोल्लासीयन्यायमतावतारव्याख्यानावसरे टीका– इह केचिदाहुः-प्रकरणादिलक्षणज्ञापकान्तरानुगमान्वयेऽखण्डः शब्द इति। अत्र श्रीधरः ज्ञापकान्तरानुगमेऽपि न क्वचिच्छाब्दताहानिः अन्यथा शब्दाबोधितेऽर्थे सत्यासत्यत्वाजिज्ञासायां सत्य एवायमाप्तोक्तत्वादित्यनुमानेन साधिते सत्यत्वे तस्याप्यर्थस्य शाब्दत्वप्रसङ्गात्" इति परिहारमाह। 'स च न समीचीनः' (का० प्र० दी०

पृ० २१५) इति च । एतदतिरिक्तेषु श्रीधरकृतेषु शब्दार्थविवरणेषु कुत्र कुत्रापि आक्षेपः सूचितः ।

श्रीधरस्याव्यवहितोत्तरकालिकत्वेन संभाव्यमानः श्रीविद्याचक्रवर्ती चेमामेव भङ्गीं समाश्रयतीति तत्कृतायाः का० प्र० संप्रदायप्रकाशिनीतो बहुशो ज्ञायते। तस्यापि टीका पूर्वेषां टीकाकृतामसांप्रदायिकत्वं स्वकीयनाम्नाऽनुरुणद्धि इत्यपि चण्डीदासकृताभियोगे तस्य सहयोगकल्पना सुशका। परमत्र साग्रहं जिज्ञास्यं यत्तेन श्रीधरस्य काव्यमीमांसकत्वे आक्षेपः कुत्रापि न दत्तः, परन्तु—'किं बहुना सन्त्येव तत्र तत्र स्खलितानि बहूनि सान्धिविग्रहिके। तदपि न दृष्टोऽस्माभिः स इवाद्यतनेषु काव्यमीमांसासु ।।" (स० प्र० २ खण्डः २८९ पृ०) इत्येषा प्रशस्तिः श्रीधरस्य सर्वथाऽनुरूपा ।

चण्डीदासेन कविपण्डितेन काव्यमीमांसाविषये यन्मौनमाश्रितं तत्र कारणान्तरमस्ति। श्रीधरो न कथमपि कविपदवीमर्हति, तस्योदाहरणेषु स्वकीयकृतेरदर्शनादिति मन्यमानेन चण्डीदासेन तस्य काव्यानुशीलनशक्तिरपि प्रौढ्याऽपलपितेति मन्यामहे। काव्यामीमांसकानां मध्ये कवित्वप्रतिभाऽप्यावश्यकीत्येवं तदनुशीलनशक्तिः स्वतः सिद्धेति तस्याकूतम् । काव्यकृतामाद्येन नैषधचरितकृता श्रीहर्षेण व्यक्तिविवेककारस्य संबन्धे 'काव्यमीमांसिषुप्राप्तमहिमा' इति विशेषणं निबध्नता नैतन्मतेऽरुचिः सूचिता, यतो व्यक्तिविवेककारस्य काव्यनिर्माणशक्तिर्न तत्र क्वाप्युल्लसति । अपरं च का० प्र० विवेके कुत्रापि न कृतं रसात्मवादस्य सनिर्बन्धमाघोषणं यत् खलु चण्डीदासमते काव्यमीमांसकस्य मुख्यं लक्षणम् । वस्तुतस्तु श्रीधरोऽनाडम्बरमेव ग्रन्थं संप्रदायमतनिबन्धपुरःसरमवतरति, न तावत् मतविशेष पक्षपातं सूचयति ।

पक्षान्तरे यथाऽन्यत्रापि प्रकटं तथा चण्डीदासस्यापि श्रीधरमताश्रयणं बहुश उपलभ्यते। विशेषतो वृत्तिग्रन्थव्याख्याने यतः कुतश्चिदुदीरितात् तन्मताश्रयात् दृढीक्रियते। तथा च 'अनेनेत्यादि भागं तद्विवरणसौकर्याय प्रथमतो व्याचष्टे वृत्तिकृत्" इति (का० प्र० दी० पृ० ४) 'कृते इत्यव्ययम् तादर्थे वर्तते, अर्थयेत्यर्थः। अथवा करणं कृत् संपदादित्वात् क्विप् इति' (पृ० ५ का० प्र० दी०)। प्रथमत इदं मतं श्रीधरात् किञ्चिदर्वाग्भवेन केनापि स्वग्रन्थे तर्कभाषाविवरणे श्रीधरोपजनत्वेन व्याख्यातम् (काव्यप्रकाशविवेके द्वितीयखण्डोपोद्घाते द्रष्टव्यम्) । अथान्यदपि तदेतदुक्तम् हृदयदर्पणे—'शब्दप्राधान्य इत्यादौ काव्यगीर्भवेदित्यन्ते सन्दर्भे (पृ० ७) । तदुक्तं काव्यकौतुके—प्रज्ञेत्यादिके (पृ० ७) उद्धारे च । "यतनीयम्" इत्यग्रिमकारिकासंगतिसूचनार्थमिति (का० प्र० दी० पृ० ९) ।

तदुक्तम्—"न स शब्दो न तत्" इत्यादि (११ पृ०), 'भिद्यतेऽनेनेति भेदो विशेषलक्षणं भेदनं भेदधर्मो विभागश्चेति" (का० प्र० दी० पृ० १५), "गतासीति

लक्ष्य इति प्राचीनानां श्रीमद्वाचस्पतिमिश्रप्रभृतीनां व्याख्यानम्'' (का० प्र० दी० १७ पृ०) इति, तथा सप्तमोल्लासीयो-दाहृतपद्ये—''दीनं त्वामनुनाथते'' इति प्रकृत्य ''न चानुनाथत इत्येतावन्मात्रेण दोषानवगमात् पदान्तरापेक्षणे वाक्यदोषोऽयमिति वाच्यम् तन्मात्रस्यैव अनुशासनलङ्घनात्'' (पृ० २६५) इति, तथा सप्तमोल्लासे (का० प्र० दी० २९८, २९९, ३०२ प्रभृतिषु) तदुक्त्युद्धारेण प्रमाणरूपाणि सर्वाणि श्रीधरग्रन्थे उपलभ्यन्ते । अन्यच्च स स्पष्टत एव श्रीधरं स्तौति—'तस्मादत्र प्रकरणे श्रीधरसान्धिविग्रहिको गणनाऽऽदिकं निखिलमेव तत्त्वतो जानातीति तदुक्तिरेव लिख्यते'' (का० प्र० दी० १९३ पृ०) इति । एवं 'लक्षणा तेन षड्विधा'' इति पङ्क्तिलगने ''न तु षट्प्रकारा'' प्रकारान्तरसंभवस्य प्रतिपातित्वात्, इत्यादौ श्रीधरमतमेवाश्रितम् ।

वाचस्पतिमिश्राणां मतोद्धारभाषा त्वनुधावनीया । श्रीधरेण वाचस्पतिमिश्राणामिति निरुपपदं नाम चण्डीदासेनैकत्र 'प्राचीनानाम्' (पृ० १७) इति, अन्यत्र 'सर्वतन्त्रविद्' इति (पृ० १३१) अमनोज्ञतरम्, विश्वनाथेन काव्यप्रकाशदर्पणे 'सर्वतन्त्रस्वतन्त्र' इति विभ्रमकरं विशेषणं दत्तम्, एतत् प्रकृत्यालोचनमितरत्र कृतमिति विस्तरानुसन्धित्सुभिस्तत एवालोकनीयम् । उत्तरार्धविवरणकृत्ये प्राचीनटीकाकृतो रुचकश्रीधरादीत् विशेषतो दशमोल्लासविवरणे चैतैरेव गृहीतमलङ्कार सर्वस्वमुपजीवनं चण्डीदासः तेषामेव मार्गमनुसरति । उदाहरणव्याख्यायामप्येभिर्न तात्पर्यं प्रकटितं यथा चण्डीदासेन । एतच्च सर्वं टिप्पणीत एव सूचितं स्यात् ।

श्रीधरकृतकाव्यमीमांसायाः श्रीविद्याधरचक्रवर्तिना समुद्दिष्टगरिम्णि एकं तावन्निदानं यत्तत्र टीकाकृतां प्राचीनतराणामलङ्कृतिकृतां ग्रन्थतो मतोपयोग प्रकाशनं कृतम् । यद्यपि चण्डीदासेनापि क्वचित् क्वचिद् भामहवामनरुद्रटमहिमभट्टानां तथा प्रायेण स्वाभिमतकाव्यतत्त्वं विवृण्वतामानन्दवर्धनाभिनवगुप्तपादानां च मतोद्धारं कुर्वता तथा चेष्टितम्, तथापि न तस्य तन्मार्गानुसरणे तात्पर्यमिति स्पष्टमनुमीयते । यदि टीकाकृतां गड्डलिकाप्रवाहेण स्वोद्भावनेन वा कष्टसृष्ट्या साम्प्रदायिकमते प्रतिष्ठितं किमपि निगूहितं भवति, तदा तेषां कृतमकृतं स्यात् । अष्टमोल्लासे गुणालङ्कारप्रविभागे ''समवायवृत्त्या शौर्यादयः संयोगवृत्त्या तु हारादयः'' इत्यादिवृत्तिग्रन्थविवरणे प्रस्तुतस्य वक्तव्यस्यानुत्थापनेन (३५४ पृ०) तदुत्थालोचनविरहेण च चण्डिदासटीका विकलैव ।

एवमपि चतुर्थेऽर्थशक्त्युद्भवध्वनिविभागावसरेऽलङ्कारेणवाच्येनालङ्कारस्य व्यञ्जने मूलकृता प्रस्तुते मूलोद्धृतिनिदर्शनानि प्राचीनालङ्कारिकमतसंज्ञाऽऽश्रयेण स्थितानीति तत्तद्ग्रन्थमनुपयुज्जता मम्मटमतमनुसृत्यैव यद् विवृतं तत्र च प्रसङ्गतो मूलग्रन्थकृत्कृतमसम्बद्धभाषितं कटाक्षितम् । तदप्यनवसरहृतमेव । यथा चण्डीदासेन प्रतीतेर्बहिरङ्गत्वाप्रसङ्गादित्युत्प्रेक्षैव वरं नोपमा वृत्तौ तूपमापदप्रयोग औपम्य-

संभावनायामपि विद्यमानतया संगमनीयः'' (का० प्र० दी०) इति । गाढकान्तेति समुच्चायालङ्कृतिर्व्यज्यते । ······तुल्ययोगितायाः गन्धोऽत्र नास्ति (का० प्र० दी०) इति । ''कार्यकारणव्यत्ययातिशयोक्तिरूपो वाच्यः'' इति । एवम् '···केसेसु बलामोडिअ'' इत्यत्र मूले वाच्ययोत्प्रेक्षया व्यङ्ग्यो काव्यहेतुरलङ्कार इत्यस्य विवरणे ''अत्र यद्यपि समासोक्त्यलङ्कृत एवार्थो व्यञ्जकस्तथापि विशेषणतया तस्य प्राधान्यविरहेणागणनम् । अत एव वृत्तिकृत् तदनपेक्षया व्यङ्ग्यं काव्यलिङ्गं सारतया मध्ये लिखितवान्'' इति चण्डीदासोक्तममनोज्ञम् । तत्त्वतस्तु तत्र तत्र वामनोद्भटयोर्मतमाश्रित्य ग्रन्थो व्यवस्थितः । अपि चोद्भटमते काव्यहेतुर्न सर्वथा मम्मटनिबन्धानुमोदितकाव्यलिङ्गस्य पर्याय इत्यपि स्मर्तव्यम् । एषु कुतूहलिभिः काव्यप्रकाशविवेके टिप्पणी तथा तत्र 'ग' परिशिष्टे पृ० १०६, १०९, ११० ११३ चिह्नितेषु ग्रन्थोद्धारश्च द्रष्टव्यः ।

एवमादिस्थले काव्यप्रकाशदीपिका लाघवं प्रकटयन्त्यपि यत्तस्याः स्वसमयात् पञ्चशतवर्षाणि यावद् विश्वनाथ–गोविन्दठक्कुर–परमानन्दचक्रवर्ति–कमलाकरभट्ट-पण्डितराजजगन्नाथ-नागोजीभट्टप्रमुखैः ससंभ्रमं स्मर्यते, तत्तस्या जनमनोलग्नत्वेन प्रभूतमादरमेव सूचयति । एतन्मूले द्वौ तावत् प्रबलौ हेतू स्तः । तस्या अनुपमा भाषणभङ्गी साधारण्येनान्यैर्गृहीता निबन्धनिबन्धनरीतिमतिशयाना तदुदाहरणयोजनायामन्वयप्रयासश्च । अत्र विषयेऽलङ्कारनिबन्धकृतामेक एव पण्डितराजो जगन्नाथस्तमनुसरति बहुत्र तमतिशेते च । भामिनीविलासादिकाव्यकर्तुर्यदनायाससिद्धमिवाद्रियते तस्यैव विकासश्चण्डीदासकृतिषु स्फुरतीति कविपण्डितस्य तस्य गौरवावहमेव । काव्यप्रकाशस्य ध्वनिप्रकरणतया स्वयं ग्रन्थारम्भे तथैव सूचितस्य दुर्व्याख्यातॄणामसद्विवरणभ्रंशान्मोचने यद् गौरवमनेनाकाङ्क्षितं तत् तस्य शास्त्रप्रावीण्येन महताऽप्यंशतः साधितमिति प्रागेवास्माभिरसूचि । परं टीकाकृतः सहृदयहृदयहारि वैदग्ध्यमेवात्र मुख्यं घटकमिति काव्ये रससर्वस्वत्वप्रतिष्ठाकामस्य रसिकचूडामणेर्वचनरचनप्रपञ्चतोऽनाहार्यं स्ववृत्तमेवोद्घोषयतीति पूर्वतरप्रघट्टके निवेदितम् । टीकाकृदपि कविवागमृतप्रवाहैर्मूलग्रन्थस्योज्जीवनं कृतमिति स्वकीयोक्त्या मतामतं संवर्धयति ।

निबन्धबन्धने चण्डीदासस्य भाषा लीलया प्रसादौजोमाधुर्याणि त्रीण्येव यथायथमौचित्येनोपयुनक्ति । अत्र विषये कविपण्डितमूर्धन्यः श्रीहर्षस्यादर्श आसीदिति नानवद्यम् । तच्च ऋणमनुभवमात्रवेद्यं यस्य माहात्म्यानुवदनं काव्यप्रकाशदीपिकायां स्थानं लभते । तदुक्तं खण्डनकृता—''अन्यथानुपपत्तिश्चेदस्ति'' (११८ पृ०) इत्यादिना । अत्रार्थे निदर्शनत्वेन तत्प्रयुक्तानां युक्तिगाम्भीर्यकटाक्षणचटुलत्व-सोपह्वासोत्प्रासादीनां कानिचिदुल्लिख्यन्ते, यथा—''कथं तर्हि काव्यास्वा-

दापकर्षः सुस्थदशापेक्षयेति चेत्, दुरभिमानिन् अनवबोधग्रस्तोऽसि···" न चैवं चन्दनादिषु (पृ० ३)।

अत्र ब्रूमः। केनोक्तमत्र रसादिर्गुणीभूत इति ? ननु यद्येवं तर्हि दीयतां ध्वनिगुणीभूतव्यङ्ग्याख्यकाव्यक्रियायै निवापाञ्जलिः। विवेचकैर्ध्वन्यादिविभागः क्रियत इत्युपपद्यते भेदव्यवहारः। 'कष्टं भोः प्रविलुप्तं निखिलमेव ते संव्यवहारभाण्डम्। परमार्थतस्तु सरसतात्मैव काव्यम्' इत्यादिदीर्घदीर्घः सन्दर्भः। ततश्च निवर्त्यतामस्माकं सर्वेषामुपजीव्येभ्यः सकलरसाचार्यचक्रवर्तिभ्यो ध्वनिकारपादेभ्यः पूर्वप्रहिता रोषकषायविषमा दृष्टिः अङ्गीकुरु च सहृदयहृदयचिरनिद्राणाऽनादिवासनाऽन्तरलीनस्यैव रत्यादेः रसत्वेन स्फुरणमिति विश्रान्तो विवाद इति। "यत्र क्वचिदपि वाक्यश्रवणानन्तरम्···, तत्कल्पनाभावे को नाम दण्डधरः ? किञ्च एतानि पदानि संसर्गज्ञप्तिपूर्वकाणि। नास्माभिर्भवत्प्रसादप्राप्तविज्ञानलवगर्वदुर्विदग्धैः सार्धमयमसमो विग्रहः कार्यः" इत्यादीनि। काव्यप्रकाशटीकाकृद्भिः स्वरचितनिदर्शनप्रसङ्गे यत् कृतं यच्च तत्र वचनीयं तदस्माभिः काव्यप्रकाशविवेकोपोद्घात एव उक्तमत्र नानूद्यते। परम् "अचमत्कृतिकाः श्लोका जरठा इव योषितः" इति मनोज्ञमन्तव्यं सूचयन्नल्पैरपि स्वरचितैस्तथा परिमितैरभिनवगुप्ताद्युद्धृतैरुदाहरणैः स्वरुचिं प्रकटयन् चण्डीदासः सर्वथाऽनुकरणीय एव टीकाकृतां भवति। 'घ'-परिशिष्टे तारकाचिह्नितानां श्लोकानामालोचनात् तस्य कविकर्मनैपुण्यं लक्ष्यलक्षणसंगतिप्रावीण्यं च युगपत् प्रकटितं स्यात्। उदाहरणानि शिष्यबुद्धिवैशद्यार्थानि न पुनः स्वशक्तिपरिचायकानीति न तेषां विस्तरस्तेन कृतः।

टीकायां मूलग्रन्थलगने या दिगुन्मीलिता तेन साऽप्यसमैव। स्वल्पाक्षरायाः सूत्रकल्पाया मम्मटवृत्तेरध्याहारप्रपूरणेनैकतस्तस्य चेष्टा। इयं च क्वचित्-क्वचित् प्राचीनै रुचकश्रीधरादिभिरप्याश्रिता। तत्र कर्तुं विचारयितुं चेति शेषः (का० प्र० टी० ९ पृ०)। क्वचित्त्विति च रसादौ विद्यमान इति शेषः (·४ पृ०)। 'रन्तुमिति तु फलम्' वृत्तौ व्यज्यत इति तत्संबन्धः (पृ० १८)। लक्षणे चित्रपदमध्याहार्यम् (का० प्र० दी०)। 'क्रमेणेत्यतः पूर्वं बुद्धाविति शेषः'। 'मुख्य इति अभिधेति शेषः'। 'अच्युत इत्यादौ हरिरित्यादि पदं सर्वथा नियमितमिति शेषः'। (का० प्र० टीका ६९ पृ०) इति नामत इति नामत उद्देशमात्रेणोक्ताः स्वयं च विविच्य बोद्धव्या इत्यर्थः (पृ० १४०)। एवं रसाभासादिलक्षणव्याख्याने। एतच्च शृङ्गारादिरसलक्षणैकदेशयोगोपलक्षणपरम्। तेनाधमपात्रतिर्यगादेरवबोध (पृ० १४५) इति। यदीति पर्यवसानकथनं न तु प्रस्तुतमिति। अत्र धन्येति वैपरीत्येन अधन्यता लक्ष्यते तददतिशयश्च व्यज्यते (का० प्र० दी०) इत्यादीनि उल्लेख्यानि।

क्वचिच्च ग्रन्थकृदुक्तिरंशत्वेन परिवर्तिता परिशोधिता वा। यथा "रसपदं चात्र संभोगव्यभिचार्यौत्सुक्यमाह – रस्यत आस्वाद्यत इति व्युत्पत्त्या। न तु साक्षादेवात्र संभोगनामा रसः। स्वाधीनपतिकायाः क्रीडास्थान एवमुत्कण्ठायाश्चर्व्यमाणत्वात् इति। "न गतासीत्यनेन वैपरीत्याद् गतासीति लक्ष्यते इति शेष इति प्राचीनानां श्रीमद्वाचस्पतिमिश्रप्रभृतीनां व्याख्यातॄणां मतम्" इत्यादौ।

...तस्मात् प्रतीत्यपर्यवसानेनात्र लक्षणैव युक्ता स्यात्। अत्र च दौत्यरूपात्यन्तनिकृष्टकर्मजीविकायां त्वयि कृतापराधायामपि मे नासूया तदेवंविधवञ्चनासहस्रजनितप्रौढपरिपाकपुटपाकपात्रत्वं मम युक्तमेवेति विप्रलम्भभेदेर्ष्यामानव्यभिचारिनिर्वेदध्वनिः। तदङ्गं तु लक्षणामूलवस्तुध्वनिरित्यवहितैर्विवेचनीयम् (पृ० १७-१९) इति। एवमुदाहरणान्तरे वृत्तिकृदुक्तादन्यदपि विस्तरभीत्या अस्मदनुक्तमपि बोद्धव्यं महाबुद्धिभिः इति। शत्रुत्वमिति लक्ष्यलक्षणामूलव्यङ्ग्यमित्यर्थः। अव्यासङ्गेनात्यन्तपोषे तु दैवतरतेः शान्तेऽन्तर्भाव इत्युक्तप्रायं सर्वमिति इत्यादि। इयं च प्रणाली सर्वत्रैवात्र टीकायामनुसृता।

मूलग्रन्थस्य परिपूरकत्वेन टीकाया उपयोगप्रसङ्गे किञ्चिदन्यदपि वक्तव्यमस्ति। एतत्कल्पे मम्मटानुसारिण आचार्यहेमचन्द्रस्य तथा टीकाकर्तुः श्रीधरस्य चेष्टितमत्राप्यनुसृतम्। अष्टमोल्लासावसाने यथा यथा प्रबन्धमौचित्यं गुणानामुपयोगे ग्रन्थकृदुक्तं भोजमतानुसारेण किञ्चित् परिपूरितं चण्डीदासेन। अवशिष्टं त्वानन्दवर्धनाभिनवगुप्तयोर्ग्रन्थयोरुद्धारेण प्रकटमपि तत्त्वत एतत्संप्रदायबहिर्भूतस्य भोजस्य मताश्रयेण दृढीकृतम् (शृङ्गारप्रकाशीय ११ शप्रकाशस्योपयोगोऽत्र स्पष्टः)। एवमत्र प्रथमानुच्छेदेऽनुशीलितस्य रसैक्यवादस्य विचारस्य सूचनेन। अत्रैव प्रसङ्गान्तरेऽन्तर्भावितस्य चित्तवृत्तिमात्रस्य समानतो रुद्रटस्यानुसारिणो भोजस्य। नामत इत्यादौ (१४३ पृ०) उपाधिभेदाद् रसभावतदाभासरूपेण व्यपदेशे च (का० प्र० दी०) चण्डीदासेनापि अव्यासङ्गेनेत्यादिकथनेन रसभाववैलक्षण्ये च, तथा रसाभासलक्षणेऽधमपात्रतिर्यगादावतिदेशकथनं भोजमतमेवोपजीवति। अर्थालङ्कारप्रकरणेऽलङ्कारसर्वस्वानुसरणे लक्षितपूर्वमपि वैलक्षण्यं ग्रन्थपरिपूरणायैवमुद्दिष्टं बहुशश्चण्डीदासेन। रुचकः पूर्वतरैरनुमोदितमाश्रयाश्रयिभावमुपजीवति। शब्दार्थतो दोषगुणालङ्काराणां विभागपरे परिवृत्तिसहत्वासहत्वपक्षे दृढमास्थावानपि टीकाकृत् क्वचित् क्वचित् तटस्थतया प्राचीनतरमतं रुचकाद्यनुमतं निबध्नाति यथा (का० प्र० दी० द्रष्टव्याः)। एवं नवीनतरमतेऽन्यासक्तिः स्वमतनिर्बन्धोपरोधो वा तस्य नादरणीयो यथा सर्वत्रैव काव्ये रसपरता पर्यवसेयेति 'एदद्गिरेर्माल्यवतः पुरस्तात्' इत्यादिरघुपद्ये संभोगशृङ्गारव्यङ्ग्यपरताख्यापनम् (२२ पृ०)। तत्रत्यं मन्तव्यं न केवलमश्ली-

लतास्पर्शि, परन्तु प्रकरणपरम्पराबाधितमेव । 'मृन्मतश्च दर्भान्तरनिर्व्यपेक्षा' इति, 'गन्धश्च धारादृतिपल्वलानाम्' इति चैतदव्यवहितपूर्वोत्तरपद्ययोर्विप्रलम्भतात्पर्यकत्वं निर्विवादमेव । नेयं दोषदृष्ठिर्वस्तुतो विशेषनिषेधे शेषाभ्यनुज्ञानमिति न्यायेन । अनन्तदासकृतात् साहित्यदर्पणलोचनोद्धृतस्यानुशीलनस्याशयात् टीकाकृतः प्रशस्तिपरैव युगलत्वकल्पे स्वकीयविरोधं सनिर्बन्धं दर्शयतामित्थं शब्दार्थावितिशब्दस्य पूर्वनिपातत्वेनाभ्यर्हितत्वं द्योतयन् विशेषत्वमाविष्करोति, शेषस्य तु परनिपातेनाप्राधान्याद् विशेषणत्वम् । एवं च शब्दधर्म एव काव्यत्वम् । तस्य चार्थे विशिष्टविभावादिव्याप्रियमाणस्यैवायमतिशय इति ध्वननार्थमर्थस्य तुल्यकक्षतया निर्देशः । ये तु द्वयोरपि काव्यत्वमिच्छन्ति त इत्थमनुयोज्याः—काव्यत्वमुभयधर्मतयाऽङ्गीक्रियमाणं संयोगादिवद् व्यासज्यवृत्ति वा गोत्वादिवत् प्रत्येकसमाप्यवृत्ति वा । नाद्यः सामान्यस्य तथाभावानङ्गीकारात् । नेतरः प्रत्येकं काव्यताप्रसङ्गात् । किञ्च कविकर्मविशेष एव काव्यमुच्यते । तच्च विशिष्टार्थप्रत्ययार्थसंयोज्यमानं पदकदम्बकमेवेत्युद्देश्य एवार्थो न तु कविव्यापारगोचरः इति । एनमेव निर्णयमङ्गीकृत्य चण्डीदासस्य 'आस्वादजीवातुः पदसन्दर्भः काव्यम्' इति, विश्वनाथस्य ''वाक्यं रसात्मकं काव्यम्'' इति, पण्डितराजजगन्नाथस्य 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति लक्षणस्थापना । रसगङ्गाधरकृता तत्र शब्दार्थयुगलं न काव्यशब्दवाच्यं मानाभावादित्यादि····। तदेवं शब्दविशेषस्यैव काव्यपदार्थत्वे सिद्धे तस्यैव लक्षणं वक्तुं युक्तम्, न तु स्वकल्पितस्य काव्यपदार्थस्येति निर्णयो यो घोषितः, स हि वस्तुतोऽस्यैवानुवादः ।

टीकाकृतां मध्ये यदयं न गतानुगतिशीलस्तदपि न केवलं तस्य ग्रन्थकृतं प्रति जरद्गौरवनियन्त्रितत्वरूपेणाक्षेपेणैव समर्थ्यते । अन्यथा च विश्लेषणेन मनोज्ञतया वस्तुस्थितिमनुधावन्त्या मनस्तत्त्वसमाधिपरया तत् स्फुटीभवति । स्वपितामहैराक्षिप्तस्य श्रृङ्गारपरत्वेनैकरसवादस्य निर्देशोऽनुशीलनं चादौ पृथक् सूचितम् । प्राचीनमतविशेषस्य स्थायिसञ्चारिभेदस्य रसपक्षेऽप्यभ्युपगमस्तेन कृतः । पूर्णरस-खण्डरसादि-तदुपज्ञसंज्ञया तत्कृतध्वनिसिद्धान्तसंग्रहसम्मतोद्देशेऽनूदितो विश्वनाथेन साहित्यदर्पणे, यथा–अत एवात्र प्रधानेतरेषु रसेषु स्वातन्त्र्यविश्रामराहित्यात् पूर्णरसभावमात्राच्च विलक्षणतया सञ्चारिनाम्ना व्यपदेशः प्राच्यानाम्, अस्मत्प्रपितामहानुज(सूनु) कविपण्डितमुख्यश्रीचण्डीदासपादानां खण्डरसनाम्ना । यदाहुः—''अङ्गं बाध्योऽथ संसर्गद् यद्यङ्गी स्याद्रसान्तरे । नास्वाद्यते समग्रं यत् ततः खण्डरसः स्मृतः ॥'' (सा० द० ४५५ पृ०) इति । काव्यप्रकाशदीपिकायां च चण्डीदासेनापि—'वस्तुतो ह्येवंविधे यद्यङ्गानुद्रेकस्तदा खण्डौ वीरश्रृङ्गारौ न तु पूर्णः श्रृङ्गारो वीरो वेति'' (का० प्र० दी०) । ''अत्र हि प्रागवस्थास्मृतिप्रभावितः खण्डश्रृङ्गारः समधिकशोकावेगप्रकृतिकं करुणमेव प्रकर्षयति'' (२०० पृ०) । ''रस्यत इति रसो भावशबलता । एवं शान्तप्रधाने भारतादौ श्रृङ्गारवीरा-

दीनां खण्डरसानामपि द्रष्टव्यम् । तस्मात् त्रयोऽप्यमी खण्डरसा एव परस्परमङ्गत्व-बाध्यत्वाभावादिति" । स्थायिभाव इति । स्थायिनः सकाशात् भवतीति स्थायिभावः, स्वातन्त्र्यविश्रामरहितः पूर्णरसाद् भावमात्राच्च विलक्षणतया सहृदयहृदयसंवेद्यस्वरूपः कश्चित् सञ्चारिनाम्नाऽस्माभिस्तु खण्डरसनाम्ना व्यवहार्यः कश्चन विशेष इत्यर्थः । ये तु स्थायिभावमात्ररूपो रत्यादिरित्याहुः, तेऽत्र स्थायिभावमात्रपदं मुख्यं भाक्तं वेत्यनुयोज्याः ।...तत्र नाद्यः, .. न द्वितीयः, अत आस्माकमेव व्याख्यानं ज्याय इति सर्वं सुसमञ्जसम् । अभिनवगुप्तपादैर्लोचनेऽप्येवमुक्तम् । भावाध्याय...(ना० शा० सप्तमेऽध्याये) समाप्तावत्रश्लोकः—

बहूनां समवेतानां रूपं यस्य भवेद् बहु ।
स मन्तव्यो रसः स्थायी शेषाः सञ्चारिणो मताः ।। इति ।

तत्राधिकारिकेति वृत्तव्यापिका चित्तवृत्तिरवश्यमेव स्थायित्वेन भाति । प्रासङ्गिकवृत्तान्तगामिनी तु व्यभिचारितयेति रस्यमानतासमयेऽपि स्थायिव्यभिचारिभावस्य न कश्चिद् विशेष इति केचिद् व्याचचक्षिरे । तथा च भागुरिरपि–– किं रसानामपि स्थायिसंचारिताऽस्ति ? इत्याक्षिप्याभ्युपगमेनैवोत्तरमवोचदस्तीति (ध्व० आलो० १७४-१७५ पृ०) । "अविरोधी विरोधी वा" इत्यादिकारिकां व्याचक्षाणः सः 'एतच्च मुक्तकविषयमेव न तु प्रबन्धविषयमिति केचिदाहुस्तदसत्" (ध्व० आलो० १७३ पृ०) इति चण्डीदासमन्तव्यमेव द्रढयति, स्वाभिमतयुक्त्या च स्फुटीकरोति ।

टीकाकृतो ध्वनिरहस्यवेदित्वेनैव स्वकीयप्रतिष्ठा सम्मततरेति ध्वनिसिद्धान्तसंग्रहं रचयताऽपि परिणतवयसि काव्यप्रकाशव्याख्यानं प्रस्तुतम् । अस्य ध्वनिरहस्यस्य, मूलमानन्दवर्धनाचार्यैर्भूमिकाविरचनेनाभिनवगुप्तेन लोचनाभिनवभारतीकाव्यकौतुकव्याख्यानेषु दृढतरं सनिर्बन्धं समर्थितमितीदमेव सम्प्रदायाम्नातमिति तदितरव्याख्याने तस्य रुचिरसूचि । एतद्व्यतिक्रमेण तेषां प्राचां काव्यलक्षणतद्भेदतद्दोषादिविवरणे स्खलनमिति तस्याकूतम् । "काव्यस्यात्मा स एवार्थः" इति ध्वन्यालोककारिकायां वृत्तौ "विविधवाच्यवाचकरचनाप्रपञ्चचारुणा काव्यस्य स एवार्थः, शोक एव श्लोकतां परिणतः" (ध्व० आ० २७ पृ०) इति प्रतीयमानस्यान्यभेददर्शनेऽपि रसभावमुखेनैवोपलक्षणं प्राधान्यादिति (ध्व० आ० २८ पृ०) चेत्यानन्दवर्धनेन निरधारि । अभिनवगुप्तोऽपि ध्व० आ० लोचने काव्यस्यात्मेति प्रतीकमुपादाय "स एव प्रक्रान्तवृत्तिवशाच्च तेन रस एव वस्तुत आत्मा । वस्त्वलङ्कारध्वनी तु सर्वथा रस एव पर्यवस्यते (ध्व० आलो० २७ पृ०) इति । "मुख्यतया च रस एव काव्यवाक्यानामर्थ इत्युक्तः (पृ० १८७) इत्यादिना भूयोभूय एतदेव रहस्यं निर्दिशति । चण्डीदासमतनिष्कर्षं कानिचित् का० प्र० दीपिकातो विनिगमकान्यत्रावतार्यास्य विषयस्योपसंहारः क्रियते—

१. यद्यपि चाखण्डबुद्धिवेद्यः काव्यार्थ इति नयेनास्वाददशायामवयवानां गुणप्रधानभावो न विकल्प्यते, तथाप्युत्तरकालीनविवेचकैरावापोद्वापविवेचने क्वचन कस्यचित् प्राधान्यं कस्यचिदप्राधान्यं भासत इति भेदव्यवहारः (पृ० २०)। ''ननु यत्र रसादिकमन्यत्र प्रक्रियमाणे गुणीभवति'''तत्र व्यङ्ग्ये कथं काव्यव्यपदेशो रसादेरमुख्यत्वात्, प्राधान्य एव काव्यत्वाङ्गीकरात्।

अत्र ब्रूमः। केनोक्तमत्र रसादिर्गुणीभूत इति। समूहावलम्बनरूपस्यास्वादस्य सहृदयहृदयविश्रान्तिधाम्नः शब्दार्थादिनिखिलकाव्यावयवचारुत्वसामग्रीसाम्राज्य-संपूर्णस्यात्रापि स्वसंवेदनसाक्षिकत्वात्। तस्यैव च रसादिपदवाच्यत्वात्''(पृ० २१)।

यद्वा ''रसवत्प्रबन्धावयवध्वनिगुणीभूतव्यङ्ग्यचित्रतया त्रिधेति तत्परं त्रैविध्य-गणनं सरसगाथाविगतैकनीरसपद्यादिव तेषां काव्यावयवताहान्यभावात्, प्रबन्धस्यैव तत्र काव्यतास्वीकारात् (पृ० २३)। '''''न च वाच्यं क्षुद्रमास्वाद्यं तत्राप्यस्तीति क्षुद्रत्वेऽनास्वाद्यत्वादास्वाद्यत्वेऽक्षुद्रत्वात्। तस्मात्तत्त्रैविध्यविधानमयुक्तमेव वा स्यादिति चेत्, सत्यमेवम् (पृ० २३)। न चात्र गङ्गाविषयभावध्वननप्रत्याशा ज्यायसी। यत्र सर्वात्मना तन्मात्ररूपा रतिः प्रतीयते तस्य तद्वर्णन एव रतिध्वनिव्य-पदेशो न तु दैवतोपनिबन्धमात्रेण'' (पृ० २५-२६) इति।

(२) यस्तु रसादिहीनेऽपि क्वचन काव्यव्यपदेशः स बन्धादिसाम्याद् गौण एव (पृ० १३)।

(३) यद्यपि चात्र प्रबन्धपर्यालोचनया वीरः प्रतीयते, तथाप्येतन्मात्रेण तत्परिपोषणभावात् तदनपेक्ष्य वाच्योत्प्रेक्षामाश्रित्य चार्थचित्रतोक्तिः (२६ पृ०)।

(४) अथ रसदेव काव्यं ब्रूषे तर्हि शिष्यतामवलम्ब्य सर्वामस्मत्प्रक्रिया-मङ्गीकुरु (पृ० ३५५)।

(५) नन्वास्वादधर्मत्वे गुणानां काव्यधर्मत्वं न स्यादिति चेत्? सत्यम्, आस्वादस्य काव्यात्मस्वरूपत्वेन तद्धर्माणां काव्यधर्मत्वादास्वादोऽप्यात्मधर्मः। कथं शब्दसन्दर्भरूपकाव्यैकरूप इति चेत्, न, वयमेकरूपत्वमात्मत्वं ब्रूमः। किन्तर्हि पर्यान्तिके प्रयोजकत्वमित्याचार्याः (३५७ पृ०) इति।

(६) स्थायिनां सन्निकर्षश्चर्वणक्षणेऽत्रास्ति, इत्यारम्भादेव रसालयष्टिचर्व-णान्यायेन सान्द्रानन्दमयानुविद्धाङ्गचमत्कारो रसः पानकादौ कर्पूराद्यंशवत्।''''नीर-सप्रायशुष्कनारिकेलचर्वणवत् पर्यन्ते किञ्चिदास्वादे भावमात्रमिति स्वसंवेदनमूला-नादिसहृदयपरम्परामननप्रसिद्धिकृत एव रस इति रसाभावव्यपदेशविभागः (१४०-१४१ पृ०)।

(७) ये तु रसाद्यपेक्षयालङ्कारत्वं मन्यन्ते ते तिमिरपटलपिहितदृशो न

वस्तुतत्त्वं प्रेक्षन्ते……। वाच्यादिष्वपि तत्प्रसङ्गः कस्य गुरोराज्ञया निवार्यः ? इत्यलं शुष्कचर्वणाभिः (१५७ पृ०)।

(८) तस्मात् सव्यञ्जकवाच्यावुपस्कृतै रसादिभिरङ्गभूतैरङ्गिनो व्यञ्जक-वाच्यवाचकोपस्कारकद्वारेणोपकुर्वद्भिरलङ्कारव्यपदेशो लभ्यत इत्यस्माकं पक्षः।……यथा चोपमादिः स्वसन्निवेशेनान्वयमुपकुरुते तथा रसादीनपि (पृ० २०४—२०५)।

(९) यद्यप्यत्रापि रसोऽस्ति, तथापि स्फुटस्याक्षुद्रस्य रसस्यानुपलम्भा-देतत्…। न चात्र विभावादेरन्यतमदप्यस्ति……रसस्य च क्षुद्राक्षुद्रत्वविभागः कीदृगिति न बुध्यामहे (२६१ पृ०)।

(१०) रसश्च मुख्यः।……दोषाश्च केचिद् आहत्यैव रसास्वादापकर्षकाः, केचिदङ्गापकर्षकद्वारेति द्विविधाः। तत्राद्या रससन्निकृष्टा रसदोषा इत्युच्यन्ते…, तत्राप्यर्थदोषापेक्षया………पददोषाणामल्पत्वमित्युपन्यासक्रमणसंगतिः (२६३—२६४ पृ०)।

विश्वनाथेन सर्वमेवैतत् सहजसिद्धान्ततया स्वीकृतम्, 'अस्मदुपजीव्यानां मान्यानाम्' इति विशेषणेन चण्डीदासाय कृतज्ञता च निवेदिता। ये तु तन्मताङ्गी-कृतावयथोद्घोषं कुर्वन्ति, ते तस्यालङ्कारिकगौरवमूले तस्य च भित्तिस्वरूपे नव्य-प्रस्थानपरमाचार्यादिसम्मते मतवादे संशयं क्षिपन्तीति सर्वमवदातम्।

मातृकालिपयः

त्रयो मातृकाग्रन्था एकैश्चैषामन्यतमस्य चित्रात्मक आदर्शः साकल्येनैते चत्वारोऽत्र ग्रन्थसम्पादने व्यवहृतः। द्वितीयार्धसम्पादनकाल आङ्गलदेशीय-प्रतिष्ठानवर्यायां लण्डनपुर्या रक्षितस्य भारताधिकरणतः या मातृकालिपिरि-तश्चत्वारिंशद् वर्षात् प्राक् अनीता तस्या अयं चित्रीय आदर्शः कालिकातास्थ राष्ट्रीयसंस्कृतमहाविद्यालयग्रन्थशालायां साम्प्रतं निहित आस्ते। आदर्शानामेष संक्षेपेण परिचयोऽत्र दीयते।

क—मा० लि०—ग्रन्थस्यास्य प्रकाशे निर्बन्धवद्भिस्तदानीन्तनाध्यक्षैः श्रीगोपीनाथकविराजमहोदयैरुत्साहितैःपूर्वसम्पादकैःतदव्यवहितपूर्ववर्तिनामध्यक्षाणा-मधुना स्वर्गतानां डा० सी. आर-महामहोपाध्यायेत्यादिपदवीभाजां गङ्गानाथझामहो-दयानामितस्ततः पत्रादिद्वाराऽनुसन्धानव्यग्राणामपि निष्फलप्रयासतया पूर्वमधिगतया 'ख' मा० लिप्या ग्रन्थसम्पादनं दुःसाहसं मन्यमानैः १९२६ खीष्टीयाब्दे पुरुषोत्तमक्षेत्राभिजनानाम् अधुना परलोकगतानामुत्कलीय-कोविदवर्याणां महामहोपाध्यायसदाशिवमिश्रमहोदयानां सौजन्येन तदीयशिष्याणा-

मन्यतमस्यानुकूल्यद्वारा पुरीप्रान्तीयहरेकृष्णपुराख्याग्रहारात् संस्कृतानुशीलिभिरध्युषितादियं लिपिरधिगतेति प्रथमखण्डप्रकाशनकाले स्वल्पपरिसरायां भूमिकायां सूचितमासीत्। मातृकेयमुत्कलीयाक्षरैस्तालपत्रेषूत्कीर्णानां पञ्चषाणां ग्रन्थानां संग्रहभूतायां पेटिकायामन्तर्भुक्तासीत्। परन्त्वभाग्यवशतः काव्यप्रकाशदीपिकाया आदित आदितो दशपत्राण्येवात्र वर्तन्ते। क्वचित् क्वचिद् वर्णाशुद्धिदूषितयाऽप्येतया ग्रन्थसम्पादने प्रभूतं साहायकं साधितमिति ७, १५, २१, २५ पृष्ठेषु टिप्पणीतोऽवगम्यते।

ख—मा० लि०—इङ्गलण्डीयभारताधिकरणमातृकाभाण्डागारे निहिताऽलङ्कारग्रन्थान्तर्भूता ४९१ परिमाणादिविवरणं तदीये विस्तृततालिकामये ग्रन्थे समाकलनीयम्। प्राग् नवमोल्लासपर्यन्तं प्रसृतेयं पश्चात् कथञ्चिदौदासीन्येन ग्रन्थान्तपर्यन्तं प्रवर्तितेत्यनुमीयते। मान्यानां कोलब्रुक् (Colebrooke) महोदयानां संग्रहोऽयमिति तन्नाम्ना चिह्नित तत्र संग्रहे। आपातदृष्टया सपूर्णेयं न वस्तुतः तथा च स्थले स्थलेऽशविशेषाणामदर्शनात्। तथा च नवमोल्लासीयटीकायामादर्शस्य त्रीणि पत्राण्यनवधानाद्गलितानि लक्ष्यन्ते। एवमत्र मुद्रितायां काव्यप्रकाशदीपिकायां १५ २५ ६० ७७, ८५, ९४, १६० १९३, १९४, २२२, ३३०, ३७५, ४७४, ४९० पृ० स्खलनानि दृश्यन्ते। सर्वथा विभ्रमकरं चेदं यदत्र चतुर्थोल्लासमध्ये दशमोल्लासस्य नातिक्षुद्रोंऽशोऽन्तर्भावितः (१११–११२ पृ० टिप्पणी द्रष्टव्या)। संभाव्यते यदयं ग्रन्थः कोलब्रुक्महोदयानां ग्रन्थसंग्राहकस्य शास्त्रिणो निदेशेन तदानीमपि संस्कृतचर्चया प्रथितस्य पश्चिमवङ्गीयविष्णुपुराख्याधिष्ठानस्य कस्माच्चित् पारिवारिकसंग्रहात् केनचिदव्युत्पन्नेन लेखकेनालेखि। जीर्णतरस्याधारभूतस्य प्रति० लि० अन्तरस्य पत्रसंख्या निराकरणाक्षमेण लेखकेन पत्राणां यत्र तत्र योजनेन टिप्पणीसूचिता त्रुटिर्जाता। आदर्शप्रतिलि० अन्तरलेखकेन स्वकीयोद्धटश्लोक संग्रहात् तत्रत्यः श्लोक उपन्यस्तः—

सायं सूर्यात्मजायाः पुलिनपरिसरे बालकैरावृतः सन् (बालकेलीर्वितन्वन्)
धावन् धावन् सहर्षं कृतविविधरवो गोसमूहं विचिन्वन्।
स्वैरं गोपाङ्गनाभिः कृतविविधरसक्रीडनो दैत्यवंश-
ध्वंसी वंशीविलासी व्रजकुलतिलकः पातु वो गोपवेशः॥

अनवधानवशतः कुत्रापि टिप्पण्यामियं मा० लिपि० 'क' इत्यन्यथात्वेन दर्शितेति सविनयं पाठकेभ्यः क्षमाऽभ्यर्थ्यते।

ग—मा० लि०—इयं कलिकातास्थायाः आसियातिक्समितेर्ग्रन्थालये मातृकाभाण्डारे राष्ट्रीयसंग्रहत्वेन संरक्षिता। तस्मिन् विभागे ३७८७ संख्य-

कत्वेनेयं निर्दिष्टा। इतो न्यूनकल्पेन शतत्रयाधिकवर्षात् प्राक् तालपत्रे वङ्गीयैर-क्षरैरियं लिखिता। पञ्चमोल्लासात् ग्रन्थावसानं यावत् टीकाऽत्र वर्तते। अत्रैवा-वसाने सप्तमोल्लासटीकाशेषे च पुष्पिकायां टीकाकृतो वंशादिप्रशस्तिपरः परिचयो लभ्यते। संभाव्यते यदस्यादर्शग्रन्थ उत्कलीयात् कस्मादप्याधाराल्लिखितइति। नातिविशुद्धाऽपीयं सर्वतो निर्भरयोग्येति विशेषतो नवमदशमोल्लासयोष्टीका-संपादने व्यवहृता। परमत्र ४७४ पृष्ठतः ४९० पृ० पर्यन्तं टीकाग्रन्थसंपादने 'ख' 'ग' मा लिप्योरुभयोरेव टीकांशस्यादर्शनात् टीकापूरणं काव्यप्रकाश-विवेकस्य श्रीधरकृतस्य तत्तत्प्रकरणात् साधितम्। एतच्च तत्र टिप्पण्यामेव सूचितम्।

एतत्प्रसङ्गेऽनुचित्रमयस्यादर्शस्य प्रेषणेनाधिकारिभिः कृतं साहाय्यमत्र सादरमावेद्यते।

अत्र टीकाकृतां निबन्धकृतां च संक्षिप्तः समयः सूच्यते—

२०. सागरनन्दी—(११ शतके)
२१ राजानकरुय्यकः (१२ शतके)
२२. हेमचन्द्रः (११-१२ शतके)
२३. रामचन्द्र गुणचन्द्रः (१३ शतके)
२४. वाग्भटः (१ -१३ शतके)
२५. अरिसिंह श्च अमरचन्द्रः (१३ शतके)
२६. देवेश्वरः (१३ शतके)
२७. जयदेवः (११ शतके)
२८. विद्याधरः (१२-१३ शतके)
२९. विद्यानाथः (१३ शतके)
३०. विश्वनाथ कविराजः (१४ शतके)
३१. शारदातनयः (१३ शतके)
३२. शिङ्गभूपालः (१४ शतके)
३३. भानुदत्तः (१४ शतके)
३४. रूपगोस्वामी : (१५-१६ शतके)
३५. केशव मिश्रः (१६ शतके)
३६. कवि कर्णपूरः (१६ शतके)

३७. कविचन्द्र : (१९ शतके)

३८. अप्पयदीक्षित : (१६-१७ शतके)

३९. पण्डितराज जगन्नाथ : (१६ शतके)

४०. आशाधरभट्ट : (१८ शतके)

४१ नरसिंह कवि : (१६ शतके)

४२. विश्वेश्वर पण्डित : (१६ शतके)

४३. स्वामिश्री हरिहरानन्द सरस्वती महाराजः (२० शतके)

उपसंहारः —

भगवद् अनुग्रहेण सम्पूर्णानन्द संस्कृत विश्वविद्यालयकुलपतिभिः दत्तोऽयं काव्यप्रकाशदीपिकायाः सम्पादनभारः अधुना पूर्णताम् अलभत् । मया पितुः सकाशात् यत् यत् टिप्पणादिकं प्राप्तं तेषां सर्वेषां अत्र निवेशः कृतः । पूर्वसम्पादकानां श्रीशिवप्रसादशर्मणामधमर्णतां शिरसाविभर्मि प्रस्तावनायां काव्यप्रकाश-सम्बन्धे दीपिकासम्बन्धं च येषामविकलः सहयोगो गृहीतः ।

अन्ते सम्पूर्णानन्दसंस्कृतविश्वविद्यालयकुलपतयः श्रीराजदेवमिश्रमहोदयाः प्रसिद्धभाषाविज्ञानविदः श्रीविद्यानिवासमिश्रमहोदयाः सादरं अभिनन्द्यन्ते येषां सहयोगेन अयं भारः आपतितः निर्व्यूढश्च । संस्कृत विश्वविद्यालयस्य प्रकाशनाधिकारि पदाधिष्ठितस्य श्री हरिश्चन्द्रमणित्रिपाठिनः, मुद्रणविभागे विशेषाधिकारिणः डा० राममनोहरमिश्रस्य च साहाय्यं स्मरन् शुभाशिषा योजयामि । अन्ते अस्य ग्रन्थस्य लेखनसम्पादनसूचीनिर्माणकार्ये सहायकस्य मम तृतीयपुत्रस्य व्याकरण-साहित्याचार्यस्य श्रीचक्रधरशुक्लस्य साहाय्यं स्मरन् शुभाशिषा योजयामि । संस्कृत विश्वविद्यालयस्य सम्बद्धाः कर्मचारिणश्च धन्यवादार्हाः येषां त्वरिततरेण सहयोगेन अयं ग्रन्थः शीघ्रं मुद्रितः । अन्ते भगवतः भवानीविश्वनाथयोः करयोः ग्रन्थरत्नमिमं समर्प्य मोमुदीति मे चेतः ।

अनन्त चतुर्दशी

२०४७ वैक्रमे

रामगोविन्दशुक्लः

मम्मटाचार्यप्रणीतः

काव्यप्रकाशः

आचार्यचण्डीदासकृतदीपिकाटीकोपेतः

॥ ॐ नमः शिवाय ॥

सम्मटाचार्यप्रणीतः

काव्यप्रकाशः

आचार्यचण्डीदासकृतदीपिकाटीकोपेतः

❀ ❀ ❀

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति—

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥१॥

काव्यप्रकाशदीपिका

श्रीकृष्णो जयति

सुरारिवक्षोविक्षोभप्रारम्भस्फारडम्बरः ।
क्रीडासिंहस्वरूपस्य हरेः स्ताद्वो विभूतये ॥
श्रीचण्डीदासकविवाक्कौमुदीसारनिर्मिता ।
भूयात् काव्यप्रकाशस्य दीपिका कृतिनां मुदे ॥
श्रीमल्लक्ष्मणभट्टानां सुहृदामनुशासनात् ।
ध्वनिप्रकरणस्यास्य रहस्यं वर्णयामहे ॥

प्रारिप्सितनिर्विघ्नपरिसमाप्तिहेतुभूताविगीतशिष्टाचारपरम्परापरिप्राप्त-स्वाभीष्टदेवताप्रसादनपरत्वं प्रथमकारिकायाः प्रकाशयन्नवतरणिकामाह—**वृत्तिकृत्—ग्रन्थेति**। अभ्यस्यमानविषयं[1] महावाक्यं[2] ग्रन्थः, तस्यारम्भेऽव्यवहितपूर्वकाले विघ्नस्य निर्वर्त्तकसुचरिताभावस्य निवर्त्तकदुश्चरितसद्भावस्य वा[3] विघाताय निःशेषमुच्छेदायेत्यर्थः। **समुचितेति**। प्रकृतवाङ्मयाधिकृतत्वात्। **इष्टेति**। तत्प्रसा-दाविष्कारौपयिकनमस्कर्त्तृगतभक्तिश्रद्धाप्रकर्षसूचनम्[4]। **देवतामिति**। जडरूप-वाङ्मयमात्रवैलक्षणेनाभिप्रेतप्रयोजनसम्पादनक्षमाम्। **ग्रन्थकृदि**त्यधिकारिप्रकटनम्। **परामृशति** आराधनाय सम्मुखीनां कृत्वा स्वार्थनिवार्हाय प्रयोजयतीत्यर्थः।

१. आम्नास्यमान इति क्वचित् पाठः। अयं घटः इति वाक्येतिव्याप्तिवारणाय **महावाक्येति**।
२. महाकाव्यं, "क" पाठः। ३. च 'ख' पाठः। ४. सूत्रणम् "क" पाठः।

नियतिशक्त्या नियतरूपा सुखदुःखमोहस्वभावापरमाण्वाद्युपादानकर्मादिसहकारिकारणपरतन्त्रा षड्रसा, न च हृद्यैव तैः, तादृशी ब्रह्मणो निर्मिति-

नियतिकृतेति। नियम्यन्ते स्वस्वकार्योत्पत्तये प्रेर्यन्ते निरुध्यन्ते च भावा अनयेति नियतिरदृष्टं, तत्कृतो नियमः कालदेशाधिष्ठानवयोऽवस्थादिवैषम्यात् सुखादिजननविकल्पः। न चायं कविभारत्यां सम्भवति, लोकोत्तरविभावादिशरीराणां वक्रोक्तीनां रत्याद्यंशसंवलितप्रकाशानन्दमयापूर्वतरचमत्काराविष्कारनैयत्येन, तादृग्भावेषु वा, वैषम्याभावात्। कथं तर्हि शोकरोगार्त्तकुपितमत्तव्यासक्तादीनां काव्यस्वादापकर्षः सुस्थदशाऽपेक्षयेति चेत्, दुरभिमानिन् अनवबोधग्रस्तोऽसि, न खलु वयमन्वयव्यतिरेकसिद्धकारणभावस्य परिदृष्टसामर्थ्यस्य रोगव्यासङ्गाद्यभावस्य रसास्वादप्रकर्षसामग्र्यन्तर्निवेशं नाङ्गीकुर्याम, किं तर्हि कर्हिचनापि कविनामापूर्वप्रजापतिनिर्मीयमाणस्य काव्यनाम्नो विलक्षणप्रपञ्चस्य न विद्यते दुःखमोहात्मकत्वं, पुत्रशोकादिगाढवेदनाजनितजडिम्नोऽपि पुरुषस्य द्राक्[१] कर्णप्रवेशानन्तरमास्वादायोगव्यवच्छेददर्शनात्।

नचैवं चन्दनादिषु, ज्वरादिजनितशैत्यप्राबल्यादिपोषकत्वाद् इति। तदेतद्विशदयति–**ह्लादैकमयीमिति**-एकमयी एकरूपा, जननव्यपदेशराहित्येन तत्त्वोपचारात्।

प्रतिभाविजृम्भणमात्रशरीरतया व्युत्पत्त्यभ्यासोपस्कृतकविगतानादिवासनाऽन्तर्लीनरसादितत्त्वबहिःस्फुरणमात्ररूपत्वेन प्रतिबन्धकविगमार्थमेव हेतुत्वाभिमताभिधानाद्यपेक्षणमित्यपि कविवाग्गुम्फस्य समवाय्यसमवायिनिमित्तार्थहेतुत्रयजन्यप्रपञ्चवैषम्यम्, **इत्याह–अनन्येति**। पारतन्त्र्यं साक्षात्तदन्वयव्यतिरेकानुविधानम्।

न वेति परस्परविलक्षणरागप्रशमभागकर्बुरितानन्दमयानां शृङ्गारशान्तादीनां वैषम्यस्यात्यन्तोद्भटत्वेन दुरपह्नवतामासूत्रयन् निरतिशयसुखास्वादरूपत्वादेक एव रसः, न तु तस्य विशेषः सम्भवति, अतस्तन्मात्र[२]जीवातोः काव्यस्य ध्वन्यादिरूपेण यद्भेदगणनं तदपि खरविषाणैरायव्ययकल्पनमेवेति ये मेनिरे, तन्मन्दम्; इत्याह[३] **नवरसेति**[४]। **रसेति** रस्यमानतया शब्दार्थान्तरवैषम्यसूचनम्।

रुचिरामिति तेन जीवनेनात्यन्तसौभाग्यभाजनेनोज्जीवितत्वाद् युक्तं जगद्वैलक्षण्यमिति भावः। निर्मितिर्घटना, तामादधती स्वाधेयभूतया कर्त्तव्यतया जनमनश्चमत्काराङ्कुरकरणाय प्रभवन्तीत्यर्थः। कवेरित्यपूर्वविज्ञानशिल्पितया नामैवास्य विलक्षणमिति भावः। **ह्लादेत्यादि** कारिकाभागात् पाश्चात्यमपि अनन्येत्यादिभागं तद्विवरणसौकर्याय प्रथमतो व्याचष्टे वृत्तिकृत्[५]**परमाण्विति**–तद्विवृतिस्तु[६] व्यति-

(१) वाक् ''क'' पाठः। (२) अत्र तन्मात्र—''क'' ''ख'' पाठः। (३) ''मन्दम्' इहेति। रसेति ''क'' पाठः। अत्र वाक्यस्य पूर्वभागे रचना शिथिलशिथिला प्रतिभाति। (४) नवसंख्याका रसा यस्यां सा चासौ रुचिरा चेति, कर्मधारयः न तु नवानां रसानां समाहार इति 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इतिस्त्रीत्वेन नवरसी इति स्यात्।
(५) वृत्तत्वात् ''क'' पाठः। (६) तस्य ह्लादेत्यादिभागस्य विवृतिरिति यावत्।

निर्माणम्। एतद्विलक्षणा तु कविवाङ्निर्मितिः। अत एव जयति, जयत्यर्थेन च नमस्कार आक्षिप्यत इति तां प्रत्यस्मि प्रणत इति लभ्यते।

इहाभिधेयं सप्रयोजनमित्याह--

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे ॥ २ ॥

कालिदासादीनामिव यशः, श्रीहर्षादेर्धावकादीनामिव धनम्, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्, सकलप्रयोजन-

---

रेकमुखेन भविष्यति। न तु हृद्यैवेति, यद्वा सुखेत्यादिभ्यो व्यतिरेकः। नियतरूपेति तु कविसृष्टवस्तूनामपूर्वापूर्वभावेन तत्रोत्कर्षपरम् उपादानं समवायिकारणम्। कर्म क्रिया। **षडिति** न वेत्यस्य व्यतिरेकावधिः। **तैरिति** षड्जैः। अत एव **जयतीति**। त्रैलोक्यविजयताफलनिखिलसहृदयवशीकारपात्रतामाप्नुयादित्यर्थः।

नन्वाराध्यस्य गुणानुवादनमात्रेण कार्यार्थमाभिमुख्यं यदि कुतश्चिन्न स्यात्, तदा निरर्थक एवैतावान् प्रयास इत्याह–**जयत्यर्थेनेत्यादि**। कार्यमुद्दिश्याभिमतदैवतस्तुतिप्रवृत्तस्याव्यभिचरितमेव हि तन्नमस्करणम्, सम्भृतयोश्च स्तुतिनमस्कृत्योर्भावशुद्धिमूलत्वेनाव्यभिचारिणी फलनिष्पत्तिरिति भावः।

अस्य काव्यपरीक्षाशास्त्रस्य परीक्षणीयनिष्पाद्यफलैरेव फलवत्त्वं तदङ्गतयेति तात्पर्यं प्रेक्षावत्प्रवृत्त्यङ्गमवद्योत्य द्वितीयां कारिकामवतारयति—**इहेत्यादि**। अभिधेयं परीक्षाविषयतयाऽनूद्यं, यद्वाऽभिधेयपरीक्षणं सप्रयोजनं परीक्षणीयकाव्यस्य विनेयम्। कृते इत्यव्ययं तादर्थ्ये वर्तते, अर्थायेत्यर्थः। अथवा करणं कृत्, सम्पदादित्वात् क्विप्। एवं सर्वत्र। शिवेतरदशिवम्। **सद्य** इति—न तु धर्मादिवदुत्तरकालभाविदेहान्तरग्रहणाद्यपेक्षणमिति भावः।

व्यवहारेत्यस्य विवरणम् **आचारेति**। अर्थ्यमानो धनादिरर्थः, तद्विपरीतो रोगादिरनर्थः। निर्वृतिपदार्थमाह—**आनन्देति**, तद्धेतुकथनं रसेति। रस्यते वशीक्रियते इति रसो रत्यादिः, तस्यास्वादनं भोगपर्यायः साक्षात्कारः, तेन सम्भृतं संवलितमेकीभूतमिति यावत्। न तु रसस्य शृङ्गारादेरास्वादाज्जातमिति, आस्वाद्यास्वादाभिमतयोर्भेदाभावस्य तदेकात्मन आनन्दांशस्य कार्यत्वस्य च प्रतिपादयिष्यमाणत्वात्। परेत्यस्य निरुक्तिः सकलेत्यादि। तदेतत् कुत इत्याह—**विगलितेत्यादि**, विजातीयानवच्छिन्नप्रवाहवाहीत्यर्थः। **प्रभ्वित्यादि**। यथा प्रभोराज्ञा न विचार्यते, तथाऽग्निष्टोमादिष्वपि कथमस्मात् कर्मण इदं भविष्यतीत्यनालोच्यैव प्रवृत्तिरिति शब्दप्राधान्यं श्रुतिस्मृत्योः। अत एव तत्तच्छासनमात्रप्रधानतया तत्र शास्त्रपदप्रयोगः। इतिहासास्तु प्राचीनवृत्तवर्णनरूपा, अमुना कर्मणेदं प्राप्तमिति दर्शयन्तो

मौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दं प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म, तत् कान्तेव सरसताऽऽपादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं

युक्तायुक्तफलदर्शनादर्थानर्थव्युत्पत्तिं जनयन्ति। पुराणं सर्गादिपञ्चावयवलक्षणयुक्तम्। आदिशब्दात् आख्यानादिपरिग्रहः। गुणभावे हेतुः **रसाङ्गे**ति। रसस्य रस्यमानतासारस्याङ्गभूतोऽन्वयव्यतिरेककल्पितशक्तिकतयोपायभूतो व्यापारो विशिष्टविभावादिसंयोजनं तत्प्रवणतया तदङ्गतयोपादीयमानत्वेन। **तदेतदुक्तं हृदयदर्पणे**—

शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः।
अर्थतत्त्वेन युक्ते तु वदन्त्याख्यानमेतयोः।
द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यगीर्भवेत्॥

यदिति। यदेवम्भूतं तदेव काव्यं, नान्यदिति भावः। एतदेव द्योतयितुं[१] प्रथमोपात्तमपि काव्यपदमिदानीमनुवदति। तन्निरुक्तिः। **कविकर्मे**ति। येन कर्मणा कविशब्दभाजनत्वं तत् काव्यमित्यर्थः। तदेतत् कर्म स्फोरयति। **लोके**ति। लोकोत्तरचमत्कारप्रकर्षानुगुणा वर्णना विभावाद्युपनयनं, तत्र निपुणः—इत्यनेनान्यसृष्टपद्यादिहठाद्दर्शनेन तत्कारणादिषु घृष्टदुष्टेषु कविव्यवहारनिरासः। तदुक्तं **काव्यकौतुके**—

प्रज्ञानवनवोन्मेष[२]शालिनी प्रतिभा मता।
तदनुप्राणनाजीवद्वर्णनानिपुणः कविः।
तस्य कर्म स्मृतं काव्यम्[३]—

तत् कान्तेव सरसताऽऽपादनेनेति—तथाभूतस्य रसाविष्कारो निष्प्रत्यूह एवेति भावः। **अभिमुखीकृत्येति**—सुकुमारमतित्वेनायासबहुलशास्त्रश्रवणविमुखानां राजपुत्रादीनामनेनोपायेन रसास्वादनसुखपिण्डदानद्वारा सुकरं व्युत्पत्त्याधानमिति भावः। **तदुक्तम्**[४]—

स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुञ्जते।
प्रथमालीढमधवः पिबन्ति कटु भेषजम्॥

---

(१) द्योतयितुमेव "क" पाठः।

(२) नवनवोल्लेख 'ख' पाठः।

(३) इतः प्राक् तत्रैव 'स्मृतिर्व्यतीतविषया मतिरागामिगोचरा। बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मता'॥ इति प्रज्ञाशब्दस्य विवृतिरेतदुपयोगिनी।

(४) भट्टनायककृते हृदयदर्पणे इति बहुत्राकरनिर्देशः।

न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् ।

एवमस्य प्रयोजनमुक्त्वा कारणमाह—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे ।। ३ ।।

शक्तिः कवित्वबीजरूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत्,

---

रामेति उपदेशमित्यन्तेनेदमाह— आस्वादोपायत्वेनाप्युपादीयमानं रामादिवृत्तान्तमाविर्भावयदेव वस्तु सामर्थ्याद्विहितनिषिद्धप्रवृत्तिनिवृत्तिमप्याधत्ते निदाघपरितापप्रशमायोपात्तः श्रीखण्डखण्डलेपः[१] शिशिरसौरभमिवेति । 'च' समुच्चये । **यथायोगमिति**—यशोऽर्थानर्थप्रशमान् द्वयोरपि, शेषास्तु भावकस्यैव । तथाहि व्यवहारज्ञानहिताहितव्युत्पत्ती कवेस्तत्कृतकाव्यजन्ये न भवतः, तयोस्तन्निष्पत्तिहेतुत्वेनान्योन्याश्रयप्रसङ्गात् ।

ननु व्यवहृतिज्ञानमपि हिताहितज्ञानमेवेति पृथग्गणनं निष्फलमिति चेत्, सत्यम्, नृपगुर्वादिविषयो व्यवहारः स्वरूपत एवोपादेयोऽत्रैवं व्यवहर्त्तव्यमिति, शेषस्तु रामरावणादिवृत्तसदृशं वृत्तमुपादेयमनुपादेयञ्चेत्येतावता वैषम्यम् । आनन्दानुभूतिरपि कवेः स्वकाव्यपर्यालोचनाऽनन्तरं जायमाना न करणोपाधिकृता; किन्तु भावनोपाधिकृतेति भावकत्वांश एव निक्षिप्यते, काव्याङ्गोपाङ्गविद्याविज्ञानविहीनानां कवीनामपि सुप्रसिद्धसमग्रव्युत्पत्तिदशावशादास्वादप्रकर्षानुदयस्यानुमीयमानत्वात् । **सहृदयस्येति** । प्राचीनवासनासंवर्धिता[२] ङ्ग [ङ्गोपाङ्ग] विद्यानिपुणतोपस्कृता बुद्धिर्हृदयं तद्वत इत्यर्थः । **करोतीति** । प्रति कर्मपदं सम्बन्धः । **सर्वथेति** । शेषा विद्यास्तदङ्गतयैवोपादेय (?) मित्यर्थः । तत्र कर्तुः, विचारयितुश्चेति शेषः । यतनीयमित्यग्रिमकारिका सङ्गतिसूचनम्[३] । तथा हि—पार्यन्तिकप्रयोजने क इवाहत्य[४] व्या।ारे सम्भवत्यनागतत्वात्; तस्मात्तन्निर्वाहकोपादानमेव तत्र यत्नः, अतस्तत्र यतनीयमिति ।

---

(१) श्रीखण्डलेपलेपः "क" पाठः । तत्र प्रथम "लेप" पदेन 'कृदभिहितो भावो द्रव्यवत् प्रकाशते' इति न्यायेन द्रव्योद्देशः चरम–'लेप'पदेन लेपनक्रियेति पाठसङ्गतिः ।

(२) संवलितेति क्वचित् पाठः । संबन्धितो 'क' पाठः ।

(३) एतच्चापाततः काव्यप्रकाशविवेककारं सान्धिविग्रहिकं श्रीधरमनुसृत्य । मतमेतन् खण्डितं सम्प्रदायप्रकाशिन्याम् ।

(४) आहृत्य मिलित्वा ।

प्रसृतं वा उपहसनीयं स्यात् । लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य, शास्त्राणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानां, काव्यानां च महाकविसम्बन्धिनाम्, आदिग्रहणादितिहासादीनाञ्च विमर्शनाद् व्युत्पत्तिः । काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन

कोऽर्थस्तत्कारणान्युपादेयानीति, तच्चाधिगम्य कानि तत्कारणानीति श्रोतृजिज्ञासायां शक्यसाधनद्योतनपरां तृतीयकारिकामाह । [१]**शक्तिरिति** । कवित्वेति—कविसहृदयानन्दहेतुः काव्यम्, तस्याङ्कुरस्येव कालान्तरे प्रादुर्भविष्यतो बीजरूपः । संस्क्रियते विशिष्टकार्यभाजनीक्रियते प्रमाणेनेति संस्कारः प्राचीनवासना, देवताऽद्यनुग्रहजनितः कश्चनातिशयो वा, स एव विशिष्यते [इति] विशेषः, स एव भक्तिः स्फूर्त्तिरिति यावत् । व्युत्पत्त्या तत्रान्यथाऽनुपपत्तिं प्रमाणयति यामित्यादिना । पदतदर्थविज्ञानवत्यपि पुंसि श्रद्धालौ यदभावकृतः काव्यनिष्पाद्यास्वादप्रकर्षयोरभावः, सोऽयं नापलप्यत इति भावः । न प्रसरेत्—न जायेत, परोपपादितमपि वा (?) नास्वादप्रकर्षो यत्र भवेच्चेत्यर्थः ।

प्रसृतमिति । कष्टसृष्टचा पद्यादिकमुत्पाद्य दुर्द्रूढैस्तद्रूपतया सम्भाव्यमानं, पण्ड-(षण्ड)सम्भोगन्यायेन कञ्चनास्वादे लेशमननुभूयाव्युत्पन्नैस्तन्मात्राविष्कारकतया सम्भाव्यमानञ्चेत्यर्थः । यद्यपि चोभयथाऽपि पुरुष एवोपहासपात्रम्, तथाप्येतदेव भ्रमविषयीभूतमन्यथाभावबीजमिति काव्यमुपहसनीयमुक्तम् । स्यादिति प्राप्तकाले सम्भावनायां वा लिङ् । **वृत्तस्येति**—लोकपदस्य वृत्तपरत्वं वर्णनीयानन्तत्वख्यापनार्थम् । अभिधानानि तेषां कोषाः संग्रहाः । कला चित्रगीतादिविज्ञानम् । [२]इतिहासादीनामित्यादिशब्देन निखिलकाव्यशब्दप्रपञ्चपरिग्रहः । तदुक्तम्—

न स शब्दो न तद्वाक्यं, [३]न सा विद्या न सा कला ।
जायते यन्न काव्याङ्गमहो भारो गुरुः कवेः ।।

करणं काव्यस्वरूपनिष्पत्तिः कवित्वशिक्षया । योजनं पूर्वपराविरुद्धतया रसाभिव्यक्तिक्षमत्वेन प्रबन्धाद्यवयवविन्यासः । सहृदयोपदेशाद्युपलक्षणञ्चैतत् । तेन स्वादप्रकर्षप्राप्त्यर्थमपि प्राथमिकैः परिनिष्ठितभावकोपदिष्टानि तस्यैव काव्यस्य मुहुर्मुहुर्भावनाऽऽदीन्युपादेयानि ।

तदेवं समग्रग्रन्थोपयोगिकारिकात्रयमुक्त्वा प्रथमोल्लासप्रतिपाद्यकाव्यभेदलक्षणाभिधानं तत्सामान्यलक्षणानन्तरमेव सुप्रतिपादं भवतीति तददोषावित्यादिना

---

(१) शक्नोति पुमान् काव्यनिर्माणायास्वादानुभवाय चानयेति शक्तिः ।

(२) धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् । पूर्ववस्तुकथायुक्तमितिहासं प्रचक्षते ।। इति लक्षणम् ।

(३) 'तद्वाच्य'मिति श्रीधरोद्धृतः पाठः ।

प्रवृत्तिः—इति त्रयः समुदिताः, न तु व्यस्ताः, तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुः, न तु हेतवः ।

एवमस्य कारणमुक्त्वा स्वरूपमाह[1]—

(१) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।

दोषगुणालङ्कारा वक्ष्यन्ते । क्वापीत्यनेनैतदाह यत् सर्वत्र सालङ्कारौ, क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः । यथा—

दर्शितम्, तदवतारयति—**एवमित्यादि** । स्वमसाधारणं रूपमितरव्यावर्तको धर्मः । अदोषाविति दोषाणां यथाशक्ति हानसूत्रणम्[२] । शब्दार्थाविति शब्दस्य पूर्वनिपातेनाभ्यर्हिततरत्वं द्योतयन् विशेष्यत्वमाविष्करोति, शेषस्य तु परनिपातेनाप्राधान्याद्विशेषणत्वम् । एवञ्च शब्दधर्म एव काव्यत्वं,[३] तस्य चार्थे विशिष्टविभावादिव्याप्रियमाणस्यैवायमतिशय इति ध्वननार्थमर्थस्य तुल्यकक्षतया निर्देशः ।

ये तु द्वयोरपि काव्यत्वमिच्छन्ति त इत्थमनुयोज्याः-काव्यत्वमुभयधर्मतयाऽङ्गीक्रियमाणं संयोगादिवद्व्यासज्यवृत्ति वा ? गोत्वादिवत्प्रत्येकसमाप्यवृत्तित्वान्नाद्यः, सामान्यस्य तथा भावानङ्गीकारान्नेतरः प्रत्येकं काव्यताप्रसङ्गात् ।

किञ्च कविकर्मविशेष एव काव्यमुच्यते । तच्च विशिष्टार्थप्रत्ययार्थसंयोज्यमानं पदकदम्बमेवेत्युद्देश्य एवार्थः, न तु कविव्यापारगोचरः । सगुणाविति लक्षणं प्रद्योतनपरं, वक्ष्यमाणरीत्या गुणानामास्वादस्वरूपविशेषणत्वेनैव पर्यवसानात्, तत्प्रधानस्यैव च वाक्यस्य काव्यत्वाङ्गीकृतेः, इतरस्याभासतानियमात् ।

एतदुक्तं भवति—आस्वादजीवातुः पदसन्दर्भः काव्यम् । तत्र यत्रालङ्कारविशेषः सम्भवन्ति तत्र परिपोषविशेषाभावे तु तेषां तत्कृतपुष्टिहीनत्वम्, दोषतारतम्याच्चास्वादाभावतारतम्यम्, न तु काव्यत्वहानिः, तेषां सर्वत्र व्यापकत्वात्, गुणाश्चास्वादशरीरान्तर्गता एव, न तु शब्दार्थरचनाधर्मा इति ।

ये त्वदोषाविति लक्षणांशमिच्छन्ति तेषां काव्यत्वं निर्विषयमत्यन्तप्रविरलविषयं वा स्याद्, उक्तादेव न्यायात् ।

यस्तु रसादिहीनेऽपि क्वचन काव्यव्यपदेशः स बन्धादिसाम्याद् गौण एव ।

---

१. स्वरूपलक्षणं न तु तटस्थलक्षणम् इतरभेदकमित्यर्थः ।

२. दिग्दर्शनमेतत् । प्राचीनतमैः टीकाकृद्भी रुचकादिभिरस्योपष्टम्भः साधु सूचितः । तन्मते तददोषाविति कल्प्यमानोल्लासदशकस्य संक्षेपेणात्र सूत्रणं कृतं यथा सरस्वतीकण्ठाभरणे अदोषमित्याद्यग्रिमकारिकायाम् ।

३. एतदनुवाद्येव विश्वनाथ–जगन्नाथ–प्रभृतीनामर्वाचीनानामालङ्कारिकवर्याणां सिद्धान्तोद्घोषणम् ।

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते[१] ॥ १ ॥

अत्र स्फुटो न कश्चिदलङ्कारः । रसस्य च प्राधान्यान्नालङ्कारता ।

तच्च सर्वमुक्तं वितत्यास्माभिर्ध्वनिसिद्धान्तसंग्रह इत्येव दिक्[२] । **क्वचित्त्विति** रसादौ विद्यमान इति शेषः । स्फुटेत्यादिना नञोऽल्पार्थता सूचिता । कौमारमभिनवं यौवनं सरससम्भोगामृतशीकरास्वादव्यसनव्यग्रिम्णा द्रुतवान् अलक्षितमिवातिवाहितवान् इत्यकृत्रिमप्रेमपात्रताप्रकटनेन रागबन्धदार्ढ्यं ध्वननम् । वर इति स्वयमभिरुच्या वृतो न तु पित्रादिपारतन्त्र्यात्यथाकथञ्चिदाश्रित इति । एवमन्यत्रापि पदानां जीवातुरूहनीयस्तत्त्वबुद्धिभिः, अस्माभिस्तु ग्रन्थगौरवभिया क्वचन क्वचन इव वक्तव्य इति । मालती वासन्तिका जातिः । कदम्बो धूलिकदम्ब इत्येके, वसन्तघनसमययोर्द्वयोरप्यृतुराजयोर्ग्रहणमिति तु सम्प्रदायविदः[३] ।

अत्र स्फुटो नेति—इह हि प्राणेश्वरसन्निधानादि धृतिकारणम्, तत्र च सत्यपि तस्या अनुत्पत्तिस्तद्विरुद्धायाश्चोत्कण्ठाया उत्पत्तिरिति कारणसामग्र्यां कार्यानुत्पत्तिलक्षणा विशेषोक्तिः । तस्याश्चास्फुटत्वं प्रतिरूपकार्यस्य साक्षादुत्पत्त्यभावस्यानभिधानात् किन्तर्हि विरुद्धोत्पत्तिमुखेन सूचनात् । यद्वा प्रियतमसङ्गमाभावादीनामुत्कण्ठाभावहेतूनामभावेऽपि तस्या उदय इति हेत्वभावेऽहेतुकोत्पत्तिलक्षणा विभावना ! साऽपि न स्पष्टा । निमित्तविरहश्च विरुद्धयोगमुखेन, न साक्षादभिधीयमानत्वात् । एवञ्च साधकबाधकत्वमानाभावात्सन्देहसङ्करः[४] । सोऽप्यन-

---

१. शिलाभट्टारिकायामिदम् ।

२. स्वसगोत्रप्राचीनपूरुषस्य मतमेतद् । भणितिभङ्ग्या तात्पर्येणचानूदितं साहित्यदर्पणकृता स्वग्रन्थे इति तद्ग्रन्थालोकिनां स्फुटमेव । तत्कृतं काव्यलक्षणं प्राचां लक्षणविचारशैली चोपरिदर्शितमेव मार्गमनुहरतः सर्वथेति मतप्रवर्तनकल्पे पूर्वतनस्य टीकाकृत ऋणं नापलप्यमित्यलं पल्लविचेन । ध्वनिसिद्धान्तसंग्रह-ग्रन्थस्तु नाद्यापि क्वचन समासादितः ।

३. सम्प्रदायविदां व्याख्यानमेतत्काश्मीररुचककृते सङ्केते महासान्धिविग्रहिकश्रीधरकृते विवेके च सप्रश्रयमालोचितम् ।

४. एवं रुचककृतेऽलङ्कारसर्वस्वे विमर्शितम् । तदनुयायिनः श्रीधरादयोऽप्येवं मन्यन्ते । नेदं क्षोदक्षममिति प्राञ्चः केचित्, यन्मतं विवेक इत्थं परामृष्टं ''ये तु सङ्करस्य पृथगलङ्कारता न मन्यन्ते तन्मते तत्सम्भावना नास्ती''ति । अर्वाञ्चोऽपि प्रदीपकारादयो गजनिमीलिकान्यायेनैतन्मतानुसारिणः ।

तद्भेदान् क्रमेणाह—

(२) इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः ॥

इदमिति काव्यं, बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावित-वाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य। यथा—

भिव्यक्तः, अनभिव्यक्तकोटिद्वयालम्बनत्वात्। **रसस्येति**—अलङ्कारपदार्थपर्यालोच-नयैव तदुपसर्जनीभाव[स्य] स्फुटाभावात्। रसपदश्चात्र सम्भोगव्यभिचार्यौत्सुक्य-माह, रस्यत आस्वाद्यत इति व्युत्पत्त्या, न तु साक्षादेवात्र सम्भोगनामा रसः, स्वाधीनपतिकाया क्रीडास्थान[१] एवमुत्कण्ठायाश्चर्व्यमाणत्वात्।

भिद्यतेऽनेनेति भेदो विशेषलक्षणं भेदनं भेदधर्मौ[२] विभागश्च। तस्य च विशेषलक्षणप्रयोजनकधर्मिनिर्देशमात्ररूपस्य पृथग्वाक्य अभिधानं नातिफलवदिति प्रतिलक्षणवाक्यमेवोपादानम्[३]। क्रमेणेत्यतः पूर्वं लक्षणमिति शेषः। वाच्यादति-शयस्य कृते उत्कर्षपात्रता, अतिशयो वाच्यापेक्षया चमत्कारविश्रान्तिकारी व्यङ्ग्य-गतः प्रकर्ष इत्यपरे[४]। बुधैरितिकारिकापदं ध्वनिव्यवहारनिर्मूलत्वशङ्कानिरासाय, इत्याह वैयाकरणैरिति। **प्रधानेति**—अर्थप्रत्ययरूपफलप्रत्यासत्त्येत्यर्थः। स्फुटत्यर्थो-ऽस्मादिति स्फोटः, पूर्वपूर्ववर्णानुभवजनितसंस्कारसध्रीचीनान्त्यवर्णानुभवजनितप्रति-पत्तृगतातिशयवशादपरोक्ष इव क्रियमाणः सकलाभिधेयाभिधानमयतया स्वीक्रिय-माणः, यमिमं शब्दब्रह्मेत्याहुः। स च व्यङ्ग्यः सन्नेवाविष्क्रियमाणोऽर्थमभ्यानयति, तदनुगुणा च शब्दे वर्णात्मके काचिदुक्तिः। सा च नाभिधाऽऽदिः, सङ्केताद्यपेक्षा-विरहात्। वर्णाश्च ध्वननद्वारैव तथा विप्लवन्तीति ध्वननाख्या सा शक्तिः। अन्यैः श्रीमदानन्दवर्धनाचार्यप्रभृतिभिः। न्यग्भावितं प्रवणीकृतं वाच्यं येन व्यङ्ग्ये-नेति विग्रहः। व्यञ्जनं प्रतीतिः, तत्क्षमस्य तदनुगुणसामर्थ्यभाजः। शब्दार्थ-युगलस्येति सर्वत्रोभयमूलस्य वक्ष्यमाणत्वात्।

एतदुक्तं भवति, ध्वन्यत इति ध्वनी रसादिरर्थः, ध्वनतीति ध्वनिः शब्दो वाच्यादिरर्थो वा, ध्वन्यतेऽनेनेति ध्वनिः शब्दादिगता वा शक्तिः, ध्वननं ध्वनी **रसादिप्रतीतिः**, ध्वन्यतेऽस्मिन्निति ध्वनिः काव्याख्यसमुदाय इति यद्यप्यनेकार्थो

---

१. एवमुत्कलीयपुस्तके स्थानमित्यशुद्धः पाठः "क" पुस्तके।
२. भेदः "क" पाठः।
३. मीमांसासिद्धान्तसम्मतमेतदभिधानं ०विवेककारोपज्ञमिति प्रतिभाति।
४. अरुचिकरोऽयं कल्पस्तु विवेककारोद्भावितः।

[१]निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि ! दूति ! बान्धवजनस्याज्ञातपीडागमे !
वापीं स्नातुमितो गताऽसि न पुनस्तस्याधमस्यान्तिकम् ॥२॥

ध्वनिशब्दः[२], यद्यपि चानेनैव न्यायेन गुणीभूतव्यङ्ग्यमपि ध्वनिपदवाच्यं भवितुमर्हति, तथापि व्यवहारवशाद्वाच्योपस्क्रियमाणव्यङ्ग्य एव ध्वनिपदं नियम्यत इति ।

तटं समीपे समप्रायः प्रदेशः तत्र चन्दनं निःशेषं च्युतं निम्नोन्नतेषु तु चुचूकाग्रस्तनमध्यादिषु सशेषमिति, अधरो निःशेषमृष्टरागो, न तूत्तरौष्ठः । तन्वीत्यपि व्यङ्ग्यपक्षे विधेयम् । अधमस्य प्रागपि लक्षितनिकृष्टपरिग्रहस्य । एतेषां पदार्थानामनुसन्धानानन्तरञ्चार्थस्याभातमात्रस्य प्ररोहाभावेन तदन्तिकं न गताऽसीत्यनेन वैपरीत्याद् गताऽसीति लक्ष्यत इति शेष इति प्राचीनानां श्रीमद्वाचस्पतिमिश्रभृतीनां व्याख्यातॄणां मतम्[३] । रन्तुमिति तु फलं, वृत्तौ व्यज्यत इति तत्सम्बन्धः ।[४] ये तु 'भम धम्मिअ' इत्यादाविवात्र वाच्यप्रतीत्यन्तरमनुवपनरीत्या व्यङ्ग्यप्रतीतिमिच्छन्ति ते न सम्यग्विदः । तत्र हि श्वमारणस्य सत्यतयैवोपक्षिप्तत्वेन प्रतीत्यपर्यवसानाभावादनन्तरमेव भ्रमणविघ्नकारी श्वा यद्यपि निरस्तस्तथापि सिंहसञ्चारोऽयन्ततोऽधिकस्तद्विघ्नकारीति भ्रमणमयुक्तमिति प्रतीयते । न चैवमिह, वापीगमनस्य वास्तवतयोपक्षेपाभावात् किन्तर्हि वैदग्ध्यादग्राम्योक्त्या सूचयितुमुपादानात् । न च प्रतिपदजीवात्वनुसन्धातॄनपेक्ष्यैवं व्याख्येयमिति साधुपरिनिष्ठितापेक्षयैव काव्यविचारात्, अन्यथा 'उपकृतं बहु तत्रे' त्यत्रापि तथा स्यात्, वक्त्रादिवैशिष्ट्यस्य कदाचिदव्युत्पन्नैरनर्थसन्धानसम्भवात् । तस्मात्प्रतीत्यपर्यवसानेनात्र लक्षणैव युक्ता स्यात् । तदुक्तम्—

---

१. अमरुशतके ।

२. एतत्प्रसङ्गे 'यत्रार्थः शब्दो वे'त्यादिः प्रसिद्धा ध्वनिकारकारिका तदुपरिलोचनग्रन्थश्च जिज्ञासुभिरालोकनीयः ।

३. विवेककारोऽप्येतन्मतमेवमेवोद्धरति स्वग्रन्थे । के ते सप्रश्रयमत्र स्मृता वाचस्पतिमिश्रा इत्यधुना निर्णेतुं न शक्यते । परं सर्वतन्त्रस्वतन्त्रेभ्यो दार्शनिकप्रवरेभ्यो वाचस्पतिमिश्रेभ्योऽर्वाचीनेभ्यश्चिन्तामण्यादिस्मृतिनिबन्धरचयितृभ्यश्च ते भिन्ना इति तु नावद्यमनुमानम् ।

४. एतद्वाक्ये एतत्प्राक्तनवाक्ये च पुस्तकयोः पाठो न सम्यगिति प्रतिभाति । गोविन्दठक्कुरेण ०प्रदीपे एतदेव मतमस्माद् ग्रन्थादेतदर्वाचीनाद्वा ग्रन्थान्तरादुदधारीति प्रतीयते । (काव्यप्रदीपस्य काव्यमालासंस्करणे २३ पत्रं द्रष्टव्यम्) ।

अत्र तदन्तिकमेव रन्तुं गताऽसीति प्राधान्येनाधमपदेन व्यज्यते ।

(३) अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।

अतादृशि वाच्यादनतिशयिनि । यथा—

क्वचित् वाध्यतया ख्यातिः क्वचित्ख्यातस्य[१] बाधनम् ।
पूर्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु ॥

एतेन वापीगमनेन तन्निषेधः कामुकसमीपगमननिषेधेन च तद्विधिर्व्यज्यत इति यत्कैश्चिदुक्तं[२] तन्न युक्तम्, उक्तयुक्त्या लक्षणीयत्वात् । अत्र च दौत्यरूपात्यन्तनिकृष्टकर्मजीविकायां त्वयि कृतापराधायामपि मे नासूया, न च तस्मिन्नैसर्गकाधमकर्मचुञ्चौ, किन्त्वकृतज्ञायां त्वयि यद्बान्धवबुद्ध्या विश्वसिमि, यच्च तस्मिन्नेवंविधे हरिद्रारागिणि दुर्विदग्धे दृढमनुरक्ताऽस्मि मन्दभागिनी तदेवंविधवञ्चनासहस्रजनितप्रौढपरिपाकपुटपाकपात्रत्वं मम युक्तमेवेति विप्रलम्भभेदेर्ष्यामानव्यभिचारिनिर्वेदध्वनिः, तदङ्गन्तु लक्षणामूलवस्तुध्वनिरित्यवहितैर्विवेचनीयम् । एवमुदाहरणान्तरे वृत्तिकृदुक्तादन्यदपि विस्तरभीत्यास्मदनुक्तमपि बोद्धव्यं महाबुद्धिभिः ।

वाच्यादित्यादि––चित्रे व्यङ्ग्यमत्यन्तास्फुटम्, अत्र पुनरतथाभूतमपि व्यङ्ग्यं वाच्यादनतिशयितमिति[३] ध्वनिचित्राभ्यामस्य भेदः । वाच्यादनतिशयश्च व्यङ्ग्यस्य समप्राधान्येऽपि स्थले विद्यत इति वक्ष्यमाणप्रकाराष्टकव्याप्तिसूचनम् ।

यद्यपि च 'अखण्डबुद्धिवेद्यः काव्यार्थ'[४] इति नयेनास्वाददशायामवयवानां गुणप्रधानभावो न विकल्प्यते, तथाप्युत्तरकालीनविवेचकैरावापोद्वापविवेचने क्वचन कस्यचित्प्राधान्यं कस्यचिदप्राधान्यं भासत इति भेदव्यवहारः । आस्वादप्रकर्षापकर्षकृतश्चोत्तमादिव्यवहारः । यद्यपि चास्वादवत् काव्यम्, आस्वादे च व्यङ्ग्यान्तरस्य[५] गुणीभूतत्वादव्यभिचार एव तथापि वाच्यतः प्राधान्यमात्रेण वस्त्वलङ्कृत्योर्ध्वनिव्यवहारः । अतथाभूतयोस्तु गुणीभूतव्यङ्ग्यव्यवहार इति । यत्र रसादिकमन्यत्र

---

१. क्वचिद्वा तस्य "क" पाठः । रुचककृते ०सङ्केते उत्कलीयपुस्तके, साहित्यदर्पणे चोपरिदर्शित एव पाठः स्वीकृतः ।

२. 'ध्वनिकृता हि विधौ वाच्ये निषेधः पृथङ् निषेधे च वाच्ये विधिः पृथगुदाहृतः । विधिनिषेधद्वारेण चोदाहरणं वाच्यव्यङ्ग्ययोरित्यत्र वैलक्षण्यख्यापनार्थ'मिति ०विवेकोद्भावित आशयोऽत्राक्षिप्तः स्यात् ।

३. 'अङ्गभावादिनादनतिशयित'मिति विकृतः 'क' पुस्तके पाठः ।

४. 'वाक्याथ' इति पाठे तु पञ्चमोल्लासकृतनिर्देशं वेदान्तिमतमेवोद्दिष्टं स्यात् ।

५. आस्वादशरीरभूतरसादिव्यतिरिक्तस्येति यावत् ।

प्रक्रियमाणे गुणीभवति[१]। यथा मम--

उअ तिमिरे दरविमलोदके कइरवसरे परिहमन्तम्मि।
असिअं णु अपणढकिअं जामिणि वसणं वससि दिव्वं ॥[२]

तत्र गुणीभूतत्वव्यवहार इति।

ननु यत्र रसादिकमन्यत्र प्रक्रियमाणे गुणीभवति तत्र व्यङ्ग्ये[३] कथं काव्यव्यपदेशो, रसादेरमुख्यत्वात्, प्राधान्य एव काव्याङ्गीकारात्? अत्र ब्रूमः। केनोक्तमत्र रसादिर्गुणीभूत इति? समूहालम्बनरूपस्यास्वादस्य सहृदयहृदयविश्रान्तिधाम्नः शब्दार्थादिनिखिलकाव्यावयवचारुत्वसामग्रीसाम्राज्यसम्पूर्णस्यात्रापि स्वसंवेदनसाक्षिकत्वात्, तस्यैव च रसादिपदवाच्यत्वात्।

ननु यद्येवं, तर्हि दीयतां ध्वनिगुणीभूतव्यङ्ग्याख्यकाव्याभिख्यायै निवापाञ्जलिः; आस्वादस्योक्तरीत्या क्वचिदपि गुणीभावस्याभावात्, अतत्त्वतश्चाभासतानियमात्। सत्यं, [परं] मुख्यरसाद्युपायभूते रत्यादौ प्रकियमाणाधिष्ठाने प्राधान्यमुपचर्याप्रक्रियमाणगतेऽप्राधान्यमाश्रित्यास्वादोत्तरकाले विवेचकैर्ध्वन्यादिभागः क्रियत इत्युपपद्यते भेदव्यवहारः। यदि च रसाद्यन्तरे तस्यैव गुणीभावस्तदोभयव्यपदेशप्राप्तावपि यस्य चमत्काराधिक्यमधिकं विविच्य व्यवस्थापयितुं शक्यते तन्मुखेनैव व्यपदेशः : यथा मम—

क्षिप्रप्रशाम्यदरुणोग्रविलोलभावैः सद्योविलीनविकटभ्रुकुटीविभङ्गैः।
यः सङ्गरेषु करवालकरालपाणिर्दीनैर्विलोचनपुटैर्द्विषतां व्यलोकि ॥

अत्र यद्यपि क्रोधप्रशान्तित्रासोदभ्यां संस्कृतस्य वीरस्य नृपविषयरति-

---

१. 'ननु'यत्रे'त्यादि············इत्यादौ तदगुणीभूतत्वव्यवहार इति' इत्यन्तोऽसंलग्नः पाठः 'क' पुस्तके।

२. त्रुटितप्रायेयं गाथोभयोरेव पुस्तकयोः।
'तअ भिमिवे दकविम कइववसरे परिहसन्तम्नि। असिया ण अपणढकिअं यामिणी वसुणं वससि विद्दं।'' 'क' पाठः।
'उअतिमिरे दरविमलदककइरवरसे परिहसन्तम्मि। असिअं ण अप्पण ढकिअं जामिणि बसणं वससि विग्घं ॥ 'ख' पाठः।
यथाकथञ्चित् यथामतीयं समाहिता।
'पश्य तिमिरे दरविमलोदके कैरवसरसि परिहसति। असितं नु आत्मनाऽऽवृतं यामिनि! वशनं वस्से दिव्यम् ॥'
इत्युपरिपाठानुसारिणीच्छाया।

३. 'रसादिकमन्यत्र प्रक्रियमाणो अगुणीव्यङ्ग्ये' इति व्यत्यस्तः पाठः 'क' पुस्तके।

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥ ३ ॥

अत्र वञ्जुललतागृहे दत्तसङ्केता नागतेति व्यङ्ग्यं गुणीभूतं, तदपेक्षया वाच्यस्यैव चमत्कारित्वात् ।

भावाङ्गतयैव व्यवस्थानं तथापि तस्यैव चमत्काराधानक्षमत्वं विवेचनायामवभासत इति तन्मुखेनैव गुणीभूतव्यङ्ग्यभेदरसवदलङ्कारव्यवहारो न्याय्यो, न तु भावध्वनि-व्यवहारः ।

एतद्गिरेर्माल्यवतः पुरस्तादाविर्भवत्यम्बरलेखि शृङ्गम् ।
नवं पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टम् ॥[१]

अत्र सीतासहचरस्य श्रीरामचन्द्रस्य प्रकरणानुसन्धानाद्विपरीतविहारलक्षणः सम्भोग एव चमत्कुरुते, विप्रलम्भस्तदङ्गभूतो निगूढ एव चरतीति सम्भोगव्यपदेश एव युक्तः । एवमन्यत्राप्युद्भाव्यं भावुकचक्रवर्त्तिभिः ।

ननु वस्त्वलङ्कृत्यो रसादिसान्निध्येनोद्भटीभूतयोर्वाच्यापेक्षया प्रधानीभूत-योरेवम्, इतरयोस्तु गुणीभाव इति, यदुक्तं भवता तद्बहुविप्लवकारि, नीरसस्य तथाभूतस्य वाक्प्रपञ्चस्य सर्वस्येवाकाव्यत्वप्रसङ्गात् । कष्टं भो प्रविलुप्तं निखिल-मेव ते संव्यवहारभाण्डम् । आयुष्मन् बन्धादिसाम्यादाभासग्रस्तबुद्धिभिस्त्रैलोक्य-सम्मोहनप्रयुज्यमानकाव्यव्यवहारं माऽत्र वृथा कृथाः ।[२]

नन्वेवं चित्रस्याकाव्यत्वमेव स्यात्, आस्वादसम्भेदे[३] यथायथं प्राचोरेवान्तः-पातात्, अन्यथाऽऽभासतानियमात् । नव वाच्यं क्षुद्रमास्वाद्यं तत्राप्यस्तीति, क्षुद्रत्वेऽनास्वाद्यत्वात्, आस्वाद्यत्वेऽक्षुद्रत्वात्, तस्मात्तत्रैव विधानमयुक्तमेव स्यादिति चेत्–सत्यमेवं, किन्तु गड्डलिकाप्रवाहपतितानां जरतां गौरवप्रबन्धनिर्यन्त्रितोऽयं ग्रन्थकृत् त्रैविध्यमुक्तवान् ।[४]

यद्वा रसवत्प्रबन्धावयवध्वनिगुणीभूतव्यङ्ग्यचित्रतया त्रिधा इति तत्परं

---

१. रघुवंशे (१३।२६) । अत्र टीकाकृन्मन्तव्यमनादीनवं रहस्यवस्तुसूचनं विदग्धैर्विमर्शनीयम् ।

२. काव्यव्यवहारमात्रं कृथाः 'क' पाठः, काव्यव्यवहारं माऽत्र बृथा 'ख' पाठः ।

३. एवं 'क' पाठः । 'आस्वादसत्त्वेदे' 'ख' पाठः ।

४. सरसोऽयं टीकाकृत्स्वरसो मान्यानां ग्रन्थकृतां विचारसरणिं प्रति कर्कशाक्षेप-परोऽपि निपुणैः सादरमाकलनीयः । ० प्रकाशकृत्तत्त्वेनैकतो, वामनोद्भटादिप्राचीन-सरणिकृतामपरतः आनन्दवर्धनाभिनवगुप्तप्रमुखनवीनमार्गप्रवर्तकानां मतजालयोर्मध्ये सन्देहदोलायितचित्तवृत्तिः स्वकीयग्रन्थेऽसामञ्जस्याद्यवतारयतीति शास्त्रदर्शिनां सुस्थितः सिद्धान्तः ।

(४) शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ॥५॥

चित्रमिति गुणालङ्कारयुक्तम् । अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम् । अवरमधमम् । यथा—

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाऽह्लाय वः ।

त्रैविध्यगणनम्, सरसगाथाऽऽदिगतैकनीरसपद्यादिव तेषां काव्यावयवताहान्यभावात्, प्रबन्धस्यैव तत्र काव्यतास्वीकारात् ।[१]

परमार्थतस्तु सरसताऽऽत्मैव काव्यं, तच्च द्विविधमेव—तदुक्तं 'काव्यस्यात्मन्यङ्गिनि रसादिरूपे न कस्याचिद्विमति'[२] रिति ।

'गुणप्रधानभावाभ्यां काव्यस्यैवं व्यवस्थितेः ।
द्विधा काव्यं ततोऽन्यद् यत्तच्चित्रमभिधीयते[३] ॥' इति ।

ग्रामेति—जन्मप्रभृतिप्रातिवेश्या[४] दनुरागपात्रत्वप्रकटनम् । पश्यन्त्या इति वृत्ताविरतो वर्त्तमानः । मुहुर्नितरामिति यदा यदा तत्तदनुरागदाढर्यं तदा तदाऽनुतापोत्कर्षाविष्कारान्मुखमालिन्यप्रकर्ष इति तद्विदां स्वरसः । [५]वाच्यस्य मुखश्रीमालिन्यस्यैव विप्रलम्भाभासोत्कर्षवत्वं, व्यङ्ग्यस्तु सङ्केतसमयभङ्गस्त्वङ्गतया तद्भुजिष्य इव तन्मुखापेक्षी ।

अव्यङ्ग्यमिति ईषदर्थे नञ्, व्यङ्ग्यात्यन्ताभाववति काव्यपदप्रयोगाभावात् । एतच्च सामान्यलक्षणमिति लक्षणे चित्र पदमध्याहार्यं, [६]तद्विभागः शब्दचित्रं वाच्यचित्रमिति । अवरमिति—प्रबन्धैकदेशपक्ष इतरैकदेशापेक्षया निकृष्टत्वात्, अन्यथाऽऽभासत्वादिति भावः । गुणेति—शृङ्गारादिगतचित्त-

---

१. एतन्मतं सप्रश्रयं स्मृतं साहित्यदर्पणे चतुर्थपरिच्छेदस्यान्तिमे भागे 'तदुक्तमस्मत्सगोत्रकविपण्डितमुख्यश्रीचण्डीदासपादै'रित्युपक्रम्य । तत्रोद्धृतः सन्दर्भस्तु ध्वनिसिद्धान्तसंग्रहीयः स्यात् ।

२. महीमभट्टकृते व्यक्तिविवेके (२२२ पृ०)। 'अङ्गिनी'त्यत्र 'संगिनि' 'संज्ञिनि' इति च पाठान्तरे मुद्रितपुस्तिके ।

३. ध्वनिकारिका (३।४२) ध्वन्यालोके काव्यमालासंस्करणे (२२० पृ०)। 'काव्ये उभे' इति तु मुद्रितपुस्तके पाठः ।

४. जन्मप्रभृतिभिः प्रादेश्यात् 'क' पाठः ।

५. अत्र ० विवेके 'मुहुर्नितरामित्यव्ययद्वयसरस' इति व्याख्या दर्शिता । सैवात्र पाठपरियाटी स्यात् ।

६. चित्रमिति लक्ष्यपदमध्याहार्यं 'ख' पाठो विवेकानुसारी । चित्रमिति लक्षणपदमध्याहार्यं 'क' पाठः ।

भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥ ४ ॥

विनिर्गतं मानदमात्ममन्दिरा-
द्भवत्युपश्रुत्य यदृच्छयाऽपि यम् ।
ससंभ्रमेन्द्रद्रुतपातितार्गला
निमीलिताक्षीव भियाऽमरावती[१] ॥ ५ ॥

इति काव्यप्रकाशे काव्यस्य प्रयोजनकारणस्वरूपविशेषवर्णनो
नाम प्रथम उल्लासः ॥

द्रवीभावमयमाधुर्यादिव्यञ्जकसजातीयस्य कस्यचिद्वन्धादिवैशिष्टस्याभिधानम् । अलङ्कारेति रसादिपोषकोपमादिसाजात्यात्तत्पदप्रयोगभाजो यमकादेश्च प्रसिद्धिमात्रव्यामूढैरलङ्कारतया व्यवह्रियमाणस्योक्तिः । स्फुटेत्यादि–रसाद्यभावादित्यर्थः ।

छातमल्पम् । अह्नाय झटिति वो मन्दतां भिन्द्यादि[२]-त्यन्वयः । दरिद्राः शुष्कत्वेन ग्लानाः । अत्र प्रवहद्रूपेणानुप्रासेन बन्धवैकटघेन च चेतसि काऽपि प्रकृष्टिकाऽऽधीयते । न चात्र गङ्गाविषयभावध्वननप्रत्याशा ज्यायसी । यत्र सर्वात्मना तन्मात्ररूपा रतिः प्रतीयते तस्य तद्वर्णन एव हि रतिध्वनिव्यपदेशो, न तु दैवतोपनिबन्धमात्रैणेत्यादि विस्तरान्निर्णीतं ध्वनिसिद्धान्तसंग्रहे । यमिति—प्रकृतं हयग्रीवम् । यद्यपि चात्र प्रबन्धपर्यालोचनया वीरः प्रतीयते तथाप्येतन्मात्रेण तत्परिपोषाभावात् तदनपेक्ष्य वाच्योत्प्रेक्षामाश्रित्य चार्थचित्रतोक्तिः ।

इति कापिञ्जलकुलतिलक–षड्दर्शनीयचक्रवर्त्ति-
महाकविचक्रचूडामणि–सहृदयगोष्ठीगरिष्ठ-
महामहोपाध्याय–महापात्रश्रीचण्डी-
दासकृत–काव्यप्रकाशदीपिकायां
प्रथमोल्लासः[३] ।

---

१. हयग्रीववधे नाटके ।

२. 'भिन्द्यादि'ति लिङसामान्यपाठः प्राच्यटीकाकृद्ग्रन्थेषु बहुषूपलभ्यते । 'भिद्या'दिति आशिषि लिङः प्रयोगस्तु बहुतरसम्मतः ।

३. इति प्रथम उल्लासः क' पाठः । …………श्रीचण्डीदासमहामहोपाध्यायकृतकाव्यप्रकाशदीपिकायां……टोकाग्रन्थान्ते ,ग' पुस्तके ।

द्वितीय उल्लासः ।

—:०:—

क्रमेण शब्दार्थयोः स्वरूपमाह—

(५) स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा ॥

अत्रेति काव्ये । एषां स्वरूपं वक्ष्यते ।

(६) वाच्यादयस्तदर्थाः स्युः—

वाच्य-लक्ष्य-व्यङ्ग्याः ।

(७) तात्पर्याऽर्थोऽपि केषुचित् ॥ ६ ॥

आकाङ्क्षा-योग्यता-सन्निधिवशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये

उल्लासस्य प्रवृत्तिविषयं स्फुटीकुर्वन्नुद्भावयति—क्रमेणेत्यादि । शब्दस्य विशेष्यतया प्रथमं ततोऽर्थस्येत्यर्थः । रूप्यते निरूप्यतेऽनेनेति रूपं वैधर्म्यं, स्वस्मात् सजातीयादेव रूपं स्वरूपं, विशेषलक्षणमिति यावत्, जात्यपेक्षमेकत्वम् । उद्देश्य-विभागस्तु तत्प्रवृत्तिसौकर्याय—एकस्यैव शब्दस्य तत्तद्बहूपाधिवशाद्वाचकादि-संज्ञाभेदो देवदत्तस्येव पाचकादिपदानि । अत्रेति—तन्त्रान्तरे [1]व्यञ्जकताऽनङ्गी-कारात् । विभागस्य विशेष[2]लक्षणप्रयोजनकतां स्फोरयति वृत्तिकृत्—**एषामि-त्यादिना** ।

यद्यपि शब्दविभागानन्तरं तद्विशेषलक्षणं वक्तुं युक्तं तथापि विभागप्रकरण-मेकमेव भवत्वित्यभिप्रायेण, वाच्याद्यर्थविशेषप्रतिपादना[3]नुगुणवाचकत्वाद्युपाधि-वशाद्वाचकादिभेदाः, न तु गवाश्वादिवत्तत्तद्वस्त्वनन्तरमिति द्योतयितुं वा मध्येऽर्थ-विभागमाह—**वाच्येति** । वाच्यलक्ष्यव्यङ्ग्या इति शब्दवदौपाधिकानि नामानि, गौणयोस्तु शब्दार्थयोः पृथक् गणनं न कृतं, गौण्या लक्षणाऽन्तर्भावाङ्गीकारात् ।

केषुचिदिति—असार्वत्रिकतया समकक्षभावायोग्यायास्तात्पर्यनाम्न्या लक्षणाया[4] उपाधिविषयतामाश्रित्य शब्दार्थप्रकारपार्थक्यानादर इति भावः ।

---

१. मीमांसादर्शने न्यायनये च यत्र हि प्रायशः शब्दार्थशक्ति-विमर्शः कृतः ।

२. विशेषलक्षण 'क' पाठः ।

३. प्रतिष्ठापनानुगुण 'क' पाठः ।

४. तात्पर्यं हि द्वितीयलक्षणेति कैश्चिन्मीमांसकैरभिधीयते । अतोऽसार्वत्रिकत्वात्सम-शीर्षिकया न तद्गणनमित्याशयः ।

तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थःसमुल्लसतीत्यभिहितान्वयवादिनां मतम्। वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः।

आकाङ्क्षा-प्रतीतिपर्यवसानविरहः श्रोतृजिज्ञासारूपः। सन्निधिः-बुद्धिविच्छेदाभावः। योग्यता-पदार्थानां परस्परसम्बन्धे बाधाभावः। **वक्ष्यमाणेति**—जात्यादिरूपाणामित्यर्थः। समन्वये विशेषवपुःसमन्विताकारतयाऽभिधेयादिविलक्षणस्वरूपः, अत एव तौतातितादिभिर्लक्ष्यो[१] वाक्यार्थ इति यदुच्यते[२] तदप्यस्य नामान्तराभिप्रायेण, न तु प्राचीनलक्षणाविषयतया अपदार्थोऽपि वाक्यार्थ इति एकैकपदानामगम्योऽप्याकाङ्क्षादीतिकर्तव्यतासचिवैः पदैः सम्भूयार्थ्यमान इत्यर्थः। अभिहितानामभिधया लक्षणया वा बोधितानां पश्चाद् वृत्त्यन्तरेण समभिव्याहारं ये मन्यन्ते नैयायिकादयस्तेषां तात्पर्यार्थः पृथगभिमत इत्यभिहितेत्यादेरर्थः।

वाच्य एवेति—चैत्र गामानयेत्युत्तमवृद्धोपदेशात्सास्नादिमति पिण्डे मध्यमवृद्धेन सञ्चार्यमाणे तद्दृष्टया तस्य वाक्यस्य तदर्थबोधकतामनुमायानन्तरं गां नय अश्वमानयेत्यादि प्रयोगेषु आवापोद्धारसदृशक्रियापदार्थान्वितेषु कारकपदार्थान्विते च क्रियापदार्थे तस्य तस्य पदस्य शक्तिमवधारयत्यन्वयव्यतिरेकाभ्यां, ततश्च प्रयोगकाले तस्य प्रथमत एव तथाविधैव बुद्धिर्जायत इत्यभिधाऽतिरिक्ततात्पर्यवृत्त्या किं फलमित्यन्विताभिधानवादिनः श्रीमदाचार्यप्रभाकरगुरोर्मतमित्यर्थः।

ननु यद्यसार्वत्रिकतया तात्पर्यार्थागणनं, समकक्षतया तर्हि व्यङ्ग्यार्थागणनमपि न्याय्यम्। नैवं, व्यङ्ग्याविष्कारार्थमेवाभिधेयादीनामनुवाच्यत्वात्। तदगणने तुरगारूढस्य तुरगविस्मरणवदत्यन्तप्रमादित्वापातात्[३]। नचैवं तात्पर्ये, तस्यार्थबाह्यत्वेनाप्राधान्यात्। यथा वाच्यादयोऽर्थभेदास्तथा व्यञ्जकरूपोऽप्यर्थान्तरव्यञ्जनोपाधिकृतः सम्भवति भेद इत्याह—**सर्वेषामिति,** वाच्यादीनामित्यर्थः। **प्रायश**इत्यव्याप्तिसूचनम्[४]। **वाच्यस्येति** गुरुनये, अन्यत्र तात्पर्यार्थस्य, व्यङ्ग्यो

---

१. कुमारिलभट्टस्य नामान्तरम्।

२. अनन्वितानामविधानं, पश्चात्तेषां समन्वये कर्तृकर्मक्रियाव्यापारे संसर्गाधिकवाक्यार्थबोधिन्या वाक्यार्थलक्षणया द्वितीयलक्षणेत्यपरपर्यायियाऽर्थप्रतीतिरिति बादिनस्तौतातिदायो मीमांसकचक्रधुरीणाः। केषुचिदित्यालङ्कारिकाणां तात्पर्यपदार्थस्वीकारेऽरुचिः प्रतिपादिता।

३. सर्वमेतत्सप्रपञ्चमालोचितं पञ्चमोल्लासस्योत्तरार्द्धे तदुपरि टीकायाञ्च। प्रमादितपातादित्यसङ्गतः पाठः 'क' पुस्तके।

४. वक्तृबोधव्यादिवैशिष्टयानवतारे न व्यञ्जक इति भावः।

(८) सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते ॥

तत्र वाच्यस्य यथा—

माए घरोवअरणं अज्ज हु णत्थि त्ति साहिअं तुमए ।
ता भण किं करणिज्जं एमेंअ ण वासरो ठाई ॥ ६ ॥
(मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया ।
तद्भण किं करणीयमेवमेव न वासरः स्थायी ॥
इति संस्कृतम्)

अत्र स्वैरविहारार्थिनीति व्यज्यते ।

लक्ष्यस्य यथा—

साहेन्ती सहि सुहअं खणे खणे दूणिआ सि मज्झ कए ।
सब्भावणेहकरणिज्जसरिसअं दाव विरइअं तुमए ॥ ७ ॥
(साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते ।
सद्भावस्नेहकरणीयसदृशकं तावद्विरचितं त्वया ॥
इति संस्कृतम्)

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम्, तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम् ।

वृत्तिकृदुक्तोऽर्थः, पदजीवातुस्तूभयत्र वाच्यङ्ग्यः[१] । अद्य खल्ववसरो नास्ति, न त्वन्यदा, तदव्यग्राया मम कदाऽस्त्यवसर इति काक्वा रहस्यम् । एवमेव व्यासङ्गं विना । अत्र तावत् समभिव्याहृतपदार्थरूपवाक्यार्थान्वियानन्तरं स्वैरं तावद्विहरामीति योऽर्थः प्रकाशते स तावन्नाभिधेयोऽसङ्केतितत्वात्, उपात्तैकैकपदालभ्यत्वाच्च । नापि तात्पर्यविषयः, तस्य संसर्गमात्रोपक्षयात् । ततश्चान्यथाऽनुपपत्त्या वृत्त्यन्तरमङ्गीकार्यम् । तच्च यद्यपि वक्ष्यमाणरीत्या शब्दादिषु सर्वत्रैव दत्तपदं तथाप्यत्रार्थस्य शक्तिः प्रधानं, शेषशक्तिस्तु तदुपकारिकैवेति वाच्यद्वारा व्यपदेशः ।

साहेन्ती साधयन्ती शासती वा[२] । दूणिआ खिन्ना । सब्भावो विश्वासः । स्नेहोऽनुरागः । अत्र वक्त्र्यादिवैशिष्टयसचिवेन सब्भावेत्यादिना वैपरीत्यं लक्ष्यते,

---

१. पदानामर्थाश्रितशरीर इत्याशयष्टीकाकृतां भवेत् । वाच्यव्यङ्ग्य इति लक्ष्यव्यङ्ग्यादतिरिक्तः । एवं स्थिते उभयत्र तु वाच्यव्यङ्ग्य इति पाठः साधीयान् ।

२. एवमपि विवेके । एकत्र मदीयामवस्थां तस्मै कथयन्ती, अन्यत्र मत्प्रियपक्षपातिनं कुर्वतीत्यर्थः । क्वचित्तु शंसन्तीति च्छाया । तथात्वे संसन्तीति गाथायाः पाठः ।

व्यङ्ग्यस्य यथा—

उअ णिच्चलणिप्पन्दा भिसिणीपत्तम्मि रेहइ बलाआ ।
णिम्मलमरगअभाअणपरिठ्ठिआ सङ्खसुत्तिव्व ।। ८ ।।
(पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ।।
इति संस्कृतम्)

अत्र निष्पन्दत्वेन आश्वस्तत्वं, तेन च जनरहितत्वम्, अतः सङ्केतस्थानमेतदिति कयाचित्कञ्चित्प्रत्युच्यते । अथवा मिथ्या वदसि न त्वमत्रागतोऽभूरिति व्यज्यते ।

वाचकादीनां क्रमेण स्वरूपमाह—

(९) साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः ।।९।।

इहागृहीतसङ्केतस्य शब्दार्थप्रतीतेरभावात्सङ्केतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतो गृह्यते स तस्य वाचकः ।

तेन तस्यैवातिशयो बोध्यगततया व्यज्यते । तदेतदाह—शत्रुत्वमिति । लक्ष्यमिति—लक्षणामूलव्यङ्ग्यमित्यर्थः[१] ।

ये तु वैजात्यादेतदपलपन्ति तान्प्रति व्यङ्ग्यान्तरमाह—तेनेति । लक्ष्येण दूतीगतापराधेन तदुभयनिष्पादकतया तस्य कर्मण इत्यर्थः ।

उअ पश्य । निश्चल निरुद्यमेति सम्बुद्धिः । रेहइ शोभते । शङ्खशुक्तिस्तिलमात्रोपयोगिस्वल्पचन्दनादिनिधानशङ्खपात्री, न तु मुक्ताशुक्तिः, तस्या बलाकावर्णराहित्यात् । अत्र तृतीयमेव व्यङ्ग्यश्चमत्कारप्रत्यासन्नं तात्पर्यं, तेनैव बुद्धेर्विश्रम इति तन्मुखप्रेक्षित्वं पूर्वव्यङ्ग्ययोः ।

सम्भोगाद्विप्रलम्भोऽधिकश्चमत्कुरुत इत्यभिप्रेत्याह—अथवेत्यादि । तृतीयस्थाने विकल्पः, प्राचीनद्वयन्तु[२] तदवस्थमेव ।

एवं शब्दार्थौ विभज्य विशेषणफलानि विशेषलक्षणानि[३] वाच्यानीत्युपादत्ते वाचकादीनामिति । क्रमेणेत्यतः पूर्वं बुद्धौ[४] इति शेषः । रूपं लक्षणं सङ्केतितं

---

१. 'उपकृतं बहु तत्र किमुच्यत' इत्यादिवत् । एवं सम्प्रदायविदः सर्वे । प्रदीपे च विस्तरत एतत्सूचितमिति तत्रैवालोकनीयम् । जयरामन्यायपञ्चाननादिभिस्तु मतस्यास्य खण्डने चेष्टितम् ।

२. 'अत्र पूर्वार्थद्वयप्रतीतावपि न कश्चन चमत्कार इति तृतीयार्थमात्रादेव काव्यत्वप्रतिलम्भः । अत एव पूर्वोक्तोदाहरणेषु व्यङ्ग्यपरम्परासम्भवेऽपि नायं विशेष इत्याशयाविष्कारः' इति विवेके । प्राचीनद्वयन्तु इत्युपरितनसन्दर्भस्याक्षेपपूरकः ।

३. विशनफलानीत्यस्फुटः पाठः 'क' पुस्तके, विशेषफलानि 'ख' पाठः ।

४. बोधव्यापारे प्रकृते इत्यर्थः ।

(१०) सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।

यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथाऽप्यानन्त्याद्व्यभिचाराच्च तत्र सङ्केतः कर्तुं न युज्यत इति गौः शुक्लश्चलो डित्थ इत्यादीनां विषयविभागो न प्राप्नोतीति च तदुपाधावेव सङ्केतः ।

सम्बन्धितयोपदिष्टम् । अभिधा तु समयस्मृत्यवान्तरव्यापारः सन् स्मारयति । स इति तदुपाधिविशिष्ट इत्यर्थः ।

इहेत्यादिना व्यतिरेकमुखेण सङ्केतस्यार्थप्रत्ययोपायतामाह । साक्षादित्यस्य विवृतिरव्यवधानेनेति—न तु 'यन्नामा यत्र चैत्र्यादि[१]स्तन्नामविषयेऽपि स' इतिवत्सान्तरतमयेत्यर्थः ।

शब्दविशेषलक्षणेनार्थविशेषा अपि लक्षिता भवन्तीति बुद्ध्या वाच्यमपि वादि[२]विप्रतिपत्तिप्रसङ्गादाह—**सङ्केतित** इत्यादि । अर्थः प्रयोजनं तस्य क्रिया निर्वाहः वज्राग्निवत् समुदितं वा कार्याणाम् ।[३] **आनन्त्यादिति**–सकलव्यक्तिषु समस्याशक्यत्वम् । **व्यभिचारादिति**-कतिपयव्यक्तावनुपयोगित्वम् । गोत्वादिसामान्यानामुपग्रहमन्तरेण प्रवृत्तौ गवादिपदस्य शुक्लादिपदसमभिव्याहारप्रयुक्तस्य तदर्थविविक्तार्थताऽपि कथमित्याह--**विषयेत्यादि** । **तदुपाधावेवेति**--तथैवानन्त्यव्यभिचारदोषापातान्न स उपाधेय इत्येवार्थः :

यदृच्छासन्निवेशित इति--यदृच्छा शृङ्गग्राहिकया सङ्केतनं तस्याः सन्निवेशः समर्पणं जातमत्रेति यदृच्छासन्निवेशितः सजातीयशून्यो देवदत्तादिरर्थः । तत्र चानन्त्यव्यभिचाराभावादुपाधिनैव सम्भवति । वाच्यवाचकसम्बन्धसमय इति नोपाधिरपेक्ष्यते । वक्तुः स्वेच्छया कल्पितसंज्ञाशब्द एव तत्प्रवृत्तावुपाधिरिति तु ये व्याचक्षते ते तिमिरपटलान्तरितदृशो नार्थाश्रयमवलोकयन्ति । **सिद्धः** क्रियमाणतया निर्देशशून्यः । **पदार्थस्य** पदोद्देश्यस्य धर्मिणः प्राणिनः प्राणा हानोपादानयोग्यतेति यावत्, तत्प्रदः प्राणप्रदः । विशेषणं विविच्य व्यवस्थापनं विशेषः सजातीयाद्व्यावर्त्तनमित्यर्थः,[४] तत्र हेतुर्विशेषाधानहेतुः गौः गोपदोद्देश्यः सास्नादिमानयं स्वरूपेण निरुपहितस्वलक्षणमात्रेण न गौः न गोविषयव्याहारव्यवहारभाजनं, नागौः नान्य-

---

१. यन्नाम 'क' पाठः । 'चैत्यादिः' 'चैत्रादिः' इत्यत्र पाठवैचित्र्यम् । एवमपि प्रदीपे ।

२. गवादीत्यस्फुटः पाठः 'क' पुस्तके ।

३. निर्वाह इत्यन्तरं कोऽप्यंशः प्रमादपतितः स्यात् । उत्कलीयपुस्तकमितः प्रागेव शीर्णमिति पाठोद्धारे न किमपि साहायकमासादितम् ।

४. विशेष इत्यत ऊर्द्ध्वं तदाधानमितिवाक्यं पूरणीयं टीकाग्रन्थविशुद्धय इत्यनुमीयते ।

उपाधिश्च द्विविधः, वस्तुधर्मो वक्तृयदृच्छासन्निवेशितश्च। वस्तुधर्मोऽपि द्विविधः सिद्धः साध्यश्च। सिद्धोऽपि द्विविधः, पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च। तत्राद्यो जातिः। उक्तं हि वाक्यपदीये—"न हि गौः स्वरूपेण गौर्नाप्यगौः गोत्वाभिसम्बन्धात्तु गौ"रिति। द्वितीयो गुणः। शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते। साध्यः पूर्वापरीभूतावयवः क्रियारूपः।

डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन सन्निवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मक इति।

व्यवहारगोचरः। लब्धसत्ताकं[1], जातिविशेषोपग्रहात् लब्धसत्ताकं विशिष्यते विशिष्टव्यवहारपात्रं क्रियते। **पूर्वेत्यादि** पूर्वापरीभूताः कार्यकारणरूपतया सन्तानीभूता अवयवा निष्पादकान्यङ्गानि इन्धनाहरणादीनि यस्याः क्रियायाः पाकादिप्रधानकार्यनिष्पत्तेः सा तथोक्ता। सा च क्रियमाणतया निर्देश्यत्वात् साध्यपदप्रतिपाद्या।

अन्त्यं व्यवच्छेद्यस्वलक्षणं बुद्धिद्वारा निर्ग्राह्यं यस्य तदन्त्यबुद्धिनिर्ग्राह्यम्। डित्थादिशब्दानां स्वरूपं डित्थादिशब्दा एव। तत्स्वरूपं कीदृगित्याह--संहृतक्रमेति। क्रमणं क्रमो गवादिपदवदुपाधिप्रत्ययादुपाधेयं प्रत्यायनं तत् संहृतं सम्यक् हृतं निरस्तमविद्यमानं यत्र। क्वचिदिति[2] धर्मप्रत्यायनादित्यर्थः। **उपाधित्वेन** शाब्दव्यवहारयोग्यतानिर्वाहकत्वेन। इति पूर्वोक्तानुसारेणेयं चतुष्टयी जातिगुणक्रियास्वलक्षणमात्ररूपा प्रवर्ततेऽनयेति प्रवृत्तिस्तन्निमित्तम्।

ननु परमाण्वादिपदानि जातिनिमित्तानि तावन्न भवन्ति। परमाणुत्वमहत्वादीनां[3] जातित्वाङ्गीकारे पृथिवीत्वादिना जातिसङ्करप्रसङ्गात्, पृथिवीत्वादेर्घटादौ परमाणुत्वात्तैजोऽम्भःपरमाण्वादौ परस्परं परिहृत्य वर्त्तमानत्वेन पार्थिवपरमाण्वादौ समावेशात्। नापि गुणनिमित्तकानि, रूपादिचतुर्विंशतौ परमाण्वादीनामगणनात्। नापि क्रियायदृच्छयोरन्तर्भावः, पूर्वापरिभूतावयवत्वहानादनेकव्यक्तिकत्वाच्चेत्याशङ्क्य गुणनिमित्ततायामन्तर्भावयति--**परमाण्वादीनामिति—भावपरोऽयं निर्देशः गुणमध्यपाठादिति**—[4] परिणामादिभेदतयातत्पठनेनैव संग्रह इति

---

१. न ह्यसत्ताकं जातिविशेषोपग्रहाल्लब्धसत्ताकमित्यादिः पाठः स्यात्। उपरिदर्शिते तु असंलग्नमनुवादमात्रम्। "सत्त्वे निविशतेऽपैती"त्यादि भाष्योक्तं गुणलक्षणमेव प्रकारान्तरेण आधीयते। तद्विचारस्त्वाकरतो द्रष्टव्यः।

२. धर्मिप्रत्यायनादिति पाठः स्यात्। क्वचिदित्युपेक्षिप्तोंऽश उपलभ्यमानकाव्यप्रकाशपुस्तकेषु न लभ्यते। अथवा क्वचिदित्याद्यंशो च सम्यङ्। प्रदीपे (काव्यमाला २४ पृ०) उद्धृतपाठस्तु सम्पूर्ण इतः किञ्चिद्भिन्नश्च।

३. सहत्वादीनामिति विकृतः पाठः 'क' पुस्तके।

४. अयमंशो विपर्यस्तावयव इव प्रतीयत आदर्शपुस्तके।

गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारः। परमाण्वादीनान्तु गुणमध्यपाठात् पारिभाषिकं गुणत्वम् । गुणक्रियायदृच्छानां वस्तुतः एकरूपाणामप्याश्रयभेदाद्भेद इव लक्ष्यते यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालम्बनभेदात् ।

हिमपयःशङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तच्छुक्लत्वादि सामान्यं, गुडतण्डुलादिपाका-

---

भावः। परिष्कृता भाषा परिभाषा पदार्थविवेचकाचार्याणां युक्तियुक्ता वाक्, ततो ज्ञातं पारिभाषिकं ततस्तन्निमित्तीकृत्य प्रवर्तमानानां परमाण्वादिशब्दानाम्। गुणशब्दत्वमिति गुणत्वमित्यतोऽनन्तरो विशेषः।

ननु कुमुदकौमुदीकुन्दकर्पूरकरिदन्तादिगते शैत्यादौ क्षीरकनकादिधाम्नि च पाकादौ शुक्लबहुलपरिवृत्तिप्राप्तन्यूनाधिकभावकलाऽऽदिकलितात्मनि चन्द्रादौ च तत्तद्वैधर्म्यदर्शनान्नानात्वेन व्यवतिष्ठमाने पूर्वोक्त एवान्त्यव्यभिचारदोषः सङ्केतग्रहनिग्रहणपर्याप्त इत्याशङ्क्याह–**गुणेत्यादीति**–यदृच्छाविषयो देवदत्तादिर्यदृच्छा। **आश्रयभेदादिति** — शवलधवलगतगोत्वादिसामान्यवदनुगतव्यवहारान्यथाऽनुपपत्त्या प्रत्यभिज्ञया च भेदोल्लेखप्रमाणाबाधादाश्रयोपाहित एव भेदः पर्यवस्यतीत्यर्थः। आलम्बनं प्रतिबिम्बाश्रयः।

जातिरेवेति पक्षं व्याचष्टे हिमेति—परमार्थतो[1] भिन्नेष्विति हिमादिगतशुक्लादीनां तारतम्यादिवैषम्यदर्शनात् घटादौ विद्यमान एव च नीलादीनामाविर्भावतिरोभावदर्शनान्न सामान्यवदेकरूपा गुणा इति भावः। अभिन्नादेकाकारादभिधानादेकाकाराणां प्रत्ययानामुत्पत्तिः। ततः शुक्लत्वादि सामान्यं शुक्लादिगुणेषु शुक्लादिपदप्रवृत्तिनिमित्तं, ततस्तद्वत्यपि गौणः शुक्लादिपदप्रयोग[2] इत्यभिप्रायः। **गुडतण्डलादीति**—गुडादिपाको रूपादिपरावृत्तिलक्षणस्तण्डुलादिपाकेन पूर्वद्रव्यविनाशापूर्वद्रव्योत्पत्तिलक्षणेन कथमेको भवत्वित्याशयः। **बालवृद्धेत्यादीति**—वृत्तौ चकारवाकारौ पूर्वोक्तसमुच्चयोपम्यार्थौ व्यत्ययेन योजनीयौ[3]। **शुकादीति**—स्वरादिभेदाद्वैधर्म्यप्रकटनपरम्। **प्रतिक्षणं भिद्यमानेष्विति**—वर्त्त-

---

१. भिन्नेष्विति सम्प्रदायसिद्ध पाठः। अभिन्नेष्विति पाठे उत्तरांशोऽनर्थक इव प्रतिभाति।

२. 'गुणाः शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वती'त्याद्यमरसिंहानुशासनमेतदुपयोगि।

३. एवमप्यन्ये येषां मतमिवार्थेन वा–शब्देन च शब्दस्य स्थानविनिमयादितिगर्भमुद्धृतं प्रदीपे (२५ पृ०)। बीजच्चास्याः कल्पनाया उपरिप्रकटितम्। इवार्थे वा शब्द प्र प्रयोगे प्रमाणम् "इव–वद्वा–यथाशब्दा" इत्यौपम्यवाचकपरिगणने आचार्यो दण्डी, 'हृष्टो गर्ज्जति चातिदर्पितमदो दुर्योधनो वा शिखी"त्याद्या अभियुक्तप्रयोगाः।

दिष्वेवमेव पाकत्वादि । बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये । तद्वान् अपोहो वा शब्दार्थः कैश्चिदुक्त इति ग्रन्थगौरवभयात्प्रकृतानुप-

---

मानक्षणे हि स्थूलतयोपलभ्यमानो डित्थस्तदव्यवहितपूर्वक्षणे तथाऽऽकाररहितात्तस्मादन्य एवाङ्गीक्रियते, तत्तदवस्थावतस्तया तथा निष्पत्तिस्वीकारात् । ततश्च तथा बालाद्युदीरितडित्थादिपदेषु कालादिभेदाद्भिन्नेष्वनुगतव्यवहृतिदर्शनात्सामान्यं कल्प्यते तथा डित्थादिष्वर्थेष्वपि स्थौल्यादिमत्सु कल्पनीयमिति भावः ।

अलं वा[1] चकारवाकारव्यत्ययकष्टकल्पनया । डित्थादिशब्देषु डित्थाद्यर्थेष्विति चोपलक्षणं सर्वेष्वेव गवादिपदेषु सामान्यसङ्कलितेषु तथाभूतैरेवार्थैः सहः सम्बन्धः परिच्छिद्यत इति नेया वृत्तिः । अस्मिंश्च व्याख्याने वा–शब्दोऽपि समुच्चयार्थः । स्वगतमेव सामान्यं निमित्तीकृत्य डित्थादिपदानि प्रवर्त्तन्त इति व्याख्यातारः प्राचीनयुक्त्यैवोत्त्रासिताः[2] । एतेन गुणक्रियेत्यादिवृत्तेरपि[3] जातिरेवेति पक्षनिक्षेपविक्षिप्तः श्रीधरसान्धिविग्रहिकोऽपि समपास्तो बोद्धव्यः । गुणादिषु काल्पनिकभेदवत्स्वकाल्पनिकमेव सामान्यमिति हि तस्य परं रहस्यम्, तच्च जातिवादिभिर्नानुमतं, परमार्थतो भिन्नेष्विति वदता ग्रन्थकृतैवापास्तञ्च । नचात्राभिन्नेष्विति नञ्निक्षेपो युक्तः, तद्वानित्युत्तरग्रन्थाननुगुणत्वात्[4] । को हि नामानुन्मत्त एकस्मिन्वस्तुनि वस्तुवृत्त्यैवोपपद्यमानामेकाभिधानप्रत्ययोत्पत्तिमनादृत्य प्रमाणीकृतमिथ्याभेदः पुनस्तदुपपत्त्यर्थमेकार्थमुपाधिमनुसरेत्–इत्यापाततः क्रीडया कपालं विपाठ्य पुनः सन्धानायौषधनिर्लेपः । जातिः साधारणधर्मः ।

तद्वान् सामान्यविशिष्टः–सामान्य–समालिङ्गित्वादेव निरवकाशीकृतानन्त्यव्यभिचारदोषसमयग्रहणगोचर इति नैयायिकादिभिरङ्गीक्रियते । अपोहस्तदितरव्यावृत्तिरेव समयग्रहणविषयः, स्थिरस्य सामान्यस्याभावात् इति क्षणभङ्गवादिनो मन्यन्ते । गौरवं विस्तारः । प्रकृतेपि–काव्याङ्गनिरूपणमेवास्माभिरारब्धं, तच्च

---

१. अथवा 'क' पाठः । प्रदीपेऽपि कष्टकल्पनैषाऽनयैव भङ्ग्या मतान्तरोपक्षेपेणापास्ता ।

२. स्वगतसामान्यस्याभावः प्रतिक्षणं भिद्यमानेष्वित्यादिग्रन्थव्याख्याने टीकाकृता प्राग्दर्शितम् । अथवा भाष्यकारमते डित्थादिशब्द एवोपाधिरिति तन्मतेऽपि शब्दस्य नानात्वात्तन्निष्ठा जातिरेव शक्याऽङ्गीकार्येति व्याख्यातृमतनिष्कर्षः प्रदीपे उद्धृतः (२५ पृ०) । चण्डीदासमतञ्च सावज्ञमपहस्तितं तत्रेति प्रभातः प्रतीयते ।

३. 'गुणक्रियायदृच्छानां वस्तुतः एकरूपाणामि'ति वृत्तौ ग्रन्थस्तथैव व्याख्यातुं चेष्टितः श्रीधरेण । तद्युक्तिश्च जातिवादिमीमांसकचक्रसम्मता नेति टीकाकृतां साटोपमुद्घोषणम् ।

४. तथासति तद्वान् वा शब्दार्थ इत्यंश उन्मत्तजल्पितमिव पुनरुक्तकल्पः प्रतिभाति ।

योगाच्च न तद् दर्शितम् ।

(११) स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ।८।

स इति साक्षात्सङ्केतितः । अस्येति शब्दस्य ।

(१२) मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।

अन्योऽर्थो लक्ष्यते यत्सा लक्षणाऽऽरोपिता क्रिया ॥९॥

'कर्मणि कुशल' इत्यादौ दर्भग्रहणाद्ययोगाद् 'गङ्गायां घोषः' इत्यादौ च गङ्गादीनां घोषाद्याधारत्वासम्भवान्मुख्यार्थस्य बाधे विवेचकत्वादौ सामीप्ये च सम्बन्धे रूढितः प्रसिद्धेः, तथा गङ्गातटे घोष इत्यादेः प्रयोगाद् येषां न तथा प्रतिपत्तिः तेषां पावनत्वादीनां धर्माणां तथा प्रतिपादनात्मनः प्रयोजनाच्च

लोकसिद्धेनैव शब्दार्थव्यवहारेण निर्वहतीति किमार्द्रकवणिजो वहित्रचिन्तयेति भावः । उपसंहरति—**न तद्दर्शितमिति** ।

स इति विप्रतिपद्यमानस्वरूपः । मुख्य इति अभिधेति शेष इति सम्बन्धः । शब्दार्थविभागनिरूपणप्रकरणे चात्र व्यापाराणां निर्वाचनं तत्र चोपाधयस्तथा-विभागबीजमिति, प्रकाशकम् । अननुसंहितोपाधेरुपहितप्रत्ययायोगाल्लाक्षणिके वक्तव्ये प्रथमं लक्षणाविवेकमाह सूत्रकृत्–**मुख्यार्थेति** । बाधोऽन्वयानुपपत्तिः तेन मुख्येन योग इति प्रसङ्गग्रसकः । अथ विकल्पे । प्रयोजनादित्युद्देश्ये पञ्चमी । लभ्यते प्रतीयते । यत् यया[१] । आरोपिता बाधप्रसरादेव कार्यकरी, औत्पत्तिकनये स्वाभा-विकेतरा, ऐश्वरसङ्केतपक्षेऽपि तदनुभाविता । क्रिया शक्तिः ।

कुशान् लातीति कुशल इति व्युत्पत्तिलभ्यस्यार्थस्य दक्षरूपेऽर्थेऽसम्भवात्तम-पहत्य सदसद्विवेचकत्वसाधर्म्यसम्बन्धं पुरस्कृत्य कुशलपदमेवमिदमनादिप्रसिद्ध्या प्रयोजनाभिसन्धानं विनैव प्रयुक्तमुक्तरूपमर्थमाचष्टे यया सा रूढिलक्षणेत्युच्यते वृत्तिः । एतच्च प्रकृतिप्रत्ययार्थविभागकल्पनालभ्य एव यौगिकेषु मुख्योऽर्थ इति वैयाकरणरीत्योदाहृतम्[२] ।

---

१. एवमपि लुप्ततृतीयान्तावयवाव्ययवत्पदप्रयोगोऽस्यैवोल्लासस्यान्तिमे सूत्रे 'यत्सोऽर्थान्तरयुक् तथे'ति । यदिति वाक्यार्थनिर्देश इति वा व्याख्यानम् ।

२. वस्तुतस्तु मम्मटप्रभृतयः काश्मीरकालङ्कारिकवर्या बहव एव वैयाकरणरीत्यनुप्राणितमता इतरत्रापि तथोपलम्भादिति कोविदानां दर्शनम् । एवमप्यभिधावृत्तिमातृकाऽऽदिषु भट्ट-मुकुलादयो मन्यन्ते ।

मुख्येनामुख्योऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा ।

(१३) स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥१०॥

'कुन्ताः प्रविशन्ति' 'यष्टयः प्रविशन्ति' इत्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्धयर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते । तत उपादानेनेयं लक्षणा ।

'गौरनुबन्ध्य' इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते, न तु शब्देनोच्यते, 'विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे'

वस्तुतस्तु भिन्ने एव व्युत्पत्तिप्रवृत्तिनिमित्ते । अन्यथा गच्छतीति गौरिति व्युत्पत्त्या 'गौः शेते' इत्यादौ गोपदमपि लाक्षणिकमेव स्यादिति[१] । 'कलिङ्गाः साहसिकाः' इत्यादि रूढावुदाहार्यम् । तथेति गङ्गापदेन व्युत्पादने गङ्गात्वेन प्रतिपत्तौ सातिशयतया यथेति भावः । [२]स्खलदभिधेयप्रत्ययान्तरितप्रत्ययो योऽर्थस्तन्निष्ठस्तद्विषयकः ।

तदेतल्लक्षणाद्वयं सामान्यत उक्त्वा तद्विभागमाह—**स्वेति** । तात्पर्यवृत्तिबोद्धयपदार्थान्वयानुप्रवेशनिष्पत्तये[3] परस्यान्वयमुख्याङ्गस्याक्षेपो झटित्युपनयनं यया सा उपादानेन स्वार्थापरित्यागेन लक्षणा; परस्यान्वयाङ्गस्य मुख्यसम्बन्धिनस्तटादेः प्रतीत्यर्थं स्वस्यात्मीयस्य समर्पणं प्रत्याजनमुत्थापयति यत्सा उपलक्षणमात्रेण लक्षणा—इति ताभ्यां कार्यकारणभूताभ्यामुपादानलक्षणाभ्यामुपहितेत्यर्थः । शुद्धैव[४] तावद्द्विविधा, गौण्यन्तर्भावे तु भेदान्तरमप्यस्तीति भावः । सा पूर्वोक्तोभयरूपा प्रत्येकं द्विधा । 'कुन्ताः प्रविशन्ती'त्यादौ च कुन्तादीनामभिहितानां किमिति पुनर्लक्षणमिति न चोदनीयम्, अभिहितानामपि तेषां स्वातन्त्र्येणान्वयप्रवेशो नास्तीति विशेषणतया तत्प्रवेशार्थं पुनर्लक्षणीयत्वात् । **स्वसंयोगिन इति**– लक्षणानिर्द्धारक–[५] सम्बन्धसूचनम् । इह हि सर्वत्रैव पदे संसृज्यमानानि स्वलक्षणानि तावन्नाभिधेयानि, तेषामानन्त्यव्यभिचाराभ्यां सङ्केतनस्याशक्यत्वात् । न च सामान्यक्रोडीकाराच्छक्यं तददिति वाच्यं, तथाप्यानन्त्यादिदोषस्य, गामानयेत्यादौ प्रस्तुतव्यक्तिविशेषालाभस्य

---

१. सर्वमेतदनूदितप्रायं साहित्यदर्पणे दृश्यते ।

२. सान्तरार्थनिष्ठ इति मूलग्रन्थाट्टीकांशः पूरणीयः । अत एव सान्तरः स्खलदित्यादिरत्र टीकायां पाठः स्यात् ।

३. एतत्तूपलक्षणम् । स्वस्य शक्यार्थस्येत्येवास्तामिति बहवः ।

४. 'लक्षणा तेन षड्विधे'ति ग्रन्थव्याख्याने टीकाकृता स्वयमेवैतत्प्रपञ्चयिष्यते ।

५. निर्भारक—'क' पाठः । उभयत्र निर्वाहकेत्यर्थः ।

इति न्यायादित्युपादानलक्षणा तु नोदाहर्तव्या। न ह्यत्र प्रयोजनमस्ति। न वा रूढिरयम्। व्यक्त्यविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते। यथा क्रियतामित्यत्र कर्त्ता, कुर्वित्यत्र कर्म, प्रविश पिण्डीमित्यादौ गृहं भक्षयेत्यादि च। 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र च रात्रिभोजनं न लक्ष्यते, श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषयत्वात्।

च, प्रसङ्गात्, इत्यादि [१]ध्वनिसिद्धान्तसंग्रहोक्तयुक्त्या निस्तर्त्तुमशक्यत्वात्। तत–[२] श्चाभिहितायां जातौ तन्मात्रस्यान्वयविरहात्तदुपहितासु व्यक्तिषु लक्षणया बोधितार्थतात्पर्यापरनाम्ना द्वितीयलक्षणयाऽन्वयो बोध्यत इत्याहुर्ये तान् प्रत्याह–**गौरित्यादि**। अत्रान्वयबाधार्थसन्धानविरहलक्षणा लक्षणा न[३]। त्विति कुवैरिणं सूचयितुम्। श्रुत्या सामानाधिकरण्यरूपया वेदाख्या निष्कम्पप्रामाण्यया सञ्चोदितं विहितमनुबन्धनं कथं मे स्यादित्युत्कण्ठितेव जातिर्झटित्येव (?) स्वलक्षणमालिङ्गतीति विदग्धोक्तिः। आक्षिप्यते स्वाभिधया बोध्यत इत्यर्थः। विशेष्यं व्यवच्छेद्यं, क्षीणशक्तिः शब्दबुद्धिकर्मणां विरम्य व्यापारविरह इति नयेन विश्रान्तस्वरूपा। विशेषणे व्यवच्छेदके, अर्शआदित्वादच्[४]। न्यायादिति व्यवस्थितसिद्धान्तादित्यर्थः। नह्यत्र प्रयोजनमस्ति **न वा रूढिरियमिति**–जातिव्यक्तिपदार्थौदासीन्येन हि लोकप्रसिद्धिमाश्रित्य रूढिप्रयोजने चिन्त्येते। तेनान्वयप्रतिपत्त्यादिफलस्यानादिप्रयोगस्य च सद्भावेऽपि न लक्षणेति भावः।

ननु तर्हि व्यक्तिप्रतीतिः कथं जातित इत्याह **व्यक्तीति**।—अविनाभावादाक्षेपे दृष्टान्तमाह–**यथेति**। कर्ता सम्मुखीनः। प्राकरणिकं कटादि। एवमविनाभावेनाक्षेप-मुक्त्वा प्रस्तुतान्वययोगतयाऽपि व्यक्तेराक्षेपो योग्य इति व्यक्तं योग्यविशेषाक्षेपं दृष्टान्तयति-**प्रविशेति**। अत्रापि प्रकरणादिसाहाय्यं द्रष्टव्यम्। एतच्च सङ्केतितया जात्याऽभिधास्मारितया तदविनाभाविन्या समाक्षिप्तासु व्यक्तिषु द्वितीयलक्षणया संसर्गबोधनमिति स्वीकुर्वतां भट्टानां गौरवनियन्त्रितेन ग्रन्थकृतोक्तं, न तु पारमार्थिकम्, अविनाभावस्य[५] कर्मगतस्यातदनुसंहितस्यानाक्षेपकत्वदर्शनात्। इहापि तथैव कल्पनीयत्वेन तदनुसन्धानस्यानुपलब्धिबाधितया जातिमात्राक्षेपाङ्गीकारे शब्दान्वयस्य शब्देन बोधयितुमशक्यतया च तत्र वृत्त्यन्तरस्वीकारान्नासौ लक्षणा, पूर्वोक्तन्यायात्, नापि तात्पर्यं, तस्य संसर्गमात्रनैयत्यादित्यादि ध्वनिसिद्धान्तसंग्रहे विस्तरः। **श्रुतार्थापत्तेरिति**--शाब्दी ह्याकाङ्क्षा

---

१. 'इत्यादी'त्यंशः 'क' पुस्तके प्रमादपतित इवानुमीयते।

२. 'ये' इति कर्त्तृपदं 'क' पुस्तके न दृश्यते।

३. लक्षणाऽपीति चासङ्गतः पाठस्तत्रैव। विरहलक्षणं 'क' पाठः।

४. अर्शआदित्यत्वादच् इति पाणिनीयमते। विशेषणं व्यवच्छेद्यमस्यास्तीति व्युत्पत्तिः।

५. धूमगतस्य इतीवास्फुटः पाठ आदर्शपुस्तके।

'गङ्गायां घोष' इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये 'गङ्गा' शब्दः स्वार्थमर्पयति—इत्येवमादौ लक्षणेनैषा लक्षणा। उभयरूपा चेयं शुद्धा, उपचारेणामिश्रितत्वात्। अनयोर्भेदयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम्। तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषित-

---

शब्देनैव पूर्य्यत इति दर्शने पीन इत्यादिश्रुत्या[१] रात्रौ भुङ्क्त इति वाक्यशेषः कल्प्यते, श्रुतार्थपत्तिरिति चोच्यते। प्रभाकरनये तु विशेषमनपेक्ष्य कल्पनागौरवभयादर्थमात्रं कल्प्यते, न शब्द, इति सर्वत्रैवमनुपपत्तिरर्थान्तरं कल्पयन्ती अर्थापत्तिर्निगद्यते। तच्च वाक्यार्थप्रत्ययानन्तरमेव तथाविधः शब्दोऽर्थो वा प्रतीतिपथातिथिर्भवतीति प्रतीतस्यैवार्थस्यापर्यवसानात् प्रतीत्यपर्यवसाने प्राणधारणाया लक्षणाया नावकाशः।

लक्षणलक्षणामुदाहरति-**गङ्गायामिति**। तटस्य घोषाधिकरणता द्वितीयलक्षणया गम्यते, तस्याः सिद्धये प्रतीतये स्वार्थं मुख्यार्थंलक्षणबीजतटसम्बन्धाधानं प्रथमतोऽसंसृष्ट-तटप्रत्ययेनार्पयति स्खलद्रूपेण प्रत्याययतीत्यर्थः। शुद्धा उदाहृता, तदितरा त्वन्यत्र द्रष्टव्येति भावः। न तु शुद्धैवेति ज्यायसी व्याख्या,[२] वाहीकादिविषये गौरित्यादिप्रयोगे लक्षण-लक्षणाऽऽदेर्गौणतादर्शनात्। उपचारेणामिश्रितत्वादिति—अत्यन्तं विशकलितयोः सादृश्यातिशयमहिम्ना भेदप्रीतिस्थगनमात्रमभेदप्रतीतिर्वा वक्ष्यमाणा उपचारः[३]। स च 'गौर्वाहीक इत्यादौ दत्तपदो नोक्तयोरुदाहरणयोः प्रसरतीत्यर्थः। तदेतदाह—**अनयोर्भेदयोरिति**[४]—उदाहृतयोरिति शेषः। लक्ष्यस्य तटादेः। लक्षकस्यान्वयबाधद्वारा लक्षणामुज्जीवयतः सरिदादेः। भेदरूपं तटस्थत्वं[५] भेदाभेदौदासीन्यं—न च भेदस्थगनमेवाभेदप्रतीतिः[६],

---

१. श्रूयत इति श्रुतिरिति व्युत्पत्योच्चारितमात्रे शब्दे यौगिकार्थवाहि श्रुतिशब्दोऽत्रोद्दिष्टः, न तु रूढोऽपौरुषेयवेदांशवचनः।

२. गौण्यामपि एतल्लक्षणो लक्षणाभेदः सम्भवतीत्याशयः। माणिक्यचन्द्रादिभिस्तु 'गौर्वाहीक' इत्यादि प्रयोगादुक्तोदाहरणे भेदः स्वीकृतः। 'गौण्यां तन्मात्रस्य प्रयोजनत्वात्, शुद्धभेदयोस्तु मुख्यस्य प्रयोजनान्तरस्य भावात्, नतु शुद्धायामभेदप्रत्ययस्याभावा' दिति प्रदीपकृतः संक्षेपः समाहरणीयः।

३. एवं काव्यप्रकाशदर्पणे साहित्यदर्पणे च भेदप्रतीतिस्थगन-मात्रमेवोपचारपदेनोद्दिष्टं नत्वत्रोल्लिखितद्वितीयकक्ष्याविषयोऽपि। 'उपचारो गुणवृत्तिर्लक्षणे'ति सामान्यलक्षणं ध्वन्यालोकलोचने प्रायश उपर्युक्तटीकाकृत्कृतविवरणानुगुणम्।

४. शुद्धभेदयोरिति यावत्।

५. ताटस्थमिति तु साधारणसम्मतोः मूले पाठ। तटस्थत्वमिति पाठस्तु श्रीधरेण चण्डीदासेन तदनुसारिभिरन्यैश्च स्वीकृतः।

६. 'न चे'त्यंशः 'क' पुस्तके न विद्यते।

प्रयोजनसम्प्रत्ययः। गङ्गासम्बन्धमात्रप्रतीतौ 'गङ्गातटे घोष' इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः ?

(१४) सारोपाऽन्या तु यत्रोक्तौ विषयी विषयस्तथा।

आरोप्यमाणः आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा।

प्रादुर्भाव्यफलविशेषानुपनायकत्वाद्रूढौ भेदस्थगनफलाभावाच्च। तत्त्वप्रतिपत्तौ गङ्गादित्वप्रतिपत्तौ।

ननु माभूत्तत्त्वप्रतिपत्तिः, तत्सम्बन्धरूपस्य तद्भेदराहित्यस्यापि प्रतीतौ तदुपनीतकिञ्चिच्छैत्यादिप्रतिपत्तिर्भविष्यतीत्याशङ्क्याह—गङ्गासम्बन्धेति। गङ्गातट इत्याद्युक्तेऽपि हि तत्सम्बन्धप्रतीतिः किञ्चिच्छैत्याद्यनुगुणा भवत्येव, तथा सति ऋजुमार्गेण सिद्धं तं को नामानुन्मत्तो वक्रेण साधयेत्? तथा चाभाणकः—'अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजे'दिति। एवमेवंविधलाक्षणिकप्रयोगोच्छेद एव स्यादित्यर्थः। को भेदः फलातिशयः।

ननु गौर्वाहीक इत्यादावपि वाहीकादेर्गोतादर्थ्यादिरेवाविवेकित्वाद्यतिशयप्रतीतिफलोपासनीया, गवादिभेदराहित्यमात्रप्रतीतौ हि गोगतधर्मादिसदृशधर्माधिकरणत्वमात्रप्रतीतिफलायां 'गोसदृशो वाहीक' इत्यादिप्रयोगनिर्विशेषत्वम्; न चैतद्भेदप्रत्ययस्थगनादेव तद्धर्मातिशयप्रत्यय इति न्याय्यं. नचैवंविधयुक्तिप्रसरनिषेधे प्रकृतेऽपि जागार्त्यज्ञाडिण्डिमारावः। तस्मादलीक एवैतावानुपचारकैतवविवेचनाय प्रयास इति चेत्—सत्यमेतत्। किन्तु प्राचीनप्रणयमनुरुन्धानेन ग्रन्थकृतेत्थमभिहितम्।

वस्तुतस्तु[१] सम्बन्धस्वरूपभेदमाश्रित्य कथञ्चिन्निर्वाह्यो गौण शुद्धविभाग इति। एतच्च सम्बन्धभेदमात्राद्वृत्तिभेदाङ्गीकारोऽभिप्रसञ्जक इति मत्वा लक्षणायामेव गौणीमन्तर्भाव्य परिगणयता सूक्ष्मदृशा सूत्रितमेव मन्तव्यं, सर्वथैवाभिधाऽध्यासश्च प्रयोजनमिति च साध्यवसानगौणे वक्ष्यति। यद्वा सम्बन्धान्तरं लक्ष्यलक्षकयोः साक्षाद्दत्तपदं भवति, सादृश्यन्तु गोवाहीकादेर्धर्मसाजात्यरूपं न तथेति गौणशुद्धव्यपदेशः। एतच्च व्याख्यानं प्राचीनटीकाऽनुरोधेन[२] द्रष्टव्यम्। वस्तुगत्या त्वनयोरित्यादिप्रकृतोदाहृतिरहस्यप्रकटनमात्रपरं, "तटस्थे लक्षणा शुद्धे"तिमतदूषणपरं वा[३], नत्वन्ययोगव्यवच्छेदपरं मन्तव्यम्। उपचारस्थलपक्षे सादृश्यवीजे आरोपा-

---

१. प्राचीनमीमांसकानां तदनुजीविनां भट्टमुकुलादीनां मतमाश्रित्य प्रायशोऽनेन ग्रन्थकृताऽत्र शब्दव्यापारविचाराख्यलघुतरनिबन्धे च प्रायासीति सत्यमेव तावद् तद्घोषणम्। इत ऊर्ध्वम् एतच्चेत्यंशष्टीकाकृतो व्याख्याचातुरीं प्रकटयति।

२. केयं प्राचीनटीकेति नावगम्यते। अथवाऽत्र प्राचीनमतपरामर्श एव विवक्षितः।

३. 'तटस्थे लक्षणा शुद्धे'ति भट्टमुकुलमतम्। न तत्र नव्यैरालङ्कारिकैरास्था स्थाप्यते।

(१५) विषय्यन्तःकृतेऽन्यस्मिन् सा स्यात्साध्यवसानिका ।

विषयिणाऽऽरोप्यमाणेनान्तःकृते निगीर्णेऽन्यस्मिन्नारोपविषये सति सा साध्यवसाना स्यात् ।

भेदाविमौ च सादृश्यात्सम्बन्धान्तरतस्तथा ।

गौणौ शुद्धौ च विज्ञेयौ—

इमावारोपाध्यवसानरूपौ सादृश्यहेतू भेदौ, 'गौर्वाहीक' इत्यत्र 'गौरय'-मित्यत्र च । अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्तीति केचित् । स्वार्थसहचारि-गुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते, न तु परार्थोऽभिधीयत इत्यन्ये । साधा-रणगुणाश्रयत्वेन परार्थ एव लक्ष्यत इत्यपरे । उक्तं चान्यत्र—

अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ।
लक्ष्यमाणगुणैर्योगात् वृत्तेरिष्टा तु गौणता ।।इति।

ध्यवसाने । अनिगीर्णस्वरूपस्यान्यतादात्म्यप्रतीतिरारोपः, तत्कर्त्री सारोपा । अन्या एका । तुः प्रकारान्तरसूत्रणपरः । पुनःप्रत्यायनयोग्यतेति प्रत्युक्तिः । यद्वा परार्थस्य गुणमात्रप्रत्यये नास्ति किञ्चन फलाधिक्यम् । 'गङ्गायां घोषः', गौर्जल्पती'त्यादौ परार्थगुणमात्रस्यान्वययोग्यत्वं नास्तीति सर्वथा तुच्छमेतत् । एतेनाभेदेनैकात्मतया लक्ष्यन्ते लक्षणाविषयीक्रियन्त इति व्याख्यानमपहस्तितम्[१], साधारणगुणाश्रयत्वेन परार्थ एव न तु तद्गतगुणातिरेकोऽपि, तस्य वृत्त्यन्तरगम्यतयाऽप्रतिपाद्यत्वादिति भावः । अपरे पूर्वादिद्वयविलक्षणाः साम्प्रदायिकाः ।

उक्तञ्चान्यत्रेति—लक्षणातो भिन्ना गौणीति ये मन्यन्ते तन्मतं रिक्ततरमिति सूचनपरम् । प्रतीयतेऽनयेति प्रतीतिः शब्दशक्तिः । जातिमात्रमभिधाविषय इति नये लक्ष्यमाणस्याक्षिप्यमाणस्य लक्षणस्य ये गुणाः, यद्वा लक्ष्यमाणा मुख्यार्थविशेष-तया प्रतीयमाना ये गुणास्तद्योजनात्सजातीयगुणवत्त्वलक्षणात्सादृश्यादुज्जीविताया वृत्तेर्गौणतेति । साक्षात्सम्बन्धराहित्याद् गौणी न लक्ष्यत इत्यर्थः ।

---

१. 'न तु परार्थोऽभिधीयते' इति वृत्तिग्रन्थात् नात्र मते लक्षणाशक्तेरवकाश इति । 'अन्योऽर्थो लक्ष्यते यत् सा लक्षणे'ति स्फुटं सूत्रकृतामाशयोपलम्भादिति चण्डीदासव्याख्यानिष्कर्षः । लक्षणाविषयीक्रियन्त इति व्याख्यानं रुचककृते सार्थकनाम्नि सङ्केते नास्ति, नापि माणिक्यचन्द्रकृते विस्तृततरे सङ्केते तदुपलभ्यते । श्रीधरोद्भावितं विवेकस्थितमेतत् स्यादिति सम्भाव्यते । परमस्मद्रूपमलब्धस्य विवेकग्रन्थस्यात्र त्रुटनान्नेदं निश्चीयते ।

अविनाभावोऽत्र सम्बन्धमात्रं, न तु नान्तरीयकत्वम्। तथात्वे हि मञ्चाः क्रोशन्तीत्यादौ न लक्षणा स्यात्। अविनाभावे चाक्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्युक्तम्।

'आयुर्घृतम्' 'आयुरेवेद' मित्यादौ च सादृश्यादन्यत्कार्यकारणभावादि सम्बन्धान्तरम्। एवमादौ च कार्यकारणभावादिलक्षणपूर्वे (१) आरोपाध्यवसाने। अत्र गौणभेदयोर्भेदेऽपि ताद्रूप्यप्रतीतिः, सर्वथैवाऽभेदावगमश्च प्रयोजनम्। शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वादि प्रयोजनम्। क्वचित् तादर्थ्यादुपचारो यथा इन्द्रार्था स्थूणा 'इन्द्रः'। क्वचित् स्वस्वामिभावाद् यथा-राजकीयः पुरुषो 'राजा', क्वचिदवयवावविभावाद् यथा अग्रहस्त इत्यत्राग्रमात्रेऽवयवे 'हस्तः'। क्वचित् तात्कर्म्याद् यथा अतक्षा 'तक्षा'।

नन्वेतावता वैषम्यं नात्यन्तवैजात्यावहम्; तथाहि मुख्यार्थबाधसम्बन्धरूढिप्रयोजनान्यतरानुरोधस्तादुभयत्र समानः, साक्षादसत्त्वेन सम्बन्धमात्रवैचित्र्यं किञ्चिदवान्तरवैधर्म्यमापद्यत इति लक्षणाविशेष एव गौणी। अविनाभावोऽत्रेति—अविना सद्भावे भावमात्रमविनाभावो न तु विनाऽभाव इत्यर्थः। नान्तरीयकत्वं तदन्वयव्यतिरेकानुविधायित्वम्। तत्त्वे[1] नान्तरीयकत्वे। **मञ्चा इति**—मञ्चानाञ्चास्त्यन्वयाद्यनुविधिः।

ननु माभूदत्र लक्षणा, अन्वयाद्यनुविधानम् यथैव स्यादित्याशङ्क्याह—**अविनेति**। अविनाभावस्थलेऽनुमितिसामग्रीसम्भवेन शब्दव्यापार एव स्यादित्यर्थः। उक्तमिति[2] श्लोककर्तृभिरेव जात्या स्वलक्षणाक्षेपमङ्गीकुर्वद्भिरस्माभिर्वा तन्मतमुपलिखद्भिः[3]। उपादानलक्षणायां शुद्धतयोदाहृतिः—आयुरिति एवेति न घृतपदप्रयोग इत्यर्थः। इदमिति घृतविषयताप्रकटनम्। सादृश्यादन्यदिति कारिकागतान्तरपदविवरणम्[4] **एवमादावीति**—लक्ष्यतेऽनेन शब्दसामर्थ्येनेति लक्षणं लक्षणाकार्यकारणभावादितो लक्षणं, तत्पूर्वं यथा स्यात्तथा (२) आरोपाध्यवसाने भवतः, तयोस्तत्कार्यत्वात्। लक्षणापूर्वं इति सुगम एव क्वचित्पाठः। भेदेपि वाहीकपदप्रयोगादुल्लिख्यमाने ताद्रूप्यप्रतीतिर्भेदस्थगयित्री। आरोपाऽध्यवसाने च सर्वथैवाऽवेदावगमो वाहीकादिपदाभावाद् भेदस्य बुद्धयनारोहादित्यर्थः। प्रयोजन-

---

१. तथात्वे इति त्वन्यैर्माणिक्यचन्द्रादिभिर्धृतः पाठः।

२. उक्तमेतच्च 'क' पाठः। श्लोककर्तृभिर्भट्टकुमारिलपादैरुद्धृत एव श्लोकांशे श्लोकवार्त्तिकस्थे उद्दिष्टमेतत्। अस्माभिः काव्यप्रकाशकृद्भिः 'गौरनुबन्ध्य' इत्यादिनोदाहर्तव्ये वृत्त्वन्ते विवेचितमिति टीकाकृदुक्तितात्पर्यम्।

३. सम्बन्धान्तरत इति कारिकागतस्य पदस्य व्याख्या।

४. लक्षणपूर्वमिति टीकाकृत्परिगृहीतः पाठः।

(१७) लक्षणा तेन षड्विधा १२ ॥

आद्यभेदाभ्यां सह । सा च--

(१८) व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने ।

प्रयोजनं हि व्यञ्जनव्यापारगम्यमेव ।

(१९) तच्च गूढमगूढं वा—

तच्चेति व्यङ्ग्यम् । गूढं यथा—

मवान्तरप्रत्याय्यम् । अन्यवैलक्षण्येनारोपे, अव्यभिचारेणाध्यवसाने तत्र हि भेदानुल्लेखे तादर्थ्यप्रतीतिदार्ढ्याद् व्यभिचारसम्भावनाया: सर्वथैव निरासो, न स्वार्थं आत्मानं व्यभिचरतीति । आरोपे तु स्थगितेऽपि भेदे तद्गन्धेन सर्वथा व्यभिचारनिरासाभावात् । अभेदप्रतीतिसहोदरात्मतयाऽन्यवैलक्षण्यमात्रम् । एतच्चोभयत्र मुख्यप्रयोजनम्, अवान्तरन्तु पूर्ववदभेदावगमः । क्वचिदित्यादि सम्बन्धप्रपञ्चनम् । अत्र च रूढिप्रयोजने यथासम्भवं द्रष्टव्ये । अग्रहस्त इति—समानाधिकरणविशेषणसमासमते लक्षणा । ये त्वग्रहस्त इत्यखण्ड एवायं शब्दो हस्ताग्रवाचकः, हस्तस्य अग्र इति वा विग्रह इत्याहुः, तन्मते 'पीता कार्पटिकैर्गङ्गा' इत्यवयवावयवित्वलक्षणायामुदाहार्यम् । अतक्षा गोपालादिः कुतोऽप्यभ्यस्तगृहादिनिर्माणनैपुणो जातिविशेष एव हि मुख्यतस्तक्षपदवाच्यः ।

षड्भिरुपाधिभी रूढिप्रयोजनोपादानलक्षणाऽऽरोपाध्यवसानैर्विधाः प्रकाराः कल्पनीया अस्या इति षड्विधा[1] । न तु षट्प्रकारा, प्रकारान्तरसम्भवस्य प्रतिपादितत्वात् । भिद्यते आभ्यामिति भेदौ उपादानलक्षणे रूढिप्रयोजने वा आद्यौ भेदौ, ताभ्यां प्रकृताभ्यामारोपाध्यवसानाभ्यां प्रथममुक्तत्वात् ताभ्यामाद्यभेदाभ्यां सहेति ग्रन्थसङ्गतिः ।

एवंविधलक्षणाप्रपञ्चानुवादस्य तत्पृष्ठे व्यञ्जनोट्टङ्कनमेव फलमिति सङ्गोपितरहस्येन सूत्रकृता 'व्यङ्ग्येन रहिते'त्यादि कारिकया व्यञ्जनागम्यमर्थमुपाधाय लक्षणाविभागो दर्शितः । ततस्तदनुवादेनैव तामवतारयति—सा चेति । इममेवार्थं स्फोटयति[2]—प्रयोजनं हीति । अत्र प्रयोजनवत्यां व्यञ्जनामूलभूतायामुपादेयत्वेनानुवाद्यतया प्राप्तायां हेयाया अपि रूढिमूलाया अनुवादो विवेकसौकर्याय मन्तव्यः ।

१. षोढेति बहुतरटीकाकृतां माणिक्यचन्द्राद्यानां व्याख्या । उपरिदर्शितो नयो लक्षणाविभागप्रसंगे साहित्यदर्पणेऽनुसृतः । प्रदीपकृता तु कटाक्षितमेतदुपरि (काव्यमाला ६६ पृ:) । मुद्रितप्रदीपोद्धृतश्चण्डीदासग्रन्थस्तूपरिदर्शितात्किञ्चिद्विभिन्नः ।

२. 'स्फोरयति' 'क' पाठः ।

मुखं विकसितस्मितं वशितवक्रिम प्रेक्षितं
समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः ।
उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं
बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥ ९ ॥

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥१०॥

[1]अत्रोपदिशतीत्यनायासेन शिक्षादानमभिधेयवत्स्फुटं प्रतीयते ।

(२०)–तदेषा कथिता त्रिधा ॥१३॥

अव्यङ्ग्या गूढव्यङ्ग्या अगूढव्यङ्ग्या च ।

गूढं काव्यार्थभावनापरिपक्वबुद्धिविज्ञमात्रवेद्यरहस्यम्, अगूढं तदन्यत् सहृदयेष्वन्येष्वपि सम्भावितवेदनम् ।

मुखमिति–अत्र विकसितत्वस्य कुसुमविस्तृतत्वे प्रसिद्धस्य स्मितेऽसम्भवाद्विस्तृतत्वमात्रं लक्ष्यते, ततस्तस्यैव विशेषोऽत्यन्तमनोहारित्वादिलक्षणः सहृदयहृदयङ्गमो व्यज्यते । एवं वशितत्वसमुच्छलितत्वापास्तसंस्थत्वमुकुलितत्वोद्धुरत्वमोदनैः प्रश्लिष्टत्वोल्लसितत्वविषयसहस्रसञ्चारितत्वोद्भिन्नत्वयोग्यत्वजृम्भणानि लक्ष्यन्ते । तेषामेवातिशयो व्यज्यते । **उपदिशतीति**–अत्राविष्कारो लक्ष्यते । तदतिरेकश्च व्यङ्ग्यः । स चाभिधेयवत्स्फुटं प्रतीयत इति गुणीभूतः । ललितानि हस्तादिविन्यासविलासाः । अत्रेत्यादि प्रकृतविषयविवेकः । **त्रिधेति**–व्यङ्ग्यव्यतिरेकान्वयाभ्यामुपाधिभ्यां, तदाह वृत्तिकृत्–अव्यङ्ग्या गूढव्यङ्ग्याऽगूढव्यङ्ग्या चेत्यर्थः । अत्र चेत्थं प्रकारविकल्पना––लक्षणा प्रथमं द्विधा–रूढा प्रयोजनवतीति च । तत्र रूढा उपादानोपलक्षणाभ्यां प्रत्येकमारोपाध्यवसानाभ्यां चतुष्टयीभूत्वा गौणशुद्धभावादष्टधा, प्रयोजनवती तूक्तभेदवती व्यङ्ग्यवद्द्वैविध्यात्षोडशविधा[2] । यत्र[3] धर्मी तटादिर्लक्षणीयस्तत्र धर्मः फलं, रामोऽस्मीत्यादौ तु धर्मेषु लक्ष्येषु तेषामेवातिशयः फलमिति द्वात्रिंशत्पिण्डा । न च द्वात्रिंशत्, सम्बन्धवैविध्ययोजनत्वे अनन्ता एव लक्षणाः[4] ।

---

१. सर्वत्र 'अत्रोपदिशतीति' इत्येवं पाठः ।

२. व्यङ्ग्यस्य गूढागूढत्वात्प्रत्येकं द्विधा भूत्वा षोडश भेदाः । एषैव सरणिर्विश्वनाथेन साहित्यदर्पणेऽनुसृता ।

३. 'यत्र च' इत्यादर्शपुस्तके पाठः ।

४. अशीतिप्रकारा लक्षणा हि विश्वनाथेन साधिता । अनन्ता इति तु विभागकल्पनस्य परमार्थतोऽसम्भाव्यत्वसूचनम् । तत्र बीजं सम्बन्धवैविध्यप्रयोजनत्वमिति साधूपदर्शितं टीकाकृता ।

(२१) तद्भूर्लाक्षणिकः—

शब्द इति सम्बध्यते । तद्भूस्तदाश्रयः ।

(२२) तत्र व्यापारो व्यञ्जनात्मकः ।

कुत इत्याह—

(२३) यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ॥१४॥

प्रयोजनप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतिपत्तिरपि[१] तु तस्मादेव शब्दात् । न चात्र व्यञ्जनादृतेऽन्यो व्यापारः । तथा हि—

(२४) नाभिधा समयाभावात्—

'गङ्गायां घोष' इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते, न तत्र गङ्गादिशब्दाः सङ्केतिताः ।

एवं लक्षणामुक्त्वा तदुपाधेयमाह—तद्भूः तस्या भूमिः । तदाह वृत्तिकृत्—**तदाश्रय इति** । लाक्षणिकं शब्दं लक्षयतार्थोऽपि लक्षितप्रायः । सम्प्रति व्यञ्जके लक्षणीये तदुपाधौ व्यञ्जनायां विप्रतिपत्तिं निराचष्टे—**तत्रेति** । **'यस्येति'**[२]—प्रयोजनवल्लक्षणावति शब्दे[३] लक्षितिर्लक्षणा गङ्गादिपदेन तटादिप्रत्यायनम् । समुपास्यते विनाऽपि प्रसिद्धिमाकाङ्क्षितनिष्पादकतयाऽऽश्रीयते । शब्दैकगम्ये शब्दबोध्यत्वायोगव्यवच्छेदवति । गङ्गादिपदानुपनीते हि तटादौ नैवंविधातिशयप्रतिलम्भ इत्यन्वयव्यतिरेकाभ्यां तस्मादेवेयं बुद्धिरिति निश्चीयते । न तत्प्रतिपत्तिमन्तरेण तद्बोधने शब्दः पर्याप्त इति तन्मात्रं भावसिद्धम्[४] । वक्ष्यमाणरीत्या तस्या अभिधाऽऽदिरूपतानिरासेनास्माभिर्ध्वनिप्रस्थानस्थितैर्व्यञ्जना नाम्ना व्यवहारः कृतः, तदाह—**व्यञ्जनान्नापरा क्रियेति** । तत्प्रतिपत्तिः प्रयोजनप्रतिपत्तिः । शेषा तु वृत्तिः कारिकाव्याख्यया व्याख्याता ।

तत्र तटादौ, गङ्गादौ तु पावनत्वादीनां भवतु कथञ्चिदभिधेयोपनयनमिति भावः।

---

१. 'प्रतीतिरपी'ति क्वचित् पाठः ।

२. यस्येतीत्यंश आदर्शपुस्तकेऽविद्यमानोऽपि बोधसौकर्यायानन्तरकारिकाऽवतरणिकां साधयितुं पूरितः ।

३. रूढिलक्षणाया अनवकाशात् ।

४. भावसिद्धं स्वभावसिद्धमित्यर्थे ।

(२५) हेत्वभावान्न लक्षणा ॥ १५ ॥

मुख्यार्थबाधादित्रयं हेतुः। तथा च--

(२६) लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो।

न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः ॥१६॥

यथा गङ्गाशब्दः स्रोतसि सबाध इति तटं लक्षयति, यदि तद्वत् तटेऽपि सबाधः स्यात् तत् प्रयोजनं लक्षयेत्। न च तटं मुख्योऽर्थः, नाप्यत्र बाधः, न च

त्रयमिति—मुख्यार्थबाधस्तत्सम्बन्धो रूढिप्रयोजनयोरेकम्। तत्र रूढ्यभावः स्फुटः, प्रयोजनाभावस्तूत्तरत्र प्रपञ्चनीयः। 'तथा चे'ति 'लक्ष्य'मित्यादि कारिकाऽवताराय क्वचित्[१] पाठः। बाधोऽन्वयानुपपत्तिः। फलेन पावनत्वादिना नास्ति तटादेर्योगो वास्तवः ते हि गङ्गादिगता एव प्रतीयन्ते तत्तादात्म्यप्रत्ययबलात्, न तु स्वगतास्तेषां स्वपदप्रतिपादनायोग्यत्वात्। प्रयोजनं प्रकृतादन्यत्र। **स्खलद्गतिरिति**-प्रकारान्तरेण प्रतिपादयितुमशक्येष्वेवार्थेषु शब्दस्य स्खलद्गतित्वादपर्याप्तशक्त्यन्तरत्वात् प्रतीत्यपर्यवसानमूलाया लक्षणाया उज्जीवनमङ्गीक्रियते। पावनत्वादौ तु स्वतोऽविनाभाविनि प्रभवत्येव शक्त्यन्तरम्। अभिधया हि स्रोतोविशेषस्तन्मिलित एव प्रतीयते। यद्येवं, कृतं व्यञ्जनाप्रत्याशयेति चेत्, न तटगततया प्रतीतेरपूर्वत्वात्। किमायातं तर्हि लक्षणापक्षस्येति चेत्, सत्यं, यत्र सर्वथैवाभिधानं प्रसरति तत्रैव तटादौ लक्षणाऽङ्गीकृतिः। पावनताऽऽदेस्तु विशिष्टाकारस्य वाच्यत्वेऽपि स्वरूपमात्रेण सम्भवति कथञ्चिदभिधाया विषयत्वमिति ग्रन्थसङ्गतिः। तदिदमुक्तं वृत्तौ 'नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थ' इति। 'प्रतिपादयितुं समर्थ'[२] इति यदा वृत्तिपाठस्तदैतस्मिन्लक्ष्ये प्रतीते न शब्दः स्खलद्गतिरन्वययोग्यतया निराकाङ्क्षः सन्नत्रैव विश्रान्तः कथं प्रयोजनं लक्षयितुं समर्थः स्यादिति कारिकाऽर्थः। 'प्रतिपादयितु'मिति वृत्तौ च लक्षणयेति शेषः। न च 'नाप्यत्र बाध' इति कारिकाऽवयवेनैकार्थता। अन्वयानुपपत्तिर्बाधोऽन्वयप्रतिपत्त्या निराकाङ्क्षत्वं स्खलद्गतित्वमिति वचोभङ्गिभेदात्। वाच्याभिप्रायेण मुख्यार्थबाध इति ब्रुवाणः

---

१. श्रीधरकृते काव्यप्रकाशविवेकेऽन्यत्र चास्योपोद्बलकस्य स्वीकारः। इत्थञ्चैतद्व्याख्यायते 'यथा मुख्यार्थबाधाऽऽदित्रयं न निमित्ततया सम्भाव्यते तथेदमुच्यत इत्यर्थः'। रुचकमाणिक्यचन्द्रादिभिरतिप्राचीनैष्टीकाकृद्भिर्व्याख्यातत्वादयमंशो मूलग्रन्थान्तर्भूतः प्रक्षिप्तो वेति वक्तुं न सुशकः।

२. प्रश्नपरो 'नापी'ति शब्द इत्युर्वी द्वितीयपाठस्तु न साधीयानिति स्फुटमेव। पूर्वत्र बाधादिकथनमनपेक्ष्येति द्वितीयपाठे।

गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः सम्बन्धः, नापि प्रयोजने लक्ष्ये किञ्चित् प्रयोजनम्, नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः ।

(२७) एवमप्यनवस्था स्याद्या मूलक्षतिकारिणी[1] ।

एवमपि प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेण, तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृदनवस्था भवेत् ।

ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते, गङ्गायास्तटे घोष इत्यतोऽधिकस्यार्थस्य प्रतीतिश्च[2] प्रयोजनमिति विशिष्टे लक्षणा, तत्किं व्यञ्जनयेत्याह—

श्रीधरसान्धिविग्रहिकः[3] सन्धिविग्रहव्यवसायव्यग्रः सम्यग्बुद्धवान् । नेदं मुख्यं नाप्यत्र लक्ष्ये बाध इति हि लाक्षणिकार्थविषय एव कारिकाभाग इत्यलं पलालचर्वणेन । अन्वयबाधो[4] घोषान्वयप्रतीतिशून्यः । तद्वत्स्रोतसीव । तत्तदा । **गङ्गाशब्दार्थस्य** लक्षणया लक्षणीयैस्तत्तयाऽभिमतैः । लक्ष्ये इति 'एतस्मिन्नि'ति कारिकाप्रतीकपूरणम् ।

प्रयोजने लक्ष्ये फलं नास्तीत्युक्त्वा सम्प्रति दुर्दूरूढान्प्रति युक्त्या फलाभावमुपपादयति —**एवमपीति**—प्रयोजनान्तरबोधनाय प्रयोजने लक्ष्य इत्यर्थः ।

नन्वनवस्थाऽपि क्वचिद्बीजाङ्कुरवत्प्रवाहादौ न दोषमावहतीत्याह—**या मूलक्षतिकारिणीति** । लक्षणायां प्रयोजनं प्रतीयमानमेवाङ्गीकार्यं, तस्य तन्मात्रप्रमाणकत्वात् । ततश्चानन्तप्रयोजनधाराप्रतीतावेव पुरुषायुषः परिक्षयः स्यादिति क्वचन निष्प्रयोजना प्रयोजनप्रतीतिरुपास्या, तस्मात्प्रमाणापुरस्कारकल्पितस्य भवदङ्गीकृतस्यैव प्रयोजनस्यैवंविधानर्थमूलस्य परित्यागो न्याय्य इति भावः । प्रयोजनान्तरेण प्रयोजनान्तरमुद्दिश्य । अप्रतीतिरविश्वासः ।

---

१. 'क्षयकारिणी'ति क्वचित् पाठः । २. 'प्रतिपत्तिश्चे'ति क्वचित् पाठः ।

३. एवं श्रीधरसान्धिविग्रहिक आपाततो रुचकमनुसृत्य व्याचचक्षे—'तथाहि तटस्य लक्ष्यस्य बाधे प्रयोजनं लक्ष्यं स्यात् । न च तदभिप्रायेण मुख्यार्थबाधो घटते, न हि तटादिर्मुख्योऽर्थो, लक्षणीयत्वात् ।·········वाच्यार्थाभिप्रायेण मुख्यार्थबाधो लक्ष्याभिप्रायेण स्खलद्गतित्वमिति महानननयोर्भेदः' । वृत्तिग्रन्थस्तु चण्डीदासव्याख्यानानुकूल इव प्रतिभाति । ०प्रदीयव्याख्यानमेतत्स्पष्टयति—'यथा गङ्गाशब्दस्य स्रोतो(?) मुख्योऽर्थः, तत्र च बाधः, तीरे च तत्सम्बन्धः, तीरस्य च लक्षणयोपस्थापनम्·········तद्वदपि तटमपि मुख्यं स्यात्, तत्र च बाधो भवेत्प्रयोजनं च गङ्गादिगतपावनत्वादिविशेषस्य तटेन सम्बन्धः स्यात् तदा गङ्गाशब्दः प्रयोजनं लक्षयति । न चैतदेकमप्यत्रेत्यर्थ' इति ।

४. स्रोतसि सबाधो घोषान्वयप्रतीतिशून्य इति तु स्यात् । असंगतप्राय इवोपरिदर्शितः पाठः प्रतिभाति ।

नन्विति--तादात्म्येन तटप्रत्ययस्तावल्लक्षणासाध्यः। गङ्गातादात्म्यस्य च पावनत्वादिविशेषोदरम्भरित्वं दैवसिद्धमेवेति किमवशिष्यते यत्कृते वृत्त्यन्तराङ्गीकार इति शङ्कार्थः, परिहारार्थस्तु गङ्गातादात्म्यप्रतीतेः[१] कार्य एव तटे पावनत्वशैत्यादिप्रत्ययो, न तु तदर्थे। विशिष्टज्ञानं हि विशेषणविशेष्यज्ञानपूर्वकमेव भवति, न चात्रैवं सम्भवति, विशेषणस्य शैत्यादेः सरिल्लीनतयाऽभिधया स्मारितत्वात्, विशेष्यस्य तटस्य च सर्वथा पूर्वमनुपनीतत्वात्। तर्हि कथमभिधयाऽपि शैत्यादिविशिष्टनिम्नगाप्रत्यायनमिति चेत्, यथासङ्केतितस्यैव स्मृत्युपनीतत्वादिति केचित्।

वस्तुतस्तु सरिद्भेद एव सङ्केतस्मृत्योर्विषयो ग्राह्यो न शैत्यादिः। न हि धर्मिणि सङ्केत्ये संलग्नः सर्व एव गुणादिः सङ्केत्यः। मा मूच्छैत्यादिर्गङ्गापदसङ्केत्यः। तस्माद्धेतुफलयोस्तटफलप्रतीत्योर्भिन्नकालत्वेनाभिन्नव्यापारविषयत्वमसमीचीनमेवेति सर्वथा दुर्वारो लक्षणाऽङ्गीकारः। तदिदं वक्ष्यति–'विशेषाः स्युस्तु लक्षित' इति।

यथाश्रुतं तु ज्ञानस्य विषयव्यतिरिक्तं फलमात्रं विवक्षितं, ज्ञेयगतं वा फलम्? आद्येऽप्यस्ति गोस्वामिगतसन्तोषादिः। अस्तु तर्हि द्वितीयः[२]। तथाहि उपेक्षाबुद्धिव्यतिरिक्तेन ज्ञानेन निर्विकल्पकेन सविकल्पकं जन्यते, तेन च हेयोपादेयताबुद्धिः। तथा च स्वविषये तटादौ हानमुपादानं वेति चेन्न, प्रकृत एव व्यभिचारात्, तत्पक्षेऽपि हि शैत्यादिप्रतीत्या तटादिगतं न किञ्चिज्जन्यते,ऽपि तु गङ्गादिगत एव परितोषादिरित्यसङ्गतिः।

यत्तु श्रीधरसान्धिविग्रहिकः परिहारद्वयं लिखितवान् तदशिक्षितव्यामोहनमात्रम्। तथाहि एकः–प्रयोजनार्थं तावल्लक्षणा समुज्जीव्यते. सा च पदव्यापारः, स च विषयनिष्ठः, तन्मुखेनैव स्वरूपप्रतिलम्भात्। ततश्च लक्षणा न। एवञ्च विषयगर्भाकारादस्याः प्रयोजनमित्युक्ते यादृशी सा तादृश्या एवाखण्डायाः प्रयोजनश्चोद्यं, ततश्च प्रयोजनविषययोः पार्थक्यमर्थादिव्यतिरिक्तविषयस्योक्तरीत्या वृत्तिशरीरान्तर्लीनत्वादिति विषयस्य प्रयोजनं, न तु प्रयोजनं विषयः–इतिस्वरूपः[३]।

---

१. 'प्रतीते कार्यं'···इत्यादर्शपुस्तके पाठः।

२. टीकाग्रन्थोऽत्र त्रुटित इव प्रतिभाति। मुद्रिते प्रदीपे चण्डीदासग्रन्थ एष एवमुद्धृतः– 'ज्ञानस्य विषयातिरिक्तं फलमात्रं वा विवक्षितं, ज्ञेयगतं वा? आद्ये प्रकृतेऽप्यस्ति गोस्वामिगतप्रवृत्तिः। अन्त्ये प्रयोजनज्ञान एव व्यभिचारः। तेन हि गोस्वामिगतसन्तोषमात्रं जन्यते। न तु तद्गतं किञ्चिदिति। तस्माद्धेतुफलयोस्तटप्रतीतिफलप्रतीत्योर्भिन्नकालत्वेनाभिन्नव्यापारविषयत्वमसमीचीनमेवेति व्यञ्जनासिद्धिरित्यत्र तात्पर्यं'मिति।

३. द्वितीयवाक्यपाठस्त्वित्थमुपलभ्यते श्रीधरकृतकाव्यप्रकाशविवेकस्यास्मद्दृष्टे पुस्तके। 'एवञ्च लक्षणायाः प्रयोजनमिति भणितौ यादृशी लक्षणा तादृशं प्रयोजनं वाच्यं, प्रत्येयविषयनिष्ठशब्दव्यापाररूपा च लक्षणा, तस्या गर्भीकृतविषयायाः प्रयोजने विचार्ये कोऽवसरः प्रयोजनस्य, लक्षणाविषयत्वेन गर्भीकृतभङ्ग्या हि विषयस्य प्रयोजनं, न तु प्रयोजनं विषयः··········'' इति। सर्वमेतद्बुचककृतसङ्केतानुवादीति मन्तव्यम्।

(२८) प्रयोजनेन सहितं लक्षणीयं न युज्यते ॥१७॥

कुत इत्याह—

(२९) ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ।

प्रत्यक्षादेर्नीलादिर्विषयः, फलं च[१] प्रकटता संवित्तिर्वा ।

(३०) विशिष्टे लक्षणा नैवम्—

व्याख्यातम् ।

अत्र किं लक्षणात्वं, शब्दव्यापारतद्विषययोर्व्यासज्य वर्तते, व्यापारमात्रे वा, वस्तुतो विषयवति वा ? नाद्यः, सर्वत्र बाह्यत्वात् । द्वितीये तु प्रयोजनस्य विषयत्वे का क्षतिः, गर्भीकारस्यावाङ्मात्रत्वात् ।

अपरस्तु—अत्रान्वयानुपपत्तिमूलाऽन्वयपर्यवसायिनी च लक्षणा । तया च यावद्गङ्गाविन्याऽन्वयो न प्रतीयते तावदेव प्रत्याय्यं, न त्वधिकं तत्स्वरूपमात्रं, तदङ्गं न शैत्यादि इत्यलक्षणीयत्वं तस्य ।—अत्रापि यदि तस्या अधिकप्रसारप्रत्यादेशो न प्रत्यासीदति तदा तत्पर्य्यन्तप्रसारे न विरोधः । नहि धर्मप्रशमार्थमुपात्तः श्रीखणङ-पदलोपो न शीतयति सर्वाङ्गम्, अधिकप्रसारप्रत्यादेशश्चास्माभिरुक्त इति स एव मुख्यः परिहारः ।

यदुक्तं ध्वनिध्वंसे[२] यदेव साध्यं तदेव प्रयोजनम्, अन्यथा सर्वस्य सर्वप्रयोजनताऽऽपत्तेः । ततश्च यद्यत्प्रयोजनं तत्तत्साध्यं, यथा पाकस्यान्ननिष्पत्तिरिति लक्षणोद्देश्या वृत्त्यन्तरबोध्या च । द्वितीये तु दृष्टान्त एव बाधः पाकस्य दहनसंयोगस्य विषयस्तण्डुलद्रोण एव । अन्ननिष्पत्तिस्तत्कार्यमेव ।

'प्रयोजनेन सहितं लक्षणीयं न युज्यते'—एकयैव लक्षणाऽऽख्यया वृत्त्या प्रयोजनाधारस्य तटादेः प्रयोजनस्य शैत्यादेश्च बोधनाङ्गीकारो न युक्तिमारोहतीत्यर्थः । ज्ञानस्य वस्तुपरिच्छेदमात्रपर्यवसाने शैत्यादिविषयकोपेक्षाबुद्धिव्यतिरिक्तस्य[२] । हीति यस्मादेवं तस्मादत्राप्येवं युक्तमिति भावः । प्रकटता ज्ञानज्ञेयत्वनियामकः कश्चनातिशयो ज्ञेये जायते । भट्टदिशा सम्यग् हेयोपादेयतया ज्ञानं संवित्तिः । ज्ञानग्राहकं ज्ञानमनुव्यवसायाख्यमित्येके[१] । लक्षिते लक्षणाविषये तटादौ घोषाद्यधिकरणतया प्रतीतेः । विशेषाः शैत्यत्यपावनत्वादयो घोषस्थस्यानुगुण्येन गोस्वा-

---

१. 'फलं तु' इति वा पाठः ।

२. विस्तरतोऽस्य मतस्योद्धारः श्रीधरेण, तत्कृतप्रकृतविमर्शे भट्टनायकमतखण्डनप्रसङ्गे ध्वन्यालोकलोचने श्रीमद्भिरभिनवगुप्तपादैश्च साधित इति तत्रैवालोकनीयमनुसन्धित्सुभिः ।

२. एवमादर्शपुस्तके पाठः । 'गङ्गायां घोष' इति प्रकृतपूरणम् ।

१. एकत्र पूर्वमीमांसकमतानुमतः सिद्धान्तोऽन्यत्र तार्किककृततर्काविष्कारः ।

(३१)—विशेषाः स्युस्तु लक्षिते ।।१८।।

तटादौ ये विशेषाः पावनत्वादयस्ते चाभिधातात्पर्य-लक्षणाभ्यो व्यापारान्तरेण गम्याः । तच्च व्यञ्जन-ध्वनन-द्योतनादिशब्दवाच्यमवश्यमेषितव्यम् । एवं लक्षणामूलं व्यञ्जकत्वमुक्तम् अभिधामूलं त्वाह—

मिहृदयङ्गमाः स्युः प्रत्याय्या इति शेषः । तात्पर्यस्योपात्तपदार्थसंसर्गमात्रनैयत्येन प्रयोजनाबोधकतया स्पृष्टत्वात्तदप्युपसंहारे योजयति । अभिधाऽऽदिभ्योऽन्तरेण भिन्नेन व्यापारेण गम्या इति वृत्त्यर्थः । ध्वननादीत्यादिशब्देन प्रत्यायनप्रकाशनादिभाषाया अवबोधः । न च स्मृतिव्यापारोऽननुभूतचरत्वात्, नाप्यर्थापत्तिरनुमानं वा, अनुपपत्तिव्याप्तिप्रतिसन्धानाभावात्[1] । तदाह, तच्च व्यञ्जनादिपदवाच्यमवश्यं वेदितव्यमि[2]ति । एवमित्यादिः प्रकरणसङ्गतिः । लक्षणामूलं लक्षणोज्जीवितम् ।

एवमभिधामूलमित्यादि—इह तत्त्वतो गवादिशब्दानामेकैवाभिधाशक्तिः सुरभिक्षितिवागादिविषयेत्येके, तन्न, एकस्य शब्दव्यापारस्य गुणप्राधान्यहानानेकगोचरत्वादर्शनात् । तस्मादेकस्य वर्णसमूहात्मनः पदस्यार्थभेदेन भिन्ना एवाभिधानशक्तयः । तासाञ्च प्रकरणादिना शेषप्रसारणं निषिध्योज्जीवितायां कस्याञ्चिदर्थान्तरस्यार्थे प्रतीतिर्यत्र जायते तत्रार्थान्तरे तावदस्ति कश्चन शब्दव्यापारः । न चासौ सैव प्राचीनाऽभिधा, बाधितत्वाद्विषयान्तरत्वाच्च ।

न च लक्षणा, अन्वयबाधामूलत्वात्, नापि तात्पर्यम्, अभिहितलक्षितसंसर्गमात्रनियतत्वात् । ततश्च द्वितीयमभिधानं पूर्वरुद्धमपि लब्धसहायान्तरं पुनः प्रसृतं, तच्च स्वज्ञानावान्तराङ्ग्यावन्निष्ठव्यापारतया स्वावसरनिरुद्धस्थानवसरप्रसाराद्वा विलक्षणनाम्ना व्यञ्जकत्वं कैश्चि(किञ्चि)दुच्यते, तस्याश्चोद्बोधहेतुः शब्दोऽर्थो वा । तत्राद्यो यथा 'भ्रमि'इत्यादौ[3]। तत्र[4] हि भुजगरूपेण बलाद्विषशब्दस्य गरलेऽपि शक्तिराविष्क्रियते ।

द्वितीयस्तु 'भद्रात्मन' इत्यदौ । तत्र नास्ति कश्चिन्निर्दिष्टस्तद्बोधहेतुः ।[5] यत्र तु प्रकरणादिनियामकं नास्ति तत्रानेकार्थविषयः सन्देह एव 'येन ध्वस्ते'-[6]

---

१. सर्वमेतत्सविस्तरमालोचितं पञ्चमोल्लासे वृत्तिग्रन्थे तदुपजीविते साहित्यदर्पणादौ च ।

२. 'एषितव्य'मिति तु मूले सार्वत्रिकः पाठः ।

३. पञ्चमोल्लासस्य 'भ्रमिमरतिमलसेत्युदाहरणे ।

४. एतद्ध्वन्यालोकलोचनसरणिमनुसरद्भिः (लोचने ९७ पृः) ग्रन्थकृद्भिः पञ्चमोल्लासे वृत्तिग्रन्थे 'अत्र हालाहलं व्यङ्ग्यं भुजगरूपस्य वाच्यस्य सिद्धिकृदि'ति दर्शितम् ।

५. अस्यैवोल्लासस्यान्तिमे श्लोके ।

६. सप्तमोल्लासे 'येन ध्वस्तमनोभवेने'त्यादौ ।

(३२) अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥१९॥

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥

त्यादाविव 'द्वयेषामपि मेदिनीभृता'[१] मित्यादाविवोभययोग्यत्वादुभयाभिधानं वा । 'भ्रमि'मित्यादौ पदान्तरसाचिव्यात्पुनरुज्जीवत्यभिधानं, न तु तथा, 'येने'त्यादौ, तदभावात् । तर्हि कथमर्थावगम इति चेत्, नास्त्येवेति वदन्तोऽनुभूत्यैव भगवत्या गलहस्तिताः, दुर्व्याख्यातृत्वव्यपदेशपरम्परयेति जल्पन्तस्तूभयत्र प्रतीत्यविशेषाद्-व्याख्याविशेषविनिगमनाभावान्निरस्ताः । व्यञ्जनाख्यं व्यापारान्तरमेवेति पश्यन्त-स्तद्वदेव 'भ्रमि'मित्यादावपि पुण्याहलग्ने स्वस्ति वाचयितव्याः । तत्रास्त्युज्जीवकं शब्दान्तरमिति चेत्, भ्रातः; क्व पुनर्मृताया उज्जीवनं, कथन्तर्हि लक्षणायाः पूर्वापर्यवसितत्वात् पर्याजीवनमिति चेत्, तत्रापि तदेव तात्पर्यमुज्जीवतीति कस्ते परमविश्वस्तः कथितवान् ? अस्तु वा तत्र तथैव मभिधायाः पुनरेकत्र प्रयोगेणोज्जीवनाविर्भावः क्वचनापि दृष्टचरः, कथन्तर्हि द्वितीयाभिधा विषयेष्वेवंविधस्थलेषु व्यञ्जनं प्रसरतीति चेत्, सत्यं, यत्र तत्प्रसरोऽति-प्रसङ्गभीत्या तामभिधां सम्बन्धभूतामाश्रित्य व्यञ्जनमङ्गीक्रियत इत्येकं दर्शनम्, अन्यत्त्वमनेकार्थत्वमिति रीत्याऽर्थभेदेन शब्दभेद एव । ऐक्यभ्रमस्तु साजात्यमात्रकृतः।

कथन्तर्हि शब्दशक्तिमूलध्वनिगुणीभूतव्यङ्ग्योर्द्वितीयार्थप्रतीतिः । आवृत्त्येति चेन्न, सकृदेवोदाहरणात्, शब्दस्वरूपविपर्यासे निमित्ताभावाच्च । प्रतिप्रसूत्या शब्दान्तर-कल्पनमिति चेत्, न, श्रूयमाणस्य तस्याभावात्, अन्यवाचकादन्यवाचकोत्पत्तिनै-यत्या[२]भावदर्शनाच्च । तस्मात्तस्यैव शब्दस्य प्रथमप्रतीतार्थवाचकस्य धर्मिकल्पनातो धर्मकल्पनं वरमिति नीत्या द्वितीयेऽर्थेऽपरा शक्तिरङ्गीक्रियते । सा च श्रीमदानन्द-वर्धनाचार्यदर्शने व्यञ्जनमित्युच्यते[३] । असम्बन्धात् कथं तत्र शक्तिरिति चेन्न, शक्तेरेव तत्त्वात् । तत्रापि नियामकं मृग्यमिति चेत्, सत्यं मृग्यम्, किन्तु स्वरूपमेव वाच्यवाचकयोरिव तद्भावे नियामकं, तद्विरहे तु 'येन ध्वस्ते'त्यादौ 'श्वेतो धावती'-त्यादाविव शब्दस्वरूपानिश्चयादर्थेऽप्यनिश्चयः । कथं पुनरेवंविधानां काव्यानां न दुष्टत्वं, स्वरूपमाहात्म्येन रसस्यापकर्षविरहादित्येव वरम्[४] ।

१. शिशुपालवधे (१२।१३) ।

२. 'उत्पत्त्यनैयत्याभावे'ति 'क' पाठः ।

३. 'सत्काव्यतत्त्वविषयं स्फुरितप्रसुप्तकल्पनं मनःसु परिपक्वधियां यदासीत् । तद्व्याकरोत्सहृदयोदयलाभहेतुरानन्दवर्धन इति प्रथिताभिधानः ॥' इति तत्प्रतिज्ञाप्रसिद्ध्यनुसाराच्छ्री-मदानन्दवर्धनाचार्यदर्शन इत्युक्तम् ।

४. विरहादित्यपरं 'क' पाठः । पाठद्वयमपि न सम्यक् ।

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः[1] ॥" इत्युक्तदिशा
'सशङ्खचक्रो हरिः' 'अशङ्खचक्रो हरि' रित्युच्यते' ।

'रामलक्ष्मणा'विति दाशरथी । 'रामार्जुनगतिस्तयो' रिति भार्गवकार्त्त-वीर्ययोः । 'स्थाणुम्भज भवच्छिदे' इति हरे । 'सर्वं जानाति देव'इति युष्मदर्थे ।

अत्राद्येऽनेकार्थस्यानेकाभिधेयस्य द्वितीये साजात्यादन्यवाचकैक्यभ्रमभाजो वाचकत्वे नियन्त्रिते एकत्राभिधाऽन्तरनियमान्निश्चितप्रसरेऽन्यत्र वाचकस्वरूपनिश्च-यान्निश्चितस्वरूपे, एकाभिधावादे तु नियन्त्रिते एकद्रव्यस्थापिते । अर्थान्तरव्यङ्ग्यता त्वत्र स्फुटा । एवं विरततया तस्या नियामकविरहस्थले तु निश्चयाभावाद् गौणाय-मानत्वम् । द्वयोरर्थयोः संयोगाद्यैर्नियन्त्रित इति सम्बन्धः । संयोगसाहचर्य्यविरो-धिताऽत्यन्तप्रसिद्धा एव व्यवच्छेदकृतः । विप्रयोगोऽपि प्रसिद्धयोगसमानाधिकरणो निमित्तविशेषात्कदाचिद्विरहः । अर्थः फलम् । प्रकरणं बुद्धिसान्निध्यम् । लिङ्गं परपक्षव्यावृत्तो धर्मः । अन्यस्याव्यभिचारिण इति शेषः । सन्निधिः सामानाधि-करण्यम् । सामर्थ्यं तत्करणनियमः । औचिती योग्यतातिरस्कारविरहः । देशकालौ तद्विशेषौ । व्यक्तिस्तद्गतपुंस्त्वादिः । स्वरा वैदिका उदात्तादयः, लौकिकाश्च काकुविशेषाः । अनवच्छेदेऽनिर्णये विशेषस्मृतिरूपं योग्याभिधानम्[2] । दिशा मार्गेण ।

अशङ्खचक्र इति प्रतिषेधस्य प्रसङ्गपूर्वकतया सर्वथा तद्विरम्य युक्तत्वात्ता-द्व्यवच्छेदकता । अच्युत इत्यादौ हरिरित्यादिपदं सर्वथा नियमितमिति शेषः । रामलक्षणावित्युभयाप्रसिद्धौ, अन्यथा संयोगोदाहृतित्वप्रसङ्गादिति न युक्तमुक्तम् । उभयत्रासिद्धौ न संयोगो नियामक इति प्रमाणाभावात् संयोगसाहचर्य्यं तु भिन्ने एव ज्ञेयाः कयोश्चित्प्रकृतयोः--इतश्च वध्यघातकोदाहृतिः । सहानवस्थाने तु छागाऽऽतपाविति । अत्रातपसान्निध्याच्छायापदं दिनकृद्भार्यादिर्व्यावर्त्तते[3] । स्थाणु-पदस्य शङ्करवाचकत्वे भवच्छेदार्थेनान्वयो न घटते । युष्मदिति प्रकृतराजादिपरम् । काम इति कोपस्य मकराकारे ध्वजेऽसम्भावनादित्यर्थः । वसन्त इति तस्यैव तत्करणनियमात् । साम्मुख्य इति–अन्यथाऽनाथकातरत्राणयोग्यतातिरस्कारात् । अत्रेति षष्ठ्यर्थे । रवाविति–दिने वह्नेर्दीप्तिसङ्कोचेनासंयोगात् । वर्त्तमाननिर्देशस्य[4] तत्कालपरत्वादिति भावः । वह्नाविति नक्तं रवेरभावात् । इन्द्रेति—षष्ठीतत्पुरुष-

---

१. 'तत्र हेतव' इत्यंश आदर्शपुस्तके प्रमादपतितः स्यात् ।

२. 'उच्यत' इत्यमनोज्ञः प्रकरणासमञ्जससम्बन्धश्च पाठः कुत्रचिन्मुद्रितपुस्तक उपलभ्यते ।

३. वध्यघातकसहानवस्थानलक्षणावुभावेव विरोधस्य भेदौ प्रामाणिकैरङ्गीकृताविति मूल-ग्रन्थोपरि एष टीकाकृदुपस्कारः ।

४. 'भाती'ति लट्प्रयोगसूचितस्येति शेषः ।

'कुपितो मकरध्वज'इति कामे। 'देवस्य पुराराते'रिति शम्भौ। 'मधुना मत्तः कोकिल' इति वसन्ते। 'पातु वो दयितामुख' मिति सांमुख्ये। 'भात्यत्र परमेश्वर' इति राजधानीरुपाद्देशाद्राजनि। 'चित्रभानुर्विभाती'नि दिने रवौ, रात्रौ वह्नौ। 'मित्रं भाती'ति सुहृदि। 'मित्रो भाती'ति रवौ। इन्द्रशत्रुरित्यादौ वेद एव न काव्ये स्वरो विशेषप्रतीतिकृत्। आदिग्रहणात्—

एद्दहमेत्तत्थणिआ एद्दहमेत्तेहिं अच्छिवत्तेहिं।
एद्दहमेत्तावत्था एद्दहमेकेहिं दिअएहिं॥ ११॥
(एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम्।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः॥
इति संस्कृतम्)

समासेऽन्तोदात्तसूचितो दैत्यादिर्वाच्य इन्द्रस्य शमयिता शातयिता वेति। स्वर उदात्तादिः काव्ये विशेषप्रतीतिकृन्न भवति, काकुविशेषस्तु भवत्येवेति भावः। वेद[१] एवेति वदता बहुलप्रयोगो नास्त्युदात्तादेः, क्वाचित्कस्तु विद्यत एवेत्यभिप्रेतम्—यदाह पाठ्यगणे मुनिः[२]–'हास्यशृङ्गारयोः स्वरितोदात्तं, वीररौद्राद्भुतेषूदातस्वरितं, करुणबीभत्सभयानकेष्वनुदात्तस्वरितकम्पितमुपपादये'दिति रसविशेषप्रतीतावुदात्ताद्युपयोगः। एद्दहेति—परिमाणे दह-प्रत्ययः। अक्ष्णोः पत्ररूपत्वेन पद्मादिपत्रवत्किञ्चित्कुटिलविस्तृतदीर्घत्वमभिप्रेतम्। अभिमुखमिव नीयतेऽर्थोऽनेनेत्यभिनय आङ्गिकादिः। अत्र सन्निहितविततताङ्गुलीकरपल्लवद्वययोस्तिर्यक्-

---

१. वेद एवेत्येके टीकाकृतः पठन्ति। चण्डीदासानुसारिणो विश्वनाथस्याप्यत्र स एव पाठोऽभिमतः। 'काव्यमार्गे स्वरो न गण्यत, इत्युत्तरग्रन्थस्वारस्यादिति तदभिप्रायमूलत्वप्रकटनम्। श्रीधरचण्डीदासगोविन्दठक्कुरप्रभृतयस्तु नैव मन्यते। यत्तु स्वरशब्देनोदात्तादिकं विवक्षितमिति प्रदीपग्रन्थे मतान्तरोपन्यसनं तदपि भरतादिमतानालोचनविजृम्भितत्वादनादेयम्। चण्डीदासव्याख्यानमेतदुद्दिष्टमेवं इत्यलमुपजीव्यानां मान्यानां व्याख्यानेषु कटाक्षनिक्षेपेणे'ति सन्दर्भे साहित्यदर्पणस्य द्वितीयपरिच्छेदस्थेऽभिधामूलव्यजनोद्देशप्रस्तावे, न तु रुचकमतं यथा केचिदधुनातनास्तर्कयन्ति(P.V. Kane. *SahityadoraPana* chap. II Notes), रुचककृतव्याख्याने मतस्यास्यादर्शनाच्चण्डीदासस्यैव पूर्वतरसगोत्रत्वेन मान्यताव्यपदेशसामर्थ्यात्। चण्डीदासानुजीविनो दर्पणकृत इति तु प्रतिपदं प्रकटम्।

२. नाट्यशास्त्रे २७शाध्याये (काव्यमाला सं० १८७ पृ०-मुद्रितपुस्तकपाठस्तु किंचिद्भिन्नः। काशीमुद्रितपुस्तकपाठोऽपि न सम्यक् तदनुगामी।

इत्यादावभिनयादयः । इत्थं संयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽप्यनेकार्थस्य शब्दस्य यत्क्वचिदर्थान्तरप्रतिपादनं तत्र नाभिधा, नियमनात्तस्याः । न च लक्षणा, मुख्यार्थबाधाद्यभावाद्—अपि त्वञ्जनं व्यञ्जनमेव व्यापारः । यथा—

भद्रात्मनो दुरधिरोहतनोर्विशाल—
वंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य ।
यस्यानुपप्लवगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत् ॥ १२ ॥

(३३) तद्युक्तो व्यञ्जकः शब्दः—

तद्युक्तो व्यञ्जनयुक्तः ।

(३४)—यत्सोऽर्थान्तरयुक् तथा ।

प्रसारणे, स्तनयोः सङ्कुचिताग्रोत्तानितकरेण नयनयोस्तिर्यग्वलनेन ऊर्द्ध्वतर्जन्या सम्मुखीनविरहिणीदेहदौर्वल्यादौ प्रसारिताङ्गुलीपर्वगणनया, दिवससंख्यायां विवक्षितविशेषः सर्वनाम्नः प्रतिपाद्यते निश्चीयते । आदिना 'इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षय'[१] मित्यादावात्मनि निर्देशादयः । निवारित इति पूर्वमनुसृत्य व्याख्येयम् ।

भद्रात्मा शोभनो गजजातिश्च । अधिरोह आरोहणमवकलनञ्च । विशालता दैर्घ्यं बाहुल्यप्रसिद्धी च । वंशो वेणुः, पृष्ठवंशो दण्डो वाऽन्ववायश्च । शिलीमुखौ बाणभ्रमरौ । संग्रहः संसर्गोऽभ्यासदार्ढ्यञ्च । उपप्लुतिरसौन्दर्य-गमने,ऽव्याहतप्रसरता नृपपक्षे । परवारणः शत्रुदर्पदलनः, प्रशस्तहस्ती [च । दानं] शास्त्रविधिना द्विजेभ्यः स्वधनार्पणं, गजमदश्च । करो हस्तः शुण्डारश्च ।

अत्र प्रकरणबलाद्राजानुगुणा एवार्था वाच्याः, गजानुगुणास्तूक्तरीत्या व्यङ्ग्या एव । प्रतीते चार्थद्वये सादृश्यसम्भवेनोपमानोपमेयभावः प्रतीयते । प्राधान्येन व्यञ्जनान्तरमहिम्नेत्युपमाध्वनिरयं, शब्दशक्तेरुद्भटतया तद्व्यपदेशो न्याय्यः ।

एवं व्यञ्जनमुक्त्वा तदुपाधेयं लक्षयति—तदिति । व्यञ्जकोऽर्थः किमिति न लक्षित इत्याह—यदिति । सोऽनेकार्थः । व्यङ्ग्यापेक्षयाऽर्थान्तरं वाच्यम् । तत्र शब्दे । सहकारितयेति—अलङ्कारस्तावदुभयगततया तत्प्रतीतिप्रत्याय्यः । व्यङ्ग्या-

---

१. कुमारसम्भवे (२।५५)

अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः ॥ १९ ॥

तथेति व्यञ्जकः ।

इति श्रीकाव्यप्रकाशे शब्दनिर्णयो नाम

द्वितीय उल्लासः ।

र्थस्वरूपमात्रप्रतीतेरपि वाच्यं प्रत्ययोत्तरकालनैयत्येनाप्रतिक्षेपात्[१] कार्यता, केवलं शब्दशक्तिरुद्भूढाऽर्थशक्तिस्तु तामेवानुप्राणयतीति नार्थशक्तिमूलव्यवहारः ।

एतेन स्वलक्षणस्य व्यञ्जकत्वेनोपाधेः साम्येन शब्दलक्षणेनैवार्थो लक्षितप्राय इति न पृथग्लक्षणमिति सूचितम् ।

इति काव्यप्रकाशदीपिकायां द्वितीय उल्लासः ॥

---

१. प्रतिक्षेपो व्यभिचारः । नैयत्येन प्रतिक्षेप्याद् 'क' पाठः

अथ तृतीय उल्लासः

(३५) अर्थाः प्रोक्ता पुरा तेषाम्—

अर्था वाच्य-लक्ष्य-व्यङ्ग्याः । तेषां वाचक-लाक्षणिक-व्यञ्जकानाम् ।

(३६)—अर्थ-[1]व्यञ्जकतोच्यते ।

कीदृशीत्याह—

(३७) वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ॥२१॥

प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम् ।

योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥२२॥

एतावता प्रबन्धेन शब्दस्य व्यञ्जनाख्यमधिकं व्यापारं निर्विवादीकृत्य 'सर्वेषां प्रायश[2]' इत्यादिना सूचितमर्थस्य मुख्यतो व्यञ्जकत्वं निर्विवादीकर्त्तु-मर्थान्तर[3]-मारभते । तत्र च प्रथममाश्रयानुवादः-अर्थाः प्रोक्ता इति । पुरेति 'वाच्यादयस्तदर्थाः स्यु'-[4]रित्यनेनेत्यर्थः । तदेवाह वृत्तिकृत्-वाच्येति । अर्थस्य व्यञ्जकता प्रधानभूता । उच्यते-विप्रतिपत्तिनिरासायावृत्यत इत्यर्थः । अतएवोत्तर-कारिकाभागे वृत्तिकृता कीदृशीत्युक्तम् । उक्तैव पूर्वं व्यञ्जना, सम्प्रति कं विशेष-मभिसन्धाय पुनरुच्यत इत्यर्थः । अथ व्यञ्जकतेति पाठे तेषामर्थानामिति शेषः ।

वाक्यं वाच्यसहितोऽन्यसन्निधिरिति मध्यपदलोपी समासः । वैशिष्ठ्याद्वै-लक्षण्यादिति प्रत्येकं पूर्वषष्ट्यन्तपदेऽन्वीयते । तदनन्तरमुज्जीवित इति शेषः । प्रतिभाजुषामिति—नवनवोल्लेखबुद्धिशालिनाम्[5] । स्थूलबुद्धीनान्तु प्रायेणालक्ष्य एवायमर्थ इति भावः । अन्यार्थेति—स्वार्थे प्रत्यये पुनरभिधाऽऽदय एव भवन्तु

---

१. एवं टीकाकृन्मतः पाठः । 'अथ व्यञ्जकते'ति प्रायिकः पाठः ।

२. मूलग्रन्थे द्वितीयोल्लासे सप्तमकारिकायाः प्रथमार्धे ।

३. अर्थान्तरभिधेयान्तरम् उल्लासान्तरमिति यावत् ।

४. द्वितीयोल्लासे षष्ठकारिकाया उत्तरार्धे ।

५. एवंविधाः प्रतिभाजुषो विदग्धाः सहृदया इति वा व्यपदिश्यन्ते । इतरे तु व्याकरणकोष-ज्ञानमात्राश्रयाः काष्ठलोष्ठसमाः काव्यास्वादसुखवञ्चिता इति विदुषां दर्शनम् ।

बोद्धव्यः प्रतिपाद्यः। काकुर्ध्वनेर्विकारः। प्रस्तावः प्रकरणम्। अर्थस्य वाच्य-लक्ष्य-व्यङ्ग्यात्मनः। क्रमेणोदाहरणानि—

अइपिहुलं जलकुंभं घेत्तूण समागदह्मि सहि तुरिअम्।
समसेअसलिलणीसासणीसहा वीसमामि खणम्॥१३॥
(अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि त्वरितम्।
श्रमस्वेदसलिलनिःश्वासनिःसहा विश्रम्यामि क्षणम्॥
इति संस्कृतम्)

व्यापारा इति भावः। व्यक्तिरेवेति—वाक्यार्थपश्चाद्भावेनाभिधाऽऽदिशब्दव्यापारनिरासात् व्याप्त्यादिप्रतिसन्धानविरहेणानुमित्यादिप्रतिक्षेपाच्चेत्यर्थः। यं प्रति प्रतिपाद्यते स प्रतिपाद्यः। ध्वनेर्विकार इति—तदुक्तं, 'भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते'[१]। सा च तत्तत् सहकारिभेदात्स्वरूपभेदाच्च स्वयमाकरेषु ज्ञेया। वाच्यलक्ष्यव्यङ्ग्यात्मन इति यथायोगमुदाहृतिषु बोध्यम्। जलपूर्णकुम्भोजलकुम्भः। श्रमार्जिताभ्यां स्वेदसलिलनिःश्वासाभ्यां निःसहा निरुद्यमा। इयञ्चैकाकिन्या नदीं गताया अप्यस्याः कुतोऽयमेतादृशः श्रम इति तर्कयन्तीं प्रतिवेशिनीं प्रत्युक्तिः। अत्र जलकुम्भवहनादेवायं श्रमो, नान्यथा शङ्क्ष्ठा इति वक्त्रभिप्रायरूपोऽर्थः प्रकाशते। स्वभावादेव तेष्वेवाभिधाऽऽदिव्यापारेष्ववच्छिद्यान्यैव तत्र प्रबला शक्तिः। न चासावनुमा। कस्य हि प्रतीतिरानुमानिकीं, प्रतिवेशिन्याः, सन्निहितानां वा, काव्यर्थभावनादुपजायमानप्रकृतीनां सहृदयानां वा? तत्राद्ययोर्वार्त्तैवेति सन्तोष्टव्यं, तृतीये[२] तु न व्याप्त्याद्यनुसन्दध्महे मांसचक्षुषः।

किञ्चैवंविधवाक्यार्थस्य पारमार्थिकत्वानैयत्येन सन्दिग्धस्वरूपो हेतुः। भवतु तर्हि अनुमानाभास इति पण्डितम्मन्यः काञ्चन खण्डानुमितिमुपकल्प्य वाक्यार्थप्रत्यक्षादिबोधेष्वपि तत्प्रसञ्जनं शक्यमिति सुग्रहे एव व्याप्तिपक्षधर्मत्व इति ब्रुवाणो व्याप्तिनिश्चयस्थलमन्वेषयितव्य इति पारिशेष्यादर्थस्य ध्वनिशक्तिसिद्धिः[३]। एता एव युक्तय उदाहरणान्तरेष्वपि यदृच्छया सञ्चरन्ति भगवत्यः।

---

१. एषा प्राचीनानां विवरणपरा कारिका। भारतीयनाटयशास्त्रादौ मूलग्रन्थेऽभिनयलक्षणे भावप्रकाशनाद्यर्वाचीननिबन्धे चास्य विस्तरेणालोचनम्। 'संयोगो विप्रयोगश्चे' त्यादिहरिकारिकाऽनुशीलनवेलायां काक्वादीनां स्वराणां काव्यसामान्योपयोगित्वं टीकाकृद्भिर्दर्शितम्।

२. 'वास्तवे'ति 'क' पाठः।

३. अयं हि ध्वनिध्वंसार्थं साटोपमायसतां न्यायैकदेशिनां कुतार्किकाणां व्यक्तिविवेककारप्रभृतीनां सूक्ष्मतो मतपरामर्शः। विस्तरस्तु मूलग्रन्थे पञ्चमोल्लासेऽनुशीलितः। एवमपि दर्पणे पञ्चमपरिच्छेदे व्यक्तिविवेककारमतखण्डनम्।

अत्र चौर्यरतगोपनं गम्यते ।

ओण्णिद्दं दोब्बल्लं चिन्ता अलसत्तणं सणीससिअम् ।
मह मन्दभाइणीए केरं सहि तुवहि अहह परिहवइ ॥१४॥

(औन्निद्रयं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम् ।
मम मन्दभागिन्याः कृते सखि त्वामपि अहह परिभवति ॥
इति संस्कृतम्)

अत्र दूत्यास्तत्कामुकोपभोगो व्यज्यते ।

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥१५॥

मह केरं मदीयम् । तुह त्वामित्यर्थे षष्ठी, परिभवतीत्यस्य हिंसार्थत्वात्[१] । तुह वि अहह इति पाठो न, हेति मध्ये वृत्तहानिदोषादित्येके, तन्न, गाथाभङ्गेऽपि वृत्तान्तराभङ्गात्[२] । किन्तु प्रचुरपुस्तकादृष्टत्वादश्रव्यप्रायत्वाच्च अहह इति पाठानङ्गीकारः । अत्र मदीयमौन्निद्रयादि त्वां परिभवतीत्यन्वयानुपपत्त्या मत्सदृशमौन्निद्रयादि लक्ष्यते । तेन तदतिशय एव व्यज्यते । स चाभिव्यक्तः स्वकारणीभूते तस्मिन्नेव वञ्चकप्रकृतावनुरागातिरेकात् प्रणयखण्डनशङ्कामापूरयति । तदाह–तत्कामुकोपभोग इति, रागदार्ढ्यहेतुतया प्रणयभङ्गभयादिति शेषः ।

तथाभूतामिति–दृष्ट्वेत्यादौ प्रत्येकं योज्यम् । अनुचितस्य कर्मण आरम्भेण करणेन निभृतं गुप्तं यथा स्यात्तथा । खिद्यतेऽनेनेति खेदो मात्सर्यम् । खिन्ने ग्लाने । अत्रार्थे तु मयि खेदं भजतीति सोपहासोत्प्रासकाक्वाऽत्यन्तानौचित्यध्वनम् । तदाह–अत्रेति । वाच्यसिद्धयङ्गमिति । सिद्धिः परिपाकः शोभानिष्पत्तिरिति यावत् । प्रश्नेत्यादेरयं भावः–कुरुषु न भजतीति काकुः । ततश्च प्रश्नरूपः किमर्थमहमाक्षिप्त इति तस्यैव गुणीभावो न्याय्यः सर्वथा, अतएव गुणीभूतव्यङ्ग्यविभागे काक्वाक्षिप्त-

---

१. जासिनिप्रहनेत्यादिसूत्रातिदेशेनेति यावत् । अभियुक्तास्तु प्राकृतेऽत्र षष्ठीप्रयोगो द्वितीयास्थाने इति निर्दिशन्ति ।

२. गाथायां सूत्रकृतां पिङ्गलादीनां मतेन पूर्वार्धस्योत्तरार्धानुयायित्वव्यवस्थायामभिधानम् । यदत्र टीकाकृतामेतन्मतोपरि आक्षेप उदासीनतया तन्मतपाठाङ्गीकारश्च तत् टीकाकृत्सुलभपूर्वाचार्यमतखण्डननिर्बन्धमाविष्कृत्य कृतमित्येव सन्तोष्टव्यम् । वस्तुतस्तु प्रचुरगाथासाहचर्येण गाथाप्रसिद्धभावप्रपञ्चनेन च गाथैवेयमिति नास्ति सन्देहलेशावकाशः ।

अत्र मयि न योग्यः खेदः, कुरुषु तु योग्य इति काक्वा प्रकाश्यते। न च वाच्यसिद्धयङ्गमत्र काकुरिति गुणीभूतव्यङ्ग्यत्वं शङ्क्यं, प्रश्नमात्रेणापि काकोर्विश्रान्तेः।

तइआ मह गण्डत्थलणिमिअं दिट्ठिं ण णेसि अण्णत्तो।
एण्हिं सच्चेअ अहं ते अ कवोला ण सा दिट्ठी॥१६॥

(तदा मम गण्डस्थलनिमग्नां दृष्टिं नानैषीरन्यत्र।
इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः॥
इति संस्कृतम्)

अत्र मत्सखीं कपोलप्रतिबिम्बितां पश्यतस्ते दृष्टिरन्यैवाभूत्, चलितायान्तु तस्यामन्यैव जातेत्यहो प्रच्छन्नकामुकत्वं ते इति व्यज्यते।

उद्देश्योऽयं सरसकदलीश्रेणिशोभाऽतिशायी
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः।
किञ्चैतस्मिन् सुरतसुहृदस्तन्वि! ते वान्ति वाता
येषामग्रे सरति कलिताकाण्डकोपो मनोभूः॥१७॥

अत्र रतार्थं प्रविशेति व्यग्ङ्यम्।

णोल्लेइ अणोल्लमणा[1] अत्ता मं घरभरम्मि सअलम्मि।
खणमेत्तं जइ संझाइ होइ ण व होइ वीसामो॥१८॥

मित्याक्षिप्तपदप्रयोगः। उक्तस्य व्यङ्ग्यस्य क्रोधप्रकर्षाविद्धतया वाच्यपोषकत्वं नास्ति, अपितु तत्पोष्यत्वमेव। अपिरेवार्थे[2]। यद्यपि गुणीभावेऽपि न प्रकृतक्षतिस्तथापि प्रसङ्गादयं विषयविवेकः। तइआ तदा। णिम्मग्गां निर्मग्नाम्[3]। एण्हिं इति विच्छित्तिकृतेन वाक्यमाहात्म्येन मुख्यतोऽर्थशक्तिरुद्भाव्यते, ततोऽन्यत्रापि किञ्चिद्वाक्यवैशिष्ट्यसम्भवे न काचित्क्षतिः।

उद्देश इति— अयमिति प्रत्यक्षोत्कर्षनिर्देशः। कुञ्जानामुत्कर्षो मत्तमधुकरनिकरम्बकरम्बितकुसुमसमृद्ध्यादिः। सुरतमुहृदः तत्कृतश्रमघर्मादिमार्जनेन सुरत-

---

१. 'अणद्दमणा' इति पाठान्तरम्।

२. अपिरेवार्थे—परं नात्र निर्बन्ध उचितः। विषयविवेक इति—विषयविवेके प्रदीपकृतां विवरणमुपयोगीति तत एव जिज्ञासुभिराकलनीय आशयः।

३. 'णिमिता'मिति तु सार्वत्रिकः पाठः। यद्यप्यत्र नार्थतो वैलक्षण्यं तथापि 'णिमग्गा'मिति पाठः कष्टकल्पनाऽऽश्रयविरहात् वरम्। किन्त्वस्मिन् पक्षे वृत्तहानिनिवारणाय 'मह' इति पदस्याश्रवणम्। चण्डीदासदीपिकायां गाथानां सामग्र्यतश्छायाया अदर्शनात् किं तावत्तस्य साधारणसम्मतपाठत्यागे तात्पर्यमिति न स्फुटमवगम्यते।

(नुदत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले ।
क्षणमात्रं यदि संध्यायां भवति न वा भवति विश्रामः ॥
इति संस्कृतम्)

अत्र सन्ध्या सङ्केतकाल इति तटस्थं प्रति कयाचिद् द्योत्यते ।

सुव्वइ समागमिस्सदि तुज्झ पिओ अज्ज पहरमेत्तेण ।
एमेअ कित्ति चिट्ठसि ता सहि सज्जेसु करणिज्जम् ॥१९॥

(श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण ।
एवमेव किमिति तिष्ठसि तत् सखि सज्जय करणीयम् ॥
इति संस्कृतम्)

अत्रोपपतिं प्रत्यभिसर्तुं प्रस्तुता न युक्तमिति कयाचिन्निवार्यते ।

रागदार्ढ्यदायिनः, ते ताद्रूप्यप्रसिद्धाः । अकाण्डकोपः आकस्मिकक्रोधः[१] । अत्रोक्तगत्या प्रतिपदं वाच्यस्य वैशिष्ट्यं मुख्यव्यङ्ग्यानुगुणव्यङ्ग्यान्तरमैत्रीलक्षणं, तत्सहकृतेन च वाक्यार्थेन वक्तुरभिप्रायकलनम् ।

णोल्लेइ नियुङ्क्ते[२] । अणद्दमणा[३] अनार्द्रमनाः । अता श्वश्रूः । 'सञ्जाइ होइ ण व होइ' इति पाठः, ननु संञ्जाइ होइ इत्यवणतरं 'णवरे' त्यधिकं, वृत्तभङ्गप्रसङ्गादित्येके । तच्च न, गाथातो भिन्नवृत्तत्वात्, किन्तर्हि बहुपुस्तकादृष्टत्वादश्रव्यप्रायत्वाच्च वरं पाठानङ्गीकरणम्[४] । तटस्थो निकटस्थः प्रसिद्धपूर्वप्रणयः, न तूदासीनः, तत्र रहःसूत्रणोपयोगाभावात् । अत्र चान्यस्योक्तरूपस्य सन्निधिः प्रकरणावसेयः ।

सुव्वइ श्रूयते । तुज्झ पिओ इति सोल्लुण्ठमभिधानं सख्याम्, अन्येषु तु रहःसङ्गोपनम् । एमेए एवमेव तदनुपयोगिसम्भारव्यग्रिम्ना । अत्र पूर्वं विदितरहस्याऽप्यभिसारोपकरणसम्भारं न निषेधयति, प्रत्युतान्यत्रास्यमाधत्ते, सम्प्रति तु कुतश्चित् प्रतीतगृहपतिसत्वरागमना तत्सज्जीकरणं विद्वेष्टीति प्रस्ताववैशिष्ट्यम् ।

---

१. श्रीधरकृते० विवेकं उद्देश–कुञ्जोत्कर्ष–नर्मदा–सुरत–तन्विवान्त्यादिपदानां प्रत्येकमभिप्रायप्रकटनम् । तथाचैतैरेवालम्बनोद्दीपनविभावानां प्राचुर्यस्थित्याऽत्रासंलक्ष्यक्रमव्यङ्ग्यरूपाकूतध्वननमपीति तात्पर्यम् ।

२. नुदतीति छाया, नियुङ्क्ते प्रेरयतीति तु विवरणम् ।

३. अमुह्यणमणां इत्यसंलग्नः पाठ आदर्शपुस्तके ।

४. अत्र 'ण वे'ति साधारणसम्मतः पाठः । ण वरेति पाठे आर्याप्रस्तारस्थितस्य कस्यापि वृत्तस्य नानुरूप्यं, परं सर्वेषामेव विषमवृत्तानां तत्र स्थितानां गाथामध्ये परिगणनस्य सम्मतत्वात् कथमपि वृत्तभङ्गदोषो निवार्यः ।

अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः ।
नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः ।।

अत्र विविक्तोऽयं देश इति प्रच्छन्नकामुकस्त्वयाऽभिसार्यतामित्याश्वस्तां प्रति कयाचिन्निवेद्यते ।

गुरुअणपरवस पिअ किं भणामि तुह मंदभाइणी अहकं ।
अज्ज पवास वच्चासि वच्च सअं जेव्व सुणासि करणिज्जम् ।। २१ ।।

(गुरुजनपरवश प्रिय किं भणामि तव मन्दभागिनी अहकम् ।
अद्य प्रवासं व्रजसि व्रज स्वयमेव श्रोष्यसि करणीयम् ।।
इति संस्कृतम्)

अत्राद्य मधुसमये यदि व्रजसि तदाऽहं तावद् न भवामि, तव तु न जानामि गतिमिति व्यज्यते ।

आदिग्रहणाच्चेष्टाऽऽदेः । तत्र चेष्टाया यथा—

द्वारोपान्तनिरन्तरे मयि तया सौन्दर्य्यसारश्रिया
प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम् ।
आनीतं पुरतः शिरोंऽशुकमधः क्षिप्ते चले लोचने
वाचस्तत्र निवारितं प्रसरणं सङ्कोचिते दोर्लते ।। २२ ।।

अन्यत्रेति —अस्मीत्यहमर्थे । प्रच्छन्नः स्त्रीवेशमाधाय चेष्टचादिभावेन[१] सदासन्निधानयोग्यः । आश्वस्तां निश्चिन्ताम्[२] । अत्रान्यत्रेति प्रतिपादितस्य देशस्यातिविविक्तादिरूपवैशिष्टचस्य साचिव्यमात्रं, प्राधान्यन्तु वक्तृवैशिष्टचादेरेव । एवं कालवैशिष्टचेऽपि ज्ञेयम् ।

गुरुअणेति–जनपदेन बाहुल्यद्योतिना ग्राम्यत्वावगतिः । सुणसि जानासि । मधुममये प्रकरणगम्ये । न भवामि न जीवामि । अत्राद्येति–निर्दिष्टक्रमेण गाढगाढीभविष्यन्मन्युर्वसन्तारम्भो वा प्रकृते पान्थावस्थाविशेषसहकारिसंस्थाने[३] ।

द्वारोपान्तेति—निरन्तरे संलग्ने । प्रच्छन्नः बाल्यालङ्करणभूतलज्जाभरेण प्रणयिसखीष्वप्येकान्ततया न प्रकाशितः । आकूतविशेषो भावविशेषः ।

---

१. 'चेष्टाऽऽदी'ति विकृतः 'क' पुस्तके पाठः ।

२. विश्वस्तामिति वा पाठः स्यात् । आदर्शपुस्तके तु क्षिप्तन्तामिति विकृतः पाठ उपलभ्यते ।

३. 'प्रकृतिपाद्यावस्था' इत्यादर्शपुस्तके पाठः । परं प्रतिपाद्यावस्थाविशेषसंस्थाने सहकारीति सङ्गतः पाठः स्यात् । यथास्थिते तु अन्वयबाधा स्फुटैव ।

अत्र चेष्टया प्रच्छन्नकान्तविषय आकूतविशेषो ध्वन्यते। निराकाङ्क्षत्वप्रतिपत्तये प्राप्तावसरतया च पुनः पुनरुदाह्रियते। वक्त्रादीनां मिथःसंयोगे द्विकादिभेदेनानेन क्रमेण लक्ष्यव्यङ्ग्ययोश्च व्यञ्जकत्वमुदाहार्यम्[१]।

अत्र चेष्टायाः प्रोल्लास्येत्यादिशब्दप्रतिपाद्याया विशेषो वक्तुः प्रत्यक्षरसमुदितरूपाद्वैशिष्ट्यं तत्कालचमत्कारार्थमुल्लिख्यमानमेव सचिवतामालम्ब्य काव्यभावके उदाहृतप्रतीतिप्रकर्षमाधत्ते[२]। चेष्टाऽऽदेरित्यादिपरिग्रहणाद्वर्णनीयनायिकाऽऽदिगतसात्त्विकादिपरिग्रहः।

ननु 'गुरुअणे' त्यादावपि वक्त्रादिविशेषः सम्भवति। ततश्च द्वित्रिचतुरोदाहृतिदर्शनेनैव सिध्यतीत्याशङ्क्य बहूदाहरणोपयोगमाह-निराकाङ्क्षत्वप्रतिपत्तये इति। शिष्याणां निःसन्देहव्युत्पत्तयेऽनवसरेऽश्रद्धेय[३]–मवसरं प्राप्य पुनः पुनस्तदेव वक्त्रादिविशेषसाचिव्यं न तु परस्परासङ्कीर्णरूपमुदाह्रियत उदाहरणैर्निश्चाय्यते। द्विकादिभेदेन क्वचिद्वयोर्यथा—'अइपिहुल'मित्यादौ जलकुम्भादिगतदुर्वहत्वादिवाच्यस्य बान्धवाद्यवगतदुःशीलत्त्वादिव्यङ्ग्यवक्त्रोः[४]। क्वचित्त्रयाणां यथा तइया इत्यादौ वाक्यप्रतिपाद्यतत्प्राणेश्वरीरूपान्यसन्निधीनाम्। एवञ्चतुरादीनाञ्च वैशिष्ट्यस्य सहकारित्वेन व्यञ्जकत्वम्। अनेन क्रमेण वक्त्रादिवैशिष्ट्यस्य साहित्यविकल्पेन। लक्ष्यव्यङ्ग्ययोश्च। लक्ष्यस्य यथा तत्रैवौन्निद्र्याद्यतिशयस्य प्रणयभङ्गशङ्कायां व्यञ्जकत्वमुदाहार्य्यमुक्तोदाहरणेनैव गम्यमित्यर्थः[५]। अत्र

---

१. अत्र तत्र वक्तृबोद्धव्ययोगे यथा-अत्ता एत्त णिमज्जइ इत्यादिरधिकोंऽशो रुचकश्रीधरादिभिर्मूलग्रन्थव्याकरणपरः स्वस्वटीकायामुपन्यस्तः। मणिक्यचन्द्रेण गोविन्दठक्कुरप्रभृतिभिश्चार्वाचीनैर्मूलग्रन्थाङ्गतयैष आदीयते।

२. भावके बलाहृति—'क' पाठः।

३. प्राप्तावसरतयेत्यस्य प्रतीकस्यापाततो ध्यतिरेकमुखेण विवृतिर्दीपिकायाम्। 'तत्सहकारिविशेषसमवधानादवाधितानेक लक्ष्यसन्दर्शनेन शिष्याः सुशिक्षिता अक्षीणवैचक्षण्याः प्रगल्भा झटितिविघटितविप्रतिपत्तयः सम्पद्यन्त इति पौनरुक्त्यभ्रमं निरस्यति। एवं तर्हि सर्वत्र निवेदनं प्राप्नोतीत्याह 'प्रप्तावसरतये'ति विवेकमन्तव्यमत्रोद्धरणीयम्।

४. अत्रादर्शपुस्तके वाच्यव्यङ्ग्यपदयोरयथा व्यत्यासः।

५. गम्यमित्यर्थः—एकस्मिन्नेवोदाहरणे प्रयाश एतादृशलक्ष्यव्यङ्ग्यार्थयोर्विच्छित्तिभृतोः सहावस्थानस्य सम्भवात् परवर्तिभिरालङ्कारिकैः कविकर्णपूरेति सार्थकनामधेयैरलङ्कारकौस्तुभे प्रथमकिरणे लक्ष्यव्यङ्ग्यार्थप्राप्तपल्लवविभागः सुष्टु दर्शितः। जिज्ञासुभि'र्नवजलधरधामे'त्यादिः श्लोकप्रपञ्चस्तत्रत्य आलोकनीयः।

(३८) शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः ।
अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता ॥२३॥

शब्देति । नहि प्रमाणान्तरवेद्योऽर्थो व्यञ्जकः ।

इति श्रीकाव्यप्रकाशेऽर्थव्यञ्जकतानिर्णयो नाम
तृतीयोल्लासः ॥ ३ ॥

चान्यार्थधीहेतुरित्यर्थशब्देनालङ्कृतिरसादिरूपयोरर्थयोः सङ्ग्रहो बोद्धव्यः । एतच्चादिपदसङ्ग्राह्यायां चेष्टायां द्वारेत्याद्युदाहृत्याऽत्र प्रच्छन्नकामुकविषय आकूतविशेषो ध्वन्यत इति वदता वृत्तिकृता सूचितमेव । तथाहि आकूतविशेषो भावविशेषः शृङ्गारसञ्चारिलज्जालक्षणो ध्वन्यत इति रसादौ भावध्वननेन शक्तिर्दर्शिता । तत्र च पार्यन्तिके ध्वननाङ्गीकृत्याऽन्तरालप्रतीतिकालकृतावर्थत एव तदुपगमो दर्शितः । एतदुभयव्याप्तेरपि[१] चाभिधाऽऽद्यनुमानादिवहिर्भावसाधने प्रगल्भा एवास्मदुक्तप्राचीनयुक्तयः । प्रमाणेति–सर्वस्यैव काव्यरूपस्य वाच्यार्थानियतप्रामाण्यस्यापि स्वप्रकाशरसाद्यास्वादप्रमित्ययोगव्यच्छेदेन प्रामाण्यनियम इति सिद्धान्तरहस्यसूत्रणपरम् । एतच्च सिद्धान्तसङ्ग्रहे[२] निपुणं निरूपितमस्माभिरिति नेह गौरवभीत्या प्रपञ्चितम् । तत्सहकारिता तदनुगुणा काऽपि शक्तिः । न हि प्रमाणान्तरवेद्यो व्यञ्जकः प्रत्यक्षादिवेद्योऽर्थः प्रकृतमभिप्रायं फलतीत्याशयः । तस्मादन्वव्यतिरेकाभ्यां शब्दस्यापि सामर्थ्यं कल्पनीयं, नत्ववर्जनीयसन्निधित्वमात्रं तस्येति सर्वत्रैवोभयशक्तिमूलता यद्यपि तथापि यत्रैकशक्तिरुद्भटा तत्रैकमूलतेत्यनाकुलमखिलम्[३] ॥

इति चण्डीदासकृतदीपिकायां तृतीय उल्लासः ॥

—:०:—

---

१. 'एतदुभयव्यापृता'विति स्यात् । पाठोऽत्र विकृत इति प्रतिभाति ।

२. आस्वादजीवातुः पदसन्दर्भः काव्यमिति संज्ञाप्रतिज्ञामारूढवतां टीकाकृतां तत्समानाशयानां प्राक्तनानां परवर्त्तिनां चैष उपष्टम्भो ग्रन्थत्रुटिपूरकत्वेन ग्राह्यः । एवमपि विवेकादिषु सिद्धान्तः । सिद्धान्तसंग्रहे टीकाकृत्कृतविस्तृततररसादिविवेचनपरे निबन्ध इति प्रागेव सूचितम् ।

३. 'इयतैव व्यञ्जकत्वनिर्णयो ग्रन्थकृता कृतः, केवलं विवक्षितान्यपरवाच्यस्य संलक्ष्यक्रमव्यङ्ग्यप्रभेदेऽर्थस्य विभावादिरूपस्य व्यञ्जकत्वस्थानुक्तत्वादव्याप्तिर्व्यञ्जकनिर्णयस्येति चिन्त्यमेतत् । यदि परं 'व्यक्तिरेव से'त्यनन्तरं 'रसादेः प्रतिपत्तये । विभावादिभ्य एषाऽभिव्यक्तिरर्थसमाश्रये'ति कारिका पठनीयेति युक्तियुक्तोऽभियुक्तानां प्राक्तनानां राजानकरुचकादीनां सिद्धान्तः । एवंविधेषु स्थलेषु प्राचीनटीकानामुपयोगित्वं सुप्रकटम् ।

अथ चतुर्थ उल्लासः

❁ ❁ ❁

यद्यपि शब्दार्थयोर्निर्णये कृते दोषगुणालङ्काराणां स्वरूपमभिधानीयं तथाऽपि धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायत इति प्रथमं काव्यभेदानाह—

(३९) अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद् ध्वनौ ।
अर्थान्तरं सङ्क्रमितमत्यन्तं वा तिरस्कृतम् ॥२४॥

लक्षणामूलगूढव्यङ्ग्यप्राधान्ये सत्येवाविवक्षितं वाच्यं यत्र स ध्वनौ इत्यनुवादाद् ध्वनिरिति ज्ञेयः । तत्र च वाच्यं क्वचिदनुपयुज्यमानत्वादर्थान्तरे परिणमितम् । यथा—

एवं व्यञ्जकाख्यामधिकां शब्दार्थयोः शक्तिमुपपाद्य तदुपयोगं ध्वनिगुणीभूतव्यङ्ग्यविभागपराभ्यां चतुर्थपञ्चमोल्लासाभ्यां सूत्रकृद्दर्शितवान् । तत्र केचित्, शब्दार्थनिरूपणार्थमेव वृत्तिविवेकः कृतो न स्वातन्त्र्येण, ततश्च तदनन्तरमेव तद्धर्माणां दोषादीनां निर्णयः सुकरो भवतीति स एव कार्यः, ध्वन्यादिविभागस्तु पूर्वं पश्चाद्वा कार्य, इति प्रत्यवतिष्ठन्ते । तन्निराकुर्वन्नाह वृत्तिकृत्—यद्यपीति—निर्णयविभागव्यवस्थायाम् । धर्मिणीति—न खलु शब्दार्थमात्रधर्मा दोषा एव निरूप्याः, किन्तु काव्याङ्गरूपतद्विशेषगताः । एते च रसाद्याश्रयेणैव व्यवतिष्ठन्त इति रसादिध्वनिगुणीभूतव्यङ्ग्ये तावन्निरूपणीये । तत्प्रसङ्गेन तत्सजातीयानां वस्तुध्वन्यादीनां कर्कटीकण्टकन्यायेन पूर्वं पश्चाच्चावेष्टनतया तन्निरूपणमिति भावः । हेयोपादेयतेति—दोषाणां हेयतयैव गुणालङ्कृतीनाञ्चोपादेयतयैवात्र निरूपणम् । हेयोपादेयताबीजञ्च काव्यविशेषपरिज्ञान एव सुज्ञानं भवतीत्यर्थः । काव्यपदमत्र तद्विशेषध्वन्यादिपरम् । तद्भेदाः स्वलक्षणलक्षिता विशेषाः । तत्र च लक्षणामूलव्यञ्जकतायाः प्राथमिकतया प्रथमं तन्मूलध्वनिविवेकः[1] ।

अविवक्षितेत्यादिना वाच्यविभागो ध्वनिविशेषलक्षणद्वयसूचनपरः, अन्यथा ध्वनित्वक्षतेः । अविवक्षितं बाधितस्वरूपं वाच्यं यत्रेति सामान्यलक्षणं सूचितम् ।

---

१. इयमेवानन्दवर्धनाद्यालङ्कारिकवर्यानुसृता सम्प्रदायसिद्धा व्यवस्था । अभिधामूलस्य बहुविषयतया पश्चान्निर्देश इत्यृजुरेव तत्कारणोपन्यासः । उपरितमस्तु युक्तिबन्धः "एवं लक्षणामूलं व्यञ्जकत्वमुक्तम, अभिधामूलन्त्वाह" इति द्वितीयोल्लासस्थं मूलग्रन्थमवलम्ब्यप्रादुर्भूत इति सोऽपि यथास्थित एव । (प्रदीपप्रभा) ।

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥२३॥

अत्र वचनाद्युपदेशादिरूपतया परिणमति ।

क्वचिदनुपपद्यमानतयाऽत्यन्तं तिरस्कृतम् । यथा—

उपकृतं बहु तत्र किमुच्यते
सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे !
सुखितमास्स्व ततः शरदां शतम् ॥२४॥

एतदपकारिणं प्रति विपरीतलक्षणया कश्चिद्वक्ति ।

(४०) विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः ।

अन्यपरं व्यङ्ग्यनिष्ठम् । एष च—

अनुपयुज्यमानत्वस्वरूपमात्रेणार्थान्तरे[१] विशेषरूपे परिणमितमिति संक्रमितमित्यस्य व्याख्यानं, तन्मयीकृतमित्यर्थः । णिचा काक्वादिसाहाय्यसूत्रणम् ।

त्वामिति–समवायः समुदायः । तत्र साम्मुख्यादेव प्रतिपाद्ये नियते त्वामित्यस्य तावन्नोपयोगः । एवं वचनादेव कर्त्तरि ज्ञातेऽहमर्थस्यास्मीत्यस्य वच्मीत्यस्य च । आत्मीयामिति मतिमवलम्ब्यावस्थानस्यावश्यम्भावादेव सिद्धेः । तैश्चानुपयोगबाधितैरुपदेश्यत्वाप्तत्वोपदेशाप्रमादावस्थितयस्तद्विशेषा लक्ष्यन्ते । तैश्च लक्षितैस्तदतिशयरूपा एवावश्यवाच्यहिताहितत्वालङ्घनीयाज्ञत्वादरग्राह्यत्वात्यन्तावहितताः प्राधान्येन व्यज्यन्ते । वच्मीत्यत्र लक्षणायाः स्फुटतया तन्मुखतया निर्दिशति–अत्र वचनादिरिति । अनुपपद्यमानतयेति—सर्वथेति शेषः । अतएवात्यन्ततिरस्कृतं, नतु तद्गन्धोऽप्युपपद्यत इत्यर्थः ।

उपकृतमिति—अत्र वक्त्रादिवैशिष्ट्यान्मुख्यार्थबाधः, लक्षणयाऽपकाराद्यतिशयश्च गूढो व्यङ्ग्यः ।

विवक्षितमिति—अबाधितत्वेनेत्यर्थः । अन्यपरतयैव विवक्षितं, न तु गुणीभूतव्यङ्ग्यमाक्षिप्य विश्रान्तमित्यर्थः । अन्यपरमित्यस्य व्याख्यानं व्यङ्ग्यनिष्ठं सर्वात्मना तत्प्रवणमित्यर्थः ।

---

१. स्वरूपमात्रेणेत वृत्तिग्रन्थपूरणम् । परिणमितमिति–एवं काव्यप्रकाशविवेके "अत्र हि वाच्यस्यानुपपत्त्यभावादनुवृत्तिधर्मरूपतायाः लक्ष्यप्रतीतिवेलायां न परित्यागः, किन्तु तत्सहितस्य लक्ष्यस्य प्रतीतिः–अत एवात्र परिणामोक्ति"रिति ।

(४१) कोऽप्यलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रमः परः ॥

अलक्ष्येति—न खलु विभावानुभावव्यभिचारिण एव रसो,ऽपि तु रसस्तै-रित्यस्ति क्रमः; स तु लाघवान्न लक्ष्यते। तत्र—

(४२) रसभावतदाभासभावशान्त्यादिरक्रमः।

भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः ॥२६॥

अलक्ष्यः क्रमः प्रतीतिपौर्वापर्य्यं यत्र, तदलक्ष्यक्रमं तथाभूतं व्यङ्ग्यं यत्रेति विग्रहः। एवमुत्तरत्र।

यद्यपि लक्षणामूलेऽप्यस्ति लक्ष्यक्रमव्यङ्ग्यता तथापि तस्य तद्व्यभिचार एवेति नोपन्यासः, तत्र च लक्ष्यपदार्थपर्यालोचनयैव लक्षणं लभ्यत इति न पृथङ् निर्देशः[१]। न खल्विति—तन्मात्रस्य रसत्वे सहृदयासहृदयव्यवस्थाविरहप्रसङ्गादिति-भावः। तैराविष्क्रियत इति शेषः। ते च प्रतीयमाना एव रसमाविर्भावयन्ति, अन्यथाऽतिप्रसङ्गादित्याह—इतीति—अतो हेतोरस्ति क्रमस्तत्प्रतीत्योः, स तु न लक्ष्यते। वस्तुसामान्येन[२] (सामग्रचेण) प्रतीत्यन्तरालकालस्याम्बुजपत्रसहस्रव्यति-भेदवदति सूक्ष्मत्वादिति शेषः। अत्र च रसवति काव्ये वस्त्वलङ्कारव्यङ्ग्ययोरपि न प्रतीतिविलम्बो झटित्यास्वादपर्यन्तगमनात्। वस्तुतस्तु नीरसे प्रतीतिविलम्बा-त्तत्साजात्येन लक्ष्यक्रमव्यवहार इति बोद्धव्यम्[३]।

तत्र (तत्रेति-) तयोर्मध्ये अलक्ष्यक्रमस्य रसादिरीदृशस्वरूपव्यवस्थाहेतु-रित्यर्थः। तदाभासेति—तत्पदेन रसभावयोरनुकर्षः। अक्रम इति—नञ् ईषदर्थेऽज्ञे-यतापरम्। रसाद्यलङ्कारादिति–रसादिश्चासावलङ्कारश्चेति[४] कर्मधारयः। अलङ्का-

---

१. एतच्च सर्वमापाततो विवेककृन्मन्तव्यमनुसृत्य।

२. साम्बन्ध्येनेति 'क' पुस्तकेऽहृद्यः पाठः।

३. आचार्य्याभिनवगुप्तप्रभृतीनां सिद्धान्तमुपजीव्यैवमुक्तिः। अखण्डबुद्धिवेद्यस्यानन्दमयस्य रसस्य कथ खण्डबुद्धिनिर्ग्राह्यैः पृथक् पृथगुपलभ्यमानैर्वस्त्वलङ्कारध्वनिः संस्थासंस्थापितैः साजात्यमित्यन्वर्थैषोक्तिः। परं शब्दचित्रार्थचित्रप्रभृतीनां नीरसानां संलक्ष्यक्रम वस्त्व-लंकृतिध्वनिभेदैः सह साजात्यं ध्वनिप्रस्थानपरमाचार्याणां तन्निवन्धकृताञ्च बहूनां न स्वरस इत्यतिरोहितमेतत् प्रेक्षावताम्।

४. अत्र वृत्तिग्रन्थेऽलङ्कारपदं पारिभाषिकमनुप्रासोपमादिपरं, न पुनः 'सौन्दर्य्यमलङ्कार' इति वामनकृतनिर्देशेन सौन्दर्य्यसामान्येनानुगतार्थं यत्किञ्चिदिति वृत्तिग्रन्थत एव स्फुटं प्रतीयते। न च दशमोल्लासे रसवत्प्रेयऊर्ज्जस्विसमाहितादीनामनुद्देशस्तद्व्याख्यानकल्पे

आदिग्रहणाद्भावोदय—भावसन्धि—भावशबलत्वानि। प्रधानतया यत्र स्थितो रसादिस्तत्रालङ्कार्यो यथोदाहरिष्यते। अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्गभूतो रसादिस्तत्र गुणीभूतव्यङ्ग्ये रसवत्–प्रेय–ऊर्जस्विसमाहितादयोऽलङ्काराः। ते च गुणीभूतव्यङ्ग्याभिधान उदाहरिष्यन्ते।

र्यतया स्थित इति भिन्नत्वे हेतुः। आदिग्रहणाद्भावशाबल्यादिरिति। तत्रेति–प्रधानतया बाध्यताऽऽदिराहित्येनालङ्कार्यः। अलङ्कारादिकृतपरिपोषमात्रत्वेनालङ्कारव्यपदेशो योग्यः। न चैतद्वाङ्मात्रमित्याह–तथोदाहरिष्यत उदाहरणदर्शनेन विविक्तः करिष्यत इत्यर्थः। वाक्यार्थे रसाद्यन्तररूपे वस्तुमात्ररूपे वा। अङ्गभूतः शोभाविशेषकः। आदिरिति वाक्यार्थादिसङ्ग्रहः कार्यः[1]। गुणीभूतव्यङ्ग्य इति–तैरुपाधिभिर्ध्वनिव्यवहारनिरासः, नतु तत्सद्भावे ध्वनिव्यतिरेकनियमः, प्रधानभूतरसाद्यपेक्षयाऽसम्भाव्यत्वात्। रसवदिति—अलङ्कारस्यालङ्कारिपारतन्त्र्यध्वननया काव्यविशेषणपदेन तदभिधानम्[2]। एवमुत्तरत्रापि भावस्यालङ्कारत्वेन प्रेयः प्रियतरं काव्यम्। [अत्र रसवति काव्ये वाच्यव्यङ्ग्ययोरपि न प्रतीतिविलम्बो, झटित्यास्वादपर्यन्तगमनात्; किन्तु नीरसप्रतीतिविलम्बात्तत्साजात्येन लक्ष्यक्रमव्यङ्ग्यव्यवहार इति बोध्यम्[3]]। ऊर्जस्वि-रसाभास–भावाभासालङ्कृत्यनुप्राणितत्वेन चमत्कृतिविशेषाधानक्षममूर्जस्वि, भावप्रशमालङ्कृतिसाचिव्येन सम्यगाहितं भवति चमत्करणमनेनेति समाहितम्, आदिपदेन भावोदयनामालङ्कृतिपरिग्रहः।

प्रतिकूल इति मन्तव्यम्। सुविदितमेवैतद्यदलङ्कारोल्लासस्योत्तरार्धमपरेणापूरि। अलङ्कारमाहात्म्यवादिनां भामहोद्भटप्रभृतीनामनुसारिणस्तस्य 'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः। काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः'रिति स्पष्टनिर्दिष्टध्वनिप्रस्थानसिद्धान्तानादरवन्तः, तदन्तस्यानिबन्धनस्य सुशककल्पनत्वात्। एवं सर्वेऽपि प्राचीनाष्टीकाकृतो रुचकश्रीधरश्रीविद्याचक्रवर्तिप्रभृतयः। उदाहरिष्यत इत्यस्य पृथगलङ्कारतया विवेचयिष्यत इति सम्प्रदायप्रकाशिन्यां शेषोक्ताचार्याणां विवृतिस्त्वत्र प्रमाणम्।

१. रसादिरित्यत्र 'आदि' पदेन भावरसाभासभावाभासभावोदयभावसन्धिभावशबलत्वानां ग्रहणमिति प्रायः सर्वं एव विवरणकाराः। यदि कथञ्चिदपि चण्डीदाससम्मतोऽर्थः स्वीक्रियेत तथाऽप्यत्र वृत्तिग्रन्थे तदर्थेऽन्वयो न सूपपाद इति प्रतीयते।

२. रसवत्पदनिरुक्तविमर्शनद्वारा रसवतोऽलङ्कारता निराकर्त्तुकामेन कुन्तकेन स्वग्रन्थे रसो विद्यते यत्रेति तस्य काव्यविशेषणत्वमुट्टङ्कितम्। रुचककृतेऽलङ्कारसर्वस्वे रसो विद्यते (यत्र निबन्धे) यत्र निबन्धने व्यापारात्मनि तद्रसवदिति निरुक्तिर्दर्शिता। तत्र जयरथसमुद्रबन्धयोष्टीकाकृतोर्विवृती आलोकनीये।

३. अयमंशो द्विरुपक्षिप्त इति प्राचीनाद् ग्रन्थादेवावसीयते (९२ पृः)। अत्रायं निरवकाशो वर्जनीयश्च। आदर्शभूतमूलपुस्तके सङ्कलयित्रा प्रमादेनैक एव सन्दर्भो द्विर्गृहीतः स्यात्।

तत्र रसस्वरूपमाह—

(४३) कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाटचकाव्ययोः ॥
विभावा अनुभावास्तत्[1] कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ॥

गुणीभूतव्यङ्ग्यं काव्यमभिधीयते विशेषलक्षणार्थमाबध्यतेऽत्रेति गुणीभूतव्यङ्ग्याभिधानः पञ्चमोल्लासः ।

तत्रासंलक्ष्यक्रमे ध्वनौ प्रसक्ततयेति शेषः । स्वमान्तरं रूपं नतु रूढिकल्पितमिति भावः । कारणानीति–अथशब्दश्चार्थः कार्याणीत्यत्र योज्यः । यानीति कारणानीत्यादिभिः तानीति च विभावा इत्यादिभिः प्रत्येकमन्वीयते । लोके रामादिगतस्य स्थायिनोऽन्तरा भावोत्पत्तावप्यनवच्छिन्नवासनस्य यानि कारणान्यालम्बनानि सीताऽऽदीनि, उद्दीपनानि चोद्यानादीनि, तानि चेन्नाटचकाव्ययोरभिनयशब्दविशेषाभ्यामुपनीयन्ते तत्तदा भावुकगतरसवासनान्तर्लीना रत्यादयो विभाव्यन्ते आस्वादाङ्कुरप्रादुष्करणयोग्याः क्रियन्ते एभिरिति विभावाः कथ्यन्ते[2] । एवं कार्याण्यालिङ्गनादीन्यनुभावयन्ति परिपोषयन्तीत्यनुभावाः । सहकारीणि हर्षादीनि निजनिजविभावानुभावरसमुखेन दर्शितानि सन्ति विशेषेणाभिमुख्येनाचरन्तीति व्यभिचारिणः । किमतो यद्येवमित्याह–**व्यक्त इति** । तैः कारणादिर्भिर्विभावाद्यैर्विभावादिव्यपदेशानुगुणामवस्थामापन्नैर्व्यक्तः प्रादुष्कृतः स्थायी प्रत्यभिज्ञायमानपूर्वरूपानुगमो रत्यादिर्भावो भाव्यते वास्यत इति वासनाऽऽत्मतया सहृदयहृदयलीनो रसः स्मृतयो ध्वनिकारमतानुसारिभिराम्नातः । व्यक्तो व्यक्तीकृत एव रसो, न तु रसः सन्व्यज्यत इति वदता रसस्य व्यक्तिरूपत्वाभिमतप्रतीतिशरीरानन्यत्वं सूचितम् । तदुक्तम् श्रीमल्लोचनकारपादैः–रसाः प्रतीयन्त इति त्वोदनं पचतीतिवद् व्यवहार[3]

---

१. 'अनुभावाश्चे'ति क्वाचित्कः पाठः । उपरिधृतपाठे 'तदि' त्यस्य तर्हित्यर्थकस्य 'चेदि' त्यनेन पूर्वप्रघट्टकस्थितेन सम्बन्धः ।

२. तथा च भारतीये नाटचशास्त्रे "विभाव इति कस्मादुच्यते ? विभावो विज्ञानार्थः । विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इत्यतो विभावा इति" । "अथानुभाव इति कस्मादुच्यते ? यदयमनुभावयति वागङ्गसत्त्वकृतमभिनयमिति" । वस्तुतस्त्वेतदुपलक्षणमात्रम्, दृश्येतरकाव्येष्वपि तथा प्रसङ्गात् । सर्वसाधारणीकृतासाधारणरसपदार्थनिष्पत्तिसामग्रीयं खण्डशो वितत्य दर्शितेति निरपह्नवेयं शैली ।

३. ध्वन्यालोकलोचने (काव्यमाला ६९ पृः)। एतदनुषङ्गी लोचनग्रन्थः "प्रतीतिरेव

उक्तं हि भरतेन—"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति"रिति। एतद्विवृण्वते—विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः, अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः, व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो, मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपताऽनुसंधानान्नर्त्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः।

इति। यद्यप्यखण्डः काव्यार्थ इति नीत्या विभावनादिसम्भिन्नानुविद्धाङ्गरत्याद्यंशककर्बुरितस्वप्रकाशानन्दचमत्कार एव रसस्तथापि लौकिकदशाप्रसिद्धप्राधान्यप्रत्यभिज्ञानमाश्रित्य स्थायी रत्यादि रस इत्युक्तम्[१]।

अस्यार्थस्य साम्प्रदायिकतामाह—उक्तं हीति—भरतेन तत्कृतशास्त्रे विभावानुभावव्यभिचारिणां योगात्परस्परसाचिव्यलक्षणाद्रसनं रसस्तस्य निष्पतिः स्वत एवाविर्भावः। सात्त्विकानां तु स्तम्भादीनामनुभावतया तद्धेतूनाञ्च मुख्यतः सात्त्विकादिपदवाच्यानां सत्त्वाविर्भावविशेषाणां स्तम्भादितत्कार्योदयप्राचुर्यदर्शनेन तथैवाङ्गीकार्याणां व्यभिचारितयाऽपृथग्गणनम्। सम्प्रति स्वसिद्धान्तव्यवस्थां दर्शयितुमस्य भारतीयसूत्रस्याचार्य्यदेशीयदर्शितव्याख्यानतुच्छताप्रकटनपूर्वकसम्प्रदायव्याख्यानप्रकर्षणायोपक्रमते—**एतदिति**। आलम्ब्यन्ते विषयीक्रीयन्त इत्यालम्बनानि ललनाऽऽदयः, उद्दीपयन्त्युद्बोधयन्तीत्युद्दीपनान्युद्यानादयस्तानि चोभयानि स्वरूपोद्बोधयोः कारणानि। आलम्बनोद्दीपनानि च तानि कारणानि चेति कर्मधारयः। उपचित इति सञ्चारिभिरन्तराऽन्तरोत्पन्नैर्हि रसादि विच्छिद्यते। किन्तर्हि गूढैर्गाढीक्रियते। नर्त्तक इत्युपलक्षणम्, काव्यनाटकेऽपि ज्ञेयम्[२]। प्रभृतय इति तत्समानशीलपरिग्रहः।

विशिष्टा रसने"त्यादिः "अभिव्यज्यन्ते रसाः प्रतीत्यैव च रस्यन्त इती"त्यन्तो जिज्ञासुभिराकलनीयः।

१. "रसावस्थः परं भावः स्थायितां प्रतिपद्यत" इति दशरूपककृत्कारिका "विभावानुभावसात्त्विकव्यभिचारिभावैरुपनीयमानः परिपूर्णस्थायिभावो रस्यमानो रस" इति रसतरङ्गिणीविवृतिश्चैतदेव लौकिकदशाप्रत्यभिज्ञानमुपजीव्य सिद्धे। "परमार्थतस्त्वरस खण्ड एवायं वेदान्तप्रसिद्धब्रह्मतत्त्ववद्वेदितव्य" इति टीकाकृत्स्वरस एव तत्त्वम्।

२. "दशरूपकस्यैव हीदं सर्वं विलसितं यदुत कथाऽऽख्यायिके महाकाव्य" मिति काव्यालङ्कारसूत्रवृत्तौ वामनः। वासनावतः सहृदयस्य नाटचप्रेक्षकस्थानीयत्वोपपत्तिर्निरूढ। एकत्र वागङ्गाद्यभिनयसंवलितसहायसत्वमन्यत्र सत्कविवचनगोचरतागुम्फितत्त्वमिति तु पर्यवसाने न महान् भेदः। एवमप्यभियुक्तोक्तिः 'काव्येऽपि नाटचायमाने स (रस) एव काव्यार्थः" इदमेव लक्ष्यं कक्षीकरोति।

राम एवायम्, अयमेव राम इति, न रामोऽयम्, इत्यौत्तरकालिके बाधे, रामोऽयमिति, रामः स्याद्वा न वाऽयमिति, रामसदृशोऽयमिति च सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोऽयमिति प्रतिपत्त्या ग्राह्ये नटे—

सेयं ममाङ्गेषु सुधारसच्छटा
सुपूरकर्पूरशलाकिका दृशोः ।
मनोरथश्रीर्मनसः शरीरिणी
प्राणेश्वरी लोचनगोचरं गता ॥ २५ ॥

दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च ।
अविरलविलोलजलदः कालः समुपागतश्चायम् ॥ २६ ॥

अत्र रामादिगतरत्यादिरेव रसः, यद्विषयप्रेक्षकप्रतीतिर्वा, नटादिगततया प्रेक्षकाणां रत्यादिसम्भावनं वा ? तत्र सर्वत्र रस इति नाममात्रमेव, न तु रस्यमानताप्राणत्वमित्युपक्षीणोऽयं पक्षः[१] ।

राम एवायमिति रामत्वस्यायोगव्यवच्छेदः । अयमेव राम इत्यन्ययोगव्यवच्छेदः । उभयरूपा चेयं प्रतीतिरप्यसम्यग्-विषयाऽबाधस्थले, औत्तरकालिके, बाधे सत्यपजिहीर्सिषया । रामोऽयमिति । प्रतीतिर्मिथ्या । रामः स्यान्नवेति संशयः । राम-सदृशोऽयमिति सादृश्यप्रतीतिः । एतद्विपरीततया बालादीनां यथा तुरगचित्रे तुरगप्रतीतिस्तथा रामोऽयमिति वस्तुपरिच्छेदपर्यवसानशून्या या प्रतीतिस्तया ग्राह्ये चक्षुर्विषयीकृते[२]ऽभिनयकर्त्तरि । कारणादिभिः कृत्रिमैरपि तथा कृत्रिमतयाऽनभिमन्यमानैरिति दूरेण सम्बन्धः ।

कुतः पुनः कृत्रिमतयाऽपि कारणादीनां नटे सम्भव इत्याह—सेयमिति । एतत्पद्यद्वयं सामर्थ्यावसेयानुभावसञ्चारिविशेषं यथाक्रममालम्बनोद्दीपनाभिधायकं सम्भोगविप्रलम्भरूपभेदद्वयप्रकटकं वा । इत्यादीनां काव्यानां यदनुसन्धानं कविविवक्षितानुकार्यगतविशेषस्य काक्वादिना साक्षादिव करणं तद्बलात् । शिक्षा परम्परोपदेशः । अभ्यासः पौनःपुन्येन प्रवृत्तिरुत्कर्षाधानहेतुः । ताभ्यां प्रवर्त्तितं यत्स्वकार्यं प्रयत्नविशेषनिर्वाह्यं सात्त्विकसजातीयमश्रुरोमाञ्चादि,

---

१. उत्पत्तिवादिनां रसस्य स्वप्रकाशानन्दचिन्मयत्वमनादिवासनोपेतरत्यादितादात्म्यमयवपुःसतत्त्वं रसस्यानुभवसिद्धमपलपतामियं गजनिमीलिकैव ।

२. 'निर्वर्त्तिते'ति प्रायिकः पाठः । 'प्रवर्त्तिते'ति श्रीधरचण्डीदासश्रीविद्याचक्रवर्तिप्रभवर्तिप्रभृतिभिष्टीकाकृद्भिर्धृतः पाठः ।

३. 'तत्र नटे' इति मूलपुस्तके पाठः ।

इत्यादिकाव्यानुसन्धानबलाच्छिक्षाऽभ्यासप्रवर्त्तितस्वकार्यप्रकटनेन च नटेनैव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरपि तथाऽनभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगाद् गम्यगमकभावरूपादनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन सम्भाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुकः ।

तत्प्रकटनप्रकाशितैः सम्भाव्यमानतामुपनीतैः । गम्यगमकभावेति—गम्यं रत्यादि, गमकमनुमापकं कार्यकारणादि । अनुमीयमानो रामादितादात्म्यप्रतीयमानतयेति शेषः । रसनीयत्वेन स्पृहणीयत्वेन । स्थायित्वेन कालान्तरेऽप्यपरिच्छेदित्वेन दाढर्यदर्शनादिति भावः । रत्यादिरिति—भाव इत्यस्य विवरणम् । तत्र न केवलं नटे[१] काव्यपाठके—(पि) असन्नपि[१] सामाजिकानां प्रेक्षकाणां वासनया तन्मयीभावाधायिन्या धिया चर्व्यमाणः पुनः पुनरनुसन्धीयमानो रस इति श्रीशङ्कुकनामा कश्चिदभियुक्तः[२] ।

अत्रापि भावकैर्नटादिगततयाऽनुमीयमानो रत्यादि रसः, भावकगतं तदनुमानं वा ? आद्ये सामाजिकचमत्काराभावप्रसङ्गः, तेषामनुमानाभासमात्रोत्पत्तेः । तदनन्तरं सुखोत्पत्तिरिति चेत्, किमनेनाभिमतं भवतः ? किं कार्यं सुखं रसो, रसेन वा सुखं क्रियते ? तत्राद्यो दूषयिष्यते, द्वितीये तु कोऽयं रसो यस्य कार्यं सुखमिति प्रश्नानिष्कृतिः । भावकगतानुमानमात्रेऽप्ययं दोषः, सुखादितादात्म्याङ्गीकारे तु साक्षात्काररूपस्वप्रकाशानन्दस्य रस्यमानताऽनुभवेनास्माकीं सिद्धान्तशय्यामधिशय्य दिव्यं वर्षसहस्रं प्रमोदनिद्रामुपेयाः[३] ।

---

१. 'पाठकासन्नोपी'त्ययथासंश्लिष्टः 'क' पाठः ।

२. अनुमितिवादिनां श्रीशङ्कुकप्रभृतीनां मतं सप्रपञ्चमाविष्कृतं खण्डितं च श्रीमदभिनवगुप्तपादैर्ध्वन्यालोकलोचनेऽभिनवभारत्यां च । मतस्यास्य दृश्यकाव्यप्रसङ्ग एव स्फुट उपयोगः अस्मिन्नपि मते त्रिवर्णैकप्राणस्य रसस्य स्वगतत्वं स्वात्ममात्रविश्रान्तत्वमलौकिकचमत्कारसारत्वञ्चापहस्तितमित्यमनोज्ञमेतत् ।

३. साहित्यदर्पणकृता विश्वनाथकविराजेन सन्दर्भस्यास्य ''यद्यपि रसानन्यतये''त्यादेरित ऊर्ध्वं प्रकास्यमानस्य स्वग्रन्थे ''सुखादितादात्म्याङ्गीकारे चे''त्यादेश्च (६५ पृः) एकत्रोद्धारः कृतो रसस्य स्वप्रकाशत्वमखण्डत्वञ्च प्रतिष्ठापयितुम् । टीकाकृत्त्विहाभिनवगुप्तप्रभृतीनां मतमनुवादेन द्रढीकरोति । परम आस्वादजीवातोः पदसन्दर्भस्यास्वादनिष्पत्तिक्रियायां तेन महती आस्था स्थापितेति गड्डलिकाप्रवाहपतितेभ्योऽस्य स्फुटं वैलक्षण्यम् ।

न ताटस्थ्येन, नात्मगतत्वेन रसः प्रतीयते, नोत्पद्यते, नाभिव्यज्यते, अपि तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्व-

ताटस्थ्येनेति[१]—उदासीनत्वेन, रसनीयत्वाभावप्रसङ्गात्। नात्मगतत्वेन प्रतीयते पूर्वसिद्धत्वाभावात्, वर्त्तमानस्य साक्षात्कारविरहाच्च। नोत्पद्यते–सीताऽऽदिविषयत्वेन रत्युत्पत्तौ पातकित्वापातात्, स्वकान्तविषयत्वेन तदनुसन्धानापत्तेः, रत्यादिषु भावप्रसङ्गाच्च[२]। नाभिव्यज्यतेऽभिव्यक्तेर्ज्ञानविषयत्वेन तद्दूषणग्रस्तत्वात्। काव्ये नाट्ये च कृतास्पदेन भावकत्वव्यापारेण भाव्यमानः सकलसामाजिकगततया सम्भाव्यमानः। कोऽयं भावकत्वव्यापार इत्याह––अभिधातो द्वितीयेन साधारणीकरणात्मना। अभिधेति भट्टादिप्रसिद्धवृत्त्युपलक्षणम्[३]। तदतिरिक्तेन समुद्रलङ्घनोत्साहशालिहनूमदादिवर्णनीये कवित्वभावकानां भेदानुव्यवसायरूपेणेत्यर्थः। स्थायी रामादौ स्थिरः। भोगेन भुज्यते विषयीक्रियते। कोऽयं भोग

१. एवमादर्शपुस्तके। 'न ताटस्थ्येने'ति मूलानुगतः पाठः स्यात्। लोल्लट–शङ्कुक-भट्टनायकानां मतानि किं सारत उत स्वरूपतः सामग्र्येण तत्कृतनाट्यशास्त्रविवरणेभ्यो निष्कृष्टानीति दृढतया वक्तुमिदानीं न पार्यते। परमभिनवभारत्यां ध्वन्यालोकलोचने च सङ्कलितसर्गे तत्तन्मतोद्धारेऽयमेव प्रायः पन्था वक्तव्यविषयोपस्थापने प्रमाणसिद्धः क्रमश्चेति प्रक्रान्तादवसीयते।

२. टीकाग्रन्थोऽत्र नातिस्फुटः। स्वगतत्वेन तथाभावेन रसस्य भावनीयत्व'मिति विवेकमन्तव्यादत्र टीकायां भावपदेन "रतिर्देवादिविषये"त्यादिरर्वाग् लक्षित उद्दिष्टः स्यादित्यनुमीयते। एवं विवेके—'भट्टनायकदर्शने तु रसस्योत्पत्तिप्रतीत्यभिज्ञप्तिपक्षान् दूषयित्वा भोगपक्षः प्रतिष्ठापितः। तत्रोत्पत्तिवादिना लोल्लटेन विभावैरेवोत्पत्तिरङ्गीकृता, अनुभावव्यभिचारिणोः प्रत्यायकत्वेन पोषकत्वेन चाभ्युपगतत्वात्।······प्रतीतिस्त्वनुमानरूपा श्रीशङ्कुकेनाङ्गीकृता। अभिव्यक्तिः पुनर्विद्यमानस्यैव स्थायिनो ध्वनिवादिनाऽभ्युपगता। तत्र त्रयाणामपि पक्षाणां साधारणमिदं दूषणम्। स्वगतत्वेन तथाभावेन रसस्य भावनीयत्वम्, परगतत्वेन ताटस्थ्याद्रसनीयत्वाभाव एवं'त्यादिः। तथा माणिक्यचन्द्रोऽपि 'किञ्चोत्पत्तिपक्षे सीताऽऽदिषु कामित्वं स्यात्। करुणस्योत्पादाद् दुःखितत्वञ्चे'त्यादि वदन् सम्प्रदायप्रवर्तयितुरभिनवगुप्तस्यैव मतमनुवदति।

३. तेन अभिधात इत्यनेन लक्षणात् इत्यपि बोध्यमिति टीकाकृत्सम्प्रदायः। 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापार' इति स्वयं वदता भट्टनायकेनाप्यभिधापुच्छभूताया लक्षणाया मीमांसाऽऽदिदर्शनस्वीकृतसामर्थ्याया उद्देशो विहितः। अभिधाविलक्षणैव रसप्रतीतिरिति तत्पक्षो निष्कलङ्कः। अत्र लोचनग्रन्थः "काव्यात्मनः शब्दस्य त्र्यंशताप्रसङ्गात्। तत्राभिधायकत्वं वाच्यविषयं, भावकत्वं रसादिविषयं, भोक्तृत्वं सहृदयविषयमिति त्रयोंऽशभूता व्यापाराः"।

व्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यत इति भट्टनायकः ।

इत्याह—सत्त्वेति । सत्त्वस्योद्रेको रजस्तमसी अभिभूयाविर्भावस्तस्मात्प्रकाशः स्पष्टतरो य आनन्दस्तनमयी तदेकरूपा या संवित्तत्र विश्रान्तिः पूर्वापरानुसन्धानादिबाह्यप्रमेयव्यासङ्गाभावः, स एव सतत्त्वं स्वरूपं यस्य तेन । विश्रान्तिगतत्वेनेति पाठे विश्रान्ति गतः प्राप्तो विश्रान्तिगतः प्रमाता तस्य भावो धर्मो विश्रान्तिगतत्वं[१] तेनेति भट्टनायको ध्वनिदर्शनविद्वेषी मन्यते ।

अत्र किंगतो रत्यादिः साधारण्याभिमानविषयो योग्यतामापद्यते ? न तावदनुकार्यानुकर्तृगतः, असन्निहितस्य भोगविषयताऽनुपपत्तेः, साधारण्यबलादेव भावके सन्निहित इति चेत्, तथापि वास्तवताविरहेण तद्बुद्धेरप्रमात्वापातः । कुरु च तत्र प्रामाण्यमनियतम्[२] । किञ्च साधारण्येन प्रतीतस्य साधारणघटादिवद् रस्यमानत्वमेव । अतएव 'साधारणत्वाकारोऽपि तत्र नोन्मिषति स्फुट'मित्यबोचं ध्वनिसिद्धान्तसंग्रहे[३] । किञ्च भोगविषय एव भोग्यः, न च रसस्तथा, तस्य तद्ग्राह्यसिद्धत्वाभावादिति प्रतीतिपक्षोक्तदोषः । कथं तर्हि व्यञ्जनपक्षेऽपि निस्तार इति चेत्, सत्यं, प्रकाशप्रादुष्कृतरूपनाममात्रेणैव रसादिप्रतीतौ न व्यञ्जनाऽभिधानमङ्गीक्रियते ।

वस्तुतस्तु विलक्षण एवायं व्यापारः, अतएव रसनास्वादनचर्वणादयो विलक्षणव्यपदेशाः । व्यञ्जकता तु पृथक्सिद्ध एवार्थे भवति । यथोक्तं प्राचीनैः—

स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः ।
यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात् ।। इति ।।[४]

न च वाच्यं, मत्पक्षेऽपि दीयतामियमेव प्रसारिणी दृष्टिः, भोगैकार्थस्यैव हि रसे भोज्यत्वमुपचरितमस्ती,ति । एवं तर्हि नामान्तरमेव भोगो रसनं व्यञ्जनञ्च इत्यस्मानेव सर्वात्मना शरणं गतोऽस्ति । ततश्च निवर्त्त्यतामस्माकं सर्वेषामु-

१. न्यायपञ्चाननोपाधिको जयरामोऽप्येतदेव पाठद्वयमुद्धरति स्वटीकायाम् । अभिनवभारत्यां बरोदामुद्रितायां 'संविद्विश्रान्तिविलक्षणेन परब्रह्मास्वादसविधेन भोगेन भुज्यत' इति पाठः ।

२. अत्र पाठो न सम्यङ् इति प्रतिभाति ।

३. इतः सिद्धान्तसंग्रहग्रन्थः कारिकावृत्त्यवयवद्वयसमन्वितो निबन्धग्रन्थ एवेत्यनुमीयते ।

४. इयं प्राचीनानां कारिका व्यक्तिविवेके, रुचककृते काव्यप्रकाशसङ्केते, विश्वनाथकृते साहित्यदर्पणे चोद्धृता । शान्तरक्षितकृते तत्त्वसंग्रहें (कारिका २१६०, २२६६, २५०३) प्रभाचन्द्रकृते प्रमेयकमलमार्त्तण्डे (३० क । ३० ख पृः) घटप्रदीपन्यायमयोऽयं नयः समुद्दिष्टः । एवमभिनवगुप्तपादा आहुः ''रस्यतैकप्राणौ ह्यसौ, न प्रमेयादिस्वभावः । सा च रसना न कारकव्यापारः । स्वयन्तु नाप्रामाणिकी, स्वसंवेदनसिद्धत्वात् । रसना च बोधरूपैव किन्तु बोधान्तरेभ्यो लौकिकेभ्यो विलक्षणा, उपायानां विभावानां लौकिकवैलक्षण्या''दिति ।

न ताटस्थ्येन, नात्मगतत्वेन रसः प्रतीयते, नोत्पद्यते, नाभिव्यज्यते, अपि तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्व-

ताटस्थ्येनेति[१]—उदासीनत्वेन, रसनीयत्वाभावप्रसङ्गात्। नात्मगतत्वेन प्रतीयते पूर्वसिद्धत्वाभावात्, वर्त्तमानस्य साक्षात्कारविरहाच्च। नोत्पद्यते–सीताऽऽदिविषयत्वेन रत्युत्पत्तौ पातकित्वापातात्, स्वकान्तविषयत्वेन तदनुसन्धानापत्तेः, रत्यादिषु भावप्रसङ्गाच्च[२]। नाभिव्यज्यतेऽभिव्यक्तेर्ज्ञानविषयत्वेन तद्दूषणग्रस्तत्वात्। काव्ये नाट्ये च कृतास्पदेन भावकत्वव्यापारेण भाव्यमानः सकलसामाजिकगततया सम्भाव्यमानः। कोऽयं भावकत्वव्यापार इत्याह––अभिधातो द्वितीयेन साधारणीकरणात्मना। अभिधेति भट्टादिप्रसिद्धवृत्त्युपलक्षणम्[३]। तदतिरिक्तेन समुद्रलङ्घनोत्साहशालिहनूमदादिवर्णनीये कवित्वभावकानां भेदानुव्यवसायरूपेणेत्यर्थः। स्थायी रामादौ स्थिरः। भोगेन भुज्यते विषयीक्रियते। कोऽयं भोग

१. एवमादर्शपुस्तके। 'न ताटस्थ्येने'ति मूलानुगतः पाठः स्यात्। लोल्लट–शङ्कुक-भट्टनायकानां मतानि किं सारत उत स्वरूपतः सामग्र्येण तत्कृतनाट्यशास्त्रविवरणेभ्यो निष्कृष्टानीति दृढतया वक्तुमिदानीं न पार्यते। परमभिनवभारत्यां ध्वन्यालोकलोचने च सङ्कलितसारे तत्तन्मतोद्धारेऽयमेव प्रायः पन्था वक्तव्यविषयोपस्थापने प्रमाणसिद्धः क्रमश्चेति प्रक्रान्तादवसीयते।

२. टीकाग्रन्थोऽत्र नातिस्फुटः। स्वगतत्वेन तथाभावेन रसस्य भावनीयत्व'मिति विवेकमन्तव्यादत्र टीकायां भावपदेन "रतिर्देवादिविषये"त्यादिरर्वाग् लक्षित उद्दिष्टः स्यादित्यनुमीयते। एवं विवेके—'भट्टनायकदर्शने तु रसस्योत्पत्तिप्रतीत्यभिज्ञप्तिपक्षान् दूषयित्वा भोगपक्षः प्रतिष्ठापितः। तत्रोत्पत्तिवादिना लोल्लटेन विभावैरेवोत्पत्तिरङ्गीकृता, अनुभावव्यभिचारिणोः प्रत्यायकत्वेन पोषकत्वेन चाभ्युपगतत्वात्।······प्रतीतिस्त्वनुमानरूपा श्रीशङ्कुकेनाङ्गीकृता। अभिव्यक्तिः पुनर्विद्यमानस्यैव स्थायिनो ध्वनिवादिनाऽभ्युपगता। तत्र त्रयाणामपि पक्षाणां साधारणमिदं दूषणम्। स्वगतत्वेन तथाभावेन रसस्य भावनीयत्वम्, परगतत्वेन ताटस्थ्याद्रसनीयत्वाभाव एवं'त्यादिः। तथा माणिक्यचन्द्रोऽपि 'किञ्चोत्पत्तिपक्षे सीताऽऽदिषु कामित्वं स्यात्। करुणस्योत्पादाद् दुःखितत्वञ्चे'त्यादि वदन् सम्प्रदायप्रवर्तयितुरभिनवगुप्तस्यैव मतमनुवदति।

३. तेन अभिधात इत्यनेन लक्षणात् इत्यपि बोध्यमिति टीकाकृत्सम्प्रदायः। 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापार' इति स्वयं वदता भट्टनायकेनाप्यभिद्यापुच्छभूताया लक्षणाया मीमांसाऽऽदिदर्शनस्वीकृतसामर्थ्याया उद्देशो विहितः। अभिधाविलक्षणैव रसप्रतीतिरिति तत्पक्षो निष्कलङ्कः। अत्र लोचनग्रन्थः "काव्यात्मनः शब्दस्य त्र्यंशताप्रसङ्गात्। तत्राभिधायकत्वं वाच्यविषयं, भावकत्वं रसादिविषयं, भोक्तृत्वं सहृदयविषयमिति त्रयोंऽशभूता व्यापाराः"।

व्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यत इति भट्टनायकः ।

इत्याह—सत्त्वेति । सत्त्वस्योद्रेको रजस्तमसी अभिभूयाविर्भावस्तस्मात्प्रकाशः स्पष्टतरो य आनन्दस्तनमयी तदेकरूपा या संवित्तत्र विश्रान्तिः पूर्वापरानुसन्धानादिबाह्यप्रमेयव्यासङ्गाभावः, स एव सतत्त्वं स्वरूपं यस्य तेन । विश्रान्तिगतत्वेनेति पाठे विश्रान्ति गतः प्राप्तो विश्रान्तिगतः प्रमाता तस्य भावो धर्मो विश्रान्तिगतत्वं[१] तेनेति भट्टनायको ध्वनिदर्शनविद्वेषी मन्यते ।

अत्र किंगतो रत्यादिः साधारण्याभिमानविषयो योग्यतामापद्यते ? न तावदनुकार्यानुकर्त्तृगतः, असन्निहितस्य भोगविषयताऽनुपपत्तेः, साधारण्यबलादेव भावके सन्निहित इति चेत्, तथापि वास्तवताविरहेण तद्बुद्धेरप्रमात्वापातः । कुरु च तत्र प्रामाण्थमनियतम्[२] । किञ्च साधारण्येन प्रतीतस्य साधारणघटादिवद् रस्यमानत्वमेव । अतएव 'साधारणत्वाकारोऽपि तत्र नोन्मिषति स्फुट'मित्यबोचं ध्वनिसिद्धान्तसंग्रहे[३] । किञ्च भोगविषय एव भोग्यः, न च रसस्तथा, तस्य तद्बाह्यसिद्धत्वाभावादिति प्रतीतिपक्षोक्तदोषः । कथं तर्हि व्यञ्जनपक्षेऽपि निस्तार इति चेत्, सत्यं, प्रकाशप्रादुष्कृतरूपनाममात्रेणैव रसादिप्रतीतौ न व्यञ्जनाऽभिधानमङ्गीक्रियते ।

वस्तुतस्तु विलक्षण एवायं व्यापारः, अतएव रसनास्वादनचर्वणादयो विलक्षणव्यपदेशाः । व्यञ्जकता तु पृथक्सिद्ध एवार्थे भवति । यथोक्तं प्राचीनैः—

स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः ।
यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात् ।। इति ।।[४]

न च वाच्यं, मत्पक्षेऽपि दीयतामियमेव प्रसारिणी दृष्टिः, भोगैकार्थस्यैव हि रसे भोज्यत्वमुपचरितमस्ती,ति । एवं तर्हि नामान्तरमेव भोगो रसनं व्यञ्जनञ्च इत्यस्मानेव सर्वात्मना शरणं गतोऽस्ति । ततश्च निवर्त्त्यतामस्माकं सर्वेषामु-

१. न्यायपञ्चाननोपाधिको जयरामोऽप्येतदेव पाठद्वयमुद्धरति स्वटीकायाम् । अभिनवभारत्यां बरोदामुद्रिनायां 'संविद्विश्रान्तिविलक्षणेन परब्रह्मास्वादसविधेन भोगेन भुज्यत' इति पाठः ।

२. अत्र पाठो न सम्यङ् इति प्रतिभाति ।

३. इतः सिद्धान्तसंग्रहग्रन्थः कारिकावृत्त्यवयवद्वयसमन्वितो निबन्धग्रन्थ एवेत्यनुमीयते ।

४. इयं प्राचीनानां कारिका व्यक्तिविवेके, रुचककृते काव्यप्रकाशसङ्केते, विश्वनाथकृते साहित्यदर्पणे चोद्धृता । शान्तरक्षितकृते तत्त्वसंग्रहें (कारिका २१६०, २२६६, २५०३) प्रभाचन्द्रकृते प्रमेयकमलमार्त्तण्डे (३० क । ३० ख पृः) घटप्रदीपन्यायमयोऽयं नयः समुद्दिष्टः । एवमभिनवगुप्तपादा आहुः "रस्यतैकप्राणौ ह्यसौ, न प्रमेयादिस्वभावः । सा च रसना न कारकव्यापारः । स्वयन्तु नाप्रामाणिकी, स्वसंवेदनसिद्धत्वात् । रसना च बोधरूपैव किन्तु बोधान्तरेभ्यो लौकिकेभ्यो विलक्षणा, उपायानां विभावानां लौकिकवैलक्षण्या"दिति ।

लोके प्रमदाऽऽदिभिः स्थाप्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यवहार्य्यैर्ममैवैते, शत्रोरेवैते, तटस्थस्यैवेते, न ममैवैते, न शत्रोरेवैते, न तटस्थस्यैवेते, इति सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रती-

---

पजीव्येभ्यः सकलरसाचार्यचक्रवर्त्तिभ्यो ध्वनिकारपादेभ्यः पूर्वग्रहीता रोषकषायविषमा दृष्टिः, अङ्गीकुरु च सहृदयहृदयचिरनिद्राणानादिवासनाऽन्तर्लीनस्यैव रत्यादेः रसत्वेन स्फुरणम् इति विश्रान्तो विवादः[१]। एषाञ्च पक्षाणामुत्तरोत्तरबलीयस्तया नासङ्गतः क्रमोपन्यासः, पूर्वेषां निराकार्यत्वञ्च, 'व्यक्तः स तै'रित्यादि सूत्रयता सूत्रकृता ध्वनिदर्शनरहस्याविष्कर्त्तरि च श्रीमदाचार्याभिनवगुप्तपादा इति गुरुगौरवं दर्शयता च वृत्तिकृता सूत्रितं मन्तव्यम्[२]।

सम्प्रति स्वमतमाह—**लोक इति**। स्थायी यावज्जीवमविच्छेद्यवासनो रत्यादिः। तदनुमाने अभ्यासेन पाटवं प्रकर्ष इति व्याप्त्याद्यनुसन्धानविलम्बाभावसूचनम्। भावकवासनाऽऽत्मभूतस्य रत्यादेर्विशेषेण भावनमास्वादाङ्कुरणयोग्यतानयनं विभावनम्। आदिपदेनानुसमनन्तरमेव भावनं तथाभूतस्यैव रत्यादेः रसादिरूपतयाऽनुभावनं, सम्यक्चारणम् अतथाभूतस्यैव तथाभावपरिणतिनयनं

---

१. अभिनवभारत्यां भट्टनायकमतस्येत्थं विमर्शः साधितः—प्रतीत्यादिव्यतिरिक्तश्च संसारे को भोग इति न विद्मः। रसनेति चेत्, साऽपि प्रतिपत्तिरेव, केवलमुपायवैलक्षण्यान्नामान्तरं प्रतिपद्यतां, दर्शनानुमितिश्रुत्युपमितिप्रतिभानादिनामान्तरवत्। निष्पादनाभिव्यक्ति (पक्ष) द्वयानभ्युपगमेव च नित्यो वाऽसन्वा रस इति तृतीया गतिः स्यात्। न चाप्रतीतं वस्त्वस्ति व्यवहारे योग्यम्। अथोच्यते, प्रतीतिरस्य भोगीकरणं, तच्च रत्यादिस्वरूपम्। तदस्तु, तथापि न तावन्मात्रम्। सत्त्वादिगुणार्हा चाङ्गाङ्गिवैचित्र्यमतम् कल्प्यमिति का त्रिपक्षेनेयत्ता?······यत् "काव्येन भाव्यन्ते रसा" इत्युच्यते तत्र विभावादिजनितचर्वणात्मकास्वादनरूपप्रत्ययगोचरताऽऽपा(द)नमेव यदि भावनं तदभ्युपगम्यत एवे"ति।

वस्तुतस्तु "आस्वादनात्मानुभवो रसः काव्यार्थ उच्यते" इति वदता भट्टनायकेन "काव्यार्थो रस" इति स्वीकुर्वतोऽभिनवगुप्तस्य न महान्मतभेदः। परं भट्टनायकेन 'काव्ये व्यापारस्य प्राधान्यं प्रतिपादितं, ध्वनिकारादिसरणिमनुसरताऽभिनवगुप्तेन व्यापारसिद्धवस्तुतो व्यङ्ग्यरूपस्य रसस्य विश्रान्तिधामत्वादात्मत्वं सिद्धान्तित'मित्येव भेदः। सूक्ष्मदृशा "आस्वादजीवातुः पदसन्दर्भः काव्य"मिति "वाक्यं रसात्मकं काव्य"मिति च निर्दिशतोश्चण्डीदासविश्वनाथयोरालङ्कारिकवर्ययोरेष एव परमार्थिको भेद इत्यास्तां विस्तरः।

२. आचार्य्याभिनवगुप्तपादमतमेव स्वमतमिति च पादा इति बहुबचनप्रयोगेण सूचितम्। "सर्वस्वन्तु रसस्यात्र गुप्तपादा हि जानते" इति माणिक्यचन्द्रसंग्रहश्लोकस्तदेवानुवक्ति।

तैरभिव्यक्तः, सामाजिकानां वासनाऽऽत्मतया स्थितः, स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमित-

---

सञ्चारणञ्च गृह्यते। व्यापारेत्यतः पूर्वमलौकिकेति शेषः। सम्बन्धेन बोध्यो विशेषः प्रतिनियतपुरुषगतत्वलक्षणः सम्बन्धविशेषः, तस्य स्वीकारपरिहार-नियमो नियमेन भावाभावाङ्गीकारस्तस्यानध्यवसायादनिश्चयादिति साधारण्य-प्रतीतिस्वरूपकथनम्। पञ्चम्युपपत्तिस्तु अनध्यवसायपदस्यानुव्यवसायज्ञानवाचक-ताविरहेण निश्चयाभावमात्रपरत्वाङ्गीकृत्या[१]। यद्वा प्रतीतैरित्यत इति व्यव-हार्यैरिति शेषः। अभिव्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतः। स्थायीति— तस्यामेव हि दशायां प्रत्यभिज्ञायमानं लौकिकदशाप्रसिद्धं स्थैर्यमाश्रित्य स्थायि-पदप्रयोगो मुख्यः। अन्यथा रतिहासादिमात्रस्य स्थायित्वे हासक्रोधादीनां शृङ्गा-रादौ सञ्चारिता न स्यात्। तदुक्तं "रसावस्थः परं भावः स्थायितां प्रति-पद्यत" इति।

नियतेति—वासनायाः समानाधिकरणास्वादाविर्भावकत्वात्, अन्यथा नाटयमण्डपस्थितजरन्मीमांसकश्रोत्रियवैयाकरणवाहि'ही'कादिष्वपि प्रसङ्गात्[२]। साधारणोपायेति विशेषणप्रधानं द्रष्टव्यम्। उपायानां विभावादीनां साधारण्यं सम्बन्धनियमभावाभावानवसायस्तद्बलात्। तत्कालेति–अत्रापि विशेषणं प्रधानं, परिमितस्य नियताधिष्ठानस्य प्रमातृभावस्य तस्मिन्काले यद्विगलनं स्वसंवेदनं तद्वशेनोन्मिषितोऽभिमानविषयीकृतो वेद्यान्तरसम्पर्कशून्यो विषयान्तरव्यासङ्गेना-विच्छिन्नप्रवाहः अपरिमितः साधारणो भावः स्वप्रवृत्तिनिमित्तं प्रमा[३] यस्य तेन।

अत्र यद्यप्यपारिमित्यमात्रस्यानभिमन्यमानत्वं, प्रमाया वास्तवत्वात्, तथापि तद्विशिष्टायामभिमन्यमानतोक्तिः। न चैतदपि वास्तवमपरिमित्वाभिमानविषयत्वं

---

१. नीलतद्धियोरभेदरूपस्य दार्शनिकैर्निरुक्तस्यानुव्यवसायस्य नात्र ग्रहणमिति टीकाकृत्। प्रथमकल्पेरसनिष्पत्तौ विशिष्टपुरुषसंपृक्तताऽपास्ता—इयमेव साधारणीकृतिरिति व्यप-दिष्टा। द्वितीयकल्पे 'रसाः प्रतीयन्त' इत्यादिष्विव पारिभाषिकेऽर्थे प्रयोगः। व्यञ्जनागम्यैरिति विशेषनिर्देशः।

२. वाहिकानामरसिकत्वे तद्गतबुद्धयभाव एव निदानम्। श्रोत्रियवैयाकरणानान्तु वेदाद्यभ्या-सजडत्वेन विषयपराङ्मुखतया चारसिककक्षायामन्तर्भुक्तिः। धर्मदत्तपद्यं "सवासनानां सभ्यानां रसस्यास्वादनं भवेत्। निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः।" एतदेव प्रमाणयति।

३. 'सुखदुःखादिभिर्भावैर्भावस्तद्भावभावन'मिति निरुक्तलक्षणं पदार्थं इति वा। अत्र तद्भावभावनं नाम तन्मयत्वेनावस्थानमित्यभियुक्ताः।

प्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदय-संवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणो,

---

प्रमाया इति पारिमित्यासंवेदनमवगृह्य पारिमित्याभिमान उच्यते, अभिमानस्य तत्कालमसंवेदनादसंविदितरत्याद्युपपत्तौ प्रमाणाभावात्। किञ्चाभिमानस्य रसप्रत्ययनिवेशे तदप्रमात्त्वापातः। तदभावे च तत्कालीनताविरहः। न च पूर्वः पश्चाद्वा भवन्नभिमानस्तदुपयोगी। एतच्च प्राचीनग्रणयानुरोधिना ग्रन्थकृता कण्ठतो नोक्तं, प्रमात्रेति वेद्यान्तरेति च वदता सूचितमेव[१]। संवाद ऐकरूप्यम्, तद्भाजा तत्कर्त्रा पूर्वोक्तपरिमितप्रमातृताऽनध्यवसायरूपेण। साधारण्येनेति-फलसम्बन्ध-प्रकटनाय पुनरुक्तिः। अन्यथा हि रत्यादीनां स्वगततया प्रतीतौ व्रीडाऽऽतङ्कादिः, परगतया च दूरस्यता स्यात्, न चमत्कारोद्रेकः[२]। एवं साधारण्यप्रतीतावपि साधारणनटादिप्रतीतिवत् ?[३]। स्वाकार इवेति—अहं वेद्मीतिवद् ज्ञातृज्ञान-भेदोल्लेखाभावाद् गोचरीकृतः। यथा दीपोऽनन्तरं स्वगोचरं घटादि प्रकाशयति तथा स्वयमेव प्रकाशितः यद्वा चिदानन्दमयोऽयं पुरुष इति वेदान्त-नयेऽभिन्नोऽपि स्वयमेव प्रमात्रा वासनोपनीतरत्यादितादात्म्येन गोचरीकृतः समुल्लिखितः। चर्व्यमाणताऽऽस्वादनं तदेवैकः प्राणो जीवः स्वरूपमस्येति चर्व्य-माणतैकप्राणस्तद्बहिरसन्नित्यर्थः। विभावादिजीवितावधिस्तदाकारसंवलितप्रतीति-मयत्वात्तदुपाधानतिरोधानेनोपाधेयतिरोधेयस्वरूपः। पानकेति तत्र यथा कर्पूर-मरिचादिरसाः सम्मिलिता युगपदास्वाद्यन्ते तथाऽत्रापि विभावादिभावानामेकता-प्रतीतिः। एतच्चाकाराणां बाध्यसजातीयताप्रत्यभिज्ञानात्।

वस्तुतस्त्वखण्ड एवायं, 'वेदान्तप्रसिद्धब्रह्मतत्त्ववत्[५]। चर्व्यमाण आस्वा-

---

१. प्राचीननये रसादौ ज्ञानतादात्म्यस्य स्फुटमनपलापात्, नव्यमते "प्रमाणं चर्वणैवास्य स्वाभिन्ने विदुषां मत" मित्यादिरीत्या भगवत्या अनुभूतिशक्तेः सर्वाभिभावकत्वस्वी-काराच्च टीकाकृतामेवं साटोपमाशयाविष्कारः। "आम्नायसिद्धे किमपूर्वमेतत्संविद्वि-काशेऽधिगतागमित्वम्। इत्थं स्वयंग्राह्यमहार्हहेतुद्वन्द्वेन किं दूषयिता न लोक" इत्यादि रसतत्त्वाविष्कारिकाऽभिनवभणितिरलौकिकमभिनवस्वरूपमेनमुद्घाटयति।

२. सम्बन्धविशेषेति सम्बद्धपदे प्राक् सकलसहृदयसंवादभाजा साधारण्येनेति पश्चात्साकल्ये-नेति द्विधैव साधारण्येनेति पदस्य प्रयोगः। टीकायामत्र मूलस्थितानां पदानां यथाक्रमं व्याख्या यत्र सर्वत्र विहिता तत्र बोधवैशद्यप्रयास एव हेतुः सम्बन्धीति क्वचित् पाठः।

३. अत्र टीकायां किञ्चित् गलितं स्यात्।

४. व्याकरणमतेनेदमिति नागेशः।

५. 'परमार्थतस्त्वखण्ड एवायं वेदान्तप्रसिद्धब्रह्मतत्त्ववद् वेदितव्य' इति ग्रन्थस्यास्योद्धारः साहित्यदर्पणे। अखण्डस्य नाम प्रपञ्चरहितस्य ब्रह्मणो ज्ञानं यथा खण्डशः समुल्लसितै-

विभावादिजीवितावधिः, पानकरसन्यायेन चर्व्यमाणः, पुर इव परिस्फुरन् हृदयमिव प्रविशन्, सर्वाङ्गीणमिवालिङ्गन् अन्यत्सर्वमिव तिरोदधद्, ब्रह्मास्वादमिवानुभावयन्; अलौकिकचमत्कारकारी शृङ्गारादिको रसः।

स च न कार्यः, विभावादिविनाशेऽपि तस्य सम्भवप्रसङ्गाद्। नापि

द्यमानः। काल्पनिकमास्वाद्यास्वादयोर्भेदकथनम्। कर्मकर्तरि वा प्रत्ययः[1]। पुर इवेत्यादाविवशब्दानां क्रियाभिरन्वयः। सर्वाङ्गीणमिति सर्वाङ्गव्यापनं यथा स्यादित्यर्थः। एतच्च सर्वमलौकिकत्ववचनायानूदितम्। चमत्कारेति—अतिशयोक्तिरूपकाव्यपरिशीलनाद्भवति[2] हि विस्मयापरपर्यायश्चमत्कारः सर्वरसप्राणभूतः। तस्य रागाद्यङ्गप्रवणत्वेन यथायथं शृङ्गारादिव्यवहारः, तदभावे त्वद्भुतव्यपदेशः—इत्यस्मत्पितामहश्रीमन्नारायणपादैस्त्रिकलिङ्गेन्द्रश्रीनृसिंहदेवचक्रवर्त्तिगोष्ठीगरिष्ठानां पुरतो धर्मदत्तमहाकविः स्थगितः। कारीति—काल्पनिकभेदात्। शृङ्गारादिक इति—वासनोद्धाररूपः स एव सर्वो रसः। वासनायास्तु रत्याद्यनुरोधावान्तरवैषम्यात् शृङ्गारादिपदविशेषलाभः।

एवं सिद्धान्तसारं संगृह्य तत्रावान्तरविप्रतिपत्तीर्निराकर्त्तुमाह—स चेति। कार्यत्वे हि विभावादिज्ञानजन्य एव वाच्यः। तथा च सति विभावादिज्ञानस्य विनाशेऽभावेऽपि तस्य रसस्य सम्भवाप्रसङ्गः। नह्यवश्यं कारणावभासकाल एव कार्यावभासकालः, न चैवं रसे, तस्य विभावादिसमूहालम्बनशरीरत्वात्। अपि च कार्यं स्वकारणैः सह नैकस्यां संवित्यवभासमानं दृष्टम्। एतच्च सुखं विभावादिसंवलितं भासते। तस्मान्न कार्यम्।

र्मायाविजृम्भितैर्घटपटादिकल्पितसत्ताकैः पदार्थचक्रैः साहचर्येण सम्पद्यते, तथा तत्त्वत एकस्य समग्रस्य रसस्य खण्डशः कल्पितैर्विभावादिव्यपदेश्यैः सुखदुःखजननशक्तियुतैर्विषयसामग्रीवशोन्मिषितैरुपपद्यते, आस्वादक्रमबोधसौकर्यार्थं प्रेक्षकाणां सहृदयानां भावकानां च।

१. अत्रादर्शपुस्तके द्वित्राणि पत्राणि पत्राङ्कगणनायां प्रमादित्वापातादतितरां विपर्यस्तानि यद्धेतुकश्चतुर्थोल्लासटीकाग्रन्थेऽत्र दशमोल्लासटीकांऽशस्य गर्भीकारः। अस्माभिर्यथामति मूलग्रन्थसन्दर्भक्रममालोचयद्भिः कथञ्चिदनवद्यप्रायोऽयं पाठक्रमो निरधारि। परं द्वितीयपुस्तकस्याप्यलाभाच्चतुर्थोल्लासस्थस्यास्य टीकांऽशस्य विशुद्धिविषये न वयं तथा निःसन्दिग्धा यथा व्यत्यस्तदशमोल्लासस्य क्रमरूपविषये। दशमोल्लासस्य द्वितीयपुस्तकासादनेन सम्पादनसौकर्यं परं जातम्।

२. इयमतिशयोक्तिर्वक्रोक्तिरिति प्रसिद्धापरपर्याया "सैषा सर्वैव वक्रोक्तिरनयाऽर्थो विभाव्यते। यत्नोऽस्यां कविना कार्य्यः कोऽलङ्कारोऽनया विने"ति भामहभणितयोपदिष्टमाहात्म्या "अलङ्कारान्तराणामप्येकमाहुः परायणम्। वागीशमहितामुक्तिमिमामतिशयाह्वया" मित्याचार्यदण्डिघोषितसामर्थ्या सर्वालङ्कारजीवातुरत्रोद्दिष्टा टीकाकृता।

ज्ञाप्यः, सिद्धस्य तस्यासम्भवाद्। अपि तु विभावादिभिर्व्यञ्जितश्चर्वणीयः। कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत्–न क्वचिद् दृष्टम्, इत्यलौकिकत्व—' सिद्धेर्भूषणमेतन्न दूषणम्। चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योऽप्यु-

न ज्ञाप्यो ज्ञानविषयः। सिद्धस्य प्रतीतेर्बहिरिति शेषः। किन्तर्हि तत्सद्भावे प्रमाणमित्याह–अपि त्विति। चर्वणैव भगवती[२] स्वसंविदितस्वरूपा स्वाभिन्ने तस्मिन्प्रमाणमिति भावः। व्यञ्जित इति चर्वणीय इति च व्यक्त इति चर्व्यमाण इतिवद् व्याख्येयम्। विभावादिभिर्व्यञ्जित इत्यन्ये। विभावादेस्तत्र हेतुत्वमाविष्कृतं, न चासौ कारकज्ञापकरूपः, तस्याकार्याज्ञाप्यरूपत्वात्।

नच तदुभयभावो हेतुत्वं निर्वर्त्तितुमीष्टे 'निर्विशेषं न सामान्य'मिति[३] न्यायात्, इत्याह–कारकेति। यद्यपि ज्ञापकस्य न वास्तवं हेतुत्वं तस्य ज्ञानं प्रति हेतुत्वात्, ज्ञापनस्य विषयस्वरूपातिरिक्तत्वात्, तथापि वैशेषिकादिभिर्ज्ञापकस्य धूमादेर्वह्निं प्रति हेतुत्वं व्यवह्रियत इति तदुपन्यासः। अन्यदिति–विवक्षितं, यदालिङ्ग्य हेतुत्वसामान्यं व्यवतिष्ठेतेति भावः। न दूषणमिति—न खल्वन्यत्रादर्शनमात्रेण वस्तुस्वरूमपह्नूयते। माभूत्कारकत्वज्ञापकत्वे कारकज्ञापकाभ्यामन्यत्रादृष्टे इति तत्स्वरूपापहारः, तस्मादस्ति कश्चिद्विशेषो भावनत्वरसनत्वाख्यो, यं क्रोडे निधाय विभावादौ हेतुत्वसामान्यं निविशत इति सन्तोष्टव्यम्। सम्प्रति रसे कार्यत्वज्ञाप्यत्वव्यवहारं कथञ्चिन्निर्वाहयति—चर्वणेति।

यद्यपि रसानन्यतया चर्वणाऽपि न कार्या तथापि कादाचित्कतया तत्कार्यत्वमुपकल्प्य तदेकात्मन्यनादिवासनापरिणतिरूपेत्यादिभागेऽपि तथा व्यवहार इति भावः[४]। लौकिकं प्रत्यक्षादिरूपं यत्प्रमाणं तद्विलक्षणभाव एवं संवित्तिः, तस्य पारिमित्यादिसम्बन्धपुरस्कारात्स्वात्ममात्रविश्रान्त्यभावाच्च। परिमितं परि-

१. इत्यलौकिकसिद्धेरिति वा पाठः।

२. वेदान्तनये प्रकटितकीर्त्तिरघटितघटनापटीयसी भगवती मायेव चर्वणैव सर्वशक्तिमती रसनिपत्तौ सहायाऽत्रैवं स्मर्यते।

३. कारकज्ञापकाभ्यां विलक्षणे व्यञ्जकरूपे सामान्ये स्वसंवेदनसिद्धस्यालौकिकस्य रसपदार्थस्यान्तर्भावः। अलौकिकत्वमुद्दिश्यान्यत्रोक्तम् "विज्ञानं जडरूपेभ्यो व्यावृत्तमुपजायते। इयमेवात्मसंवित्तिरस्पर्शा जडरूपता"॥ इति।

४. एवमभिनवभारत्यां "तर्हि लौकिकचित्तवृत्त्यनुमाने का रसता?·········अलौकिकचमत्कारात्मा रसास्वादः स्मृत्युनुमानलौकिकस्वसंवेदनविलक्षण एव। तथाहि लौकिकेनानुमानेन संस्कृतः (?) प्रमदाऽऽदिना ताटस्थ्येन [न] प्रतिपद्यते, अपि तु हृदयसंवादात्मकसहृदयत्वबलात्पूर्णीभवद्रसास्वादाङ्कुरीभावेनानुमानस्मृत्यादिसोपानमनारुह्यैव तन्म-

च्यताम् । लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिपरिमितयो[१]गिज्ञानवेद्या

मितविषयमाध्वासिकदशायां योगिनो ध्यानप्रतिपन्नमुक्त्यात्मगततया जन्यं यदसन्निहितवस्तुज्ञानं तत्ताटस्थ्येनौदासीन्येन। अवबोधो विषयप्रकाशः। शालिपदमत्र स्वरूपपरम्। न चैवं रसः, तथा सत्यरस्यताऽऽपत्तेरित्युक्तत्वात्। विमुक्तदशायां शुकादीनां ज्ञानं परिमितेतरसर्वविषयम्। न चैवं रसः। जीवन्मुक्तदशायान्तु शुकादीनामेव ज्ञानं चिदानन्दमयनिष्प्रपञ्चस्वात्ममात्रविश्रान्तम्, अतएव वेद्यान्तरसंस्पर्शरहितं रागादिसम्भेदशून्यम्। न चैवं प्रकृते रत्यादि, तत्कारणादिसम्भेदस्यानुभूयमानत्वात्। विलक्षणेत्युक्तरीत्या सर्वत्रान्वीयते। अत एव लोकोत्तरं निखिलज्ञानभिन्नाकारं स्वसंवेदनं स्वप्रकाशस्तद्गोचरस्तच्छरीरान्तर्गततया तत्प्रकाशेनैव प्रकाशितो रतिसुखादिभागिति प्रत्येयोऽप्यपरोक्षव्यवहारत्वेनोच्यताम्। तद्ग्राहकं चेति—स चासौ ग्राहकञ्चेति तद्ग्राहकम्[२]। निर्विकल्पकमिन्द्रियापेतं नामजात्यादिवैशिष्ट्यशून्यस्वलक्षणावभासम्। विभावादीनामसन्निहितानां परामर्शनमनुसन्धानम्। तत्प्रधानत्वात्तद्धेतुत्वात्। सविकल्पकं हीन्द्रियसम्बन्धमात्रग्राहि-

यीभावोचितचर्वणाप्राणतया।.........किञ्च लौकिकविभावादिसंयोगबलोपनतैवेयं चर्वणा। सा च प्रत्यक्षानुमानागमोपमानादिलौकिकप्रमाणजनितरत्याद्यवबोधतस्तथा योगिप्रत्यक्षजतटस्थपरसंवित्तिज्ञानात्सकलवैषयिकोपरागशून्यशुद्धपरयोगिगतस्वानन्दैकघनानुभवाच्च विशिष्यते।...अत एव विभावादयो न निष्पत्तिहेतवो रसस्य, तद्बोधापगमेऽपि रससम्भवप्रसङ्गात्। नापि ज्ञप्तिहेतवो, येन प्रमाणमध्ये पतेयुः, सिद्धस्य कस्यचित्प्रमेयभूतस्य रसस्याभावात्। किं तर्हि एते विभावादय इति। अलौकिक एवायं चर्वणोपयोगि विभावादिव्यवहारः।...नन्वेवं रसोऽप्रमेयः स्यात्?...रस्यतैकप्राणो ह्यसौ, न प्रमेयादिस्वभावः। तर्हि सूत्रे निष्पत्तिरिति कथं नेयम्? रसस्यापि तु तद्विषयरसनायास्तस्मान्निष्पत्त्या तु यदि तदेकायत्तजीवितस्य रसस्य निष्पत्तिः? उच्यते—न कश्चिदत्र दोषः। सा च रसना न प्रमाणव्यापारो न वा कारकव्यापारः। स्वयन्तु नाप्रामाणिकी स्वसंवेदनसिद्धत्वात्" ।......"अतएवोभयदेशकालत्यागो (?) रोमाञ्चादयश्च भूयसा रतिप्रतीतिकारितया दृष्टास्तत्रापि लौकिकदेशकालानियमेन तत्र रतिं गमयन्ति यस्यां स्वात्माऽपि तद्वासनावत्त्वादनुप्रविष्टः। अत एव न तटस्थतया रत्यवगमो न च नियतकारणतया..." इत्यादि।

१. शालिमितेति क्वचित् पाठः।

२. अत्र षष्ठीसमास एव बहुतरसम्मतः, परमास्वादशरीरातिरिक्तो रसो नास्ति, आस्वादश्च विभावादिपरामर्शमय इति टीकाकृतस्तत्र निर्बन्धष्टीकाकृता। यद्वा राहुशिर इतिवत् समासः।

न्तसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोऽप्यभिधीयताम्। तद्ग्राहकं च न निर्विकल्पकं, विभावादिपरामर्शनप्रधानत्वात्[१]। नापि सविकल्पकं, चर्व्यमाणस्यालौकिकानन्दमयस्य

विकल्पविशिष्टं ज्ञानम्। चर्व्यमाणस्य चर्वणामात्रप्राणस्य स्वसंवेदनमात्र[२]—सिद्धत्वादपरिस्फुटविभावादिप्रकाशतयेति शेषः। आकाराणां[३] स्फुटाभासै रसनं न स्यात्, असाधारण्यावभासात्।

यत्तु 'स्वात्मन्यविकल्प इति न्याया'दिति श्रीधरेणोक्तं[४] तन्न युक्तं, प्रकाशमात्रे निर्विकल्पकत्वस्यांशान्तरे च विकल्पस्य प्रसङ्गात्। यदि त्वेकरूपतया परिहारस्तदा विकल्पत्वे सत्येव स्वात्मवन्निर्विकल्पकत्वं स्यात्। एतच्चोभयमङ्गीकुर्वतामुपनीय कासि बद्धो ग्रन्थिः। अविकल्पकतावादश्च पूर्वग्रन्थावयवविरुद्धः। उभयस्य निर्विकल्पकत्वस्य सविकल्पकत्वस्य चाभावो यत्र तदुभयाभावं, तथाभूतं स्वरूपं यस्येति विग्रहः। उभयात्मकत्वं निर्विकल्पात्मकत्वाभावेन सविकल्पात्मकत्वं सविकल्पकत्वाभावेन च निर्विकल्पात्मकत्वमुपचरितमित्यर्थः। पूर्ववत्कार्यत्वज्ञाप्यत्वविरहवत्। लोकोत्तरतां लौकिकयोगिकसकलसंविद्विलक्षणताम्। न तु विरोधमिति—तथाभूततयैव प्रमाणेनानुभावात्, अनुभावस्य चाबाध्यत्वात्[५]। तदुक्तं खण्डनकृता—

---

१. एवं श्रीधरचण्डीदासादीनां टीकासु पाठः। परामर्शेति वैकल्पिकः पाठः।

२. स्वसंवेदनसिद्धत्वादिति प्रचलितः पाठः। सौगतादिनये स्वसंवेदनसिद्धत्वं ज्ञानमात्रस्योट्टङ्कितम्। (श्रीधरकृतकाव्यप्रकाशविवेके त्वस्य विस्तरतो विचारः कृतः।) अतः स्वसंवेदनसिद्धत्वाद्विकल्पज्ञानमपि न रसस्य ग्राहकमिति स्थितम्।

३. आकाराणां लौकिकवस्तूनामिति पारिभाषिकेऽर्थे प्रयोगः, विभावादीनामित्यस्य प्रकृतेऽर्थे। 'विभावादिपरामर्शो हि शब्दनस्वभावो विकल्पकक्षां नातिक्रामति--तत्प्राधान्यान्न निर्विकल्पकम्।'' 'यदि रसः······सविकल्पेन गृह्यते तस्य लोकोत्तराह्लादरूपत्वं न स्यात्, लोकयात्रापथप्रविष्टत्वाद्विकल्पस्य। स्वसंवेदनसिद्धता च तस्य विघटेत, विकल्पाधीनस्यार्थस्य परसंवेदनेनापि साध्यत्वा'दिति भट्टगोपालः।

४. ''ननु सर्वज्ञानानां स्वसंवेदनप्रत्यक्षत्वे घटोऽयमित्यादिविकल्पज्ञानस्य निर्विकल्पत्वं, पीतशङ्खादिज्ञानस्याभ्रान्तत्वञ्च स्यात्=उच्यते विकल्पज्ञानमपि स्वात्मनि निर्विकल्पकमेव, घटोऽयमित्यनेन बाह्यसत्त्वं विकल्पयति, न त्वात्मानम्।······असद्विषयश्चात्र भ्रान्तिरुच्यते। यदुक्तं 'स्वरूपे सर्वमभ्रान्तं पररूपे विपर्ययः'।·········यद्यमी प्रकाशन्ते तदा स्वहेतोरेव प्रकाशस्वभावा उपपन्ना सन्तः प्रकाशन्त इति स्वीकर्त्तव्यमेवे'ति श्रीधरकृते काव्यप्रकाशविवेके स्थितम्।

५. यदाहुः ''युक्त्या पर्यनुयुज्येत स्फुरन्ननुभवः कये''ति।

स्वसंवेदनमात्रसिद्धत्वात्। उभयाभावस्वरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः ॥

व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणाम्, अश्रुपातादयोऽनुभावाःशृङ्गारस्येव करुणभयानकयोः, चिन्ताऽऽदयो व्यभिचारिणः शृङ्गारस्येव वीर-करुण-भयानकानामिति पृथगनैकान्तिकत्वात् सूत्रे मिलिता निर्दिष्टाः।

अन्यथाऽनुपपत्तिश्चेदस्ति वस्तुप्रसाधिका।
पिनष्टि दृष्टवैमत्यं सैव सर्वबलाधिका ॥

वाच्याऽन्यथोपपत्तिर्वा त्याज्यो वा दृष्टताग्रहः।
नह्येकत्र समावेशश्छायाऽऽतपवदेतयोः ॥[१]

श्रीमदिति काव्यार्थतत्त्वज्ञानसम्पत्तिः। आचार्य्यपदेन सम्प्रदायप्रवर्त्तकता। पादा इति गुरुगौरवमुच्यते[२]।

अत्र केचिद्विभावमात्रस्य, केचित्सञ्चारिमात्रस्य प्रतीत्या रसनिष्पत्तिमाहुः, वियदित्यादिषु तथा दर्शनात्[३]। यत्र च सर्वसानिध्यं तत्र यस्योत्कटतया प्रतीति-

---

१. खण्डनखण्डखाद्यम् (चौखम्बा संस्कृत सिरिज १२३ पृः)

२. अथवा पादा इति स्वस्य तत्सम्प्रदायानुवर्तित्वमित्यर्थः। वस्तुतस्त्वाचार्यपादान मियं विवृतिर्नव्यतान्त्रिकाणामालङ्कारिकाणां रसनिष्पत्तिव्याख्याने भित्तित्वेन परिकल्पिता। परम् "इति" इत्यन्तेन परामृष्टो मूलस्थलसन्दर्भः समाग्रयेण स्वरूपेण यथोद्दिष्टक्रमेण चाभिनवभारत्यां ध्वन्यालोकलोचने वा नोपलभ्यते। शिष्यस्थानीयैर्मम्मटभट्टैराचार्यवर्यस्य मतं तत्प्रणाल्या परिपाट्या संगृहीतमथवा स्मृतितस्तत्प्रसक्तोंऽश उद्ध्रियत तैरिति प्रतीयते।

३. नायमाक्षेपस्तावत् सूत्रकृदनन्तरभाविनो वृत्तिकारात् पूर्वतनान् वृत्तिग्रन्थतात्पर्यग्रहणविमुखान् वा कटाक्षयितुं सोपयोग इति टीकाकृत्स्वरसः। परमार्थतस्तु सूत्रवृत्त्युदादरणः समग्र एको ह्ययं ग्रन्थ इति प्रागेवास्माभिः सूचितम्। परमासन् केचनातिप्राचीना रसशास्त्रोपदेष्टारो यैर्विभावमात्राश्रयस्य सञ्चारिमात्रादेर्वा रसत्वेन स्वीकारो व्यधायि। एषां मन्तव्यमाभासतया क्वचित् भावप्रकाशादिसंग्रहग्रन्थेषूपलभ्यते। एतन्मते विभावादेर्यस्य कस्यचित् सद्भावे रसप्रतीतिरनिवार्या, द्विकसद्भावे तस्य उत्कर्षः, त्रिकसद्भावे तु श्रेष्ठता तस्याः। एतानेव लक्ष्यीकृत्य वृत्तिग्रन्थे वियदादिपद्येषु रसनिष्पत्तिसामग्रीचर्चाऽवतारिता।

वियदलिमलिनाम्बुगर्भमेघं
मधुकरकोकिलकूजितैर्दिशां श्रीः ।
धरणिरभिनवाङ्कुराङ्कटङ्का
प्रणतिपरे दयिते प्रसीद मुग्धे ! ॥ २७ ॥

इत्यादौ,

परिमृदितमृणालीम्लानमङ्गं, प्रवृत्तिः
कथमपि परिवारप्रार्थनाभिः क्रियासु ।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मी-
मभिनवकरिदन्तच्छेदकान्तः कपोलः ॥ २८ ॥

स्तत्प्रतीतिरेव रसबीजं, शेषस्तु वर्जनीयसन्निधिरेवेति ये मन्यन्ते तान्सर्वान्प्रत्याह[१]-व्याघ्रादय इत्यादि । एते हि यथा भीरूणां भयं तथा वीराणामुत्साहमपूर्वदर्शिनामाश्चर्यं, पुत्रादिव्यापादने च शोकं[२] जनयन्तीति काव्यनिबद्धानामेषां प्रतीत्या कस्य रसस्याभिव्यक्तिर्नियम्यताम्, तस्मात्सहकारिसमवधानरूपया सामग्र्यैव नियन्तुं शक्यम् । सा च विभावादित्रयमिलनरूपमेव । एवमुत्तरयोरपि वेदितव्यम् । पृथगेकैकशः । अनैकान्तिकत्वादेकस्मिन्नन्ते पक्षेऽनियतत्वात् । सूत्रे भारतीये । मिलिताः सर्वप्रधानद्वन्द्वेऽस्मदीये च सूत्रे समानतया निर्दिष्टाः । एतेन क्वचित्कस्यचिदुद्भटत्वमपि स्वात्मदार्ढ्यमेव धत्ते, न तु परशक्तिव्युदासम् ।

एषूदाहरणेषु तदा का गतिरित्याह—**वियदिति** । अलिमलिना अम्बुगर्भाश्च मेघा यत्रेति विग्रहः । मधुकरा एव कोकिलाः—तथा च यथा वसन्ते कोकिलैर्दिशां काऽपि लक्ष्मीस्तथा सम्प्रति मधुकरैर्मदत्वेन (मदमत्तत्वेन) मेदुरध्वनिभिरित्येकः (समाधानोपायः), क्वचन क्वचन केऽपि कोकिलाः प्रावृष्यपि माद्यन्तीत्यपरः । पाषाणप्रायः कठोरप्रदेशष्टङ्कः । प्रणतिपर इति विषयसप्तमी । अत्र मुग्धा प्रणतिपरश्च कान्तः परस्परमालम्बनं, गगनादयस्तूद्दीपनं, सामर्थ्यावसेयाश्चावहित्थावेगादयः सञ्चारिणः, रोमाञ्चस्तम्भकाकुयाञ्चाऽऽदयश्चानुभावाः ।

परीति—क्रियासु स्वशरीरधारणमात्रोपयोगिनीषु । अत्रानुभवैर्निद्राहाना-

---

१. विभावादीनां लौकिकतयोद्दिष्टानां समवेततया कार्यकारित्वादेव रसनिष्पत्तिः, न तु यस्य कस्यचिदेकस्य द्विकस्य वा । पानकरसन्यायेन समवाये इतरेषां नियमेन स्फुटानवभासेऽपि तत्सिद्धिरिति हि रसतत्त्वविदां राद्धान्तः । आपाततो यस्य कस्यचिदसन्निधौ तु नैतत्सर्वमफलं भवति । यतः "सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत् । झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते" ॥

२. क्रोधमित्यादर्शपुस्तकेऽसंलग्नप्रायः पाठः । वस्तुतस्तु व्यापादने चेत्यादिरंशोऽपि नातितरां समञ्जसः ।

इत्यादौ,

दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किञ्चाञ्चितभ्रूलतम्।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥ २९ ॥

इत्यादौ च,

यद्यपि विभावानामनुभावानामौत्सुक्य-व्रीडा-हर्ष-कोपासूयाप्रसादानां च व्यभिचारिणां केवलानामत्र स्थितिः, तथाऽप्येतेषामसाधारणमित्यन्यतमद्वयाक्षेपकत्वे सति नानैकान्तिकत्वमिति।

तद्विशेषानाह—

(४४) शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।

दिभिर्निर्वेदचिन्ताऽऽदयो व्यभिचारिण आक्षिप्यन्ते। आलम्बनस्य तु मालतीं प्रति जीवितसर्वस्वायमानस्य माधवस्य, उद्दीपनानाञ्च तद्गुणश्रवणादीनां प्रकरणादवगतिः।

दूरादिति - विवलनेन लज्जा, स्फारणेन हर्षः, आरुण्येन कोपः, भ्रूलताकौटिल्येन कोपस्यैव प्रकर्षकत्वलक्षणाऽसूया। चरणानत्या व्यतिकरः संसर्गोऽस्येति समासः। बाष्पेति-त्वयाऽप्येवं विषमविप्रियं कृतं, मयाऽतिकठिनयैतावत्पर्यंतं सोढ़मित्यनुतापः। ईक्षणं दर्शनम्। प्रपञ्चोऽत्र व्यावारबाहुल्यं, तत्र चतुरं शिल्पवत्? । जातागसि प्रमादान्न तु बुद्धिपूर्वं कृतागसि, अतएव प्रेयसि[१]। केवलानामेवेति—स्फुटतयेति शेषः। असाधारणत्वमितरापेक्षया व्यक्तिशक्तिमत्त्वम्, अन्यतमस्य द्वयोरुपादानस्थले द्वयस्यैकोपादानस्थले आक्षेपकत्वेन साहचर्य्यनैयत्येन नानैकान्तिकत्वं न व्यभिचारित्वगस्मदङ्गीकृतस्य सामुदायिकस्येत्यर्थः। अतो न विभावाद्येकतमनिर्वाह्यता रसस्येति।

विशिष्यन्त इति विशेषास्तस्य रसस्य सामान्यतो निर्णीतस्य विशेषा स्तानाहेति—प्रसक्तानुप्रसक्त्येत्यर्थः। शृङ्गारेति—परस्परजीवितसर्वस्वायमानयो-

---

१. मानिन्या इति विशेषणात्तथाऽवसीयते। अत्रौत्सुक्यादीनां बहूनां व्यभिचारिणां समावेशः। "यद्यप्यत्र प्रेयसीत्यालम्बनविभावोऽप्यस्ति तथापि रत्यनुकूलधर्मवत्तयाऽनिर्द्देशादनस्तिकल्प एवेति। मा मैवम्, एषां विभावादीनामसाधारण्येनान्यद्वयाक्षेपकत्वेनात्रापि मिलितानामेव व्यञ्जकत्वात्। नन्वेषाञ्चेदसाधारण्यं, किमन्यद्वयाक्षेपणेन, एकैकव्यभिचारेण हि त्रयोपादानम्······अतोऽसाधारण्येऽपीतरद्वयमाक्षिप्यते"।

रुत्तमप्रहृष्टयोर्नायकनायिकयो रतिप्रकृतिरभिलाषः पूर्वदर्शितसामान्ययोगाच्छृङ्गारः। तत्रालम्बनं नायकौ, तयोरेव लावण्ययौवनादिदेशकालविशेषादिरुद्दीपनम्, अनुभावास्तत्तन्नयनत्रिभागवीक्षणालिङ्गनादयः, सञ्चारिणश्च यथायथं सर्व एव भावाः[१]। तदुक्तम्—"एकोनपञ्चाशदमुञ्च भावा युक्त्या निबद्धाः परिपोषयन्ती"ति[२]। आत्मनः परस्य वा वाग्वेशरूपचेष्टावैकृतविलोकनाच्चेतोविकासो हासः। तत्प्रकृती रसो हास्यं, तत्रालम्बनं विकृतवेशः पुरुषः, तच्चेष्टाऽऽदिरुद्दीपनं, नयनविकाशहस्ततालिकाऽऽदयोऽनुभावाः, सञ्चारिणश्चावहित्थाग्लानिमूर्च्छाऽऽदय इति।

तत्रात्मनो यथा–गृहीततापसवेशं निर्वर्ण्य–रावणः—

"जातं मे परुषेण भस्मरजसा तच्चन्दनोद्धूलनं
हारो वक्षसि यज्ञसूत्रमुचितं क्लृप्ता जटाः कुन्तलाः।
रुद्राक्षः स किलैष यत्कुवलयञ्चैनांशुकं बन्धनं
सीतालोचनहारि कल्पितमहो रम्यं वपुः कामिना"॥

शेषन्तु वृत्तिकृदुदाहरिष्यति। बन्धुवधविभवनाशजनितशोकप्रकृतिः करुणः। तत्र च पतिमरणादिरालम्बनं, भूमिपतनरोदनोरस्ताडनादिरनुभावः, ग्लानिनिर्वेदमूर्च्छामरणादिः सञ्चारी।

ननु कथं करुणो रसः, तस्य शोकमयत्वात्, रसस्य च सान्द्रानन्दात्मकत्वात्। सत्यं, महाभारतादौ प्राक् पर्वाद्यनुभवे(?) तावदस्ति स्तनमर्दनगाढालिङ्गनादौ सुरताङ्ग इव सूक्ष्मपीडाऽनुवेधः, पश्चात् सान्द्रतरानन्दश्चमत्कारः स्वसंवित्तिसाक्षिकः, ततश्च कुतः करुणस्य न रसत्वम्? अशिक्षितास्तु तत्प्रतिबद्धे भूयोभूयः स्वहृदयप्रवृत्तेर्दुःखैकमयत्वे सत्यन्यथाऽनुपपत्त्या यष्टिलग्नवदकामेनाप्यङ्गीकार्याः[३]।

---

१. भावशब्दश्चित्तवृत्तिविशेषे रूढोऽपि रसशास्त्रनिर्दिष्टानां रत्यादीनां स्थायिनां निर्वेदादीनां त्रयस्त्रिंशतो व्यभिचारिणां स्तम्भादीनामष्टानामनुभावानां वा द्योतकतयाऽभिप्रेत इत्याशयः। यथायथमिति बुद्धिपूर्वकमुपन्यासः। एवमुत्तरत्रापि।

२. सन्दर्भोऽयं दशरूपकीयः (४।४९ निर्णयसागर)। युक्त्या निबद्धा इति पारिभाषिकतया मतानामेषां भावानां यदृच्छया साधितोऽसङ्गतः सन्निवेशो वारितः। 'अमी हि भावा'- इति मुद्रितपुस्तके पाठः। अमुञ्चेति पाठे सवनाम्नो शृङ्गारस्य परामर्शः। एतच्चोपलक्षणमात्रम्।

३. रसस्यानन्दमयत्वे सहृदयानामनुभव एव चरमं प्रमाणम्। 'लये सम्बोधयेच्चित्त' मित्यादिसन्दर्भे प्राचीनैरपि ज्ञानयोगिभिः 'नास्वादयेद्रस'मित्यादिना तस्यानन्दमयत्वभूमिका स्वीकृता। अशिक्षितप्रायाणामापाततो दुःखोदयो मोहमूलक एव। "करुणादावपि रसे जायते यत्परं सुखम्। सचेतसामनुभवः प्रमाणं तत्र केवलम्॥ किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः।" न काऽपीत्थमनुपपत्तिर्यतो "हेतुत्वं शोकहर्षादेर्गतेभ्यो लोक-

बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्यरसाः[1] स्मृताः ॥२९॥

एतेन क्रोधादिस्थायिनो रौद्रादयो व्याख्याताः। अपकारिणि क्रोधोद्रेकप्रकृती रौद्रः। अत्रालम्बनमपकारी, तदपकारादिरुद्दीपनं बाह्वास्फोटशस्त्रोल्लासप्रतिद्वन्दिग्रहादि–[2]रनुभावः, सञ्चारिणस्तु चपलतागर्वग्लानिमूर्च्छाऽऽदयः। दानयुद्धादिषूत्साहपरिपोषको वीरः। अत्रालम्बनं देययुद्धादयः, उद्दीपनं दानपात्रप्राप्तिसाम्राज्यादयः, अनुभावः सर्वस्वत्यागयात्राग्रहणादिः, सञ्चारिणो धृतिहर्षगर्वादयः। स्त्रीनीचादिगतविकृतसत्वादिदर्शनजनितभयस्थायी भयानकः। तत्र विकृतः सत्त्वादिरालम्बनं, तस्योच्चनादादिरुद्दीपनं नयननिमीलनगात्रसङ्कोचपलायनादयोऽनुभावाः, सञ्चारिणस्तु जडताग्लानिमूर्च्छामरणादयः। विकृतिपूतिमांसादिदर्शनाद्विषयवैरस्यभावनाच्च जुगुप्साप्रकृतिर्बीभत्सः। तस्य च पूतिमांसादिरालम्बनं, तत्रैव कृमिपातादिरुद्दीपनं, मुखविघूर्णननिष्ठीवनपराङ्मुखत्वादयो नीचेषु, उत्तमेषु तु कार्यान्तिरस्य व्यासङ्गादयोऽनुभावाः, निर्बेदापस्मारजाड्यादयो व्यभिचारिणः।

लोकोत्तरवस्तुप्रतिभासजनितविस्मयप्रकृतिरद्भुतः। तस्य चालम्बनं महापुरुषादिः, उद्दीपनं तद्गुणातिशयः, साधुवादशिरोधूननादयो नीचेषु, सस्पृहत्वादयस्तु महत्स्वनुभावाः, उत्साहधृतिहर्षादयः सञ्चारिणः। नाट्यरसा इति–सात्त्विकबहुलगीतवाद्यादिपूर्वकाभिनयेन पुरावृत्तानुकारो नाट्यं, तदाश्रया रसा नाट्यरसाः। ते चाष्टौ मुनिना कण्ठोक्ताः[3], शान्तस्य नाट्ये तादृक्पुष्टिविरहात्। यदाह ध्वनिकारः[4]–"पुष्टिर्नाट्येषु नैतस्ये"ति।

संश्रयात्। शोकहर्षादयो लोके जायन्तां नाम लौकिकाः। अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात्। सुखं सञ्जायते तेभ्यः सर्वेभ्य इति का क्षतिः॥" प्रकृत्या दुःखसंश्लेषविद्वेषिणः सुखास्वादनसादरस्य जीवलोकस्य यद्दशरूपकादौ रामायणादिश्रव्यकाव्ये च तद्वासनोपचरितं निर्बन्धदार्ढ्यं तदप्येतन्मूलकमेवेति कथं तस्यापलापः शक्यः?

१. 'नाट्ये रसा' इति वा पाठः।

२. 'अस्त्रोल्लासप्रतिग्रहादिरनुभाव' इत्यादर्शपुस्तके पाठः। अत्र मुनिः––"तस्य (रौद्ररसस्य) च ताडन-पाटन-पीडन-च्छेदन-प्रहरणाहरण-शस्त्रसम्प्रात-रुधिराकर्षणादीनि कर्माणी"-ति। अत्र प्रतिद्वन्द्विग्रहपदेन मुनिनिर्दिष्ट सम्प्रहारः सूचितः स्यात्।

३. बरोदामुद्रितनाट्यशास्त्रपुस्तके मूले शान्तरसविवेचनात्मक; सन्दर्भस्तु (३३२–३३६ पृ०) न मुन्युपज्ञमिति नास्ति सन्देहलेशावकाशः। नचापि तद्ग्रन्थव्याख्यानपरा टीकोपलभ्यते यथा शृङ्गारादिरसस्थले। अभिनवगुप्तपादकृतं मूलं तत् स्यात्।

४. एतच्च टीकाकृत्प्रमादविजृम्भितमाकरनिर्धारणम्। दशरूपके उपरितनः सन्दर्भ उपलभ्यते। तथाच स्थायिभावगणनायां तत्रत्यः कारिकाग्रन्थाः––"रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः। शममपि केचित् प्राहुः पुष्टिर्नाट्येषु नैतस्य॥" शान्तस्य

तत्र शृङ्गारस्य द्वौ भेदौ सम्भोगो विप्रलम्भश्च । तत्राद्यः परस्परावलोकनालिङ्गनाधरपानपरिचुम्बनाद्यनन्तभेदत्वादपरिच्छेद्य एक एव गण्यते । यथा—

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥३०॥

तथा,

त्वं मुग्धाक्षि ! विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि ।

काव्यरसास्तु शृङ्गारादयोऽष्टौ शान्तश्चेति नवेति भावः । तत्र रसेषु भिद्येते वक्ष्यमाणारीत्येति भेदौ । संयुक्तयोरन्योन्यानुकूलयो रम्यवेशगीतनाट्यादिसेवनात्प्रक्रंस्यमानरतिप्रकृतिः सम्भोगः । वियुक्तयोस्तु गुणस्मरणादिना रतिपोषप्रकृतिर्विप्रलम्भः । संयोगवियोगौ चात्र परस्परायत्तताऽनायत्तारूपौ, तेन दूतीप्रेषणादौ सम्भोगे, ईर्ष्यामानादौ विप्रलम्भे नाव्याप्तिः । परितः सर्वतो गण्डादिचतुःस्थाने वदनसंयोजनविशेषो वाभ्रव्यादिप्रणीतः[१] परिचुम्बनम् । नम्रेत्यन्तं कृतकारितार्थम् । तेन बालाया नमनकर्तृत्वेनालोक्येत्येककर्तृतया चोपपत्तिः । यवन्तानान्तूत्तरोत्तरतः पौर्वकाल्यम् । तत्र चोभयोरनुरागोद्रेके सत्यपि नायिकाया औत्सुक्यं स्पष्टम् ।

सम्प्रति नायकौत्सुक्यमुदाहरति—त्वमिति । तद्वीटिकाऽऽक्षयणं[२] सखी आली-

---

श्रव्यकाव्यपरत्वेन व्यवस्थया मूलग्रन्थसङ्गतिरियं मनोज्ञाऽपि न सर्ववादिसम्मता । तथा च सम्प्रदायप्रवर्त्तकाः श्रीमदानन्दवर्धनाभिनवगुप्तप्रभृतयः सर्व एव नाट्येऽपि शान्तमङ्गीकुर्वन्ति । एवमपरे नातिप्राचीनाः "अष्टावेव रसा नाट्य इति केचिदचूचुदन् । तदचारु यतः कञ्चिन्न रसं स्वदते नट" इति ।

१. कामशास्त्रकर्तॄणामन्यतमो वाभ्रव्यः । वात्स्यायनीयकामसूत्रेऽर्वाचीने च रतिरहस्यादिनिबन्धे चुम्बनभेदा बहवो लक्षिताः । अत्र श्रीधरः "यद्यपि भरतमतानुसारेण नाट्यरसा इत्युक्तं तथापि काव्यस्य प्राधान्यात्परिचुम्बनाद्यात्मनः सम्भोगस्य नाट्यविशेषतया साक्षात्प्रयोक्तुं मुनिनैव निषिद्धत्वात्तमुत्तमकाव्यविषयतयाऽऽख्यायमानमुदाहरति-शून्यमित्यादि ।...रतेरुभयाधिष्ठानत्वात्सम्भोगस्योभयाधिष्ठानाच्चापि नायिकाप्रयुक्तसम्भोगस्येदमुदाहरणं त्वं मुग्धाक्षीत्यादिषु नायिकाप्रयुक्तस्ये"ति ।

२. प्रथनमित्यादर्शपुस्तके पाठः । अत्र कतिचित्पदान्यादर्शपुस्तके प्रमादाद् गलितानीति प्रतीयते । अत्र वीटिकाऽऽश्रयणनिविष्टस्मितविशेषवतीयं सखी नायिकेत्यादिः काव्यप्रकाशविवेके व्याख्यानक्रमः । वीटिका-कञ्चुकग्रन्थिः ।

शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥३१॥

अपरस्तु अभिलाष–विरहेर्ष्या-प्रवास-शापहेतुक इति पञ्चविधः। क्रमेणोदाहरणम्[१]—

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः ॥३२॥

अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक् सुहृद्–
यो मां नेच्छति नागतश्च हह हा! (२) कोऽयं विधे प्रक्रमः।
इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे
बाला वृत्तविवर्त्तनव्यतिकरा नाप्नोति निद्रां निशि ॥३३॥

जनस्य नायिका तस्या नेत्रोत्सव[३] इत्येके। उक्तासु वक्ष्यमाणासु चोदाहृतिषु पूर्वोक्तनयेन विभावादिविभागो रसनिष्पत्तौ भावुकैर्बोध्यः। अस्माभिस्तु विस्तरभीत्या न प्रपञ्चितः।

अपर इति अभिलाषः सङ्गमप्रागभावः- एकदेशस्थयोरपि गुर्वादिवशात्सङ्गमोपरोधो विरहः। ईर्ष्येति मानोपलक्षणम्। तेन कुमारसम्भव अष्टमसर्गे[४] सन्ध्यावर्णनादौ वर्णितः प्रणयमानोऽपि संगृह्यते। अन्यासङ्गिनि कान्ते सानुरागप्रियविषयः कोप ईर्ष्या। प्रवासो देशविच्छेदः। मुन्यादिक्रोधयन्त्रणं शापः। स च सर्वापवादक इत्याह–पञ्चविध इति। अभिलाष–विरह–प्रवासविषये तत्सद्भावे तेनैव व्यवहारः।

क्रमेणेति–दिङ्मात्रेणेति शेषः। प्रेमदर्शनादिगतो भावव्यञ्जकः कश्चन विशेषः। तत्पूर्वको वशीकारः प्रणयः। परिचयो रहस्यवेदनम्। मयि भवेयुरिति–आश्वासकाक्वा धन्य एवाहं यदि तद्विषयः स्यामित्याकूतध्वननम्। लयस्तन्मयत्वम्।

बाला नेच्छति न बहु मन्यते। प्रक्रम उपक्रमः। इति प्रकारे। निशान्तं गृहम्। वृत्तविवर्त्तनव्यतिकरा पुनः पुनः प्रवृत्तपार्श्वपरिवर्त्तना। एतत्प्रवासोदाहरणं

---

१. 'हरणानी'ति वा पाठः। एवमुत्तरत्र।

२. 'सहसे'त्यहृद्यतरो वैकल्पिकः पाठः।

३. एके श्रीधरादयः। वयन्तु नोभयोर्व्याख्यानयोः कमपि विशेषमुत्प्रेक्षितुं समर्थाः। अतोऽरुचिसूचने न किमपि तात्पर्यं प्रेक्षामहे। सम्प्रदायप्रकाशिनीकाराः श्रीधरमेवात्रानुसरन्ति।

४. [४९–५२] ।कुमारसम्भवाष्टमसर्ग इत्यशुद्धः पाठः 'क' पुस्तके।

एषा विरहोत्कण्ठिता ।

सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥३४॥

प्रस्थानं वलयैः कृतं, प्रियसखैरस्रैरजस्रं गतं,
धृत्या न क्षणमासितं, व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित ! प्रिय सुहृत्सार्थः किमु त्यज्यते ? ॥३५॥

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानन्ते चरणपतितं यावदिच्छामि कर्तुम् ।

कुतो न स्यादित्याह—एषेति—प्रकरणवशादवसेयेति[१] शेषः ।

सखीनां भावः सख्यं सौहार्द्यं, तेनोपदेशः, तद्विना तदभावे । सविभ्रमाङ्ग-वलनादिभिर्वक्रोक्तिभिश्च संसूचनं मानोत्तारणम् । केवलमेवेति समुदितो निपातः[२] । अश्रुपदमत्र कज्जलादिमिलितनेत्रजले, तेनोदकैरिति सङ्गच्छते ।

गन्तव्य इति—भावे कृत्यः । तेन गमन उपस्थिते सतीत्यर्थः । जीवितेति सम्बुद्धिः[३] ।

त्वामिति—कृतान्तो दैवं, क्रूरः श्रेयोविघटनजागरूकः । अत्राकृतिलिखि-नात्कथञ्चिन्निर्वाह्यपादपतनारम्भेऽप्यत्रै [—त्रा] सरसमये त्वदीयविलासविशेषसमुद्दी-पितशोकावेशविधुरस्य मम बाष्पैर्दर्शनविघातद्वारा विघ्नः क्रियत इति सर्वतन्त्रविदो वाचस्पतिमिश्राः[४] ।

---

१. एतेन नायिकाभेदाः ग्रन्थकारानुमता इति वेदितव्यम् ।

२. एवमापातत एकपर्यायभूतस्याव्ययद्वयस्यैकत्रावस्थितिः समाधेयेति टीकाकृत्स्वरसः । अन्यथा पुनरुक्तत्वापत्तेः । केवलं प्राधान्येन रोदनमेव नत्वन्यत्किञ्चिदिति तु नासुगमो व्याख्यामार्गः ।

३. अत्र जीवित प्रिय इत्युभयत्र पदच्छेद इत्याशयः । एवमपि श्रीधरमाणिक्यचन्द्रौ । अत्र साहित्यचूडामणिः—'सुहृत्सार्थ इत्यस्य प्रियसख इत्यनेन पौनरुक्त्यं दुष्परिहरम् । प्रियेति पृथक्पदं सम्बुद्धयन्तं, जीवितविशेषणम्, अतो न पौनरुक्त्यमित्येके, तदसत्, सुहृत्सखि-शब्दयोः पौनरुक्त्यस्य तादवस्थ्यात्'' ।

४. अत्र श्रीधरसिद्धान्तो यथा...''शिलापदेन लिखनयोग्यता । लिखतोऽपि ममाश्रूणि निर्ग-तान्येव, तानि तु दृष्टिपिधानमिव कृतवन्ति, किन्तु मुहुर्मुखप्रोञ्छनेनापास्य कथं कथमपि लिखननिर्वाहः । इदानीन्तु प्रणामकालोद्यममात्रे स्मृततच्चिन्ताविह्वलान्तःकरणस्य मम

अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥३६॥

हास्यादीनां क्रमेणोदाहरणम्—

आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या
मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे।

आधुनिकास्तु लिखनमपीच्छाविषय एव, न तु निर्व्यूढमिति मन्यन्ते। अत्र च त्वामिति निर्दिष्टनायिकाऽऽलम्बनं, कल्पनाबीजं पूर्वप्रणयकोपस्मरणं, प्राकरणिकश्च मेघोदयादिरुद्दीपनं, लिखितवाष्पश्चानुभावः, सञ्चारिणस्तु स्मृतिशोकदैन्यादयः। एतैः प्रतीयमानैर्यक्षेऽनुमीयमाना रतिः सहृदयहृदयलीनां वासनामुद्बोध्य निखिले तदाकारार्थासिद्धसान्द्रानन्दास्वादे पर्यवस्यतीति—एषैव सर्वत्र रीतिः। अत्र च प्रबन्धपर्यालोचनया विप्रलम्भसञ्चार्युन्माद एवोद्रिक्त इति नेदं रसध्वन्युदाहरणं यद्यपि तथाप्येतन्मात्रानुसन्धाने नोन्मादाभासः स्फुट इत्यभिप्रेत्योदाहृतम्[१]।

वारं वारंप्रवाहरूपतामापन्नैरश्रुभिः समन्ताद् दृष्टिर्लुप्यत इति वाचस्पतिमिश्राः। (चण्डीदासोद्धृतं वाचस्पतिमिश्रमन्तव्यमितो भाषया किञ्चिद्भिन्नम्। अत्रायं प्रश्नः प्रसङ्गोत्थः—वाचस्पतिमिश्रकृता प्राचीनतरा काव्यप्रकाशटीका (याऽधुना लुप्तैव) किं चण्डीदाससमयेऽपि विरलप्रचारासीत् उत चण्डीदासः स्मृतिनिर्मोषनिर्यन्त्रितो वा तात्पर्यप्रकटनपरो वा भिन्नमेव सन्दर्भमुद्धरति ?) जानाम्येव यथा प्रणयरोषेर्ष्याव्यवहितेषु विलासेषु मम बाष्पतरलितं चक्षुर्भवतीति···मे इति पदशक्त्या व्यज्यते। अन्यथाऽऽत्मानमिच्छामीत्युपक्रमणे नौ इत्युपसंहारे च प्राप्तत्वाद्वचर्थताऽऽपत्तिरिति काश्मीरकाः। (काश्मीरकरुचककृते सङ्केते नेदमुपलभ्यते। तदर्वाचीनानां काश्मीरकाणां सिद्धान्तितमत्र परामृष्टं भवति। नामतोऽपि तेषामिदानीं नोपलम्भ इति महददुष्टवैशसम्)।

वयन्तु ब्रूमः—यावदेवेतत्सर्वं कर्त्तुमिच्छामि तावत्संकल्पविषय एव प्रलापसमयानुभूतकृतककोपप्रसादसम्भेदात्मकस्मृततच्चेष्टाविह्वलस्य ममाविर्भूतैरश्रुभिर्दृष्टिरालुप्यते। तच्चित्रखिखिताया अपि तावदास्तां दर्शनविनोदादिकं यावत्तल्लिखनोचितरेखोपरेखाऽऽदिसूत्रमपि सङ्गमं न सहत इति। अतएव कृतान्तस्यापि पुनः क्रूर इति विशेषणम्। दैवमपि शापमन्तरेण नतन्मिथुनविघटने पटीय इति यथाऽत्र रतिरतितरामुद्दीप्ता तथाऽऽलेख्यादिरूपस्यापि समागमस्य विप्रयोग इति विप्रलम्भोऽपि परं परमाश्रयत' इति। आधुनिका इति पदेन चण्डीदासेन श्रीधराचार्या एव विवक्षिताः। वाचस्पतिमिश्रसंक्रान्तं समालोचनमन्यत्र कृतमित्यत्र विरम्यते।

४. "मात्राननुसन्धानेनोन्मादाभास एवे" त्युदाहरणचन्द्रिकाकारसम्मतश्चण्डीदासग्रन्थे पाठः। रसनिष्पत्तिनिर्धारणप्रस्तावे रस,ध्वन्युदाहरणमेव सम्मतमिति तथा निर्देशः।

तारस्वनं प्रथितथूत्क[1]-मदात्प्रहारं
हा हा हतोऽहमिति रोदिति विष्णुशर्मा ॥३७॥

हा मातस्त्वरिताऽसि[2] कुत्र किमिदं हा देवताः क्वाशिषः
धिक् प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ।
इत्थं घर्घर[3] मध्यरुद्धकरुणाः पौराङ्गनानां गिर-
श्चित्रस्थानपि रोदयन्ति शतधाः कुर्वन्ति भित्तीरपि ॥३८॥

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥३९॥

क्षुद्राः संत्रासमेते[4] विजहत हरयः! क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः।
सौमित्रे! तिष्ठ पात्रं त्वमसि न हि रुषां[5] नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्ग[6] लीलानियमितजलधिं राममन्वेषयामि ॥४०॥

प्रतिपदेमेकैकेन मन्त्रपदेन संस्कृत्य सिक्तैः पृषतैर्बिन्दुभिः, तारस्वरं यथा स्यात्तया प्रहितं सर्वदिक्प्रेषितं थूदिति शब्दो यत्र प्रहारे तत्र। विस्णुशर्माऽऽलम्बनं, रोदनवैचित्यादिरुद्दीपनं, सामर्थ्यलक्ष्या वैहासिकगताः कपोलस्पर्शदृष्टिसङ्कोचादयोऽनुभावाः। अवहित्थादर्पग्लान्यादयः सञ्चारिणो नोपात्ताः।

कुत्र कस्मिन् गन्तव्ये त्वरिताऽसि येनास्मान्सततभक्तानपि नापेक्षसे। अशनिरूपो हुतवहः। दृशाविति-दृशोः पूर्वपरिचितलावण्यलहरीसंवलिततदपाङ्गतरङ्गणादिवैचित्र्याद्विशेषोक्तिः। मध्यरुद्धा मध्य अर्द्धे रुद्धा विच्छिन्नाः बाष्पोदयसंवृतकण्ठतया। अत्र लोकान्तरगतनायिकाऽऽलम्बनं, तद्गेहेऽग्निपतनादिरुद्दीपनम्, अश्रुतद्गुणवर्णनप्लुतकरुणस्वरस्तम्भादिरनुभावः, तत्प्रकाशितो निर्वेदः सञ्चारी[7]।

कृतमिति -अत्रपितृवैरिण आलम्बनम्, अनुमत्यादय उद्दीपनं, प्रतिज्ञाग्रहणं तत्सहचराश्च भृकुटीदन्तौष्ठपीडनादयोऽनुभावाः, उत्साहौग्न्यादयः संचारिणः।

---

१. 'शूत्क'मिति क्वाचित्कः पाठः।

२. 'त्वमिताऽसी'ति वा पाठः।

३. 'गद्गदरुद्धे'ति वा पाठः।

४. 'त्रासमेन'मिति कुत्रापि पाठः। ५. 'रुषा नन्वह'मिति वैकल्पिकः पाठः।

६. 'कश्मीरराजमातृमरणे भट्टनारायणकविकाव्यमिद' मिति प्रकरणनिर्देशो माणिक्यचण्द्रकृते सङ्केते।

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः[१]
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥४१॥

उत्कृत्योत्कृत्य कृत्तिं प्रथममपृथूच्छोथभूयांसि[२] मांसा-
न्यंसस्फिक्पृष्ठपिण्डा[३]द्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आर्त्तः[४] पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥४२॥

चित्रं महानेष बतावतारः क्व कान्तिरेषाऽभिनवैव भङ्गिः ।
लोकोत्तरं धैर्यमहो प्रभावः काऽप्याकृतिर्नूतन एष सर्गः ॥४३॥

एषां स्थायिभावानाह—

(४५) रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा ।
जुगुप्सा बिस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः ॥३०॥

स्पष्टम्[५] ।

अत्र रक्ताङ्गनेत्रता युद्धवीरभेदिनी । क्षुद्रा इति-परं लज्जां दधति, अतादृक्कार्य-निष्पत्त्या लज्जिता इव कृतकार्या अपि न मामानन्दयन्तीत्यर्थः[६] ।

ग्रीवेति-मृगानुसारिणो राज्ञ उक्तिः । पश्चादर्द्धं पश्चार्द्धं निपातः ।

उत्कृत्येत्यादि-उच्छोथ उच्छलता । पिण्डं जङ्घार्धविभागः । उग्रपूतीन्युत्कटदुर्गन्धानि । रङ्कश्चिरक्षुधितः । करङ्कोऽस्थिशेषं शिरः । स्थपुटो विकटगभीरभागः।

चित्रमिति-अत्र बतेत्यादीनां चित्रमित्यादिपूर्वपूर्वपदाहितसंस्कारसाहित्येन शक्तिदाढर्च्यं द्रष्टव्यम् । भङ्गिर्व्यवस्थितिः । सृज्यत इति सर्गः ।

हृदयङ्गम वस्तुनि सुखोपायत्वसंवेदनं रतिः । वागादिवैकृतैश्चेतोविकाशो हासः । इष्टनाशादि भयाच्चेतोद्रुतिः शोकः । प्रतिकूलेषु तैक्ष्ण्यप्रबोधः क्रोधः ।

---

६. 'किञ्चित्'संरम्भेति—'भ्रूभङ्गसंज्ञे'ति वा पाठः ।

१. 'दत्तदृष्टि'रिति वा पाठः ।

२. 'पृथूच्छोथ', 'पृथूच्छोफ', पृथूच्छ्राये'ति वा पाठः ।

३. 'पिण्ड्याद्यवयव', 'पीठाद्यवयवे'ति वा पाठः ।

४. 'अन्तःपर्यस्त'–आत्तस्नाय्वन्ते'ति वा पाठः ।

५. अत्र भट्टगोपालः—'स्पष्टमिति पाठप्रधानत्वात् प्रमेयस्य, यथासंख्येन योजनं तु स्पष्टतर'मिति ।

६. हनूमन्नाटके रावणपुत्रस्य मेघनादस्येयमुक्तिः ।

व्यभिचारिणो ब्रूते—

(४६) निर्वेदग्लानिशङ्काऽऽख्यास्तथाऽसूयामदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥३१॥

कार्यारम्भेष्वासङ्ग उत्साहः । रौद्रशक्त्या कृतं चित्तवैक्लव्यं भयम् । दोषदर्शनादिभिर्वस्तुनिन्दा जुगुप्सा । लोकोत्तरवस्तुदर्शनाच्चित्तविस्तारो विस्मयः[१] ।

व्यभिचारिण इति-प्रत्यभिज्ञायमानलौकिकदशाऽऽविर्भावतिरोभावस्वभावो व्रीडाऽऽदिरास्वादाङ्कुरणदशायां व्यभिचारीत्युच्यते । आस्वाददशायान्तु तस्य नानाऽऽकारकर्बुरितघनानन्दस्य द्वित्रिक्षणमात्रजीवितस्य, प्रबन्धेष्ववान्तरानेकवाक्यानां, मुक्तकादौ तु तस्यैव काव्यस्य, पुनः पुनर्भावनया सन्तन्यमानस्वरूपस्यांशानां स्थायिसञ्चारिताविभागो नास्त्येव । अतएव मेघदूतादावुन्मादादिः सञ्चार्यन्तरानुगमसन्तन्यमानतालक्षणाऽनुबन्धयोगेऽपि स्थायित्वं न लभते पूर्वप्रसिद्धपात्रगतस्थैर्यप्रत्यभिज्ञाविरहात् । तत्र हि रत्यादय एव स्थिराः, उन्मादादादयस्तु बुद्बुदवत् मग्ननिमग्नस्वरूपा[२] एव । तथा च हासशोकादीनां क्वचन स्थायिनामपि रत्युत्साहादौ तदभावात् सञ्चारिता । त्रयस्त्रिंशद्व्याभिचारिण इति त्वयोगत्त्वव्यवच्छेदार्थम् । एते हि न क्वचित् स्थायिनः । एतेषाञ्च सात्त्विकेभ्यः सत्त्वाविर्भावविशेषेभ्यो न वैधर्म्यं, किन्तु रत्यादिभ्य एव[३] ।

यद्वा तेषां नान्तःकरणपरिणतित्वमिति (?) न ते व्यभिचारिणः । व्यभिचारिणो हि भावाश्चित्तवृत्तिविशेषा एवेति सकलमनाकुलम्[४] । चिन्ताग्लानिदैन्यादिकृत-

---

१. रत्यादीनां स्थायिभावानां विस्तरत आलोचनं भरतनाटचशास्त्रे सप्तमेऽध्याये । एषां प्राधान्यप्रकटनं च तत्रैव श्लोकमुखेन—

"यथा नराणां नृपतिः शिष्याणाञ्च यथा गुरुः ।
एवं हि सर्वभावानां भावः स्थायी महानिह ॥"

२. तथा च भावप्रकाशनकारः—

'मज्जन्तश्च निमज्जन्तः कल्लोलास्ते यथाऽर्णवे ।
तस्योत्कर्षं वितन्वन्ति यान्ति तद्रूपतामपि ।
तथा स्थायिनि निर्मग्ना ह्युन्मग्ना व्यभिचारिणः ॥
पुष्णन्ति स्थायिनं स्वांश्च यत्र यान्ति रसात्मताम्" इति ।

३. "एतच्च केभ्यः सत्त्वाविर्भावविशेषेभ्यो नसश्चनसञ्चारिभ्यः न वैधर्म्यं"मिति मूलपुस्तकेऽस्फुटः पाठः । एतदुत्तरवाक्ये च पाठो न सम्यङ् इति प्रतिभाति ।

४. भावपदेन चित्तवृत्तिविक्षेषा एव विवक्षिता इति प्रागेवोक्तम् । तेषामात्यन्त्यं लौकिके जगति यद्यपि सम्भवति तथाप्यलौकिककाव्यार्थमये रसात्मनीयत्ता सम्भवतीति सुस्थित

व्रीणा चपलता हर्ष आवेगो जडता तथा।
गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च ॥३२॥
सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥३३॥

तत्त्वज्ञानापदीर्ष्यादिजं स्वावमाननं **निर्वेदः**। निधुवनादिजा निष्प्राणायमानताकम्पानुत्साहादिहेतुर्**ग्लानिः**। आत्मदुर्नयादेरनिष्टोत्प्रेक्षणकृतकम्पास्यशोषवैवर्ण्यादिहेतुः **शङ्का**। गर्वदौर्जन्यादिभूरवज्ञादोषैकदर्शनादिकृ**दसूया** परैश्वर्यासहिष्णुता। मदिराऽऽदिकृतः सम्मोहानन्दसम्भेदः स्खलनहसितादिकारी **मदः**। स्वेदाङ्गभङ्गादिकृतमनःखेदः सम्भोगादिजः **श्रमः**। जृम्भाऽऽसितादिकृत्क्रियावैरस्यं नीचा**देरालस्यम्**। वैवर्ण्यमलिनवसनताऽऽदिहेतुर्दारिद्र्यादेरनौजस्यं **दैन्यम्**। सन्तापशून्यमनस्त्वादिहेतुरैश्वर्यभ्रंशादिकृता चित्तव्यासक्ति**श्चिन्ता**। भयव्यसनादिजन्या पतनघूर्णनादिजनिका विचित्तता **मोहः**। सदृशदर्शनादितो रससमुल्लासादिहेतुर्वासनोद्बोधः **स्मृतिः**। अभीष्टलाभादिजश्चित्तसन्तोषो वदनविकाशादिहेतु**र्धृतिः**। असदृशाचरणादितो धाष्ठर्याभावो भूलिखनावाङ्मुखत्वादिहेतु**र्व्रीडा**। भर्त्सनादिहेतुरविमृष्यकारित्वं मात्सर्य्यद्वेषादिकं **चपलता**। बन्धुसङ्गमादिजश्चित्तप्रसादो नयनोल्लासपुलकादिहेतु**र्हर्षः**। विस्मृतकम्पादिकृतविभवौत्सुक्यादिजः सम्भ्रम **आवेगः**। इष्टानिष्टदर्शनश्रवणाद्युत्थाऽप्रतिपत्ति रनिमेषनेत्रताऽऽदिहेतु**र्जडता**। लावण्यैश्वर्यादिजः सविलासाङ्गवीक्षणादिकृच्चित्तोत्सेको **गर्वः**। प्रारब्धासिद्ध्यादिजः सहायान्वेषणत्वादिहेतुः सत्त्वभ्रंशो **विषादः**। सुरतादौ कालक्षेपाक्षमत्वं स्वेदादिकृ**दौत्सुक्यम्**। चिन्ताऽऽदिमनःसम्मीलनं जृम्भाऽऽदिहेतुः **निद्रा**। चित्तविक्षेपाग्रहावेशदुःखादिजो**ऽपस्मारः**[१]। निद्राऽऽलस्यस्वप्नायिताऽऽदिहेतुर्विषयाननुभूतिः **सुप्तम्**। निद्राक्षये चेतनाशयः **प्रबोधः**। अवज्ञाऽऽदेरभिनिविष्टत्वं तर्जनादिकृ**दमर्षः**। व्यापारान्तरासङ्गादिकृद् व्रीडादेर्विक्रियागुप्ति**रवहित्थम्**। चोरादौ चण्डत्वं तर्जनताडनाऽऽदिकृ**दुग्रता**। हर्षावेगादिहेतुः शास्त्रादेस्तत्त्वज्ञानं **मतिः**। कामशोकादिजः कम्पस्वेदादिहेतुरन्तःकरणो-

एव तेषां गणनानिर्देशक्रमः। "एवं काव्यार्थान् रसान् भावयन्ति कुर्वते—स्थायिव्यभिचारिकलापेनैव ह्यास्वाद्यो लौकिकार्थो निगद्यते"। अन्यच्च प्रयोगोचितान् भावानेवाश्रित्यैते वर्तन्त इति ह्याम्नायसिद्ध : सम्प्रदायः। एषा भावानां प्रतिरसं विभागो नाटचशास्त्रे दर्शितः। आस्वेवान्तर्भवन्तीति—यथा निर्वेदव्यतिरिक्तस्य शमस्य निर्वेदान्न पृथग्गणनम्।

१. एवं भारतीये नाटचशास्त्रे—"अपस्मारो नाम देवयक्षनागभूतपिशाचादीनां ग्रहणानुस्मरणोच्छिष्टशून्यागारसेवनाशुचिकालान्तरा(?) परिपतनव्याध्यादिभिर्विभावै समुत्पद्यते"।

त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।

त्रयस्त्रिंशदमी भावा समाख्यातास्तु नामतः[१] ॥३४॥

निर्वेदस्यामङ्गलप्रायस्य प्रथममनुपादेयत्वेऽप्युपादानं व्यभिचारित्वेऽपि स्थायिताऽभिधानार्थम् । तेन —

(४७) निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।

परोधो **व्याधिः** । हर्षशोकाग्रहावशोत्कण्ठादिजोऽस्थानहसितगीतरुदितकृच्चित्त-सम्मोह **उन्मादः** । शोकादितो जीवोद्गमारम्भान्तविविधचेष्टाकृन्**मरणम्** । संभ्रमोत्कण्ठादिहेतुर्गर्वितादेर्मनःक्षोभस्**त्रासः** । सन्देहप्रभवो विमर्षः शिरोऽङ्गुल्यादिनर्त्तनकृद्**वितर्कः** । भावाश्चित्तवृत्तयः तेन मरणादीनां जीवनपरित्यागरूपता निरस्ता । शेषास्तु चित्तवृत्तयः । काश्चिदास्वेवान्तर्भवन्ति, काश्चिदेतासामेव विभावानुभावरूपा इति पृथङ् नोक्ताः । अतएवोक्तं, नामत इति । नामत उद्देशमात्रेणोक्ताः स्वयञ्च विविच्य बोद्धव्या इत्यर्थः । स्थायिताऽभिधानार्थं स्थायित्वसूचनार्थम् । स्थायिनां सन्निकर्षश्चर्वणक्षणेऽत्रास्तीत्यारम्भादेव[२] रसालयष्टिचर्वणन्यायेन सान्द्रानन्दमयानुविद्धाङ्गचमत्कारो **रसः**, पानकादौ कर्पूराद्यंशवत् । किञ्चिल्लज्जाऽऽदिप्रयुक्तचमत्कृतित्वे सञ्चारिप्राधान्यं, नीरसप्रायशुष्कनारिकेलचर्वणवत् पर्यन्ते किञ्चिदास्वादे भावमात्रम्—इति स्वसंवेदनमूलानादिसहृदयपर(म्परा)–मनन-प्रसिद्धिकृत एव हि रसभावव्यपदेशविभागः ।

अहौ[३] वेत्यादौ सम्भ्रमः (?) स्वल्पोऽनुभूयते, न चासौ शृङ्गारादिरिति निरवद्यो नवमरसवादः ।

---

१. भरतनाटयशास्त्रीयाः कारिकाः । एवमन्यत्र राजानकतिलककृतत्वेन सम्भाव्यमाने औद्भटकाव्यालङ्कारसारसंग्रहोपरि विवरणे वृत्तेः सूत्रार्थस्य सर्वथा संवादे मम्मटभट्टोपज्ञान्येतानीति न दृढो निश्चयः उभयोरप्येतयोः प्राचीनतराणां वृद्धानां रचनैतानीति मन्यामहे ।

२. 'सन्निकर्षश्चपननेत्रास्ती'त्यादर्शपुस्तके पाठः । अत्र सान्द्रानन्दमयेत्याद्यंशे पाठो विपर्यस्तः । स्रक्सूत्रन्यायेन नियतावस्थानं स्थायिनां, व्यभिचरिणान्तु-फेनबुद्बुदन्यायेनानियतावस्थानमिति स्थिते स्थायिव्यभिचारिणोर्भेदे कस्यापि भावस्य स्थायित्वं व्यभिचारित्वञ्चोभयं नासंवादि । यदाहुः "रत्यादयोऽप्यनियते रसे स्युर्व्यभिचारिणः ।" एकत्र चरमक्षणपर्यन्तस्थायित्वे स्थायित्वम्, अन्यत्रोपकर्तृत्वदशायामवस्थानात्तत ऊर्द्ध्वं विलयाद्व्यभिचारित्वमायातम् ।

३. यद्यपि "न भावहीनोऽस्ति रसो न भावो रसवर्जित" इत्यभियुक्तोक्त्या रसाभावयोर्भेदो भाक्त इवापाततः प्रतीयते, यद्यपि च 'नानाऽभिनयसम्बन्धान्भावयन्ति रसानिमान् ।

यथा—

अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्ट्रे[1] वा बलवति रिपौ वा सुहृदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित् पुण्यारण्ये शिव[2] शिव शिवेति प्रलपतः ।।४४।।

स्त्रैणं स्त्रीसमूहः। यान्तीति–'कदाकर्ह्योर्विभाषये'ति भविष्यति वर्त्तमाना।[3]निर्वेदस्थायीति—चिरन्तनदिशा।

वस्तुतस्तु निरीहावस्थायामानन्दोत्तररूपः शम एवास्य स्थायी, निर्वेदस्तु सञ्चार्येव, तस्य स्वावमतिमात्रत्वात् विषयानां प्रत्ययमात्रत्वाद्वा (?) शान्तेषु सुखातिशयरूपत्वात्। तदुक्तम्—

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्[4] ।।इति।

अत्र चानित्यताऽऽदिना सर्वजगन्निःसारताभावने परमार्थस्वरूपमालम्बनं, पुण्यतीर्थादय उद्दीपनं, षुलकादयोऽनुभावाः, हर्षादयः सञ्चारिणः। तस्य वीभत्सेऽन्तर्भावस्तु नोचितः, तत्र विषयजुगुप्सायाः[5] प्राधान्यात्। दयावीरदैवतरत्यादीनान्तु

यस्मात्तस्मादमी भावा विज्ञेया नाटचयोक्तृभि'रिति मुनिवचनाद् भाव्यभावकसम्बन्धोऽप्यनयोः शास्त्रसिद्धस्तथाऽपि पर्यन्ते भेदोऽनुभवसिद्ध एव। शास्त्रञ्चैतदनुकूलमप्युपलभ्यते—

"विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
आनीयमानः स्वादुत्वं स्थायिभावो रसः स्मृतः" इति।

रसस्य व्यभिचारिभाववैलक्षण्यं स्पष्टम्। "अलौकिकविभावादिव्यपदेशभाग्भिः... गुणप्रधानतात्पर्याश्रयेण सामाजिकधियि सम्यग्योगं सम्बन्धमैकाग्रचं वाऽऽसादितवद्भिरलौकिकनिर्विघ्नसंवेदनात्मकचर्वणागोचरतां नीतोऽर्थश्चर्व्यमाणतैकसारो न तु सिद्धस्वभावस्तात्कालिक एव नतु चर्वणातिरिक्तकालावलम्बी·····स्थायिविलक्षण एव रस" इत्यभिनवगुप्ताचार्याः।

१. 'लोष्टे'ति प्रायो दक्षिणात्यानां पुस्तकेषु पाठः।
२. पुण्येऽरण्ये' इति वा पाठः।
३. वर्तमानेति कलापव्याकरणे लटः पर्यायरूपा क्रियाविभक्तिः।
४. महाभारते शान्तिपर्वीये मोक्षधर्मप्रकरण इत्याकरनिराकरणं कुत्रापि।
५. विषयमात्रजुगुप्सा शान्तरसे, विषयविशेषजुगुप्सा बीभत्स इति स्फुटोऽनयोर्भेदः।

(४८) रतिर्देवादिविषया व्यभिचारी तथाऽञ्जितः ॥३५॥

भावः प्रोक्तः—

आदिशब्दान्मुनि-गुरु-नृप-पुत्रादिविषया। कान्ताविषया तु व्यक्ता शृङ्गारः। उदाहरणम्—

कण्ठकोणविनिविष्टमीश!ते कालकूटमपि मे महाऽमृतम्।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते ॥४५॥

हरत्यघं संप्रति हेतुरेष्यतः
शुभस्य पूर्वाचरितैः कृतं शुभैः।
शरीरभाजां भवदीयदर्शनं
व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥४६॥

साहङ्कारदशायामत्र नान्तर्भावः। नचायं सर्वजनावेद्यतया न रसः, शृङ्गारादीनामपि शुकादीनामवश्यत्वात्। तस्माद्विलक्षण एवायं नवमो रस इति सन्तोष्टव्यम्।

रतिर्देवादिविषयेति—परस्परावस्थाऽनुरूपपरिपोषवीजाभावान्न रसः। अव्यासङ्गेनात्यन्तपोषे तु देवतरतेः शान्तावन्तर्भाव इत्युक्तप्रायं[1] सर्वमिति।

न च नायिकाविषयेऽपि रतेः क्वचित्तावन्मात्रताऽस्तु[2] यथा 'स्तुमः क'मित्यादौ। तत्र हि प्रकरणपर्यालोचनयाऽन्योन्यजीवितसर्वस्वताविरहान्न रसता। विषयानौचित्यादिविरहाच्च नाभासः। एवं हासादीनामप्यपुष्टौ भावमात्रता भावुकैर्बोद्धव्या[3]। तत्रापि च वासनोद्बोधरूपत्वं समूहालम्बनात्मकत्वञ्च पूर्वप्रक्रियाऽनुसारेण ज्ञेयम्। स्वरूपमात्रभेदेन हि रसभावव्यपदेश इत्युक्तम्। व्यभिचारीति—कनकधूपामोदादौ मङ्गल्यादिभाग इव किञ्चिदाक्रान्त इव चमत्कृतिजीवातुत्वेन भावकैरपोह्य क्रियमाण इत्यर्थः। तथा चार्थे कान्ताविषया जीवितसर्वस्वाधिकतरत्वाभिमतनायिकाविषया दत्तस्त्रीमात्रविषया वा। व्यक्ता सामग्री माहात्म्येन प्राप्तप्रकर्षा। व्यक्त इति क्वचन पाठः। योग्यता माहात्म्यम्। एवमन्यदिति—गुरुषु त्रिकलिङ्गेन्द्रदेवश्रीनृसिंहदेवस्य

---

१. शान्तेऽन्तर्भाव इति वरम्, शान्तिपदेन पारिभाषिकतया तस्य रसस्याग्रहात्।

२. क्वचित्तावन्मात्रताथावस्त्वित्थादा'वित्यहृद्यः पाठ आदर्शपुस्तके। एतदुत्तरवाक्ये तत्रेति पदेन देवादिविषयाया रतेः परामर्शो यथा "अहौ वा हारे वे" त्यादौ लक्ष्ये।

३. "रतिर्देवादिविषये"ति कारिकायां रतिपदमुपलक्षणम्। रतिहासादीनां सर्वेषामेव स्थायिभावानां तेन ग्रहणम्। परमपुष्टानामप्राप्तरसावस्थानामेव भावपदेन व्यवहारः।

एवमन्यदप्युदाहार्यम् ।

व्यभिचारी[१]—यथा--

जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया
मा मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः ।
नो यावत्परिरभ्य चाटुशतकैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः ॥४७

अत्र विधिं प्रत्यसूया ।

(४९)—तदाभासा अनौचित्यप्रवर्तिताः ।

तदाभासा रसाभासा भावाभासाश्च ।

तत्र रसाभासो यथा—

स्तुमः कं वामाक्षि! क्षणमपि विना यं न रमसे
विलेभे कः प्राणान् रणमखमुखे यं मृगयसे ।
सुलग्ने को जातः शशिमुखि! यमालिङ्गसि बलात्
तपः श्रीः कस्यैषा मदननगरि ! ध्यायसि तु यम् ॥४८॥

कविराजश्रीमदुल्लासदासपादेष्व-[२]स्माकं ज्येष्ठतातेषु यथा—

पाटवं वचसि तावकं स्मरंस्त्वां विहास्यति सचेतनो हि कः ।
पिञ्जरे सुखनियन्त्रितो वसन् राजकीर ननु मा स्म गाः शुचम् ॥

जाने इति—तत्रास्वादकाले विवेक्तुमशक्यत्वेऽपि पश्चादन्वयव्यतिरेकाभ्यामसूयाप्राधान्यं व्यवस्थाप्यत [इति] तत्त्वम् ।

अत्रेति—नतु [रतिः], विविक्तताया एवात्र वरणीयत्वात् । अनौचित्यं लोकशास्त्रातिक्रमः । एतच्च शृंगारादिलक्षणैकदेशयोगोपलक्षणपरम् । तेनाधमपात्रतिर्यगादेरवबोधः । अत्रानेकेतियमित्यसकृत्कर्मनिर्देश एकविषयः । स च प्रसङ्गतः प्रकरणसाचिव्येन सोपहासोत्प्रासकाकुत्वबलेन स्तुम इत्यादीनां स्तुतिप्राधान्यं निरस्य खण्डास्वादरूपा रसाभासव्यक्तोराविष्कृत्य पर्यन्ते हास्यं परिपोषयति ।

---

१. एवं प्राच्यटीकाकृतां ग्रन्थेषु पाठः । 'अञ्जितव्यभिचारी'ति त्वन्येषां पाठः ।

२. ओड्रपतिर्महनीयमहिमा प्रथमो द्वितीयो वा नरसिंहदेवोऽत्र समुद्दिष्टः । कविराजपदलाञ्छनः श्रीमदुल्लासदासश्चण्डीदासपितुर्विलासदासस्याग्रजः । असौ राजगुरुरासीत्, न केवलं पुनस्तदधस्तनचन्द्रशेखरविश्वनाथमहापात्रादिवत्सान्धिविग्रहिको राजकर्मचारी । महती तस्मिंस्त्रिकलिङ्गदेवस्यास्थेति तद्रचितादुपर्युक्तश्लोकादनुमीयते ।

अत्रानेककामुकविषयमभिलाषं तस्याः स्तुम इत्याद्यनुगतं बहुव्यापारोपादानं व्यनक्ति ।

भावाभासो यथा—

राकासुधाकरमुखी तरलायताक्षी
सा स्मेरयौवनतरङ्गितविभ्रमास्या ।
तत्किं करोमि विदधे कथमत्र मैत्रीं
तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः ।।४९।।

अत्र चिन्ता अनौचित्यप्रवर्तिता । एवमन्येऽप्युदाहार्याः ।

(५०) भावस्य शान्तिरुदयः सन्धिः शबलता तथा ।।

सोपहासकाकुविरहे तु बह्वा काक्वा तद्गतां रतिं व्यनक्तीत्यर्थः[१] । प्रसङ्गानुक्ते रसाभासो रसकाव्येषु बा द्रष्टव्यः । नह्यस्ति रससामग्री(?)-तदुक्तं[२]-'शृङ्गारोऽनुक्(ह्)तः, तु यत्राव्यक्तोऽपि जायते व्यक्त' इति ।

राका अखण्डपूर्णिमा । तरङ्गिता विभ्रमा यत्र तरङ्गितविभ्रमं, तथाभूतमास्यं[३] यस्या इति विग्रहः । तस्याः स्वीकृतिः स्वाधीनकरणं तस्य व्यतिकरः सदातनतारूपं पौनःपुन्यम् ।

अत्रेति–अभियोज्यावैमुख्यदर्शिनो दुर्भगस्येयमुक्तिः प्रकरणादवसेयेति भावः ।

एवं हास्यादिरसानां लज्जाऽऽदिभावानाञ्चाभासा आकरेषु स्वयं बोद्धव्या इत्याह—एवमन्येऽपीति ।

भावस्य सञ्चारिणो लौकिकदशायामुदयव्ययशालिनः क्वचिद्विरुद्धसामग्रीप्राधान्येन प्रशमावस्था स्वदते, क्वचित्स्वसामग्रीमाहात्म्येनोदयावस्था, क्वचनोभ-

---

१. स्तुम इति कामपि वारयोषितं प्रति कस्यचित् कामुकस्य चाटूक्तिः । प्रतिपादं यत्पदेन भिन्नकामुकसम्बन्धो भोगलालसाघटितः सोत्प्रासकाकुबलेन व्यज्यते । यदि पुनः सरलैषा सम्भावना सद्भावप्रतिपन्नकुलललनाचक्रचरितां सरणिं नातिशेते तदा यमित्यादि प्रतिपादं स्थितैरवान्तरवाक्यैरेक एव काष्ठाऽऽरूढप्रीतिपात्रभूतो दयितः परामृश्येत । तथात्वे न किमप्यनौचित्यम्, अतो रसकक्ष्यायामस्य पद्यस्यान्तर्भावः सुशक इति हि टीकाकृतामाशयः ।

२. रुद्रटीये (२४।३६)स्थितः "शृङ्गाराभासः स तु यत्र विरक्तोऽपि जायते रक्तः' इति सन्दर्भष्टीकाकृतोद्धृतः स्यात् । लेखकत्रुटिवशाद्विपर्यासमापन्नः सः । 'शृङ्गारोऽनुकृत" इति प्रथमपदस्य चण्डीदासानुसृतः पाठः स्यात् ।

३. 'विभ्रमा स्यात्' 'विभ्रमाङ्गा' 'विभमाङ्गी'ति इति चात्र टीकाऽन्तरेषु धृतपाठान्तराणि ।

क्रमेणोदाहरणम्—

तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राऽङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ।
इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया
साऽऽश्लिष्टा रभसेन तत्सुखवशात्तन्व्या च[1] तद्विस्मृतम् ।।५०।।

अत्र कोपस्य ।

एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यो मानपरिग्रहग्लपितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं[2]
मा भूत् सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ।।५१।।

अत्रौत्सुक्यस्य ।

उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः
सत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः ।
वैदेहीपरिरम्भ एव च मुहुश्चैतन्यमाभीलय-
न्नानन्दी हरिचन्दनेन्दुशिशिरः स्निग्धो रुणद्ध्यन्यतः ।।५२।।

अत्रावेगहर्षयोः ।

क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्यते सा
दोषाणां प्रशमाय नः श्रुतमहो कोपेऽपि कान्तं मुखम् ।

यसामग्रीयोगेन परस्परविमर्दः, क्वचन पुनः पूर्वविमर्देनोत्तरोदयपरम्परा । रत्यादेस्तु सततमविच्छेदिनो नेदं वैचित्र्यम् ।

तस्या इति—अत्रेर्ष्यारोषस्य परिरम्भसुखजनितजडिमनिमज्जनरूपप्रशम एव काव्ये सर्वस्वम् । एकस्मिन्निति—अत्र क्रोधवेगेन तिरस्कृतस्याप्यौत्सुक्यस्य पुनः [सन्दर्शनादुन्मेष][3] एव चर्वणाबीजम् ।

उत्सिक्तस्य सत्वोत्कर्षवशाज्जगत्तृणाय मन्यमानस्य वीरतया रभसोत्फाल उत्साहवेगेनाहङ्कारसमुद्यमप्रकर्षः ।

अत्रावेगहर्षयोरिति——खण्डयोर्वीरश्रृङ्गारयोरङ्गतामापन्नयोरितरेतरविरुद्ध-

---

१. 'सत्सुखवशात्' 'तन्व्याऽपी'ति चात्र चरणे पाठान्तरे । २. 'तत्क्षणा'दिति वा पाठः ।
३. 'सन्दर्शनादुन्मेष' इत्यंश आदर्शपुस्तके न पूरितः । मूलपुस्तकस्य जीर्णतयाऽस्यांशस्य पूरणं न साधितं गौडीयलिप्यां लिपिकरेण ।

किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति ॥५३॥

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता। भावस्थितिस्तूक्तोदाहृता च।

(५१) मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन ॥

योः[1] सञ्चारिणोः सन्धिः। वस्तुतो ह्येवंविधे यद्यङ्गानुद्रेकस्तदा खण्डौ वीरशृङ्गारौ[2], विलक्षण एव वा चित्रनामा रसः, न तु पूर्णः शृगारो वीरो वा।

क्वाकार्यमित्यनुशयदेवयानीनाटके ययातेरिति प्रवादः।

अत्र[3] वितर्कादीनां चिन्तापर्यन्तानां व्यञ्जकभागाः स्पष्टाः। भाव(स्य) स्थितिरुदयव्ययवैशिष्ट्यरहितं स्वरूपं, न तु तद्विलक्षणा काचिदिति भावः।

रस्यते रसीक्रियते इति रसो रत्यादिः। यद्यपि पात्रापेक्षायामत्रान्योऽङ्गी तथाऽपि तदङ्गानामास्वादजीवातुतया काव्ये क्वचनाङ्गित्वं प्राधान्यम्। इतरे तु

---

१. अत्रापि पूर्वव'दितरेतरविरुद्धयो'रित्यंशस्त्रुटितः।

२. एषा संज्ञाद्वयी श्रीचण्डीदासोपज्ञा स्यात्। प्राच्यानां पुनः केषाञ्चिदत्र सञ्चारिरसनाम्ना व्यपदेशः। यदाहुर्दर्पणकृतः स्वग्रन्थे "अतएवात्र प्रधानेतरेषु रसेषु स्वातन्त्र्यविश्रामराहित्यात्पूर्णरसभावमात्राच्च विलक्षणतया सञ्चारिरसनाम्ना व्यपदेशः प्राच्यानाम्। अस्मत्पितामहानुजकविपण्डितमुख्यश्रीचण्डीदासपादानान्तु खण्डरसनाम्ना। यदाहुः

"अङ्गं बाध्योऽथ संसर्गी यद्यङ्गी स्याद्रसान्तरे।
आस्वाद्यते समग्रं यत्ततः खण्डरसः स्मृतः॥" इति।

श्लोकोऽयं ध्वनिसिद्धान्तसंग्रहीय इत्यनुमीयते।

३. अत्र विवेककृतष्टिप्पणं हासमेव जनयतीत्यामूलमुद्ध्रियते–"अयं श्लोकः कस्यचित्कवेः क्वचिन्नाटकादौ कण्वाश्रमे शकुन्तलां दृष्ट्वा तां प्रति प्रवृद्धाभिलाषस्य दुष्यन्तस्य तस्यां ब्राह्मणीत्वमाशङ्कमानस्योक्तिः, अनुशयदेवयानीनामनि नाटके वा यतातेरिति प्रवादः।" अभ्यासगृहीताभिज्ञानशकुन्तलग्रन्थस्य कविपण्डितस्य चण्डीदासस्थ मुख्येतरकल्पेऽनयोररुचिरिति सुसिद्धमेव। विक्रमोर्वशीये चतुर्थेऽङ्के उन्मत्तस्य पुरूरवस उक्तिरिति जयन्तभट्टादयोऽनेके प्राचीना अर्वाचीनाश्च टीकाकृतः।

श्रीवत्सलाञ्छनकमलाकरभट्टवैद्यनाथादयश्चण्डीदासमतमेवानुसरन्ति। अस्मिन्नेव व्याख्यानेऽकार्यं ब्राह्मणकन्यायामासक्तिरूपं भयं संवदति। विक्रमोर्वशीयचतुर्थाङ्कग्रन्थविषये महती विप्रतिपत्तिर्विदुषां, न चास्य श्लोकस्य भूयस्तरेष्वादर्शपुस्तकेषु तस्योपलम्भः अतोऽगतिकयत्या उपर्युक्तमेव साधु स्यात्।

ते भावशान्त्यादयः। अङ्गित्वं[1] राजानुगतविवाहप्रवृत्तभृत्यवत्।

(५२) अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः॥
शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः।

शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यः अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यः उभयशक्तिमूलानुरणनरूपव्यङ्ग्यश्चेति त्रिविधः।

तत्र—

(५३) अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते।
प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा॥

वस्त्वेवेति अनलङ्कारवस्तुमात्रम्।

तन्मुखप्रेक्षिणो यथोक्तास्वत्रोदाहृतिषु। भावशान्त्यादय इति-भावा व्यभिचारिणस्तेषां प्रशान्त्यादयश्चेति ज्ञेयम्। राजेति-भृत्यविवाहे राजगमनं हि भृत्यस्यैवोपकरणतां धत्ते।

एवमलक्ष्यक्रमं रसादिरूपं निरूप्य सम्प्रति लक्ष्यक्रमस्य सामान्यानुवादेन विभागमाह—अन्विति। अनु पश्चात्स्वानः कथनं यस्य सोऽनुस्वानस्तदाभस्तत्सदृशः, अतएव सम्यक्लक्ष्यः क्रमःप्रतीतिपौर्वापर्य्यं यत्र व्यङ्ग्ये तत्र स्थितिर्यत्रेति विग्रहः। शब्दस्यार्थस्य तदुभयस्य शक्तेरुद्भवतीति शब्दार्थोभयशक्त्युत्थः। शब्दस्य शक्तिर्मूलं प्रतीतिप्रधानबीजं यस्य स शब्दशक्तिमूलः। तथाभूतोऽनुरणनरूपोऽनूदितसदृशो व्यङ्ग्योऽर्थो यत्रेत्यादिर्विग्रहः कार्यः।

अथ विकल्पे। प्रधानत्वेनेति-काकनयनन्यायेन—शब्दात् अवभासत[2] इति पदाभ्यां सम्बध्यते। प्रधानत्वेनोत्कटतया शब्दाच्छब्दशक्तेरवभासते, अर्थस्य साचि-

---

१. आपातत इति शेषः। यथा भृत्यविवाहे राजानुगमनं आपाततः भृत्यस्य प्राधान्यं राज्ञस्त्वप्राधान्यं प्रतीयते। एवं यत्र विभावादिव्यक्तस्थाय्यंशोद्रेककृत आस्वादस्तत्र रसध्वनिः। यत्र स्वानुभावे व्यक्तव्यभिचार्याद्युद्रेककृतस्तत्र भावध्वनिः। यत्र व्यक्तमपि व्यभिचारिणमनपेक्ष्य विभावाद्युद्रेककृतस्तत्र वस्त्वलङ्कारध्वनिरिति आपातार्थः।

२. 'वशत इति पदाभ्या'मित्यादर्शपुस्तके मूलोच्छेदपरः पाठः। अस्य 'अनेकार्थस्य शब्दस्ये'-त्यादिकारिकया द्वितीयोल्लासस्थया लक्ष्यसूचनम्। प्रदीपकृता 'एतेन अभिधाया' इत्यादौ 'यत्केनचिदुक्तं तन्नादेय'मित्यन्तेन ग्रन्थेन यत्कटाक्षितं तद् श्रीधरचण्डीदासादिमताक्षेपपरं नेति मन्तव्यम्।

उल्लास्य कालकरवालमहाम्बुवाहं
देवेन येन जरठोर्जितगर्जितेन ।
निर्वापितः सकल एव रणे रिपूणां
धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥५४

व्यमात्रम् । प्रधानत्वेनावभासत इति गुणीभावनिरासः । शब्दशक्त्युद्भवं व्यङ्ग्यं विद्यत अत्र काव्य इति अर्शआदित्वादच्[१] । एवमुत्तरत्रापि । मात्रमित्येवार्थः । तद्व्यवच्छेद्यकथनमनलङ्कारमिति । अलङ्कृतिरलङ्कार इति भावे घञ् । न विद्यतेऽलङ्कारोऽलङ्कारकत्वमस्येत्यनलङ्कारम् ।

उल्लास्येति-कालः शत्रुसंहर्त्ता करवालः खड्गः स एव महाम्बु धाराजलं वहतीति महाम्बुवाहः करवाल एव महाम्बुनो धाराजलस्य वाहः वहनं प्रसरणं कप्पिण-[२]नृपतिपक्षे पक्षान्तरे तु कालकरः कृष्णकान्तिः (कृष्णरश्मिर्यो) बालः प्रत्यग्र इति **श्रीधरः** कष्टं सृष्टवान्[२] ।

वस्तुतस्तु[३] रूपक उपमासमास एव । न च स्फुटीभावान्नेदं ध्वनिः स्यादिति वाच्यं, यत्र हि अस्फुटसादृश्यभागिनि[३] रूपणं वाच्यं तत्रैकदेशान्तररूपणं विना

१. ध्वनिरिति पूर्वकारिकया निर्दिष्टस्य लक्ष्यस्य विभजनपरं एवैतदुत्तरो भूयान् ग्रन्थ इति तात्पर्यम् ।

२. कप्पिणाभ्युदयकाव्यस्य श्लोक एषः । कप्पिणेति प्रकृतस्य नायकस्य नाम्न इकारयुक्तः पाठ उत्कलीयेषु दाक्षिणात्येषु च पुस्तकेषु दृश्यते । एवमपि सर्वानन्दकृतटीकासर्वस्वे । अर्वाचीनैष्टीकाकृतद्भिर्गोविन्दादिभिर्नेदं शिवस्वामिकृतं काव्यं दृष्टमित्युत्यमीयते ।

२. 'करवाले यन्महदम्बु विपुलं धाराजलं तस्य वाहं प्रवाहमुल्लास्ये'ति पाठः श्रीधरकृतटीकायामुपलभ्यते । साहित्यचूडामणौ (T. S. S. L., XXXVIII, P. 153) भट्टगोपालेनेयं व्याख्यानशैली सबाधेत्युदृङ्कितम् ।
यद्यप्यर्वाचीनैरपि कैश्चित् टीकाकृद्भिः श्रीधरमतमनुसृतं तथापि कष्टसृष्टिरियमवस्तूत्थापितेति न महती विप्रतिपत्तिरिति चण्डीदासोक्तं साधीयः । एवं सभङ्गश्लेषपक्षमुररीकृत्य निर्बन्धवद्भिर्गोविन्दादिभिर्यत् 'मह उत्सवः स एवाम्बु' इत्यादि वैकल्पिकं व्याख्यानं कृतं तदप्यतिप्रासङ्गिकम् ।

३. 'सादृश्यं भागिनिरूपण' मित्यहृद्यः पाठ आदर्शपुस्तके ।

३. अत्र पाठो न सम्यक् इति प्रतिभाति । परं 'करबालस्याम्बुवाहेति रूपणमिति रूपकेणैव तत्कार्यस्य सिद्धत्वान्नोपमाध्यनेरिदमुदाहरण' मिति परमतस्य व्युदासे यत् श्रीधरेण चेष्टितं तत्र वन्ध्ययत्नत्वं तस्येति प्रकटयितुमेव टीकाकृतः साटोपं विजृम्भितमित्युत्तरग्रन्थतोऽवगम्यते । वृत्तिकारस्वरसोऽपि न विघ्नित इति च टीकाकृतामाशयः ।

अत्र वाक्यस्यासम्बद्धार्थाभिधायकत्वं मा प्रसाङ्क्षीदिति प्राकरणिकाप्राकरणिकयोरुपमानोपमेयभावः कल्पनीय इत्यत्रोपमाऽलङ्कारो व्यङ्ग्यः ।

तदसङ्गतं स्यादिति तस्याक्षेपः स्फुटः—यथा जलदभुजगजं विषमिति। खड्गमेघयोस्तु सादृश्यं व्यक्ततया न परसाचिव्यमपेक्षते, ततश्च स्वमात्रविश्रान्तमिति न रूपणान्तराक्षेपः। देवः प्रभुर्मेघाधिकारी च। धाराजलं धारायाः स्वच्छकान्तिः धाराऽऽकारं जलञ्च। अत्रेति तन्त्रन्यायेन[१] तादृशमुच्चारणं, पदार्थद्वयाभिधायकशब्दप्रतीतेः। प्रतिप्रसवन्यायेन वा कल्पितस्य द्वितीयशब्दस्य द्वितीयार्थोऽभिधेयः। तस्य चासम्बन्धभीत्या उपमाऽऽख्यः सम्बन्धः कल्प्यते[२]। स एव मुख्यतो व्यङ्ग्यः। अर्थान्तरे तु तद्विशिष्टया व्यङ्ग्यताव्यवहारमात्रमिति केचित्।

अत्र व्यङ्ग्योपमावैशिष्ट्येन व्यङ्ग्यव्यवहारः प्रकृतेऽपि न दण्डवारितः। असम्बन्धभीरुणा चोपमैव कल्पनीयेति किमियं[३] राजाज्ञा, उपमैव तत्र प्रतिभासत इति, किमिति तर्हि कल्पना, उपमैव तत्रास्तीति वरम् यथा चार्थान्तरस्य नाभिधेयत्वं तथोक्तमेवास्माभिः।

तस्माद्व्यङ्ग्य एव द्वितीयोऽर्थः—अत्र च शब्दशक्तिरेव। तदुत्थापितेऽलङ्कारेऽपि तस्या एव प्राधान्यं, नृपतिपर्यायाच्च [देवशब्दात्] सादृश्यमात्रं प्रतीयते, नाभेद इति न रूपकध्वनिव्यवहारः। वृत्तिस्तु[४] रूपकध्वन्यङ्गीकारेऽसम्बद्धः प्रकृतेऽसङ्गतो योऽर्थः अभेदावगमलक्षणः तदभिधायकत्वं तद्बोधकत्वमतिप्रसञ्जकं मा प्रसाङ्क्षीत् नात्र प्रसञ्जनीयं भवतीति प्राकरणिकाप्राकरणिकयो'र्नृपतिमहेन्द्रयोरुपमानोपमेयभावः सादृश्यमात्ररूपः कल्पनीयो निर्णयनीय इति। अत्रेति—काव्ये उपमालङ्कारो व्यवहर्त्तव्य इति शेषः।

---

१. कर्मणां यौगपद्यभावस्तन्त्रमिति हि तन्त्रन्यायोद्घोषणम्। 'तन्त्रं कुठुम्बकृत्ये स्यादि'त्याद्यारभ्य 'श्रुतिशाखाऽन्तरे हेतावुभयार्थप्रयोजक' इति तन्त्रस्यार्थनिर्देशपरान्मेदिनीकोशग्रन्यादुभयार्थप्रयोजकताबीजभूतोऽयं न्यायः यस्य प्रकृतशास्त्रानुसारी विमर्शः 'अर्थभेदेन शब्दभेद' इति दर्शनमूलः प्रतिप्रसवन्यायः। पक्षद्वयमपि नात्र प्रसक्तं यथा तथा द्वितीयोल्लास एव 'भद्रात्मन' इत्यादि श्लोकप्रसङ्गे निरणायि।

२. एवमादर्शपुस्तके। अत्र तच्छब्देन टीकास्थपूर्ववाक्यीयशब्दशक्तेः परामर्शः। स च वाक्यार्थमीमांसकैः कथमपि सोढव्यः।

३. 'अभीष्टसिद्धावपि खण्डनानामखण्डि राज्ञामपि नैवमाज्ञेति' (Reprint from the Pandit Page 139) खण्डन-खण्ड-खाद्यकृतां रीतिमनुसरतां टीकाकृतामियं वचोभङ्गिः।

४. वृत्तेर्व्याख्यानं टीकाकृत्कृतविवरणमिति यावत्।

तिग्मरुचिरप्रतापो विधुरनिशाकृद्विभो मधुरलीलः ।
मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान् ॥५५

अत्रैकैकस्य पदस्य द्विपदत्वे विरोधाभासः ।

अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद ! प्रभो !
अहितः सहितः साधुयशोभिरसतामसि ॥५६

अत्रापि विरोधाभासः ।

तिग्मः शत्रुषु, रुचिरो मनोहरः स्वजनेषु, प्रतापो दण्डादिजनितं तेजो यस्य । विधुराणां [निशाकृत्] निशा मोहान्धकारस्तं कृन्ततीति । विभो स्वामिन् । मधुरलीलः, न च मलिनचेष्टः । मतिस्तत्त्ववित्तिः, मानश्चित्तोन्नतिः[१], तयोस्तत्त्वेन सारेण वृत्तिर्यस्येति । प्रतिपदं पक्षाणां सहायानामग्रणीः । तिग्मरुचिः सूर्यः अप्रतापः शीतलप्रायः, विधुश्चन्द्रो न निशाकृत् विभो विगतप्रभः, मधुरलीलो रमणीयचेष्टः मधुर्वसन्तः अलीलः युवजनविविधचेष्टारहितः—इत्येके । मतिमान् अतत्वेऽवस्तुनि प्रवर्त्तते । प्रतिपत् पक्षस्याग्रणीः प्रथमतिथिर्न ।

अत्रेति—द्विपदत्वेऽभिधेये विरोधाभास एकैकस्य पदस्य व्यङ्ग्य इति योजना । नतु द्विपदत्वेऽप्रतीत इति, तत्कारणाभावात्[२] । अर्थान्तरप्रतीतिरेव कारणमिति चेन्न, परस्पराश्रयप्रसङ्गात् वैयर्थ्याच्च । एवमन्यत्राप्येवंविधस्थले मृग्यम्[३] ।

समितः संग्रामात्प्राप्तैरुत्कर्षैरमितः पारिमित्यरहितः । यशोभिः सहितो युक्तः, असतामहितः श्रेयश्छेत्ता । मितं मानं, तेन हीनोऽमितः । अहितो हितेन

---

१. 'मानोऽपचितोन्नति'रित्यादर्मपुस्तके पाठः । 'पूजा नमस्याऽपचितिः सपर्याऽर्चाऽर्हणाः समा' इत्यभिधानबलादपपूर्वाच्चिनोतेरर्चापरत्वेऽपचितपदेनार्चार्हाणां ग्रहणे स कथमपि स्यात् ।

२. अत्र राजपक्षे मतिपदेन तत्त्वज्ञानस्य मानपदेन चित्तोन्नतेर्निशापदेन च 'या निशा सर्वभूताना'मित्यादाविव मोहान्धकारस्य लाभे यत्किञ्चिच्छास्त्रपरिभाषितत्वरूपाप्रतीताभिधस्य दोषस्य शङ्का न कार्येति टीकाकृतामाशयाविष्करणम् । यदि तावन्मतिपदेन बुद्धिसामान्यस्य, मानपदेन प्रमाणस्य, निशापदेन लक्षणया मरणस्य ग्रहणमभ्युपेयेत यथा यथास्थलमत्र माणिक्यचन्द्र-श्रीधर-श्रीविद्याचक्रवर्त्तिप्रभृतिभिर्दर्शितं तदा नैषा शङ्का सावकाशा भवतीत्यलं पल्लवितेन ।

३. उत्तरत्राप्युदाहरणचक्र एतदतिरिक्तानां नेयार्थनिहतार्थासमर्थप्रभृतीनां पददोषाणां चण्डीदासप्रदर्शितरीत्या संभव इति युक्तमुक्तम् 'एवमन्यत्रापी'ति । वस्तुतस्तु 'सहृदयानां वासनाबलाद् द्विपदत्वज्ञानेऽपि………अप्रकृततयां द्वितीयार्थस्य व्यङ्ग्यत्वमक्षत'मित्युद्द्योतकाराणां विवरणं नासारवत् ।

निरुपादानसंभारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाध्याय शूलिने ॥५७

अत्र व्यतिरेकः ।

अलङ्कार्यस्यापि ब्राह्मणश्रमणन्यायेनालङ्कारता ।

रहितो हितसहित इति विरोधः । अत्रापीति—विरोधस्याभासताप्रतीतिः । पूर्वोक्त-रीतिरत्रापि प्रतिपत्तव्या ।

उपादानसम्भार उपकरणसञ्चयः । चित्रं नानाकारमालेख्यञ्च । अत्र निखिल-शिल्पिभ्य उत्कर्षः प्रतीयते । स एव व्यतिरेचनमुत्कर्षणमिति व्युत्पत्त्या व्यतिरेक उच्यते ।

अत्र विरोधन-व्यतिरेचनमात्रस्यैव हृदयङ्गमत्वं युक्तं, न तु विरोधिव्यतिरेक्यादीनामित्यलङ्करणांशमात्रस्य प्राधान्यं सर्वत्रैवालङ्कृतिध्वनौ मन्तव्यम् ।

ननु अलङ्क्रियते कश्चित्प्रधानभूतोऽर्थोऽनेनेति अलङ्कारपदार्थपर्यालोचनयैव तस्यार्थप्राधान्यमवसीयते । नचाप्रधानं व्यङ्ग्यमुपधाय ध्वनिव्यपदेश इत्याह—अलङ्कार्यस्येति—वाच्यापेक्षया मुख्यस्येत्यर्थः ।

अयमभिसन्धिः—वाच्याङ्गभूतव्यतिरेकादिसाजात्यमात्रेणालङ्कारव्यवहारो भाक्तः, न पुनः पारमार्थिकः, तस्य व्यङ्ग्यभावेनाप्रतीतेः[२] । रसाद्यपेक्षया पुनरप्राधान्येपि न काचित्क्षतिरिति पूर्वमेवोक्तम् । ये तु रसाद्यपेक्षयाऽलङ्कारत्वं मन्यन्ते ते तिमिरपटलपिहितदृशो न वस्तुतत्वं प्रेक्षन्ते । वाच्यवाचकालङ्करणद्वारा हि रसोत्कर्षकमलङ्करणं रसाद्युत्कर्षणामात्रेण [यद्य-?] लङ्कारतयाऽङ्गीक्रियते[३] वाच्यादिष्वपि तत्प्रसङ्गः कस्य गुरोराज्ञया निवार्य इत्यलं शुष्कचर्वणाभिः ।

---

१. काश्मीरीयप्रत्यभिज्ञानदर्शनविमर्शकानां श्रीमतां वसुगुप्ताचार्याणां पद्यमेतदिति सर्वदर्शन-संग्रहतोऽनुमीयते ।

२. 'कदङ्गभावेने'त्यादर्शपुस्तकेऽस्फुटः पाठः ।

३. एवमादर्शपुस्तके पाठः । 'यद्यलङ्कारतयाऽङ्गीक्रियते तदा वाच्यादिष्वपी'त्यादिः प्रकृते पाठः स्यात् । एतत्साकूतं कटाक्षितं ध्वनिप्रस्थानेऽश्रद्धावद्भिर्ध्वनिप्रध्वंसनव्यसननिरतैर्यैत्सुबह्वसम्बद्धकल्पं जल्पितं तदेवोद्दिश्य टीकाकृद्भिरादर्शविचारभङ्गिप्रतिभामुद्भावयतां खण्डनखण्डखाद्यकृत्प्रभृतीनां सोत्प्रासावज्ञं प्रतिपक्षमतं सकौशलं दूषयतां नीतिमनुसरद्भिर्विहितमित्यापाततः प्रतिभाति । एते रसस्यात्मत्वमङ्गीकुर्वाणा अपि रसं वाक्यत्वपक्षे क्षिपन्तीत्यहो मोहपरम्परा । द्वितीयोल्लासे पञ्चमोल्लासे च विस्तरतोऽस्यापसिद्धान्तस्य निराकरणमकारि ।

वस्तुमात्रं यथा

पंथिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे।
उण्णअपओहरं पेक्खिऊण जइ वससि ता वससु ॥५८
(पथिक नात्र स्रस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे।
उन्नतपयोधरं प्रेक्ष्य यदि वससि तदा वस ॥ इति)

अत्र यद्युपभोगक्षमोऽसि तदा आस्स्वेति व्यज्यते।

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र ! यस्मै त्वम्।
यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च ॥ ५९

अत्र विरुद्धावपि त्वदनुवर्त्तनार्थमेकं कार्यं कुरुत इति ध्वन्यते।

सत्थर स्रस्तरं शास्त्रपूर्वज्ञानोपदेशश्च[1]। मणं मनाक्[2]। पयोधराः स्तना मेघाश्च।

अत्र वाच्यव्यङ्ग्ययोः सादृश्यादिविरहान्नालङ्कारध्वनिः। सादृश्यादिहीनयोरपि च स्वरूपमात्रेण ज्ञानेऽपि व्यञ्जनं नियामकमित्युक्तम्[3]। अत्र यदीति पर्यवसानकथनं[4] न तु प्रस्तुतम्।

शनिर्ग्रहः, अशनिर्वज्रः। उदारो महान्। अनुदारोऽमहान् अनुगतदारश्च। अत्र पूर्वार्धे विरोधिनोः सामानाधिकरण्यविरहान्न विरहावगतिरिति वस्तुध्वनिः। अत एव विरुद्धावपीति द्विवचनं वृत्तौ। उत्तरार्धे च सामानाधिकरण्यमिति विरोधध्वनिरेव। न च पूर्वत्रापि तच्छङ्का, एकविषयताऽभावात्। चकारवलेन वाच्य एवात्र विरोध इति चेन्न, चकारस्यात्र समुच्चयमात्रेणैव पर्यवसन्नतया तत्कृतस्फुटत्वाभावात्। 'कुपतिमपि कलत्रवल्लभ'मित्यादौ तु पृथिवीपतित्वस्य समुच्चयासङ्गत्या कुपतिपदबोध्यत्वाप्रसिद्धतया चापाततोऽपिना विरुद्ध एवार्थ आक्षिप्यते,

---

१. शास्त्रमिति पदस्यापि 'सत्थर'मिति प्राकृते विपरिणमनं सम्भवि। हृतदेवाभिलक्ष्य व्यङ्ग्यपक्षे 'शास्त्रपूर्वे'त्यादि विवरणं टीकायाम्। यथा च कामशास्त्रस्यैत्रोद्देशस्तथा 'पत्थर-पओहर-पन्थिअ' पदैर्गाथास्थैः स्फुटमेवाभास्यते।

२. अत्रादर्शपुस्तके 'पत्थरस्थले' इत्यस्य विवरणं प्रमादात्पतितं भवेत्। प्रस्थराः पाषाणः प्रस्तरप्राया अविदग्धाश्चेति व्याख्या।

३. द्वितीयोल्लासे 'अनेकार्थस्य शब्दस्ये'त्यादिकया कारिकयाऽभिधामूलव्यञ्जननिर्देशावसरे तत्र च 'भद्रात्मन' इत्यादिलक्ष्यलक्षणप्रसङ्ग दर्शितमेतत्। तत्रोदाहरणे सादृश्यद्योतनेनोपमाध्वनिर्द्वितीयकक्षाऽन्तर्भुक्तोऽपरो व्यञ्जनाव्यापारः। नेदृशेषु श्लेषालङ्कारस्य प्रसङ्गः।

४. पर्यवसिततयेत्यर्थः।

(५४) अर्थशक्त्युद्भवोऽप्यर्थो व्यञ्जकः संभवी स्वतः ॥
प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोम्भितस्य वा ।
वस्तु वालङ्कृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत् ॥
वस्त्वलङ्कारमथ वा तेनायं द्वादशात्मकः ।

स्वतःसंभवी न केवलं भणितिमात्रनिष्पन्नो यावद् बहिरप्यौचित्येन संभाव्यमानः । कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः कविनिबद्धेन वक्त्रेति वा द्विविधोऽपर इति त्रिविधः । वस्तु वाऽलङ्कारो वाऽसाविति षोढा व्यञ्जकः । तस्य वस्तु वाऽलङ्कारो वा व्यङ्ग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः ।

पश्चात्प्रकरणाद्यालोचनया समाधिरिति[१] वाच्यालङ्ककारता । अत एव पूर्वं प्राकरणिकार्थविभासः, पश्चादेव विरोधेन प्रतीतिरिति (?)[२] । एतदेवाभिसन्धायास्माभिः पूर्वं विरोधाभास इति वृत्तौ[३] विरोधस्याभासः प्रतीतिरिति व्याख्यातम् ।

स्वतः—कविवर्णनासाचिव्यं बिना सम्भवी[४] तया विनाऽर्थप्रकाशकतया स्वरूपेण वा सम्भवी । प्रौढा चमत्काराधाननिर्वर्णनाऽवलौकिकार्थोक्तिः प्रौढोक्तिः । तेन कविना उम्भितस्यान्योक्तौ विनिवेश्य भावकहृदयसंवादयोग्यतया पूरितस्य । कवितुर्हि रामाद्यनुकार्यवन्न रागाद्याविष्टता । ततश्च तदुक्तोपनिबन्धेऽधिकं चमत्करणं संवित्तिसाक्षिकमिति कवितन्निबद्धप्रौढोक्तिभेदानादरिणः परास्तव्या **महिमखण्डनकृदादयः**[५] । द्वादशात्मकः—प्रधानव्यञ्जकव्यङ्ग्ययोः स्वरूपभेदोपधानात् ।

---

१. समाधिराक्षिप्तस्य विरोधस्य समाधानं, न पुनः 'समाधिः सुकरं कार्य'-मित्यादिनोद्दिष्टः पारिभाषिकोऽलङ्कारविशेषः । विरोधालङ्कारध्वनिपक्षे विरोधप्रतीतावेवार्थस्य विश्रान्तिः । अत्र तु प्रकरणाद्यालोचनया विरोधसमाधानरूपे वस्तुन्येव तात्पर्यमिति निष्कृष्टाभिप्रायः ।

२. अत्र वाक्यं साकाङ्क्षमिति पाठो न सम्यङ् ।

३. 'तिग्मरुचिरप्रताप' इति अमितः समित' इति मूलस्थयोः पद्ययोरुपरि वृत्तिव्याख्यानावसरे । यच्च साहित्यचूणामणौ 'सभर्तृसाधारण्येने'त्यादि धर्मशास्त्रस्य साहाय्यमपेक्षितं तन्नानुपादेयमपि वैदग्धीमात्रे पर्यवसितम् ।

४. 'सम्भाव्ये'त्यादर्शपुस्तकेऽसङ्गतप्रायः पाठः । वस्तुतस्तु 'तथा विने'त्याद्यंशोऽधिक एव प्रतिभाति । टीकाव्याकरणपरः कस्यचित् पुस्तकस्य टिप्पण्यंशः प्रमादतः केनापि लिपिकारेण टीकाग्रन्थ एवान्तर्भावितः स्यात् ।

५. महिमपदेन महिमादृतस्य व्यक्तिविवेकाख्यध्वनिध्वंसनग्रंथकर्तुर्महिमभट्टस्य ग्रहणं खण्डनकृत्पदेन खण्डनखण्डखाद्यकर्त्ता कवितार्किकधुरीणः श्रीहर्ष एवोद्दिष्टः स्यात् यश्चण्डीदासेन

क्रमेणोदाहरणम्--

अरसशिरोमणि धुत्ताणं अग्गिमो पुत्ति धणसमिद्धिमओ ।
इअ भणिएण णअङ्गी पप्फुल्लविलोअणा जाआ ॥ ६०
(अरसशिरोमणिर्धूर्तानामग्रिमः पुत्रि धनसमृद्धिमयः ।
इति भणितेन नताङ्गी प्रफुल्लविलोचना जाता ॥ इति संस्कृतम्)

अत्र ममैवोपभोग्य इति वस्तुना वस्तु व्यज्यते ।

धन्याऽसि या कथयसि प्रियसङ्गमेऽपि
विस्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः शपामि यदि किंचिदपि स्मरामि ॥ ६१

अत्र त्वमधन्या अहन्तु धन्येति व्यतिरेकालङ्कारः ।

अप्रधानव्यञ्जकस्य तु पदादेर्वैचित्र्याद् भेदान्तराणि वक्ष्यन्ते । न केवलमिति प्रौढोक्तिसाहचर्यप्रकटनम् । न खलु तामन्तरेण प्रकाशमानोऽप्यर्थश्चमत्करणयोग्यः, न वा तथाभूतस्य काव्याङ्गता । असन्नप्रसिद्धः । अपरः समनन्तरमेवोक्तः । यद्यपि व्यङ्ग्यस्वरूपेऽपि सम्भवन्ति स्वतः सम्भवादिभेदाः, तथाप्यलौकिकरूपेणैव तस्य काव्योपयोग इत्यगणनम् ।

अरसाः[१] कौतुकानिविष्टाः, धूर्त्ता वञ्चकाः । अत्रेति—प्रफुल्लविलोचनत्वेन ममैवोपभोगयोग्य इति वस्तु व्यज्यत इत्यर्थः .

धन्येति वैपरीत्येनाधन्यता लक्ष्यते, तदतिशयश्च व्यज्यते । न किञ्चदपि स्मरा-

---

प्राक् रसतत्वविवेचनावसरे प्रमाणीकृतः । यश्च सरससुन्दरशरवत्तत्परगद्यसन्दर्भप्रवर्त्तनादश'-तथा तस्य बहुमत इत्यनुमीयते । परं नायं प्रमाणोपन्यासः सुस्थित इति ध्वनिभेददर्शनऽनास्थावतां महिमभट्टानां प्रौढोक्तिपदार्थमनालोचयतां खण्डनकृतां ग्रन्थतो वा वक्तुं शक्यते । 'यस्य हि यल्लक्षणनुगमे सत्यवान्तरविशेषसंस्पर्शः स तस्य प्रकार इत्युच्यते । न चात्र विशेषसंस्पर्शः कश्चिदिति सन्दर्भः, प्रथमविमर्षशास्त्रीयविचारावसरे सामान्यतो मतस्यास्य परिपोषकोऽपि नैतद्विशिष्टपदार्थविभजनपरेऽर्थे उपयुज्यते । 'परास्तव्या हेमचन्द्रप्रभृतय' इत्याकारः पाठ एव टीकाग्रन्थीय इति न दुर्विदग्धमनुमानयं यतस्तत्कृतकाव्यानुशासने 'इति भेदकथनं न न्याय्यम् । किं प्रपञ्चेन' 'वृत्तौ च एवं भेदपरिकल्पने शिष्यव्यामोह एव संपद्यते' इति भेदानादरः स्पष्ट एव ।

१. रुचक-माणिक्यचन्द्र श्रीधर-विद्याचक्रवर्तिभट्टगोपाल-प्रभृतीनां प्राचीनानामयमेव पाठः । अलसेत्यादि गोविन्द-भीमसेनादीनामर्वाचीनानां पाठ; । अरसा अरोचकिन इति साधु व्याख्यातं राजानकरुचकेन ।

दर्पान्धगन्धगजकुम्भकपाटकूट–
संक्रान्तिनिघ्नघनशोणितशोणशोचिः।
वीरैर्व्यलोकि युधि कोपकषायकान्तिः
कालीकटाक्ष इव यस्य करे कृपाणः ॥ ६२

अत्रोपमालङ्कारेण सकलरिपुबलक्षयः क्षणात्करिष्यते इति वस्तु।

मीत्यनेन च रागावेशवशंवदतयाऽकृत्रिमप्रेमरूपं धन्यत्वं व्यज्यत इत्युभयसङ्कलनया व्यतिरेकपर्यवसानम्। धन्याऽसीत्यत्र तु वाच्यव्यतिरेको नाशङ्कनीयः, त्वं धन्या नाहमित्याद्याकारवाच्यविरहात्।

निघ्नमत्यन्तसंश्लिष्टम्। कोपेन कषाया रक्तसितासितरूपा कान्तिर्यस्य। काली महामारी। अत्र सादृश्यमात्रप्रतीतौ नोक्तरूपव्यङ्ग्यनिष्पत्तिः। न हि तत्सदृशं वस्तु तत्कार्यं करोति, तस्मात्कालीकटाक्षतया सम्भाव्यमानः कृपाणो दृष्टः, न तत्सादृश्यमात्रविशिष्टः, प्रतीतेर्बहिरङ्गत्वाप्रसङ्गादित्युत्प्रेक्षैव वरं नोपमा। वृत्तौ तूपमापदप्रयोग औपम्यसम्भावनायामपि विद्यमानतया सङ्गमनीयः।

यत्तु **श्रीधरेण** विकल्पितं, 'कस्य सम्भावना कवेर्वीराणां वा ? नाद्यः, तेन शोणत्वाख्यधर्मस्य कृपाणकटाक्षगततया बिम्बप्रतिबिम्बभावेन निर्देशात्। न द्वितीयः, तेषां कृपाणस्वरूपमात्रप्रतीतेरिति,[1] तद्विकल्पमात्रमेव। न हि बिम्बप्रतिबिम्बभावः सम्भावनां प्रतिवैरी[2]। दृश्यतेऽपि हि यथा मम—

कण्ठे लसत्-(कण्ठोल्लसत्-) काञ्चनयज्ञसूत्रः
संवीज्यमानः सितचामरैर्यः।
श्यामो बभासे तडितोपगूढ
श्चलद्बलाकः किमु वारिवाहः॥

१. अत्र रूचकमतमेव श्रीधरेणानूदितं शब्दतोऽर्थतश्च। उत्प्रेक्षापक्षध्वंसने रुचकस्य साटोपः प्रयासस्तस्य सम्भावनीयतां प्राचीनस्य कस्यापि तत्पक्षसमर्थनञ्च सूचयति। किमसावज्ञातनामा प्राचीनतरः काव्यप्रकाशटीकाकर्ता उत मम्मटपूर्वभावी कोऽपि निबन्धकृदिति न सुशकं कथयितु। चण्डीदासेन तदनुसारिणा विश्वनाथेन चोत्तरश्लोकव्याख्यानावसरे इतरत्र च वृत्तिग्रन्थदूषणप्रायं विवरणं विहितम्। रुचकोपज्ञेयं दोषदृष्टिरिति तद्ग्रन्थादेवावसीयते। श्रीविद्याचक्रवर्त्ति-भट्टगोपालप्रभृतयोऽप्येनमेव मार्गमनुसरन्ति। कुलपरम्परोपदेश'इति चण्डीदासस्य सोत्प्रासमवज्ञासूचनं परमतस्यासंस्थितत्वं द्योतयितुम्। प्रदीपग्रन्थोपरि प्रभोद्द्योतकर्तोर्विवरणं मूलग्रन्थोपरि सुधासागरकारादीनामर्वाचीनानां व्याख्यानञ्च तार्किकम्मन्यानामेषां वितण्डाऽऽडम्बरमेव प्रकटयतीत्यलं शुष्केक्षुचर्वणेन।

२. एवम् 'आवर्जिता किञ्चिदिव स्तनाभ्या' मित्यादिके कुमारपद्ये बिम्ब-प्रतिबिम्बभावसत्त्वेऽप्युत्प्रेक्षोपपादकता चण्डीदासादर्वाचीनेन प्रथितनाम्नाऽप्यय्यदीक्षितेन च रुचकसरणिमनुसरता चित्रमीमांसायां समदर्शि।

गाढकान्तदशनक्षतव्यथासंकटादरिवधूजनस्य यः।
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरम् ॥६३

अत्र विरोधालङ्कारेणाधरनिर्दशनसमकालमेव शत्रवो व्यापादिता इति

अत्र हि किमुना स्फुटैव सम्भावना। वीराणाञ्च स्वरूपमात्रेणैव प्रतितिरिति किं ते कुलपरम्परोपदेशः ? तस्माद्व्यङ्ग्यप्रतीतेरन्यथाऽनुपपत्या वीराणां सम्भावना कवितरि भावकेषु च प्रतिफलतीत्यत्र न कार्यो दुर्ग्रहः। ईदृश्याश्च सम्भावनाया न लोकेऽप्यसम्भव इति स्वतःसम्भवित्वम्।

गाढेति—अत्रौष्ठविषयो र्निर्दशनमोचनक्रिययोर्वर्त्तमानातीतापदेशाद्विपरीतकालयोर्विरोधः कार्यकारणव्यत्ययातिशयोक्तिरूपो वाच्यः। स च प्रसिद्ध एवेति स्वतःसम्भवी। तुल्यश्चमत्काराणां योगः करणं ययोस्तौ तुल्ययोगिनौ, तयोर्भावः समुच्चयाभिधानं, ततश्चाधरो र्निदिष्टः शत्रवो व्यापादिताश्चेति समुच्चालङ्कृतिर्व्यज्यते[१]। प्रकृतयोरप्रकृतयोर्वा समानगुणक्रियासम्बन्धरूपायास्तुल्ययोगिताया गन्धोऽप्यत्र नास्ति।

---

१. न तुल्ययोगितेत्याकाङ्क्षापूरणं टीकाग्रन्थेऽपेक्षितं भवति, अन्यथोत्तरग्रन्थस्य निराकाङ्क्षताप्रसक्तिः। परमेवमादिसन्दर्भरचना इहैव चेतरत्रोपलभ्यते। श्लोकस्यात्थ वृत्तिग्रन्थोपरि विवृतिमुद्दिश्य प्रवर्तितां विप्रतिपत्तिधारा काव्यप्रकाशटीकाविमर्शकानां सुविदितैव। कार्त्स्न्येन विश्लेषणे तु सा विप्रतिपत्तिविरोधालङ्कारतुल्ययोगितोत्प्रेक्षापदानां वृत्तिग्रन्थस्थानां विशदीकरणप्रसङ्गाश्रयेण वरीवर्त्ति। अत्र 'य एवाधरं निर्दशति स एवोन्मोचयती' विरुद्धयोः क्रिययोरेककर्तृकत्वादेकविषयत्वेन विरोधालङ्कारो वाच्य इति रुचक-श्रीधरादिकृता ग्रन्थसङ्गतिः। निजाधरनिर्दशनलक्षणायाः शत्रुवधूजनोष्ठव्यथापरिहाररूपाश्च क्रियाया मिथो विरोध इति भट्टगोपालानुसृता पद्धतिः।

माणिक्यचन्द्रस्तु 'यो हि निजमप्यधरं दशति स कथं परेषामधरान्मोचयती'ति परं विरोधः, परं विरोधद्योतकाभावादस्य वाच्यता चिन्त्ये'ति वैदग्धीभङ्ग्या संशयमुत्थापितवान्। चण्डीदासगोविन्दादीनां मते विरोधपदं न पारिभाषिकमपि तु कार्यकारणक्रमव्यत्ययरूपातिशयोक्तिपरम्। वस्तुतस्तु दशमोल्लासोक्तं विरोधलक्षणं कष्टसृष्टयाऽत्र योजनीयम्। 'तुल्ययोगिता त्वत्रायुक्ते'ति रुचकादीनां बहूनां मतं सुस्थितम्। 'न्यूनस्यापि विशिष्टेन' इत्यादिभामहलक्षणोपयोगोऽपि चिन्त्यः। उत्प्रेक्षापदेन प्रकृतग्रन्थलक्षिताया हेतूत्प्रेक्षाया एवोद्देश इति रुचकश्रीधरावनुसृत्य चण्डीदासादयो मन्यन्ते।

अत्रारोचकिनस्तु चेननाचेतनविचारपूर्विकाया 'अन्यथैव स्थिता वृत्ति'रित्याद्याचार्यदण्डचाद्युद्भावितोत्प्रेक्षाया अयं लक्ष्यो न तु मम्मटनिर्दिष्टाया इत्युद्घोषयन्ति। 'गड्डलिकाप्रवाहपतितानां जरतां गौरवप्रबन्धनियन्त्रितोऽयं ग्रन्थकृत' आनन्द-

तुल्ययोगिता। मम क्षत्याऽप्यन्यस्य क्षतिर्निवर्ततामिति तद्बुद्धिरुत्प्रेक्ष्यत इत्युत्प्रेक्षा च। एषूदाहरणेषु स्वतः संभवी व्यञ्जकः।

कैलासस्य प्रथमशिखरे वेणुसंमूर्च्छनाभिः
श्रुत्वा कीर्तिं विबुधरमणीगीयमानां यदीयाम्।
स्रस्तापाङ्गाः सरसबिसिनीकाण्डसञ्जातशङ्का
दिङ्मातङ्गाः श्रवणपुलिने हस्तमावर्त्तयन्ति ॥६४

अत्र वस्तुना येषामप्यर्थाधिगमो नास्ति तेषामप्येवमादिबुद्धिजनेन चमत्कारं करोति त्वत्कीर्तिरिति वस्तु ध्वन्यते।

केसेसु बलामोडिअ[1] तेण अ समरम्मि जअसिरी गहिआ।
जह कन्दराहिं विहुरा तस्स दढं कंठअम्मि संठविआ ॥६५
(केशेषु बलात्कारेण तेन च समरे जयश्रीर्गृहीता।
यथा कन्दराभिर्विधुरास्तस्य दृढं कण्ठे संस्थापिता ॥ इति संस्कृतम्)

अत्र केशग्रहणावलोकोद्दीपितमदना इव कन्दरास्तद्विधुरान् कण्ठे गृह्णन्ति इत्युत्प्रेक्षा। एकत्र संग्रामे विजयदर्शनात्तस्यारयः पलाय्य गुहासु तिष्ठन्तीति काव्यहेतुरलङ्कारः। न पलाय्य गतास्तद्वैरिणोऽपि तु ततः पराभवं संभाव्य तान् कन्दरा न त्यजन्तीत्यपह्नुतिश्च

अत्र विरोधालङ्कृतस्यार्थस्य व्यङ्ग्यालङ्कृतिर्विरोधव्यङ्ग्याऽपि भवति। ममेति—निर्दशरूपनिष्ठुरपिशाचाय एकं मदधरं बलिमुपकल्प्यान्येऽधरास्तद्विनिर्मुक्ताः सुखिनो निवसन्त्विति बुद्ध्येवासौ निजाधरं पुनः पुनर्दष्टवानित्युत्प्रेक्षा तु सम्भाव्यते। ततश्चानयोरेकव्यञ्जकार्थप्रवेशलक्षणः सङ्कर इत्यभिसम्पन्नः।

पुलिने तटे। बलामोडिअ बलात्कारेण। तस्य विधुरा इति सम्बन्धः। [दढं] कण्ठस्य सन्निवेशेन।

अत्र यद्यपि समासोक्त्यलङ्कृत एवार्थो व्यञ्जकस्तथापि विशेषणतया [यस्य] प्राधान्यविरहेणागणनम्। अतएव [वृत्तिकृत] तदनपेक्षया व्यङ्ग्यं काव्यलिङ्गं सारतया मध्ये लिखितवान्। तस्य हि जयश्रीग्रहणाद्भीताः शत्रवः पलायिता इत्येव शरीरम् (बीजम् ?)। दृढमित्यादिभागोऽपह्नुतिदीपकः। अत्रोत्प्रेक्षाऽपह्नव-

---

वर्धनादर्वाचीनस्थ कस्यापि निबन्धकर्तुर्ग्रन्थमुपजीव्यैवमादिस्थलेष्वनवधानतः स्वकीयग्रन्थ-पौर्वापर्यव्यलीकोद्घाटनं टीकाकृद्भिर्बहुभिरुट्टङ्कितमवतारयतीति वितर्क्यते।

१. बलादामोटच इति, वलात् मुटित्वा (आकृष्य) इति संस्कृतमिति अन्ये।

गाढालिंगणरहसुज्जुअम्मि दइए लहुं समोसरइ ।
माणंसिणीण माणो पीलणभीअ व्व हिअआहिं ॥६६
(गाढालिङ्गनरभसोद्यते दयिते लघु समपसरति ।
मनस्विन्या मानः पीडनभीत इव हृदयात् ॥ इति संस्कृतम्)

अत्रोत्प्रेक्षया प्रत्यालिङ्गनादि तत्र विजृम्भत इति वस्तु ।

जा ठेरं व हसन्ती कइवअणंबुरुहबद्धविणिवेसा ।
दाशेइ भुअणमण्डलमण्णं च्चिअ जअइ सा वाणी ॥६७
(या स्थविरमिव हसन्ती कविवदनाम्बुरुहबद्धविनिवेशा ।
दर्शयति भुवनमण्डलमन्यदिव जयति सा वाणी ॥ इति संस्कृतम्)

अत्रोत्प्रेक्षया चमत्कारैककारणं नवं नवं जगदजडासनस्था निर्मिमीते इति व्यतिरेकः । एषु कविप्रौढोक्तिमात्रनिष्पन्नो व्यञ्जकः ।

जे लङ्कागिरिमेहलासु खलिआ संभोगखिण्णोरई-
फारुप्फुल्लफणावलीकवलणे पत्ता दरिद्दत्तणं ।

सम्भेदेन सह काव्यहेतुरेकव्यञ्जकानुप्रविष्टः रहसुज्जुअम्मि रभसोद्यते । लहु आशु[१] ।

अत्र प्रत्यालिङ्गनप्रसादहसितादीनां प्रधानसन्निकर्षाधिक्यान्न वाच्याङ्गता । वाच्यसिद्धयङ्गत्वं विद्यत एवेति चेत्, न, आलिङ्गनोद्यममात्रेणैव वाच्यसिद्धय-सम्भवात् ।

ठेरं स्थविरं प्रजापतिं दाशेइ दर्शयति च्चिअ[२] एव । अत्र 'हसन्ती'त्यनेन प्रजापतितो व्यतिरेको, 'जअइ' इत्यनेन च स एव[३] नवजगन्निर्मितेर्व्यङ्ग्यः ।

झीणा खिन्ना । खिण्णेति[४] तु व्यक्तम् । फारुप्फुल्लेति--विस्तीर्णोल्लसिते-त्यर्थः । झत्ति तत्क्षणम् ।

---

१. 'लहु समुपसप्पइ' धति रुचक-श्रीधराद्यैर्गृहीतः पाठः । स एव चण्डीदासेनाप्यनुसृत इति प्रतिभाति । अर्वाचीनटीकाकृतां केषामपि (मुद्रितेषु) ग्रन्थेषु 'लहुं समोसरइ' इति सन्दिग्धशुद्धेः पाठात्पाचीनपरिगृहीतः पाठोऽयं साधीयान् ।

२. अयमेव पाठः सम्प्रदायप्रकाशिन्यामुपलभ्यते । 'दावेइ...विअ, इति पाठान्तरम्

३. 'सवनवे' त्यादर्शपुस्तके लुप्तैकमध्याक्षरः पाठः । स्रष्ट्रंशे प्रजापतितः सृष्टचंशे भुवन-मण्डलात्तत्सृष्टाद्व्यतिरेक इति टीकाकृदाकूतम् ।

४. 'झीणोरई'ति देशिप्राकृतमवः पाठो नेतरत्रोपलभ्यते । व्यक्तमिति सैव छाया, तथात्वे स्फुट एव चार्थं इति टीकास्थप्रघट्टकस्याशयः ।

ते एह्लिं मलआणिला विरहिणीणीसाससंपक्किणो
जादा झेत्ति सिसुत्तणे वि बहला तारुण्णतुण्ण विअ ।।६८

(ये लंकागिरिमेखलासु स्खलिताः संभोगखिन्नौरगी-
स्फारोत्फुल्लफणावलीकवलने प्राप्ता दरिद्रत्वम् ।
त इदानीं मलयानिला विरहिणीनिःश्वाससंपर्किणो
जाता झटिति शिशुत्वेऽपि बहलास्तारुण्यपूर्णा इव ।। इति संस्कृतम्)

अत्र निःश्वासैः प्राप्तैश्वर्या वायवः किं किं न कुर्वन्तीति वस्तुना वस्तु व्यज्यते ।

सहि विरइऊण माणस्स मज्झ धीरत्तणेण आसासं ।
पियदंसाविहलंखलखणम्मि सहसत्ति तेण ओसरिअं ।।

(सखि विरचय्यमानस्य मम धीरत्वेनाश्वासम् ।
प्रियदर्शनविशृङ्खलक्षणे सहसेति तेनापसृतम् ।। इति संस्कृतम्)

अत्र वस्तुनाऽकृतेऽपि प्रार्थने प्रसन्नेति विभावना, प्रियदर्शनस्य सौभाग्यबलं धैर्येण सोढुं न शक्यते इत्युत्प्रेक्षा च ।

ओल्लोल्लकरअरअणक्खएहिँ तुह लोअणेसु मह दिण्णं ।
रत्तंसुअं पसाओ कोवेण पुणो इमे ण अक्कमिआ ।। ७०
(आर्द्रार्द्रकरजरदनक्षतैस्तव लोचनयोर्मम दत्तम् ।
रक्तांशुकं प्रसादः कोपेन पुनरिमे नाक्रान्ते ।। इति संस्कृतम्)

अत्रेति---वस्तुना वाक्यार्थेन । इति [वस्तु] व्यज्यत इति योजना[१] । अत्र कविनिबद्धो वक्ता कर्पूरमञ्जर्याम् ।

विह्लङ्खलेति[२]–कौतुकोत्तरलेत्यर्थः । सहसत्ति सहसैव । अत्रेति–वस्तुना 'सहसत्ति'पदबोध्येन । उत्प्रेक्षेति—ओसरिअमिति व्यङ्ग्या चेति[३] संसृष्टिसूचनं, परस्परसाचिव्यापेक्षया त्वेकव्यञ्जकत्वमेव । अत्रार्द्रार्द्रकरजरदनक्षतैस्तव मम

---

१. वस्तुने'ति पदं वृत्तावस्थानस्थितमिति तात्पर्यम् । अत्र ''वस्तुना निःश्वासै,'रित्यादि 'कुर्वन्ती'त्यन्तं वस्तु व्यज्यत इत्येव योजनीयो वृत्तिग्रन्थः ।

२. अत्र श्रीविद्याचक्रवर्त्तिभिः 'वीहल्लं खणे झती'ति यत्पाठान्तरमाविष्कृतं तत् 'वीहल्लं मिति पदस्य सन्दिग्धप्रामाण्यतया 'खणे खणे झती'त्यसङ्गत्या चामनोज्ञम् ।

३. 'उत्प्रेक्षा वे'ति भट्टवामनाचार्यमुद्रितपुस्तके पांठः प्राचीनै रुचक-श्रीधरचण्डीदासश्रीविद्या-चक्रवर्त्तिप्रभृतिभिर्गोविन्द-भीमसेन--नागोजि--वैद्यनाथप्रभृतिभिरर्वाचीनैश्चागृहीत्वादुपेक्ष्य एव ।

अत्र किमिति लोचने कुपिते वहसि इत्युत्तरालङ्कारेण न केवलमार्द्रनखक्षतानि गोपायसि यावत्तेषामहं प्रसादपात्रं जातेति वस्तु ।

महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअन्ती ।
अणुदिणमणण्णकम्मा अङ्गं अणुअं बि तणुएइ ।।७१

("महिलासहस्रभरिते तव हृदये सुभग सा अमान्ती ।
अनुदिनमनन्यकर्मा अङ्गं तन्वपि [तनुकमपि] तनयति" इति संस्कृतम्)

अत्र हेत्वलङ्कारेण तनोस्तनूकरणेऽपि तव हृदये न वर्तते इति विशेषोक्तिः । एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरो व्यञ्जकः । एवं द्वादश भेदाः ।

(५५) शब्दार्थोभयभूरेकः—

यथा—

अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।
तारकातरला श्यामा सानन्दं न करोति कम् ।।७२

अत्रोपमा व्यङ्ग्या ।

लोचनयो रक्तांशुकं प्रसादो दत्तः कोपेन पुनरिमे नाक्रान्ते[१] । अत्रेति प्रश्नत्वेनोन्नीयमानस्य यदुत्तरवाक्यं तस्य योऽलङ्कारः उत्तराख्यस्तेनापह्नुतिसचिवेनेत्युपस्कारः[२]। नखेति रदनोपलक्षणम् । क्वचित्तु नखरदनेति पाठः । प्रसादपात्रमिति तैर्मम प्रसन्नैरिव स्वात्मप्रकटनेनाविनयसूचनया वञ्चके त्वयि प्रणयो विच्छिन्नप्राय इति भावः । विशेषोक्तिरितिसम्मातुमिवेत्युत्प्रेक्षा चेत्यपि द्रष्टव्यम् । व्यञ्जक इति–व्यङ्ग्यार्थोपहित एव हि तथा । ततश्च सहीत्यादौ सहसाऽपसरणादिरूपप्रधानव्यञ्जकस्वरूपमात्रस्य स्वतःसम्भवित्वेऽपि न क्षतिः । अलसेत्यादौ तु द्वयोरपि स्वतःसम्भविता । यत्र यत्र चोक्तरूपविषयाशङ्का तत्र तत्र व्यङ्ग्यवैविध्यं दर्शयता वृत्तिकृता सूचितं [तत्], यत्र तु व्यञ्जकस्वरूपस्य लोकोत्तरत्वं तत्र व्यङ्ग्यस्य स्वतस्त्वप्रत्याशा दुर्बला । एतदभिसन्धायैव स्वतःसम्भवित्वेऽपि न क्षतिः (?) । अरसेत्यादौ तु द्वयोरपि स्वतःसम्भवित्वादिव्यङ्ग्यवैचित्र्यं पृथक् न गणितमिति सर्वं निस्तुषम् । उपसंहरति—एवमिति ।

शब्दार्थयोरुभयोर्भूरुभयं मिलिताभ्यामप्युद्भटशक्तिभ्यां प्रतीतिविषयो भवति व्यङ्ग्यः । यद्वा तद्भूस्तदाश्रय इति शब्दार्थोभयभूर्व्यङ्ग्योऽर्थः । तादात्म्यात्काव्यमपि तथा ।

अतन्द्रेति––चन्द्रः कर्पूरशशिनोः । समुत् सहर्षेति । नायिकापक्षे भिन्नपदपाठः ।

---

१. एवमादर्शपुस्तके पाठः । लोचनयोर्मम दत्तम् ।···प्रसादः कोपेनेत्याचिरेवच्छायाशरीरः

२. 'त्युङ्कार' इत्यादर्शपुस्तकेऽनुचितः पाठः ।

—भेदा अष्टादशास्य तत् ॥५१॥

अस्येति ध्वनेः ।

ननु रसादीनां बहुभेदत्वेन कथमष्टादशेत्यत आह—

रसादीनामनन्तत्वाद् भेद एको हि गण्यते ।

अनन्तत्वादिति—तथा हि नव रसाः, तत्र शृङ्गारस्य द्वौ भेदौ। संभोगो विप्रलम्भश्च। संभोगस्यापि परस्परविलोकनालिङ्गनपरिचुम्बनादिकुसुमोच्चय-जलकेलि-सूर्यास्तमय-चन्द्रोदय-षड्तुवर्णनादयो बहवो भेदाः। विप्रलम्भस्याऽभिलाषादय उक्ताः, तयोरपि विभावानुभावव्यभिचारिवैचित्र्यं, तत्रापि नायकयोरुत्तममध्यमाधमप्रकृतित्वं, तत्रापि देशकालावस्थाऽऽदिभेदाः—इत्येकस्यैव रसस्या-

---

मित्येके[1]। तारका ऊडुः नेत्रमध्यश्च। श्यामा रात्रिः, बाभ्रव्यादितन्त्रप्रसिद्धसितासितादिवर्णवती सकलवसनाभरणसुभगा [नायिका च]। अत्र रात्रिवर्णने प्रकृते श्यामाऽऽदिपदबलादर्थान्तरावगतिद्वारोपमानोपमेयता व्यङ्ग्या। तदपेक्षयाऽपि चायमर्थः पर्य्याप्नोत्येव प्रत्याययितुम्। तथाहि श्यामाऽऽदिपदस्थाने रजन्यादिपदनिक्षेपे कं सानन्दं न करोतीत्युक्ते कान्तासादृश्यं प्रतीयत एव, ततश्च द्वयोरपि शक्तिदार्ढ्यम्।

अष्टादश उक्ता इति शेषः। उक्तेन क्रमेण[2] अर्थान्तरसंक्रमितात्यन्ततिरस्कृतवाच्यौ[२] अलक्षक्रमव्यङ्ग्यः,[२]। शब्दमूले वस्त्वलङ्कृती, अर्थमूला द्वादश उभयमूलश्चेत्यष्टादश। अस्येत्यनन्तराकृष्टचा सङ्गतिरित्याह—ध्वनेरिति।

परिचुम्बनादीत्यादिपदमन्तरङ्गरतपरिग्राहकम्[3]। बहव-इति उक्तानामितरेषाञ्च विभावानुभावसञ्चारिणां स्वरूपनिर्णयानाञ्च लोष्टप्रस्तारेणानन्त्यादिति भावः। नायकयोरित्येकशेषः[4]। उत्तमेत्यादि वृषमृगादिरूपतया स्मरतन्त्रप्रसिद्धचा नेयम्, अन्यथाऽनुत्तमप्रकृताबाभासतानियमेन रसभेदगणनायामप्रवेशात्। देशकालभेदौ देशादिभेदत्वारोपयोगिनौ वसन्तादिनदीतीरादिरूपौ वा[5] साक्षात्त्वदीपकौ,

---

१. रुचकश्रीधरादयः।

२. एक इति शेषः। एक इत्यंशष्टीकाग्रन्थस्थ आदर्शे प्रमादपतितो वा स्यात्।

३. मूले आलिङ्गन-परिचुम्बनादि-कुसुमोच्चये'ति पाठः कार्यः, नतु परिचुम्बनकुसुमोच्चयेति कैश्चिद्गृहीत इति टीकाकृदाशयः। आदिपदेनालिङ्गनादिबाह्यव्यतिरिक्तस्याभ्यन्तररतस्य कामशास्त्रोद्दिष्टस्य ग्रहणम्।

४. 'रिति समवशेष' इत्यादर्शपुस्तके पाठः।

५. 'नदीतीरादिवसन्तादिरूपौ' इत्येव भाव्यम्।

नन्त्यं, का गणना त्वन्येषाम्। असंलक्ष्यक्रमत्वन्तु सामान्यमाश्रित्य रसादिध्वनिभेद एक एव गण्यते।

वाक्ये द्व्युत्थः—

द्व्युत्थ इति शब्दार्थोभयशक्तिमूलः।

—पदेऽप्यन्ये—

'अपि'शब्दाद्वाक्येऽपि। एकावयवस्थितेन भूषणेन कामिनीव पदद्योत्येन व्यङ्ग्येन वाक्यव्यङ्ग्याऽपि भारती भासते।

विशेषेण विप्रलम्भे अथ ?[1]। अवस्था बाल्यादिकाः। एकस्यैव रसस्येति–अन्येषां रसानां तदाभासानाञ्च विचित्रतागणने किं पुनर्वाच्यमिति भावः। एतदेवाह—केत्यादिना। ननु यद्यानन्त्यं कथं तर्हि एकधा गणनमित्याह—असंलक्ष्येति।

वाक्य इति—यत्रैकैकपदस्य नासाधारणी शक्तिः, तत्र समग्रमेव वाक्यमाश्रित्य व्यङ्ग्योऽवस्थित इत्युच्यते। द्व्युत्थश्च व्यङ्ग्यस्तथा नियत एव लक्ष्ये प्रसिद्धः। तेन–

त्वदनुगतवतीश सा मदर्थे त्वमपि मया सदृशीकृतोऽसि धात्रा।
वहति वपुरिदं गतागतैस्तेऽनवरतखेदमवाप्य यत्कृशत्वम्[2]॥

इत्यत्रानवरतेति प्रकरणाद्वाच्यपर्यवसायित्वेऽनवरतेति पदेन वाक्यार्थेन च व्यङ्ग्यस्य तत्कान्तसम्भोगस्योभयमूलत्वेऽपि प्रायिकत्वाभावादनादरः[3]।

वस्तुतस्तु यथादर्शनं भेदगणना कार्या।

---

१. एवमादर्शपुस्तके। परमस्य (अथ) पदस्योपयोगः प्रकृते चिन्त्यः।

२. दुतीमुपभुक्तवन्तं नायकं प्रति विरहविधुराया विदग्धाया नायिकायाः सोत्प्रासखेदमुपालम्भवचनमेतत्।

३. लक्ष्याणां बहुत्वाद् वृत्तिकृतोदाहरणप्रदर्शनं प्रत्येकं न कृतमिति भावः। "अत्रैकदेशस्था शब्दशक्तिरेकदेशान्तरस्था चार्थशक्तिर्व्यङ्ग्यं प्रति व्याप्रियत इति वाक्य एवोभयशक्तिमूलत्वमिति ग्रन्थकृतोऽभिप्रायः।

वस्तुतस्तु शब्दशक्तिः कामं पदगताऽपि सम्भवति, अर्थशक्तिस्तु वक्त्राद्यौचित्याद्-वाक्य एव भवतीति वाक्य एवोभयशक्तिमूलत्वमिति ध्वनिविदो मन्यन्ते" इति रुचककृतग्रन्थविवरणम्। तत्र 'शब्दशक्तिस्तावच्छब्दश्लेषवशादर्थशक्तिस्तु प्रकरणवशा' दित्युभयशक्तिमूलध्वनिप्रस्तावव्याख्यायां तस्यां लोचनकृन्मन्तव्यमेव प्रमापकम्। परिवृत्तिसहत्वासहत्वपक्षमङ्गीकुर्वाणाः काव्यप्रकाशकृतोऽत्रापि तमेव पक्षमुपजीवन्तीति वरम्। रुचककृतसंकेतोपरि चैतत्प्रसङ्गेऽस्मद्विहितविवरणं द्रष्टव्यम्।

तत्र पदप्रकाशत्वे क्रमेणोदाहरणानि—

यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा।
अनुकम्प्योऽनुकम्प्यश्च स जातः स च जीवति ॥७३

अत्र द्वितीयमित्रादिशब्दा आश्वस्तत्त्व-नियन्त्रणीयत्व-स्नेहपात्रत्वादि-संक्रमितवाच्याः।

खलववहारा दीसन्ति दारुणा जइबि तहबि धीराणं।
हिअअवअस्सबहुमआ ण हु ववसाआ विमुञ्झन्ति ॥७४

पदेऽप्यन्य इति--अत्र वाक्ये पदे इति व्यङ्ग्यविषयविभागेन ध्वनिरेवार्थाद्विभक्तो बोद्धव्यः। अन्ये व्यङ्ग्यभेदा इत्यर्थः।

ननु चमत्काराविष्कारक्षमः शब्दः काव्यं, चमत्कारश्च नैकपदसाध्यः। ततश्च तद्व्यङ्ग्यं क्षुद्रप्रायकमेवेति कथं तेनोपाधिना काव्यभेदनमित्याह—एकेति[१]। पदद्योत्येन व्यङ्ग्येन व्यञ्जनावृत्त्या पदबोध्येन वस्तुमात्रादिना। वाक्यव्यङ्ग्याऽपीति--अर्शआदित्वादच्।

अयमर्थः--नखलु केवलस्य पदस्य तथाविधं सामर्थ्यं, किन्तु तत्पदव्यङ्ग्याश्रयपदान्तरन्तु तस्य सहकारीति[२]। तेन च व्यङ्ग्येन सर्वमेव स्वीयं प्रधानाप्रधानरूपं हेतुजातमुपजीव्यते। ततश्च तन्मुखेन वाक्यस्यातिशयः समीचीन इति न किञ्चिदप्यशिवम्। पदात् प्रकाशः प्रतीतिरस्येति पदप्रकाशो व्यङ्ग्यस्तस्य भावस्तत्त्वम्[३]। तत्र क्रमेणेत्यतः पूर्वं लक्षणेति शेषः[४]।

उदाहरणनीति--लक्ष्यदर्शनेन लक्षणानि स्फुटानि भवन्तीति भावः। मित्रादिशब्दा इति--मित्रशत्र्वनुकम्प्यजातजीवतिपदानि। स्नेहपात्रत्वादीति--सौजन्यसुश्लाध्यजीवनत्वपरिग्रहः। अत्र पद्येऽनेकावान्तरवाक्यवति वाक्यैकदेशिनामेव लाक्षणिकता, न तु पदसमभिव्याहाररूपस्य वाक्यस्य। प्रथममित्रादिपदानां हि सुहृदादिसंज्ञिबोधकानां मुख्यानुपयोगविरहेण न लाक्षणिकत्वम्।

दारुणाः श्रेयःप्रतिबन्धकाः। हृदयमेव वयस्यः सखा, तेन बहुमता अनुमोदितः। विमुह्यन्तीति—अत्र विमोहश्चांशमात्रेणान्वयानुपयुक्तोऽत्यन्ततिरस्कृतः।

---

१. 'एकावयवसंस्थेने' त्यादिः ('विच्छित्तिशोभिनैकेने'त्यादिर्मुद्रितपुस्तके पाठः) ध्वन्यालोकीयः परिकरश्लोकः गद्यान्वयमुखेनात्रानुसृतः।

२. 'पदेऽपी'त्याधारसप्तमीसहकारिताऽऽत्मक-निमित्तत्वाभिप्रायेणेति तात्पर्यम्।

३. 'पदप्रकाशत्व' इति चण्डीदासधृतः पाठः। 'पदप्रकाश्यत्व' इतीतरत्र पाठः।

४. लक्षणक्रमेण कारिकावृत्तिग्रन्थयोर्दर्शितार्थान्तरसंक्रमितवाच्यादिपौर्वापर्यमनुसृत्येति यावत्।

(खलव्यवहारा दृश्यन्ते दारुणा यद्यपि तथापि धीराणाम् ।
हृदयवयस्यबहुमता न खलु व्यवसाया विमुह्यन्ति ॥
इति संस्कृतम्)

अत्र विमुह्यन्तीति ।

लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः ।
तदा सुधाऽऽस्पदमभूदधुना तु ज्वरो महान् ॥७५

अत्र तदादिपदैरनुभवैकगोचरा अर्थाः प्रकाश्यन्ते । यथा वा—

मुग्धे ! मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ॥७६

अत्र 'भीतानने'ति । एतेन हि नीचैःशंसनविधानस्य युक्तता गम्यते ।

भावादीनां पदप्रकाश्यत्वेऽधिकन्न वैचित्र्यमिति न तदुदाह्रियते ।

रुधिरविसरप्रसाधितकरवालकरालरुचिरभुजपरिघः ।
झटिति भ्रुकुटिविटङ्कितललाटपट्टो विभासि नृप ! भीम ! ॥७७

सर्वावयवगतो विदग्धनयनोत्सवहेतुः कोऽप्यतिशयो लावण्यं, प्रत्येकमवयवानां संस्थानसौभाग्यं कान्तिः अनुभवैकगोचरास्तत्कालचमत्कारकारिणो निर्वक्तुमशक्या अर्थाः सर्वस्वव्ययप्राणपातादिभिरपि प्रार्थनीयाः। अत्र च विभावादिसामग्रीसाध्यामपि रसप्रतीतौ 'तदा'दिपदबोध्यतद्विशेषाणामेव प्राधान्यमनुभूयत इति पदप्राधान्यमन्वयव्यतिरेकगम्यम् ।

सर्वनामपदानामेवासाधारण्येन रसपोषकता नान्येषामिति भ्रमं निरस्यति——यथा वेति । धृतिर्धैर्यं, बधान गृहाण, ऋजुतां सततप्रसन्नताम् । युक्तेति——भयस्याकृत्रिमयतया मौग्ध्यातिशयप्रकटनेन रागवत्त्वदार्ढ्यं प्रत्ययाच्चमत्कारोत्कर्ष इति भावः। अधिकं न वैचित्र्यमिति——रसध्वनिस्थले तावत्प्रायशो व्यभिचारिणां पदप्रकाश्यत्वम्, एवं व्यभिचारिप्राधान्ये। दैवतादिरत्यादि[१] रसाभासादीनाञ्च पदप्रकाश्यत्वं रससाधारणमेवेति तदुदाहृतिसजातीयास्तदुदाहृतयोऽप्याकरसुलभा इति न पृथक् दर्शिता इत्यर्थः। विसरः क्षारः। अत्र तु ईशार्थनियतेन भीमपदेन स्वशक्त्या वृकोदरार्थे व्यक्ते तयोः सादृश्यसम्भवादुपमा प्रतीयत इति पदशक्तिमूलोऽलङ्कृतिध्वनिः ।

---

१. दैवतादिरत्यादिर्भावो निरुक्तलक्षणो रसाभासश्चादी येषामिति । दैवतादिरत्यादिर्यथोक्तार्थो रसा तदाभासादयश्चेति वा विग्रहः । आदिपदेन भावाभासादीनां ग्रहणम् ।

अत्र भीषणीयस्य भीमसेन उपमानम् ।

भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः ॥७८

काचित्सङ्केतदायिनमेवं मुख्यया वृत्त्या शंसति '

सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं
यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागतिः ।
आश्चर्यन्तव सौकुमार्यमभितः क्लान्ताऽसि येनाधुना
नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति तेनासितुम् ॥७९

भुक्तिर्विभवप्राप्तिः, सम्भोगश्च । मुक्तिः कैवल्यं, गृहभवव्यासङ्गपरित्याग-सुखञ्च । एकान्तं[१] परमार्थरूपं, सङ्केतस्थानञ्च । [सदागमः] सच्छास्त्रं महाभारतादि, सतः सुन्दरस्यागमनञ्च । अत्र प्रकृतयोः सादृश्यादिविवक्षाविरहान्नालङ्कारध्वनिः । सादृश्यसम्भवे तु तद्विवक्षायामुपमाध्वनिरेव । वृत्त्या मुख्यप्रकारेण अभिधावृत्तिबोध्यप्राकरणिकार्थेन रहस्यसङ्गोपनार्थम्, एवं विदग्धोक्त्या[२] । अत्र च कस्येत्यादिप्रधानभागस्य शब्दान्वयव्यतिरेकानुविधानविरहान्न वाक्यप्रकाश्यत्वम्[३] । 'पन्थिअ' इत्यादौ[४] तु प्रेक्षणं दर्शनमभिसन्धानञ्च, वसनं विश्रामो नायिकाऽऽगमन-प्रतीक्षणञ्चेत्येकैकक्रियाकारकपदव्यङ्ग्यतेत्यभिसन्धाय वाक्यप्रकाश्यतोक्ता ।

सम्प्रति द्वादशविधार्थशक्तिमूलस्य पदप्रकाश्यतोदाहृतयः[५] । अभितो बहिरन्तश्च । अधुना क्लान्ताऽसि न तु पूर्वं, कदाचिदपि तवैवंविध क्लमो न दृष्ट इति भावः । व्यतिकरः पौनःपुन्यं सम्भेद इत्येकः । वस्तुनाऽधुनापदार्थप्रधानेन वाक्या-

---

१. 'एकान्त' इति पुंलिङ्गप्रयोगो रुचकश्रीधरादिसम्मतः । स एवाभिधानिकानुमोदितः । माणिक्यचन्द्रेणाप्येकान्तमिति पाठो धृत इति प्रतिभाति ।

२. न त्वभिधाऽऽख्यया मुख्यतया साधारणत्वेन गृहीतया साक्षादिति व्याख्यावैदग्धीशैली श्रीधरानुसृताऽत्र प्रकटिता । यत्तु भट्टगोपालेनाभिधावृत्तिकल्पमुपजीव्य "व्यञ्जने तु भुक्तिमुक्ती प्रवृत्तिनिवृत्ती" इत्यादि व्याख्यानं तदविचारविजृम्भितमरसिकजनोक्तप्राय-मित्यनादेयम् ।

३. परिवृत्तिसहत्वासहत्वनिमित्तोऽन्वयव्यतिरेकानुविधानमूलो न्यायो ध्वनिभेदविवेचन इतरत्रेवात्राप्यनुसृत इति टीकाकृन्मन्तव्यनिष्कर्षः ।

४. शब्दशक्तिमूलध्वनिनिर्देशप्रसङ्ग उदाहृतं तत्पद्यम् । 'एवं च 'पन्थिअ'इत्याद्युभयशक्तिमूल-स्यैवेदोहरणं वाच्यम्, अर्थशक्तेपिव्यापारात् । अन्यथा केवलशब्दशक्तेर्वस्तुमात्रं ध्वन्यं न स्या' दित्यानन्दवर्धनमतानुयायिना रुचकेन यदुक्तं तत्प्रत्युक्तप्रायम् ।

५. 'उद्दिश्यन्त' इत्याकाराध्याहृतक्रिययाऽन्वयः ।

अत्र अस्तुना कृतपरपुरुषपरिचया क्लान्ताऽसीति वस्तु 'अधुना'पदद्योत्यं व्यज्यते ।

तदप्राप्तिमहादुःखविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ।।८०
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गताऽन्या गोपकन्यका ।।८१

अत्र जन्मसहस्रैरुपभोक्तव्यानि दुष्कृतसुकृतफलानि वियोगदुःखचिन्ताऽऽह्लादाभ्यामनुभूतानीत्युक्तम् । एवं च 'अशेष'-'चय'पदद्योत्ये अतिशयोक्ती ।

क्षणदाऽसावक्षणदा वनमवनं व्यसनमव्यसनम् ।
वत वीर ! तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखं सर्वम् ।।८२

अत्र शब्दशक्तिमूलविरोधाङ्गेनार्थान्तरन्यासेन विधिरपि त्वामनुवर्त्तत इति 'सर्व'पदद्योत्यं वस्तु ।

र्थेन । 'अधुना'पदद्योत्यमिति—तदर्थस्येतरपदार्थोत्कर्षस्तस्यापि पदान्तरापेक्षया वैशिष्टयमित्यर्थः । एवरमुत्तरत्रापि योज्यम् ।

निरुच्छ्वासतया मुक्तिं गुरुजननियन्त्रणादुःखपरित्यागं, मोक्षदशायामपि निरुच्छ्वासता "नास्य प्राणा उत्क्रामन्ति" "तत्रैव समवलीयत" इति श्रुतितः प्रसिद्धा । अनया च वाच्यातिशयोक्त्या सहितेन वाक्यार्थेन 'शेष'–'चय'–पदार्थ-प्रधानसचिवेन जन्मसहस्रभोगदुष्कृतसुकृतफलराशितादात्म्याध्यवसितभगवद्विरह[१] दुःखचिन्ताऽऽह्लादप्रत्यायनमित्यतिशयोक्तिद्वयध्वनिः[२] । मुक्तिपदातिशयोक्तिस्तु स्पष्टतया ध्वन्यात्मनि [न] निवेशयितव्या । अत्र च व्यञ्जकस्य प्रौढोक्तिमन्तरेणापि सम्भवात् स्वतःसम्भविता ।

अक्षणदा अनुत्सवदा अरात्रिश्च । अवनं रक्षणं, न वनञ्च । अव्यसनमवीनां मेषाणामसनम् इतस्ततो भ्रमणं, व्यसनं कौतुकं दुःखं[३] [अव्यसनं] न व्यसनम् । पराङ्मुखं विपरीतम् । विरोधोऽङ्गमुत्थानहेतुर्यस्येति विग्रहः । गोसम्मि प्रातः । आसि आसीत् । दलो इति पुंसि, प्राकृते तादृग्लिङ्गनियमविरहात् । महीसम्मुखमवनतम् ।

---

१. 'तावद्विरहे त्यादर्शपुस्तकेऽसङ्गतः पाठः ।

२. नचात्र वाच्यसिद्ध्यङ्गाख्यगुणीभूतव्यङ्ग्यभेदशङ्का कार्या, वाच्यादनतिशयिते हि तस्य प्रसङ्गात् । अतो ध्वन्यात्मकमेतत्काव्यमिति सुस्थितम् ।

३. 'व्यसनंत्वशुभं दुःख'मिति यावदि'ति पाठो 'व्यसनं त्वशुभे सक्ता' वित्यादि मेदिनीकोषानुगः स्यात् । आदर्शपुस्तकस्थः पाठः कौतुकदुःखे'त्यादिस्तु टितइवानुमीयते । माणिक्यचन्द्रेणापि शत्रुकृतोपजापपरत्वेन 'व्यसन'पदं विवृतम् ।

तुह वल्लहस्य गोसम्मि आसि अहरो मिलाणकमलदलो ।
इअ णववहुआ सोऊण कुणइ वअणं महिसमुहं ।।८३

(तव वल्लभस्य प्रभाते आसीदधरो म्लानकमलदलम् ।
इति नववधूः श्रुत्वा करोति वदनं महीसंमुखम् ।। इति संस्कृतम्)

अत्र रूपकेण त्वयाऽस्य मुहुर्मुहुः परिचम्बनं तथा कृतं येन म्लानत्वमिति 'मिलाणा'दिपदद्योत्यं काव्यलिङ्गम् । एषु स्वतःसम्भवी व्यञ्जकः ।

राईसु चंदधवलासु ललिअमप्फालिऊण जो चावं ।
एकच्छत्तं विअ कुणइ भुअणरज्जं विजंभंतो ।।८४

(रात्रीषु चन्द्रधवलासु ललितमास्फाल्य यश्चापम् ।
एकच्छत्रमिव करोति भुवनराज्यं विजृम्भमाणः ।। इति संस्कृतम्)

अत्र वस्तुना येषां कामिनामसौ राजा स्मरस्तेभ्यो न कश्चिदपि तदादेश-पराङ्मुख इति जाग्रद्भिरुपभोगपरैरेव तैर्निशाऽतिवाह्यत इति 'भुअणरज्ज'पद-द्योत्यं वस्तु प्रकाश्यते ।

निशितशरधियाऽर्पयत्यनङ्गो
दृशि सुदृशः स्वबलं वयस्यराले ।
दिशि निपतति यत्र सा च अत्र
व्यतिकरमेत्य समुन्मिषन्त्यवस्थाः ।।८५

अत्र वस्तुना युगपदवस्थाः परस्परविरुद्धा अपि प्रभवन्तीति 'व्यतिकर'पद द्योत्यो विरोधः ।

वारिज्जन्तो बि पुणो सन्दाबकदत्थिएण हिअएण ।
थणहरवअस्सतए विसुद्धजाई ण चलइ से हारो ।।८६

मिलाणादिपदं मिलाणकमलदलो इति समस्तपदम् । योऽसौ[१] तस्य स्मर-स्यादेशः, तत्पराङ्मुखो न कश्चिदिति योजना । तेभ्यः कामिभ्यः[२], निधारणे पञ्च-मीपक्षस्तु नानुशासनिकः । उपभोगपरैर्जाग्रद्भिः सद्भिरिति योजना । आज्ञाप्रधानं राज्ञां कर्म राज्यं, भुवनराज्यपदस्येदृगर्थव्यञ्जकता[३] ।

अराले विविधवैदग्धीगहने वयसि यौवने । व्यतिकरं मिश्रीभावम् । अवस्थाः

---

१. येषाः कामिनामसाविति वृत्तिग्रन्थलभ्यो योऽसाविति निर्देशः ।

२. एतद्वाक्यद्वयमादर्शपुस्तके व्यत्यस्तं दृश्यते । तेभ्यइत्यस्य 'पराङ्मुख' पदेन परामर्शः ।

३. श्रीधरविवरणस्यायमनुवादः । 'आज्ञाप्रधान'मिति कर्मे'त्यस्य विशेषणम् । राज्ञां कर्मेति वैयाकरणसम्मता राज्यपदस्य निरुक्तिः ।

(वार्यमाणोऽपि पुनः संतापकदर्थितेन हृदयेन
स्तनभरवयस्येन विशुद्धजातिर्न चलत्यस्या हारः ।। इति संस्कृतम्)

अत्र विशुद्धजातित्वलक्षणहेत्वलङ्कारेण हारोऽनवरतं कम्पमान एवास्ते इति 'ण चलइ' पदद्योत्यं वस्तु ।

सो मुद्धसामलङ्गो धमिल्लो कलिअललिअणिअदेहो ।
तीए खंधाहि बलं गहिअ सरो सुरअसङ्गरे जअइ ।।८७

(स मुग्धश्यामलाङ्गो धम्मिल्लः कलितललितनिजदेहः ।
तस्याः स्कन्धाद्बलं गृहीत्वा स्मरः सुरतसंगरे जयति।। इति संस्कृतम्)

अत्र रूपकेण मुहुर्मुहुराकर्षणेन तथा केशपाशः स्कन्धयोः प्राप्तौ यथा रतिविरतावप्यनिवृत्ताभिलाषः कामुकोऽभूदिति 'खंध'पदद्योत्या विभावना । एषु कविप्रौढोक्तिमात्रनिष्पन्नशरीरः ।

णवपुण्णिमामिअङ्कस्स सुहअ कोत्तं सि भणसु मह सच्चं ।
का सोहग्गसमग्गा पओसरअणिव्व तुह अज्ज ।।८८।।

(नवपूर्णिमा मृङ्गाकस्य सुभग कस्त्वमसि भण मम सत्यम् ।
का सौभाग्यसमग्रा प्रदोषरजनीव तवाद्य ।। इति संस्कृतम्)

अत्र वस्तुना मयीवान्यस्यामपि प्रथममनुरक्ता त्वं, न तत इति 'णवे'त्यादि-'पओसे' त्यादिपदद्योत्यं वस्तु व्यज्जते ।

सहि णवणिहुवणसमरम्मि अङ्कवालीसहीए णिबिडाये ।
हारो णिवारिओ विअ उच्छेरन्तो तदो कहं रमिअं ।।

(सखि नवनिधुवनसमरेऽङ्कपालीसख्या निविडया ।
हारो निवारित एवोच्छ्रियमाणस्ततः कथं रमितम् ।। इति संस्कृतम्)

अत्र वस्तुना हारच्छेदान्तरमन्यदेव रतमवश्यमभूत्, तत्कथय कीदृगिति व्यतिरेकः 'कहं'पदगम्यः ।

क्षणनिर्वेदोन्मादचाटुकाक्ववहित्थाद्याः । सन्दाबो सन्तापः, वअस्सतए[1] वयस्यतया । से तस्याः । अत्रेति—विशुद्धजातयो हि न स्वसन्निवेशाच्चलन्ति[2] ।

सरो स्मर एवेति रूपकम् ।

मात्रेति—बहिःसम्भवाभावात् । त्तं सि त्वमसि ।

---

१. 'वअस्यतए' इति चण्डीदासगोविन्दादिभिः पठितं, 'वअस्सएणे'ति स्वार्थे 'क'युक्तमितरैः ।
२. ''विशुद्धाभिजना हि परार्थे जीवितमपि त्यजन्ति न पुनः स्वधर्माच्चलन्ती''ति विवेक-मन्तव्यं भङ्ग्यन्तरेणैतदेव सूचयति ;

[1]यथा वा—

प्रविसंती धरवारं विवलिअवअणा विलोइऊण पहम् ।
खन्धे घेत्तूण घडं हा हा णठ्ठोत्ति रुअसि सहि किंति ॥९०॥

(प्रतिशन्तीगृहद्वारं विवलितवदना विलोक्य पन्थानम् ।
स्कन्धे गृहीत्वा घटं नष्ट ह हा इति रोदिषि सखि किमिति ॥ संस्कृतम्)

अत्र हेत्वलङ्कारेण सङ्केतनिकेतनं गच्छन्तं दृष्ट्वा यदि तत्र गन्तुमिच्छसि तदा अपरं घटं गृहीत्वा गच्छेति वस्तु किंतिपदद्योत्यम् । यथा वा[2]—

विहलंखलं तुमं सहि दट्ठुण कुठेण तरलतरदिट्ठिं ।
वारप्फंसमिसेण अ अप्पा गुरुओत्ति पाडिअ विहिण्णो ॥९१॥

(विशृङ्खलां त्वां सखि दृष्ट्वा कुटेन तरलतरदृष्टिम् ।
द्वारस्पर्शमिषेण चात्मा गुरुक इति पातयित्वा विभिन्नः ॥ इति संस्कृतम्)

अत्र नदीकूले लतागहने कृतसङ्केतमप्राप्तं गृहप्रवेशावसरे पश्चादागतं दृष्ट्वा पुनर्नदीगमनाय द्वारोपघातव्याजेन बुद्धिपूर्वं व्याकुलया त्वया घटः स्फोटित इति मया चिन्तितम्, तत्किमिति नाश्वसिषि, तत्समीहितसिद्धये व्रज, अहं ते श्वश्रूनिकटे सर्वं समर्थयिष्य इति द्वारस्पर्शनव्याजेनेत्यपह्नुत्या वस्तु ।

जोह्लाइ महुरसेण अ विइण्णतारुण्णउस्सुअमणा सा ।
बुड्ढा वि णवोढ व्विअ परबहुआ अहह हरइ तुह हिअअं ॥९२॥

(ज्योत्स्नया मधुरसेन च वितीर्णतारुण्योत्सुकमनाः सा ।
वृद्धापि नवोदेव परवधूरहह हरति तव हृदयम् ॥ इति संस्कृतम्)

अङ्कपालिः आलिङ्गने सैव सखी । निबिडा दृढा विश्वस्ता च । उच्छेरन्तो उच्छ्रियमाणः । कथमिति प्रश्नेन वैलक्षण्यसूचनाद्व्यतिरेकः । घटो जलभाण्डभेदः ।

हृदयहरणहेतोः 'जोह्लाइ' इत्यादिना निर्देशात् काव्यलिङ्गता । वाक्याद्व्य-

---

१. एवं टीकाग्रन्थस्य पाठश्चेत्तदा चण्डीदासेन रुचकश्रीधरावनुसृत्य 'पविसन्ती घरे'त्यादिगाथा वृत्तिग्रन्थबहिर्भूतेति मन्यते स्म । माणिक्यचन्द्रेण 'पविसन्ती'ति 'विहलंखल'मिति चोभे एव गाथे गृहीते । भट्टगोपालेन पुनः 'यथावे'ति निर्दिष्टोत्तरगाथा नाङ्गीकृता । एवमिहापि यथा तृतीयोल्लासे वृत्तिग्रन्थस्यान्यैर्व्यत्यासः साधित इति नासह्यमनुमानम् ।

२. एवमादर्शपुस्तके । परं 'कुटो जलभाण्डभेद' इत्येव स्यात्, घटपदस्यातिस्पष्टस्य विवरणेऽनवसरात् ।

अत्र काव्यलिङ्गेन वृद्धां परवधूँ त्वमस्मानुज्झित्वाऽभिलषसीति त्वदीयमाचरितं वक्तुं न शक्यमित्याक्षेप 'परवहू'पदप्रकाशः।

एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरः। वाक्यप्रकाशे तु पूर्वमुदाहृतम्। शब्दार्थोभयशक्त्युद्भवस्तु पदप्रकाशो न भवतीति पञ्चत्रिंशद् भेदाः।

(६०) प्रबन्धेऽप्यर्थशक्तिभूः ॥ ४२

यथा गृध्रगोमयुसंवादादौ—

अलं स्थित्वा श्मशानेऽस्मिन्गृध्रगोमायुसङ्कुले।
कङ्कालवहले घोरे सर्वप्राणिभयङ्करे ॥९३॥
न चेह जीवितः कश्चित्कालधर्ममुपागतः।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥९४॥

इति दिवा प्रभवतो गृध्रस्य पुरुषविसर्जनपरमिदं वचनम्।

आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत सांप्रतम्।
बहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन ॥९५॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम्।
गृध्रवाक्यात्कथं मूढास्त्यजध्वमविशङ्किताः ॥९६॥

इति निशि विजृम्भमाणस्य गोमायोर्जनव्यावर्त्तननिष्ठं च वचनमिति प्रबन्ध एव प्रथते। अन्ये त्वेकादश भेदा ग्रन्थविस्तरभयान्नोदाहृताः स्वयन्तु लक्ष्यतोऽनुसर्त्तव्याः।

'अपि'शब्दात्पदवाक्ययोः।

ङ्ग्यप्रतीतिर्वाक्यप्रकाशः। अत्र पूर्वमर्थान्तरसंक्रमितवाच्यादिसामान्यलक्षणतस्तावदुदाहृतम्। पञ्चत्रिंशदिति—वाक्यप्रकाशेऽष्टादश, पदप्रकाशे तु सप्तदश।

प्रबन्धो महावाक्यम्। अर्थशक्तिभूः संलक्षक्रमव्यङ्ग्यो बस्तुमात्रालङ्कृतिरूपो द्वादशविधः। कालधर्मो मरणम्। दिवा प्रभवतो निशाऽऽगमनशङ्किनः। पुरुषविसर्जनं पुरुषाणां शवपरित्यागः। एतच्च पदान्तरसाचिव्येनैव महावाक्यं भवतीति तान्यनुसर्त्तव्यानि। सम्प्रति स्पष्टार्थं महावाक्यान्तरं लिखति आदित्य इति।—स्नेहं जीवनोपायानुष्ठानरूपम्। अयं मुहूर्त्तः सन्ध्यासमासन्नकालो वन्यदारुणतया बहुविघ्नः सम्भावितभूताद्यावेशः। ततस्तदपगमात्कालान्तरे जीवितसम्भावनाऽप्यस्ति। जनव्यावर्त्तनं गृध्रभक्षणविघ्नविधायि। प्रबन्ध एव— नतु पदस्य वाक्यस्य

(६१) पदैकदेशरचनावर्णेष्वपि रसादयः ।

तत्र प्रकृत्या यथा—

रइकेलिहिअणिअसणकरकिसलअरुद्धणअणजुअलस्य ।
रुद्दस्स तईअणअणं पव्वईपरिचुंबिअं जअइ ॥९७॥
(रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य ।
रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति ॥ इति संस्कृतम्)

अत्र जयतीति नतु शोभते इत्यादि समानेऽपि हि स्थगनव्यापारे लोकोत्तरेणैव व्यापारेणास्य विधानमिति तदेवोत्कृष्टम् । यथा वा—

प्रेयान्सोऽपमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद्यावन्न यात्युन्मनाः ।
तावत्प्रत्युत पाणिसंपुटगलन्नीवीनिवन्धं धृतो
धावित्वैव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः ॥९८॥

अत्र पदानीति, न तु द्वाराणि ।

तिङ्सुपोर्यथा—

पथि पथि शुकचञ्चूचारुराभाऽङ्कुराणां
दिशि दिशि पवमानो वीरुधां लासकश्व ।

वा शक्त्यतिरेक इत्यर्थः । अत्र वस्तुना वस्तुमात्रं व्यज्यते । व्यञ्जकश्च स्वतःसम्भवी । लक्ष्यतो[1] लक्ष्येषु ।

पदैकदेशो द्विधा, प्रकृतिः प्रत्ययश्च । प्रकृतिर्धातुप्रातिपदिकरूपा, प्रत्ययस्तु सुप्तिङाद्यनेकविधः । तत्र क्रमादुदाहरणानि——अत्र चावापोद्वापदृष्टया तस्य तस्यांशस्य वाचकस्यापि वाचकसमुदायप्रविष्टस्य–[2] प्रसिद्ध-स्व-स्व-प्रतिपाद्य-प्रतिपादनद्वारा रसादिकेषु कोऽप्यतिशय आधीयत इति तद्विद एवात्र प्रमाणम् ।

रतिकेलिहृतनिवसनायाः करकिसलयाभ्यां रुद्धं नयनयुगलं यस्येति समासः । समानेऽपि स्थगनव्यापारे हस्तादिकृते । तदेव चुम्बनपिधानमेवोत्कृष्टं चमत्कृतिविशेषानुगुणं, तस्य च तदानुगुण्यं नयनविषयेण 'जयति'पदेन ध्वन्यते । तद्विषयत्वादेव हि तत्र 'शोभते' 'भाती'त्यनादृत्य[3] 'जयती'ति प्रयोगः ।

सशपथमिति मध्यगतं पदं पूर्वापरपदसम्बद्धं बोद्धव्यम् । पाणिसम्पुटेन

---

१. लक्षणत इति पाठादयं साधीयान् ।
२. अत्रानुशासनपदेन व्याकरणकोषयोः संग्रहः ।
३. एवमादर्शपुस्तके । भातीत्याद्यनादृत्येति स्यात् ।

नरि नरि किरति द्राक् सायकान् पुष्पधन्वा
पुरि पुरि च निवृत्ता मानिनीमानचर्चा ॥९९॥

अत्र किरतीति किरणस्य साध्यमानत्वं निवृत्तेति निवर्त्तनस्य सिद्धत्वं, तिङा सुपा च, तत्रापि 'क्त'प्रत्ययेनातीतत्वं द्योत्यते ।

यथा वा—

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने मानमधुना ॥१००॥

अत्र लिखन्निति न तु लिखतीति, तथा आस्ते इति न त्वासित इति, अपि

गलन्त्यां स्खलन्त्यां नीव्यां निबन्धः प्रियस्य संश्लेषो तथा स्यात् [तथा ।] । न तु द्वाराणीति—तावत्कालमप्यनुरागोद्रेकात् मानावष्टम्भः स्थातुं शक्त इति किमपि चमत्कारबीजसूत्रणम् । प्रेयानिति—ईषन्मात्रप्रियत्वेऽपि[१] प्रकर्षः ? ।

पवमानः पवनः । लासको नर्तकः । अत्र किरतीति वर्त्तमानविहितेन तिङा चेक्रियमाणत्वं द्योत्यते । निवृत्तेति[२] प्रातिपदिकार्थमात्रेण[३] सुपा साध्यताविरहेण सिद्धत्वं, निष्ठया च तत्क्रियागतमतीतत्वं कार्यस्य पूर्वकालत्वलक्षणाऽतिशयोक्तिः—एतेषाञ्च व्यङ्ग्यानामास्वादानुगुणत्वं तद्विदामपरोक्षमेव ।

नन्वेवं वस्त्वलङ्कारव्यञ्जनाऽपि पदैकदेशस्यास्तीति रसादिमात्रव्यञ्जकतैव कुतो गण्यते[४] ! सत्यं, प्रकृतिप्रत्यययोः स्वीयस्वीयानुवाचकत्वमिलितयोस्तु मिलितार्थवाचकत्वमिति व्याकरणशास्त्रव्यवहारविलोपो मा भूदिति परिगणनम् ।

वस्तुतस्तु प्रकृतिप्रत्ययमेलकस्य कर्मत्वादिविशिष्ठार्थवाचकत्वं वर्त्तमानत्वादिव्यङ्ग्यमेवेत्युदाहरणादौ वस्त्वलङ्कृत्योरप्येकदेशव्यङ्ग्यत्वमस्तीति परितुष्यतु

---

१. एवमादर्शपुस्तके पाठः । 'ईयसुनाऽत्र प्रियत्वप्रकर्ष' इति स्यात् । 'प्रेयानितीयसुना प्रियत्वमात्रनिरासपरेण काऽपि प्रेमपात्रता द्योत्यते' इनि श्रीधरमन्तव्यस्यायमनुवादः ।

२. "पुरि पुरि च निवृत्ता" नपुनः "पुरि पुरि विनिवृत्ते" ति वृत्तौ पाठः ।

३. सुपा प्रथमाविभक्तियुक्तया प्रातिपादिकार्थमात्रस्य बोधः 'प्रातिपदिकार्थ लिङ्गपरिमाणवचनमात्रे प्रथमे" त्यनुशासनबलात् ।

४. 'रसादय' इत्यत्रादिपदेन वस्त्वलङ्कृतिध्वन्योर्ग्रहणं येषां मतं तेषान्तु निर्बाधैव सङ्गतिः ।

तु प्रसादपर्यन्तमास्ते इति, भूमिमिति न तु भूमाविति, न हि बुद्धिपूर्वकमपरं किञ्चिल्लिखतीति तिङसुब्विभक्तीनां व्यङ्ग्यम् ।

सम्बन्धस्य यथा—

गामारुहम्मि गामे वसामि णअरट्ठिइं ण जाणामि ।
णाअरिआणं पइणो हरेमि जा होमि सा होमि ॥१०१॥

(ग्रामरुहास्मि ग्रामे वसामि नगरस्थितिं न जानामि ।
नागरिकाणां पतीन् हरामि या भवामि सा भवामि ॥ इति संस्कृतम्)

अत्र नागरिकाणामिति षष्ठयाः ।

"रमणीयः क्षत्रियकुमार आसी"दिति कालस्य । एषा हि भग्नमहेश्वर-कार्मुकं दाशरथिं प्रति कुपितस्य भार्गवस्योक्तिः ।

वचनस्य यथा--

ताणं गुणग्गहणाणं ताणामुक्कंठाणं तस्य पेम्मस्स ।
ताणं भणिआणं सुन्दर ! एरिसअं जाअमवसाणं ॥१०२॥

(तेषां गुणग्रहणावां तासामुत्कण्ठानां तस्य प्रेम्णः ।
तासां भणितीनां सुन्दर ईदृशं जातमवसानम् ॥ इति संस्कृतम्)

अत्र गुणग्रहणादीनां बहुत्वं प्रेम्णश्चैकत्वं द्योत्यते ।

भवान् । एतच्चातीतत्वं द्योत्यत इति वदता वृत्तिकृता स्फोरितमेव । द्योतनं व्यञ्जनमिति ध्वनिभाषा । आस्त इति--लिखनस्यानवोपायता शतृ-वाच्या ।

ग्रामरुहा ग्रामजाता । षष्ठ्या अनादरव्यञ्जकतेति शेषः ! आसीदिति-- सम्प्रति अस्मदमर्षकवलितः क्षणं न भविष्यतीति भावः ।

एरिसअं ईदृशम् । 'इरिसिअ'मिति[1] पाठे ईर्षितम् । [एरित्तणमिति] पाठे नानाविधानसन्निकृतम् । एकत्वं सततमविच्छेदेन प्रकर्षनिकर्षराहित्यं निर्विकारात्यन्तप्रकर्षलक्षणम् । अतएवात्र वचःप्रक्रमभङ्गस्यादूषकता ।

---

१. "इरिसिअ" मिति पाठान्तरमर्वाचीनैर्वैद्यनाथादिभिरति धृतम् । 'एरित्तण'मिति न केनापि धृतो नापि तथा मनोज्ञः व्यङ्ग्यस्य वाच्यत्वपक्षनिक्षेपात् सर्वथा 'एरिसअमि'ति रुचक-श्रीधरादिसम्मतः पाठ एव वरम् । छन्दोऽनुशासनसम्मतगणविभागानुसारेण चतुर्थचरणे-चाष्टादशगणस्थितेरुपरिदर्शित एव पाठः स्यात् ।

पुरुषव्यत्ययस्य यथा--

रे रे चञ्चललोचनाञ्चितरुचे ! चेतः ! प्रमुच्य स्थिर-
प्रमाणं महिमानमेणनयनामालोक्य किं नृत्यसि ।
किं मन्ये विहरिष्यसे वत हतां मुञ्चान्तराशामिमा-
मेषा कण्ठतटे कृता खलु शिला संसारवारान्निधौ ।। १०३

अत्र प्रहासः ।

पूर्वनिपातस्य यथा—

येषां दौर्वलमेव दुर्बलतया ते सम्मतास्तैरपि
प्रायः केवलनीतिरीतिशरणैः कार्ये किमुर्वीश्वरैः ।
ये क्ष्साशक्र ! पुनः पराक्रमनयस्वीकारकान्तक्रमा-
स्ते स्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परम् । १०४

अत्र पराक्रमस्य प्राधा[१]न्यमवगम्यते ।

विभक्तिविशेषस्य यथा--

प्रधनाध्वनि धीरधनुर्ध्वनिभृति विधुरैरयोधि तव दिवसम् ।
दिवसेन तु नरप ! भवानयुद्ध विधिसिद्धसाधुवादपदम् ।।१०५

चञ्चलाभ्यां लोचनाभ्यामञ्चिता प्रादुष्कृता रुचिरभिलाषो यस्य। किं मन्ये विहरिष्यसे किं मन्यसे विहरिष्यामीत्यर्थः । तथा चानुशासनं प्रहासे च मन्योपपदे मन्यतेरुत्तम'[२] इति । प्रहासः सोपहासोत्प्रासः ।

नीतिराङ्गिरसादिशास्त्रं, प्रसिद्धवृत्तिप्रकारो रीतिः। अत्रेति—नयस्याल्पस्वरतया पूर्वनिपाते प्राप्ते यत्पराक्रमस्य पूर्वनिपातनं तदर्चितत्वं बोधयतीति ।

प्रधनाध्वनि संग्राममार्गे तव[३] विधुरैरयोधीति सम्बन्धः। नरप ! नृपते । विधिसिद्धस्य न्याय्यस्य साधुवादस्य पदं यथा तथेति[४] क्रियाविशेषणम् ।

---

१. अभ्यर्हितञ्चमित्यर्थः ।

२. '...एकवच्चे'ति पाणिनीयमनुशासनम् (१।४।१०६) ।

३. "तव निधुर्यैव विधुरै"रित्यादर्शपुस्तकेऽबोध्यः पाठः । "धनुर्ध्वनि"त्याद्यंशोपरि विवरणं गलितं स्यात् ।

४. 'यत्कर्मे'त्यादर्शपुस्तके दुष्टः पाठः ।

अत्र दिवसेनेत्यपवर्गतृतीया फलप्राप्तिं द्योतयति ।

भूयो भूयः सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्थः ।
साक्षात्कामं नवमिव रतिर्मालती माधवं यत्
गाढोत्कण्ठालुलितललितैरङ्गकैस्ताम्यतीति ॥१०६

अत्रानुकम्पावृत्तेः 'क'रूप-तद्धितस्य ।

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥१०७

अत्र 'प्र' शब्दस्योपसर्गस्य ।

कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः ।
तमांसि तिष्ठन्ति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलिताम् ॥१०८॥

अत्र तुल्ययोगिताद्योतकस्य 'च' इति निपातस्य ।

अपवर्गं इति क्रियासमाप्तौ । सविधयाऽर्थात्[1]····लुलितैर्ग्लानप्रायैः सद्भिर्ललितैर्मनोहरैः[2] । इति--कथितं लवङ्गिकयेति प्रकरणसङ्गतिः । अत्र 'क'प्रत्ययेनानुकम्पां द्योतयता किमप्यङ्गानां तानवं सूच्यते ।

परीति--'पुनः' शब्दोऽत्र कालान्तरमात्रे न तु पश्चात्काले । गहनो दुर्निरूपः । जडयति स्तम्भयति । 'प्र'शब्दस्य ध्वंसप्रकर्षं समूलोन्मूलनलक्षणं द्योतयतो महामोहप्रकर्षसूचनद्वारा रागदाढर्यव्यञ्जकत्वम् । उपसर्गनिपातादीनाञ्च प्राक् (?) स्वातन्त्र्य (स्वतन्त्र-) प्रयोगलिङ्गसंख्याविभक्तिकृतविशेषविरहेण[3] वाचकवैपरीत्याद्द्योतकत्वमेव यद्यपि महाभाष्यकारादिसम्मतं[4] तथापि रसादिव्यञ्जकत्वम-

---

१. सप्रविधयाऽर्थादितिप्रायो निस्त्रुटिचिह्न आदर्शपुस्तके पाठः । 'सविधयाऽर्थात् समीपस्थया नगरीरथ्ययाऽथवा सविधनगरीरथ्या भूरिवसुमन्दिरासन्नमार्ग' इति श्रीधरटीकास्थः पाठो वाऽत्र स्यात् ।

२. 'लुलितलुलितै' रिति पाटान्तरम् ।

३. तथाच ''यत्तु वाक्यपदीये 'परतन्त्रास्तु चादयः' 'प्रत्ययवदेषां परत्वं न स्मर्यत'' इति चैतन्मतावतारकौ सन्दर्भौ वैयाकरणभूषणग्रन्थे (२७०-२७२ पृ०) ।

४. यद्यपि प्रागप्रयोगात् स्वतन्त्रप्रयोगाभावात् षष्ठ्या अश्रुतेर्लिङ्गसंख्याविरहाच्च वाचकवैलक्ष्यण्येन द्योतका निपाता इति (निपातानामवाचक त्वात्) प्रादीनामिय चादीनां

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम् ।
बन्दीवैष यशांसि गायति मरुद्यस्यैकबाणाहति-
श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः ॥१०९॥

अत्रासाविति भुवनेष्विति गुणैरिति सर्वनामप्रातिपदिकवचनानां, न त्वदिति न मदिति अपि तु अस्मदित्यस्य सर्वाक्षेपिणः, भाग्यविपर्ययादित्यन्यथासंपत्तिमुखेन न त्वभावमुखेनाभिधानस्य ।

तरुणिमनि कलयति कलामनुमदनधनुर्भ्रुवोः पठत्यग्रे ।
अधिवसति सकलललनामौलिमियं चकितहरिणचलनयना ॥११०॥

पूर्वमित्यादरणम् । आधुनिकाः पुनरमीषां वाचकत्वमेवाहुः[1] ।

कृतमिति--अत्र चकाराभ्यां तुल्यकालत्वसूचकाभ्यां वीर्यप्रकर्षः सूच्यते । चादीनाञ्च स्वातन्त्र्येणार्थबोधनविरहात् पदावयवमध्ये गणनम् ।

अत्रेति--असाविति सर्वनाम्ना प्रत्यक्षदृश्यमान-नयप्रधानत्व-महानुभावत्वादिकं व्यज्यते । 'भुवने'ष्विति बहुत्वेन निखिलव्याप्तिः, 'गुणै'रिति प्रातिपदिकेन समुदितत्वं बहुवचनेन निःशेषता, 'अस्म'दिति सकल-स्वकुल-परिग्रहः । अन्यथा-सम्पत्तिमुखेन-अभाग्यपदप्रयोगं विना भाग्यासम्भवप्रतिपादनेन भाग्यानुकूल्यदशायां

निपातानां द्योतकत्वं वैयाकरणादिमते (महाभाष्यानुसारिणां हरिजिनेन्द्रबुद्धिकैयटादीनां मते) सुव्यवस्थितमेव तथापि काव्यं रसापेक्षया तेषां व्यञ्जकत्वमिति ग्रन्थोपरि पुरातरटीकाकृतामाशयसूचनम् । वैयाकरणोक्तद्योतकताविलक्षणमेवालङ्कारिकनयोद्दिष्टव्यञ्जकतालक्षणम् । वृत्तिस्थेन द्योतकपदेन तदेवानुसन्धीयते । प्राचां निरुक्तकारादीनामयमेव सिद्धान्तः । 'न निर्बद्धा उपसर्गा अर्थान्निराहु'रिति शाकटायनः, 'नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ती'ति भगवद्यास्ककृते निरुक्ते च राद्धान्तः । नवीनानां वैयाकरणानामप्यत्र मते नारुचिः । अनुसन्धित्सुभिरत्र 'चादयोऽसत्त्वे' (१।४।४७) 'कर्मप्रवचनीया' (१।४।८२) इति सूत्रद्वयोपरि भाष्यप्रदीपोद्योतग्रन्थाः, तयोरेव सूत्रयोरूपरि न्यासकृन्मन्तव्यं, (३०८ पृ०, ३२६ पृ०), वैयाकरभूषणे (२५८-७२३ पृ०), लघुमञ्जूषायां (५८४-७२३ पृ० चौखम्बा संस्करणे) एतत्संसृष्टो विस्तृतो विचारश्चालोचनीयः ।

१. एतच्च समुच्चयाधिकरणे मीमांसकानां 'केवलवृक्षशब्दात् समुच्चयाबोधात् चकार एव तद्वाचको न द्योतक' इत्याद्युक्तीः समर्थयमानानामचिरन्तनानामालङ्कारिकसरणिनिर्देशे प्रौढ़िमाकलयतां केषांचिदेतेषां मतम् । तथा च व्यक्तिविवेके प्रथमे--विमर्शे 'असत्त्वभूतार्था उपसर्गादयः । तेषामसत्त्वभूतार्थत्वाविशेषेऽपि व्यापारनियमात् प्रयोगनियमाच्च

अत्र इमनिजव्ययीभावकर्मभूताधाराणां स्वरूपस्य तरुणत्वे इति धनुषः समीप इति मौलौ वसतीति त्वादिभिस्तुल्ये एषां वाचकत्वे अस्ति कश्चित् स्वरूपस्य विशेषो यश्चमत्कारकारी--स एव व्यञ्जकः।

एवमन्येषामपि बोद्धव्यम्।

वर्णरचनानां व्यञ्जकत्वं गुणस्वरूपनिरूपणे उदाहरिष्यते।

तवापि नेदृशी दुर्विधाऽऽसीदिति।

कला उपचयः। भ्रुवोरग्रेऽनुमदनधनुः पठति मदनधनुषो नैपुणं शिक्षति सति। स्वरूपस्य व्यञ्जकत्वं, नत्वेषामर्थस्यैव व्यञ्जकत्वम्। स्वरूपस्य तु त्वादिसाधारण्यमेवेत्याह—त्वादिभिरिति[१]। कश्चिदिति—इमनिचा तावत् श्रुतिकटुतापरिहारेण सौकुमार्यमारोपयता सहृदयहृदयङ्गमं किमप्यानुकूल्यं धीयते। अव्ययीभावसमासेनापि मदनधनुषो गुणीभावेन ततोऽप्यधिकं जगद्वशीकारविज्ञानं भ्रूलताऽग्रस्य प्रत्याय्यते। मौलिमिति कर्मतया व्याप्तिसूचनेन मौलावित्याधारत्वप्रतिपाद्याधेयैकदेशवृत्तित्वपरिहारेण कोऽप्यतिशय आत्मादरगोषकः। तदिदमुक्तम्—'यश्चमत्कारकारी'ति। स एव व्यञ्जको[२] व्यञ्जकभावनियामकः। यद्वा विशिष्यत इति विशेषः स्वरूपमेव। षष्ठी त्वाहार्यभेदा[३]। स एव व्यञ्जको व्यञ्जनाव्यापाराश्रयः। व्यञ्जकत्वमिति पाठे स्वरूपस्य विशेषः स्वरूपं येन विशिष्यते स एव व्यञ्जकत्वं, तद्बलेनैव स्वरूपं व्यनक्तीत्यर्थः। एवमस्मदुक्तरीत्या[ऽन्येषा-] मुक्तव्यतिरिक्तानां प्रकृत्यादिरूपाणां कर्मप्रवचनीयानाञ्च व्यञ्जकत्वमाकरेषु स्वयं दृष्ट्वा वोद्धव्यमवधारणीयम्। वर्णरचनानां वर्णानां रचनानाञ्च। नाटकादिष्विति—वस्तुमात्रालङ्कृति-

त्रैराश्योपगमः। तथाहि क्रियारूपातिशयप्रतिपत्तिनिबन्धनमुपसर्गाः प्रादयः। भावसत्वयोरात्मभेदप्रत्यायननिमित्तमवधृतरूपार्थविशेषाः स्वरादयो निपाताः···।" वाक्यपदीयटीकाकृत्पुञ्जराजीयमतमेतन्मतानुसारि। प्रकाशकृन्मन्तव्यं ('यथेववादिशब्दा यत्परास्तस्यैवोपमानताप्रतीति'रित्यादिके दशमोल्लासीये ग्रन्थे) एतन्मतसमर्थनपरतया बहुभिरुद्ध्रियते। 'वस्तुतस्तु निपातानामर्थवत्त्वमपि द्योत्यताऽभिधायकं, शक्तिलक्षणाद्योतकताऽन्यतमसम्बन्धेन बोधकत्वा'दिति लघुमञ्जूषासिद्धान्त (५९३ पृ०) एव समीचीनः।

१. साधारण्येन प्रतीतानां जीर्णकल्पानां प्रत्ययादीनां परिहारेणास्ति कुत्र सहृदवतासहकृतपुराणच्छायानिर्मुक्तशब्दविन्यासवशाच्चमत्कारातिशयो, यस्य खलु जरत्तराणां ग्रन्थेषु 'कान्ति'रित्यन्वर्थो व्यपदेशः। परमस्य व्यञ्जनयैवानुजीवनमितीतरविलक्षणचमत्कारकारणम्।

२. 'स एव व्यञ्जक' इति चण्डीदासधृतः पाठः, न तु 'व्यञ्जकत्वं प्राप्नोती'ति माणिक्यचन्द्रादिगृहीतः।

३. राहोः शिर इतिवत्।

'अपि'शब्दात्प्रबन्धेषु नाटकादिषु ।

एवं रसादीनां पूर्वगणितभेदाभ्यां सह षड्भेदाः ।

(६२) भेदास्तदेकपञ्चाशत्—

व्याख्याताः ।

(६३) तेषां चान्योन्ययोजने ॥४३

संकरेण त्रिरूपेण संसृष्ट्या चैकरूपया ।

न केवलं शुद्धा एवैकपञ्चाशद्भेदा भवन्ति यावत्तेषां स्वस्वप्रभेदैरेकपञ्चशता संशयास्पदत्वेनानुग्राह्यानुग्राहकतयैकव्यञ्जकानुप्रवेशेन चेति त्रिविधेन सङ्करेण परस्परनिरपेक्षरूपयैकप्रकारया संसृष्टया चेति चतुर्गुणने—

ध्वनिषु न केवलमवान्तरमहावाक्यव्यङ्ग्यो रसादिः, किन्तु सर्वेष्वेव[1] काव्यप्रबन्धेष्वयमेकोऽङ्गीकर्त्तव्यः, अन्यथा काव्यत्वस्यैव हानेरित्यर्थः ।

पूर्वगणितभेदाभ्यां वाक्यपदप्रकाशरूपाभ्यां सह पदैकदेश-रचनावर्णप्रकाशानाञ्चतुर्णां सङ्कलने भेदक्रमाः ।

ननु माघे शिशुपालदूतोक्तौ[2] सन्धौ वाच्ये वस्तुमात्ररूपो विग्रहः शब्दशक्तिमूलः प्रबन्धव्यङ्ग्यो दृश्यते । उपमादिध्वनिरपि शब्दशक्तिमूलस्तथा सम्भाव्यते । तत्कथमेकपञ्चाशदेव भेदा इत्याह-व्याख्याता इति । विशेषेणोदाहृतिप्रदर्शनमुखेनाख्याता दर्शिताः । नत्वेतावन्त एवेति नियमिता इत्यर्थः[3], एकापञ्चशत्ता च पूर्वगणितपञ्चत्रिंशद्भेदेषु प्रबन्धव्यङ्ग्यद्वादशविधार्थशक्तिमूलस्य पदैकदेश-वर्ण-रचना-प्रबन्धव्यङ्ग्यत्वेन रसादिचातुर्विध्यस्य प्रवेशात् ।

तेषां व्यङ्ग्यभेदानाम् । शुद्धा एवैकपञ्चाशत् केवलभेदा न भवन्तीति वृत्तियोजना । स्वस्वप्रभेदैर्ध्वनितया सजातीयभेदैः । परस्परनिरपेक्षेति भावप्रधाननिर्देशः । तद्रूपत्वादेकप्रकारतया । चतुरिति[4] वारार्थे सुच् ।

वेदेति—तथाहि 'विन्यस्याधो गुणन' मिति रीत्या एकपञ्चशतस्तावतैव गुणन एकाधिकषर्डात्रंशतिशती (२६०१) । संसृष्टौ तथैव । ततस्त्रिगुणसङ्करयोजने सत्येतावती संख्या—वेदाश्चत्वारः, खं शून्यम्, अब्धयश्चत्वारः वियत् शून्यं, चन्द्र एकः—

१, आनन्दवर्धनेन ध्वन्यालोके तदनुसारिभिः काव्यप्रकाशटीकाकृद्भिः श्रीधरादिभिश्च स्वस्वटीकायामयमर्थः प्रपञ्चित इत्यनुसन्धित्सुभिस्तत एवावलोकनीयः ।

२. शिशुपालवधे षोडशे सर्गे ।

३. 'लक्षणा तेव षड्विधे'त्यादा विवात्रापि व्याख्यानशैल्यनुद्भावितपूर्वाऽपि नासङ्गता ।

४. चण्डीदासधृतः पाठ एष । 'चतुर्भिर्गुणन' इत्यन्यैः पठितम् ।

(६४) वेदखाब्धिवियच्चन्द्राः (१०४०४)

शुद्धभेदैः सह—

(६५) शरेषुयुगखेन्दवः (१०४५५) ॥४४

अङ्कबिन्यासे च वैलोम्यं संख्याशास्त्रप्रसिद्धम् । शुद्धभेदैरेकपञ्चाशता । शराः पञ्च, इषवोऽपि पञ्च, युगानि चत्वारि, खं शून्यम्, इन्दुरेकः । अयञ्च ग्रन्थो गुणीभूतव्यङ्ग्यादिसंयोगमाश्रित्य कथञ्चिन्नेयः[१] । संसृष्टिसन्देहादौ पूर्वपूर्वसंयोगस्य उत्तरोत्तरभेदगणनाऽनुप्रवेशात् वक्ष्यमाणविरोधालङ्कारे[२] भेदगणनावत्क्रमेणैकैकहान्या तावत्संख्यत्वविरहात् । वस्तुगत्या पुनरीदृशी पिण्डना—'सैकपदाहतपददलं सङ्कलित' मिति रीतया[३] सैकपदं द्वापञ्चशत्, तेनाहतं पदमेकपञ्चशत् तद्गुणने द्वन्द्वेषुरसद्वन्द्वाः (२६५२) तस्य दलं रसद्वन्द्ववह्निचन्द्राः (१३२६) । संसृष्टिसङ्करयोजने चाब्धिगगनशिखिशराः (५३०४) शुद्धयोगे नु शरबाणग्निबाणाः (५३५५) ।

यद्वा 'पदयुतपदवर्गदलं सङ्कलितम्' । पदबर्गश्चन्द्रव्योमर्तुद्वन्द्वाः(२६०१)समपदेन युता योऽश्विबाणर्तुद्वन्द्वाः (२६५२), तस्य दलं रसद्विगुणचन्द्राः(१३२६)संसृष्टौ ।

एको राशिर्द्विधा स्थाप्य एकमेकाधिकं कुरु ।
अस्यैबार्द्धेन सङ्कल्यमेतत्सङ्कलितं लघु[४] ॥

१. नेदं निपुणं दर्शनम् गुणीभूतव्यङ्ग्यादेरुल्लासान्तरे पश्चात् सन्निवेशात्तस्यात्र परामर्शस्य सर्वथाऽनुपपत्तेः । संख्येयं न्यायसिद्धैव । गुणीभूतव्यंगयादिसंयोगमाश्रित्य परस्परविमर्देन बृहत्तरा संख्या यथा संख्याऽऽनयव्यसननिपुणैः कैश्चित्सुधासागरकारादिभिर्विहिता तथा सुविदितैव प्रेक्षावताम् । ''अयञ्च प्रमेयभेदः सर्वथा न प्रतिपादितो भवती''ति 'चिन्त्यमेतदि' त्यविचारितरमणीयमेत' दित्यादिभिर्बहुभिर्विशेषणैरितरत्र विदूषितं क्वचित् विध्वस्तप्रायमपि सान्धिविग्रहिक श्रीधरमन्तव्यमत्राप्तवाक्यतयाऽन्यत्र तन्मते दोषदर्शिना चण्डीनासेन यद्प्रगृहीतं तस्य कारणमर्वाक् ''तस्मादत्र प्रकरणे······सदुक्तिरेव लिख्यत'' इति स्फुटमाविष्कृतम् ।

२. दशमोल्लासनिर्दिष्टदशभेदे । तत्र ४+३+२+४=१० भेदाः । एवमिहापि ५१+५०+४९+······३+२+१=१३२६ भेदाः । सर्वमेतद्गणनाविधानमस्माभिः कविकर्णपूरकृतालङ्कारकौस्तुभस्योपरि टीकायां मौक्तिकावल्यां वितत्य दर्शितमित्यतो विरम्यते ।

३. इयं च श्रीधरमतसंमतसंख्याऽधुनातनानां गणनाऽनुसारिणी । तथा

च—$1+2+\ldots\ldots=n\frac{(n+1)}{2}$

४. वस्तुतस्त्वेकैवेह रीतिरापाततो भिन्नभाषयोल्लिखिता ।

तत्र दिङ्मात्रमुदाह्रियते ।

छणपाहुणिआ देअर जाआए सुहअ किंपि दे भणिआ ।
रुअइ पडोहरवलहीघरम्मि अणुणिज्जउ वराई ॥१११

(क्षणप्राघुणिका देवर जायया सुभग किमपि ते भणिता ।
रोदिति गृहपश्चाद्भागवलभीगृहेऽनुनीयतां वराकी ॥
इति संस्कृतम्)

अत्रानुनयः किमुपभोगलक्षणेऽर्थान्तरे संक्रमितः किमनुरणनन्यायेनोपभोग एव व्यङ्ग्यो व्यञ्जक इति सन्देहः ।

इति दिशा वा सम्पिण्डनम् । तथाहि चन्द्रबाणराशिं (५१) द्विधा स्थापयित्वा एकमेकाधिकं द्वन्द्वबाणं (५२) कृत्वा तस्यैवार्धेन रसद्वन्द्व-(२६) संख्येन एकपञ्चाशतो गुणेन रसद्विगुणरजनिकराः(१३२६)संसृष्टौ अनयोश्च पिण्डनयोः सङ्करयोगे प्राचीनैव संख्या । (?) तस्मा-(?)दत्र प्रकरणे श्रीधरसान्धिविग्रहिको गणनाऽऽदिकं निखिलमेव तत्त्वतो जानातीति तदुक्तिरेव लिख्यते[१] ।

दिश्यतेऽनयेति दिक् । दिगेव दिङ्मात्रं सजातीयप्रकाशकं स्वरूपमित्यर्थः ।

छणपाहुणिआ क्षणायोत्सवाय निमन्त्र्यानीता । पडोहरवलहीघरम्मि पश्चात्प्रकोष्ठोपरिकुट्टिमगर्भगृहे । अत्रानुनयमात्रेण विश्रामाभावाद् वक्त्रादिवैशिष्ट्यस्य झटिति प्रतीतौ स्वार्थमपरित्यजदेवानुनीयतामिति पदं तदुपपत्तय उपभोगलक्षणमर्थान्तरमालम्बत इति लक्षणामूलत्वम् । वक्त्रादिवैशिष्ट्यानानुसन्धाने तु प्रतीत्यपर्यवसानविरहान्न लक्षणाऽनुप्रवेश इत्यभिधामूलतेति केनचिदुच्येत । एवञ्च सन्देहः । वक्त्रादिविशेषस्य कदाचिदननुसन्धानं सर्वत्रैव (?) सुलभमित्यतिप्रसङ्गः । अत्रानुनीयतामित्यनोपभुज्यतामिति वक्तुर्विवक्षितं किंवा कोपनिवर्त्तनमात्रं चाटुकरणादीति सन्देहः । न चैकतरत्वे साधकं बाधकं वा प्रमाणमस्तीति रजनिराजोपरिभागे कुरङ्गकसद्भाववदनुच्छेद्य एवायं महान् सन्देहः[२] ।

---

१. अयं प्रघट्टक आदर्शपुस्तके 'वक्त्रादिविशेषस्य........अतिप्रसङ्ग'' इत्यनन्तरस्यांशस्य पश्चादयथैव सन्निवेशितः ।सान्धिविग्रहिकेण विवेककृता श्रीधरेण गणिताचार्यश्रीधरमतमनुसरतोपरिदर्शिता गणनासरणिरङ्गीकृता । यदाहासौ स्वग्रन्थे 'इत्याचार्यश्रीधरदर्शनेन सङ्कलितम्' इति :

२. तथा च हेमाद्रिधृतज्योतिषवचनम्—

'शशमेके मृगं त्वन्ये भूच्छायामपरे विदुः ।
इन्दोर्मण्डलमालिन्यं तमःस्पर्शमलं परे ।

इति महर्षिगोतम कृते संशयलक्षणे (१/१।२३)—

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति ह हा हा देवि धीरा भव ॥११२

अत्र लिप्तेति पयोदहृदामिति चात्यन्ततिरस्कृतवाच्ययोः संसृष्टिः। ताभ्यां सह रामोऽस्मीत्यर्थान्तरसंक्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन रामपदलक्षणैकव्यञ्जकानुप्रवेशेन चार्थान्तरसंक्रमितवाच्यरसध्वन्योः सङ्करः।

स्निग्धया भास्वर्य्या श्यामलया द्राविडदेशीयप्रभासदृशया कान्त्या लिप्तं व्याप्तं नभो यैः। वल्लनं विलासखेलनम्। पयोदसुहृदो मयूराः। आनन्दकेका मदमेदुरध्वनयः। कला मधुरगम्भीराः। कामं सन्त्विति धैर्योक्तिः। दृढं सातिशयम्। कठोरहृदय एवंविधोद्दीपनसम्भेदेऽप्यविक्रियमाणचित्त इति रामपदप्रत्याय्यनिरुद्धबोधत्वदुःखैकपात्रत्वादिभ्योऽवकाशदानम्, अन्यथा रामशब्दो महानुभवत्वं कथं न ध्वनेत्। वैदेही त्विति स्मृतेरेवंविधसभयसातङ्कसरभसकण्ठग्रहणपूर्वकालकृताङ्कपालिनयनादितद्विलासस्योक्तिः। कथं भविष्यति–स्मृतेरेवंविधविशेषायास्तस्या भवनमात्रप्यसम्भाव्यमित्यर्थः।

इतः प्रभृति स्मृति-भावना-विकल्पपरम्परोपपरीतां चिरदुर्बलतया झटिति हृदयास्फोटनाभिमुखीं प्रियां ससम्भ्रमोन्मादवशंवदः साक्षादिवाह - ह हा हेति। सुहृदामिति अत्रेति··················? मित्रार्थासम्भवात् परितोषकारित्वं लक्ष्यते। स्निग्धपदेन घृतादिस्नेहतिरस्कारेण नयनाभिरामतां लक्षयता तिरस्कृतवाच्यत्वेन संसृष्टिर्द्रष्टव्या। संसृष्टिश्च भिन्नाश्रययोरङ्गाङ्गिभावहीनयोरेकवाक्यगतत्वात्। अनुग्राह्यानुग्राहकभावेनेति—रामपदद्योत्ये हि ईदृश्यामप्यवस्थायां जीवितं धारयन्तं मां धिगित्यादौ स्निग्धलिप्तादिपदानां साचिव्यं विद्यते। एकव्यञ्जकेति—अङ्गाङ्गिभावस्य रसं प्रति सार्वत्रिकतया तदनपेक्षयोक्तम्।

यत्तु श्रीधरसान्धिविग्रहिकेणोक्तम् 'अत्र––व्यभिचारिरसध्वन्योरेकवाक्यव्यङ्ग्यत्वं, विप्रलम्भस्य तद्व्यभिचारिणश्च निर्वेदशोकावेगात्मनश्चर्वणीयत्वा'दिति,

---

'उपलब्धचव्यवस्थातश्च·········विशेषापेक्षो विमर्शः संशय' इति दृश्यते। वात्स्यायनभाष्ये च तस्येदं विवरणं, सच्चोदकमुपलभ्यते तडागादिषु मरीचिषु वाविद्यमानमुदकमिति। अतः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यतेथासदिति संशयो भवती'ति। अत्र च गाथागतार्थे 'उभयथाऽप्युपभोग एव तात्पर्यपर्यवसानात् सन्देहस्यादोषत्व'मिति प्रदीपप्रभाव्याख्यानम्।

एवमन्यदप्युदाहार्यम् ।

इति काव्यप्रकाशे ध्वनिनिर्णयो नाम चतुर्थ उल्लासः ।

तन्न समीचीनम्[१] । 'अखण्डः काव्यार्थ' इति नीत्या ह्येक एवात्र धैर्यनिर्वेद-स्मृति-शङ्का-शोकावेगोल्लोस-परिपुष्ट-रतिप्रकृतिकविप्रलम्भास्वादः समूहालम्बनरूपः । आस्वादात्पूर्वं व्यभिचारिव्यञ्जनमात्रेण तु न, व्यभिचारिध्वनित्वम् । वाच्यतः प्राधान्यमात्रेण ध्वनिमात्रत्वमिति चेत् न । स्फुटत्वात् वाच्यसिद्धयङ्गाच्च । अस्तु वाच्यतः प्राधान्यं, तथापि वस्तुध्वनिरेव । तेन रूपेण तस्य सञ्चारित्वाभावात् स्थायिध्वनिरप्येवं स्यादिति च दोषान्तरम् । अन्यदिति—सजातीयमाश्रितं रसाद्यालङ्कारवस्तुरूपं प्रधानभूतं व्यङ्ग्यान्तरमिति ।

॥ इति चतुर्थ उल्लासः ॥

---

१. श्रीधरग्रन्थ एवमुपलभ्यते — 'यथाऽत्रैव रामशब्द एवार्थान्तरसंक्रमितवाच्यः समुद्दीपन-विरोधो-(?) (विभावो) द्बोधितस्य विप्रलम्भस्य व्यञ्जकः । सर्वस्मिन्नेव रसाद्यात्मनि काव्येऽलक्ष्यक्रमव्यङ्ग्यस्य रसभावलक्षणस्वप्रभेदप्रतीत्यपेक्षयैकव्यञ्जकवाक्यद्वारेण व्यञ्जकत्वं सम्भवत्येव । यथाऽत्रैव रसध्वनेर्भावध्वनेश्चैकेन व्यञ्जकेन विप्रलम्भस्य तद्व्यभिचारिणश्च निर्वेदशोकावेगान्मनश्चर्वणीयत्वा'दिति । चण्डीदासमन्तव्यं काव्यतत्त्वानुसन्धायिनां काव्यलक्षणविधायिनाञ्चोपलब्धिमतानुसारीति न दुर्ग्रहग्रहिलोऽयमुपरितनः पक्षः ।

पञ्चम उल्लासः

एवं ध्वनौ निर्णीते गुणीभूतव्यङ्ग्यप्रभेदानाह—

(६६) अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ।।४५
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः[१] स्मृताः ।

कामिनीकुचकलशवद् गूढं चमत्करोति, अगूढं तु स्फुटतया वाच्यायमानमिति गुणीभूतमेव ।

उल्लाससङ्गतिमाह—एवमिति । ध्वनौ बहुधा भिन्ने निर्णीते विशेषलक्षणैर्निर्द्धारिते क्रमागतान् गुणीभूतव्यङ्ग्यस्य भेदान् । विशेषलक्षणान्याह—सहृदयहृदयैकसाक्षिकं गूढमङ्गमानुकूल्येण चारुताप्रकर्षकम्[२] । वाच्यसिद्ध्यङ्गं वाच्यसिद्धिनिदानम् । अस्फुटं सहृदयैरपि झटित्यप्रतीयमानम् । सन्दिग्धतुल्यपदाभ्यां प्राधान्यपदस्य प्रत्येकमन्वयः । काक्वाक्षिप्तं काकुबलात् झटिति वाच्यवत् प्रतीयमानम् । असुन्दरं चमत्काराप्रत्यासन्नम् । एतेषां च परस्परभेदो लक्ष्यदृष्ट्या सज्ञानः । एवमेभिरुपाधिभिर्लक्षणीभूतैर्गुणीभूतव्यङ्ग्यस्याष्टौ भिदा विशेषा लक्ष्यप्रसिद्धा अस्माभिः स्मृताः । स्फुटतया साधर्म्येण वाच्यायमानं सहृदयहृदये झटिति प्रतीयमानं व्यङ्ग्यं[३] गुणीभूतमेव, वाच्यातिरिक्तचारुत्वराहित्यादिति शेषः । एवं तुल्यप्राधान्यादिष्वपि ज्ञेयम् ।

यद्यपि कारिकायां प्रथमनिर्देशात् कामिनीत्यादिना च समनन्तरमेव व्याख्यानादगूढस्यैवेदमुदाहरणमिति लभ्यते, तथापि निःसन्देहाय पुनरुक्तिरगूढं यथेति[४] ।

---

१. तदाह कश्चित्—

नान्ध्ररीपयोधर इवातितरां प्रकाशो
नो गुर्जरीस्तन इवातितरां निगूढः ।
अर्थोगिरामपिहितः पिहितश्च किञ्चत्
शोभां दधाति मरहट्टवधूकुचाभः ।।

२. ०साक्षिकं गूढं तदितरदगूढम् । अपरस्याङ्गमानुकूल्येन चारुतोत्कर्षकमिति खपुस्तके पाठः । गर्भीभूतस्यांशस्य कपुस्तके प्रमादतः स्खलनात् स एव पाठो ग्राह्यः ।

३. 'व्यङ्ग्यम्' इति खपुस्तके नोपलभ्यते ।

४. मम्मटकृतस्य वृत्तिग्रन्थस्यापि सूत्रवत् स्वल्पाक्षरप्रायत्वादेतदाशयोद्घोषणं यथास्थितमेव ।

अगूढं यथा —

यस्यासुहृत्कृततिरस्कृतिरेत्य तप्त-
सूचीव्यधव्यतिकरेण युनक्ति कर्णौ ।
काञ्चीगुणग्रन्थनभाजनमेष सोऽस्मि
जीवन्न सम्प्रति भवामि किमावहामि ॥११३॥

अत्र जीवन्नित्यर्थान्तरसंक्रमितवाच्यस्य ।

उन्निद्रकोकनदरेणुपिशङ्गिताङ्गा
गायन्ति मञ्जुमधुपा गृहदीर्घिकासु ।
एतच्चकास्ति च रवेर्नवबन्धुजीव-
पुष्पच्छदाभमुदयाचलचुम्बि बिम्बम् ॥११४॥

अत्र चुम्बनस्यात्यन्ततिरस्कृतवाच्यस्य ।

शरणागतस्य तप्तशलाकया कर्णवेधनं देशाचार इति सम्प्रदायव्याख्या[१]। ग्रथनभाजनं ग्रथने नियुक्तः। आवहामि करोमि। अत्र 'जीवन्न भवामि' इत्यस्य जीवत एव वचनाद् बाधिते स्वार्थे सहायादिसम्पद्विरहेण जीवनगतमश्लाध्यत्वं लक्ष्यते। तदतिशयश्च व्यङ्ग्यः सर्वजनसंवेद्यप्राय इति गोपनकृतसौन्दर्यहीनः।

एषां चाष्टानामपि प्रत्येकं ध्वनिनयेन यथादर्शनं भेदो बोद्धव्य इति वक्ष्यमाण-रीतिमनुसृत्योदाहरणान्तरे[२] आह—उन्निद्रेति। अत्रासीदिति वदनसंसर्गरूपं चुम्बनमत्रासम्भाव्यमिति रभससंसर्गमात्रं लक्ष्यते। एवं गायन्तीत्यपि ध्वननमात्रम्। केनापीति श्रीरामे वक्तरि वाक्यार्थप्रत्ययानन्तरं मयेत्यर्थं प्रतीयत इत्यगूढम्। अतथाविधेन नायकेनेदृश्या दिशा सोत्प्रासमात्मप्रकटनं [न युक्तमिति] प्रसङ्गाद्दोष-मुद्घाटयति[३]—तस्यापीति[४]। अस्मिंस्तु पाठे सरभसमम·········हेवाहिकादिकं[५]

---

१. पाश्चात्याचार इति वङ्गीयनैयायिकवर्याः परमानन्दचक्रवर्तिभट्टाचार्याः। नीतिवर्मकृते कीचकवधाख्ययमककाव्ये नास्य पद्यस्योपलम्भः सम्भवतीति विपश्चित एवाकरनिराकरणे प्रमाणम्।

२. मम्मटकृतवृत्तिग्रन्थे नानर्थकोदाहरणडम्बर इति यत् तत् सुविदितमेव कोविदानाम् तस्मादेतट्टीकाकृन्मन्तव्यम्।

३. एवं नैकान्तग्राह्योऽसंलग्नप्रायः पाः खपुस्तके। '..................नायके नेदृश्यादि शंसोत्प्रासनमात्मप्रकटनं दोषं प्रसङ्गादुद्घाटयतीति त्रुटिगर्भोऽमनोज्ञतरः पाठः क पुस्तके। 'नायकेनेदृश्या दिशा.........न युक्तमिति प्रसङ्गात्' इत्यादिः पाठः स्यात्। परं सोऽप्यगतिकगतित्वेनाश्रयणीयः।

४. इति पाठे तु व्यङ्ग्यस्य गूढतया ध्वनित्वमेव।

५. पाठोऽत्र कुत्रापि न सम्यग्। बिल्हणादिकाश्मीरीयकविप्रयुक्तहेवाकपदस्यात्र प्रयोगः

अत्रासीत् फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः ।
दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं प्रापितः
केनाप्यत्र मृगाक्षि ! राक्षसपतेः कृत्ता च कण्ठाटवी ॥११५॥

अत्र केनाप्यत्रेत्यर्थशक्तिमूलानुरणनरूपस्य । 'तस्याप्यत्र' इति युक्तः पाठः ।

अपरस्य रसादेर्वाच्यस्य वा वाक्यार्थीभूतस्याङ्गं रसादि अनुरणनरूपं वा ।

यथा--

अयं स रसनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥११६॥

अत्र शृङ्गारः करुणस्य ।[1]

कैलासालयभाललोचनरुचा निर्वर्तितालक्तक-
व्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायताम् ।
स्पर्धाबन्धसमृद्धयेव सुदृढं रूढा यया नेत्रयोः
कान्तिः कोकनदानुकारिसरसा सद्यः समुत्सार्यते ॥११७॥

अत्र भावस्य रसः ।

अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोधय-
स्तानेतानपि बिभ्रती किमपि न क्लान्ताऽसि तुभ्यं नमः ।
आश्चर्येण मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद्भुव-
स्तावद् बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः ॥११८॥

न गुणीभूतमिति ध्वनेरेवेयमुदाहृतिः । अत्र च प्रतिपादं वृत्तानामद्भुततया स एव देशो नव नव इवाभासत[2] इत्यत्रात्रेति पुनः पुनः प्रयोग इत्येकः । प्रत्येकं भिन्न-भिन्ना एव समरभुवः प्रदेशा इत्यपरः । रसादेर्वाक्यार्थीभूतस्याङ्गम्, रसादेर्वाच्यस्य तु रसाद्यनुरणनरूपं वेति योजना । अनुरणनरूपस्य तु रसादौ गुणीभावाव्यभिचार एवेति तद्गणनमेतादृशो वृत्तिकर्तुरभिप्राय उदाहरणदृष्टचा ज्ञेयः । वाच्यस्येत्यनन्तरं 'वा' शब्दाभावपक्षे[3]ऽन्तिमो 'वा' शब्दस्तृणजलौकान्यायेनाकृष्यः । करुणस्य

स्यात् । तस्य तत्तत्प्रभावातिरेकेण ख्यातस्येति यावत् । ततश्च 'तज्जयान्नायकोत्कर्ष-वर्णनम्' इत्याद्याचार्यदण्डिमतनयेन नायकोत्कर्षख्यापने गूढतैव ध्वनिप्रयोजिकेति कश्चित्

१. अङ्गमिति शेषः ।

२. '०इवाभासतीत्यत्रात्र' इत्यहृद्यः पाठः खपुस्तके ।

३. 'शब्दाभावपक्षे' इति खपुस्तके पाठः ।

अत्र भूविषयो रत्याख्यो भावो राजविषयस्य रतिभावस्य ।

बन्दीकृत्य नृप ! द्विषां मृगदृशस्ताः पश्यतां प्रेयसां
श्लिष्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः ।
अस्माकं सुकृतैर्दृशोर्निपतितोऽस्यौचित्यवारांनिधे !
विध्वस्ता विपदोऽखिलास्तदिति तैः प्रत्यर्थिभिः स्तूयसे ॥११९॥

अत्र भावस्य रसाभासभावाभासौ प्रथमार्धद्वितीयार्धद्योत्यौ ।

अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ।
ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात् ॥१२०॥

अत्र भावस्य भावप्रशमः ।

साकं कुरङ्गदृशा मधुपानलीलां
कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते ।
अन्याभिधायि तव नाम विभो ! गृहीतं
केनापि तत्र विषममकरोदवस्थाम् ॥१२१॥

अत्र त्रासस्योदयः ।

प्राकरणिकस्य । अत्र हि प्रागवस्थास्मृतिप्रभावितः खण्डशृङ्गारः समधिकशोकावेगप्रकृतिकं करुणमेव प्रकर्षयति । भावस्येति भगवतीविषयरतेः । रसो मानप्रसादनरूपः[१] सम्भोगः । भूविषयो रत्याख्यो भाव आहार्यो न तु वास्तुवः, नृपतिगतभक्तिप्रकर्षप्रकटनायैव तदुपनिबन्धनात् ।

बन्दीकृत्य हठादानीय । नृपेत्यामन्त्रणम् । ताः शोकानुरागकातरेण चक्षुषा अनिमेषं प्रेक्षमाणानाम् । प्रेयसामित्यनादरे षष्ठी । लान्ति लालयन्ति । तत्तस्मादखिला विपदो निरस्ता इति योज्यम् । तैरिति येषां दाराः समक्षमेव तथा क्रियन्त इत्यर्थः । अत्रेति । भावस्य नृपतौ कविभक्तेः प्रथमपद्यार्द्धद्योत्यः सैनिकानां परस्त्रीविषयकरतिप्रकृतिकः सम्भोगाभासः, द्वितीयेऽप्यर्द्धे विप्रकृतानां राज्ञि भक्तिः कृत्रिमत्वादाभास एव । प्रथमद्वितीयपादेति पाठे तु पादशब्दोऽयमर्द्धरूपभागवाचकोऽङ्गीकर्त्तव्यः । अविरलेत्यादि मदलिङ्गनिर्देशः । भावप्रशमो मदापरनामकगर्वप्रशमो नृपतौ रतेरङ्गमित्यर्थः । एवमुत्तरेष्वपि ।

सार्द्धमिति[२] सहार्थे । तव नाम त्वद्वाचकं पदमनेकार्थम् । तच्च प्रकरणादि-

---

१. 'समप्रसादन' इत्यनुपादेयः पाठः खपुस्तके ।
२. 'साकम्' इति साधारणसम्मतः पाठः ।

असोढा तत्कालोल्लसदसहभावस्य तपसः
कथानां विश्रम्भेष्वथ च रसिकः शैलदुहितुः ।
प्रमोदं वो दिश्यात् कपटबटुवेशापनयने
त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः ॥१२२॥

अत्रावेगधैर्ययोः सन्धिः ।

पश्येत् कश्चिच्चल चपल रे ! का त्वराऽहं कुमारी
हस्तालम्बं वितर ह ह हा व्युत्क्रमः क्वासि यासि ।
इत्थं पृथ्वीपरिवृढ ! भवद्विद्विषोऽरण्यवृत्तेः
कन्या कञ्चित्फलकिसलयान्याददानाऽभिधत्ते ॥१२३॥

अत्र शङ्काऽसूयाधृतिस्मृतिश्रमदैन्यादीनां शबलता ।

सहायेनान्याभिधायि । केनापि हेतुना जनेन वा । विषमां भयत्रासकम्पोद्वेगकर्बुरिताम् । त्रासस्येति[१] भावान्तरसाचिव्येन पुष्टस्येत्यर्थः ।

तस्मिन काले उल्लसन् असहभावः[२] कार्यजननकालक्षेपासहिष्णुत्वं यस्य तथाभूतस्य तपसोऽसोढा प्रतिरोधासमर्थः । अभियुक्त आविष्टः ।

पश्येत् कश्चिदिति शङ्का, तद्धेतुश्चान्यसङ्गोऽप्यपुरुषव्यापारः प्रतीयते । चलेत्यादिना काकुवशाद्रागानुविद्धाऽनुसूया । का त्वरेति आवेगविशृङ्खलत्वसंस्थापनरूपा धृतिः । अहं कुमारीति प्रत्यवायाभाववेदनानुगुणा स्मृतिः । हस्तालम्बं वितरेति फलाद्यवचयनश्रमात्तदङ्गस्पर्शौत्सुक्यात्तस्य च क्षणमात्रविलम्बेऽपि कातर्य्यरूपदैन्याद्युक्तिः । ह ह हा व्युत्क्रम इति तत्त्वानुसन्धानरूपमतिवितर्कशङ्कासम्भ्रमोक्तिः । क्वेत्यादि तदौदासीन्यदर्शनात् पुनर्दैन्यम् । परिवृढः प्रभुः । कञ्चिदभियोक्तारमित्थमभिधत्त इत्यन्वयः ।

अत्रेति । शङ्कादिदैन्यान्तमुदाहृतिगतवितरेति पर्यन्तद्योत्यमुक्तरीत्या ज्ञेयम् । दैन्यादीनामिति । तथा चोपलक्षणतया मत्यादीनामुक्तरीत्या परिग्रहः कार्यः । विरोधिनां पूर्वोपमर्दनेनोदयशालिनाम् । दैन्यविबोधिनामिति पाठे[३] ह ह हेत्यत्र मतिक्रुतः

---

१. त्रासस्येत्यसमस्तः पाठश्चण्डीदासगृहीत एवान्यैर्गृहीतात् त्रासोदय इति समस्तात् पाठाच्छ्रेयान् । प्रदीपविवरणमपि चण्डीदासमतपाठानुयायि ।

२. सहेः पचाद्यच्प्रत्ययनिष्पन्नस्य सहशब्दस्यात्रोद्देशः । तेनासहभावपदेनासहिष्णुत्वमशक्तता दौर्बल्यमित्यादि वा बोध्यते । 'असमभावस्य' इति पाठे लक्षणयाऽनुपमसौन्दर्यप्रतीतिः ।

३. "शङ्का······श्रमबैन्यादीनां शबलता" इति चण्डीदासधृतः पाठः । इतरे केचन पुनः "शङ्का······श्रमदैन्यविबोधौत्सुक्यानां शबलता" इति ग्रन्थं पठन्ति । तन्मते व्युत्क्रम

एते च रसवदाद्यलङ्काराः। यद्यपि भावोदयभावसन्धिभावशबलत्वानि नालङ्कारतयोक्तानि, तथाऽपि कश्चिद् ब्रूयादित्येवमुक्तम्।

कथं पुनः कुमार्या ममेदृशं स्वातन्त्र्यं युज्येतेति वितर्कजनको विबोधप्रतिभासो ग्राह्यः[१]। शबलता समुदायतया प्रतिसन्धानम्।

एत इति। एवंजातीयाः। अत एवार्थप्राधान्ये सति ध्वनिना व्याप्तविषयत्वात्। तत्राद्ययो रसवदलङ्करणम्, शेषेषु क्रमेण प्रेय-ऊर्जस्वि समाहित-भावोदयभावसन्धि-भावशबलत्वाद्याः षडलङ्कृतय उक्तानि प्राचीनैः[२]। ब्रूयादिति सम्भावनायां लिङ्। उक्तमिति। पूर्वोदाहृत्यनन्तरम्। एते च रसवदाद्यलङ्कारा इत्युक्तिः सर्वेषामप्यलङ्कारव्यपदेशपरेत्यर्थः। अथ कथमेषामलङ्कारता? वाच्यवाचकरूपाङ्गोपस्कारेण मुखेन हि रसाद्युपकारका अलङ्कारा उच्यन्ते, रूपकानुप्रासादौ तथैवाङ्गीकारात्। न चैवमिह, वाच्यवाचकाभ्यामन्यैरुपकार्य्यत्वात्, इति चेत्? इह केचिदाहुः[३] रसा-

---

इति विबोधश्चैतन्यागमरूपः, क्वासि यासीत्यौत्सुक्यमिति ग्रन्थसंसतिः। तत्र विबोधपदेन चण्डीदासनिर्दिष्टोपलक्षणतया मतिरङ्गीकृतेस्यपि केचित्।

१. 'प्रतिभासः प्राप्तः' इति खपुस्तके पाठः।

२. एते हि कुन्तकमतानुबादिनस्तन्मतं तात्पर्यतस्तद्वाक्यं च शब्दत उपजीवन्ति। तेषां सिद्धान्तः 'अलङ्कारो न रसवत्'' (वक्रोक्तिजीविते १५६ पृ०) इत्यादौ दर्शितः। श्रीधरेण नव्यमतानुयायिना वक्रोक्तिजीवितकारस्य युक्तय उदाहृतयश्च विमृष्टाः स्वकृते विवेके। चिरन्तनपदेन भामहदण्डचुद्भटादीनां परामर्शः।

'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मति॥''

(ध्वन्यालोके २।५) इतिनव्यमतप्रबर्तकेनाभियुक्तशिरोमणिना यत्सिद्धान्तितं सत्काव्यतत्त्वमपह्नुवानैः कैश्चिन्नव्यैर्न तस्य मर्यादा परिगृहीता। मम्मटेनाप्यत्र प्रथमोल्लासे ''अत्र स्फुटो न कश्चिदलङ्कारः, रसस्य च प्राधान्यान्नालङ्कारता'' इति कण्ठत एवोक्तोऽयमर्थः। दशमोल्लासे रसवदाद्यालोचनपश्यद्भिरर्वाचीनैः कैश्चित् ''परन्तु रसवदाद्यलङ्काराः प्राचामेवाभिमताः, न तु स्वस्यापि'', ''भावोदयेत्यादि रसवदादेरप्युपलक्षकम्'' इत्यादि च यत्प्रलपितं तदविचारितरमणीयम्।

३. अष्टमोल्लासोल्लिखितेऽलङ्कारलक्षणे रसस्योपकरणमङ्गद्वारलक्षणे च घटकत्वमिति द्वयोरेव पक्षयोस्तुल्यकालीनता सूचितेति चण्डदासादीनां मतम्, नैकस्य यथोपरि प्रस्तुतविकल्पयोः। परमङ्गपदेन तत्रत्येन रसस्याप्यन्तर्भावः। तत्र नु प्रमातार आलङ्कारिकधुर्या ध्वन्यालोककृत एव, यथा सूचितमुपरिष्टात् 'प्रधानेऽन्यत्र' (२०३ पृ०) इत्यादौ सन्दर्भे।

यद्यपि स नास्ति कश्चिद्विषयः, यत्र ध्वनिगुणीभूतव्यङ्ग्ययोः स्वप्रभेदादिभिः सह सङ्करः संसृष्टिर्वा नास्ति, तथापि 'प्राधान्येन व्यपदेशा ध्वन्ति' इति क्वचित्केनचिद् व्यवहारः।

द्युपकृतिमात्रेणैवेहालङ्कारव्यपदेशो भाक्तश्चिरन्तनप्रसिद्ध्याऽङ्गीकार्य्य इति। तत्र, मुख्गतयैवोपपादयिष्यमाणत्वात्। रसाद्युपकरणमात्रेणालङ्करणत्वम्। रूपकादौ तु वाच्याद्युपधानमजागलस्तनन्यायेनेत्यपरे, तदपि रिक्तम्, वाच्यवाचकादिष्वप्यलङ्कारव्यपदेशापत्तेरित्युक्तत्वात्[१]।

तस्मात् स्वव्यञ्जकवाच्याद्युपस्कृतै रसादिभिरङ्गभूतैरङ्गिनो व्यञ्जकवाच्यवाचकोपस्कारद्वारेणोपकुर्वद्भिरलङ्कारव्यपदेशो लभ्यत इत्यास्माकः पक्षः[२]। समासोक्तौ तु नायकादिव्यवहारमात्रस्यैवालङ्कारता, न त्वास्वादस्य, तस्योक्तरीतिविरहात्। यथा चोपमाऽऽदिः स्वसन्निवेशेनान्वयमुपस्कुरुते, तथा रसादिमपीति सर्वमनाविलम्।

ननु मिश्रोभावस्य पृथग् वक्ष्यमाणत्वात् सजातीयादिभिरमिश्रितानामेव गुणीभूतव्यङ्ग्यभेदानामुदाहृतयोऽत्र प्रकरणे उल्लेख्याः। न च "अयं स रसनो" इत्यादेः, अप्रधानभूतकरुणादिसम्भेदादित्याह—**यद्यपीति**। स्वप्रभेदाः सजातीयभेदाः। आदिना विजातीयबाच्यालङ्कृतिपरिग्रह।

अयमर्थः—न खलु ध्वनित्वगुणीभूतव्यङ्ग्यत्वे तद्विशेषो वा गोत्वाश्वत्वादिवद् वैयधिकरण्यनियता धर्माः स्वीक्रियन्ते, किन्त्वौपाधिकाः। ततश्चोपाधिसमावेशात्तेषामपि समावेशे यदा यस्य प्रधानोपरकारकत्वमुत्कृष्यते तदा तस्योपाधेर्मुख्यत्वेन व्यवहारः। 'अयं स' इत्यादौ करुणादिप्राधान्येऽपि सम्भोगादिशाबल्येनास्वादः प्रकृष्यत इति तद्द्वारैव व्यवहारः श्रेयानिति गुणीभूतव्यङ्ग्यव्यपदेश एव प्रधानम्। संस्कारतारतम्यस्य सम्यगभावस्थले च मिश्रीभावव्यपदेशः साधुः[३], अतथाभावे तु क्वचिन्मिश्रामिश्रीभावोदाहृतिः संभेदमात्रमूलतया साध्यत[४] इति सन्तोष्टव्यम्।

---

१. '"......वाच्यवाचकादिष्वप्यलङ्कृतिव्यदेशप्रसङ्गादित्युक्तत्वात्" इति खपुस्तके पाठः।

२. यस्यायिशयत्वतिवन्धनं यथाविधं तद्विदाह्लादकारि काव्यं करणीयमिति तस्यालङ्कार इत्याश्रिते सर्वेषामेव रूपकादीनां रसवदलङ्कारत्वमेव न्यायोपपन्नतां प्रतिपद्यते" इत्याद्याशङ्कां निराकरोति। "उपकुर्वन्ति तं सन्तम्" इत्याद्यलङ्कारलक्षणादङ्गिनो रसस्य वाच्यद्वारेणार्थमुखेनोपकारेऽर्थालङ्कारव्यपदेशो वाचकद्वारेण शब्दमुखेनोपकारे शब्दालङ्कारव्यपदेशः प्रसिद्ध,। रसादीनामङ्गभूतत्व एवेयं स्थितिः। तच्च प्रामाणिकसिद्ध्या नानुपपन्नमिति न काचिदनुपपत्तिः।

३. अत्र भावशबलताया भावाङ्गनायामपराङ्ग्यता गुणीभूतव्यङ्ग्याख्य-मध्यमकाव्यत्वप्रयोजिका, तथा 'पश्येत् कश्चित्' इत्यादाविति प्रकरणम्। एकस्यामिश्रस्य भावस्योद्देशः 'अयं स' इत्यादौ, अत्र पुनर्बहुना मिश्रितानामिति युज्यत एव व्यापदेशभेदता।

४. 'सिध्यति' इति खपुस्तके पाठ-।

जनस्थाने भ्रान्तं कनकमृगतृष्णाऽन्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृता लङ्काभर्तुर्वदनपरिपाटीषुघटना
मयाऽऽप्तं रामत्वं कुशलवसुता न त्वधिगता ॥ १२४ ॥

अत्र शब्दशक्तिमूलानुरणनरूपो रामेण सहोपमानोपमेयभावो वाच्यतां नीतः ।

सम्प्रति वाच्याङ्गभूतस्य रसादिमध्ये कस्यचिदुद्देश्यानुसारेणोदाहरणयोग्यत्वेऽपि तस्यानुरणनरूपार्थेन सह तन्त्रेणैकमेवोदाहणं भविष्यतीति[१] शब्दशक्तिमूलस्य वस्तुनो वाच्याङ्गत्वमुदाहरति—**जनेति** । जनस्थानं पुरपत्तनादि दण्डकारण्यं च कनकं प्रति मृगतृष्णा निष्फलप्रत्याशा कनकमृगे तृष्णा लोभश्च । वै निश्चितम्, देहि प्रयच्छ । वैदेहि सीते । भर्तुर्धनिनः । परिपाटिषु परिचयेष्विति निमित्तसप्तमी । अलमत्यर्थमेव का घटना उपायो न कृता वद[२] । लङ्काभर्तर्दशग्रीवस्य वदनानां परिपाट्यां पङ्क्ताविषुघटना शरसंयोगः कुशलमायतिशुद्धं वसु धनमस्येति कुशलवसुस्तस्य भावस्तत्ता । कुशलवौ सुतौ यस्याः सा कुशलवसुता जानकी । अत्र रामत्वं मया प्राप्तमित्यवचनेऽपि शब्दशक्तेरेव रामासादृश्यं लभ्यते, वचनेन तु सादृश्यहेतुकतादात्म्यारोपमाविष्कुर्वता ज्ञापनमपाहतम् । उपमानोपमेयभावः सादृश्यम्, वाच्यतामन्वयोपपादकताम्, वाच्याङ्गतामिति तु पाठे[३] वाच्योऽन्विताभिधानो वाक्यार्थः, तदङ्गताम्, असम्बन्धे सम्बन्धरूपवाच्यातिशयोक्त्यङ्गतामिति वा ।

---

१. पूर्वेषुदाहरणेष्वसंलक्ष्यक्रमव्यङ्ग्यस्योद्देशः । अत्र पुनर्वाच्याङ्गभूतस्य संलक्ष्यक्रमव्यङ्ग्यस्य शब्दशक्तिमूलस्यार्थशक्तिमूलस्य च द्विधा विभक्तस्यानूद्देशः 'तन्त्रेणैकमेवोदाहरणं भविष्यति' इति टीकाकृदुक्तस्याशयः 'आगत्य सम्प्रति' इत्याद्यनत्तरोदाहरणविवरणप्रसङ्गे ''......रसादिपदव्यवहार्य्यरतेरत्र काव्याङ्गता दर्शिता । इत्थंभावेनैव च रसादेर्वाच्याङ्गता, न तु तात्त्विकरूपेण'' इत्युत्तारसन्दर्भे स्फुटीकृतः । रसादिमध्ये कस्यचिदुद्देश्यानुसारेणोदाहरणयोग्यत्वपक्षकल्पनं रसात्मवादिनां चण्डीदासादिविवरणकृतामनभ्युपगमपराहतत्वेन न चोदनीयमित्यतिरोहितमेतत् ।

२. कृता अलं का भर्तुः वद न परिपाटीषु घटनेत्यस्मिन् पक्षे पदच्छेदः ।

३. वाच्यतामिति श्रीधर-चण्डीदास-श्रीविद्याचक्रवर्त्यादिसम्मतः पाठः । विश्वनाथस्तु वाच्यं आदृश्यं वाक्यार्थान्वियोपपादकतयाऽङ्गतां नीतमिति चण्डीदासमतां व्याख्यासरणिमनुसृत्यापि पाठान्तरमेव निगमयति । अत्र प्रदीपप्रभाऽनुसन्धित्सुभिर्विलोकनीया । वाच्याय हित इति वाच्यपदाद् यत्प्रत्ययः । तेन वाच्यतां वाच्योत्कर्षकतामित्यर्थ इति कष्टसृष्टिमाश्रित्य ग्रन्थं लगयन्तस्तु षण्डश्रमं कुर्वन्ति ।

आगत्य सम्प्रति वियोगविसंष्ठुलाङ्गी-
मम्भोजिनीं क्वचिदपि क्षपितत्रियासः ।
एतां प्रसादयति पश्य शनैः प्रभाते
तन्वङ्गि ! पादपतनेन सहस्ररश्मिः ।। १२५ ।।

अथ नायकवृत्तान्तोऽर्थशक्तिमूलो वस्तुरूपो निरपेक्षरविकमलिनीवृत्तान्ताध्यारोपेणैव स्थितः ।

वाच्यसिद्धचङ्गं यथा--

भ्रमिमरतिमलसहृदयतां प्रलयं मूर्छां तमः शरीरसादम् ।
मरणञ्च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ।।१२६।।

अत्र हालाहलं व्यङ्गयं भुजगरूपस्य वाच्यस्य सिद्धिकृत् ।

विसंष्ठुलाङ्गीं विदलिताङ्गीम् । पादानां रश्मीनाम् । पादयोश्च पतनं प्रणामश्च । नायकेत्येकशेषः । वस्तुरूपोऽनुनयलक्षणमित्यनेन वस्तुनो वाच्याङ्गता । निरपेक्षेत्यनेन वाच्यसिद्धचङ्गतानिरासश्च । रविकमलिनी बृत्तान्ते स्वप्रकाशस्यानुरागस्यास्वादोपयोगिनोऽध्यारोपेण समर्पणेनेति रसादिपदव्यवहार्याया रतेरत्र काव्याङ्गता दर्शिता । इत्थंभावेनैव च रसादेर्वाच्याङ्गता, न तु तात्विकरूपेण । इयञ्च समासोक्त्यलङ्कृतिः । अत्र च पादशब्दस्य द्वचर्थत्वे सत्यपि प्रसादयतीत्येतावन्मात्रेणैव प्रतीतिनिर्वाहान्न तस्योत्कटा शक्तिरित्यर्थशक्तिमूलतोक्तिः[१] ।

भ्रमिर्मुखविकारी दिग्भ्रमणमिव दर्शयन् कश्चानान्तरधर्मः । अरतिर्विषयनिबृत्तिः। प्रलयो मूर्च्छा । तमश्चैतन्यलोपः । जलदभुजगजमित्यत्र मेघसर्पयोस्तादात्म्यरूपणम् । विषं जलमेव विषं गरलमिति प्रतीतिमन्तरेण न निर्वहतीति शब्दशक्तिमूलालङ्कृतेर्वाच्यसिद्धचङ्गता ।

---

१. नात्र श्लेषालङ्कारबलाद् द्वितीयार्थस्य वाच्यता, विशेष्यरूपेणाम्भोजिनीपदेन पद्मिनीनायिकारूपार्थान्तरस्य प्रतीतिबाधात्, रश्मिपदेन करार्थस्याभिधानासहत्वाच्च श्लेषस्य सर्वथा निरवकाशत्वात् । समासोक्त्यलङ्कारपुरस्कारेण व्यङ्गचस्य वाच्याङ्गतोद्योतकारेणेत्थं दर्शिता--"अत्र विनैवानुनयमपगतमाना नायिका सख्योपालभ्यते । तथा हि--सहस्ररश्मिरित्यनेन बहूनायिकावत्त्वं ध्वन्यते । (परं नैतन्मनोज्ञम्) । अम्भोजिनीमित्यनेन वर्ण्यायाः पद्मिनीत्वम् । क्वचिदपीत्यनेनौपनायिकागृह एवेति निश्चयाभावः । तत्रापि यामत्रयमेव न त्वधिकमिति । एवं चेदृशोऽपीदृशीं स्वयमेवागत्य पादपतनेनानुनयति । ईदृशो हि कामिनोर्व्यवहारः, त्वं पुनर्बहुतरकालं परनायिकासक्ते धूर्ते विनैवानुनयं मानं त्यक्त्वा प्रसन्नाऽसीत्सुपालम्भः । एवं च नायकनायिकावृत्तान्तकथनमेवाभि-

यथा वा—

गच्छाम्यच्युत ! दर्शनेन भवतः किं तृप्तिरुत्पद्यते
किं त्वेवं विजनस्थयोर्हतजनः संभावयत्यन्यथा ।
इत्यामन्त्रणभङ्गिसूचितवृथाऽवस्थानखेदालसा-
माश्लिष्यन्पुलकोत्कराञ्चिततनुर्गोपीं हरिः पातु वः ॥ १२७ ॥

अत्राच्युतादिपदव्यङ्ग्यमामन्त्रणेत्यादिवाच्यस्य । एतच्चैकत्रैकवक्तृगतत्वेनापरत्र भिन्नवक्तृगतत्वेनेत्यनयोर्भेदः ।

अस्फुटं यथा—

अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता ।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम् ॥ १२८ ॥

अत्रादृष्टो यथा न भवसि वियोगभयं च यथा नोत्पद्यते तथा कुर्या इति क्लिष्टम् ।

सन्दिग्धप्राधान्यं यथा—

हरस्तु किञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥ १२९ ॥

अच्युत ! अपरित्यक्तमर्य्याद ! दर्शनेन तृप्तिर्नोत्पद्यते किन्तूपभोगेनैव । किन्त्विति लोकस्तावदावयोः सङ्गमुद्घोषयत्येव । तकिमित्यकीर्तिभागिनौ मिथ्यात्मानौ वञ्चयाव इति व्यङ्ग्यानि । अत्र चोदाहृतिद्वये व्यङ्ग्ययोरलङ्कृतिवस्तुमात्ररूपेण भेदो विद्यते । स च स्फुट एव ।

प्रकारान्तरेणापि भेदमाह—एतच्चेति । वाच्यसिद्ध्यङ्गव्यङ्ग्यम् । एकत्र पूर्वस्यामुदाहृतौ । एकवक्तृगतत्वेनाङ्गिना साध्येन सह स्थितमिति शेषः । भिन्नेति कविनिबद्धवक्तृगतः । आमन्त्रणेत्यादि वाच्यं तु कविरूपवक्तृगतमित्यतो हेतोरनयोरुदाहृतिद्वयगतव्यङ्ग्ययोर्भेदो वैजात्यमुदाहरणद्वयप्रदर्शनबीजमित्यर्थः ।

म्लिष्टं[१] व्युत्पन्नैरपि झटित्यसंवेद्यम्, अत एव प्रतीतिमान्थर्यान्नात्यन्तचारुतावहमित्यर्थः । वक्त्रभिप्रायरूपस्य व्यङ्ग्यस्य वाच्येन सह[२] क्षीरजलवत् क्रोडी-

---

प्रेतम् । स च वृत्तान्तो व्यज्यमानो वाच्चे रविकमलिनीवृत्तान्तेऽभिन्नतया चारोप्यमाणस्तस्य प्रकृतार्थतां सम्पादयंस्तदुत्कर्षमाधत्त इत्यङ्गतयैवास्ते" इति ।

१. श्रीविद्याचक्रवर्तिलौहित्यभट्टगोपालप्रभृतिभिश्चैष एव पाठो गृहीतः । अपरे तु श्लिष्टं क्लिष्टमिति वा पाठं कल्पयन्ति । ध्वनितस्तदाभासविवेकं कर्तुमानन्दवर्धनोऽपि संग्रहश्लोकसदृशीं कारिकामेकां पठति—"यत्र प्रतीयमानोऽर्थः प्रम्लिष्टत्वेन मासते" (ध्वन्यालोके, २३९ पृ०) इत्यादि । तत्रापि प्रक्लिष्टत्वेनेति पाठान्तरं वर्तते ।

२. अत्र "सह स्थितमिति शेषः" इति पूर्वप्रघट्टकव्याख्यानांशो लिपिकरप्रमादादयथैव गर्भिलः ।

अत्राधरं परिचुम्बितुमैच्छदिति किं प्रतीयमानं किं वा विलोचनव्यापारणं वाच्यं प्रधानमिति सन्देहः ।

तुल्यप्राधान्यं यथा—

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते ।। १३० ।।

अत्र जामदग्न्यः सर्वेषां क्षत्राणामिव रक्षसां क्षणात् क्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम् ।

काक्वाक्षिप्तं यथा—

मथ्नामि कौरवशतं समरे न कोपाद्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन ।। १३१ ।।

भावः,[१] न तु स्फुटतया पृथक्प्राधान्यम् । अतोऽस्फुटमिति वदन् सान्धिविग्रहिकः स्वभवनोत्सवाय तदेव विक्रीतवान् । पृथक्प्राधान्याभावे सन्दिग्धप्राधान्यं वाच्याङ्गत्वं वा स्यात्, न तु भिदाऽन्तरम् । न चैवमत्रानुभूयते, किन्तु वाच्यप्रतीतितो विलम्बेन पर्य्यालोचनया व्यङ्ग्यप्रतीतिरिति यथोक्तमेव श्रेयः ।

सन्देह इति । अत्र हि विलोचनव्यापारेण दर्शनचुम्बनाभिलाषौ तुल्यमिव प्रतीयमानौ प्रधानप्रत्यासत्याविशेषेण द्वावपि सुन्दरतरौ नान्योन्यं विशेषयतः । पृथक्विश्रामाभावाच्च प्राधान्यं न तुल्यम् किन्तु संशयितमिति भावकानामपरोक्ष एवायमर्थः ।

रावणं प्रति भार्गवदूतवाक्यम्—ब्राह्मणेति भवतां सर्वेषामेव रक्षसाम् । जामदग्न्यो महान् ब्राह्मणः । मित्रं जन्मप्रभृति निखिलरहस्यवेदी । क्षत्राणामिति । जामदग्न्यपदेन जमदग्निनिमित्तक्षयस्य[२] किञ्चिद्विषयीकृतत्वात् । समं प्राधान्यमिति । अत्र हि साम्ना दण्डेन वा रावणो वैरं त्याज्यः तयोश्च परस्परनिरपेक्षयोरेव वैरमोचने पर्याप्तरिति पृथग् पृथग् विश्रामः ।

भवतां सन्धिं करोतु; मम पुनरयं सन्धिः[३] न किञ्चिद्विरुणद्धीत्यर्थः । वाच्यस्य

---

१. काव्यप्रकाशविवेकस्यादर्शपुस्तके 'लोलीभाव' इत्यमनोज्ञतरः पाठ उपलभ्यते । सान्धिविग्रहिकमतखण्डने युक्तिः 'पृथक्प्राधान्याभावे····'इत्याद्यंशे स्फुटा ।

२. क्षत्रियाणमिति पाठान्तरमन्यैर्गृहीतम् । क्षत्रियान्तकस्य परशुरामस्म क्षत्रियान् प्रति वैरोद्दीपने कार्तवीर्यकृतस्तत्पितरं जमदग्निं प्रति निकार एवादिकारणमिति पौराणिकाः । अतो जामदग्न्यपदस्यापत्यप्रत्ययनिष्पन्नस्य सार्थक्यमिति हि टीकाकृतामाकूतम् ।

३. 'अयं सन्धिः' इत्यंशः स्वपुस्तके नास्ति ।

अत्र मथ्नाम्येचेत्यादि व्यङ्ग्यं वाच्यनिषेधसहभावेन स्थितम् ।

असुन्दरं यथा—

वाणीरकुडङ्गुड्डीणसउणिकोलाहलं सुणन्तीए ।
घरकम्मवावडाए वहूए सोअन्ति अङ्गाइं ॥ १३२ ॥
(वाणीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वत्याः ।
गृहकर्मव्यापृतायाः वध्वाः सीदन्त्यङ्गानि ॥ इति छाया)

अत्र दत्तसङ्केतः कश्चिल्लतागहनं प्रविष्ट इति व्यङ्ग्यात् सीदन्त्यङ्गानीति वाच्यं सचमत्कारम् ।

निषेधस्य सहभावेन वाच्यप्रतीतिसमकालमेव दीप्तता । व्यङ्ग्यसमा काकुवलेन प्रतीतिरिति वाच्यमाभातमात्रम्[१], व्यङ्ग्यमेव हठादाकृष्यमाणं वाक्यायमानम् । अत एवात्र लक्षणाप्रवेशः प्राचीनैर्नाङ्गीकृतः, मुख्यार्थबोधाद्यनुसरण (?)–विघ्नाभावदिति[२] वृद्धाः । सन्नपि मुख्यार्थबाधो झटित्यर्थपर्य्यवसानान्नानुसन्धीयत इत्यधुनातनाः ।

कुडङ्गो लतागृहम् । वावडा व्याकुला । अत्र वाच्या[द]नुभावभूतादौत्सुक्यावेगसंवलितानुरागोद्रेककृतमदनपरवशताप्रतीतिः[३] । व्यङ्ग्यं तु तटस्थप्रायमेव । एतच्च स्वविषये वाच्यसिद्धयङ्गत्वादिसर्वापवादरूपं द्रष्टव्यम्, तेषु व्यङ्ग्यस्यापि चारुत्वसम्भवात् । अयञ्च गहनो मार्गः सहृदयैरवहितैर्भावनीय इति सर्वं सुस्थम् ।

---

१. एवं खपुस्तके पाठः । ''समकालमेव काकुवलेन व्यङ्ग्यप्रतीतिरिति वाच्यममेतिमात्रम्'' इति लिपिकरप्रमादजनितस्त्रुटितविपर्यस्तप्रायः कपुस्तके पाठः ।

२. 'बाधादनुसरणविध्यभावात्' इति खपुस्तके पाठः । 'वादाद्यनुसरण-(?) विध्यभावात्' इति पाठः स्यात् । वृद्धा टति लोचनकृतां मतोद्देशः । यदाहुस्ते वृद्धतरमतं खण्डयन्तः स्वग्रन्थे—''अत एव 'मथ्नामि कौरवशतम्'··········इत्यादौ [ये] विरीतलक्षणामाहुस्ते न सम्यक्परामर्शाः।············प्रतिपत्तिरिति सुख्यार्थबाधद्यानुसरणविघ्नाभावात् को लक्षणाया अवकाशः (?)········इत्यलमवान्तरेण बहुना'' इति । गुणीभूतव्यङ्ग्यप्रकारत्वे प्रमाणमाकरे ध्वन्यालोकादेव स्पष्टम् । (········शब्दशक्तिरेव··········गुणीभूतव्यङ्ग्यत्वम्···२१३ पृ०) । साहित्यचूडामणावयमेव ग्रन्थ उद्धृतः । परं सम्पावककृतानवधानात् 'उन्लीलितं चैतत्तृतीयोद्योते' इति स्थाने 'तृतीयोल्लासे' इत्यशुद्धः पाठो मुद्रितग्रन्थे (२२६ पृ०) दर्शितः । 'सन्नपि मुख्यार्यबाधः' इत्याद्यधुनातनविचारशैली हि प्राचीनतरमतानुवर्तिनीति विस्मरणीयम् ।

३. ''वाच्यादेवानुभावभूतादौत्सुक्य········रागोद्रेकमदन········प्रतीतिः'' इति खपुस्तके पाठः ।

(६७) एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत् ॥ ४६ ॥

यथा योगमिति—

व्यज्यन्ते वस्तुमात्रेण यदाऽलङ्कृतयस्तदा ।
ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयात् ॥

इति ध्वनिकारोक्तदिशा वस्तुमात्रेण यत्रालङ्कारो व्यज्यते न तत्र गुणीभूतव्यङ्ग्यत्वम् ।

एषामष्टानां गुणीभूतव्यङ्ग्यानाम् । लक्ष्यप्रसिद्धिपर्यालोचनया पूर्ववद्[1] अर्थान्तरसंक्रमितवाच्यत्वादिना । वस्तुमात्रेणेति । अलङ्कारे तु व्यञ्जकेऽलङ्कृतानां द्वयी गतिः, प्राधान्यमप्राधान्यञ्च । आद्यं यथा मम—

स्मेरं वक्त्रसरोरुहं मधुमदक्षीबालसे लोचने
लावण्यामृतपूर्णकुम्भसुभगं वक्षोजयोर्युग्मकम् ।
पर्य्याप्तं नवनीलनीरजदृशः स्वैरङ्गकैर्मण्डनं
कर्मव्यग्रसखीजनोपकरणैर्मङ्गः परं[2] न स्थितेः ॥

अत्र सुभगमित्युपमाव्यङ्ग्यस्यासम्भवसम्भावनरूपस्योत्प्रेक्षणस्य ।

द्वितीयं यथा ममैव—

नैसर्गगुणविनीतं जनयति कपिञ्जलो वंशः ।
आजन्मनो ह्यपूर्वं सूते रत्नाकरो रत्नम्[3] ॥

अत्र वाच्यालङ्कृतेर्व्यङ्ग्यस्फुटतरोपमिते[4] ध्वन्यङ्गता काव्यस्य ध्वनिरूपतायामुपाधित्वम् ।

अत्र हेतुः—काव्यस्य वृत्तेः प्रवृत्तेस्तदाश्रयात् तदभिसन्धानपूर्वकत्वात् । न [तत्र] गुणीभूतव्यङ्ग्यत्वमिति वाच्याङ्गभावादिकं न कदापि प्रसज्यतीत्यर्थः ।

---

१. ध्वनिभेदवदिति तात्पर्यम्, न पुनरष्टानामेव गुणीभूतव्यङ्ग्यभेदानां परस्परयोगातिदेशक्रमेतमिति ग्रन्थार्थं विवृण्वन्ते बहवः ।

२. पदमिति कपुस्तके पाठः ।

३. अयञ्च प्रतिवस्तूपमाऽलङ्कारलक्ष्यश्चण्डीदासकृतः श्लोकस्तदर्वाचीनैः कैश्चिट्टीकाकृद्भिः सादरमुद्धृतः । टीकाकृतां स्ववंशमहिमख्यापकोऽयमिति—"कापिञ्जलकुलतिलक······ श्रीचण्डीदासमहामहोपाध्यायकृतकाव्यप्रकाशदीपिकायाम्" इत्यात्मपरिचयपरात् पुष्पिकासन्दर्भादवगम्यते ।

४. द्वितीयमित्यनुषङ्गः । द्वितीयमप्राधान्यलक्षणम् ।

(६८) सालङ्कारैर्ध्वनेस्तैश्च योगः संसृष्टिसङ्करैः ।

सालङ्कारैरिति । तैरेवालङ्कारैः, अलङ्कारयुक्तैश्च तैः । तदुक्तं ध्वनि-कृता —

स गुणीभूतव्यङ्ग्यः सालङ्कारैः सह प्रभेदैः स्वैः ।
सङ्करसंसृष्टिभ्यां पुनरप्युद्द्योतते बहुधा ।। इति ।

गुणीभावस्तत्र सर्वथैव नास्तीति वदन्तस्तु मूर्खप्राया एव, [१]अगूढत्वेन क्वचन गुणीभावसम्भवात् । अत्र चालङ्कारध्वनिप्रकरणे लोचनकृतोक्तम्—

ज्योत्स्नापूरप्रसरधवले सैकतेऽस्मिन् सरय्वा
वादद्यूतं सुचिरमभवत्सिद्धयूनोः कयोश्चित् ।
एकः प्राह[२] प्रथमनिहतं केशिनं कंसमन्यः
स त्वं तत्त्वं कथय भवता को हतस्तत्र पूर्वम् ।।

इत्युदाहरणं यदत्र केचित्पठन्ति, तन्न युक्तम्, भवतेत्यनेन राज्ञः कृष्णता-रूपणस्य स्फुटीकृतत्वात्[३] ।

ध्वनेः पूर्वोक्तभेदवतः । तैर्गुणीभूतव्यङ्ग्यैः शुद्धैः सजातीयमिश्रीभूतैश्च सहेत्यर्थः । सजातीयसंसृष्टौ चाष्टानां ध्वनिवद्गणनोपनीतसङ्करे[४] शतमष्टोत्तरम् (१०८)[५] । समुदाये शुद्धैः सह वैद्यबाणेन्दवः (१५२) । संसृष्टिसङ्करैः सम्बन्धैर्योगो

---

१. रसात्मवादिनामभिनवगुप्तप्रभृतीनां मते दोषाणां कैश्चिदुद्भावितवैशेषिकगुणत्वमिवालङ्का-राणां क्वचिद् गौणत्वेऽपि गौरवसम्भावना नापर्याप्ता । यदाहुस्त एव— "एतदुक्तं भवति — सुकविर्विदग्धपुरन्ध्रीवद्भूषणं यद्यपि श्लिष्टं योजयति, तथापि शरीरतापत्ति-रेवास्य···आत्मतायास्तु का सम्भावना ? एवम्भूता चेयं व्यङ्ग्यता यदप्रधानभूताऽपि वाच्यमात्रालङ्कारेभ्य उत्कर्षमलङ्काराणां वितरति बालक्रीडायां राजत्वमिवेत्यमुमर्थं मनसि कृत्वाह—-तत्रेति" (११७ पृ०) इति । ध्वन्यङ्गता तु "चारुत्वोत्कर्षनिबन्धना वाच्यव्यङ्ग्योः प्राधान्यविवक्षया" इत्यानन्दवर्धनोद्दिष्टनयेन ।

२. एकोऽवादीदिति मुद्रितपुस्तके पाठः । ज्योत्स्नापूरेत्यादिः स्फुटीकृतत्वादित्यन्तो ग्रन्थो लोचनस्थ (११०पृ०) एव । परं काव्यप्रकाशमूलग्रन्थविशदने तस्योपयोगः, कष्टकल्प एव, सम्प्रदायकर्तॄणामाचार्यवर्याणां मतेऽनास्थापनस्य सुतरां गर्हितत्वात् ।

३. नायं प्रक्षेपः प्रचलितेषु पुस्तकेषु क्वचिदुपलभ्यते ।

४. 'धनिवचनावगतसङ्कर' इतिप्रायः क पुस्तके पाठः ।

३. चतुर्थोल्लासस्यान्ते टिप्पण्यां दर्शितगणनारीत्या (१+२+...८=८×९÷२) षट्त्रिंशत् (३६) संसृष्टिभेदाः । सङ्करे तु ३×३६=१०८ भेदाः शुद्धे गुणीभूतव्य-ङ्ग्ये ८ । साकल्येन ८+३६+१०८=१५२ भेदाः वैद्यो अश्विनौ द्वौ ।

(६९) अन्योन्ययोगादेवं स्याद्भेदसंख्याऽतिभूयसी ॥४७॥

एवमनेन प्रकारेण। अवान्तरभेदगणनेऽतिप्रभूतरा गणना। तथा हि शृङ्गारस्यैव भेदप्रभेदगणनायामानन्त्यम् का गणना तु सर्वेषाम्।

सङ्कलनेन पुनरस्य ध्वनेस्त्रयो भेदाः, व्यङ्ग्यस्य त्रिरूपत्वात्। तथा हि—किञ्चिद्वाच्यतां सहते, किञ्चित्त्वन्यथा। तत्र वाच्यतासहमविचित्रं

व्यवच्छेदाभावः तैरेवालङ्कारैरिति। वाच्यालङ्कृतिव्यङ्ग्यत्वादिस्थले। अलङ्कार-युक्तैश्चेत्यत्र प्रथमं वाच्येति शेषः! तदुक्तमित्युच्छास्त्रतापरिहारः[१]। उद्द्योतत इत्यत्र ध्वनिरित्यनुषङ्गः। अवान्तरभेदा ध्वनित्वसाक्षाद्व्याप्यधर्मोपहिताः प्रभेदास्तद्विशेषाः।

प्रभूततरेति। शुद्धा ध्वनिगुणीभूतव्यङ्ग्यभेदाः सजातीयविजातीयवाच्या-लङ्कृतिभिः शुद्धसजातीयविजातीयसङ्कीर्णसंसृष्टाश्चेत्यानन्त्यम्[२]। एषाञ्चोदाहृतयो दर्शितप्राया एवेति पृथङ्नोपन्यासः। शृङ्गारस्य असंलक्ष्यक्रमध्वनिविशेषस्येत्यर्थः। सर्वेषां निखिलध्वनिगुणीभूतव्यङ्ग्यभेदाना[3] तत्तद्व्याख्यानभङ्गिभि[४]-र्विभक्तानामित्यर्थः।

सम्प्रति विषयान्तरविप्रतिपत्तिनिराकरणद्वारैकत्वघटनेन प्रचुरसिद्धान्त-तत्त्वप्रटनाय उक्तानुक्तसमुच्चयनेन वृत्तिकृद्विततवितते प्रकरणमारभते—सङ्क-लनेनेति। संक्षेपेणेत्यर्थः। ध्वनेः।

इदमुपलक्षणं गुणीभूतव्यङ्ग्यस्यापि बोद्धव्यम्। त्रिरूपत्वाद् वस्तुमात्राल-ङ्कृतिरसादिरूपेण। वैचित्र्यमुपमाऽद्यलङ्कृतिसाजात्यम्, तद्रहितमविचित्रमिति हेतोर्वस्तुमात्रविचित्रमुच्यते। अलङ्काररूपमलङ्कारसगोत्रम्[१]।

---

१. प्रथमवाच्येति प्राजुत्तपरिहार' इति लिपिकरत्रुटिप्रमादमयः क पुस्तके पाठः।

२. अत्राशुद्धगणनाव्यसनरसिकैः कैश्चिदर्वाचीनैर्यत् खाकाशाङ्काग्निपक्षर्त्तुव्योमवारिधिवह्नयः (३४०६२३९००) भेदाः गणितास्तत्र संख्यानयनक्रम आदावेव भ्रान्तिकलुष इत्यनाद-रणीयम्। कालुष्यनिदानं तु श्रीधरचण्डीदासादिभिः प्राचीनैः स्वटीकास्वस्माभिश्चाल-ङ्कारकौस्तुभोपरि मौक्तिकावल्यां (११२ पृ०) प्रदर्शितम्।

३. ०व्यङ्ग्यभूतानामिति ख पुस्तके पाठः।

४. ध्वन्यालोके (२१०-२४२पृ०) सप्रपञ्चमुदाहरणादिदर्शनेन सुस्थिरं स्थापित एष सिद्धान्त इति तत एव जिज्ञासुभिराकलनीयः।

१. ०'अलङ्कारमात्रम्' इति ख पुस्तके पाठः।

विचित्रं चेति । अविचित्रं वस्तुमात्रम्, विचित्रम् त्वलङ्काररूपम् । यद्यपि प्राधान्येन तदलङ्कार्यम्, तथापि ब्राह्मणश्रमणन्यायेन तथोच्यते । रसादिलक्षणस्त्वर्थः स्वप्नेऽपि न वाच्यः । स हि रसादिशब्देन शृङ्गारादिशब्देन वाऽभिधीयेत । न चाभिधीयते, तत्प्रयोगेऽपि विभावाद्यप्रयोगे तस्याप्रतिपत्तेः, तदप्रयोगेऽपि विभा-

---

रसादिलक्षण इति । लक्ष्यते ज्ञायतेऽनेनेति लक्षणं नाम, रसादिः शब्दो लक्षणमस्येति रसादिलक्षणो भवादिरर्थः । तुः वस्त्वलङ्कृतिव्यतिरेके[१] । एतदेवान्वयव्यतिरेकाभ्यामुपपादयति—स हीति । तत्प्रयोगे रसादिशृङ्गारादिपदप्रयोगे[२] । तदुक्तम् —

रसोद्देशपरः श्लोको रसाध्याये मुनेस्तु यः ।
पूर्णः सर्वरसास्वादात् स (?) एव स्याच्च नाटकम्[३] ।।इति ।

---

१. एतदेव प्राचीनानां भट्टोद्भटप्रभृतीनां सिद्धान्तादानन्दवर्धनप्रमुखानां नव्यतन्त्रिणां निष्कर्षस्य वैलक्षण्यम् । अत्र वृत्तिग्रन्थो ध्वन्यालोकस्य—"न तु साक्षाच्छाब्दव्यापारविषय इति वाच्याद्विभिन्न एव······तस्मादन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्याक्षिप्तत्वमेव रसादीनां न त्वभिधेयत्वं कथञ्चित्" (२४-२६पृ०) इत्याद्यंशमनुवदति । भट्टोद्भटमतं प्रतीहारेन्दुराजकृतलघुवृत्तावित्थं संगृहीतमुपलभ्यते—"पञ्चरूपा रसाः" इति, तत्र स्वशब्दाः शृङ्गारादेर्वाचकाः शृङ्गारादयः शब्दा इति काव्यालङ्कारसारसंग्रहस्थरसवदलङ्कारनिर्देशपरे विवरणे ।

२. 'पूर्णो नवरशास्वादात्' इति श्रीधरोत्धृतोऽत्र ग्रन्थः । भारतनाटचशास्त्रोद्देशपरोऽयं सन्दर्भ उद्भटप्रभृतीनां तदुपजीविनिबन्धकृतां मध्ये कस्यापि स्यात् । 'स वै रसास्वादात्' इति पाठः स्यात् । स श्लोकोऽर्थात् तन्निर्दिष्टद्रव्यानयनं पूर्णः परिपूर्त्तिमाप्तः । विभावादे रसप्रतीतिरिति प्रकरणसङ्गतिः ।

३. 'स एव···नाटकम्' इति तत्पदेनास्वादद्रव्यस्य परामर्शः । तथा चाभिनवगुप्तपादानामभिधानम्—"सा चैकचित्तवृत्तिः···निर्विघ्नस्वसंवेदनात्मकविश्रान्तिलक्षणेन रसनाऽपरपर्यायेण व्यापारेण गृह्यमाणत्वाद्रसशब्देनोच्यते ।···तेन रस एव नाट्यम्" (अभिनवभारत्याम् ३६९ पृ०) इति । एतच्च

'शृङ्गारहास्य' इत्यादौ मुने रसाध्याये (६|१६) रसोद्देशपरश्लोके विवेचितमिति सर्वमनाकुलम् । यदि तावद्रसोद्देशपदेन रसनिष्पत्तिविधायिनी विभादिसम्पत्तिः सूचितेति मन्यते तदोद्धृतसन्दर्भस्थश्लोकपदस्य वैयर्थ्यं स्यात् । न तावद्रसनिष्पत्तिर्मुनिग्रन्थे श्लोकेन निबद्धा, परन्तु सूत्रेण विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इत्याकारेणेत्यलं बहुना ।

वादिप्रयोगे तस्य प्रतिपत्तेश्चेत्यन्वयव्यतिरेकाभ्यां विभावाद्यभिधानद्वारेणैव प्रतीयत इति निश्चीयते ।

तेनासौ व्यङ्ग्य एव, मुख्यार्थबाधाद्यभावात् । न पुनर्लक्षणीयः । अर्थान्तर-

---

तदप्रयोगेऽपीति । यथा ममैव—

शोच्यां[1] तेऽङ्ग (शोच्यामग्नि) मुखक्षिप्तक्षीरधारामिव प्रियाम् ।
तां विना मृगशावाक्षीं किं फलं जीवितेन मे ।।

अत्र हि रसादिपदमृतेऽप्यविभक्त आस्वादः सहृदयहृदयसाक्षिकः संवलित-विभावादिमूल एवावसीयते । विभावाद्यभिधानद्वारेण अभिहितविभावादिद्वारेण । प्रतीयत इति । प्रतीतिरेव भगवती स्वामिन्ने तस्मिन् प्रमाणमित्युक्तयुक्तिसचिवस-मृद्धिबलेनाभिधादिविलक्षणां वृत्तिमाक्षिपतीति भावः । निश्चीयत इति । ततश्च यत्र क्वचन विवादे रसादिपदस्य च साहित्यं विभावादिरेव तत्र प्रतीतिबीजम्, रसादिपदं त्वकिञ्चित्करमेव ।

अत एव तत् प्रत्युत दोषतया वक्ष्यते[२] । उपसंहरति—तेनेति ।

ननु विभावादिवाचकपदानां तावद्रसास्वादशक्तिर्भवताऽपि स्वीक्रियते । सा च सङ्केतानपेक्षित्वादभिधाविलक्षणा लक्षणारूपाऽस्तु, अभिधालग्नशरीरत्वात् । एवञ्च शब्दशक्तिमात्रेणैव रसादिप्रतीतौ निर्व्यूढायामभिहितविभावादौ शक्त्यन्त-रमनङ्गीकार्यमिति चेत् ? तत्राह – मुख्येति । संवलितविभावादिविज्ञानानन्तरमेव हि रसाद्यास्वादोऽनुभूयते । न च विभावादिपदानां लाक्षणिकत्वाङ्गीकारे विभावा-दिसंवलनज्ञानमात्मानमासादयितुमीष्टे, लक्षणायां मुख्यार्थान्वयाभावात् ।

तस्माद्रसादौ शब्दस्यावापोद्वापदृष्टिसिद्धान्वयव्यतिरेकानुविधानस्याभिधाल-क्षणाऽतिरिक्ता[३] विभावादेश्च व्याप्त्यादिविरहेणानुमानादिविलक्षणां काञ्चन शक्ति खण्डपण्डितानां[४] शिरसि वामपादविन्यासपूर्वकमखिलामेव त्रिलोकीमध्यापयामः ।

---

१. शोच्या ते कथमित्याद्यमनोज्ञः पाठः कपुस्तके । शोच्यामग्निमुखे इत्यादिः पाठः स्यात् ।

२. भट्टोद्भटमतमत्राक्षिप्यते । "व्यभिचारिरसस्थायिभावानां शब्दवाच्यता" इत्यादौ रसदोषनिर्णायके सप्तमोल्लासस्थप्रकरणेऽस्य प्रपञ्चः ।

३. 'अभिधानलक्षणा' इत्यादि खपुस्तके पाठः । एवमुत्तरत्राप्यभिधानपदसन्निवेशः स्थले स्थले दृश्यते ।

०'व्यतिरेकानुविधानलक्षणाद्वितीयलक्षणाऽतिरिक्तानाम्' इत्येवंप्रायः ख पुस्तके पाठः । स चासंलग्न एव ।

४. खण्डपण्डितपदेन चतुर्थोल्लासोद्दिष्टानां क्षुद्राणां खण्डिकोपाध्यानां ग्रहणम् । व्यक्तिविवेक-कारो महिमभट्टोऽनुमान एव निखिलं व्यञ्जनव्यापारमन्तर्भावयितुमैहत । स च प्रयासो

संक्रमितात्यन्ततिरस्कृतवाच्ययोर्वस्तुमात्ररूपं व्यङ्गचं विना लक्षणैव न भवतीति प्राक् प्रतिपादितम् ।

शब्दशक्तिमूले तु अभिधाया नियन्त्रणेनानभिधेस्यार्थान्तरस्य तेन सहोपमादेरलङ्कारस्य च निर्विवादं व्यङ्गचत्वम् ।

१अर्थशक्तिमूलेऽपि विशेषे सङ्केतः कर्तु न युज्यत इति सामान्यरूपाणां

किञ्च, रसादौ लक्षणाऽङ्गीकारेऽपि रूढिविरहात् प्रयोजनलक्षणाऽङ्गीकार्या। तच्च प्रयोजनं विलक्षणव्यापारवेद्यमेवेति पूर्वोक्तदिशा घट्टकुटचामेव प्रभातं भवतीत्याह – अर्थान्तरेति । वाच्यपदस्य प्रत्येकमन्वयः । प्राक् प्रतिपादितम् । साधारण्यादत्रापि प्रसज्येदित्यर्थः । अस्माच्च वाक्यादन्यपरादपि लक्षणामूलस्थले वृत्त्यन्तरोपपत्तिः संगृहीता भवति ।

सम्प्रत्यभिधामूलयोर्वस्त्वलङ्कृत्योः स्वरूपं संगृह्णाति—शब्देति । नियन्त्रणेन शब्दभेदादेव शब्दस्वरूपनिश्चयेन, शक्तिमात्रभेदे शक्त्यन्तरस्य स्थगनेन, तदभेदेऽपि तद्विषयान्तरव्यवच्छेदेन । अर्थान्तरस्य । अप्राकरणिकस्यात एवानभिधेयस्य । उपमादेरलङ्कारस्येति । तत्सम्भवस्थलेऽपि, अन्यत्र तु केवलार्थान्तरस्य । निर्विवादमिति । लक्षणाद्यनुमानादिनिरासस्य सुकरत्वात् । एतच्चास्माभिः प्रकाशितमेव । अर्थशक्तिमूलयोस्तु वस्त्वङ्कृतोर्व्यङ्गचत्वं सुप्रतिपादम् ।

सम्प्रति सर्वत्रैव वाक्ये पदार्थप्रत्ययावान्तरव्यापाररूपपदबोध्यतयाऽर्थशक्तिमूलो वाक्यार्थः पदानां तुर्य्यवृत्तिबोध्य एव अभिहितान्वयेऽन्विताभिधाने चेत्याह— अर्थेति । विशेषे संसृष्टाकारे सङ्केतः कर्तुं न युज्यते न शक्यते, आनन्त्यव्यभिचाराभ्याम् । सामान्यरूपाणां विशकलिताकाराणां पदार्थानां पदैरभिधया बोधितानां गवादीनाम् ।

यद्वा भट्टदिशा विशेषे स्वलक्षणे सामान्यरूपाणां पदार्थानां गोत्वादिसामान्यानामेव पदैरभिहितानामविनाभावबलाक्षिप्तस्वलक्षणानाम्, नैयायिकादिनीत्या तु विशेषे प्रस्तुतोपयोगिनि तत्कालासन्निधानानन्त्यव्यभिचारैः सङ्केतस्या-

---

मुधैव जात इत्यभियुक्तानां निष्कृष्टः सिद्धान्तः । खण्डनखण्डकृत् कविसार्वभौमो दार्शनिकधुरीणोऽप्येवंवादीति नासन्दिग्धतया वक्तुं पार्यते । न कुत्रापि खण्डनखण्डे एतन्मतविवेचनम्, नैषधचरिते तत्कृते "विजृम्भितं यस्य किल ध्वनेरिदं विदग्धनारीवदनं तदाकरः" इति ध्वनिपदद्योत्यस्य वस्तुनो भाक्ततया श्रवणञ्च तत्र दिग्दर्शनम् । 'खण्डपण्डित' इति साकूतमभिधानमपि । नामी विचक्षणास्तत्त्वदर्शिनः, परमेकदेशानुसरणान्धा व्याकरणमहाभाष्यादौ खण्डिकोपाध्यायाः संकीर्णज्ञानिनोऽपसिद्धान्तैः शास्त्रस्थितीर्दूषयन्तो निन्दिता इति वैरस्यस्थितेः सूचनम् ।

पदार्थानामाकाङ्क्षासन्निधियोग्यतावशात् परस्परसंसर्गो यत्रापदार्थोऽपि विशेष-

शक्यतया गोत्वादिसामान्यावच्छेदितया पदैरभिहितानाम् । परस्परसंसर्गो विशेष रूपो द्वितीयलक्षणोपनीतः । अपदार्थः पदार्थस्मृतिसंसर्गोपनीतिसाचिव्यापेक्षितया पदमात्रालभ्यो विशेषरूपः संसृष्टाकारो वाक्यार्थो वाक्येनार्थ्यमानः प्रवृत्तिनिवृत्ति-योग्यतया वाक्यप्रवृत्तिविषयः । का वार्ता । दूरविप्रकर्षादिति भावः । व्यङ्ग्यस्य संसृष्टाकारवाक्यार्थपाश्चात्त्यस्य वस्तुनोऽलङ्कारस्य चेत्यर्थः ।

एतदुक्तं भवति "शब्दबुद्धिकर्मणां विरम्य व्यापारविरहः" इति नीत्या विशकलितक्रियाकारकस्वरूपमात्रोपनयनादेवाभिधालक्षणयोर्गलिते प्रयोजने इति दिशा पदार्थसंसर्गातिरिक्ते–

प्रधानगुणभावेन लब्धान्योऽन्यसमन्वयात् ।
पदार्थमेव वाक्यार्थं सङ्गिरन्ते विपश्चितः[१] ॥

प्रवृत्तिनिवृत्तियोग्ये कारकपदार्थसंसृष्टक्रियादिविधेयपदार्थरूपे वाक्यार्थे द्वितीयलक्षणाऽधिका वृत्तिः काचिदाश्रयणीया । न चासावभिधादिः, तासां विरतत्वात् ।

नानुमानादिः, शब्दस्य पृथक्प्रामाण्यभङ्गप्रसङ्गेन तौतातिकनैयायिकादीनामपसिद्धान्तापातात् । पृथक्प्रामाण्यानङ्गीकारवादिनं प्रति तु त एव प्रतिभटीकार्याः । किञ्चानुमानत्वेऽप्यभिधादितो[२] वृत्त्यन्तरवादो न व्याहतः । यत्र क्वचिदपि वाक्यश्रवणानन्तरं व्युत्पत्त्याद्यनुसन्धानविलम्बासंवेदनेऽपि यद्यनुमानकल्पनोपास्यते[३] तदा सविकल्पप्रत्यक्षादिस्थलेऽपि तत्कल्पनाभावे को नाम दण्डधरः ?

---

१. अभिहितान्वयवादिनां भट्टकुमारिलप्रभृतीनां मतव्यक्तये प्रमाणान्तरमत्रोद्ध्रियते भट्टग्रन्थतः—

न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः ।
तन्मात्रावसितेष्वेषु तन्मात्रेभ्यः स गम्यते ॥
वाक्यार्थमतये तेषां प्रयुक्तं नान्तरीयकम् ।
पाकज्वालेव काष्ठानां पदार्थप्रतिपादनम् ॥
विशेषरूपं वाक्यार्थमपदार्थमपीच्छता ।
व्यक्तिरिष्टाऽभिधातोऽन्याऽभिहितान्वयवादिना ॥

एवमाकाङ्क्षासन्निधियोग्यतावशात् संसर्गो विशेषरूपो वाक्यार्थः समुल्लसति । द्वितीय-कक्षापाती सोऽप्यनभिधेय इत्युपालम्भस्वरसः ।

२. 'किञ्चानुमानादत्राभिधाप्यते' इति खपुस्तके पाठः ।

३. "······श्रवणानन्तरं दीप्ततोव्यङ्ग्य समाकाङ्क्षाऽनुसन्धानेत्यादिर्मूलपुस्तकपूर्वतरपृष्ठ-विपर्यासजनितः सुतरामग्राह्यः पाठः कपुस्तक उपलभ्यते ।

रूपो वाक्यार्थस्तत्राभिहितान्वयवादे का वार्त्ता व्यङ्ग्यस्याभिधेयतायाम् ।

[१]**येऽप्याहुः—**

शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति ।
श्रोतुश्च प्रतिपत्तृत्वमनुमानेन चेष्टया ॥

किञ्चैतानि पदानि संसर्गज्ञप्तिपूर्वकाणि, आकाङ्क्षादिमत्त्वाद् मदुच्चारितवदित्यनुमानरीतिरङ्गीकार्या[२] । न चोपदेशानन्तरमीदृशी बुद्धिरनुभूयते, नापीदृगाकारं वाक्यार्थबोधनं नाम पदार्थाभिधानकाल एव[३] वाक्यार्थावगतिः । न तु पदानां साक्षादुक्तिरिति चेत्, न, शब्दस्य प्रामाण्यव्याकोपात्, प्रमाणान्तरापातप्रसङ्गाच्च ।

न च संसर्गविदनेऽपि[४] संसृष्टाकारवेदनं न्याय्यम्, 'दण्डी देवदत्तः' इत्यादावदर्शनात् दण्डाद्यवेदनेऽपि प्रसङ्गात् ।

तस्मात् पदार्थसंसर्गे संसृष्टाकारे च[५] वाक्यार्थेऽभिधालक्षणाभ्यामधिकां पदानां वृत्तिं स्वयमुररीकृत्य तात्पर्यव्यञ्जनानामनी यथारुचि निविश्येतामित्यार्यमिश्रान् विज्ञापयामः । नास्माभिर्भवत्पादप्रसादप्राप्तविज्ञानलवगर्वदुर्विदग्धैः सार्द्धमसमो विग्रहः कार्यः । वाक्यार्थपाश्चात्त्ययोस्तु वस्त्वलङ्कृतयोर्दण्डापूपिकान्याय एवेति किं तत्र वक्तव्यम्[६] ?

एवं भट्टादीननुनीय गुरूननुनयति शब्देत्यादिकारिकाद्वयदिशा । देवदत्तेत्यादि तथाभूतत्वादित्यन्तं येऽप्याहुस्तेषामन्विताभिधानवादिनां मते यत्रातिविशेषरूपः पदार्थ एवावाच्य इति प्रतिपद्यते तत्र तु दूरे[७] 'निःशेषच्युत' इत्यादौ विध्यादेर्वाच्यतेति दूरदूरेणान्वयः । अक्षरार्थस्तु-शब्दो वाक्यम्, वृद्धौ प्रयोज्यप्रयोजकौ, अभिधेयौ वाक्यार्थप्रत्ययानन्तरं प्रयोज्यनिष्पत्त्या गवाद्यानयनादिः । प्रत्यक्षेण श्रोत्रादिवृत्त्या ।

---

१. येऽप्याहुस्तेषामिति बहुगर्भितवाक्यानन्तरस्थितवृत्तिरित्यन्विताभिधानवादिनां बोधः ।

२. '······पदानि समज्ञानपूर्वकाणि···मनुच्चारितवत्' इत्यादिः खपुस्तके पाठः ।

३. 'पदार्थाभिधानकार्ये वा इति कपुस्तके पाठः ।

४. 'न संसर्गादिदनेऽपि' इत्यादिः कपुस्तके पाठः ।

५. 'च' इति खपुस्तके नास्ति ।

६. पदेभ्यः प्रथमं पदार्थबोधनम्, ततः पदार्थविशेषावयवानामन्वयरूपस्य वाक्यार्थस्य सामर्थ्यतः प्रतीतिस्तदनन्तरं व्यङ्ग्यस्यार्थस्यावगमनम् । तच्च तृतीयकक्षायां स्थितम् । तत् कुतोऽभिधायाः प्रसरणम्, द्वितीयकक्षायामेव तस्यानपेक्षणात् । अभिहितान्वयवादेऽशक्य एवान्वय आकाङ्क्षादिवशेनावश्यमवगम्यते, न तु तद्व्यतिरिक्तं किमपीति निष्कृष्टाशयः ।

७. 'तत्र दूरे' इति कपुस्तके पाठः ।

अन्यथाऽनुपपत्त्या तु[१]बोधेच्छक्तिं द्वयात्मिकाम् ।
अर्थापत्त्याऽवबोधेत सम्बन्धं त्रिप्रमाणकम् ॥

इतिप्रतिपादितदिशा—

अत्र व्युत्पत्तिकाले । चेष्टया गवानयनादिरूपया दृष्टया यदनुमानमनुमितिजनकं व्याप्तिस्मरणादि तेन । श्रोतुः प्रतिपत्तृत्वं तद्वाक्यजनिततत्कृत्यौपयिकप्रतीतिमत्त्वं पश्यत्यनुमिनोति । अन्यथाऽनुपपत्त्या तत्प्रतीतेर्द्वयात्मिकां द्वयोर्वाक्यतदन्वययोराश्रयविशेषयोरात्मा यस्यास्तां शक्तिं प्रतिपादकसम्बन्धरूपामर्थापत्त्या आवापोद्वापाभ्यामुभयात्मिकां पदतदर्थविषयां शक्तिं वाच्यवचकसम्बन्धं च [बोधेत्[२]] जानाति । प्रत्यक्षानुमानार्थापत्तिरूपत्रिप्रमाणकसम्बन्धं वाच्यवाचकभावं बुध्यन्ते व्युत्पित्सवः । प्रमाणत्रित्वं चात्र जात्यपेक्षया[३] । दिशा मार्गेण । दृशेति पाठे गणनेन[४] ।

---

१. 'बोधे शक्तिम्' इत्यपि क्वचित् पाठः तदापि 'अवबोधेत' इत्यनेन परामर्शः । सर्वत्र व्युत्पित्सुर्बालादिरित्याकारपदस्य कर्तृत्वेनानुषङ्गः । 'प्रतिपन्नत्वम्' इति पाठान्तरादन्यैर्गृहीतादयं स्पष्टतरः । 'अवबोधेत' इत्यत्र 'अवबुध्येत' इति वा पाठः ।

२. अन्विताभिधाननयेऽभियुक्तसंवादमुदाहरति प्राचीनसम्मतकारिकारूपेण । अन्विताभिधानवादिनां प्रभाकरगुरुप्रमुखानां मतनिष्कर्षस्तत्तद्ग्रन्थे दर्शितः । तथा च शालिकनाथकृतायां प्रकरणपञ्चिकायाम् (२।४४-४५) —

"अन्वितार्थाभिधायित्वे पदानां हि स्थिते सति ।
विशिष्टा वक्तृधीर्ज्ञातुं शक्यते नान्यथा यतः ॥
ज्ञातेषु हि पदार्थेषु श्रोता वक्तरि कल्पयेत् ।
अन्योऽन्यान्वयविज्ञानं नान्यथेत्युपदर्शितम् ॥"

तच्च ज्ञानं प्रत्यक्षपूर्वमेव । इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यद् ज्ञानं तत् प्रत्यक्षम् । देवदत्तादिसँज्ञाकल्पनाऽपि प्रत्यक्षा, इन्द्रियानुविधायित्वात् अनुमानं प्रसिद्धम् । अर्थापत्तिरपि द्वितीयोल्लासे लक्षिता । प्रभाकरगुरोर्बृहतीटीकायाम्—"कथं पुनर्गम्यते अन्वितपदार्थको वाक्यार्थ इति ।

नन्वेतस्मादेव वाक्यात् । वृद्धव्यवहारतोऽपि प्रतिपत्ता वाक्यादेवार्थं प्रतिपद्यते । बालस्तु पार्श्वस्थः, शब्दार्थयोः सम्बन्धं हानोपादानाभ्यां वेत्ति ।··· अनुमानादवगतस्यार्थस्य कथमेकत्वम् ? अन्यत्वं वा कथम्" (३६८-२६७ पृ०) इत्यादिविततवितता विचारशैली समनुशीलिता । प्रथमकारिकायामव्यवहितोत्तरकालभावित्वं क्रिययोः च द्वयेन सूचितम् । द्वितीयं चपदं प्रतिपत्तृत्वमित्यनेनानुषज्यते ।

३. प्रत्यक्षाद्युपाधिविवक्षया, प्रत्यक्षद्वयमर्थापत्तिद्वयमनुमानञ्चेति प्रमाणव्यक्तीनां तन्त्रे पञ्चतयाऽभ्युपगमसम्भवात् ।

४. गणनञ्च प्रत्यक्षानुमानार्थापत्तिरूपप्रमाणत्रयाश्रयम् । गणने तात्पर्यं तु ग्रन्थान्न सम्यक्

'देवदत्त ! गामानय' इत्याद्युत्तमवृद्धवाक्यप्रयोगाद्देशाद्देशान्तरं सास्नादिमन्तमर्थं मध्यमवृद्धे नयति सति 'अनेनास्माद्वाक्यादेवंविधोऽर्थः प्रतिपन्नः' इति तच्चेष्टयाऽनुमाय तयोरखण्डवाक्यवाक्यार्थयोरर्थापत्त्या वाच्यवाचकभावलक्षणं सम्बन्ध-

---

एतद्विशदयति-देवदत्तेति । वाच्यवाचकभावव्युत्पन्नानामेव वाक्यार्थप्रतीतिः। तद्व्युत्पत्तिस्तु वृद्धप्रयोगादेव। स च वाक्यरूप एव। वाक्यश्चान्वितबोधनियतम्। ततश्चोपदेशकालेऽन्वित एव सम्बन्धग्रहणात्तदनुसारेणैव नियोगकालेऽप्यन्विततयैव[१] प्रथमतः प्रतीतिः। तत्किमवशिष्यते यदर्थं तात्पर्यमन्यद्वा वृत्त्यन्तरमङ्गीकार्यमित्यनुवाद्यार्थः। विधेयार्थस्तु भवन्नप्यन्विते सम्बन्धग्रह आनन्त्यव्यभिचाराभ्यां विशेषेषु च शक्यतया कारकसामान्यान्विते क्रियासामान्येऽन्वितेषु कारकसामान्येष्वाश्रणीयः[२]। ततश्च यावति सङ्केतस्तावदभिधेयमिति नीत्या प्रतीते[३]ऽप्यभिधया सामान्यान्वये तन्मात्रस्याकिञ्चित्करतया कारकविशेषान्वितः क्रियाविशेषः प्रकृतविनियोगयोग्य स्वीकार्य एव। स चाभिधालक्षणानिष्क्रान्तस्तात्पर्यलक्षणद्वितीयलक्षणायामरोचकिनस्तव मते व्यञ्जनागम्य एवेति का कथा पाश्चात्त्यवस्त्वलङ्कृत्योः ? अभिधायाः सामान्यान्वितसामान्यविषयत्वेऽपि पदानां समभिव्याहारबलेन विशेषान्वितविशेषबोधनमिति चेत्।

समभिव्याहारबलेनेति कोऽर्थः ? किं समभिव्याहारोज्जीवितेन[४] बलेन ? तेनेव वा बलेन ? प्रथमे सुहृदेवासि नः। द्वितीये तु समभिव्याहारमात्रेण शब्दशक्तिसञ्चारे लक्षणाऽङ्गीकारोऽपि दुर्बलः स्यादिति पश्यतिपर्यन्तविवरणं सतीति[५] पर्यन्तम्। श्रोतुरित्यादि चेष्टयेतिपर्यन्तविवरणमनेनेत्याद्यनुमायेति यावत्। इयं प्रवृत्तिरेतदनुगुण[६]बुद्धिपूर्विका, प्रवृत्तित्वात्, मदीयैवंविध[७]प्रवृत्तिवत्। सा च बुद्धिरेतत्प्रयोगजन्या, एतदन्वयव्यतिरेकानुविधानादित्यनुमितिशरीरम्। तयोरित्यादि व्युत्पद्यत इत्यन्तम-

---

सिध्यति। दृशेति पाठस्य मतबोधनपरस्य पूर्वपाठान्तरसमानार्थकत्वे न काऽपि विप्रतिपत्तिरिति सर्वं सुस्थितम्।

१. 'नियोगकालेऽप्यनियततयैव······तात्पर्याख्यमन्यद्वा' इति खपुस्तके पाठ उपलभ्यते।

२. 'क्रियासामान्ये क्रियासामान्यं·········श्रयणीयः' इति यदृच्छाकल्पितो लिपिकरप्रमादजनितः पाठः कपुस्तके नास्ति।

३. 'प्रतीते' इति पदं खपुस्तके नास्ति।

४. 'समभिव्याहारोज्जीवितेन' इति शाकपार्थिवादिसमासाश्रये वृत्त्यन्तरस्य सहायकं सूचितं स्यात्। तच्च तुरीयवृत्तिवादाभ्युपगमपक्षेऽनुकूलमिति हि तात्पर्यम्।

५. 'प्रत्यक्षेणात्र पश्यति' इति वृद्धकारिकायाः पूर्वार्धे स्थितस्य ग्रन्थस्य 'नयति सति' इति वृत्तिग्रन्थे लक्षणोद्देशपरं विवरणम्। एवमुत्तरत्र टीकाकृत्प्रदर्शितरीत्या।

६. 'प्रवृत्तिरेव तदनुगुण' इति कपुस्तकेऽसङ्गतः पाठः।

७. 'मदीयैवंविधी' इत्यशुद्धः पाठः कपुस्तके।

मवधार्य बालस्तत्र व्युत्पद्यते। परतः 'चैत्र ! गामानय', 'देवदत्त ! अश्वमानय', 'देवदत्त ! गां नय' इत्यादिवाक्यप्रयोगे तस्य तस्य शब्दस्य तं तमर्थमवधारयतीति अन्वयव्यतिरेकाभ्यां प्रवृत्तिनिवृत्तिकारि वाक्यमेव प्रयोगयोग्यमिति वाक्यस्थिता-

---

न्यथेत्यादि द्वयात्मिकामित्यन्तविवरणम्। अन्यथाऽनुपपत्त्येति कारिकापदस्यार्थोऽर्थापत्त्येति। नियामकमन्तरेण शब्दादर्थान्तरस्यापि प्रतीतिः प्रसज्येत[1]।

तस्मादस्ति किञ्चिदनयोः प्रत्याय्यप्रत्यायकतानियमबीजमिति सम्बन्धग्रहणेन तद्विषयकसंस्कारापरपर्यायव्युत्पत्त्याधानम्। तच्चाविभक्तवाक्यतदर्थविषयमेव,तदानीं विभागज्ञानोपायाभावात्। नन्वेवं सम्बन्धनिश्चय आनन्त्यं स्यादित्याशङ्क्यातिप्रसङ्गनिवारकेण परत इत्यादिनाऽन्वयव्यतिरेकाभ्यामित्यन्तेन अर्थापत्त्यादि विवृणोति।

यद्यपि व्युत्पत्तिर्वृद्धव्यवहारादेव, स च वाक्यस्वरूप एव[2], तथापि प्रचुरतरव्यवहारदर्शी यस्य पदस्यान्वये व्यतिरेके च यस्यान्वयं व्यतिरेकञ्च पश्यति तयोर्वाच्यवाचकतालक्षणं नियामकमर्थापत्त्याऽवधारयति। ततश्च पूर्वप्रयोगेष्वपि न व्यामुह्यतीत्यर्थः। इतीति। यस्मादेवं व्युत्पत्तिप्रकारस्तस्मादन्वितैः पदार्थान्तरसंसृष्टैः सह पदानामन्वितानां समभिव्याहृतानामेव सङ्केतः सम्यक् केतनं ज्ञापनमिति व्युत्पत्त्या वाच्यवाचकतारूपः सम्बन्धो गृह्यते। किमिति समभिव्याहृतानामेव पदानां समयग्रह इत्याह—वाक्यस्थितानामेवेति। वाक्यतयैकार्थप्रतिपत्त्यनुगुणतया स्थितानामेवे-

---

१. अन्यथा इङ्गितभाषामयसंकेतस्यानित्यतया कस्यचिदर्थस्य केनाप्युक्तस्यापरैर्ग्रहीतुमशक्यता परापतेत्, अनादिसमयप्रवाहसाधितस्य संसारनियमस्योच्छेदः स्याच्च। बुद्धिप्रवृत्त्योः समानविषेयत्वं स्वाभाविकमेव, शब्दस्तु स्वरूपमात्रेणैवार्थप्रतिपादने निमित्तं बालवृद्धयोरविशेषप्रसङ्गादिति च प्रमाणसिद्धन्यायावुररीकृत्यैषा वाच्यवाचकनियामकव्यवस्थाऽव्याहृता शब्दव्यवहारानुविधायिनी सङ्गतिश्च सुसिद्धेति सर्वं सुस्थितम्। आदौ निर्विभागेन वाक्येन कस्यचित्तादाश्रयस्य निर्विभागस्यार्थस्य प्रतिपादकत्वमवधार्य पश्चादावापोद्वापद्वारेण पदानां व्यस्तानामर्थग्रह इति चाभियुक्तानां सिद्धान्तः। पुरुषवाक्येष्विव स्थितार्थसंश्रितत्वं नाप्रमाणपराहतमिति च मीमांसकसिद्धान्तस्त्वेतदनुकूल एव। तथा चैषामुक्तयो युक्तयश्च—

व्यवहारेषु वृद्धानां वाक्यश्रवणभादिषु।
आवापोद्वापभेदेन पदानां शक्तिनिश्चयः॥
तेनार्थे निश्चिते पश्चात् सोऽर्थो वाक्यस्य गम्यते।
तस्यां दशायां वाक्यस्य तस्य स्यादनुवादिता॥ इति।

२. 'एव' इति कपुस्तके नास्ति।

नामेव पदानामन्वितैः पदार्थैरन्वितानामेव सङ्केतो गृह्यत इति विशिष्टा एव पदार्था वाक्यार्थाः। न तु पदार्थानां वैशिष्टयम्।

यद्यपि वाक्यान्तरप्रयुज्यमानान्यपि प्रत्यभिज्ञाशरीरेण(प्रत्ययेन) तान्येवैतानि पदानि निश्चीयन्त इति पदार्थान्तरमात्रेणान्वितः सङ्केतगोचरः, तथापि सामान्यावच्छेदितो[१] विशेषरूप एवासौ प्रतिपद्यते, व्यतिषक्तानां पदार्थानां तथाभूतत्वादित्यन्विताभिधानवादिनः।

त्यर्थः। एतदपि कुत इत्याह—वाक्यमेवेति। न त्वेकं पदं विशकलितानि वा पदानि प्रयोगयोग्यमिति[२] हेतोः प्रयोगादेव च सम्बन्धनिश्चय इति भावः।

अत्र हेतुः—प्रवृत्तीति। परबोधनाय शब्दप्रयोगः तच्च प्रवृत्तिनिवृत्त्यभिप्रायकमेवेत्यर्थः। अन्वयव्यतिरेकाभ्यामित्यनन्तरमिति[३] पाठाभावे इतेर्वा पूर्वावच्छेदकमात्रत्वे प्रकारार्थत्वे च सरलैव योजना। एवं विक्षिप्ततया प्रतिपाद्यानन्नूद्य सारमाह—इतीति। इति हेतोः। विशिष्टा गुणप्रधानभावेन परस्परान्विता एव पदार्था पदैर्विशिष्टतया प्रथमत एवोपनीता वाक्यार्थः। समुदितानां पदानामेवार्थो न पुनरर्थप्रत्ययावान्तरव्यापाराणाम्। न तु पदार्त्रानां विशकलिततया प्रथमं पदैरभिहितानां वैशिष्टयं पश्चाद् वृत्यन्तरबोधं संसर्गमात्रं विशिष्टव्यवहारयोग्यम्।

ननु यथा संसर्गमात्रमव्यवहार्यं तथा कारकसामान्यान्वितक्रियासामान्यमपि। न च भवत्पक्षेऽपि विशेषविषयिण्यभिधा, सम्बन्धाग्रहणाशक्यत्वप्रसङ्गादित्याह—यद्यपीत्यादि तथाभूतत्वादित्यन्तम्। प्राचीनेदानीन्तनदशाविशिष्टधर्मिबोधः प्रत्यभिज्ञा, सा चासौ प्रत्ययश्चेति कर्मधारयः। तस्याः शरीरं तेन तान्येवैतानीति निश्चीयन्तेऽबाधिततया निश्चयरूपया विषयीक्रियन्त इति हेतोरेकदेशमात्रेण प्रतिबन्धविरहात् सामान्यमात्रविषयाविश्रान्तेरित्यर्थः। सामान्यावच्छेदितोऽभिहितसामान्याविनाभावलभ्यः। विशेषरूपः प्रकृतविनियोगयोग्यः। असौ कारकान्वितक्रियाभिन्नः। प्रतिपद्यते[४] पदैः।

---

१. सामान्यावच्छादितः' इत्यपरैर्गृहीतः पाठः।

२. प्रयोगयोग्यानीति प्रयोगसिद्धं रूपम्। न पदमिति यदप्यर्थप्रकरणादिगम्यं पदार्थान्तरसहकृतपदं प्रयुज्जते, तदपि वाक्यमेव। यदाहुः—संहत्यार्थमभिदधति पदानि वाक्यम्, एकार्थपरः सदसमूहो वा वाक्यमिति विवेकग्रन्थोऽत्रानुशीलनीयः।

३. इतिपदस्याश्रवणेऽन्वयतिरेकाभ्यामिति वाक्यच्छेदः। अन्यथा तु 'इति'त्रिकसमन्वितं परत इत्यादि वैशिष्टयमित्यन्तमेतद्वाक्यम्। तत्रादिमस्य 'इति'पदस्यार्थश्चण्डीदासेन निपुणमेव दर्शितः। इतरत् 'इति'पदद्वयं हेत्वर्थे। खपुस्तके 'इतेर्वा' इति स्थले 'इत्येवा' हत्याकारो लिपिकरप्रमादकृतो विकृतः पाठः।

४. 'प्रतिपाद्यते' इति वा पाठः।

तेषामपि मते सामान्यविशेषरूपः पदार्थः सङ्केतविषय इत्यतिविशेषभूतो वाक्यार्थान्तर्गतोऽसङ्केतितत्वादवाच्य एव यत्र पदार्थः प्रतिपाद्यते तत्र दूरेऽर्थान्तरभूतस्य 'निःशेषच्युत' इत्यादौ विध्यादेश्चर्चा ।

अत्र हेतुः—व्यतिषक्तानां गुणप्रधानभावेनान्वितानां पदार्थानां[१] तथाभूतत्वात् प्रकृतविशेषात्मकत्वात् । गुणप्रधानभावेनान्वयः [२]आकाङ्क्षादिवशादित्यभिप्रायः ।

पदानामिति पाठे[३] व्यतिषक्तनां समभिव्याहृतरूपाणां पदानां तथाभूतत्वात् समभिव्याहारमाहात्म्येन तथाभूतार्थप्रतीतिक्षमत्वादिति[४] नेयम् ।

एवमनूद्यमुक्त्वा विधेयमाह—तेषामपीति । अन्विताभिधानवादिनाम् सामान्यविशेषरूप इति । प्रकृतविशेषस्य[५] सङ्केतकालसन्निहितत्वात्सामान्यरूपः, पदार्थान्विततया च विशेषरूपः । पदार्थ एकैकपदबोध्यः । अतिविशेषभूत इति । प्रकृतोपयोगिशरीरः । तदेवाह—वाक्यार्थान्तर्गत[६] इति । संयुज्यमानक्रियाकारकविशेषार्थको योऽसौ समुदितशरीरो वाक्यार्थ उच्यत इत्यर्थः । अवाच्य एव प्रतिपाद्यते[७] व्यवह्रियते बोध्यते वा पदैः । अर्थान्तरभूतस्य संसृष्टोपात्तपदार्थातिरिक्तस्य । विध्यादेरित्येकदेशिदिशा । व्यङ्ग्यस्य वस्तुतो लक्ष्यस्य सतः प्रयोजना [त्म] नो व्यञ्जकस्य । एतच्च रहस्यं संगोप्याभिधान[८] मूलप्रकरणविनिवेशः समर्थनीयः ।

---

१. 'पदार्थानाम्' इति खपुस्तके नास्ति । 'प्रकृतविषयात्मकत्वात्' इति खपुस्तके पाठः । 'विशेष एव पर्यवसानात्तदतिक्रमेऽनुपस्थितकल्पने च प्रमाणाभावात्' इति श्रीधरकृतविवरणे कारणनिर्देशः ।

२. मतेऽस्मिन्नन्वितेष्वेव पदेषु घटादिषु घटादिप्रदानां शक्तिः । शब्दबोधे तु आकाङ्क्षादिवशाद् वृत्तित्वादिविशेषरूपमेव भासते । आकाङ्क्षादिवशादेवान्वयविशेषभानमिति गुणप्रधानभावेनार्थबोधः । अत्रारुचिस्तु—द्वितीयोल्लास एव सूचिता ।

३. एवं वृत्तिकूटेऽस्मिन् सन्दर्भे कानिचित् पाठान्तराणि टीकाकृता दर्शितानि, यान्यन्यत्र नोपलभ्यन्ते । विचारबहुलेऽस्मिन् प्रकरणे वैशद्यसम्पादनाय कैश्चिद् ग्रन्थाध्यापननिरतैः कदाचिदनेकधा चेष्टितम् । तस्य वा विजृम्भितमेतत् स्याद्यथाऽन्यत्रेति विभाव्यते । श्रीविद्याचक्रवर्तिनस्तु 'व्यतिषक्तानां तथाभूतत्वात्' इति सविशेषणमविशेष्यं पाठमङ्गीकुर्वन्ति ।

४. प्रतिपत्तिक्षमत्वात्' इति ख पुस्तके पाठः ।

५. 'प्रकृतिविषय' इति क पुस्तके इह चान्यत्र पाठः ।

६. 'वाक्यानन्तर्गत' इति केचित् पठन्ति ।

७, 'प्रतिपद्यते' इति वा पाठः ।

८. 'एतच्च रहस्यं संयोगव्यभिधानमूलैः' इत्यादिरस्पष्टः ख पुस्तके पाठः ।

अनन्वितोऽर्थोऽभिहितान्वये, पदार्थान्तरमात्रेणान्वितस्त्वन्विताभिधाने, अन्वितविशेषस्त्ववाच्य एव इत्युभयनयेऽप्यपदार्थ एव वाक्यार्थः ।

यदप्युच्यते 'नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते' इति, तत्र निमित्तत्वं कारकत्वं ज्ञापकत्वं वा ? शब्दस्य प्रकाशकत्वान्न कारकत्वम्, ज्ञापकत्वन्तु अज्ञातस्य कथम् ? ज्ञातत्वं च संकेतेनैव, स चान्वितमात्रम् ।

सम्प्रति हवनकरीत्या[१] मतद्वयमनूद्य वृत्यन्तराङ्गीकार आवश्यक इत्युपसंहरति--अनन्विति इति । सर्वथेति शेषः । पदान्तरमात्रेण[२] सामान्यरूपेण पदान्तरार्थेनान्वितः सामान्यरूप एव अन्वितविशेष इति-अत्रान्वितपदात्पूर्वं प्राकरणिक (क० इति ?) र्विशेषेति (विशेष इति) परतः प्राकरणिक इति शेषः । तुर्व्यतिरेके । अवाच्य एव व्यङ्ग्य एव । अपदार्थं एव । अभिहितपदार्थान्तरव्यापारकतया पदमात्रालभ्य एव । वाक्यार्थो वाक्येन प्रवृत्तिनिवृत्तियोग्यतयाऽर्थ्यमान उद्दिश्यमानः ।

नन्वन्विताभिधानवादे गामानयेत्यादिषु[३] गोमहिषतुरगादिविषयकनिखिलानयनादिक्रियाव्यक्तिनिष्ठानयनत्वादिसामान्येनान्वितमानयनं न बलवन्न च मोचनाद्यनेकक्रियाऽधिष्ठानसकलगवादिव्यक्तिप्रवृत्तिनिमित्तं गोत्वादिसामान्यं गवादिपदवाच्यम्, एवमानयनादिपदेनापि अनेककारकनिष्ठसामान्यान्वितमनेकविषयकानयनादिनिष्ठसामान्यं वाच्यमङ्गीकार्यम्, न च सामान्योरन्योऽन्यमन्वयः सम्भवति, व्यक्तिद्वारकान्वयस्तु व्यक्तीनामसामयिकतया नाधिधेयत्वेन निरस्त इति चेत्, किं पुनरतः ? प्रभाकरीयान्विताभिधानदौर्बल्यमिति चेत्, किमस्माकमनया परगृहचिन्तया ? यथा तथा प्राचीनतन्त्रपूर्ववृत्तिबोध्यो वाक्यार्थं इत्येतावानेव हि ध्वनितन्त्रसारः ।

यदि तु प्राभाकरैः सार्धं विजिगीषुकथाकण्डूदुर्द्धरो दाहः, तदा तानेव मृगयितुं राढादिराष्ट्रं[४] गच्छेति व्यङ्ग्य एव सर्वो वाक्यानामर्थ इति निर्विवादमदः ।

---

१. 'ग्रहणकरीत्यां इतिप्रायः ख० पाठः मतद्वयस्यैकत्रोपसंहरणपरैषा वचोभङ्गिः । यथा च हवने पूर्णाहुतिरूपे विधाने सर्वस्यैव युगपदावाहनं तथैवात्रापीति विमर्शनार्था रीतिः सम्भाव्यते । 'ग्रहणक!-रीत्या' इति पाठान्तरं चामुमुवार्थं सूचयति ।

२. 'पदार्थान्तरबाह्येन' (वाच्येन) इति ख० पाठः ।

३. 'अन्विताभिधाने' इति ख० पाठः ।

४. 'रागादि' इतिप्रायः कपुस्तकेऽसङ्गतः पाठः दक्षिणराढाप्रदेशस्थस्याधिगतप्राभाकरादिमीमांसकमतसर्वस्वस्याहङ्कारभूयिष्ठता स्वमतस्थापने साटोपनिर्बन्धो मदान्ध्यं चेतरत्राप्युल्लिखितं दृश्यते । तथा च चण्डीदासात् किञ्चिदपि प्राचीनतरस्य विविधशास्त्रनिपुणस्य श्रीकृष्णमिश्रस्य प्रबोधचन्द्रोदयेऽहङ्काराख्यस्य पात्रस्य वर्णने—

एवं च निमित्तस्य नियतनिमित्तत्वं यावन्न निश्चितं तावन्नैमित्तिकस्य

ये तु गुरुदर्शनैकदेशिनः पीनस्य दिवाभोजननिषेधे रात्रिभोजनापेक्षवच्छब्द-निमित्तकप्रतीतेर्यथा यथा दर्शनं तथा तथोपात्तेन शब्देन तदनुगुणशब्दान्तरं भट्टनयवत् ।

यद्वा वाक्यार्थबोधनानन्तरं वस्त्वन्तररूपः स एवार्थो व्यापारमन्तरेणाक्षिप्यत इत्याहुस्तान् प्रत्याह—यदपीति । तत्र वाक्ये चेति[1] भवत्पक्षानुसारेण शब्दस्य वाक्यार्थानन्तरबोध्यवस्त्वलङ्कृती प्रति द्विधाऽपि निमित्तत्वं नास्तीत्यर्थः । प्रकाशकत्वादिति । न खलु शब्दो घटादिकमर्थं दण्डादिवज्जनयति, किन्तु प्रदीपादिवत् प्रकाशयत्येव तं प्रज्ञातस्य[2] । कथमिति ? प्रत्यक्षेतरप्रमाणानां ज्ञानकरणत्वाभ्युपगमे ज्ञात एव शब्दोऽर्थप्रतिपत्तिसमर्थः । न च शब्दस्वरूपमात्रज्ञानमात्रादर्थप्रतिपत्तिः सम्भविनी, व्युत्पन्नाव्युत्पन्नयोरविशेषप्रसङ्गात् ।

तस्माद् व्यञ्जनाविद्वेषिणां गुरूणां मते मुख्यार्थे साक्षात्सम्बन्धस्य, परत्र तु मुख्यार्थसम्बन्धस्य परिज्ञान एवार्थसम्प्रत्ययो निर्वहति । न च प्रकृते तथा सम्भवतीति

"यथैष—ज्वलन्निवाभिमानेन ग्रसन्निव जगत्त्रयीम् ।
भर्त्सयन्निव वाग्जालैः प्रज्ञयोपहसन्निव ।।
तथा तर्कयामि नूनमयं दक्षिणराढाप्रदेशादागतो भविष्यतीति" ।

तस्य च वचनोपन्यासे "अहो मूर्खबहुलं जगत् । तथाहि--नैवाश्नाति गुरोर्मतम्' इत्यादौ विजिगीषुकथाकण्डूदुर्धरस्य दाहस्य संसूचनम्" (प्रबोधचन्द्रोदये द्वितीयाङ्के २-३ श्लोकौ) । तत्रान्त्ये श्लोके गुरुमतप्रतिष्ठापयितृमूर्धन्यस्य गौडमीमांसकचक्रधुरीणस्य शालिकानाथस्य गुरुमते निबन्धकर्तुः सिद्धान्तरहस्यकृतो महोदधेस्तौतातिकमततिलकादिग्रन्थप्रणेतुरुत्कलविषयेऽतिप्रथितस्य राढीयचूडामणेर्भट्टभवदेवस्य च स्मरणम् । शेषोक्तस्य विदुषो ग्रन्थे सादरं साटोपमतोज्जृम्भणं तत्र पुष्पिकायां दृष्टम् ।

"यो नाम कश्चिदिह संविदितं प्रमेयं ग्रन्थान्तरे लिखति वा वदति स्वयं वा ।
मत्कर्तृतामननुकीर्त्य स कीर्तिलोपान्निःसन्ततिर्जगति जन्मशतानि भूयात्" ।।

इति 'गौडराष्ट्रमहङ्कारोत्पत्तिस्थानम्' इति कस्यचित् प्रबोधचन्द्रोदयटीकाकर्तुश्चण्डीदासस्य चात्र मन्तव्यमुपरितनं द्रढयति । आलङ्कारिकनिबन्धे मीमांसकमतनिष्कर्षानुशीलनं नैकान्तोपयोगि तात्कालिकजिज्ञासूनां रहस्यमेतन्न दुरासदमिति चात्र मन्तव्ये औदासीन्यप्रकटने बीजम् । चण्डीदासोऽपि प्रबोधचन्द्रोदये टीकां चकारेति चात्रोपोद्घाते द्रष्टव्यम् ।

१. वेति क० पाठः ।
२. 'तं अज्ञातस्य' इति क० पाठः ।

प्रतीतिरेव कथम् ? इति 'नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते' इत्यविचारिताभिधानम् ।

ये त्वभिदधति–'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधा व्यापारः' इति, 'यत्परः शब्दः स शब्दार्थः' इति च विधिरेवात्र वाच्य इति; तेऽप्यतात्पर्यज्ञास्तात्पर्यवाचोयुक्तेर्देवानांप्रियाः

पूर्वस्य भावात्, द्वितीयस्यासंवेदनात्[१] । संवेदनं तु न सम्भवति उभयसंवित्तिसाध्यत्वाद्, व्यङ्ग्यसंवेदनोपायविरहाच्च । तदिदमाह ज्ञातत्वञ्चेति । सम्बन्धितयेति शेषः । संकेतेनैवेति-साक्षान्मुख्यार्थबाधादिरूपेणेत्यर्थः । स च संकेतः, अन्वितमात्रे पूर्वोक्तदिशा । एवञ्च सम्बन्धप्रत्ययाभावाद् निमित्तस्य शब्दस्य नियतनिमित्तत्वं नियामकसम्बन्धशालित्वम्, न निश्चितं न प्रमितम् । नैमित्तिकस्य विवादविषयस्य । कथमित्यनन्तरमुपसंहारस्यादौ । तस्मादिति शेषः ।

अयमभिसन्धिः––धर्मिकल्पनाद् वरं धर्मकल्पनमिति नीत्या शब्दान्तरस्याश्रूयमाणस्याभावेन श्रूयमाणस्य चाकिञ्चित्करतया व्यापारकमन्तरेण शब्दार्थप्रत्ययाभ्युपगमेऽतिप्रसङ्गभीत्या च तस्यैव शब्दस्याभिधानलक्षणातिरिक्तो व्यापारः कल्प्यते । वाक्यार्थपाश्चात्त्यप्रतीत्योर्वस्त्वलङ्कृत्योर्वाक्यार्थत्वे तूक्त एव न्यायः । तस्य सम्बन्धग्रहणापुरस्कारेणाप्यर्थप्रतीतिजननं धर्मिग्राहकप्रामाण्यगम्यमेव । अर्थापत्तिपक्षस्तु वस्त्वलङ्कृत्योर्वाक्यार्थस्य स्वातन्त्र्यविश्रामाभावविरहेण वाक्यार्थोक्तिप्रतीतेरेवापर्यवसानेन निरस्त इति नात्रामर्षदुर्विलासः कार्यः ।

अथैकदेश्यन्तराणां युक्तिद्वयं परस्परोपकारकमुपन्यस्य दूषयति **येत्विति** । यथा खल्विषुर्धनुष्मता मुक्त एकेनैव वेगव्यापारेण वैरिणा कवचत्वगादिकं सर्वमेव निर्भिनत्ति, तथा शब्दोऽप्येकेनैवाभिधाव्यापारेण यावदुद्देश्यं प्रकाशयति । यत्परः यदुद्देश्येन प्रयुक्तः शब्दः स शब्दार्थः शब्देनावश्यबोध्यः, अन्यथा तत्प्रयोगवैयर्थ्यप्रसङ्गात्, शब्दस्यैवंविधस्थले विवादविषयवस्त्वलङ्कृतिप्रधानत्वस्य निर्विवादत्वात् । तन्मुखप्रेक्षिणा तेनान्तरविश्रामरहितेन[३] झटित्येव तात्पर्यप्रतीतिः क्रियत इति किमत्र व्यापारान्तरकल्पनया । विधिरेवेत्येवकारो व्यत्ययेन योज्यः । अत्र 'निःशेष'

---

१. 'सम्भवति यस्य' क० त्रुटितः पाठः ।

२. एते हि प्राभाकराः । तथा च लोचने प्राभाकरदर्शनेऽपि दीर्घदीर्घो व्यापारो निमित्तिनि वाक्यार्थे । भट्टनायक एषां प्रवरप्रतिनिधिरिति तु कैश्चिन्मन्यते ।

३. तेनार्थान्तरावहितेन––ख० पा० ।

तथा हि–'भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते' (शाबरभा० ३।४।४१) इति कारकपदार्थाः क्रियापदार्थेनान्वीयमानाः प्रधानक्रियानिर्वर्त्तकस्वक्रियाऽभिसम्बन्धात् साध्यायमानतां प्राप्नुवन्ति । ततश्चादग्धदहनन्यायेन यावदप्राप्तं तावद्विधीयते । यथा ऋत्विक्प्रचरणे प्रमाणान्तरात् सिद्धे "लोहितोष्णीषा ऋत्विजः प्रचरन्ति" इत्यत्र लोहितोष्णीषत्वमात्रं विधेयम्, हवनस्यान्यतः सिद्धेः । "दध्ना

इत्यादौ विधिर्वाच्य एवेत्यर्थः[१] । तत्तेन बुद्धिस्थप्रकारेण तात्पर्यवाचोयुक्तेस्तात्पर्यशब्दस्य[२] तात्पर्यज्ञानविषयवेदिनो देवानांप्रियाः पशवः ।

एतदेवोपपादयति–तथा हीति । अयमत्र तात्पर्यार्थः–किमेकया वृत्त्या युगपदेव तावत्पर्यन्तप्रतीतिः, क्रमेण वा ? नाद्यः, पदार्थस्मृतिवाक्यार्थप्रतीतिव्यङ्ग्यप्रतीतीनां हेतुफलभावाङ्गीकारात्, एकवेदनपक्षे च तदभावात् । एककालवेदनं न त्वेकवेदनमिति चेत् ? न, वेदनानामेकाधिकरणानामेककालीनत्वाभावात्, भावेऽपि पूर्वापरकालीनत्वलक्षणहेतुफलताविरोधात् । द्वितीये तु विरम्यापि पुनरुज्जीवति शक्तिरविरतैव वा क्रमशो विज्ञानमुत्पादयति ? आद्ये सिद्धान्तव्याकोपः । न द्वितीयः, ज्ञानजननस्यैव विरामार्थत्वात् । अन्यथाऽभिधयैवाविरतया संसर्गयोग्योऽर्थं उपनेष्यत इति परिहारलक्षणाङ्गीकृतिव्यसनम् । तदिदं कुरुभक्तभोजिनः पाण्डवकार्यकरणं यदयं भवद्भिः प्रयत्नपरिपालितोऽपि विरम्य व्यापारनिषेधोऽस्मदीयपक्षमुज्जीवयतीति । भवतु तर्हि तात्पर्यं नाम द्वितीयं लक्षणाऽपरपर्यायं भट्टादितन्त्रप्रसिद्धमेव शक्त्यन्तरम्, न त्वदृष्टाश्रुतं व्यञ्जनमिति चेत् ? न तस्यापि तावत्पर्यन्तप्रसारविरहात् ।

तदिदमाह–**भूतेत्यादि** । भूतानि कारकाणि सिद्धरूपाणि भवत् क्रियारूपं साध्यं तेषां समुच्चारणे समभिव्याहारेण तद्वाचकपदानामुच्चारणे भव्यतया समुदितकारकात्मकसाध्यपरतया[३] अन्वीमानाः स्वसन्निवेशेन विस्पष्टाकारतामुपनयन्तः ।

१. न केवलं तस्याधमस्यान्तिकं गताऽसि, अपि तु रन्तुमेव गताऽसीति विधिस्तात्पर्यबलादायातीति तेषामाशयः । स च न सम्यक् । यथा दध्ना जुहोतीत्यादौ दध्नः करणत्वमात्रं न तु दधिहोम एवाव्यभिचारी विधिरिति, एवमत्र रमणं न तात्पर्यत आयाति । यथा पशुना यजेतेत्यादावुपादेयगतसंख्याया विवक्षिततदितरत्वविचारे मीमांसकैश्चेष्टितं तद्वदिहापि । वाक्यपदीये वैयाकरणमतोट्टङ्कने जातिसमुद्देशप्रकरणे (३.५२-५७) भगवता भर्तृहरिणाऽप्येवमेव निरधारि ।

२. तात्पर्यशब्दप्रयोगस्य—ख० ।

३. शबरभाष्यीयग्रन्थोऽयं "कृतत्वात्तु कर्मणः सकृत् स्याद् द्रव्यस्य गुणभूतत्वात्" इति मीमांसासूत्रप्रपञ्चनार्थः । मीमांसकनये क्रियैदंपर्याद् वाक्यस्य क्रियाप्राधान्यम् । यदाहुः–

"साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् ।
क्रियाप्रधानं गुणवदेकार्थं वाक्यमिष्यते"।। इति ।

जुहोति'' इत्यादौ दध्यादेः करणत्वमात्रं विधेयम् । क्वचिदुभयविधिः । क्वचित्त्रिविधिरपि । यथा 'रक्तं पटं वय' इत्यादौ एकविधिर्द्विविधिस्त्रिविधिर्वा, ततश्च 'यदेव विधेयं तत्रैव तात्पर्यम्' इत्युपात्तस्यैव शब्दस्यार्थे तात्पर्यं न तु प्रतीतमात्रे । एवं हि 'पूर्वो धावति' इत्यादावपराद्यर्थेऽपि क्वचित्तात्पर्यं स्यात् ।

यत्तु 'विषं भक्षय मा चास्य गृहे भुङ्क्थाः' इत्यत्र 'एतद्गृहे न भोक्तव्यम्' इत्यत्र तात्पर्यमिति स एव वाक्यार्थ इत्युच्यते, तत्र चकार एकवाक्यतासूचनार्थः ।

स्वक्रियेति । 'सव्यापारं कारकम्' इति रीत्याऽर्थक्रियाद्वारा प्रधानक्रियायामभिसम्बन्धात् । साध्यायमानतामिति । यद्यपि कारकस्वरूपं पूर्वसिद्धमेव, तथापि क्रियावत एव कारकत्वात् क्रियायाश्चाभूतवाभावित्वात् तान्यपि तदाकाराणि न पूर्वसिद्धानीति भावः ।

तथा हि--'गामानय' इत्यादौ गोविषयकमानयनं यथा पूर्वसिद्धम्, तथानयनविशिष्टापि गौरिति द्वयोरप्यपूर्वत्वं विशिष्टाकारस्य घटितोभयशरीरत्वात् । किमतो यद्येवमित्याह--ततश्चेति । सत्यपि पूर्वपदार्थानां विध्यर्थत्वे योऽर्थः प्रमाणान्तरेणाप्रसिद्धः स एव विधीयते प्राधान्येनोपदिश्यते, अन्यत्र तु दग्धे दहनवदुपदेशस्य वैयर्थ्यात् । तदुक्तम्--''अप्राप्ये हि शास्त्रमर्थवत्'' ।

एतदेव प्रपञ्चयति--यथेति । एकविधिरित्यादावेकद्विसर्वाप्राप्तिदशायाम् । एवं पूर्वपक्षिणः पक्षस्थलीकृत्य परिहारमाह--ततश्चेति । तात्पर्यं वाक्यस्यार्थसमर्पणम्, शेषाणां पदार्थानां तदवच्छेदकमात्रत्वात् ।

तथा हि--'दध्ना जुहोति' इत्यादौ दधिकरणस्य होमस्य यद्यपि विधेयता, तथापि सूक्ष्मदृशाऽङ्गानां प्राधान्याप्राधान्यचिन्तने[1] शब्दशक्त्या विशेषरूपस्य होमस्य प्राधान्येऽपि तस्यान्यतः प्रतीतेर्व्यपदेशवैयर्थ्येन करणभूतस्य दध्न एवावगत्याऽप्राधान्यम्, ततश्च तादृश एवार्थे भगवती तात्पर्यशक्तिर्विश्रान्तिमर्हति, न पुनरनुपात्तवाचकपदे वाक्यार्थप्रत्ययानन्तरं यतः कुतश्चित् प्रतीयमानेऽर्थान्तर इति भवद्भिरुपगन्तुं युक्तम्, तथा सत्यतिप्रसङ्गादित्याह--एवं हीति । अपराद्यर्थेऽपि पूर्वाद्यर्थविधिभावेनाक्षिप्ते--क्वचिदिति । भवताऽपि तात्पर्यविषयतयाऽनङ्गीकृते प्रधानभूते वाक्यार्थे । तात्पर्यवृत्तिश्च प्रकृतमात्रापेक्षया यथाकथञ्चित् । वस्तुतस्तु पूर्वोक्तमेवानुसन्धेयम् ।

नन्वपराद्यर्थसाधारणयोर्वस्त्वलङ्कृत्योर्मा भूत्तात्पर्यम्, प्रधानभूतायास्तु कुतो न स्यादिति चेत् ? सत्यम्, अनुपात्तवाचकत्वात्तयोर्वाचकानुपादानेऽपि

---

१. प्राधान्याप्राधान्यविचार--ख० पाठः ।

न चाख्यातवाक्ययोर्द्वयोरङ्गाङ्गिभाव इति विषभक्षणवाक्यस्य सुहृद्वाक्यत्वेनाङ्गता कल्पनीयेति 'विषभक्षणादपि दुष्टमेतद्गृहे भोजनमिति सर्वथा माऽस्य गृहे भुङ्क्थाः' इति उपात्तशब्दार्थे एव तात्पर्यम् ।

तयोः प्राधान्यं निर्विवादमेवेति प्रसरत्येव तत्र तात्पर्यमिति चेत् ? किमिदं तात्पर्यं नाम ? वाक्यप्रयोगतादर्थ्यं वा, तात्पर्याख्यशब्दव्यापारविषयत्वं वा ? आद्ये नीरसदशायां न विवादः, रसवति तु रसस्यैव प्राधान्यात्तदपि विचारकुक्षि-निक्षिप्तम् । तिष्ठतु रसस्थलम् । नीरसे भवेत्तयोः प्राधान्यादेवमस्तु द्वितीय इति चेत् ? न, विकल्पासहत्वात् ।

तथा हि--भट्टादिप्रसिद्धद्वितीयलक्षणातात्पर्यवृत्यन्तरमेव वा तन्नामकम्? नाद्यः, तस्योपात्तपदार्थ संसर्गमात्रे संसृष्टाकारप्रधानपदार्थे वा परिक्षीणत्वात् । न द्वितीयः, नाममात्रेणैव विसंवादात् ।

ननु यद्यनुपात्तपदेऽर्थे तात्पर्यं न व्याप्रियते किं तर्ह्युपात्तपद एव । तदा 'विषं भुङ्क्ष्व' इत्यादौ विषभक्षण एव तात्पर्यं स्यादित्याह---**यस्त्विति** । स एव वाक्यार्थो वाक्योद्देश्य इति तत्र तात्पर्यं शब्दस्य तत्प्रवणत्वमि-त्युच्यत इति योजना । चकार इति । 'विषं भुङ्क्ष्व' इत्येवं सकृदुच्चरितं हि नैतावन्मात्रेण निराकाङ्क्षमिति समनन्तरमुच्चरितेन 'मा च' इत्यादिनैक-वाक्यभूयं भजते । तच्च विशिष्टाकारैकार्थबोधकत्वेनैव ।

यदाह भगवान् जैमिनिः --"अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" इति[१] (७।०) । एकार्थप्रतिपादकता चावान्तरवाक्ययोर्द्वयोरपि प्राधान्येन निर्वहतीति यत्तद्वाक्यवदङ्गाङ्गिभावः कल्पनीयः । तत्रापि च 'मा च' इत्याद्यर्थस्याप्राकरणिक-तया विधेयभावात् प्राधान्येनाङ्गित्वम्, इतरस्य तु विपर्ययादनूद्यत्वेनाङ्गत्वं सुहृद्वाक्य त्वेनानूद्यवाक्यत्वेन । अङ्गाङ्गिभावः परस्परापेक्षया प्रकर्षनिकर्षनियत एव । प्रकर्ष-निकर्षौ च प्रकृते विधिनिषेधवशान्निन्दाविषयावेव । ततश्चैतल्लभ्यत इत्याह-- **विष-भक्षणादिति** । दुष्टं निन्दितम्, दुष्टमेतद्गृहे भोजनमितीत्यनन्तरं व्यङ्ग्यमिति शेषः ।

तत्रापि पार्यन्तिकीं कक्षामाह - **सर्वथेति** । सर्वावस्थास्वपीत्यर्थः । **भुङ्क्था** इत्यनन्तरमित्यपि व्यङ्ग्यमिति शेषः । इत्यनेन नयेनोपात्तानामेव शब्दानामर्थे

---

१. पूर्वमीमांसासूत्रानुयायित्वमैक्यम् 'एकतिङ्' इत्यादिमहाभाष्यवार्तिकलक्षणानुसारेण साधनीयम्, तत्र "एकशब्दः समानवचनो न तु संख्यावाची" इति कैयटमन्तव्यं सहायकम् । अत एवाभियुक्ताः--"न द्रूये नः पूर्वं नृपतिमनरण्यं यदब्रवीद्" (६।५८) इत्याद्यनर्घराघवीयपद्यांशे आपातपो द्विवाक्यत्वेऽपि साकाङ्क्षत्वेनैकवाक्यतया 'न' इति वाक्यादौ प्रयोगो न दुष्ट इत्याहुः ।

यदि च शब्दश्रुतेरनन्तरं यावानर्थो लभ्यते तावति शब्दस्याभिधैव व्यापारः, ततः कथं 'ब्राह्मण पुत्रस्ते जातः ब्राह्मण कन्या ते गर्भिणी' इत्यादौ हर्ष-शोकादीनामपि न वाच्यत्वम् ? कस्माच्च लक्षणा ? लक्षणीयेऽप्यर्थे दीर्घदीर्घतरा-भिधव्यापारेणैव प्रतीतिसिद्धेः । किमिति च श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पूर्वंपूर्वबलीयस्त्वम् इत्यन्विताभिधानवादेऽपि विधेरपि सिद्धं व्यङ्ग्यत्वम् ।

संसर्गमात्रे संसृष्टाकारे वा समवभानमात्रै तात्पर्यं द्वितीयलक्षणाख्यं पर्यवस्यति विवादविषये त्वर्थे तात्पर्यविषयत्वाभिधानं व्यञ्जनाया एव नामान्तराभिप्रायेणेति भावः । सरलयोजना तु 'तद् भुङ्क्ष्व'इत्युपात्तपदस्य भक्षणादपीत्ययं न साक्षादर्थ इति निरस्ता[१] ।

एवमियता प्रबन्धेन 'यत्परः' इत्यादि पश्चादुक्तमपि दृढप्रायतया पूर्वं परि-हृत्य 'सोऽयम् इत्यादि परिहृतप्रायमपि प्रकारान्तरेण परिहरति-- यदि चेति । अनन्तरमिति पश्चान्मात्रे न पुनरव्यवहितोत्तरकाले । हर्षेति । तेऽपि हि वाक्यार्थ-प्रतीतिजनिताः सामग्र्या अवगम्यन्ते ।

ननु भवत्पक्षेऽपि तादृशहर्षादिप्रतीतेः शाब्दत्वं कुतो नाङ्गीक्रियते ? हर्षाद्युत्प-त्तिविघ्नितप्रसरः शब्दव्यापारसन्तानो न पुनरुज्जीवतीति चेत् ? तर्हि मत्पक्षेऽप्ययं न्यायो न दण्डबाधित इत्याशङ्क्यास्तामन्वाचयमात्रमेतदिति बुद्ध्या परिहारान्तर-माह—**कस्माच्चेति** । पृथगुच्यत इति शेषः । यदि[२] नाऽभिधायास्तात्पर्यस्य वा लिङ्गेन शब्दार्थप्रत्यायनसामर्थ्यं तदाश्रुत्यादिप्रमाणद्वारेण[३] विनियोगनियमः, तेषाञ्च समवाये पारदौर्बल्यम्, पूर्वपूर्वपिक्षयोत्तरोत्तरेषामर्थविप्रकर्षादिति प्रक्रिया-कल्पनं निरर्थकमेव, तत एव विनियोगनियमासिद्धेः सर्वत्राविशेषादित्याह—**किमि-तीति** । यद्वा लिङ्गादिभिः पर्यन्ते श्रुतेरेव कल्पनेति तस्या एव मुख्यत्वात् समवाये बलीयस्त्वमिति नये कल्पनीयायाः श्रुतेरपदार्थत्वेन व्यङ्ग्यत्वमेव युक्तम् । तच्च व्यञ्जनाऽनङ्गीकारेण निर्वहतीत्याह—**किमितीति** । अस्मिन् पक्षे कुतो हेतो-रित्यर्थः ।

"श्रुतिर्द्वितीया क्षमताऽथ लिङ्गं वाक्यं पदान्येव तु संहतानि ।
सा प्रकिया या करणस्य काङ्क्षा स्थानं क्रमो योगबलं समाख्या ।"

---

१. साक्षादर्थे इति । साक्षादित्यव्यवहितार्थसूचनेनाभिधागम्योऽर्थ इत्यभिप्रायः । सरला योजना निरस्तेत्यन्वयः ।

२. यदि चाभिधाया—क० ।

३. 'प्रमाणाङ्गान विनियोग' इत्यस्फुटः पाठः खपुस्तके, प्रमाणाङ्गानामिति स्यात् ।

किञ्च 'कुरु रुचिम्' इति पदयोर्वैपरीत्ये काव्यान्तर्वर्तिनि[१] कथं दुष्टत्वम् ? नह्यत्रासभ्योऽर्थः पदार्थान्तरैरन्वित [२]इत्यभिधेय एवेति एवमाद्यमपरित्याज्यं स्यात्। यदि च वाच्यवाचकत्वव्यतिरेकेण व्यङ्ग्यव्यञ्जकभावो नाभ्युपेयते, तदाऽसाधुत्वादीनां नित्यदोषत्वं कष्टत्वादीनामनित्यदोषत्वमिति विभागकरणमनुपपन्नं स्यात्।

इतिश्रुत्यादिनिरुक्तिः। तत्र श्रुत्यादीनां विनियोगनियामकता यथा दर्शपौर्णमासयोः 'व्रीहीनवहन्ति' इत्यादौ व्रीहीनामवघाते विनियोगो द्वितीयाप्रतिपन्न इति श्रौतः[३]। बर्हिर्देवसदनं "दामि" इत्यत्र दामि' इति पदार्थसामर्थ्येन लवनलिङ्गेन बर्हिश्च्छेदेऽयं मन्त्रोऽवगम्यते। 'श्वेतच्छागमालभेत' इत्यादावेकवाक्योपात्ततया श्वेतस्य छागावच्छेदकता। 'समिधं यजति' 'तनूनपातं यजति' इत्यादीनां दर्शपौर्णमासप्रकरणपठितानां प्रकरणाकाङ्क्षया प्रकरणात्तत्रैव विनियोगः। याज्याऽनुवाक्यायुगले 'इन्द्राग्नी रोचना दिवः' इत्यादौ यथासंख्यं क्रमेणाङ्गता। हौत्रमौद्गात्रमाध्वर्यवमित्यादौ समाख्यया विनियोग इति, समवाये पारदौर्बल्यम्। यथा "ऐन्द्रचा गार्हपत्यमुपतिष्ठत' इति ऐन्द्रचा ऋच इन्द्रार्थप्रकर्षसामर्थ्यलक्षणाल्लिङ्गादिन्द्रोपस्थानप्राप्तिर्गार्हपत्यमिति द्वितीयाश्रुत्या बाध्यते। एवमितरत्रापि। पूर्वपूर्वबलवत्तया श्रुतेः सर्वबाधकत्वम्। यदुक्तमत्रभवद्भिः[४]—

"बाधिकैव श्रुतिर्नित्या समाख्या बाध्यते सदा।
मध्यमानाञ्च बाध्यत्वं बाधकत्वं त्वपेक्षया॥" इति।

उपसंहरति इतीति। न केवलमभिहितान्वयेऽन्विताभिधानवादेऽपि प्राचीनानामिदानीन्तनानाञ्च मते। 'निःशेष' इत्यादौ विधेरपि न केवलं सर्ववाक्यार्थस्यालङ्कृतिध्वनिस्थले चालङ्कृतेरित्यर्थः।

किञ्चेत्यादिना व्यञ्जनस्य तत्रावश्याङ्गीकार्यत्वादासान्तुष्टिकत्वाशङ्कां परिहरति। अन्तरं मध्यं विशेषो वा। पदार्थान्तरैरन्वित इति। न च कस्यचित् पदस्यार्थ इत्यपि द्रष्टव्यम्। इति हेतोः। अनभिधेय इति पाठे तु अन्वितः सन्नभिधेयो नहीति विशिष्टेन नञः सम्बन्धः। **एवमादीति**। काश्मीरभाषयाऽसभ्यताबोधकं रुचिं

---

१. 'काव्यान्तर्वर्तिनि' इति प्रचलितः पाठः।

२. अनभिधेय एवेति प्रायिकः पाठः।

३. द्वितीयान्तं पदं श्रुतिस्तृतीयान्तमपीति······तथा 'पशुना रुद्रं यजेत' इत्यत्र पशुनेति तृतीयाश्रुत्या रुद्रयागे पशोरङ्गभावः प्रतिपाद्यते। वाक्यपदीयग्रन्थोऽप्येतदनुकूलः। (वा० ४३।५१–५)

४. अत्रभवद्भिः कुमारिलभट्टपादैः।

न चानुपपन्नं सर्वस्यैव विभक्ततया प्रतिभासात्। वाच्यवाचकभावव्यतिरेकेण व्यङ्ग्यव्यञ्जकताश्रयणे तु व्यङ्ग्यस्य बहुविधत्वात् क्वचिदेव कस्यचिदेवौचित्येनोपपद्यत एव विभागव्यवस्था।

"द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः" इत्यादौ पिनाक्यादिपदवैलक्षण्येन किमिति कपाल्यादिपदानां वाच्यानुगुणत्वम् ?

कुर्वित्यादि। [१]उत्कलभाषया तु [२] तवाण्डमर्वित्यादि । अपरित्याज्यं स्यात् व्यञ्जनानङ्गीकृतौ तु तत्प्रतीतेरसम्भवात्। अनित्यदोषत्वं रौद्रादावदुष्टत्वात्।

अत्र खण्ड पिण्डतानामिष्टापत्तिशङ्कां परिहरति—न चेति। सर्वस्यैव गुणदोषत्वावेदिनः। विभक्ततयास्त्रादव्याघातार्हत्वस्यासाधुतादौ सार्वत्रिकत्वेन कष्टत्वादौ च कदाचित्कत्वेन। त्वत्पक्षेऽपि नार्हति तर्हि विभाग इत्याह वाच्येत्यादि। व्यङ्ग्यस्य रसादेः। क्वचिदेवेत्येबकारः प्रतिनियतरौद्रादिप्रकाशकः। कस्यचित् कष्टत्वादेरेव। तेन कष्टत्वादे रौद्रादावेव रौद्रादौ कष्टत्वाद्येवेति नियमद्वयम्। औचित्येनानुकूल्यात्तद्विपरीतस्य मृदुत्वादेरनानुकूल्याच्चेति भावः। उपपद्यत एवेति। असाधुत्वादीनां दूषकतायाः सर्वत्रैवानुभवसाक्षिकत्वेन तद्वैलक्षण्यादित्यर्थः।

अनित्यदोषाणां क्वचिदानुगुण्यं लक्ष्यदर्शनेन द्रढयति—द्वयमिति। अन्यथेति[३] प्रथमं (म?) शेषः। वाच्यानुगुणत्वं वाच्यस्य [४]पठनीयस्यौचित्यप्रकाशकत्वम्। काव्यानुगुणत्वमिति पाठे काव्यबीजाद्युत्कर्षकत्वमित्यर्थः। अत्र हि पिनाक्यादिपदानां कपाल्यादिपदानाञ्च तुल्येऽपि भगवद्वाचकत्वे कपालसम्बन्धप्रवृत्तनिमित्तिकेन कपालिपदेन सकलामङ्गलनिदानत्वनिन्दिताचारत्वदर्शनस्पर्शनसम्भाषणाद्यनर्हत्वादिकं व्यज्यमानं तत्सङ्गमार्थिनां शोच्यताऽतिरेकप्रकटनेन तन्निन्दोत्कर्षे विश्राम्यति। न चैतद्रत्यादिजीवातुनि काव्य उपादेयं तदास्वादव्याघातकत्वादित्यनित्यदोषत्वमसाध्वर्थस्य। स चात्र नाभिधयोपनीत इति व्यञ्जनाभावेन तत्प्रतीतेरेव न स्यादिति-कपाल्यादिपदं सर्वत्रैव वर्जनीयं स्यादित्यर्थः।

---

१. एवं क० पाठः। 'तवा ते मर्वित्यादि' ख० पाठः। उभावपि पाठावसंलग्नप्रायौ। 'त्रलण्डामरचेष्टितः' इत्यश्लीलदोषोदाहरणे दर्पणग्रन्थः।

२. भवाण्डमर्वित्यादि।

३. द्वयोरपि पुस्तकयोरीदृशः पाठोऽत्र उपलभ्यते। पुनः स च नात्रसमञ्जसः। अन्यथेति मूले इतः पश्चाद् वाक्यान्तरे, स एव मूलभूतमातृकायां यथास्थानं न दृष्ट इति पृष्ठोपरि परिदर्शित आसीदिति सम्भाव्यते। अर्वाचीनैर्लेखकैरनवधानतयाऽत्रैव गर्भितः। प्रथमशेष इत्येकरूपाद् भिन्नोऽनेकरूपः। अन्याय्यमनेकार्थत्वं शब्दस्येति न्यायादिनयानुमोदितादर्थाच्छेष इतर इति कृत्वा।

४. शोचनीयस्येति—क०पाठः।

अपि च वाच्योऽर्थः सर्वान् प्रतिपत्तॄन् प्रति एकरूप एवेति । नियतोऽसौ । नहि 'गतोऽस्तमर्कः' इत्यादौ वाच्योऽर्थः क्वचिदन्यथा भवति ।

प्रतीयमानस्तु तत्तत्प्रकरणवक्तृप्रतिपत्त्रादिविशेषसहायतया नानात्वं भजते । तथा च 'गतोऽस्तमर्कः' इत्यतः सपत्नं प्रत्यवस्कन्दनावसर इति, अभिसरणमुपक्रम्यतामिति, दूरं मा गा इति, सुरभयो गृहं प्रवेश्यन्तामिति, सन्तापोऽधुना न भवतीति, विक्रेयवस्तूनि संह्रियन्तामिति, नागतोऽद्यापि प्रेयानित्यादिरनवधिर्व्यङ्ग्योऽर्थस्तत्र तत्र प्रतिभाति ।

वाच्यव्यङ्ग्ययोः निःशेषेत्यादौ निषेधविध्यात्मना,

मात्सर्यमुत्सार्य विचार्यकार्यमार्याः समर्यादमुदाहरन्तु ।
सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम् ।।

इत्यादौ संशये शान्तशृङ्गार्यन्यतरगतनिश्चयरूपेण,

कथमवनिप दर्पो यन्निशातासिधारा-
दलनगलितमूर्ध्ना विद्विषां स्वीकृता श्रीः ।
ननु तव निहतारेरप्यसौ किं न नीता
त्रिदिवमपगताङ्गैर्वल्लभा कीर्तिरेभिः ।।

इत्यादौ निन्दास्तुतिवपुषा स्वरूपस्य,

पूर्वपश्चाद्भावेन प्रतीतेः कालस्य, शब्दाश्रयत्वेन शब्दतदेकदेशतदर्थवर्णसंघटनाश्रयत्वेन चाश्रयस्य, शब्दानुशासनज्ञानेन प्रकरणादिसहायप्रतिभानैर्मल्य-

---

किञ्चैकत्र वाक्ये एकैवाभिधा शक्तिर्व्याप्रियत इति भवद्भिरपि स्वीक्रियते, प्रतिपाद्यप्रतिपादकादिभेदेऽपि वाच्यस्याभेददर्शनात् ।

व्यञ्जना तु सहकारिचक्रसाचिव्येनैकस्मिन्नपि वाक्ये क्वचन काव्ये क्वचनैव व्याप्रियते, प्रतीतेर्विषयनियमदर्शनादित्यभिधातो व्यक्तेर्वैलक्षण्यमित्याह–अपिचेति । वाच्योऽर्थः समभिव्याहृतपदबोध्यः । नियतः पुरुषादिभेदेऽप्यविसंवादिस्वरूपः । अवस्कन्दनं प्रसभावमर्दनम् सुरभयो गावः । इत्यादिरनवधिरनन्तः । अनवधिव्यङ्ग्य इति पाठे कर्मधारयः तत्र तत्र प्रस्तावे ।

सम्प्रति विषयवैलक्षण्यं वृत्तिवैलक्षण्यनिश्चयकं प्रपञ्चयति--वाच्येति । वाच्यो वाच्यार्थः । व्यङ्ग्यो विवादविषयः । संशये प्रकरणादिनियमाभावदशायाम् । स्वारसिके व्यङ्ग्यसम्भेदरहिते तत्सद्भावे त्वाहार्ये वाच्येन किम्बर्थेनोद्भाव्ये सति शान्तशृङ्गारिणोरन्यतरत्वप्रतिपादके तदगतेन निश्चयरूपेण व्यङ्ग्येनासम्भेदे सति । वपुषा स्वरूपेण । स्वरूपस्येति षष्ठी त्रिष्वेपि तृतीयान्तेष्वन्वयः । पूर्वपश्चाद्भावेन

सहितेन तेन चावगम इति निमित्तस्य, बोद्धृमात्रविदग्धव्यपदेशयोः प्रतीतिमात्रचमत्कृत्योश्च करणात् कार्यस्य, गतोऽस्तमर्क इत्यादौ प्रदर्शितनयेन संख्यायाः,

कस्य व ण होइ रोसो दट्ठूण पिआइ सव्वणं अहरं ।
सभमरपडमग्घाइणि वारिअवामे सहसु एण्हिं ॥
(कस्य न भवति रोषो पश्यतः प्रियायाः सव्रणमधरम् ।
सभ्रमरपुष्पाघ्रायिणि वारितवामे सहस्वेदानीम् ॥ इति छाया ।)

इत्यादौ सखीतत्कान्तादिगतत्वेन, विषयस्य च भेदेऽपि यद्येकत्वं तत् क्वचिदपि नीलपीतादौ भेदो[१] न स्यात् ।

हेतुफलरूपत्वात् । शब्दैकदेशादीनां तु प्रागेवाभिहितं व्यङ्ग्याश्रयत्वम् । शब्दानुशासनं व्याकरणम्, उपलक्षणमेतदर्थानुशासनं मीमांसाद्यपि ज्ञेयम् । शब्दाद्यनुशासनेति पाठः स्फुट एव । एतन्मात्रेण वाच्यस्य प्रकरणादिसहायत्वात् प्रतिभायाः काव्यरहस्यवेदनानुगुणस्य कस्यचिदान्तरातिशयस्य[२] नैर्मल्यं प्रतिबन्धकतिरस्कारस्तत्सहितेन व्यङ्ग्यस्यावगमः ।

यद्यपि वाच्यप्रतीतावपि प्रकरणादिकं सहायमिच्छन्ति[३], तथापि तत्र तस्य प्रतिभानैर्मल्याङ्गताविरहो विशेषः । वाच्यप्रतीयमानं बोद्धृव्यपदेशमेवोपाधितया करोति । व्यङ्ग्यस्तु सहृदयापरपर्यायविदग्धव्यपदेश्यसाधारण्येन प्रतीतिर्वाच्यस्य व्यङ्ग्येन सञ्चार्यादिनाऽलौकिकविभावादिसंयोगभावनोल्लसितानन्दतया करोति चमत्कृतिलक्षणबुद्धिविशेषजननम् । गतोऽस्तमिति । विषयभेदापेक्षया न पुनरुक्तिः[४] ।

पडमं पद्मम् । तत्कान्तेति । सा कान्ता यस्येति विग्रहे पतिवाचकं बोद्धव्यम्, न तु तत्पुरुषेणाविनयवत्याः पत्युरकान्तत्वात् । अत्र वाच्यं सखीविषयं भ्रमरेण दन्त-

---

१. अत्र हि पदवाक्यविदितराणां प्रमाणविदां न काचिद् विमतिरुचित इत्याशयः । "नहि बाधारहितं नीलं नीलमिति ब्रुवन्नपरेण प्रतिषिध्यते, नैतन्नीलं पीतमेतत्" इति ध्वन्यालोकवृत्तिस्तुलनीया ।

२. तच्च

"सरस्वती स्वादुतदर्थवस्तुनिःस्यन्दमाना महतां कवीनाम् ।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ॥"

इति ध्वन्यालोकग्रन्थमनुसृत्योच्यते । एतत्तु टीकाकृत् 'व्यङ्ग्यस्तु सहृदयापर' इत्यादिना करोतीत्यन्तेन स्फुटयति । एतदेवाभिप्रेत्याह मुनिः--

"कवेरन्तर्गतं भावं भावयन् भाव उच्यते" इति भावलक्षणेन ।

३. प्रकरणादीति सहायत्वं गच्छन्तीति क० पाठः ।

४. वाक्यमेतत् प्राक्तनस्यैव मूलस्स्थवाक्यस्य विवरणतया पठितञ्चेत् सुसमञ्जसं स्यात्, परन्तूभयोरेव मातृकालिप्योरत्रैव धृतम् ।

उक्तं हि—"अयमेव हि भेदो भेदहेतुर्वा यद् विरुद्धधर्माध्यासः कारण-भेदश्च" इति।

वाचकानामर्थापेक्षा व्यञ्जकानां तु न तदपेक्षत्वमिति न वाचकत्वमेव व्यञ्जकत्वम्।

वेधेन[१] न पुनः नरकामुकेणेति कान्तविषयम्। आदिना कथञ्चिदेवोपायेन मयाऽद्य व्यक्ततरोऽपराधः संवृतः। अतः परं तु नैवंविधः प्रकटो दशनादिक्षतरूपस्तयोपभोगः कार्य इत्यादि चौरकामुकादिविषयं व्यङ्ग्यमुपगृह्यते। भेदेऽपीति - प्रतिषष्ठचन्तमन्वयः। एकत्वमेकवृत्तिबोध्यता। लक्षणान्तरजन्यभेदो वैजात्यम्। अयमेव हि भेदो यद् विरुद्धधर्माध्यासोऽयमेव च भेदहेतुरिति कारणभेद इत्यर्थः।

इह केचिदाहुः—प्रकरणादिलक्षणज्ञापकान्तरानुगमान्वयेऽखण्डः शब्द इति। अत्र[२] श्रीधरः—"ज्ञापकान्तरानुगमेऽपि न क्वचिच्छाब्दताहानिः। अन्यथा शब्दबोधितेऽर्थे सत्यासत्यत्वजिज्ञासायां सत्य एवायमाप्तोक्तत्वादित्यनुमानेन साधिते सत्यत्वे तस्याप्यर्थस्याशाब्दत्वप्रसङ्गात्" इति परिहारमाह। स च न समीचीनः। वाक्यार्थस्वरूपत्वे शब्दस्य व्यापारः, तस्य च सत्यत्वलक्षणे विषयान्तर एवानुमितिप्रवृत्तिरित्येकविषयताविरहात्।

यदि तु सम्बन्धेऽपि शब्दो व्याप्रियते तदाऽनुमानप्रवृत्तेर्व्यर्थत्वमेव। यद्येवं शब्दप्रामाण्यव्याकोप इति चेन्न, वस्तुगत्या परमार्थविषयतया प्रमाया जननात्। जनितायां तु तस्यां तत्कृतप्रमात्वसंशयदशायां तत्रैवानुमानोदयात्। अन्यथा चाक्षुषादिप्रतीतावपि सत्यासत्यत्वसंदेहे प्रत्यक्षप्रामाण्यं व्याकुप्येत[३]। तस्माद् प्रकरणादेः शब्देतिकर्तव्यतारूपद्वयस्याभिधाऽनवच्छेददशायामिवात्राभ्युपगमः। स्वाङ्गं न व्यवधायकमेवेति न्यायेनेति मुख्यः परिहारः।

पूर्वं शब्दाश्रयत्वेनेत्यादिना विषयभेदाङ्गत्वेनाश्रयभेद उक्तः। सम्प्रति तु

---

१. 'भ्रमरेण दन्तवेधेन' इति क० नास्ति।

२. श्रीधरस्त्वेवमाह—"न च प्रकरणादिलक्षणप्रमाणान्तरानुपगमेनात्मलाभादस्य शाब्दत्वहानिः स्यादिति बाच्यम्, प्रमाणान्तरोपनिपातस्य क्वचिच्छब्दव्यापारविषयत्वहानिंप्रत्यनिमित्तत्वात्। इतरथा वाचकप्रतिपादतेऽर्थे सत्योऽयं न वेति निश्चयार्थमाप्तोक्तत्वादिप्रमाणान्तरानुपगमेन सम्यक्त्वप्रतीतौ क्रियमाणायां तस्यापि बाच्यस्योक्तप्रमाणान्तरविषयत्वसद्भावाच्छाब्दत्वं न स्यात्" (का० प्र० वि० १६५ पृ०)।

३. यद् यद् विरुद्धधर्माध्यस्तं तत्तन्नानेति सौगतः समयः। अयमेव भेदो भेदहेतुर्वा भावानां योऽयं विरुद्धधर्माध्यासः" इति न्यायोऽयं पठितो रुचकेन व्यक्तिविवेकव्याख्याने। नात्राध्यासपदस्य वेदान्तिसम्मतोऽर्थ इति मन्तव्यम्।

किञ्च 'वाणीरकुड़ङ्ग'इत्यादौ प्रतीयमानमर्थमभिव्यज्य वाच्यं स्वरूप एव यत्र विश्राम्यति, तत्र गुणीभूतव्यङ्ग्येऽतात्पर्यभूतोऽप्यर्थः स्वशब्दानभिधेयः प्रतीतिपथमवतरन् कस्य व्यापारस्य विषयतामवलम्बतामिति ।

ननु 'रामोऽस्मि सर्वं सहे' इति, रामेण प्रियजीवितेन तु कृतं प्रम्णः प्रिये

साक्षादेवान्वयभेदाद् भेदमाह—**वाचकानामिति** । वाचकत्वोपाधिः शब्दानां ज्ञात एव व्याप्रियते नाज्ञाते । तज्ज्ञाश्चार्थज्ञान एव । न चैवं व्यञ्जकोपाधिः, तस्याज्ञातस्यैव स विषयस्तदर्शनात् । प्रत्युतानेनैव न्यायेन[1] तत्सद्भावबोधनादित्यर्थः ।

यद्वा वाचकानां वाक्यानामर्थबोधकतयाऽङ्गीक्रियमाणानां पदानामर्थापेक्षा पदार्थज्ञानापेक्षा । व्यञ्जकानां तु नटीकृतगीतकाकलीकोलाहलादीनां[2] रसादिव्यञ्जने पदार्थप्रतिसन्धानाभावान्न तथात्वम्[3] । अपिरत्र पक्षे क्वाचित्कत्वमाह । पूर्वत्र तूक्तवैधर्म्यान्तिरसमुच्चये तात्पर्यवादेन ध्वनिस्थलसमावेशेऽपि व्यञ्जनाऽङ्गीकार आवश्यक इत्याह—**किञ्चेति** । प्रतीयमानं प्राधान्याभावेनातात्पर्यविषयम् । **स्वरूप एवेति** । न त्वन्यत्रात्मानमुपनयतीत्यर्थः । तात्पर्यस्य व्यापारभूतो विषयतया प्राप्तो नेत्यतात्पर्यभूतः । कुत[5] इत्याह – गुणीभूतोऽप्रधानभूतः सन् व्यङ्ग्यतात्पर्यादिव गूढोऽभिधेयोऽभिधेयाबोध्य इति । अभिधैव तर्हि तत्रास्त्वित्याह--**स्वशब्देति** । अनुपात्तवाचक इत्यर्थः । तर्हि न प्रतीयतामेवेत्याह—**प्रतीतिति** । तावताऽनुभवदुरपह्नव[6] इति भावः । कस्य व्यापारस्य । व्यञ्जनामन्तरेणेति शेषः । एवंविधे च तात्पर्यस्योपात्तपदार्थनैयत्ये सिद्धे प्रतीयमानताऽन्वितपारम्पर्यमिति भावः ।

इयता प्रबन्धेन व्यञ्जनस्याभिधातात्पर्यव्यतिरेकं प्रसाध्य लक्षणाव्यतिरेकं

---

१. न्यायेन तत्' इत्यंशः ख० नास्ति ।

२. कोलाहलादीनामित्युभयोरेव मातृकालिप्योः पाठः । तस्य कथमपि काहलादीनामिति पाठे भरतभोजादिग्रन्थेषु बादित्राणां रागानुबन्धितया रसोपयोगित्वेनोद्दीपनविभावतयाऽर्थस्वीकारो न दुष्करः । तथा च 'वीणाभेरीमृङङ्गकाहलकलागीतञ्च' इत्यादि स्तोत्रादिषु पठ्यते ।

३. अत्रार्थे ध्वन्यालोकग्रन्थे शब्दार्थशासनेत्यादिकारिकोपरि–"यदि च वाच्यरूप एवासावर्थः स्यात्तद्वाच्यवाचकस्वरूपपरिज्ञानादेव तत्प्रतीतिः स्यात् । अथ च वाच्यवाचकलक्षणमात्रकृतश्रमाणां काव्यतत्त्वार्थभावनाविमुखानां स्वरश्रुत्यादिलक्षणमिवाप्रगीतानां गान्धर्बलक्षणविदामगोचर एवासावर्थः" इति वृत्तिरुदाहर्तव्या ।

४. धर्मान्तर–ख० पाठः ।

५. कुत इत्याह—क० नास्ति ।

६. अनुभावदुरपलवः—क० ।

नोचितम्' इति, 'रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम्' इत्यादौ लक्षणीयोऽप्यर्थो नानात्वं भजते, विशेषव्यपदेशहेतुश्च भवति, तदवगमश्च शब्दार्थायत्तः प्रकरणादिसव्यपेक्षश्चेति कोऽयं नूतनः प्रतीयमानो नाम ?

उच्यते—लक्षणीयस्यार्थस्य नानात्वेऽप्यनेकार्थशब्दाभिधेयवन्नियतत्वमेव।

प्रसाधयितुं पूर्वपक्षमाह—**नन्विति**। 'रामोऽस्मि' इत्यादौ राज्यभ्रंशवनवासक्लेशसहिष्णुतादयः,

"प्रत्याख्यानरुचेः कृतं समुचितं क्रूरेण ते रक्षसा
सोढं तच्च तथा त्वया कुलजनो धत्ते यथोच्चैः शिरः।
व्यर्थं सम्प्रति बिभ्रता धनुरिदं तद्व्यापदः साक्षिणा
रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम्॥

इत्यत्र साहसैकरसिकत्वरणशौण्डतादयः। 'रामोऽसौ' इत्यत्रालौकिकप्रभावत्वादयो रामपदेन लक्ष्यन्त एवेति भवद्भिरप्यङ्गीक्रियते। तस्य प्रकरणादिसाचिव्येन नानात्वं प्राधान्यादिना ध्वन्यादिव्यपदेशबीजत्वं मुख्यार्थसम्भेदादिनाऽर्थान्तरसंक्रमितवाच्यादिव्यपदेशहेतुत्वम्। यच्च व्यञ्जनागम्यस्यार्थस्योभयशक्तिमूलत्वमुक्तं तदपि तत्रास्त्वेव। लक्षणया बाधिताभिधानमुख्यार्थे सम्बन्धापेक्षत्वात् प्रकरणादि लक्षणोत्थापकमेव भविष्यतीति सर्वस्यैव व्यञ्जनानियामककलापस्यान्यथाऽप्युपपत्तेः कुतस्त्यस्तदुपगम इत्यर्थः।

अक्षरार्थस्तु शब्दार्थायत्त इति। अत्रार्थशब्दोऽभिधेयवचनः। कोऽयमिति सकामाक्षेपे[1]। अत्र हेतुः **नूतन इति**। प्राचीनतन्त्राप्रसिद्धत्वेनासाम्प्रदायिक इत्यर्थः। प्रतीयमान इति—योऽयं लक्षणिकातिरिक्तोऽभ्युपगम्यते। नाम प्रकाश्ये। अत्रोद्धारमाह—उच्यत इति।

अत्रायमुपस्कारः—किमभिधेयव्यतिरिक्तः सर्व एवार्थो लाक्षणिक इत्यनुमतमस्त्येव दीर्घायुषः, किं वा व्यक्तिर्नियमेन लक्षणासमानाश्रयेति तत्पदे सैवाभिषेच्या लाघवायेति ?

यद्वा 'रामोऽस्मि' इत्यादि तावल्लक्षणयैव गतार्थम्, ततस्तद्दृष्टान्तेनान्यत्रापि तथैव साधयिष्याम इति। अथवा साङ्केतितस्मृतिवन्नियतेतिकर्तव्यतानिरपेक्षतया साजात्यमेव व्यञ्जनालक्षणयोरिति। अन्यत्र वा यथा तथाऽस्तु, लक्षणास्थले तु तयैव[2] गतार्थत्वमिति तदनुगतनैगत्येन वाऽभिधास्यमानत्वस्य बुद्धिसंयोगादि

---

१. कोपोपहासोत्प्रासाक्षेपे—ख० पाठः।

२. निरपेक्षतया नाङ्गत्वमेव व्यञ्जनालक्षणीयस्येति। अन्यत्र यथा तथाऽस्तु लाक्षणिकस्थले तु तथैव बा—ख० परिपूरकः पाठः।

न खलु मुख्येनार्थेनानियतसम्बन्धो लक्षयितुं शक्यते। प्रतीयमानस्तु प्रकरणादिविशेषवशेन नियतसम्बन्धः, अनियतसम्बन्धः, सम्बन्धसम्बन्धश्च द्योत्यते। न च—

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि।
मा पहिअ रतिअन्धअ सेज्जाए मह णिमज्जहिसि॥
(श्वश्रूरत्र निमज्जति अत्राहमिति दिवसकं प्रलोकय।
मा पथिक रात्र्यन्धशय्यायां मम निमङ्क्ष्यति॥ इति छाया।)

इत्यादौ विवक्षितान्यपरवाच्ये ध्वनौ मुख्यार्थबाधः। तत् कथमत्र लक्षणा? लक्षणायामपि व्यञ्जनमवश्यमाश्रयितव्यमिति प्रतिपादितम्। यथा च समयसव्य-

श्रुत्यादिवद्वा पृथगनादरणीयं व्यञ्जनमिति। यदि वा निर्व्रीडीभूय विरोधापहस्तितया शब्दव्यापारो वाचकत्वलक्षणात्वयोरन्यतरत्वं [१]व्यभिचरति, निर्विवादस्थले तथैव दर्शनादिति वाच्यम्, तत्राद्ये लक्षणीयस्येति। नानात्वेऽपि सामग्र्या वैचित्र्येण सम्भाव्ये नियतत्वमेव प्रकरणादिवशात्[२], स्वरूपवैचित्र्येऽपि प्रसिद्धागमाद्वेतिकर्तव्यताकव्यापारबोध्यत्वमेव।

एतदेवाह—**न खल्विति**। उपलक्षणञ्चैतत्, प्रतीयमानापेक्षायामपि ज्ञेयम्। न चैवं व्यङ्ग्यं प्रति नियतेतिकर्तव्यतारहितत्वाद् व्यञ्जनाया इत्याह—**प्रतीयमानस्त्विति**। तु व्यतिरेके। नियतत्वानियतत्वे त्वत्र प्रसिद्धे। अन्यथा सम्बन्धनियमाभावे व्यञ्जनेति प्रसक्तेः। इत्थमवान्तरवैधर्म्येऽपि यदि लक्ष्यव्यङ्ग्ययोरेकवृत्तिबोध्यता, तदानीमभिधेयलक्ष्ययोरपि न सा कस्मादिति भावः।

द्वितीये-न चेति। अत्ता श्वश्रूः। णिमज्जइ निषीदति। दिअसअमिति। कालकर्मता। [३]महमिति निपात आवयोरित्यर्थे। अन्यथा विशिष्टवचननिवेशेनाशङ्का स्यादिति श्रीमदाचार्याः[४]। न चात्र मुख्यार्थबाध इति प्रतीतिपर्यवसानादित्यर्थः। तृतीये—लक्षणायामिति। 'रामोऽस्मि' इत्यादावपि हि वनवासादिदुःखसहिष्णुत्वादिधर्मविशिष्टरामार्थेनान्वयप्रतीत्यनन्तरं तेषामेव धर्माणामतिशयो व्यङ्ग्यः। तत्प्रतीतिश्च स्वसंवित्तिसाक्षिका। तदनङ्गीकारे च लक्षणाफलमपि नास्तीति सर्वमेव प्राचीनं स्मारयति-**प्रतिपादितमिति**। एतेन मूलत एवासिद्धेः स्थानान्तरप्रत्याशाया बीजमेव नास्तीति सूचितम्।

१. न व्यभिचरति–क० पाठः।

२. प्रकरणादिवशात्, न रूपवैचित्र्येऽपि–ख० असंलग्नप्रायः पाठः।

३. का० प्र० दी० श्रीधरस्य महण इति निपात आवयोरित्यर्थे। ममेति व्याख्यायमाने व्यङ्ग्यस्याभिधेयत्वमिव स्यादिति विवरणस्यास्य प्रतिध्वनिं करोति। (का० प्र० वि० ५६ पृ०)

४, यदा लोचनकृत्–एवं हि विशेषवचनमेव शङ्काकारि भवेदिति प्रच्छन्नाभ्युपगमो न स्यात्। आचार्यपादपदेन तस्यैव निर्देशः यथा मूले।

पेक्षाऽभिधा तथा मुख्यार्थबाधादित्रितयसमयविशेषसव्यपेक्षा लक्षणा, अत एवाभिधापुच्छभूता सेत्याहुः ।

न च लक्षणात्मकमेव ध्वननम्, तदनुगमेन तस्य दर्शनात् । न च तदनुगतमेव, अभिधाऽवलम्बनेनापि तस्य भावात् । न चोभयानुसार्येव, अवाचकवर्णानु-

---

तुर्ये—**यथा चेति** । समयप्रायो विशेषो व्यञ्जनातो वैलक्षण्यं समयविशेषः[१]। यथा खलु समयप्रतीतावेवाभिधानं व्याप्रियते[२], तथा मुख्यार्थबाधसम्बन्धरूढिपरिज्ञानं नास्तीति, तत् प्रतीतेर्लाक्षणिकप्रतीतिकार्यत्वात्, तथापि रूढिविरहात् किमप्यत्र प्रयोजनं भविष्यतीति प्रतीतेः कदाचित् सम्भाव्यत इति साधारण्येन त्रितयोक्तिः ।

यद्वा रूढिविषयैव त्रितयोक्तिः । प्रयोजनेऽपि यद्यपि सद्भावस्तथापि लक्षणाजातौ सम्भवमात्रेणोक्तं त्रितयेति । न तु समयस्य विशेष इति ज्यायसी व्याख्या । न खलु वाचकत्ववत् स्वार्थबाधादिना परार्थो ज्ञेय इति सङ्केत्यते, किन्तु वाचकताव्युत्पन्नः स्वमेव वाच्यान्वयानुपपत्त्याऽन्वययोग्यार्थं लक्षयतीति । न चैवं व्यञ्जने, तस्य व्याप्रियमाणतायां ज्ञायमानप्रतिनियतनिमित्तसाचिव्यापेक्षाविरहात् । पुच्छभूतेति । [३]पुच्छ एकदेशविशेष इति यावत् सा लक्षणा ।

पञ्चमे–**न चेति** । अनुगमेन पश्चाद् व्याप्रियमाणतया । दर्शनादिति दर्शितत्वादित्यर्थः । षष्ठे लक्षणामात्राङ्गत्वं यथायथमभिधानलक्षणयोर्द्वयोरङ्गत्वं वा । आद्ये—**न च तदनुगतमेवेति** । द्वितीये न तथेत्यवाचकानां वाच्यार्थानुसन्धानमन्तरेणापि प्रतीयमानमात्राणां वर्णानामनुसारेणाश्रयणादनुप्रसादौ, नाट्ये प्रगीतादौ च रसाद्युत्कर्षकत्वस्य दर्शनात्, सर्वथा वाचकत्वहीना एव वा ये वर्णास्तेष्वपि हुं हुं हमित्यादौ प्रकरणादिसाचिव्येन तत्तदर्थप्रकाशकतादर्शनात् । न च तत्राभिधालक्षणासद्भावो येन तद्भुजिष्यं व्यञ्जनं स्यात् । तयोरङ्गत्वसम्भवस्तत्र तावदस्त्विति चेत् ? मैवं वोचः, पश्चात्तनत्वमात्रेण तदङ्गत्वे तात्पर्यस्याभिधाऽङ्गत्वप्रसङ्गात् ।

न चैवं तादर्थ्येन तस्यैव तदङ्गत्वाद् हेयोपादेयतासंवित्तिः, निखिलव्यापारोऽपि तदङ्गमेव स्यात् । संयोगादयस्त्वभिधाविषयमेव नियमयन्ति, न तु तत्पृथग्विषयानिति तदङ्गान्युच्यन्ते । श्रुत्यादेः कस्यचिच्छब्दाङ्गत्वेन प्रकटत्वाच्छब्दतः

---

१. केचिट्टीकाकृतः समयविशेषेति पदं मूले पाठ्यतया न गृह्णन्ति । चण्डीदासमन्तव्यश्चात्रार्थे विनिगमकम् ।

२. यथेत्यादिर्व्याप्रियत इत्यन्तोंऽशोऽनवधानवशात् क पु० गलितः ।

३. पुच्छः पश्चाद्भागः । अत एवास्या वृत्तेर्जघन्येति कुत्रचिन्नये व्यपदेशः । तेन च श्लेषवलान्निकृष्टतासूचनमपि ।

सारेणापि तस्य दृष्टेः। न च शब्दानुसार्येव, अशब्दात्मकनेत्रत्रिभागावलोकनादिगतत्वेनापि तस्य प्रसिद्धेरित्यभिधातात्पर्यलक्षणात्मकव्यापारत्रयातिवर्ती ध्वननादिपर्यायो व्यापारोऽनपह्नवनीय एव।

तत्र 'अत्ता एत्थ' इत्यादौ नियतसम्बन्धः, 'कस्स व ण होइ रोसो' इत्यादावनियतसम्बन्धः।

विपरीअरए लच्छी वम्हं दट्टूण णाहिकमलट्ठं।
हरिणो दाहिणणअणं रसाउला झत्ति ढक्केइ॥
(विपरीतरते लक्ष्मीर्ब्रम्हाणं दृष्ट्वा नाभिकमलस्थम्।
हरेः दक्षिणनयनं रसाकुला झटिति ढौकयति॥ इति छाया।)

पार्थक्यानादरणम्। न चैवम्, प्रत्युत तादर्थ्येन व्यञ्जने तस्याभिधादेश्च स्वरूपविषयभेदोपपादनात्, अत एव तदितिकर्तव्यतारूपत्वविरहाच्च। सप्तमे[१] —अशब्देति। तृतीयो भागः त्रिभागः। तेन हि नर्तकीनां नृत्यप्रवृत्तानां तत्तदवान्तरविशेषवद्विलोकनं तत्तर्थानुकूल्याय प्रतिपद्यते। लौकिकमपि च तत्तद्दृग्रहस्यञ्च विदग्धगोष्ठीषु विदितमेव। आदिनाऽधोमुखत्वाङ्गभङ्गमुखविकृत्यादि सर्वम्। शब्दगतस्यैव व्यञ्जनस्यास्माभिः पार्थक्यमिष्यत इति चेत्? न, तस्य विषयस्वरूपादिलिङ्गमुखेन भेदोपपादनात्।

सम्प्रति सर्वमेव प्रकरणार्थमुपसंहरति—इत्यभिधेति। अतिवर्ती अतिक्रान्तिविषयः। ध्वननादीत्यादिना प्रत्यायनोन्नायनप्रकाशनसूचनादिध्वनितन्त्रप्रसिद्धभाषासंग्रहः **अनपह्नवनीयइति**। शक्यार्थे कृत्यप्रत्ययो विप्रतिपत्तिदौर्बल्यपरः।

सम्प्रति व्यङ्ग्यस्य नियतसम्बन्धत्वादिकं सिंहवत् परिवृत्त्यावलोक्योदाहृतिदानेन द्रढयति—तत्रेति पूर्वविषयान्तरव्यग्रिम्णाऽदर्शितविषयविभागेन नियत सम्बन्धतादावित्यर्थः। नियतसम्बन्ध इति। अत एव प्रतिपाद्यप्रकरणादिविशेषपर्यालोचनया प्रचुरतरमेव प्रसिद्धमेवंविधार्थव्यञ्जनमिति नियतता वाच्यव्यङ्ग्यसम्बन्धस्य। सम्बन्धसम्बन्ध इति पाठे कर्मधारयः। एवमनन्तरेऽप्यनियतसम्बन्ध इति। अत्र प्रतिविषयव्यङ्ग्यवाच्ययोरेव सम्बन्धः प्रसिद्धः। स च वक्तृवैशिष्ठ्यात्, तावद्भिरविश्रान्तेः, उपपत्तिविषयादिव्यङ्ग्यानान्तु तथा प्रसङ्गविरहात्। विषयव्यङ्ग्यापेक्षया दृष्टत्वाच्च वाच्यसम्बन्धानैयत्यम्।

केचित्तु सम्बन्धनियतत्वानियतत्वे वाच्ययोर्विषयस्यैक्यानैक्ये वर्णयन्ति। हरिपदेन स्वार्थसचिवेनेत्यर्थः। तत्सम्बन्धिनो दक्षिणनयनस्य सूर्यात्मकत्वं व्यङ्ग्यम्।

---

१. न खल्वित्यादिकस्य न च शब्दानुसार्येवेत्यन्तस्य साक्षेपसप्तकस्यानुपूर्व्येह संख्याक्रमेण टीकाकृता निर्देशः कृतः, परिहारश्च यथाक्रमं प्रदर्शितः।

इत्यादौ सम्बन्धसम्बन्धः । अत्र हि हरिपदेन दक्षिणनयनस्य सूर्यात्मकता व्यज्यते । तन्निमीलनेन सूर्यास्तमयस्तेन पद्मस्य संकोचस्ततो ब्रह्मणः स्थगनं तत्र सति गोप्याङ्गस्यादर्शनेनानिर्यन्त्रणं निधुवनविलसितमिति ।

"अखण्डबुद्धिनिर्ग्राह्यो वाक्यार्थ एव वाच्यः, वाक्यमेव च वाचकम्" इति येऽप्याहुस्तैरप्यविद्यापदपतितैः पदपदार्थकल्पना कर्तव्यैवेति तत्पक्षेऽप्यवश्यमुक्तोदाहरणादौ विध्यादिर्व्यङ्ग्य एव ।

तत्सम्बधं दक्षिणनयनसम्बन्धमिति सम्बन्धसम्बन्धत्वं व्यङ्ग्यस्य । एतत्प्रसङ्गेन वैधर्म्यमप्याह—**तन्निमीलनेनेत्यादि** । न तु व्यङ्ग्यपरम्परावल्लक्ष्यपरम्पराऽस्तीति कथं लक्ष्यव्यङ्ग्ययोरैक्यमिति भावः । केचित्तु द्वितीयादिव्यङ्ग्ये वाच्यस्य साक्षात्सम्बन्धाभावात् सम्बन्धसम्बन्धतामाहुः । अनिर्यन्त्रणं स्वच्छन्दक्रीडादि, प्रतिबन्धकविगमात् ।

अथ लक्षगान्तरोपक्रमेऽखण्डवुद्धिनिर्ग्राह्य इति, "सत्यं ज्ञानमानन्दं ब्रह्म" इत्यादिना परमतत्त्वप्रतिपादकेन तस्य निर्धर्मकत्वात् । सत्यादिपदेन खण्डशो धर्मसंप्रतिपत्तिविरहादविभक्त एवार्थः प्रकाश्यते । तन्नीत्या तथैव वाक्यान्तराणीति वेदान्तिनः । वाक्यमेव निर्भागम् । अविद्यापदपतितैर्व्यवहारान्यथाऽनुपपत्त्या शरणीकृताविद्यैः कर्तव्यैवेति । अवश्यमिति । अन्यथा व्युत्पन्नतदितराविशेषात्, शब्दवदर्थव्याकोपाच्च व्यङ्ग्य एवेति भट्टपक्षोक्तयुक्तेस्तत्पक्षप्रवेशात्, तदा तु व्यवहारे भट्टनय इति ।

किञ्चाखण्डब्रह्मणि लौकिकप्रामाण्यागम्ये न तावदभिधाप्रसक्तिः, सङ्केतागोचरत्वात् । नापि लक्षणा, सामग्रीविरहात् । न च सा द्वितीया, तस्याः पदार्थसंसर्गमात्रनैयत्यप्रतिपादनात्, अखण्डस्यार्थस्य तदतिरिक्तत्वात् । नाप्यनुमानत्वादिश्रुतिः, पृथक्प्रामाण्याद् व्याप्तिग्रहादिविरहाच्चेति व्यापारान्तरमेवाङ्गीकृतं भवद्भिरन्वयवृत्त्यादिभाषाव्यपदेश्यम्[२], अस्माभिस्तु व्यञ्जनादिव्यपदेश्यमिति सदेव तत् ।

---

१. श्रीधरास्तु प्रकरणमेतद् द्विधा विभज्य वैयाकरणसाधारणमतं विवर्तवादिनां भर्तृहरिप्रभृतीनां मतञ्च विलक्षणतया विवृणोति (का० प्र० वि० १७१–१७२ पृ०) । तत्राद्यमतस्य "अपोद्धृत्यैब वाक्येभ्यः प्रकृतिप्रत्ययादिवत्" इति वर्णितस्य विवृतिर्व्यक्तिविवेकव्याख्याने रुचकेण कृतेति तत एवानुसन्धित्सुभिर्ग्राह्या । यावता लोकः पदसमुदायादर्थसमुदायमवैति नावयवादिति शृङ्गारप्रकाश एतन्मतनिष्कर्षः । एवञ्च निरवयवेष्वपि वर्णपदवाक्येषु मात्राविभागो वर्णविभागः पदविभागश्च काल्पनिको मिथ्येति सेतुतयोभयोर्मतयोरपि संघटनमिच्छन्ति केचिद् वैयाकरणनयनिपुणाः ।

२. न्यथावृत्त्यादिभाष्येति ख पु० वर्जनीयः, पाठः ।

ननु वाच्यादसम्बद्धं तावन्न प्रतीयते, यतः कुतश्चिद् यस्य कस्यचिदर्थस्य प्रतीतेः प्रसङ्गात्। एवञ्चासम्बन्धाद् व्यङ्ग्यव्यञ्जकभावोऽप्रतिबन्धेऽवश्यं न भवतीति व्याप्तत्वेन नियतधर्मिनिष्ठत्वेन च त्रिरूपाल्लिङ्गाल्लिङ्गिज्ञानमनुमानं यस्तद्रूपः पर्यवस्यति। तथाहि—

अश्रुतकाव्यौपनिषदिकानां सम्प्रति तार्किकम्मन्यानां खण्डिकोपाध्यायानां व्यञ्जनाया अनुमानान्तर्भाववादमुपन्यस्यति—**वाच्यादिति। तावदिति।** भवद्भिरेवेदं वच उच्यत इति भावः। एवञ्चासम्बन्धादिति[1] दैवसिद्ध एवायमर्थ इत्यर्थः। सम्बन्धादिति तु पाठे व्यङ्ग्यव्यञ्जकभावः सम्बन्धमूल इत्यर्थः। अप्रतिबन्धे कादाचित्कसम्बन्धेऽवश्यं न भवतीति भवद्भिश्च व्यञ्जके परिपूर्णेऽभिव्यक्तिरवश्यमुच्यत इति भावः। **व्याप्तत्वेनेति**—व्याप्यव्यापकयोर्यथायोगं व्याप्यायोगव्यापकविरुद्धयोगाव्यवच्छेदेन नियतः प्रकृतो यो धर्म्याश्रयस्तन्निष्ठत्वेनाङ्गिनि व्यापके व्यङ्ग्यत्वाभिमते ज्ञानमनुमानमिति सङ्गतिः। कथं पुनरेवमनुमानमित्याह—**त्रिरूपादिति**[2]। पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तिनामरूपतयोपपन्नाल्लिङ्गाद् व्याप्यात्। सपक्षसत्त्वं तु 'भम धम्मिअ' इत्यादावनुपनिबद्धमपि सामर्थ्यादवसेयम्। एवञ्च विपक्षव्यावृत्तिरपि।

नन्वननुमानप्रवेशेऽपि किं व्यञ्जनस्येत्याह—यो लिङ्गस्तद्रूपो व्यङ्ग्यरूपः पर्यवस्यति। भवदभिप्रायसिद्धव्यङ्ग्यव्यवहारविषयत्वेनायमेव विश्राम्यतीति नानुमेयाधिको व्यङ्ग्य इत्यर्थः। यत्तद्रूप इति पाठेऽनुमानमित्यनन्तरमितीति शेषं कृत्वा व्यङ्ग्यव्यञ्जकभाव इति पदं सम्बन्धनीयम्। ततश्च व्यङ्ग्यव्यञ्जकभावो यद्रूपः परिशीलितपूर्व एवेति नात्यन्तमादरणीयः पर्यवस्तीत्यर्थः।

---

१. सम्बन्धादिति क्वाचित्कः पाठः। प्राचीनैरपि स स्वीकृतः। श्रीधरः सम्बन्धमन्तरेणेति तस्य पदस्य विवरणं प्रतिजानीते (का० प्र० वि०)। "अवदन्तो वाचा, अपश्यन्तश्चक्षुषा" इत्यादिश्रौतप्रयोगे तृतीयाश्रुतेरिवात्र पञ्चमीविभक्तेस्तथैवार्थः।

२. त्रिरूपाल्लिङ्गादिति धर्मोत्तरीयं सूत्रम्। एवमेव न्यायप्रवेशवृत्तिपञ्जिकाकारः "अशब्दमर्थं रमणीयं हि सूचयन्तो व्याहारास्तथा व्यापारनिबन्धाश्च विदग्धपरिषत्सु विविधा विभाव्यन्ते। तानुपहास्यतामात्मनः परिहरन् कथमभिसंदधीत सचेताः—अस्त्यभिसंधावसरो व्यञ्जकत्वं शब्दानां गमकत्वम्" इति ध्वन्यालोकग्रन्थे सूत्रपातनिकयोक्तम्।

महिमभट्टेन तु व्यक्तिविवेके तन्मतप्रतिष्ठाने चेष्टावता ग्रन्थान्ते ध्वन्यालोकाक्षेपस्य प्रतिध्वनिमिव कुर्वताऽभिहितम्—"अन्यैरनुल्लिखितपूर्वमिदं ब्रुवाणो नूनं स्मृतेर्विषयतां विदुषामुपेयाम्। हासैककारणगवेषणया नवार्थतत्त्वावमर्शपरितोषसमीहया वा" इति।

भम धम्मिअ वीसद्धो सो सुणओ अज मारिओ तेण !
गोलाणईकच्छकुडंगवासिणा दरिअसीहेण ।।१३८।।
(भ्रम धार्मिकविश्रब्धं स शुनकोऽद्य मारितस्तेन ।
गोदावरीकच्छकुञ्जवासिना दृप्तसिंहेन ।। इति छाया)

अत्र गृहे श्वनिवृत्त्या भ्रमणं विहितं गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयति। यद् यद् भीरुभ्रमणं तत्तद् भयकारणनिवृत्त्युपलब्धिपूर्वकम्, गोदावरीतीरे च सिंहोपलब्धिरिति व्यापकविरुद्धोपलब्धिः ।

अत्रोच्यते—भीरुरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेणान्येन चैवंभूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकान्तिको हेतुः, शुनो बिभ्यदपि वीरत्वेन सिंहान्न बिभेतीति विरुद्धोऽपि गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद् वा

एतच्च ध्वनिकारोदाहृतिमुखेन द्रढयति—तथाहीति । सणओ कुक्कुरः, सुणओ इति पाठे स एवार्थः । गोलाणई गोदावरी । दरिअ इति दर्पिष्ठार्थे । कुसुमाद्यवचयार्थे गोदावरीकण्ठे शश्वद् भ्रमतो धार्मिकात् प्रहस्य भङ्गाभीरोः कस्याश्चिदियमुक्तिः ।

उदाहृतौ प्रकृतयुक्तियोगं प्रतिजानीते—अत्रेति । एवमेव व्याप्त्यादिभागविवेचनेन स्फुटयति—व्यापकेति । व्यापकं भीरुभ्रमणस्य भयहेतुविरहबोधनम् । तद्विरुद्धोपलब्धिर्भयहेतुप्रतीतिः स्वव्याप्यमभ्रणमनुमापयति । अत्र पक्षे गोलेत्यादि निर्दिष्टगोदावरीकच्छो भ्रमणयोग्यो न भवतीति साध्यम् । सिंहसञ्चाराक्रान्तत्वादिति हेतुः । एवमन्यत्रापि मृग्यम् ।

एवं व्यापकं पूर्वपक्षमुक्त्वा तदुद्धारमाह—अत्रोच्यत इति । सहृदयानामेवंविधकाव्यपरिशीलनादेवंविधा प्रतीतिरानुमानिकी धार्मिकस्य वा पुंश्चलीवचनजन्या ? तत्र द्वितीयपक्षे नास्माकं भूयसी क्षतिः । प्रथमे तु धार्म्मिको भीरुप्रकृतिर्वा स्याद्वीरप्रकृतिर्वा । प्रथमे भीरुरपीति निर्देशेन ज्ञेया । प्रियेति स्वारसिकताकथनपरम् । अन्येन चैवंभूतेन भयापहस्तकेन हेतुना निधिलाभप्रत्याशादिना । सत्यपीति व्याप्तिभङ्गप्रकटनम् । अनैकान्तिकः साध्यव्यभिचारी हेतुस्तल्लक्षणैकदेशयुक्तः । प्रभुनिदेशादभाववत्तया विशेषणीयमिति ? न, तदनुपादानात् । द्वितीये शुनो विभ्यदपीति स्पर्शनादिशङ्क्येत्यर्थः । विरुद्धः साध्याभावव्याप्तः ।

सम्प्रति प्रतिपादकभावकसाधाण्येन दूषणमाह—गोदावरीति। अप्रतिसम्बन्धात् प्रतिनियतस्य निश्चितस्य पारमार्थिकस्य वा सम्बन्धस्याभावात् । अप्रतिसम्बन्धादिति पाठे प्रतिनियतो बन्धः सम्बन्ध इति स एवार्थः । असिद्धः सन्दिग्धसिद्धः स्वरूपासिद्धो वा सर्वमेव साधारण्येन योज्यम् । हेतुदूषणमात्रे किं भवतीत्याह—

न निश्चितः, अपि तु बचनात् । न च वचनस्य प्रामाण्यमस्ति, अर्थेनाप्रति संबन्धादित्यसिद्धेश्च । तत् कथमेवंविधाद्धेतोः साध्यसिद्धिः ।

तथा निःशेषच्युतेत्यादौ गमकतया यानि चन्दनच्यवनादीन्युपात्तानि तानि कारणान्तरतोऽपि भवन्ति, अतश्चात्रैव स्नानकार्यत्वेनोक्तानीति नोपभोग एव प्रतिबध्नातीत्यनैकान्तिकानि ।

व्यक्तिवादिना चाधमपदसहायानामेषां व्यञ्जकत्वमुक्तम् । न चात्राधमत्वं

तत् कथमिति । एवंविधादपारमार्थिकात् । साध्यस्य प्रत्याचयस्य सिद्धिरनुमितिः । अनुमित्याभासवादे तूक्तमेव ।

युक्तिजातमुदाहरणान्तरेपि यथायोगमित्याह[१]—**तथेति** । गमकतया कामुकसमीपगमनाबाधकतया उक्तम् ।

अतश्चे ति च पदार्थेऽनैकान्तिकतामुपपाद्यासिद्धतामाह—**व्यक्तिवादिनेति** । व्यञ्जनव्यापारपार्थक्यस्थापनाय विवदमानेनेत्यर्थः । अधमेतिपदं वाचकमस्येत्यधमपदेऽर्थः, अन्यथोत्तग्रन्थासङ्गतेः । प्रमाणं निश्चितं प्रमात्वज्ञानम् । कथमनुमानमिति । भवद्भिरपि व्यञ्जनसामग्री सर्वैवानुमितिसामग्रीत्वेनेष्यते । तदुक्तम्—

"अर्थान्तराभिव्यक्तौ या सामग्रीष्टा निबन्धनम् ।
सैवानुमितिपक्षे नो गमकत्वेन सम्मता ॥" इति ।

---

१. "काव्यविषये च व्यङ्ग्यप्रतीतीनां सत्यासत्यनिरूपणस्याप्रयोजकत्वमेवेति तत्र प्रमाणान्तरव्यापारपरीक्षोपहासायैव संपद्यते" इति ध्वन्यालोके वृत्तिः, प्रतीतिमात्रपर्यवसायित्वात् । प्रतीतेरेव चालौकिकचमत्काररूपाया व्युत्पत्त्यङ्गत्वाद् नायं सहृदयः केवलं शुष्कतर्कोपक्रमकर्कशहृदयः प्रतीतिं परामष्टुं नालम्" इति लोचनग्रन्थश्च मूल उपजीव्यते ।

वस्तुतस्तु व्यक्तिविवेककृता व्यक्तिवादिना सह विवाद एवारब्धो न पुनः सिद्धान्तनिष्ठा शरणीकृता । तथापि यत् खण्डनखण्डकृता कवितार्किकशिरोमणिना तस्मिन् काव्यमीमांसिषु प्राप्तमहिमत्वेनादरो दर्शितः । स त्वनौचित्यमूलो दोष इति व्याकुर्वतस्तस्य मुक्तकानां पद्यानां विश्लेषणमुखेन (analtie methd) दोषज्ञतयैव विपश्चित्त्वेन, न तु सहृदयतया आनन्दवर्धनकुन्तकाभिनवगुप्तप्रभृतिभिः प्रदर्शितदिशा तेषु तेषु प्रबन्धेषु च रससन्दोहक्रमचङ्क्रमणे परिपाटीप्रकटनेन कोविदतयेति बोद्धव्यम् ।

प्रमाणप्रतिपन्नमिति कथमनुमानम् । एवंविधादर्थादेवंविधोऽर्थ उपपत्त्यनपेक्षत्वेऽपि प्रकाशत इति व्यक्तिवादिनः पुनस्तदूषणम् ।।

इति काव्यप्रकाशे ध्वनिगुणीभूतव्यङ्ग्यसंकीर्णभेदनिर्णयो नाम पञ्चम उल्लासः ।।

ततश्चाधमताऽपि हेतुपक्षनिःक्षिप्ता[१] वाच्या । सा च सन्दिग्धासिद्धा स्वरूपासिद्धा वा कथमनुमितिजनका स्यात् ? ततश्चैकदेशसिद्धया समुदितोऽपि हेतुरसिद्ध इत्यर्थः ।

यद्वा अनुमानमनुमितिः, कथं तदिति योजना ।

नन्वेवमनुमितिप्रतिबन्धमूलक एव व्यङ्ग्यव्यञ्जकभावः स्यादिति चेत् ? कथमिवेत्याह—**एवंबिधादिति** । उपपत्त्यनपेक्षत्वेऽपि व्याप्तिपक्षधर्मताप्रतिसन्धान विरहेऽपि । अदूषणं स्वपक्षस्थापनमेवेत्यर्थः । न चैवमतिप्रसङ्गः, प्रतीतेरनन्यथाऽनुपपत्तावेव व्यक्तिविकल्पनात् । एवंविधेपि व्यङ्ग्ये यद्यनुमेयत्वं दुर्घटं तदानीमलौकिकरसादौ व्याप्तिग्रहादेर्दूरत एवापसृतत्वात्तत्सम्भवमात्रमपि नोदेतुमर्हतीति निर्मला निखिलैव ध्वनिप्रक्रिया ।।

इति काव्यप्रकाशदीपिकायां पञ्चम उल्लासः ।।

---

१. वाच्या-ख० नास्ति ।

अथ षष्ठ उल्लासः

(७०) शब्दार्थचित्रं यत् पूर्वं काव्यद्वयमुदाहृतम् ।
गुणप्राधान्यतस्तत्र स्थितिश्चित्रार्थशब्दयोः ॥४८॥

न तु शब्दचित्रेऽर्थस्याचित्रत्वम्, अर्थचित्रे वा शब्दस्य । तथा चोक्तम्—

ध्वनिगुणीभूतव्यङ्ग्यलक्षणेषु कृतेषु चित्रविशेषलक्षणं यद्यपि प्रकृतम्, तथापि तस्य भाक्तगुणपदाभिधेयबन्धवैचित्र्यशब्दार्थालङ्कृतिलक्षणत्वादेव सुप्रतिपादितपदत्वात्तदपेक्षः 'शब्दचित्रं वाच्यचित्र'मिति यश्चित्रविभाग उक्तः स न युज्यते विषयविभागाभावादित्याशङ्कामपनेतुमुल्लासान्तरं कृतम्—शब्देति । उदाहृतमुक्तम् । गुणप्राधान्यतः स्फुटास्फुटभावेन । चित्रार्थशब्दयोरिति चित्रपदस्य प्रत्येकमन्वयः । शब्दचित्रे चित्रार्थस्य गुणत्वं चित्रशब्दस्य प्राधान्यम्, अर्थचित्रे चित्रशब्दस्य गुणत्वं चित्रार्थस्य प्राधान्यमिति प्रधानेन व्यपदेशा भवन्तीत्युपपद्यत एव विभागः ।

न त्विति विवेचनप्रवृत्तिबीजशङ्कासूत्रणम् । अचित्रत्वं सर्वथेति शेषः ।

ननु गुणालङ्कारयुक्तत्वं चित्रत्वमिति प्राञ्चः[१], तत्तत्कारणान्तरादास्वादविशेषरूपत्वाङ्गीकाराच्छब्दार्थधर्मता न पारमार्थिकीत्यलङ्कारैरेवोपाधिभिश्चित्रता

---

१. यत् प्रथमोल्लासे चित्रमिति गुणालङ्कारयुक्तमिति वृत्त्या विवृतं तद् रूपकादि, "तदेतदाहुः सौशब्द्यम्" इत्यादिना प्राचीनानां भामहाचार्याणां मतोद्धारेण समर्थितमत्र । परन्त्वेतदवधानीयं यत्तेषां मते गुणालङ्कारयोर्न स्वरूपतो वैलक्षण्यम् । गुणालङ्कारयुक्तमिति शब्दार्थधर्मा उक्ता इति श्रीधरव्याख्यानेन ध्वन्यालोकप्रस्तुतकाव्यस्वरूपताया वैलक्षण्यमेतेष्विति सूचितम् ।

अत्र तावन्मूलेऽलङ्कारकुक्षावेव भरो निहित इति प्रतिभाति । स चानन्दवर्धनाचार्येण सर्गबन्धेषु "शक्तो हि कविः कदाचिदलङ्कारनिबन्धने तदाक्षिप्ततयैवानपेक्षितरससम्बन्धः प्रबन्धमारभते, तदुपदेशार्थमिदमुक्तम् । दृश्यन्ते च कवयोऽलङ्कारनिबन्धनैकरसा अनपेक्षितरसाः प्रबन्धेषु" इति कवीनां वस्तुनिर्बन्धे सोत्प्रासं निन्दाऽतिशयं सूचयता, काव्यस्वरूपहानिकरत्वेन तस्याधमत्वं काव्याभासत्वं काव्यानुकारत्वमित्यादिवचनैर्विशेषयता च दूषित एव । वस्तुगत्या सर्गबन्धानां चमत्काराश्रयत्वमनपलाप्यमिति लक्षणीये चानुप्रासादीनां बन्धवैकट्येन च चेतसि कापि प्रकृष्टिका आधीयत इति टीकाकृतः कण्ठतो घोषणेन च तत्र तत्र काव्यत्वमूरीकार्यमिति तदाशयो न सुदुःसाधः ।

रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनिताननम् ।।
रूपकादिमलङ्कारं बाह्यमाचक्षते परे ।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम् ।।
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः ।। इति ।

वाच्या । तेषां चैकजातीयत्वात् कथं तदुपधानकस्य चित्रस्य द्वैतमित्याशङ्कामैकजात्येऽप्यवान्तरवैधर्माच्छब्दार्थाश्रयत्वलक्षणादुपपद्यत एवैतदित्युत्तरीतुमलङ्कारद्वैविध्ये प्राचीनसम्मतिमाह–**तथा चोक्तमिति** । रूपकादिरर्थाश्रयः, अलङ्कारो विभावादिरूपार्थोपस्कारकतया मुख्यस्य रसादेरुत्कर्षकत्वात् । अनुप्रासादेर्न मुख्यालङ्कारत्वम्, तेषां विभावाद्युपनयनमात्रप्रयोजनकशब्दाश्रयत्वेन बहिरङ्गत्वादिति केचित् ।

तस्य काव्यस्य । बहुधा बहुप्रकारः । अलङ्कारघटनोपयोगव्यतिरेकदृष्टान्तमाह—न कान्तमिति । कान्तं निर्दोषं स्वाभाविकगुणयुक्तं वा । विभाति सभूषणवदिति शेषः ।

बाह्यमिति । काव्यस्य [1] शब्दविशेषरूपत्वादर्थस्य च तद्व्यवच्छेदकतामात्रेणामुख्यत्वात्तदाश्रितानां बहिरङ्गतेत्यर्थः । सुपां तिङामिति तदन्तपदपरम् । विशिष्टोत्पत्तिर्व्युत्पत्तिरिति माधुर्याद्यनुगुणवर्णविशेषात्मकत्वम् । वाचां काव्यरूपाणाम् ।

किमिति तामेवालङ्कृतिं वाञ्छन्ति ? रूपकादावपि रसपोषकतादर्शनादित्याह—**तदेतमिति** । सुप्तिङ्व्युत्पत्तियोगित्वं सौशब्द्यं शब्दस्य सौष्ठवं काव्यव्यपदेशभाजनत्वम्, अर्थस्य व्युत्पत्ती[2] रूपकत्वादिना योजनम् । नेदृशी—न शब्दे, काव्यव्यपदेशहेतुः, साक्षात्तद्धर्मताहीनत्वादित्यर्थः । ततश्च येनोपाधिना काव्यत्वं तस्यैव तत्र मुख्यत्वमिति शब्दालङ्कृतय एवं प्रधानत्वमित्यपरे । शब्दाभिधेययोर्द्वयोरपि प्रधानभूतरसाद्युपकारकयोर्यथायथमलङ्कारेण रसादिपोषणक्षमत्वापादनेनोपाधिना भेदाद् द्वयोरपि परस्परतो विशिष्यमाणत्वाद् द्वयमप्यस्माकमिष्टं वल्लभम् । नहि वयं बहिरङ्गत्वान्तरङ्गत्वभेदमाश्रयामहे, द्वयोरप्यङ्गोपस्कारद्वारा मुख्योत्कर्षकत्वादिति साम्प्रदायिकाः ।

प्रथममित्यादौ च चन्द्रोदयावस्थावर्णने स्वभावोक्तिर्वाक्यार्थालङ्कारः पदार्थालङ्कारश्च । कनकप्रभ इत्यादौ लुप्तोपमाः सन्ति यद्यपि, तथापि बन्धवैशिष्ट्ये-

---

१. शब्दरूपविशेषत्वात्–ख० ।
२. रूप्यमाणत्वादिना योजनम्–ख० ।

शब्दचित्रं यथा—

प्रथममरुणच्छायस्तावत्ततः कनकप्रभः
तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ।
उदयति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥१३९॥

अर्थचित्रं यथा—

ते दृष्टिमात्रपतिता अपि कस्य नात्र
क्षोभाय पक्ष्मलदृशामलकाः खलाश्च ।
नीचाः सदैव सविलासमलीकलग्ना
ये कालतां कुटिलतामिव न त्यजन्ति ॥१४०॥

यद्यपि सर्वत्र काव्येऽन्ततो विभावादिरूपतया पर्यवसानम् तथापि स्फुटस्य

नानुप्रासमहिम्ना चार्थानुसन्धिमन्तरेणापि कश्चित् प्रकर्षो हृदि निधीयत इति शब्दचित्रता ।

ते दृष्टिमात्रपतिता इति, न तु मनसा भावितस्वरूपा एव । क्षोभाय धैर्यविघाताय स्वास्थ्यविघाताय च । पक्ष्मलेति भूम्नि मत्वर्थीयो लच् । नीचाः प्रतिनियतपरिमाणतो न्यूना अनुच्चाशयाश्च । सविलासेति । सविलासं विच्छित्तिविशेषेण लालाटिकत्वेन चालीकलग्ना ललाटसंश्लिष्टाः कपटाङ्गीकृतस्वजनभावाश्च । कालतां नीलतां क्रूरदारुणताञ्च । कुटिलतां कुञ्चितत्वममृदुप्रकृतिकत्वञ्च । अत्रानुप्रासलेशसद्भावेऽपि वाच्यालङ्कृतिप्रतीतिरेवोद्भटेत्यर्थचित्रता ।

नन्वस्त्वत्रोदाहरणद्वये रसादिसम्भेदाभावात् काव्यत्वम्, ततश्च तद्विशेषचित्रभेदताऽपि कथमनयोरित्याह- यद्यपीति । अन्ततः पर्यन्ते । विभावादिरूपतयेति—विभावादिभी रूप्यत इति विभावादिरूपं समूहालम्बनम्, तत्तया विशिष्टस्तदात्मा यो रस आस्वादस्तत्र पर्यवसानं तत्प्रवणत्वम्, अन्यथा आभासतानियमात् । तथापि स्फुटस्य स्वसंवित्तिसाक्षिकचमत्कारप्राणस्य रसस्यास्वादस्यानुपलम्भादव्यङ्ग्यचमचमत्कारिव्यङ्ग्यमत एवाभासभूतमप्येतत्[1] पद्ययुग्मं काव्यद्वयमुक्तं प्राचीनप्रसिद्धिमात्रेणेत्यर्थः ।

एतेन सर्वमेव चित्रमेवेति[2] प्रतिपादितं भवति, न तु विभावादिरूपतया

१. एतत् प्रयुक्तमित्यवद्यम्—क० ।

२. "म्रदीयसीमपि घनामनल्पगुणकल्पिताम् । प्रसारयन्ति कुशलाश्चित्रां वाचं पटीमिव ॥" इति माघपद्ये चित्रपदस्य काव्यघटकवाक्यविषये विशेषणतया प्रयोगः । चित्रपटी हैमनवासोविशेष इति वल्लभव्याख्यानं तस्या वैचित्र्याधायकत्वं केषामपि ग्राह्यत्वमप्य-

रसस्यानुपलम्भादव्यङ्ग्यमेतत् काव्यद्वयमुक्तम्। अत्र च शब्दार्थालङ्कारभेदाद् बहवो भेदास्ते चालङ्कारनिर्णये निर्णेष्यन्ते ॥

इति काव्यप्रकाशे शब्दार्थचित्रनिरूपणं नाम षष्ठ उल्लासः ॥

रसपर्यवसानम्, विभावादीनां मध्ये कस्यचिदवश्यं प्रतिपाद्यतया रसानुवेधः सार्वत्रिक इति।

यद्यप्यत्रापि रसोऽस्ति, तथापि स्फुटस्याक्षुद्रस्य रसस्यानुपलम्भादेतत् काव्यद्वयमव्यङ्ग्यमुक्तमिति व्याख्यानं ज्यायः, विभावादिसामग्र्यैव रसनिष्पत्तेः। अत्र च सर्वोपादानस्य कतिपयाक्षेपस्य चाभावेन तदभावात्।

न चात्र विभावादेरन्यतमदप्यस्ति, संवलितेष्वेव रत्याद्यालम्बनोद्दीपनादिष्वास्वादाङ्कुरणदशायां मुख्यतस्तत्पदप्रवृत्ते रसस्य च क्षुद्राक्षुद्रत्वविभागः कीदृगिति न बुध्यामहे। आस्वादापकर्षप्रकर्षाविति चेत्? न, उभयत्रापि प्राधान्याप्राधान्ययोर्यथायोगं ध्वनिगुणीभूतव्यङ्ग्यत्वाभ्यां व्याप्तविषयत्वेन चित्रत्वविरहात्।

नुमापयति। वामनोऽपि काव्यालङ्कारसूत्रवृत्तौ काव्यमध्ये श्रेष्ठस्य दशरूपकसंज्ञितस्य "चित्रपटवद् विशेषसाकल्यात्" इति सूत्रेण चित्रपदेन व्यपदेशमुद्दिशति।

परमानन्दवर्धनस्तु हेयताकुक्षौ चित्रं परामृशति—

"रसभावादिविषयविवक्षाविरहे सति।
अलङ्कारनिबन्धो यः स चित्रविषयो मतः॥
रसादिषु विवक्षा तु स्यात्तात्पर्यवती यदा।
तदा नास्त्येव तत्काव्यं ध्वनेर्यत्र न गोचरः॥" इति।

एतच्च चित्रं "कवीनां विश्रृङ्खलगिरां रसादितात्पर्यमनपेक्ष्यैव काव्यप्रवृत्तिदर्शनादस्माभिः परिकल्पितम्" इति, "शक्तानां कवीनां शब्दार्थचित्रनिबन्धने निर्बन्धश्च", "दृश्यन्ते च कवयोऽलङ्कारनिबन्धनैकरसा अपनेक्षितरसाः प्रबन्धेषु" इत्याद्याक्षिपति च। एतमेव सिद्धान्तमवलम्ब्य विश्वनाथादयश्चित्रं काव्यभेदतया नाङ्गीकुर्वन्ति। बहवस्त्वलङ्कारशास्त्रं प्रयोगशास्त्रमेवेत्युपलभ्य वस्तुस्थित्यनुसारिणो रसगङ्गाधरकृदाद्याश्चमत्कारसत्त्वमूरीकृत्य न केवलं तत् स्वीकुर्वन्ति "परमिष्टं द्वयं तु नः" इति प्राचीनाभियुक्तयुक्तिमनुसृत्य द्विधैव विभजन्ति च। एतत्त्ववधानीयं यत् प्राचीना दण्डिप्रभृतयो वस्तुस्थितिवृत्त्यापि विदग्धगोष्ठीष्वाद्रियमाणानां प्रहेलिकादीनामप्यन्तर्भावमलङ्कारशास्त्रे विदधतीति, परन्तु काव्यान्तर्गडुभूता इति ते रसिकैः काव्यबाह्यत्वेन बहिष्कृताः।

एतेनास्फुटतरव्यङ्ग्यं[१] चित्रमिति प्रत्युक्तम् । तस्यानास्वादार्हत्वम्, अन्तरेण निर्वचनासहत्वात्, तत्र चाभासत्वनियमात् ।

तदुक्तमाचार्यैः—

"रसभावादिविषयविवक्षाविरहे सति ।
अलङ्कारनिबन्धो यः स चित्रविषयो मतः ॥" इति ।

अत्र चित्रे । अलङ्कारा निर्णीयन्ते विशेषतो लक्ष्यन्तेऽत्रेत्यलङ्कारनिर्णयोऽन्तिमोल्लासद्वयम्, तत्र निर्णेष्यन्ते । शब्दार्थगतानामनुप्रासोपमादीनां हि ध्वनिगुणीभूतव्यङ्ग्यात्मककाव्याङ्गतयाऽलङ्कारभेद्रत्वम् । काव्याभासचित्राङ्गतायां तु वस्तुतोऽलङ्काराभासत्वेऽपि चालङ्कारत्वमुपचर्यते । एतच्च पूर्वमेवोक्तमिति कृतं विस्तरेण[२] ॥

इति काव्यप्रकाशदीपिकायां षष्ठ उल्लासः ॥

---

१. एतच्च श्रीधरमन्तव्यम् (का० प्र० वि० १८३ पृ०) । युक्तिश्च तत्खण्डने टीकाकृताऽत्र दर्शिता ।

२. यद्यपि चात्र प्रबन्धपर्यालोचनया तदङ्गमात्रत्वेन तेषां स्वीकारोऽगतिकतया टीकाकृताऽत्र कृतः, स्वकृते ध्वनिसिद्धान्तसंग्रहे च तन्मात्रतयैव तेषां काव्यव्यवहारोऽनुशिष्टः—"काव्यार्थस्याखण्डबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशायां गुणप्रधानभावावभासस्तावन्नानुभूयते, कालान्तरे तु प्रकरणादिपर्यालोचनया भवन्नप्यसौ न काव्यव्यपदेशं व्याहन्तुमीशः, तस्यास्वादमात्रायत्तत्वात्" इति, तथापि प्रबन्धोत्कर्षकृत्तया तदन्तर्गतस्य पद्यस्य काव्यत्वघोषणं प्रौढिरेव । "आस्वादजीवातुः पदसन्दर्भः काव्यम्", "वाक्यं रसात्मकं काव्यम्" इत्यादि काव्यलक्षणं कलयतां तेषामास्वादहीने रसविकले पद्ये काव्याकाव्यत्वयोरुभयोरित्थमनुषङ्गात्तेऽत्र कदर्थनीया एव ।

अथ सप्तम उल्लासः

काव्यस्वरूपं निरूप्य दोषाणां सामान्यलक्षणमाह--

(७१) मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद् वाच्यः ।
उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः ।।४९।।

हतिरपकर्षः । शब्दाद्या इत्याद्यग्रहणाद्वर्णरचने । विशेषलक्षणमाह--

---

उल्लाससङ्गतिमाह वृत्तिकारः--काव्येति । काव्यानां ध्वन्यादिभेदानां स्वेभ्यः सजातीयेभ्यो रूपं वैधर्म्यं निरूप्य निश्चित्य दोषगुणालङ्कारेषूपस्थितेषु हेयहानिपूर्वकमुपादेयोपादानमिति सूचयितुं दोषाणां प्राथमिकत्वम् । तत्र सामान्ये लक्षिते विशेषलक्षणानि सुकराणीति प्रथमं सामान्यलक्षणमवतार्यत इत्यर्थः[1] । मुख्य उद्देश्यश्चासावर्थश्चेति मुख्यार्थः । हतिर्दोषापकर्षशब्दाः करणसिद्धाः । तस्य रसस्याश्रय, उपायतयाऽपेक्षणं तस्माद् वाच्यो विभावादिरूपो मुख्यः । स दोषः । दोषाश्च केचिदाहत्यैव रसास्वादापकर्षकाः, केचिदङ्गापकर्षद्वारेति द्विविधाः । तत्राद्या रससन्निकृष्टा रसदोषा इत्युच्यन्ते । तेषां च स्वजात्यपेक्षया गाढत्वात्तद्धानमत्यन्तोपादयमिति पश्चात्तदुपन्यासः । शेषाणां तु तदपेक्षया हीनत्वात् प्रथमं गणनम् । तत्राप्यर्थदोषापेक्षया शब्ददोषाणां वाक्यदोषापेक्षया च पददोषाणामल्पत्वमित्युपन्यासक्रमसङ्गतिः । पदैकदेशदोषाणां तु बिरलप्रायत्वात् पददोषाणामेव च तत्रातिदेशाद् यत्र क्वचन गणनम् ।

---

१. हेयोपादेयज्ञानाधानत एव शास्त्रस्य शास्त्रत्वम्—

"सम्यङ्न्यायपरिज्ञानाद्धेयोपादेयवेदिनः ।
उपादेयमुपादाय गच्छन्ति परमां गतिम् ।।"

इति तार्किकाभाणकेन तच्च लक्षणज्ञाने पर्यवस्यतीति हेयकक्षापातिनां दोषाणां सामान्यलक्षणमवतार्यते । एषामुपादेयतायां टीकाकृदुद्भावितमतं सुष्ठु्वेव, परं शास्त्रविवर्तक्रमे पदादिदोषाणां शाब्दशास्त्रव्याकरणोपजीव्यतया दृष्टेषु भामहादिग्रन्थेषूद्दिष्टत्वाद् रसदोषाणां मुख्यानामपि ध्वनिकारविवेचितानां परिणामे निर्देशः कविसमयशासनानि च बहिरङ्गेष्वेव भरमादधतीति छन्दआगमादिविरोधपर्यवसितानामादावेव ग्रहणम् ।

(७२) दुष्टं[1] पदं श्रुतिकटुच्युतसंस्कृतमप्रयुक्तमसमर्थम् ।
निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाऽश्लीलम् ॥५०॥
संदिग्धमप्रतीतं ग्राम्यं नेयार्थमथ[2] भवेत् क्लिष्टम् ।
अविमृष्टविधेयांशं विरुद्धमतिकृत् समासगतमेव ॥५१॥

श्रुतिकटु परुषवर्णरूपं दुष्टं यथा—

अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः ।
आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा ॥१४१॥

अत्र कार्तार्थ्यमिति ।

च्युतसंस्कृतं व्याकरणलक्षणहीनं यथा—

एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डर-
प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते ।
तत्पल्लीपतिपुत्रि ! कुञ्जरकुलं कुम्भाभयाभ्यर्थना-
दीनं त्वामनु नाथते कुचयुगं पत्रावृतं मा कृथाः ॥१४२॥

अत्रानुनाथत इति । 'सर्पिषो नाथते' इत्यादाविवाशिष्येव नाथतेरात्मनेपदं विहितम् "आशिषि नाथ" इति । अत्र तु याचनमर्थः, तस्मात् "अनुनाथति स्तन-युगम्" इति पठनीयम् ।

दुष्टं पदमिति प्रत्येकमन्वयः । श्रुतिपति मात्रं यद्वैरस्यमावहति तत्पदं सर्वथा नोपादेयमिति प्रथमं तदुपन्यासः । एवमुत्तरत्रापि यथायोगं सङ्गतिर्वाच्या । दुष्टपदादिगणनेनैव तत्तद्दोषलक्षणानि सुकराणीति तदगणनम् । परुषवर्णरूपं माधुर्य हीनवर्णमयं कष्टप्रायोच्चारणतया कष्टं कार्तार्थ्यमित्येतद्विधमाधुर्य-व्यञ्जकरचनामध्यगुम्फितं श्रुतमात्रमेवास्वादयितृपुरुष मुद्वेजयतीति दुष्टम् । संस्कृतमिति, भावे क्तः । संस्कृतप्राकृतादिव्याकरणेन लक्ष्यते ज्ञायत इति व्याकरणलक्षणम्, तद्धीनम् । न तु व्याकरणेऽलक्षितमिति, देशीपदेषु[3] संज्ञासु च प्रसङ्गात् । अनुनाथत इत्यर्थासन्धानेऽसत्यपि पदस्यैवासाधुत्वम् । श्रुतिकटुव्यतिरिक्त-स्यार्थानुसन्धानेनैव दुष्टत्वात् । न चानुनाथत इत्येतावन्मात्रेण दोषानवगमात् पदान्तरापेक्षणे वाक्यदोषोऽयमिति वाच्यम्, तन्मात्रस्यैवानुशासनलङ्घनात्[4] ।

---

१. इदं दोषजातं पदगतं समासगतं च ।

२. अथेत्यादिना समासमात्रगतान् पददोषानाह ।

३. 'देशीपदेषु' इत्यवद्यः ख० पाठः । एवमपि का० प्र० वि० मातृकान्तरे पाठ उपलभ्यते ।

४. श्रीधरकृतमन्तव्यस्य प्रतिध्वनिरयम् । (का० प्र० वि०)

अप्रयुक्तं तथा आम्नातमपि कविभिर्नादृतम् । यथा--

यथाऽयं दारुणाचारः सर्वदैव विभाव्यते ।
तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा ।।१४३।।

अत्र दैवतशब्दो 'दैवतानि पुंसि वा" इति पुंस्याम्नातोऽपि न केनचित् प्रयुज्यते ।

असमर्थं यत्तदर्थं पठ्यते न च तत्रास्य शक्तिः । यथा—

तीर्थान्तरेषु स्नानेन समुपार्जितसत्कृतिः ।
सुरस्रोतस्विनीमेष हन्ति सम्प्रति सादरम् ।।१४४।।

अत्र हन्तीति गमनार्थम् ।

निहतार्थं यदुभयार्थमप्रसिद्धेऽर्थे प्रयुक्तम् । यथा—

यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन ।
मुग्धा साध्वसतरला विलोक्य परिचुम्बिता सहसा ।।१४५।।

अत्र शोणितशब्दस्य रुधिरलक्षणेनार्थेनोज्ज्वलीकृतत्वरूपोऽर्थो व्यवधीयते ।

अनुचितार्थं यथा --

तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या ।
प्रयान्ति तामाशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः।।१४६।।

अत्र पशुपदं कातरतामभिव्यनक्तीत्यनुचितार्थम् ।

आम्नातमनुशिष्टम् । कुतस्तर्हि दुष्टमित्याह–कविभिरिति । कविसमयसाध्या हि रसनिष्पत्तिः । एवंविधानां च प्रचुरप्रयोगहीनानां निबन्धे किमपि वैरस्यमनुभूयते एवेति दुष्टता । अत्र दैवतशब्दे यद्यपि पुंस्त्वमात्रमप्रयुक्तम्, तथापि समुदितमेव पदं न तु प्रकृतिमात्रमिति पददोषता । तादृशमेकार्थमेवाप्रयुक्तं प्रकृतेऽपि ।

सर्वथा प्रयोगाभावेऽनेकार्थेऽसमर्थत्वं यथा हन्तीत्यस्य । विरलप्रयोगे तु निहतः । प्रसिद्धेनार्थान्तरेण तिरस्कृतोऽर्थोऽस्येति व्युत्पत्त्या निहतार्थता । एकार्थस्यापि सार्वत्रिकप्रयोगविरहे एकशास्त्रमात्रप्रतीतत्वादप्रतीतत्वमिति[1] विभागः ।

कातरतामिति । अग्नीषोमीयाणां पशूनां मरणकाले तस्याः प्रतीयमानत्वात् । पूरणं वृत्तभङ्गाभावः । हिशब्द इति, हेत्वाद्यर्थशून्य इत्यर्थः । अदातरीति । अमर्षशून्येन विद्विषा जनस्य दरो भीतिर्न भवति, जातहार्देन रूढप्रणयेन जन्तुना प्राणि-

---

१. 'एकशास्त्रमात्रप्रतीतत्वम्' इति क० त्रुटितः पाठः ।

निरर्थकं पादपूरणमात्रप्रयोजनं चादिपदम् । यथा—

उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि ।
अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन ॥१४७॥

अत्र हिशब्दः ।

अवाचकं यथा—

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥१४८॥

अत्र जन्तुपदमदातर्यर्थे विवक्षितम्, तत्र च नाभिधायकम् ।

यथा वा-

हा धिक् सा किल तामसी शशिमुखी दृष्टा मया यत्र सा
तद्विच्छेदरुजाऽन्धकारितमिदं दग्धं दिनं कल्पितम् ।
किं कुर्मः कुशले सदैव विधुरो धाता न टेत्तत् कथं
तादृग्यामवतीलयौ भवति मे नो जीवलोकोऽधुना ॥१४९॥

अत्र दिनमिति प्रकाशमयमित्यर्थेऽवाचकम् ।

यच्चोपसर्गसंसर्गादर्थान्तरगतम् । यथा—

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्ताभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः ।
भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापी-
संभूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः ॥१५०॥

अत्र दधदित्यर्थे विदधदिति ।

मात्रेण किञ्चिदप्यदात्रा जनस्यादरो बहुमानो न भवतीति विवक्षितमत्र । न च गमने हन्तिरिव जन्तुपदमदातरि पठ्यत इत्यसमर्थाद् भेदः । सा तामसी तमःपिहित-सर्वलोका रात्रिः । किल इदं दिनं प्रकाशमयं कल्पितम् ।सूर्योदयास्तगमनावच्छिन्न-कालविशेषो दिनम्, प्रकाशश्च तदविनाभूतोऽपि न तच्छरीरम् ।

अर्थान्तरगतं सोपसर्गस्यानुपसर्गान्यतया वाचकशक्तिपरिवर्तनात् । तदुक्तम्—"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते" इति । ऊर्ध्वतनन्यासाभिनय-विशेषात्मको दण्डपादः[1] । विदधदिति करोत्यर्थत्वात् । व्यञ्जकत्वादिति ।

---

१. "नूपुरैश्चरणं कृत्वा दण्डपादं प्रसारयेत्" इत्यष्टोत्तरशतकरणप्रकरणे दण्डपादलक्षणं नाटचशास्त्रे । "पृष्तोऽभ्यञ्चितं कृत्वा पादमग्रतलेन तु । द्रुतं निपातयेद् भूमौ चारी नूपुरपादिका ॥" इति विवरणे तत्रत्य उत्तरो ग्रन्थः, "क्षिप्रापविद्धकरणं दण्डपादा

त्रिधेति व्रीडाजुगुप्साऽमङ्गलव्यञ्जकत्वात् । यथा—

साधनं सुमहद् यस्य यन्नान्यस्य विलोक्यते ।
तस्य धीशालिनः कोऽन्यः सहेतारालितां भ्रुवम् ॥१५१॥

लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः ।
मुग्धा कुड्मलिताननेन ददती वायुं स्थिता तत्र सा
भ्रान्त्या धूर्ततयाऽथवा नतिमृते तेनानिशं चुम्बिता ॥१५२॥

मृदुपवनविभिन्नो मत्प्रियाया विनाशाद्
घनरुचिरकलापो निःसपत्नोऽद्य जातः ।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे कं हरेदेष बर्ही ॥१५३॥

एषु साधनवायुविनाशशब्दा व्रीडादिव्यञ्जकाः ।

संदिग्धं यथा—

आलिङ्गितस्तत्रभवान् संपराये जयश्रिया ।
आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु ॥१५४॥

अत्र वन्द्यां किं हठहृतमहिलायां किं वा नमस्यामिति सन्देहः ।

अप्रतीतं यत् केवले शास्त्रे प्रसिद्धम् । यथा—

सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः ।
विधीयमानमप्येतन्न भवेत् कर्म बन्धनम् ॥१५५॥

अत्राशयशब्दो वासनापर्यायो योगशास्त्रादावेव प्रयुक्तः ।

ग्राम्यं यत् केवले लोके स्थितम् । यथा—

प्रत्यायकत्वादित्यर्थः । तेन तदर्थानां तदर्थान्तराणां चोपसंग्रहः । तत्स्मारकास्तु सन्धिपदैकदेशदोषा वक्ष्यन्ते । साधनं सैन्यं वराङ्गञ्च । अरालतां क्रोधकुटिलिताम् । वायुः पवमानमात्रवाचकोऽपाने प्रसिद्धः । विनाशोऽदर्शनमात्रं मरणं वा । **व्रीडादीति** । पूर्वमुदाहृतेति शेषः । केवले कतिपयस्मिन् शास्त्रे न तु लोकेऽपि । विधीयमानं क्रियमाणम् । वासनेत्यदृष्टनिर्देशः, अशक्तितो रूढिप्रयोजनविरहात् ।

तु सा स्मृताः ॥" इत्येतत्सहितमेव "पादसहितदण्डत्वरितहस्तं न्यसेत्" इति साटोपपरिक्रमादिविषयमित्यभिनवभारत्यां व्याख्यानं च ।

राकाविभावरीकान्तसंक्रान्तद्युति ते मुखम् ।
तपनीयशिलाशोभां कटिश्च हरते मनः ॥१५६॥

अत्र कटिरिति ।

नेयार्थम्–

"निरुढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत् ।
क्रियन्ते साम्प्रतं काश्चित् काश्चिन्नैव त्वशक्तितः ॥"

इति यन्निषिद्धं लक्षणिकम् । यथा—

शरकालसमुल्लासिपूर्णिमाशर्वरीप्रियम् ।
करोति ते मुखं तन्वि चपेटापातनातिथिम् ॥१५७॥

अत्र चपेटापातनेन निर्जितत्वं लक्ष्यते ।

अत्र समासगतमेव दुष्टमिति सम्बन्धः । अन्यत् केवलं समासगतं च क्लिष्टं ययोऽर्थप्रतिपत्तिर्व्यवहिता । यथा—

अत्रिलोचनसंभूतज्योतिरुद्गमभासिभिः ।
सदृशं शोभतेऽत्यर्थं भूपाल तव चेष्टितम् ॥१५८॥

अत्राऽत्रिलोचनसम्भूतस्य चन्द्रस्य ज्योतिरुद्गमेन भासिभिः कुमुदरित्यर्थः ।

अविमृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो यत्र तत् । यथा—

मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा-
धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम् ।
कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां ।
दोष्णां चैषां किमेतत् फलमिह नगरीरक्षणे यत् प्रयासः ॥१५९॥

अत्र मिथ्यामहिमत्वं नानुवाद्यम्, अपि तु विधेयम् । यथा वा—

स्रस्तां नितम्बादवरोपयन्ती पुनः पुनः केसरदामकाञ्चीम् ।
न्यासीकृता स्थाविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य ॥१६०॥

चपेटेति समुदायोपलक्षणम् । अत्र निर्जित इत्युक्ते यादृशार्थस्तदतिरिक्तो न लक्षणाप्रयोगे । न चेयं रूढिरिति नेयार्थता ।

अथेति प्रक्रमान्तरादित्यर्थः । विशेषनियमः शेषनियमपर्यवसायीत्याह— **अन्यदिति** । व्यवहिता शब्दार्थसम्बन्धप्रसिद्धिविरहाद् विलम्बिता । **अत्रीति** । समासैकपद्यम्, नानुवाद्यं नान्यपदार्थप्रधाने बहुव्रीहौ निक्षिप्य गुणीकार्यम् । विधेयमिति । न खलु महिम्नो मिथ्यात्वं स्वाभाविकम्, किं तर्हि तादृङ्महिम्ना प्रसिद्धस्य नगरीमात्ररक्षणेऽप्यक्षमत्वं परमाकीर्तिपर्यवसायीति सम्प्रति सर्वं मिथ्या भविष्यतीति प्राधान्यं मिथ्यात्वस्य । केसरो वकुलः । अत्र कर्मधारयस्यो-त्तरपदार्थप्रधानत्वात् पूर्वपदार्थो गुणीभूतः । न च तथा विवक्षितम्, मौर्वीगत-

अत्र द्वितीयत्वमात्रमुत्प्रेक्ष्यम् : मौर्वी द्वितीयामिति युक्तः पाठः ।

यथा वा—

वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने ॥

अत्र 'अलक्षिता जनिः' इति वाच्यम् । यथा वा—

आनन्दसिन्धुरतिचापलशालिचित्त–
संदाननैकसदनं क्षणमप्यमुक्ता ।
या सर्वदैव भवता तदुदन्तचिन्ता
तान्तिं तनोति तव सम्प्रति धिग्धिगस्मान् ॥

अत्र 'न मुक्ता' इति निषेधो विधेयः । यथा–

नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः,
सुरधनुरिदं दूराकृष्टं न तस्य शरासनम् ।
अयमपि पटुर्धारासारो न बाणपरम्परा,
कनकनिकषस्निग्धा विद्युत्प्रिया न ममोर्वशी ॥

इत्यत्र । न त्वमुक्ताऽनुवादेनान्यदत्र किञ्चिद्विहितम् । यथा—

जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ॥

इत्यत्रात्रस्ताऽनुवादेनात्मनो गोपनादि ।

द्वितीयताया एव विवक्षितत्वात् । अक्षमत्वं पाठान्तरस्वीकारेण द्रढयति–अत्रेति । एवंविधे हि पाठे[१] सविशेषणे हि कृतमुत्प्रेक्षणं विशेषण एव संक्रामति । पूर्वत्र बहुव्रीहावन्यपदार्थमात्रे गुणीभावः ।

सम्प्रति गुणीभूतान्यपदार्थगुणीभावं दर्शयति—यथेति । अत्र हि वपुषो विरूपाक्षत्वमिव जन्मनोऽलक्ष्यत्वं विधेयम् । एतच्चान्यपदार्थे। सोऽपि भाव-प्रत्ययार्थो गुणभूतः ।

नञ् समासमुदाहरति –यथेति । नञर्थप्राधान्येऽपि न समासः, किन्त्वन्याङ्ग-भावे । एवमात्रार्थे प्रत्युदाहृतिद्वयम्–तत्राद्यो नवेति, द्वितीयो जुगोपेति । अत्रस्तता-दीति त्रासाद्यभावेऽप्यात्मगोपनं नीतिमनुसृत्य कृतवानित्यत्रस्ततादेरनूद्यत्वस्य विधेये गोपनादौ युक्त एवाङ्गभावः । अब्राह्मण इत्यादाविवाभावविशेषाधायिनः

---

१. न चात्र पाठे वृत्तभङ्गः शङ्कनीयः, तत्र श्रव्यतामात्रलक्षणत्वात्; ''पादान्तेषु वहुलं गुरु'' इति बहुलग्रहणेनात्रापि वसन्तति कादाविव गुर्वन्तता नियमस्यान्यैरनादृतत्वादिति व्यक्तिविवेककृतः समाधानमत्रानुस्मरणीयम् । तत्र विप्रतिपत्तिश्च विवेचिताऽस्माभिरितरत्र (का० प्र० वि० १९५–१९६ पृ०) ।

विरुद्धमतिकृद् यथा—

सुधाकरकराकारविशारदविचेष्टितः ।
अकार्यमित्रमेकोऽसौ तस्य किं वर्णयामहे ॥

अत्र कार्यं विना मित्रमिति विवक्षितम्, अकार्येषु मित्रमिति तु प्रतीतिः ।

यथा वा—

चिरकालपरिप्राप्तलोचनानन्ददायिनः ।
कान्ता कान्तस्य सहसा विदधाति गलग्रहम् ॥

अत्र कण्ठग्रहमिति वाच्यम् । तथा—

न त्रस्तं यदि नाम भूतकरुणासन्तानशान्तात्मन-
स्तेन व्यारुजता धनुर्भगवतो देवाद् भवानीपतेः ।
तत्पुत्रस्तु मदान्धतारकवधाद्विश्वस्य दत्तोत्सवः
स्कन्दः स्कन्द इव प्रियोऽहमथवा शिष्यः कथं विस्मृतः ॥

अत्र भवानीपतिशब्दो भवान्याः पत्यन्तरे प्रतीतिं करोति । तथा—

गोरपि यद्वाहनतां प्राप्तवतः सोऽपि गिरिसुतासिंहः ।
सविधे निरहङ्कारः पायाद् वः सोऽम्बिकारमणः ॥

अत्राम्बिकारमण इति विरुद्धां धियमुत्पादयति ।

पर्युदासनञैव समासो न त्वभावमात्राभिधायिनः प्रसज्जयस्य । अश्राद्धभोजीत्यादावपि हि श्राद्धभोजननिषेधमात्रं न प्रतीयते, किन्तु तथाविधनियमविशिष्टपुरुष एव । यदुक्तम्—

"प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥" इति ।

कार्यं विना सहजस्नेहानुबन्धेन । भूतेषु जन्तुषु करुणासन्तानोदयानवच्छेदः । तेन दाशरथिना । भवस्य पत्नी भवानी तस्याः पतिरित्युक्ते न व्याघुट्येति भवः प्रतिपद्यते । विरुद्धामिति । अम्बिका जननी तस्या रमणः कामुक इत्येवमाकारम् ।

---

१. "गलग्रहपदमालिङ्गने प्रयुक्तं पूर्वप्रकान्तानन्ददायिताविरुद्धरूपनिःसारणमतिकृति" इति श्रीधरः । गलग्रहपदेनार्धचन्द्रं दत्त्वा निःसारणमिति लोकप्रसिद्धिरिति सहजा योजना । "रूढिर्योगापहारिणीति न्यायेन कण्ठग्रहार्थापहारेण रोगविशेष एव प्रतीयते । ततश्च विरुद्धमतिकृत्त्वम्" इति श्रीवत्सलाञ्छनभट्टाचार्याः । वङ्गीयभाषायां पदस्यास्य प्रसिद्धोऽर्थो भारभूत इति स च संस्कृतसाहित्ये बिरललक्ष्यः । अन्यच्च स विदधात्याख्यातेन नान्वयमर्हति ।

श्रुतिकटु समासगतं यथा--

सा दूरे च सुधासान्द्रतरङ्गितविलोचना।
बर्हिनिर्ह्रादनार्होऽयं कालश्च समुपागतः॥

एवमन्यदपि ज्ञेयम्।

७४ अपास्य च्युतसंस्कारमसमर्थं निरर्थकम्।

वाक्येऽपि दोषाः सन्त्येते पदस्यांशेऽपि केचन॥५२॥

केचन न पुनः सर्वे। क्रमेणोदाहरणम्--

सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनताप्सीत् सममंस्त बन्धून्।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च॥

स रातु वो दुश्च्यवनो भावुकानां परम्पराम्।
अनेडमूकताद्यैश्च द्यतु दोषैरसम्मतान्॥

अत्र दुश्च्यवन इन्द्रः। अनेडमूको वधिरः।

सायकसहायबाहोर्मकरध्वजनियमितक्षमाऽधिपतेः।
अब्जरुचिभास्वरस्ते भातितरामवनिप श्लोकः॥

श्रुतिकटुप्रभृतिसमासासमासगतमित्युक्तम्। असमासे चोदाहृतम्। सम्प्रति समास उदाहरति--सेति। बर्ही मयूरस्तस्य निर्ह्रादो ध्वनिः। गौरवभीत्या संक्षिपति एवमिति। यथा आक्रोशे दासीकामुक इति। च्युतसंस्कृतिपूर्वं यदसमास उदाहृतं तत्। समासे यत् समासे दलिताशयताजुष इत्यादावप्रतीतत्वादि तदसमासे मृग्यमाकरतः।

सम्प्रति पददोषान्तरं वाक्यदोषा वाच्याः। ते च पददोषाणां सजातीया विजातीयाश्चेति द्विविधाः। तेषु सजातीयसन्निधाने प्रथमानाह—अपास्येति : च्युतसंस्कारमित्यादिभावप्रधानो निर्देशः। एतद्द्वयवतो लक्ष्यस्यासम्भवादेषामपासनम्। एते दोषाः श्रुतिकट्वित्यादिप[1]दविशेषणपदप्रवृत्तिनिमित्तभूताः। श्रुतिकटुत्वादयः। अंशे एकदेशे। क्रमेणेत्यतः पूर्वं पूर्ववदिति शेषः। कामक्रोधलोभहर्षमानमदाःषड्वर्गः[2]

---

१. 'पदविशेषण...भूता' इति ख० नास्ति।

२. अत्र श्रुतिकटुत्वसमर्थनं गौडीयानां काव्यप्रकाशटीकाकृतामतिप्राचीनेन पुण्डरीकाक्ष-विद्यासागरेणोद्भावितं न विदग्धेभ्यो रोचते। भट्टिकाव्यं वैयाकरणेन कृतमिति नास्ति विप्रतिपत्तिः, परं नोद्दिष्टे श्लोके वैयाकरणत्वचिख्यापयिषया वक्त्रोच्यते। अतः श्रीवत्सलाञ्छनमन्तव्यं "विद्यासागरोक्तदूषणं तेषामेवेति" सुस्थितमेव।

अश सायकादयः शब्दाः खड्गाब्धिभूचन्द्रयशःपर्यायाः शराद्यर्थतया प्रसिद्धाः ।

कुविन्दस्त्वं तावत् पटयसि गुणग्राममभितो,
यशो गायन्त्येते दिशि दिशि च नग्नास्तव विभो ।
शरज्ज्योत्स्नागौरस्फुटविकटसर्वाङ्गसुभगा
तथापि त्वत्कीर्तिर्भ्रमति विगताच्छादनमिह ॥

अत्र कुविन्दादिशब्दोऽर्थान्तरं प्रतिपादयन्नुपश्लोक्यमानस्य तिरस्कारं व्यनक्तीत्यनुचितार्थः ।

प्राभ्रभ्राड्विष्णुधामाप्य विषमाश्वः करोत्ययम् ।
निद्रां सहस्रपर्णानां पलायनपरायणाम् ।

अत्र प्राभ्रविष्णुधामविषमाश्वनिद्रापर्णशब्दाः प्रकृष्टजलदगगनसप्ताश्वसङ्कोचदलानामवाचकाः ।

भूपतेरुपसर्पन्ती कम्पना वामलोचना ।
तत्तत्प्रहरणोत्साहवती मोहनमादधौ ॥

अत्रोपसर्पणप्रहणनमोहनशब्दा व्रीडादायित्वादश्लीलाः ।

तेऽन्यैर्वान्तं समश्नन्ति परोत्सर्गञ्च भुञ्जते ।
इतरार्थग्रहे येषां कवीनां स्यात् प्रवर्तनम् ॥

अत्र वान्तोत्सर्गप्रवर्तनशब्दा जुगुप्सादायिनः ।

पितृवसतिमहं व्रजामि तां सह परिवारजनेन यत्र मे ।
भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकम् ॥

अत्राध्यैष्टेत्यादिक्रियापदानामेव श्रुतिकटुता यद्यपि, तथाप्यनेकपदमात्रं वाक्यमिति विवक्षा । यद्वा व्यजेष्ट षड्वर्गमिति क्रियाकारके वाक्यमेवाप्रयुक्तमाह-स इति । रातु ददातु भावुकानां कल्याणानाम् द्यतु खण्डयतु । एतेषां तेष्वनुशिष्टानामपि कविभिस्तत्र प्रयोगाभावाद्धन्तिवदुभयार्थाभावाच्चाप्रयुक्तता । श्लोकः कीर्तिः । कुविन्दो लब्धपृथ्वीकस्तन्तुवायश्च । पटयसि पटुं करोषि पटतां नयसि । गुणा वीर्यादयस्तन्तवश्च । अभितः सर्वत आरोहपरिणामाभ्याञ्च । यश इत्यकारप्रश्लेषे-णायशः[१] । नग्ना वन्दिनो विवस्त्राश्च । आच्छादनमावरणं वसनञ्च । अत्र प्राभ्रेति प्रकृष्टजलद इत्यनेन यथासंख्यमन्वीयते । प्राभ्रेत्यनन्तरं भ्राडिति[२] पाठे गगनेत्यतः

---

१. एतच्च श्रीधरमनुसृत्य (का० प्र० वि० १६६ पृ०) ।

२. अभ्रे भ्राजते इत्यभ्रभ्राड् जलद इति साधारणं समाधानमित्याशयः ।

अत्र पितृगृहमित्यादौ विवक्षिते श्मशानादिप्रतीतावमङ्गलार्थत्वम् ।

सुरालयोल्लासपरः प्राप्तपर्याप्तकम्पनः ।
मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यताम् ॥

अत्र किं सुरादिशब्दा देवसेनाशरविभूत्यर्थाः किं मदिराद्यर्था इति सन्देहः ।

तस्याधि त्रोपायस्य तीव्रसंवेगताजुषः ।
दृढभूमिः प्रियप्राप्तौ यत्नः स फलितः सखे ॥

अत्राधिमात्रोपायादयः शब्दा योगशास्त्रमात्रप्रयुक्तत्वादप्रतीताः ।

ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानुषः :
करोति खादनं पानं सदैव तु यथा तथा ॥

अत्र गल्लादयः शब्दा ग्राम्याः[१] ।

पूर्वं शोभनेति पूरणीयम् । कम्पना सेना वेपमाना च । वामलोचना श्वश्रूषु प्रतिकूललोचना मञ्जुनयना च । उपसर्पणप्रहणनमोहनशब्दाः सुरतारम्भताडनधातुविसर्गात्मकार्थान्तराः । वान्तं छर्दितम् । उत्सर्गो भुक्तशेषः पुरीषत्यागश्च । प्रवर्तनमभिनिवेशो विष्ठोत्सर्गश्च । पितृवसतिः पितृगृहं श्मशानञ्च । पावकान्वयेऽग्निसम्बन्धे पवित्रवंशे च । अशेषितेत्यादि मुखे मरणे च युज्यते । सुरालयः स्वर्गो मदिरागृहं च । कम्पना सेना कम्पनं कम्पश्च । मार्गणः शरः मार्गणं याञ्चा । भूतिः सम्पद् भस्म च ।

अधिमात्रोपायस्येति । प्रकृष्टसाधनसामग्रीकस्तथा मृदूपायो मध्योपायश्चेति त्रिधा योगी । प्रत्येकञ्च सरभसोद्यमशालित्वं तीव्रसंवेगित्वं मृदुमध्यसंवेगित्वं चेति त्रिधा । तत्राधिमात्रोपायतीव्रसंवेगस्य शेषापेक्षया प्रत्यासन्नः समाधिलाभः, समाधिप्रयोजनं च तपोविद्याब्रह्मचर्यादिसाधनसम्पन्नश्चिरकालनैरन्तर्यध्यानाभ्यासः संसारदाढर्यदायी दृढभूमिः ।

---

१. "तथाप्यग्राम्यतयैवैनं मारं वहति भूयसा" इति दण्डिप्रदर्शितमाधुर्योपलक्षणे ग्राम्याणां पदानामनुपादाने स्वीकृतम् । ग्राम्यपदेन न केवलं देशीति परिभाषितानां न वा शास्त्राप्रसिद्धानां परामर्शः, किन्तु विदग्धगोष्ठीबहिर्भूतानामपि । "पातालप्रतिमल्लगल्लविवर······" इत्यादिर्मालतीमाधवप्रयोगस्त्वमनोज्ञ एव, कथञ्चिदनुप्रासमहिम्ना समर्थनीयः ।

२. दृढभूमिरिति योगशास्त्रपरिभाषातस्तथाप्रसिद्धेः । तथा च योगसूत्रोपरि व्यासभाष्ये—"स तु दीर्घकालनैरन्तर्यात् सेवितस्तपसा ब्रह्मचर्येण विद्यया श्रद्धया च सम्पादितः संस्कारवान् व्युत्थानसंस्कारेण झटित्येवानभिभूतविषयो दृढभूमिरित्युच्यते" इति ।

वस्त्रवैदूर्यचरणैः क्षतसत्त्वरजःपरा ।
निष्कम्पा रचिता नेत्रयुद्धं वेदय साम्प्रतम् ॥

अत्राम्बररत्नपादैः क्षततमा अचला भूः कृता, नेत्रद्वन्द्वं बोधयेति नेवार्थता।

धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशावाक्ष्याः ।
रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम् ॥

अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति सम्बन्धे क्लिष्टत्वम् ।

न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिग् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥

अत्र 'अयमेव न्यक्कारः' इति वाच्यम् । उच्छूनत्वमात्रं चानुवाद्यं न वृथात्वविशेषितम् । अत्र च शब्दरचना विपरीता कृतेति वाक्यस्यैव दोषो न वाक्यार्थस्य ।

यथा वा--

अपाङ्गसंसर्गि तरङ्गितं दृशोर्भ्रुवोररालान्तविलासि वेल्लनम् ।
विसारि रोमाञ्चनकञ्चुकं तनोस्तनोति योऽसौ सुभगे तवागतः ॥

गल्लादय इत्यादिना भल्लमानुषरवादनपानपरिग्रहः । वस्त्रवैदूर्यादिषु रूढिप्रयोजनाभावान्नेयार्थता । धम्मिल्लस्येत्यादि । अत्राकाङ्क्षायोग्यताभावसन्निधिस्थानानामन्वयानुपपत्त्या प्रत्ययविलम्बात् क्लिष्टता । क्लिष्टत्वादित्रयं च समासगतं पददोष एवेत्यसमासगतमेव वाक्यदोषतयोदाहृतम् । 'अयमेव न्यक्कारः' इतीदमर्थानुवादेन हि न्यक्कारता विधेया, ततश्च यच्छब्दप्रयोगप्राथम्यमित्युद्देश्यलक्षणम् । तत्र कर्मिणमुद्दिश्य साध्यधर्मो विधीयत इत्युक्तदिशा इदमः प्रथमं न्यक्कारस्य चानन्तरं निर्देशो युक्तः । अत्रोद्देश्यविधेयपदद्वयगतत्वाद् वाक्यदोषता । न वृथात्वेति । न खलु वृथात्वं प्रसिद्धम्, किन्त्वधुनैव विधेयम् । इदं च न वाक्योदाहरणम्, मिथ्यामहिमत्वविशेषात् । शब्दरचनेति । तत्परिवर्तनेऽस्य दोषस्योद्धारादित्यर्थः ।

अरालं कुटिलम् । वेल्लनं चलनम् । योऽसावित्यत्र य इत्यनूद्यार्थः, असाविति तत्परामर्शकः । न चैवं प्रतीतिः, [१]शब्दशक्तिस्वभावेन यत्पदेसन्निहितस्यादसस्तच्छब्दार्थबोधकत्वात् । एतदेव प्रपञ्चेनोपपादयति-तथाहींति । शब्दशक्तिवैचित्र्यं

---

१. शब्दशक्तीति । तदोऽनुपादानेन नाप्यपेक्षा प्रतूर्येत इत्याशयः ।

अत्र योऽसाविति पदद्वयमनुवाद्यमात्रप्रतीतिकृत् । तथाहि--प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते । क्रमेणोदाहरणम्--

कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम् ।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥

उत्कम्पिनी भयपरिस्खलितांशुकान्ता ते लोचने प्रतिदिशं विधुरे क्षिपन्ती ।
क्रूरेण दारुणतया सहसैव दग्धा धूमान्धितेन दहनेन न वीक्षितासि ॥

यच्छब्दस्तूत्तरवाक्यानुगतत्वेनोपात्तः सामर्थ्यात् पूर्ववाक्यानुगतस्य तच्छब्दस्योपादानं नापेक्षते । यथा--

साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताऽधिके ।
उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः ॥

दृश्यत एवेति भावः यत्तदोस्तावदन्योन्यापेक्षित्वमावश्यकम्, तदाहुः–यत्तदोर्नित्याभिसम्बन्ध इति । स तु शाब्द आर्थश्च । तत्र द्वयोरुपादाने पूर्वः एकस्य द्वयोरपि वाऽनुपादाने आर्थः । एकोपादानेऽपि यदस्तदो वेति विकल्पः । तत्र तद उपादानं यदश्चार्थतां प्रकारत्रयेणेत्याह--प्रक्रान्त इत्यादि ।

कातर्यमित्यत्र स इत्यनेन यः पूर्ववर्णित इति प्रत्याय्यते । द्वयमिति । सेत्यनेन या त्रैलोक्यजीवातुभूता सकलजननयनानन्ददायिनीत्यादि प्रकाश्यते । उत्कम्पिनीत्यत्र[1] ते इत्यनेन ये तथाविधलावण्यलहरीपरिप्लुते सहजत्रस्तहरिणीलोले च[2] इत्यादि प्रतीयते । यत्र तु तदो यत्परामर्शासहिष्णुता तत्र तदुपन्यास एव न्याय्यः। यथा—

"सः वः शशिकलामौलिस्तादात्म्यायोपकल्पताम् ।
द्वैतबुद्धिमपास्येमां सा हि सर्वापदां पदम् ॥"[3] इति ।

---

१. तापसवत्सराजीयमिदं पद्यम् । इयं हि वासवदत्तादाहाकर्णनपृथुशोकनिर्भरस्य वत्सराजस्योक्तिः । "तदिह सुसंवेद्याव्यपदेश्यलोकोत्तरविलासपरिस्पन्ददीर्घत्वाद्यनन्तधर्मान्तराक्रान्तानुभूतलोचनविषयस्तच्छब्दः" इति लोचनकृतां विवरणम् ।

२. 'हरिणीदीनेति च पाठः प्रतीयते' इति विचित्रप्रायः ख० पाठः ।

३. एतच्च व्यक्तिविवेकग्रन्थमनुसृत्य । युक्तिश्च तत्रैव–"यतोऽध्यक्षायमाणोऽर्थः स तेभ्य प्रतिपद्यते । न चासौ तत्परामर्शसहिष्णुरसमन्वयाद्", इति तत्रत्यैवात्रानूद्यते । एवं प्रागुत्तरत्र च सप्तमोल्लासटीकायां स एव टीकाकृत उपजीव्यः ।

प्रागुपात्तस्तु यच्छब्दस्तच्छब्दोपादानं विना साकाङ्क्षः, यथाऽत्रैव श्लोके आद्यपादयोर्व्यत्यासे। द्वयोरुपादाने तु निराकाङ्क्षत्वं प्रसिद्धम्। अनुपादानेऽपि सामर्थ्यात् कुत्रचिद् द्वयमपि गम्यते। यथा--

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः।
उपत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥

अत्र य उत्पत्स्यते तं प्रतीति।

एवञ्च तच्छब्दानुपादानेऽत्र साकाङ्क्षत्वम्। न चासाविति तच्छब्दार्थमाह।

असौ मरुच्चुम्बितचारुकेसरः प्रसन्नताराधिपमण्डलाग्रणीः।
वियुक्तरामातुरदृष्टिवीक्षितो वसन्तकालो हनुमानिवागतः॥

अत्र हि न तच्छब्दार्थप्रतीतिः।

प्रतीतौ वा--

करवालकरालदोःसहायो युधि योऽसौ विजयार्जुतैकमल्लः।
यदि भूपतिना स तत्र कार्ये विनियुज्येत ततः कृतं कृतं स्यात्॥

अत्रैकात्म्यायेति एषेति च युक्तम्, परामृश्यसाध्यतायमाणतया तदर्थस्यासमन्वयात्।

सम्प्रति यद उपादानं तदश्चार्थत्वमुदाहर्तुमाह--यच्छब्दस्त्विति। उत्तरवाक्यानुगतत्वेनोत्तरवाक्यार्थबोधाङ्गपदार्थपरतया। एवं पूर्ववाक्यानुगतस्यान्यत्र। उभयत्राप्यनुशब्दाभावपाठस्तु सुव्यक्त एव। सामर्थ्यात् तदपेक्षकत्वात्। अनेन "आत्मा जानाति यत् पापम्", "माता जानाति यः पिता" इत्यादेरपि संग्रहः। "यं सर्वशैलाः" इत्यादौ तूत्तरवाक्यं सुस्थमेव। साकाङ्क्ष इति। अनेन न्यूनपदत्वमभिप्रैति। उभयोः शाब्दतामाह--द्वयोरित्यादि। यथा--"यदुवाच न तन्मिथ्या", "स दुर्मतिः श्रेयसि यस्य नादरः" इति। द्वयोरप्यार्थत्वमाह--अनुपादानेऽपीति। सामर्थ्यात् प्रतीत्यन्यथाऽनुपपत्त्या कल्पनीय इत्यर्थः।

एवं विक्षिप्योपपाद्य प्रकृत उपयोजयति--एवमिति। अत्रेति 'अपाङ्ग' इत्यादौ। ननु तदस्तावदुभयपरामर्शसाधारणोऽर्थः प्रक्रान्तादीनाञ्च क्वाचित्कानां तद्विशेषरूपत्वात्, स चादसोऽपि शक्यक्रिय एवेति चेदत्राह--न चेति।

अत्रायमभिसन्धिः--किं सर्वत्रैवादसस्तच्छब्दसमानार्थत्वं सामग्रीमाहात्म्येन क्वाचित्कं वा?

अत्र स इत्यस्यानर्थक्यं भवेत्[१] ।

अथ—

योऽविकल्पमिदमर्थमण्डलं पश्यतीश निखिलं भवद्वपुः ।
आत्मपक्षपरिपूरिते जगत्यस्य नित्यसुखिनः कुतो भयम् ॥१९२॥

इतीदंशब्दवददःशब्दस्तच्छब्दार्थमभिधत्त इत्युच्यते । [२]तर्ह्यत्रैव वाक्यान्तर उपादानमर्हति, न तत्रैव । यच्छब्दस्य हि निकटे स्थितः प्रसिद्धिं परामृशति । यथा—

यत्तदूर्जितमत्युग्रं क्षात्रं तेजोऽस्य भूपतेः ।
दीव्यताऽक्षैस्तदाऽनेन नूनं तदपि हारितम् ॥१९३॥

इत्यत्र तच्छब्दः ।

ननु कथम्—

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते
धुर्यां लक्ष्मीमथ मयि भृशं धेहि देव प्रसीद ।
यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन् भूयसे मङ्गलाय ॥१९४॥

अत्र यद्यदित्युक्त्वा तन्म इत्युक्तम् । उच्यते—यद्यदिति येन केनचिद् रूपेण स्थितं सर्वात्मकं वस्त्वाक्षिप्तम्, तथाभूतमेव मच्छब्देन परामृश्यते ।

तथा—

किं लोभेन विलङ्घितः स भरतो येनैतदेवं कृतं
मात्रा स्त्रीलघुतां गता किमथवा मातैव मे मध्यमा ।
मिथ्यैतन्मम चिन्तितं द्वितयमप्यार्यानुजोऽसौ गुरु-
र्माता तातकलत्रमित्यनुचितं मन्ये विधात्रा कृतम् ॥१९५॥

तत्राद्ये परिहारमाह—असाविति । केसरो वकुलः सटा च । ताराधिपमण्डलं चन्द्रबिम्बं सुग्रीवसैन्यं च । रामो दाशरथी रामनायिका ।

अत्रापि विप्रतिपन्नं निरुत्तरयति—प्रतीतौ वेति । भावेदित्यनन्तरं न चैवमनुभूयत इति शेषः । द्वितीय अथेति । अविकल्पं निःसन्देहम् । इदंशब्दवदिति तच्छब्दसमानार्थत्वादित्यर्थः । वाक्यान्तरे व्यवधायिनि तथैव दर्शनादिति भावः । तर्ह्येवमादावदसः कोऽर्थ इत्याह—यच्छब्दस्येत्यादि । प्रसिद्धप्रत्यभिज्ञाद्योतकत्वादित्यर्थः ।

अत्र दृष्टान्तमाह–यथेति । एवंविधे यदि तदोऽपि प्रसिद्धार्थमात्रता, तदाऽदसः का कथेति भावः ।

---

१. स्यादिति केषाञ्चित् पाठः ।

२. तनोति योऽसौ इत्यत्रैवेत्यर्थः । अनेन इति पाठे, तु योऽविकल्प इत्यत्रैवेत्यर्थः ।

अत्रार्यस्येति तातस्येति च वाच्यम्, न त्वनयोः समासे गुणीभावः कार्यः। एवं समासान्तरेऽप्युदाहार्यम्।

विरुद्धमतिकृद्यथा—

श्रितक्षमा रक्तभुवः शिवालिङ्गितमूर्तयः।
विग्रहक्षपणेनाद्य शेरते ते गतासुखाः ॥१९६॥

अत्र क्षमादिगुणयुक्ताः सुखमासत इति विवक्षिते हता इति विरुद्धा प्रतीतिः।

पदैकदेशे यथासम्भवं क्रमेणोदाहरणम्—

अलमतिचपलत्वात् स्वप्नमायोपमत्वात्
परिणतिविरसत्वात् सङ्गमेनाङ्गनायाः।
इति यदि शतकृत्वस्तत्त्वमालोचयाम-
स्तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा ॥१९७॥

अत्र त्वादिति। यथा वा—

तद् गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरलभ्य एव।
अपेक्षते प्रत्ययमङ्गलब्ध्यै बीजाङ्कुरः प्रागुदयादिवाम्भः ॥१९८॥

नन्विति। यावानेवार्थो यदा प्रकाशितस्तावानेव तदा परामर्शनीयः। यदा च द्विरुपात्तेन सर्वप्रकारस्थितं पापमनूदितम्, न च तावत एव परामर्शने तदः शक्तिर्भवति, द्विरुपादानविरहादिति शङ्काऽर्थः। परिहारार्थस्तु तदिति। प्रकृतपरामर्शिणा न यदर्थमात्रं परामृश्यते, किन्तु तद्विशिष्टपापं तत्परामर्शे च सर्व एव विशेषणार्थः परामृष्टो भवतीति। तथेति पदगतविधेयाविमर्शे सिंहावलोकनन्यायेन तत्[1] पुरुषोदाहृतिः, द्वितीयमौर्वीमित्यादावपि प्रसङ्गात्, तत्र विस्मरणादनाप्तव्यामोहनाय वा सजातीयप्रस्तावादत्रोक्तिः। तत्रार्यतातसम्बन्धाद् विशेषो विवक्षित इति शाब्दे गुणाभावेऽप्यार्थं प्रन्धान्यमनयोः समासे चोत्तरपदार्थप्रधानत्वादुल्लङ्घनीयं स्यात्। समासान्तरे[2] विभक्त्यन्तरतत्पुरुषादौ। क्षमा सहिष्णुता भूमिश्च। रक्तभुवो रञ्जितराष्ट्रा रुधिराश्रयाः। शिवं कल्याणं शिवा फेरवः। विग्रहो युद्धं देहश्च। अमतपरार्थत्वे परार्थेऽपि कविविवक्षितो नात्र चैवमिति ततो भेदः।

यथासम्भवमिति यथादर्शनमित्यर्थः। क्रमेणत्यतः पूर्वं पूर्वेति शेषः। अत्र

---

१. अत्र श्रीवत्सलाञ्छनभट्टाचार्यास्तु चण्डीदासमतमसङ्गतमिति मन्यन्ते। अनेकपदगतत्वाद् वाक्यदोषतयैव पदयोः परस्परसाकाङ्क्षाविरह एव साकाङ्क्षनानापदवृत्तिदोषस्य प्रसक्तेरिति।

२. एतच्च वितत्यालोचितं मूलकृदुपजीव्ये व्यक्तिविवेके। तत्र बहुव्रीहिद्वन्द्वप्रभृतिसमासानामपि निदर्शनानि दत्तानि।

अत्र द्‌ध्यै ब्ध्यै इति कष्टम्[1] ।

यश्चाप्सरो विभ्रममण्डनानां सम्पादयित्री शिखरैर्बिभर्ति ।
बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्ताम् ॥१९९॥

अत्र मत्ताशब्दः क्षीबार्थेन[2] निहतार्थः ।

आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासित-
प्रोत्सर्पद्विरहानलेन च ततः सन्तापितानां दृशाम् ।
सम्प्रत्येव निषेकमश्रुपयसा देवस्य चेतो भुवो
भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा ॥२००॥

अत्र दृशामिति बहुवचनं निरर्थकम्, कुरङ्गेक्षणाया एकस्या एवोपादानात् । न च "अलसवलितैः" इत्यादिवद् व्यापारभेदाद् बहुत्वम्, व्यापाराणामनुपात्तत्वात् । न च व्यापारेऽत्र दृक्शब्दो वर्तते । अत्रैव 'कुरुते' इत्यात्मनेपदमप्यनर्थकम्, प्रधान-क्रियाफलस्य कर्त्रसम्बन्धे कर्त्रभिप्रायक्रियाफलाभावात् ।

चापाचार्यस्त्रिपुरविजयी कार्तिकेयो विजेयः
शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः ।

त्वात्, त्वादिति कटु इति वक्ष्यमाणेनान्वयः । ध्यै ब्ध्यै इति च कष्टश्रुतिकमित्यर्थः । क्षीबार्थेन प्रसिद्धेनेत्यर्थः । भल्लीनामिवेति । ता अपि लवणाञ्जनलिप्ता अनलेन सन्ताप्यायस्कारा जलपानं कारयन्ति । बहुवचनमिति, द्वित्वस्येवोपपत्तेरित्यर्थः । बहु-वचनोपात्ता एव व्यापारभेदा भवन्त्वित्याह—न चेति व्यापारेति । तत्राञ्जनलेपाद्य-सम्भवादित्यर्थः । प्रधानेति फलवती कर्तर्यात्मनेपदमनुशिष्टम् न चात्र तथा, फलेन पानकर्मणा कर्तुः सम्बन्धाभावात् अंशाभिप्रायेणायं दोषः, समुदायाभिप्रायेण द्वयोरपि च्युतसंस्कारता[3] ।

हन्तकारोऽतिथिबलिः । कृत्यप्रत्ययो योग्यतार्थो न त्वतीतार्थः । पेलवपदस्य मृद्वर्थस्य वकारवर्जितो भागो व्रीडादायी । य इति । मुखपदमाद्यर्थम् । कीलनं

---

१. कष्टमिति तु मातृकालिप्योरुभयोरेव पाठः । स च सरस्वतीकण्ठाभरणसंज्ञानुसारी, प्रतीकरूपेण तस्यैव ग्रहणान्मूलग्रन्थोऽपि टीकाकृता तथा पठितः, परं मूलकृदुपक्रमे श्रुति-कट्विति निर्देशमेव करोति ।

२ एवं टीकाकृतां पाठः । क्षीबार्थत्वेनेति यावत् ।

३. अत्र "कर्तृः स्वार्थे क्रिया फले" इति वैयाकरणनयलङ्घनात्तथा बहुषु बहुवचनमिति सूत्राशयतिरस्कारादेव वाच्यम् । एकस्याः कुरङ्गेक्षणाया दृग्बहुत्वासम्भवेन द्वितीयकक्षा-पूर्तिः । वस्तुतस्त्वंशाभिप्रायेणेत्यादि चण्डीदासमन्तव्यं न साधु । तत्र काव्यप्रदीप-कृतां युक्तिः—"बहुत्वाविवक्षामात्र मित्यनर्थतैव" इति सुस्थितैव ।

अस्त्येवैतत् किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्धस्तव परशुना लज्जते चन्द्रहासः ॥२०१॥

अत्र विजेय इति कृत्यप्रत्ययः क्तप्रत्ययार्थेऽवाचकः ।

अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठः ।
परमार्थतः स हृदयं वहति पुनः कालकूटघटितमिव ॥२०२॥

अत्र पेलवशब्दः ।

यः पूयते सुरसरिन्मुखतीर्थसार्थस्नानेन शास्त्रपरिशीलनकीलनेन ।
सौजन्यमान्यजनिरूर्जितमूर्जितानां सोऽयं दृशोःपतति कस्यचिदेव पुंसः ॥२०३॥

अत्र पूयशब्दः ।

विनयप्रणयैककेतनं सततं योऽभवदङ्ग तादृशः ।
कथमद्य स तद्वदीक्ष्यतां तदभिप्रेतपदं समागतः ॥२०४॥

अत्र प्रेतशब्दः ।

कस्मिन् कर्मणि सामर्थ्यमस्य नोत्तपतेतराम् ।
अयं साधुचरस्तस्मादञ्जलिर्बध्यतामिह ॥२०५॥

अत्र किं पूर्वं साधु उत साधुषु चरतीति सन्देहः ।

किमुच्यतेऽस्य भूपालमौलिमालामहामणेः ।
सुदुर्लभं वचोबाणैस्तेजो यस्य विभाव्यते ॥२०६॥

अत्र वचःशब्देन गीःशब्दो लक्ष्यते। अत्र खलु न केवलं पूर्वपदं यावदुत्तरपदमपि पर्यायपरिवर्तनं न क्षमते। जलध्यादावुत्तरपदमेव वडवानलादौ पूर्वपदमेव ।

दृढीकरणम् । कीर्तनमिति पाठे तु परिशीलनं पर्यालोचनम्, कीर्तनमुच्चारणम् । जनिर्जन्म । पूयशब्दः पूयत इत्यस्यैकदेशो जुगुप्साप्रदव्रणत्वावबोधकः । प्रेतशब्दोऽभिप्रेतावयवोऽमङ्गलार्थद्योतकः । उत्तपतेतरां दीप्यतेतराम् । साधुचर इत्यत्र चर इत्येव सन्दिग्धमिति न पददोषः । गोःशब्द इति । गीर्वाणपदस्यैव देववाचकत्वप्रसिद्धेः, बाणभागश्च स्थित एवेति वचोभागस्यैव नेयार्थता । उत्तरपदमपीति । न खलु गीःशब्दादिप्रसिद्धम्, अपसिद्धं चाप्रयोज्यमेव ।

तदुक्तमाचार्यैः—शब्दार्थमार्गे च प्रसिद्धिरेव प्रमाणमिति । जलध्यादावित्यादिना वारिधिपयोधिप्रभृतीनां प्रसिद्धत्वात्, जलधरजलपात्रादीनां चाशक्तत्वात् । [१]पूर्वमेवेति । वडवाग्निप्रभृतीनामश्वानलादीनाञ्च साध्वसाधुत्वात् ।

---

१. एवमेवोभयोर्मातृकालिप्योः पाठः । पूर्वपदमेवेति साधीयान् पाठः स्यात् ।

यद्यप्यसमर्थस्यैवाप्रयुक्तादयः केचन भेदास्तथाप्यन्यैरालङ्कारिकैर्विभागेन प्रदर्शिता इति प्रभेदप्रदर्शनेनोदाहर्तव्या इति च विभज्योक्ताः ।

(७५) प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसन्धि हतवृत्तम् ।
न्यूनाधिककथितपद पतत्प्रकर्षं समाप्तपुनरात्तम् ॥५३॥
अर्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यम् ।
अपदस्थपदसमासं सङ्कीर्णं गर्भितं प्रसिद्धिहतम् ॥५४॥
भग्नप्रक्रममक्रमममतपरार्थं च वाक्यमेव तथा ।

रसानुगुणत्वं वर्णानां वक्ष्यते, तद्विपरीतं प्रतिकूलवर्णम् । यथा शृङ्गारे—

अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि माम् ।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर ॥२०७॥

ननु तदर्थवाचकतया सर्वप्रामाणिकप्रसिद्धिराहित्यात्मकेनासमर्थत्वेनाप्रयुक्त-निहतार्थावाचकाप्रतीतग्राम्यादयः संग्रहीतुं शक्यन्त एव । तत् कथमिति प्रभेदेनो-पादानमित्याह--यद्यपीति । केचन वास्तववैधर्म्ययोगिनः । भेदा विशेषाः । आलङ्कारिकैरिति । अलङ्कारपदमत्र लोकप्रसिद्धकाव्यपरीक्षाशास्त्रवाचकम् । विभागेनावान्तरवैधर्म्यमाश्रित्य पार्थक्येन ।

ननु प्राचीनरीत्यनुसारेणापि ग्रन्थगौरवं न कार्यमित्याह—प्रभेदेति[1] । सामा-न्येनापि संग्रहे शिष्यबुद्धिवैशद्यार्थमवान्तरविशेषा दर्शनीयाः । ततश्च प्राचीनतन्त्रा-प्रमाणीकृतत्वात् कोऽधिको लाभ इत्यर्थः ।

एवं पददोषसजातीयत्वाद्वाक्यदोषानुक्त्वा तद्विजातीयानाह[2]—प्रतिकूलेति । विशिष्टरचनावन्ति पदानि वाक्यम्, तत्र केषाञ्चिद्विशेषणाश्रयत्वं केषाञ्चिच्च विशे-ष्याश्रयत्वम्, एषु पूर्वेषु यथायोगं मृग्यम् । उपहतेत्यादौ विसर्गपदस्य, न्यूनेत्यादौ

१. भेदप्रदर्शनेनेति प्रायिकः पाठः । स च निकृष्टतर इति टीकाकृत्कृतविवरणात् प्रतिभाति ।

२. एषु वाक्यदोषेष्वष्टौ रुद्रटकृते—
"अन्यूनाधिकवाचकसुक्रमपुष्टार्थशब्दचारुपदम् ।
क्षोदक्षममक्षुणं सुमतिर्वाक्यं प्रयुञ्जीत ॥"

इति वाक्यगुण निर्देशे गुणविपर्ययात्मानो दोषा इति कृत्वा विसन्ध्यादयोऽपरे तत्कृत-शब्ददोषतया केचिच्च सङ्कीर्णगर्भितादयो वाक्यदोषतयैव स्वीकृतेषूपलभ्यन्ते ।

रौद्रे यथा—

देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः
क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः।
तान्येवाहितहेतिघस्मरगुरूण्यस्त्राणि भास्वन्ति मे
यद्रामेण कृतं तदेव कुरुते द्रोणात्मजः क्रोधनः ॥२०८॥

अत्र हि विकटवर्णत्वं दीर्घसमासत्वं चोचितम्। यथा—

प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वेधाविधाविर्भवत्-
क्रोधप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणात्।
उज्ज्वालः परशुर्भवत्वशिथिलस्त्वत्कण्ठपीठातिथि-
र्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते ॥२०९॥

यत्र तु न क्रोधस्तत्र चतुर्थपादाभिधाने तथैव शब्दप्रयोगः।

उपहत उत्वं प्राप्तो लुप्तो वा विसर्गो यत्र तत्। यथा—

धीरो विनीतो निपुणो वराकारो नृपोऽत्र सः।
यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः ॥२१०॥

विसन्धिः सन्धेर्वैरूप्यम्। विश्लेषोऽश्लीलत्वं कष्टत्वञ्च। तत्राद्यं यथा—

राजन् विभान्ति भवतश्चरितानि तानि,
इन्दोर्द्युतिं दधति यानि रसातलेऽन्तः।
धीदोर्बले अतितते उचितानुवृत्ती,
आतन्वती विजयसम्पदमेत्य भातः ॥२११॥

पदपदस्यापदस्थेत्यस्य पदसमासपदाभ्यां प्रत्येकमन्वयः। वाच्यमित्यावश्यके घ्यण्[1]। वाक्यमेव न तु पदं तथा दुष्टम्। मृदुमध्यपरुषत्वात् त्रिधा वर्णाः। तत्र माधुर्यवति शृङ्गारादौ मृदुमध्यानां तद्विरहिणि च रौद्रादौ परुषाणामुचितत्वम्, विपरीतानान्तु प्रतिकूलत्वम्। एतेषां चैकद्वित्रिचतुःप्रयोगे न तादृग् रसभङ्ग इति वाक्यदोषता वाक्याश्रयत्वात्। अकुण्ठेति। विप्रलम्भश्चात्यन्तमधुरतया शब्दार्थक्लेशलेशाक्रुष्टः। तदाह—अत्र हीति। उचितं पोषकम्। तदेव प्रत्युदाहृत्य द्रढयति—यथेति।

निशुम्भो नमनम्, द्वेधाविधा द्विधाकृतिः। अपविद्धः सरभसमुद्यम्यापवर्जितः। चतुर्थपादाभिधाने चतुर्थपदोच्चारणकाले भगवदभिध्यानप्रशान्तक्रोधावेगतया तथैव तदवस्थानुकूल्येनैव शब्दप्रयोगः। उपहत इति लुप्ततायाः पृथगुपात्तत्वाद् रेफादि-प्राप्तिबाहुल्यस्य श्रुतिकटुत्वप्रवेशाद् वैरस्यावहत्वरूपा विसर्गोपहतिकत्वप्राप्तिरूपैव

---

१. कातन्त्रीयेयं संज्ञा पाणिनितन्त्रीयण्यत्स्थानीया।

यथा वा—

तत उदित उदारहारहारिद्युतिरुच्चैरुदयाचलादिवेन्दुः ।
निजवंश उदात्तकान्तकान्तिर्बत मुक्तामणिवच्चकास्त्यनर्घः ।।२१२।।

संहितां न करोमीति स्वेच्छया सकृदपि दोषः, प्रगृह्यादिहेतुकत्वे त्वसकृत् ।

वेगादुड्डीय गगने चलण्डामरचेष्टितः ।
अयमुत्तपते पत्री ततोऽत्रैव रुचिङ् कुरु ।।२१३।।

अत्र सन्धावश्लीलता ।

उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः ।
नात्रर्जु युज्यते गन्तुं शिरो नमय तन्मनाक् ।।२१४।।

हतं लक्षणानुसरणेऽप्यश्रव्यम्, अप्राप्तगुरुभावान्तलघु रसाननुगुणं च वृत्तं यत्र तद् हतवृत्तम् । क्रमेणोदाहरणम्—

अमृतममृतं कः सन्देहो मधून्यपि नान्यथा,
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम् ।

परिशिष्यत इत्यर्थः । अत्रापि न सकृत्कत्वेन दोषतेति बाहुल्योदाहृतिरुभयत्रापि धीर इति पूर्वार्धे उपहतिरुत्तरार्धे लोपः । विसन्धीत्यस्य विरूपः सन्धिर्यत्रेति विग्रहसिद्धस्य विशेषणभागं विशब्दं निष्पीड्य त्रिधा व्याचष्टे—सन्धेरिति । पदयोः पार्थक्यावस्थानं विश्लेषः । असभ्यार्थव्यञ्जकत्वमश्लीलत्वम् ।[1] अश्रव्यत्वं कष्टत्वम् । यथा वेत्यनेन विसर्गलोपस्याप्येतदर्थता । प्रपञ्चव्युत्पादनार्थं तु पृथङ्निर्देश इति सूच्यते ।

यद्वा विसर्गलोपमात्रेण दुष्टत्वेनास्य पृथक्त्वम् । अत्र निजवंश उदात्तेति विजातीयसंवलित्वमिति ततो विशेषः । स्वेच्छा अनुशासनमुल्लङ्घ्य वृत्ताभङ्गमात्रेणानुसन्धानम्, तया तानि इन्दोरिति संहितैकपदव्युत्पादेष्वर्धान्तवर्ज्जत्वमिति हि वाच्यकाव्यस्थितिः । प्रगृह्येति । यथा धीदोर्बले अतितते इत्यादि । ईदूदेद्द्विवचनं प्रगृह्यमिति प्रक्रमेण प्लुतप्रगृह्या अचीति सन्धिनिषेधे भगवदाचार्यानुशासनम् । आदिना न विसर्जनीयलोपे पुनः सन्धिः, अयादीनां यवादिलोपः पदान्ते, न वा लोपे तु प्रकृतिरित्याद्यनुशासनपरिग्रहः । अत्र चोदाहृतिस्तत्र इति श्लोकः । डामर[2] रभससंरम्भशालि । उत्तपत उद्दीप्यते । अत्र 'दुड्डी', 'लण्डा', चिङ्कु', इति काश्मीरादिभाषयाऽसभ्यार्थता । उर्वी महती तरूणामाली इति पङ्क्तिः मरोरन्ते

---

१. अश्लीलत्वमित्यादिः संवलितत्वमित्यन्तः सन्दर्भांशः ख० पु० गलितः ।

२. 'चलण्डामरवेष्टितः' इति भागे डामराः काश्मीरेतिबृत्तादिषु प्रसिद्धा दुर्धर्षाः सैनिकाः, तैः परिबृत इत्यर्थः ।

सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्जनो,
वदतु यदिहान्यत् स्वादु स्यात् प्रियादशनच्छदात् ॥२१५॥

अत्र यदिहान्यत् स्वादु स्यादित्यश्रव्यम् । यथा वा—

जं परिहरिउं तीरइ मणअं पिण सुन्दरत्तगुणेण ।
अह णवरँ जस्स दोसो पडिपक्खेहि पि पडिवण्णो ॥२१६॥

(यत् परिहर्तुं तीर्यते मनागपि न सुन्दरत्वगुणेन ।
अथ केवलं यस्य दोषः प्रतिपक्षैरपि प्रतिपन्नः ॥ छाया इति ॥)

अत्र द्वितीयतृतीयगणौ सकारभकारौ ।

विकसितसहकारतारहारि परिमलगुञ्जितपुञ्जितद्विरेफः ।
नवकिसलयचारुचामरश्रीर्हरति मुनेरपि मानसं वसन्तः ॥२१७॥

अत्र हारिशब्दः । हारिप्रमुदितसौरभेति पाठो युक्तः ।

चारुरवस्थितिर्यस्याः । ऋजु सरलतया । अत्र वृत्ताश्रव्यता सन्धिमूलतयैवेति । सन्धिदोषतयैवोदाहृतम् । अमृतमिति । अत्र हि वृत्ते षष्ठे दशमे सप्तदशे च यतिकरण एव श्रव्यता । यथाऽत्रैव पादत्रये, तूर्यपादे तु हेत्यत्र परपदं स्वरसंहिते यत्यभावादश्रव्यत्वमनुभूयते । एवमाद्यर्थमेव च स्वरसन्ध्यकृते प्रायेणेति वामनोक्तौ प्रायेणेत्युक्तिः स्मेत्यत्र तु सन्धिदोषतोऽपि वा । एवं वर्णवृत्तमुक्तम् ।

मात्रावृत्तमाह यथेति । तीरइ शक्यते । मणअम्पि मनागपि । अह[१] अयम् । णवरं केवलम् । सकारभकारैर्गुर्वन्तगुर्वादी चतुर्मात्रौ प्रथमे गण्येते यत्यभावादश्रव्यौ[२] । अन्तर्लघोर्गुरुभावाप्राप्तौ यथा विकसितेति । अत्र[३] एक्वकलाइं जाणह कखराइ वा अन्तसहिआइ । संजोअपढमदीहरसबिन्दुसविसग्गवण्णेत्यनुशासनाद् यद्यपि 'हारी'त्यस्य गुरुत्वं युक्तम्, तथाऽप्येवमादौ पाठविश्रामाभावान्न गौरवमिति वसन्ततिलकेन्द्रवज्रादिविषयमेव तद्बोद्धव्यम् । पाठान्तरे तु संयोगप्रथमतया गुरुत्वमित्याह—अत्रेति ।

---

१. रुचकश्रीधरादिभिरप्ययमेव पक्षः समाश्रितः, तेषां छायाविवरणे एष केवलमिति दर्शनात् । मूले 'अअं' इति पाठश्च ।

२. प्रथमे प्रथमे पादे । यत्यभावादिति तु चिन्त्यम् । भाष्यराजकृता भास्कररायेणात्र वृत्तहानिरपि न स्वीकृता, अनुशासनविरोधात् । श्रीधरेण तु का० प्र० वि० (२१४ पृ०) जणावेतौ पूर्वार्धे न्यस्तौ वैरस्यमावहत इति विवृतम् ।

३. प्राकृतच्छन्दःसूत्रमेतत् । एक्वकलाइं एककलानि । कला मरवा । "सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः । वा पादान्ते" इत्यादि वृत्तरत्नाकरेऽपि । अत्र वामनेन वामनेन तदनुसारिभिरर्वाग्भवैः कैश्चिदपि वसन्ततिलकादीत्यादिपदेन चतुर्दशाक्षरवृत्तप्रभृत्यप्राप्तगुरुभावान्तलघोरेषैव व्यवस्था समर्थिता, न पुनरिन्द्रवज्रायाम् । परं

यथा वा—

अन्यास्ता गुणरत्नरोहणभुवो धन्या मृदन्यैव सा
संभाराः खलु तेऽन्य एव विधिना यैरेष सृष्टो युवा ।
श्रीमत्कान्तिजुषां द्विषां करतलात् स्त्रीणां नितम्बस्थलात्
दृष्टे यत्र पतन्ति मूढमनसामस्त्राणि वस्त्राणि च ॥२१८॥

अत्र 'वस्त्राण्यपि' इति पाठे लघुरपि गुरुतां भजते ।

हा नृप हा बुध हा कविवन्धो विप्रसहस्रसमाश्रय देव ।
मुग्ध विदग्ध सभाऽन्तररत्न क्वासि गतः क्व वयं च तवैते ॥२१९

हास्यरसव्यञ्जकमेतद् वृत्तम् ।

न्यूनपदं यथा—

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥२२०॥

अत्रास्माभिरिति, खिन्ने इत्यस्मात् पूर्वमित्थमिति च ।

श्लोकान्तरोदाहृतिर्यथा वेति । रोहणो माणिक्याद्रिः । सम्भारा उपकरणानि । अत्र चकारस्य तीव्रप्रयासोच्चार्यतया न गौरवम्, पाठान्तरे तु 'ण्यपि' शब्दस्य तीव्रप्रयत्नोच्चार्यतयोच्चारणकालविलम्बेनापि शब्दोच्चारणे विश्रामलाभ इति गुरुवद्भावः ।

रसाननुगुणोदाहृतिः—हेति[१] । अत्र प्रकरणे पुष्पिताग्रादीनामेवानुगुणत्वं न त्वस्य हासानुगुणस्य प्रतिपदविच्छेदशोभिनो दोधकवृत्तस्य । न्यूनमुपादेयमप्यनुपात्तं पदं यत्र तन्न्यूनपदं वाक्यम् । अस्माभिरित्यस्यावश्यानुसन्धेयतयाऽनुपादाने प्रतीतिमान्थर्यानुभवात् । इत्थमिति । अन्यथा साकाङ्क्षत्वात् । अधिकमनुपयुक्तार्थम् ।

कालिदासादिसरणिमनुसरद्भिः कविभिः क्षेमेन्द्रादिनिबन्धकारैश्च तस्या अपि ग्रहणं कृतम् । कौतूहलिभिरत्रास्मत्कृतटिप्पणी द्रष्टव्या (का० प्र० वि० २५-२६) ।

१. श्लोकोऽयं काश्मीरनृपतेरनन्तराजस्य प्रशस्तिः स्यात् । यस्यौचित्यविचारचर्चाग्रन्थान्ते— "यस्यासिः परिवारकृत्त्रिभुवनप्रख्यानशीलश्रुतेः" इत्यादौ श्लोके मूलकृतः पूर्वतनेन क्षेमेन्द्रेण श्लाघा कृता ।

अधिकं यथा—

स्फटिकाकृतिनिर्मलः प्रकामं प्रतिसंकान्तनिशातशास्त्रतत्त्वः ।
अविरुद्धसमन्वितोक्तियुक्तिः प्रतिमल्लास्तमयोदयः स कोऽपि ॥२२१॥

अत्राकृतिशब्दः । यथा वा—

इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मान्मथा विकाराः ।
यदपि च न कृतं नितम्बिनीनां स्तनपतनावधि जीवितं रतं वा ॥२२२॥

अत्र कृतमिति । कृतं प्रत्युत प्रक्रमभङ्गमावहति । तथा च 'यदपि च न कुरङ्गलोचनानाम्' इति पाठे निराकाङ्क्षैव प्रतीतिः ।

कथितपदं यथा—

अधिकरतलतल्पं कल्पितस्वापलीला-
परिमिलननिमीलत्पाण्डिमागण्डपाली ।
सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव
स्मरनरपतिलीलायौवराज्याभिषेकम् ॥२२३॥

अत्र लीलेति ।

पतत्प्रकर्षं यथा—

कः कः कुत्र न घुर्घुरायितघुरीघोरो घुरेत् सूकरः
कः कः कं कमलाकरं विकमलं कर्तुं करी नोद्यतः ।
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्तते ॥२२४॥

स्फटिकेति । अत्राकृतिशब्दः संस्थानवाचकोऽनुपयुक्तः, स्फटिकनिर्मलेत्यनेनैव गतार्थत्वात् । अनुचितमननुरूपम् । अक्रमोऽसम्प्रदायः । शिशोर्विद्याभ्यासो यूनोऽर्थकामौवर्षीयसो धर्ममोक्षाविति हि सम्प्रदायः । अत्रेति पद्ये । न कृतमिति । अत्र कृतपदमधिकम्, तदर्थस्य तदनुपादानेऽपि प्रतीतेः । उपादानञ्च पूर्वतः क्रियाभावात् प्रक्रमभङ्गदोषमावहतीति दोषद्वयदायि । एतदेव व्यतिरेकमुखेण द्रढयति—तथा चेति । कथितमर्थपौनरुक्त्यविरहे द्विरुपात्तम् । एतच्च कवेरशक्तिं प्रकाशयत् किमपि वैरस्यमावहति । स्वापलीला स्वाप्नरूपाऽनास्था । लीलायाः क्रीडायाः । यौवराज्येऽभिषेकमञ्जसैव कथयतीति सम्बन्धः ।

पतत्प्रकर्षमिति । पतत्प्रकर्षं यद् वाच्यं बन्धादावुत्तरोत्तरम् । पूर्वानुसारतः कोऽपि निकर्षो यत्र जायते[१] इति । घुरी घोणा वाद्यविशेषो वा । समाप्तं पूरिताकाङ्क्षमपि पुनः पतितैकदेशम् ।

---

१. श्रीधरकृतोद्धायभिदं प्राचीननिबन्धसंग्रहश्लोकभूतम् । आकरो व्यक्तिविवेकग्रन्थः स्यादिति सम्भाव्यते ।

समाप्तपुनरात्तं यथा—

> क्रेङ्कारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवो
> झङ्कारो रतिमञ्जरीमधुलिहां लीलाचकोरीध्वनिः
> तन्व्याः कञ्चुलिकाऽपसारणभुजाक्षेपस्खलत्कङ्कण-
> क्वाणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वनः ॥२२५॥

द्वितीयार्धगतैकवाचकशेषप्रथमार्धं यथा—

> मसृणचरणपातं गम्यतां भूः सदर्भा
> विरचय सिचयान्तं मूर्ध्नि घर्मः कठोरः ।
> तदिति जनकपुत्री लोचनैरश्रुपूर्णैः
> पथि पथिकवधूभिर्वीक्षिता शिक्षिता च ॥२२६॥

अभवन् मत इष्टो योगः सम्बन्धो यत्र तत् । यथा—

> येषां तास्त्रिदशेभदानसरितः पीताः प्रतापोष्मभि-
> र्लीलापानभुवश्च नन्दनतरुच्छायासु यैः कल्पिताः ।
> येषां हुङ्कृतयः कृतामरपतिक्षोभाः क्षपाचारिणां
> किं तैस्त्वत्परितोषकारि वहितं किञ्चत्प्रवादोचितम् ॥२२७॥

अत्र 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्' इत्युक्तनयेनयच्छब्द-निर्दिश्यानामर्थानां परस्परमसमन्वयेन यैरित्यत्र विशेष्यस्याप्रतीतिरिति । 'क्षपाचारिभिः' इति पाठे युज्यते समन्वयः ।

यथा क्रेङ्कार इति। सुरतक्रीडार्थाः पिक्यस्ता एव वा पिक्यः। एवं रतिमञ्जरीमधुलिहामिति लीलाचकोरीत्यपि । अत्र वेणुस्वन इति क्रमेलकगललम्ब मानकर्कटीप्रायम्[1] ।

द्वितीयार्धेति अर्धशब्दोऽत्र श्रमव्यच्छेदवाचकः। तेन गद्येऽपि प्राप्तिः। पद्यमात्रेऽयं दोष इत्येके । एवं हतवृत्ततायामपि द्रष्टव्यम् । एकेति । द्वित्रिचतुर्-पदानान्तु समानप्रायबलतया न तावत् पूर्वमुखप्रेक्षितेति न तत्र वादविघातः। सिचयं वासः । अत्र तदिति पदं पूर्वार्धेन सम्बद्धम् । व्यक्तिक्रमप्रवेशे तु सङ्कीर्णत्वम् ।

गुणानामनूद्यानां परार्थत्वाद सम्बन्धो विधेयादिकमनाश्रित्य परस्परसमन्वयः समत्वादप्रधानतया । सर्वेषामन्योन्याश्रयणेऽप्यशवयव्यवस्थितत्वादिति । यैरति क्षपा-चारिणामिति पाठे षष्ठ्यन्तविशेषणस्य येषामिति षष्ठ्यन्तविशेषणभ्यामेवान्वयः

---

१. कर्कटीत्यभिप्रायमिति खपुस्तकेऽहृद्यः पाठः ।

यथा वा—

त्वमेवंसौन्दर्या स च रुचिरतायाः परिचितः
कलानां सीमानं परमिह युवामेव भजथः ।
अपि द्वन्द्वं दिष्ट्या तदिह सुभगे ! संवदति वा-
मतः शेषं यत् स्याज्जितमिह तदानीं गुणितया ।।२२८।।

अत्र यदित्यत्र तदिति, तदानीमित्यत्र यदेति वचनं नास्ति । 'चेत् स्यात्' इति युक्तः पाठः ।

यथा वा—

संग्रामाङ्गणमागतेन भवता चापे समारोपिते ।
देवाकर्णय येन येन सहसा यद्यत् समासादितम् ।।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं ।
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ।।२२९।।

अत्राकर्णनक्रियाकर्मत्वे कोदण्डं शरानित्यादि वाक्यार्थस्य कर्मत्वे कोदण्डः शरा इति प्राप्तम् । न च यच्छब्दार्थस्तद्विशेषणं वा कोदण्डादि । न च केन केनेत्यादिप्रश्नः ।

क्रियते, न तु तृतीयान्तेन । तथा च साकाङ्क्षता । पाठान्तरे तु यदर्थपरामर्शिना तदा विशेष्यसम्बन्धे सर्वैरेव परामृष्टैः सम्बन्ध उपपद्यत इत्याह—क्षपाचारिभिरितीति । यथा वेत्यनेन न्यूनपदविषये व्यापकोऽयमिति सूत्रेण । एवं सौन्दर्यं यस्याः । अपिः सम्भावने । दिष्टचा आनन्दे । संवदति योग्यं भवति । शेषं मिथोऽनुरागविच्छेदरूपं फलम् ।

अत्र यदित्यव्ययं यदेत्यर्थावाचकत्वात्तदानीमित्यनेन समन्वयानुपपत्त्या द्वयोरपि साकाङ्क्षतया योग्यपदद्वयापेक्षेत्याह—अत्र यदिति । यदेति समानार्थपदप्रयोगे तु द्वयोरपि निराङ्क्षता परस्परान्वयादित्याह—चेदिति । संग्रामेति । अत्र शरादीनां प्रत्येकमाकर्णनक्रियासम्बन्धो विवक्षितः समुदायेन वा ? आद्ये आकर्णनेति । द्वितीये वाक्यार्थस्येति ।

ननु समासादिपदस्यान्येन प्रातिपदिकमात्रार्थताविरहात् कथं सर्वत्र प्रथमा स्यात् ? नैवं यदर्थेनैव तदन्वयात् । यदर्थद्वारकएवात्रार्थान्वय इति चेत्, अत्राह—न च यदर्थो यच्छब्दस्य साक्षादर्थस्तद्विशेषणं यच्छब्दार्थविशेषणं वा । न खलु यच्छब्दार्थेन शरैरिति घटते विशेषणविशेष्यभावः । अत्र येन येनेति द्विरुक्तपदाभ्यां समासादनक्रियाकर्तृकर्मणोः[1] सामान्येनाभिधानम्, विशेषजिज्ञासायान्तु कोदण्डेनेत्याद्युत्तरमिति चेत् ? न, जिज्ञासामूलप्रश्नाभावादित्याह—न चेति । आदिना किं किमिति परिग्रहः ।

---

१. समासादानकर्तृकर्मणोः—ख० ।

यथा वा–"चापचार्यस्त्रिपुरविजयी" २३० ॥

इत्यादौ भार्गवस्य निन्दायां तात्पर्यम्। कृतवतेति परशौ सा प्रतीयसे। 'कृतवतः' इति तु पाठे मतयोगो भवति। यथा वा—

चत्वारो वयमृत्विजः स भगवान् कर्मोपदेष्टा हरिः
संग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता।
कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं
राजन्योपनिमन्त्रणाय रसति स्फीतं हतो दुन्दुभिः॥ २३१॥

अत्राध्वरशब्दः समासे गुणीभूत इति न तदर्थः सर्वैः संयुज्यते। यथा वा—

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः।

उत्तरादेवास्मात् प्रश्नोन्नयनादुत्तरालङ्कार एवायमिति वदन्तस्तु नादरणीया एव[१], प्रश्नोन्नयनासंवेदनात्, येन येनेत्यादि वैयर्थ्यप्रसङ्गाच्च। तस्माद् येन येन समुदितेन कोदण्डादिव्यतिरिक्तप्राये एव कर्तृकर्मणी प्रतीयेते इति मतयोगविरहः।

'चापाचार्यः' इत्यत्र वैदग्ध्येन परशुनिन्दया भार्गवनिन्दा बुद्धिपूर्विकैवेत्याधुनिकाः पण्डिताः समादधते।[२] युक्तश्चायं समाधिः, दोषाभिधानन्तु प्राचीनानुरोधमात्रेण। त्वया मातृवधपातकिना बद्धस्पर्धोऽहं लज्ज इति संगोप्य रेणुकाकण्ठच्छेदपातकिना तव परशुना बद्धवैरः खड्गो मे लज्जत इत्यभिधानं हि श्लाध्यमेव।

यद्वा 'कृतवतः' इति पाठे मतयोगो भवतीत्यकारप्रश्लेषः। भार्गवपातकित्वे हि परशुवैरसम्बन्धो न लज्जाकरः। पूर्वग्रन्थस्त्वेतदनुरोधेन प्रतीयत इत्यनन्तरमितीति शेषं दत्त्वा योज्यः।

'चत्वारः' इत्यत्र प्रधानस्याध्वरपदार्थस्य तत्तया प्रतीत्यभावादृत्विगादिपदार्थस्तदङ्गतया न प्रतीयत इति विवक्षितसम्बन्धविरहः। विधेयाविमर्षे तु

---

१. तन्मते दोषमूलमनौचित्यमत्र चिन्त्यम्। एतस्य प्रपञ्चः श्रीधरेण कृतः। तत्रैवावलोकनीयमिति (का० प्र० वि० २२८ पृ०)।

२. परन्त्वेष समाधिर्दोषक्षालनाय नालमिति प्रदीपकृदाद्या बहवः समामनन्तीत्यष्यवधानीयम्। क एते काव्यप्रकाशटीकाकृत उत मनावीरचरितव्याख्यातार इति नास्ति निश्चयः। मतमेतत् यत् प्रकृतव्यक्तिविवेकग्रन्थांशे घटितोदाहरणप्रत्युदाहरणविपर्यासशङ्कां समर्थयद्भिः समाधिरयं सुशकानुमानः। परशुनिन्दया भार्गवनिन्दाऽत एव मतयोग एव न त्वमतयोगः। मूलकृदाशयस्तु नैतदनुकूल इति शङ्कमानैष्टीकाकृद्भिरकारप्रश्लेषकल्पो विकल्पतयोपजीव्यते।

भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापी-
संभूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः ॥ २३२ ॥

अत्र दण्डपादगता निजतनुः प्रतीयते, भवान्याः सम्बन्धिनी तु विवक्षिता। अवश्यवक्तव्यमनुक्तं यत्र। यथा—

अप्राकृतस्य चरितातिशयैश्च दृष्टैरत्यद्भुतैरपहृतस्य तथापि नास्था।
कोऽप्येष वीरशिशुकाकृतिरप्रमेयसौन्दर्यसारसमुदायमयः पदार्थः ॥२३३॥

अत्र 'अपहृतोऽस्मि' इत्यपहृतत्वस्य विधिर्वाच्यः, तथापीत्यस्य द्वितीयवाक्यगतत्वेनैवोपपत्तेः।

यथा वा—

एषोऽहमद्रितनयामुखपद्मजन्मा प्राप्तः सुरासुरमनोरथदूरवर्ती।
स्वप्नेऽनिरुद्धघटनाधिगताभिरूपलक्ष्मीफलामसुरराजसुतां विधाय ॥२३४॥

अत्र मनोरथानामपि दूरवर्तीत्यप्यर्थो वाच्यः। यथा वा—

त्वयि निबद्धरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः।
कमपराधलवं मम पश्यसि त्यजसि मानिनि दासजनं यतः ॥ २३५ ॥

अत्र 'अपराधस्य लवमपि' इति वाच्यम्।

यदेवाविमृष्टं तावन्मात्रं न तु सर्ववाक्यार्थतिरोभाव इति ततो भेदः। दण्डपादगतेति निजस्वकीयादिपदानां प्रधानप्रत्यवमर्षित्वात्। आस्था हृदयविश्वासः अप्रमेयोऽलौकिकः। विधित्वने हेतुः, तथापीत्यस्येति। द्वितीयवाक्यगतत्वेनेत्यत एवकारः शेषः। न चायं विधेयाविमर्षः, अप्राकृतत्वस्य वास्तवविधेयताविरहात्।

ये तु वास्तवावास्तवसाधारणे विधावपरामृष्टे वाक्यगतविधेयाविमर्षमाहुस्तन्मतेनोदाहरणमाह—यथा वेति। उषाहरणे हरदृष्टिदाहानन्तरं भगवतीवदनप्राप्तजन्मनः कन्दर्पस्येयमुक्तिः। एषोऽहमिति। अत्रेति। अन्यथा वाच्य इत्येव वृत्तिकृतो विवक्षितम्। मनोरथानामिति तु प्रासङ्गिकम्, तेन सुरासुरपदानन्तरं वाऽपिर्वाच्यः, तथा सत्येवोत्कर्षप्रतीतेः। न च न्यूनपदत्वेन साङ्कर्यशङ्का, तत्र पदशब्देन वाचकपदविवक्षणात्, अपेश्च वाच्यांशभूतसमुच्चयार्थत्वात्। एवमन्यत्रापि ज्ञेयम्। प्रणयः प्रेमभावपारतन्त्र्यम्।

वस्तुबस्तु "मायाविकल्परहितमयुक्तम्" इति वामनसूत्रे विकल्पपदस्य कुहकादिविरोध इत्यर्थस्वीकारे प्रकृतमयुक्तमित्यपरपर्यायस्या मतयोगदोषस्य स्थलं स्यात्। तथा सति प्राचीनानुरोधमात्रेणेति टीकाकृत्कृतकटाक्षितस्याशयः स्फुट एव।

अस्थानस्थपदं यथा--

प्रियेण संग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्[1] विजहौ जलाविला वसन्ति हि प्रेम्णि गुणा न वस्तुषु ॥२३६॥

अत्र "काचिन्न विजहौ" इति वाच्यम् । यथा वा--

लग्नः केलिकचग्रहश्लथजटालम्बेन निद्रान्तरे
मुद्राङ्कः शितिकन्धरेन्दुशकलेनान्तःकपोलस्थलम् ।
पार्वत्या नखलक्ष्मशङ्कितसखीनर्मस्मितह्रीतया
प्रोन्मृष्टः करपल्लवेन कुटिलाताम्रच्छविः पातु वः ॥ २३७ ॥

अश 'नखलक्ष्म' इत्यतः पूर्वं 'कुटिलाताम्र' इति वाच्यम् ।

अस्थानस्थसमासं यथा—

अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एष धिगिति क्रोधाधिवालोहितः ।
प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्
फुल्लत्कैरवकोशनिःसरदलिश्रेणीकृपाणं शशी ॥ २३८ ॥

अत्र क्रुद्धस्योक्तौ समासो न कृतः कवेरुक्तौ तु कृतः ।

सङ्कीर्णम्, यत्र वाक्यन्तरस्य पदानि वाक्यान्तरमनुप्रविशन्ति ।

प्रियेणेति । नञो हि पूर्वेणोत्तरेण वा सम्बन्धः । स चात्र नास्तीत्यस्थानस्थानं पदस्येत्याह—काचिन्न बिजहाविति । प्रसज्यनञः क्रियायोगाव्यभिचारादित्यर्थः ।

ननु पदशब्देन वाचकमेव निगद्यते, न च नञो वाचकता, निर्वाहास्वातन्त्र्येणार्थबोधकताविरहात् । ततश्च द्वयं गतमित्यादौ यथा त्वमित्यनन्तरं चकारानुपादानादक्रमता तथात्रापीति ये मेनिरे तान् प्रति निर्विवादोदाहृतिमाह–यथा वेति । नखलक्ष्मेत्यतः पूर्वमिति । तदानीमेव सादृश्यहेतुकशङ्कौचित्यलाभादित्यर्थः[2] । पदस्य स्थाननिवेशे च सर्वमेव वाक्यं कविविवक्षितार्थप्रत्यायने मान्थर्यमावहतीति वाक्यदोषता ।

अद्यापीत्यादि । क्रुद्धस्योक्तौ हि ओजोऽनुगुणं समासभूयस्त्वं योज्यते न तु कवेरुक्तौ, तस्य वैदर्भरूपाया एव प्रशस्यत्वात्, वैदर्भ्याश्च झटित्यर्थसमर्पणप्राणतया समासबाहुल्येन[3] किञ्चिन्निकर्षदानात् ।

एकवाक्यतायामिति । अत्र च वाक्यत्रयं परस्परावयवसंसर्गस्थितम्, वाक्यान्तरं परस्परासन्निहितस्यावयवम् । रागो वैरिशोणितशोणिताऽनुरागश्च । मातङ्गा गजा-

---

१. काचित् स्रजं नो विजहौ इति युक्त पाठ : ।

२. शङ्कौचिती-ख० ।

३. समासबाहुल्ये-क ।

यथा—

किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेमम् ।
ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम् ॥ २३९ ॥

अत्र पादगतं बहुगुणं हृदयनाथं किमिति न पश्यसि, इमं कण्ठे गृहाण, मनसस्तमोरूपं कोपं मुञ्चेति । एकवाक्यतायां तु क्लिष्टमिति भेदः ।

गर्भितं यत्र वाक्यस्य मध्ये वाक्यान्तरमनुप्रविशति । यथा—

परापकारनिरतैर्दुर्जनैः सह संगतिः ।
वदामि भवतस्तत्त्वं न विधेया कदाचन ॥ २४० ॥

अत्र तृतीयपादो वाक्यान्तरमध्ये प्रविष्टः । यथा वा—

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्याऽरिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती ।
तत्सक्तोऽयं न किञ्चिद्गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद्गदितुमिव गतेत्यम्बुधिं यस्य कीर्तिः ॥२४१॥

अत्र विदितं तेऽस्त्वित्येतत् कृतम् । प्रत्युत लक्ष्मीस्ततोऽपसरतीति विरुद्धमतिकृत् ।

मञ्जीरादिषु रणितप्रायं पक्षिषु च कूजितप्रभृति ।
स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखम् ॥

इति प्रसिद्धिमतिक्रान्तम् । यथा—

महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरुतानुकारी मुहुः ।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः ॥ २४२ ॥

श्चाण्डालाश्च । परपुरुषाः शत्रुभटा उदासीनपुरुषाश्च । अत्र तस्यां सक्तोऽयं किञ्चिन्न गणयति, तेन हेतुना भृत्येभ्योऽहं दत्तास्मीत्यवान्तरभिन्नवाक्ययोः सम्भूयैकार्थप्रतिपादनेनैकवाक्यतायां तयोर्मध्ये विदितं तेऽस्त्विति वाक्यं प्रविष्टम्, पूर्वं तु[१] निसर्गैकवाक्यमध्य इति भेदः । अत एव यथा वेत्युपक्रमः । प्रसङ्गाद्दोषान्तरमाह—प्रत्युतेति । भृत्येभ्यः सम्प्रदानं[२] स्वपितृसाक्षीकरणेन श्रेयो द्रढीयः कृतम्, ततः पुनस्तदङ्गीकृतिप्रत्याशादौर्बल्यं ध्वन्यत इति वर्णनीयनिकर्षप्रतीतेः शल्यभूतमिव विदितं तेऽस्त्विति स्वप्रकाशितेन विरुद्धस्यार्थस्य मतिं बुद्धिं करोतीति विरुद्धमतिकृत् । ततश्च प्रकाशितविरुद्धत्वमर्थदोषो न तु शब्ददोषः ।

पुष्करावर्तका मेघविशेषाः । रोदसी द्यावापृथिवी ।

---

१. 'पूर्वोदम' इति पाठान्तरम् । २. 'स्वप्रदानम्' इत्यवद्यः क० पाठः ।

अत्र रवो मण्डूकादिषु प्रसिद्धो न तूक्तविशेषे सिंहनादे।

भग्नः प्रक्रमः प्रस्तावो यत्र। यथा--

नाथे निशाया नियतेर्नियोगादस्तं गते हन्त निशापि याता।
कुलाङ्गनानां हि दशानुरूपं नातः परं भद्रतरं समास्ति ॥२४३॥

अत्र 'गता' इति प्रक्रान्ते 'याता' इति प्रकृतेः। 'गता निशापि' इति तु युक्तम्।

ननु 'नैकं पदं द्विः प्रयोज्यं प्रायेण' इत्यन्यत्र कथितपदं दुष्टमिति चेहैवोक्तम्, तत् कथमेकस्य पदस्य द्विःप्रयोगः। उच्यते--

उद्देश्यप्रतिनिर्देश्यव्यतिरिक्तो विषय एकपदप्रयोगनिषेधस्य तद्वति विषये प्रत्युत तस्यैव पदस्य सर्वनाम्नो वा प्रयोगं विना दोषः। तथाहि—

उदेति सविता ताम्रस्ताम्र एवास्तमेति च।
संपत्तौ च विपत्तौ च महतामेकरूपता ॥२४४॥

भग्नो विच्छिन्नः। साधारणप्रतीतार्थावसरे हि प्रकृतप्रकृत्यादिविच्छेदे किमपि वैरस्यमनुभूयते। तदुक्तम्[1]—

"प्रक्रमस्यान्यथाभावप्रतीतौ प्रस्खलद्गतौ।
ह्लादः स्फुरन्ननास्वादाद्यत्र म्लानत्वमश्नुते॥
दोषः प्रक्रमभेदाख्यः शब्दानौचित्यभूश्च सः।" इति।

एतत्प्रपञ्चश्च दिङ्मात्रेण प्रदर्श्यते—यथेति।

नन्विति। रूपान्यत्वेऽपि प्रकृतिप्रत्ययसाजात्येनैकजातीयपदमेकपदं विवक्षितम्, तथा चोभयतःपाशारज्जुरिति चोद्यार्थः। परिहारार्थस्तु न वयमेकपदद्विरुपादानमात्रं कथितपदं ब्रूमः। किन्तर्हि सति दोषलक्षणयोगे। न चैवंविधे प्रत्युत वैपरीत्ये नित्यदोषता कथितपदस्य[2]। तदुक्तम्—"प्रक्रमस्यानन्यथात्वे स एव तु महान् गुणः" इति।

अक्षरार्थस्तु–उद्देश्योऽनूद्यः स एव प्रतिनिर्देश्यः प्रतीतिमान्थर्यपरिहारार्थं पुनर्विधेयो यत्र स तथोक्तविषयस्तद्व्यतिरिक्तः। तद्वति उद्देश्यप्रतिनिर्देश्यवति। तस्यैव कथितस्यैव। दोष इत्यनन्तरं तथा हीति। लक्ष्यावतारणपर इति क्वचित् पाठः। अर्थान्तरतयेव झगितीति शेषः। अर्थान्तरतयैवेति पाठे स एव सम्बन्धः।

---

१. श्रीधरमनुमृत्यैतत्। अग्रिमश्च तदुक्तमिति ग्रन्थान्तरीयोद्धृतिः (का० प्र० वि० २२३-२२४ पृ०)। एवमुत्तरत्रापि।

२. 'कथितपदप्रयोगस्य' इति क०।

अत्र रक्त एवास्तमेतीति यदि क्रियेत तदा पदान्तरप्रतिपादितः स एवार्थोऽर्थान्तरतयेव प्रतिभासमानः प्रतीतिं स्थगयति । यथा वा—

यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥२४५॥

अत्र प्रत्ययस्य । 'सुखमीहितुं वा' इति युक्तः पाठः ।

ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥२४६॥

अत्र सर्वनाम्नः । 'अनेन विसृष्टा' इति तु वाच्यम् ।

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा ॥२४७॥

अत्र पर्यायस्य । 'महीभृतोऽपत्यवतोऽपि' इति युक्तम् । "अत्र सत्यपि पुत्रे कन्यारूपेऽप्यपत्ये स्नेहोऽभूत्" इति केचित् समर्थयन्ते ।

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ॥२४८॥

अत्रोपसर्गस्य पर्यायस्य च । "तदभिभवः कुरुते निरायतिम् लघुतां भजते निरायतिर्लघुतावान्न पदं नृपश्रियः ॥" इति युक्तम् ।

मनुष्यसंख्या सामान्येन गणना । अभियोगो निर्बन्धः सर्वनाम्न इति । 'इदम्' अर्थस्य हि 'तदा' भिन्नार्थेनात्यन्तमयुक्तः परामर्शः ।

ननु महीभृत इत्यादौ पुत्रापत्ययोः सामान्यविक्षेषवचनत्वादपर्यायत्वान्नैतद्दोषावकाशः[१] । अन्यथा पुष्पचूतशब्दयोरपि स्यादित्याशङ्कयास्माकमेतन्नानुमतं किन्तु प्राचीनानामेवेत्याह—अत्र सत्यपीति । केचिदिति साम्प्रदायिका इत्यर्थः[२] । एतच्च पुत्राश्च पुत्र्यश्चेत्येकशेषाकरणपक्षे । आयतिः कल्याणोदर्कता । उपसर्गस्य विपद इत्यत्र वेरुपक्रमे, आपदित्याङा निर्देशात् । पर्यायस्य लघुतापदस्य गरीयानिति परिवर्तनात् । एतत् स्थूलदृशा, सूक्ष्मदृशा तु लघुगुरुप्रकृत्योस्तल्प्रत्ययेयसुन्प्रत्यययोरेव व्यत्यय इष्यते । सत्त्वश्च जीवप्राणिनोः[३] । वचनस्येति । काचिदित्युपक्रम्य काश्चिदिति वचनात् ।

---

१. 'दोषलेशस्पर्शः' इति क० ।

२. कविमर्यादानियन्त्रितधियः । एतन्मतालोचनं रुचकेण व्यक्तिविवेकव्याख्याने कृतमिति तत एवावगन्तव्यम् ।

३. जीवप्राणिवानाहुरित्यस्फुटः ख० पाठः ।

काचित् कीर्णा रजोभिर्दिवमनुविदधौ मन्दवक्त्रेन्दुलक्ष्मी-
रश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः ।
भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत् कम्पमानाः
प्रस्थाने पार्थिवानामशिवमिति पुरोभावि नार्थः शशंसुः ॥२४९॥

अत्र वचनस्य। "काश्चित् कीर्णा रजोभिर्दिवमनुविदधुर्मन्दवक्त्रेन्दुशोभा निःश्रीकाः" इति, 'कम्पमानाः' इत्यत्र 'कम्पमापुः' इति च पठनीयम् ।

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यताम् ।
विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले।
विश्रान्तिं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥२५०॥

अत्र कारकस्य । "विस्रब्धा रचयन्तु सूकरवरा मुस्ताक्षतिम्" इत्यदुष्टम् ।

अकलिततपस्तेजोवीर्यप्रथिम्नि यशोनिधा-
ववितथमदाध्माते रोषान्मुनावभिगच्छति ।
अभिनवधनुर्विद्यादर्पक्षमाय च कर्मणे
स्फुरति रभसात् पाणिः पादोपसंग्रहणाय च ॥२५१॥

अत्र क्रमस्य । पादोपसंग्रहणायेति पूर्वं वाच्यम् । एवमन्यदप्यनुसर्तव्यम् ।

अविद्यमानः क्रमो यत्र । यथा—

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥२५२

पाठान्तरे तु नैवमित्याह-काश्चिदिति । कम्पमाना इत्यत्राख्यातप्रक्रमभेदं परिहरति—कम्पमाहुरिति । कवलोद्वर्तनं रोमन्थः । कारकस्येति । तद्द्योतकविभक्तेरित्यर्थः । तेजः प्रभावः । अत्र तपसः पूर्वनिर्देशात्तदनुगुणं कर्म प्राग् वाच्यं पश्चात्तेजस इति क्रमः । तद्भङ्गात् प्रक्रमभङ्गः ।

"आमूलोद्गतकण्टकाञ्चिततनो निर्गन्धपुष्पोद्गम-
श्छाया न श्रमहारिणी न च फलैः प्रीणासि पान्थान् जनान् ।
रे रे बर्बर साधुसङ्गविरहिस्तत्तावदास्तामहो ।
अन्येषामपि शाखिनां फलभृतां रोधे वृतिर्जायसे ॥

इत्यादौ सम्बुद्ध्यादावपि प्रक्रमभङ्गो दृश्यत इत्याह—एवमिति । क्रमः पदपरिपाटी । त्वंशब्दानन्तर इति । तदर्थस्यैव समुच्चीयमानत्वादित्यर्थः । उदाहृत्यन्तरमाह—यथा वेति ।

अत्र त्वंशब्दानन्तरं चकारो युक्तः । यथा वा—

शक्तिर्निस्त्रिंशजेयं तव भुजयुगले नाथ दोषाकरश्री-
र्वक्त्रे पार्श्वे तथैषा प्रतिवसति महाकुट्टनी खड्गयष्टिः ।
आज्ञेयं सर्वगा ते विलसति च पुरः किं मया वृद्धया ते
प्रोच्येवेत्थं प्रकोपाच्छशिकरसितया यस्य कीर्त्या प्रयातम् ॥२५३॥

अत्र 'इत्थं प्रोच्येव' इति न्याय्यम् । तथा-"लग्नं रागावृताङ्ग्या" इत्यादौ 'इति श्रीर्नियोगात्' इति वाच्यम् ।

अमतः प्रकृतिविरुद्धः परार्थो यत्र । यथा—

राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं धगाम सा ॥२५४॥

अत्र प्रकृते रसे विरुद्धस्य शृङ्गारस्य व्यञ्जकोऽपरोऽर्थः । अर्थदोषानाह—

अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः ॥५५॥

निस्त्रिंशः खड्गः क्रूरश्च । दोषाकरश्चन्द्रमा दोषाणामाकरश्च । महाकुट्टनी बहुमर्दिनी नारीणामविनयाचार्या च । सर्वगा सर्वत्राप्रतिहता सर्वजनसंयुक्ता च । वृद्धा महती गतयौवना च । अत्रेत्थंपदस्य पूर्ववाक्यसन्निधाने पाठ उचितः, तदर्थपरामर्शित्वात् । एवमेतत्समानार्थान्यन्यान्यपि परामृश्य वाक्यसन्निधावेव निवेश्यानीत्याह—तथेति । निशाचरी राक्षसी चारुधिरचन्दनं कुङ्कुमश्च । जीवितेशः प्रेतराजः प्रच्छन्नप्रियतमश्च । प्रकृते रसे बीभत्से ।

अर्थदोषानाह—शब्ददोषानन्तरप्रसक्तान् । अपुष्टो मुख्यानुपकारी । क्लेशतः कथमपि प्रत्येयः कष्टः ।

"उत्कर्षो वाऽपकर्षो वा प्राग् यस्यैव निगद्यते ।
तस्यैवार्थ[1]हृदन्यश्चे द् व्याहतोऽर्थस्तदा भवेत् ॥
प्रागवाच्य उच्यते पश्चात् पश्चादवाच्योऽथवाग्रतः ।
कविना शक्तिवैक्लव्याद् योऽर्थस्तं दुष्क्रमं विदुः ॥
स ग्राम्यः स्वरिरं[2]सादि पामरैर्यत्र कथ्यते ।
वैदग्ध्यवक्रिमलवं हित्वैव वनितादिषु ॥"

---

१. तस्यैवान्यस्तदर्थश्चेदिति श्रीधरोद्धृतावस्य पाठः । (पृ० २२६)

२. एवं 'स ग्राम्यस्तु रिरंसादिः' इति का. प्र. वि. पाठः । (पृ० २२६).

संदिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च ।
अनवीकृतः सनियमानियमविशेषाविशेषपरिवृताः ।।५६।।

साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः ।
विध्यनुवादायुक्तस्त्यक्तपुनः स्वीकृतोऽश्लीलः ।।५७।।

दुष्ट इति संबध्यते । क्रमेणोदाहरणम्—

अतिविततगगनसरणिप्रसरणपरिमुक्तविश्रामानन्दः ।
महदुल्लासितसौरभकमलाकरहासकृद्रविर्जयति ।।२५५।।

प्रसिद्धिः विद्यापदाभ्यां विरुद्धपदस्य सनियमेत्यादिना परिवृत्तपदस्य प्रत्येकमन्वयः । पदे स्थाने न युक्तोऽपदयुक्तः । तदुक्तम्—

"युक्ताधिक्ये विसर्गः स्यादाधिक्यं चेन्न तत्सहे ।
अर्थे प्रकल्प्यते यत्र सोऽस्थानः स्यात् सदुज्झितः ।।"[१] इति ।

सहचराः सदृशतयोपरक्ताः । भिन्ना उत्कृष्टा अपकृष्टा वा । प्रकाशितो विरुद्धो येन स तथा । अयुक्तौ विध्यनुवादौ यस्य स विध्यनुवादायुक्तः । स च द्वयोरन्यतरस्य वाऽयुक्तत्वात् त्रिधा । दुष्ट इत्यर्थवशाल्लिङ्गपरिवृत्त्या ।

अतिविततत्वादय इति । रविर्जयतीति भगवदाभिमुख्याभिधाने प्रसिद्धमहिम्नस्तस्य स्तुतौ विशेषणद्वयस्यार्थो नानुकूल्याधायक इति[२] ।

अपरे त्वतीत्यादि पूर्वार्धबोध्यविशेषणस्यालौकिकसामर्थ्याविष्कारितया जयत्यर्थानुकूल्यमस्त्येवेत्यविततत्वादय इत्यतद्गुणसंविज्ञानबहुव्रीहिणा महदित्यादिपदार्थाभिधानमित्याहुः, तेषां प्रकृतपरिपोषकताया विरहात् । अविततसरणिपदार्थो स्वविशेष्यकारकानुपकारिणाविति तु न युक्तम्, न खलु गगनपदोच्चारणमात्रादतिवैतत्यं प्रतीयते । न च तत्कृता दुर्लङ्घ्यता प्रकर्षबोधकत्वात् । सरणिपदार्थेन च सरणिवद्दीर्घताऽवगमात् । यस्य हि मुख्ये प्रस्तुते सर्वथैवानुपकारिता तस्यैव तद्दोषता । यथा—

"कान्ताकचप्रचयपुष्पसुगन्धिगन्धलुब्धभ्रमद्भ्रमरकर्बुरकन्दराय ।
गन्धर्वयक्षसुरसिद्धकिरीटकूटसंघट्टघृष्यचरणाय नमः शिवाय ।।" इति ।

---

१. युक्ताधिक्ये विसर्गः स्यादाधिक्यार्थो न भासते ।
अर्थः प्रकल्प्यते यत्र सौऽस्थानपद उज्झितः ।।
इति श्रीधरधृतः पाठः (पृ० २३५) ।

२. नात्र प्रक्रान्तानुपयोगित्वलक्षणं रुद्रटकृतसंज्ञमसम्बद्धत्वम्, नापि वा व्यक्तिविवेककृतपौनरुक्त्यमहाजातावेतत् पततीति पृथगस्य गणनमिति मूलकृतामाशयः । श्रीधरेणापि

अत्रातिविततत्वादयोऽनुपादानेऽपि प्रतिपाद्यमानमर्थं न बाधन्त इत्यपुष्टाः, न त्वसंगताः पुनरुक्ता वा ।

सदा मध्ये यासामियममृतनिष्यन्दसुरसा
सरस्वत्युद्दामा वहति बहुमार्गा परिमलम् ।
प्रसादं ता एता धनपरिचिताः केन महतां
महाकाव्यव्योम्नि स्फुरितमधुरा यान्तु रुचयः ।।२५६।।

अत्र यासां कविरुचीनां मध्ये सुकुमारविचित्रमध्यमात्मकत्रिमार्गा भारती चमत्कारं वहति ता गम्भीरकाव्यपरिचिताः कथमितरकाव्यवत् प्रसन्ना भवन्तु, यासामादित्यप्रभाणां मध्ये त्रिपथगा वहति ता मेघपरिचिताः कथं प्रसन्ना भवन्तीति संक्षेपार्थः ।

अत्र पूर्वपदार्थस्य नमनाननुकूल्यम् । प्रकृताननुकूल्यं व्यतिरेकमुखेनाह—अनुपादानेऽपीति । यदुपादानं हि यत्प्रकर्षकं तदुपादानाभावस्तन्निकर्षक एव । प्रतिपाद्यमानं मुख्यतया जयत्यर्थम् ।

ननु चामी अधिका एवार्थाः, ततश्चाधिकपदता शब्ददोष एवास्त्विति चेत् ? अत्राह–न त्विति । पदान्तरलभ्य एवार्थो यत्राधिकपदगम्यस्तत्रैव निराकाङ्क्षतयाऽर्थोऽसङ्गतोऽन्वयाङ्गातिरिक्त उच्यते । अत्र तु प्रतीत एव वाक्यार्थे पश्चादनुपयोगित्वप्रतिभासः । अयमेव चार्थः शब्ददोषविभागो यदन्वयप्रतीतेः पश्चात् पूर्वावभासितेति केचित् । तन्न व्यापकम्, अमतपरार्थादावभावात् । यं तु पदाश्रयतया प्रतीतिर्भगवत्युपनयति स दोषस्तदाश्रयः । शब्दान्वयव्यतिरेकानुविधायी पदाश्रयः । शेषस्त्वर्थाश्रय इति[1] युक्तो विभागः । पुनरुक्तिश्चाविनाभावादिलभ्यार्थाश्रयेति ततोऽपि भेद एवेति पृथगेवायं दोष इति । सरस्वती वाङ्मयी नदी च । मार्गः काव्यरीतिर्वर्त्म च । परिमलः सान्द्रानन्दोपभोगमयश्चमत्कारः परिमलसंप्रसरणञ्च । घनो मेघो गभीरता च । रुचयोऽभिसन्धयः प्रभाश्च । सुकुमारत्वं कोमलवर्णमयत्वम् ।

पृथग् भूत एवायं दोष इति निरधारि (पृ० २२८) । वस्तुतस्तु 'योयस्याव्यभिचारी' इत्यादिकारिकया रुद्रटलक्षितेन तद्वदाख्यदोषेनाभिन्नोऽयम् । अनुपादानेऽपीत्यादि वृत्तिविवृतं वैशिष्ट्यं रुद्रटलक्षणे 'परिपूरयितुं छन्दो यत्र' इत्यस्य पर्यायप्रायमेव । चण्डीदासव्याख्यानमप्येतदभिप्रायमेव । परे त्वत्र विमर्ति सूचयन्त उदाहरणन्तरं निरदिक्षन् कान्ताकचेत्यादि ।

१. इति वा–ख० । उभयत्रैवेत्येवेत्याशयको मूलकृन्नयानुसारी प्रयोगः ।

जगति जयिनस्ते ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।
मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं जन्मन्येकः स एव महोत्सवः ।।२५७।।

अत्रेन्दुकलादयो यं प्रति पस्पशप्रायाः स एव चन्द्रिकात्वमुत्कर्षार्थमारोपयतीति व्याहतत्वम् ।

कृतमनुमतमित्यादि ।।२५८।। अत्रार्जुनेति भवद्भिरितिचोक्ते सभीमकिरीटिनामिति किरीटि पदार्थः पुनरुक्तः । यथा वा—

अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थितेऽस्मिन्मम पितरि गुरौ सर्वधन्वीश्वराणाम् ।
कर्णालं संभ्रमेण व्रज कृप समरं मुञ्च हार्दिक्य शङ्कां
ताते चापद्वितीये वहति रणधुरं को भयस्यावकाशः ।।२५९।।

अत्र चतुर्थपदवाक्यार्थः पुनरुक्तः ।

भूपालरत्न निर्दैन्यप्रदानप्रथितोत्सव ।
विश्राणय तुरङ्गं वा मदालसन् ।।२६०।।

अत्र मातङ्गस्य प्राङ्निर्देशो युक्तः ।

विचित्रत्वं विकटबन्धत्वम् । मध्यमत्वं तदुभयदशास्पर्शिता वैदर्भीति यस्यां प्रसिद्धिः[1]
'मम तु जन्मन्येकः स एव महोत्सवः' इति सम्बन्धः ।

पस्पशो निःसारः । अर्जुनाजून सात्यके न युक्त ईदृशो मत्तातस्य सुतशोकाक्रान्त्या न्यस्तशस्त्रस्य दिवमुपगच्छतः केशाकर्षणरूपः परिभव इत्यनन्तरमपि चेत्युपक्रम्य कृतमनुमतमित्यादि श्लोकः—

वाक्यार्थपुनरुक्तमुदाहरति—यथा वेति । हार्दिक्येति । हार्दिक्यः कृतवर्मा नाम यादव- सुयोधनसहायः । दैन्यं कार्पण्यम्, विश्राणय देहि । मातङ्गं देहि यदि

---

२. सुकुमारविचित्रमध्यमाख्या मार्गाः क्रमेण प्रसिद्धाः पाञ्चालीगौडीवैदर्भीरीतयः । यदाहुर्वक्रोक्तिजीवितकृतः—"सन्ति तत्र त्रयो मार्गाः कविप्रस्थानहेतवः" इति । यत्र कारिकोपरि "चिरन्तनैर्वैदर्भीप्रभृतयो रीतयस्त्रयः समाख्यताः" इति स्वोपज्ञायां वृत्तौ विवरणम् । काव्यप्रकाशेऽप्येषां रीतित्वेनैव संज्ञा । मार्गपदस्य कुन्तकसम्मततद्विभागानाञ्चात्र न कुत्रापि दर्शनमिति च स्मरणीयम् ।

स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपैति ते।
तदयि साम्प्रतमाहर रूपकं त्वरितमूरुमुदञ्चय कुञ्चितम् ॥२६१॥

एषोऽविदग्धः।

मात्सर्यमुत्सार्यमादि ॥२६२॥ अत्र प्रकरणाद्यभावे सन्देहः शान्तशृङ्गार्यन्यतराभिधाने तु निश्चयः।

गृहीतं येनासीः परिभवभयान्नोचितमपि
प्रभावाद् यस्याभून्न खलु तव कश्चिन्न विषयः।

तु तद्दाने किञ्चिद् वैमुख्यं तदा तुरङ्गं देहीति वक्तुमुचितम्। मातङ्गतुरङ्गपदयोरेवाश्रयं तदितरतयाऽक्रमिकत्वमिति तदाश्रयत्वं दोषस्य। रूपकमलङ्करणम्[१]।

एष इति श्लोकवक्ता। अत्र स्वपिमीत्यननेन स्वरिरंसा प्रकटिता। प्रकरणाद्यभाव इति। इह पञ्चम्यर्थे सप्तमी, कारकाणां वैवक्षिकत्वात्। तदाहुर्बृद्धवैयाकरणाः—विवक्षातो हि कारकाणीति। सन्देह इति। शान्तोऽत्र वक्ता किं शृङ्गारी वेति साधकबाधकप्रमाणाप्रतीतेः। न चायं क्वचन प्रबन्धे श्लोको येन वक्त्रादि प्रतीयते। प्रकरणादिनियामकत्ववति त्वेवंजातीयेऽपि न दोष इत्याह—शान्तशृङ्गारिणोरन्यतरेणैवंजातीयकाव्याभिधाने प्रतीयमाने निश्चयः शान्तस्यशृङ्गारस्य वेति नायं दोषः। प्रकरणाद्यभावे सत्यत्र श्लोके दोष एव। शान्तादिवक्तृप्रतिभासनमिति तु न युक्तम्। 'वस्तुगत्या यत्र शान्तादिवक्तृप्रतीयमानतासम्भवस्तदा निर्दोषत्वात् तदननुसन्धानदशायां दोष इति चेत्? न, असमग्रानुसन्धानेऽप्यपेक्षया काव्यपरीक्षा[२]व्यवस्थानविरहात्। तस्माच्चिरतरनष्टवक्तृकेष्वेवेमादिष्वेव[३] शान्तादिवक्तृकत्वे यथोक्तमेव ज्यायः।

गृहीतमीति। अहं त्वां विमोक्ष्ये, अतो वक्तृसाकाङ्क्षत्वमप्यत्र। यत इति तु तत इत्यर्थे इति व्याख्यानमसान्तुष्टिकमेव। तस्मात्तत इति पाठे दोषद्वयम्। यत

---

१. एवमेव प्राचीनटीकाकृदनुमोदितः पाठः कूर्परमित्यर्वाचीनैर्धृतपाठे 'तदपि संहर कूर्परमायतम्' इति पाठव्यत्यासेऽश्लीलप्रायता स्फुटैव। सरस्वतीतीर्थास्तु रूपकमिति पठित्वा रूपकं दीनारादि साम्प्रतमाहर स्वीकुर्विति वेश्यां प्रत्युक्तिरियमिति प्रकरणं निर्दिशन्ति। श्लोकोऽयं पूर्वार्धे वामनोद्धृतं पद्यमेव। उत्तरार्धं ततो विलक्षणम्।

२. 'परिकसति' इति कपुस्तके लिपिकारवैलण्यसूचकः पाठः।

३. श्लोकोऽयं भर्तृहरिशतकत्रयस्थ इति प्रसिद्धिः। परं काव्यमेतन्मुक्तकभेदे गृह्यते। न चापि 'वैराग्यशतकेऽयम्' इति प्रकरणाच्छान्तो वक्तेति कृत्वा वक्तुं शक्यम्, प्राचीनासु मातृकासु वैराग्यविभागे नेदमास्ते। अत एव टीकाकृन्मन्तव्यं सुसमञ्जसमेव। यदि तु निर्बन्धवद्भिरत्र चिरतरनष्टवक्तृकत्वकथनमस्य कर्तुः सन्देहपक्षे गृह्यते, तदाऽगतिकत्वाद् वयं मध्यस्था एव।

परित्यक्तं तेन त्वमसि सुतशोकान्न तु भया-
द्विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते॥२६३॥

अत्र शस्त्रमोचने हेतुर्नोपात्तः ।

इदं ते केनोक्तं कथय कमलातङ्कवदने
यदेतस्मिन् हेम्नः कटकमिति धत्से खलु धियम्
इदं तद् दुःसाधाक्रमणपरमास्त्रं स्मृतिभुवा
तव प्रीत्या चक्रं करकमलमूले विनिहितम् ॥२६४॥

अत्र कामस्य चक्रं लोकेऽप्रसिद्धम् ।

यथा वा—

उपपरिसरं गोदावर्याः परित्यजताध्वगाः
सरणिमपरो मार्गस्तावद्भवद्भिरिहेक्ष्यताम् ।
इह हि विहितो रक्ताशोकः कयाऽपि हताशया
चरणनलिनन्यासोदञ्चन्नवाङ्कुरकञ्चुकः ॥२६५॥

अत्र पादाघातेनाशोकस्य पुष्पोद्गमः कविषु प्रसिद्धो न पुनरङ्कुरोद्गमः ।

सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः ।
तदनु भवतः कीर्तिः केनाप्यगीयत येन सा
प्रियगृहमगान्मुक्ताशङ्का क्व नाशि सुभप्रदः ॥२६६॥

अत्र अमूर्त्तापि कीर्तिर्ज्योत्स्नावत्प्रकाशरूपा कथितेति लोकविरुद्धमपि कविप्रसिद्धेर्न दुष्टम् ।

इत्यनुक्त्वा तत्र इति निवेशने तु दोषद्वयं निरवकाशमेव, तेन परित्यक्तं त्वमसि, ततस्तत्परित्यागादहमपि विमोक्ष्य इति प्रतीतेः ।

प्रसिद्धिविद्याविरुद्धत्वमाह—इदमिति । आतङ्को भयहेतुः ।

लोकप्रसिद्धिविरहमुदाहृत्य कविप्रसिद्धिविरहमुदाहरति—उपेति । पादाघातेन । पादश्चात्र नलिनतया रूपितः तद्रूपतयाऽवच्छेदितः सन्नप्रधानीभूतः प्रतीयत इति कविसम्प्रदायविपरीतमेतत् । "सम्प्रति कवीनां काव्याधिकारात्तत्प्रसिद्धिर्लोकप्रसिद्धेर्गरीयसीति लोकविरुद्धमपि कविसाम्प्रदायिकमदुष्टमिति दर्शयितुमाह—सुसितेत्यादि ।" एतच्चापव्याख्यानम्[1] । वस्तुतस्तु द्वयमपि कविप्रसिद्धमुदाहरणम् ।

१. यदि तु श्रीधरग्रन्थस्याक्षरिकसंवादबलेनैतन्मतमाक्षेपतया नीयते तदा महानविचारः स्यात् यतः सिद्धान्तस्तूभयत्रैवाभिन्नः । अपि च लोकविरुद्धमपि······दर्शयितुमाह—सुसितेत्यवतरणिका तत्र न लभ्यते (का० प्र० वि २३१ पृ०) ।

सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः ।
नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च ॥२६७॥

ग्रहोपरागादिकं विना रात्रौ स्नानं धर्मशास्त्रेण विरुद्धम् ।

अनन्यसदृशं यस्य बलं बाह्वोः समीक्ष्यते ॥
षाड्गुण्यानुसृतिस्तस्य सत्यं सा निष्प्रयोजना ॥२६८॥

एतदर्थशास्त्रेण ।

विधाय दूरे केयूरमनङ्गाङ्गनमङ्गना ।
बभार कान्तेन कृतां करजोल्लेखमालिकाम् ॥२६९॥

अत्र केयूरपदे नखक्षतं न विहितमित्येतत् कामशास्त्रेण ।

अष्टाङ्गयोगपरिशीलनकीलनेन दुःसाधसिद्धिसविधं विदधद्विदूरे ।
आसादयन्नभिमतामधुना विवेकख्यातिं समाधिधनमौलिमणिर्विमुक्तः ॥२७०

चरणनलिनेति साधकाभावेन रूपकोपमासन्देहाद्रूपक एव कोष्ठगतया प्रकृतावप्राधान्यात् । अमूर्ता सर्वजनीनानुकूलज्ञानविषयतामात्रशरीरतया प्रत्यक्षविषया । एतेन कीर्त्तेर्मलिनता शिवमौलीन्दुरात्रिराजयोरैक्यम्, चन्दनद्रुमे फलपुष्पविरहः, तोयमात्रे कमलकुमुदहंसचक्रवाकादिवर्णनमित्यादि सकलसमयसंग्रह[१] आकरप्रसिद्धया बोद्धव्यः । ग्रहोपरागमिति । रात्रिस्नाने निमित्तोपलक्षणम् ।

सन्धिविग्रहयानासनद्वैधाश्रयाः षाड्गुण्यम् । तच्च बार्हस्पत्यौशनसादौ महाबलस्यैव राज्ञः प्रतिपादितमिति विरुद्धता ।

केयूरपद इति । बाहुमूलजघनकन्धराद्यष्टस्थानगमेव नखक्षतं चण्डखरवेगयोर्नित्यम्, शेषयोस्तु नैमित्तिकमिति हि बाभ्रव्यवात्स्यायनाद्युपदेशः[२] ।

मोक्षशास्त्रविरुद्धमाह–अष्टाङ्गेति । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टौ योगाङ्गानि सकलपूजनीयव्यासादितन्त्रप्रसिद्धानि । परिशीलनकीलनमभ्यासदार्ढ्यम्, सिद्धयोऽणिमादिसम्पदः । तत्सविधं तन्निकटा अपि ता विदूरे विदधत् परिवर्जयन् । प्रकृतिपुरुषभेदावभासो विवेकख्यातिः ।

---

१. एतेषां प्रपञ्चश्चण्डीदासग्रन्थोपजीविना विश्वनाथेन साहित्यदर्पणे 'मालिन्यं व्योम्नि' इत्यादिना प्रदर्शितः अत्र टीकायां रात्रिराजपदेन रात्रे राजा रात्रौ राजेति वा समासाश्रयेनार्थवोधः ।

२. तथा हि वात्स्यायनः "प्राक्संयोगादेषां प्राधान्येन प्रयोगः" इति निर्दिशति ।

अत्र विवेकख्यातिस्ततः संप्रज्ञातसमाधिः पश्चादसंप्रज्ञातस्ततो मुक्तिर्न तु विवेकख्यातौ—एतद् योगशास्त्रेण । एवं विद्यान्तरैरपि विरुद्धमुदाहार्यम् ।

प्राप्ताः श्रियः सकलकामदुघास्ततः किं
दत्तं पदं शिरसि विद्विषतां ततः किम् ।
संतर्पिताः प्रणयिनो विभवैस्ततः किं
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ॥२७१॥

अत्र 'ततः किम्' इति न नवीकृतम् ।

तत्तु यथा—

यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः ।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता ॥२७२॥

यत्रानुल्लिखितार्थमेव निखिलं निर्माणमेतद्विधे-
रुत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा ।
याताः प्राणभृतां मनोरथगतैरुल्लङ्घ्य यत्संपद-
स्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम् ॥२७३॥

सम्प्रज्ञात इति । अवलम्बनेन स्थूलचित्ताभोगस्य वितर्कस्य सूक्ष्मरूपस्य च विकारस्य ह्लादकस्य च दृग्दर्शनशक्त्योरेकार्थसंविद्रूपायाश्चास्मितायाः क्रमेणैकैकशोऽपायात् सबीजः समाधिः सम्प्रज्ञातः, तत्रैव च विवेकख्यातिः । यदा तु तद्विरक्तं चित्तं विवेकख्यातिं निरुध्य चिन्मात्रे पुंसि विश्राम्यति तदाऽसम्प्रज्ञातः समाधिः । तत्कार्यक्रमेण च सविकारायां प्रकृतावुदासीनायां बोधात्मनः पुंसः स्वरूपस्थितिर्मोक्ष इति शास्त्रक्रमः ।

विद्यान्तरैरिति गृह्यमन्त्रवैद्यकागमयज्ञसूत्रभरतादिभिः[१] । अनवीकृतोऽर्थः कवेरशक्तिमव्युत्पत्तिं प्रकाशयन् वैरस्यमावहति । पर्यायान्तरोपात्तेऽपि विच्छित्यन्तरशून्येऽस्य भावात् कथितपदेन न तुल्यविषयता ।

तत्तु नवीकृतम् । यथेति । दाढर्याय व्यतिरेकप्रदर्शनं यदीति । किमद्भुतम्, किं ततः, सदैव, प्रकृतिरेवेति भङ्ग्यन्तरेणोक्तः स एवार्थो नवीकृतः कमपि प्रतीतिप्रकर्षमाधत्ते । यथाऽनलादीनां दाहकतादयः सहजधर्मास्तथा सतामविषादितेति निर्गलितार्थः । सनियमविशेषाविशेषेषु तत्तद्विपरीतानां वचने सनियमपरिवृत्तादिदोषचतुष्टयम् । तत्र क्रमेणोदाहृतयो यत्रेत्याद्याश्चतस्रः । अनुल्लिखिताख्यमिति पाठे तु[२] अनिरूपितनामधेयं समुदिताकारमेवेत्यर्थः । आभासः सादृश्यम् । दोषोद्धाराय

---

१. एवमुभयोरेव मातृकालिप्योः पाठः भरतपदेन लक्षणया भरतकृतनाट्यशास्त्रस्य ग्रहणम् ।

२. स एव वक्रोक्तिजीवितधृतः पाठः । अत्राभासशब्दः स्वयमेव मात्रादिविशिष्टमभिलषन् लक्ष्यते" इति तत्र वृत्तिश्च । मम्मटधृतपाठशोधनञ्च तत्रत्यमेव ।

अत्र ''छायामात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचिता'' इति सनियमत्वं वाच्यम् ।

वक्त्राम्भोजं सरस्वत्यधिवसति सदा शोण एवाधरस्ते
बाहुः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्रः ।
वाहिन्यः पार्श्वमेताः क्षणमपि भवतो नैव मुञ्जन्त्यभीक्ष्णं
स्वच्छेऽन्तर्मानसेऽस्मिन् कथमवनिपते तेऽम्बुपानाभिलाषः ॥२७४॥

अत्र 'शोण एवं इति नियमो न वाच्यः ।

पाठान्तरं छायेति । मात्रग्रहणेनोपाध्यन्तरनिरासः वाच्यावचने प्रतीयत एव सोऽर्थः । शब्दरचना तु यथा न कृतेति विलम्बितत्वं प्रतीतेः, यथा एषोऽहमित्यादावप्यर्थादिः । अत्र तु न प्रतीयत एव सोऽर्थ इत्यर्थदोषता, अन्यथा वाच्यावचनावाच्यवचनाभ्यां निखिलदोषजातिसंग्रहादनर्थकमेव सकलप्रपञ्चाभिधानं प्रसज्येतेत्यैके[1] ।

यत्र प्रधानभूतस्यानभिधानं तत्र वाच्यावचनम्, यत्र तु वाच्यमभिहितं तदंशभूतास्तु नियमादयो नाभिधीयन्ते तत्र दोषान्तरमित्यपरे । तत्राद्यं प्रकृतेऽपि समानम्, तत्रापि विलम्बिनी नियमप्रतीतिरस्त्येव । द्वितीये त्वेषोऽहमित्यादावप्यर्थस्य प्रकृते चैवार्थस्य वैजात्यं तावन्न पश्यामः । नियम एवास्य पृथग्भूतो विषय इति चेन्न, तथाप्यर्थशब्ददोषताविभागानुपपत्तेः । कथं तर्हि सङ्गतिरिति चेत् ? अप्राकृतस्येत्यादावेषोऽहमित्यादौ च शब्दोच्चारणान्तरमेव दोषप्रतिभासः । अत्र त्वर्थप्रतीत्यनन्तरमिति सहृदयहृदयसाक्षिको विभागः ।[2]

ननु रसादिनिकर्ष एव दोषः, स च सर्वसाधाण एव, ततश्च कीदृशो दोषप्रतिभासकालविभाग इति चेत् ? सत्यम्, न वयमास्वादापकर्षरूपं दोषमपेक्ष्य प्रतिभासकालभेदं ब्रूमः । किन्तर्हि तद्धेतुं सर्वात्माश्रयं शब्दार्थाश्रयम्, तदपेक्षया सर्वसाधारण्यात्, सर्वत्रैव शब्दादिदोषतया विभागोऽनुपपन्न एव स्यात् ।

ननु न दोषस्तदानीं ताद्रूप्येण प्रतिभासते, रसादिनिकर्षप्रतीतेर्भविष्यत्वादिति चेत् ? न, तत्स्वरूपप्रतीतिमाश्रित्यैव कालविभागोपपत्तेः । एतच्चैतदुल्लासादिकारिकया गतर्थप्रायमेव । एवं सनियमपरिवृत्यादावधिकपदत्वादितो विभाग उन्नेयः । सरस्वती वाग्देवता, नदीभेदश्च । शोणो लोहितो नदभेदश्च । दक्षिणः

१. श्रीधरकृताक्षेपस्य तन्मतसिद्धान्तस्य चोद्धृतिरियम् । परं वाक्यदोषार्थदोषयोर्विभेदो न तत्र स्फुट इत्यापाततश्चण्डीदासस्यात्र विचिकित्सा । सा चोक्तनयेन सुसमाधानेति मन्तव्या ।

२. एतच्च मम्मटादिसिद्धान्तप्रतिकूलमेव, परिवृत्तिसहत्वासहत्वाभ्यां तन्निर्णयस्याङ्गीकारात् । चण्डीदासोऽप्येवमेवेतरत्र बहुत्र मन्यते ।

श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मषीकूर्चकै-
र्मन्त्रं तन्त्रमथ प्रयुज्य हरत श्वेतोत्पलानां श्रियम्।
चन्द्रं चूर्णयत क्षणाच्च कणशः कृत्वा शिलापट्टके
येन द्रष्टुमहं क्षमे दशदिशस्तद्वक्त्रमुद्राङ्किता ॥२७५॥

अत्र 'ज्योत्स्नीम्' इति श्यामाविशेषो वाच्यः।

कल्लोलवेल्लितदृषत्परुषप्रहारै रत्नान्यमूनि मकरालय माऽवमंस्थाः।
किं कौस्तुभेन विहितो भवतो न नाम याञ्चाप्रसारितकरःपुरुषोत्तमोऽपि।२७६॥

अत्रैकेन किं न विहितो भवतः स नाम इति सामान्यं वाच्यम्।

अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः प्रत्युत
द्रुह्यन् दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया।
उत्कर्षञ्च परस्य मानयशसोर्विस्रंसनं चात्मनः
स्त्रीरत्नञ्च जगत्पतिर्दशमुखो देवः कथं मृष्यते ॥२७७॥

अत्र स्त्रीरत्नमुपेक्षितुमित्याकाङ्क्षति। नहि परस्येत्यनेन सम्बन्धो योग्यः।

आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी।
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ॥२७८॥

सव्येतरो दिग्भेदाश्रितश्च। समुद्रोऽलङ्कारसहितो महार्णवश्च। वाहिन्यः पृतना नद्यश्च। मानसं हृदयं सरोभेदश्च। नियमो न वाच्यो निरुपयोगत्वात्।

तन्त्रमौषधप्रयोगः। श्यामाविशेष इति तस्यैव विवक्षितत्वाद्रात्रिमात्रस्य श्यामतानयनवैयर्थ्यात्, प्रत्युत श्यामापदेन श्यामत्वसंस्पर्शाच्च।

वेल्लिताः क्षिप्ताः। अत्र कौस्तुभपदप्रयोगे सर्वस्या एव रत्नजातेरादरणीयता समर्थिता न भवति, कौस्तुभस्य स्वगतमहिम्नैव विशेषेणादरणीयत्वात्। तस्य च रत्नान्तरेऽभावात्तस्यासुखसमर्थनं युज्यते।

तथाहि—एकेनेति। प्रत्युत वैपरीत्ये द्रुह्यन् परं जिघांसन्। विरुद्धचरितोऽनभिमतचरितः। विस्रंसनं कीर्तिभ्रंशः। अत्र स्त्रीरत्नमिति कथं मृष्यत इत्यनेनान्वयाक्षमं योग्यताविरहात् न खलु द्वेष्यं तस्य तत्, तस्माद् योग्यान्तरसाकङ्क्षमित्याह—उपेक्षितुमिति। न्यूनपदत्वं त्वमर्षणक्रियोपादानादपास्तम्, तदन्वयितया कवेरभिप्रायाभावादित्यर्थः।

ननु न स्त्रीरत्नमात्रममर्षणीयतया विवक्षितम्, किन्तु परकीयतया। विशिष्टस्तथाभावाश्च परस्येति सम्बन्धे सुलभ एवेत्याह—नहीति। सन्निधेरभावादित्यर्थः।

अत्र स्याच्चेदेष न रावण इत्यत एव समाप्यम्।

श्रुतेन बुद्धिर्व्यसनेन मूर्खता मदेन नारी सलिलेन निम्नगा।
निशा शशाङ्केन धृतिः समाधिना नयेन चालङ्क्रियते नरेन्द्रता ॥२७९॥

अत्र श्रुत्याभिरुत्कृष्टैः सहचरितैर्व्यसनमूर्खतयोर्निकृष्टयोर्भिन्नत्वम्।

'लग्नं रागावृताङ्ग्या' इत्यत्र 'विदितं तेऽस्तु' इत्यनेन श्रीस्तस्मादपसरतीति विरुद्धं प्रकाश्यते।

प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा-
मकेशवमपाण्डवं भुवनमद्य निःसोमकम्।
इयं परिसमाप्यते रणकथाऽद्य दोःशालिना-
मपैतु रिपुकाननातिगुरुरद्य भारो भुवः ॥२८०॥

अत्र 'शयितः प्रयत्नेन बोध्यसे' इति विधेयम्। यथा वा—

वाताहारतया जगद्विषधरैराश्वास्य निःशेषितं
ते ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः।

पदं निवासः। द्रुहिणो ब्रह्मा। अत्र रावणपदार्थेन जगदाक्रन्दनकारित्वादि-रूपार्थान्तरसंक्रमितेनावच्छेदे कृते 'जीवत्यहो रावणः' इतिवत् काऽपि कान्तिः समुन्मीलतीति मध्यप्रवेशे त्वसावर्थोऽलक्षितप्रायश्चमत्कारप्रकर्षं नाधत्त इति स्वसंवित्तिसिद्धमदः[१]। व्यसनं स्त्रीद्यूताद्यासङ्गः, धृतिर्धैर्यम्, समाधिर्धर्मचिन्ता। उत्कृष्टैः प्रशस्यैः, सहचरैस्तुल्यकक्षतयोपात्तैः निकृष्टयोरप्रशस्तयोर्भिन्नत्वं वैजात्यम्।

लग्नमिति विरुद्धमतिकृतिशब्दस्य द्व्यर्थता, अत्र तु नैवम्, अत एवाऽस्माभिः पूर्वं गर्भितप्रस्तावे विरुद्धमतिकृत्पदमेतदनुसृत्य व्याख्यातम्। अर्थदोषता चात्र व्यक्तैव,। वाक्यान्तरप्रतिभासमानत्वात्।

विध्यनुवादानुयुक्ततयोः क्रमेण निदर्शनं प्रयत्नेत्यादि। शेषे स्वपिषि, सोमकाः पाञ्चालाः, शयित इत्यन्तरमित्यनूद्येति शेषः। अत्र ह्येतावन्ति दिनानि चिन्ता-वशादलब्धनिद्रस्त्वम्, मयाऽद्य सकलरिपुक्षये कृते निःशेषितकृत्यतया सुखप्रसुप्तः प्रयत्नेन प्राभातिकस्तुतिमङ्गलपरम्पराभिर्बोध्यस इति विवक्षितम्। तथा तु न प्रतीतिरिति दुष्टता।

---

१. अत्र 'अहह आश्चर्यमेकोऽपि गरीयान् दोषः' इत्यादिचूर्णकगद्यकृतयाऽवतरणिकयैव रावणोपेक्षा सूचिता। तस्याश्च 'स्याच्चेदेष न रावणः' इत्यनेन पिष्टपेषणमित्यपि केषाञ्चिन्मते दूषकताबीजम्। इमं नित्यदोषं वदन्तः काव्यप्रदीपोद्द्योतकृतो नागेश-भट्टाः स्वकीयं वैयाकरणमतगृह्यत्वमेव समर्थयन्ते।

तेऽपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकै-
र्दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते ॥२८१॥

अत्र वाताहारादित्रयं व्युत्क्रमेण वाच्यम्।

अरे रामाहस्ताभरण भसलश्रेणिशरण
स्मरक्रीडाव्रीडाशमन विरहिप्राणदमन।
सरोहंसोत्तंस प्रचलदलनीलोत्पलसखे
सखेदोऽहं मोहं श्लथय कथय क्वेन्दुवदना ॥२८२॥

अत्र विरहिप्राणदमनेति नानुवाद्यम्।

"लग्नं रागावृताङ्ग्या" इत्यादि "अत्र विदितं तेऽस्तु" इत्युपसंहृतोऽपि तेनेत्यादिना पुनरुपात्तः।

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः।
यथाशु जायते पातो न तथा पुनरुन्नतिः ॥२८३॥

अत्र पुंव्यञ्जनस्यापि प्रतीतिः।

स्फुरितं चेष्टितम्। जाल्मो मूर्खः। अत्र मृगचर्मवसनाभावस्तोयकणाहारता, ततोऽपि[1] वाताहारता गरीयसी व्रतचर्येति क्रमेणोपादानं ज्यायः।

ततश्च विधेयानामपि निःशेषितादीनां[2] तत्प्रतिबद्धतया तथैवोपादेयतेति तद्व्यतिक्रमाद् विध्ययुक्तता। वाताहाराद्यपेक्षया त्वनुवादायुक्तताऽपि। भसलाः भ्रमराः। नानुवाद्यं रामहस्ताभरणेत्यादिवत्, प्रार्थनीयचाटुकाराननुगुणत्वात् प्रत्युत वैपरीत्याच्च।

त्यक्तपुनःस्वीकृतमुदाहरति–लग्नमित्यादि। उपसंहृतोऽप्युपालम्भविषयोऽर्थः।

अश्लीलमाह—हन्तुमिति। परं हन्तुमेव प्रवृत्तस्य स्तब्धस्याप्रश्रयिणः, विवरैषिणः परच्छिद्रानुसारिणो यथा शीघ्रं पातोऽपचयस्तथा न पुनरुन्नतिरुपचय इति मुख्योऽर्थः। अर्थान्तरन्तु हननं वात्स्यायनादि तन्त्रप्रसिद्धं निर्घातादि, स्तब्धता लिङ्गस्य दाढर्यम्, विवरं स्मरगृहम्, पातो धातुविसर्गान्तरं लिङ्गसंकोचः, उन्नति-र्नष्टवेगप्रत्युत्थापनार्थं कृत्रिमदाढर्याधानम्। व्यञ्जनं वराङ्गम्। अस्य चार्थस्यै-कपदालभ्यत्वेन समुदितवाक्यार्थानन्तरं प्रतीयमानत्वान्न शब्ददोषता। "श्रितक्षमा

---

१. औचित्यभङ्गविचारनये तु प्रदर्शितेषूदाहरणेषु प्रयत्नेत्यादौ शब्दमनौचित्यं वाताहारतयेत्वादावार्थम्, अरे राम इत्यादावुभयाश्रयमिति केऽपि विभागसमर्थनं कुर्वन्ति। परं परिवृत्तिसहत्वासहत्वपक्षाश्रये सर्वत्रैवार्थोऽयं दोष इति ग्रन्थकृतां तथैव परिगणना।

२. निःशेषणादीनामिति क० पाठः।

यत्रैको दोष प्रदर्शितस्तत्र दोषान्तराण्यपि सन्ति. तथापि तेषां तत्राप्रकृतत्वात् प्रकाशनं न कृतम् ।

कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः ।
सन्निधानादिबोधार्थं

अवतंसादीनि कर्णाद्याभरणान्येवोच्यन्ते, तत्र कर्णादिशब्दाः कर्णादिस्थिति प्रतिपत्तये । यथा—

रक्तभुवः" इत्यादौ तु प्रत्येकमपि पदानामनुचितार्थबोधकता । दोषाणाञ्च परस्परविभागपरीक्षणं ग्रन्थगौरवभीरुभिरस्माभिरप्रपञ्चितमपि स्वयं मृग्यं महाबुद्धिभिरिति ।

ननु यश्चाप्सरोविभ्रमेति, प्रोत्सर्पद्भिरहानलेनेति, लग्नेति च, श्रुतिकटुता; अमर्षशून्येत्यादौ च कष्टता, षाड्गुण्यानुसृतिरित्यादौ चाप्रतीतत्वम्, एवमन्यत्रापि यथायोगं दोषान्तराणि सन्ति[१], तानि कस्माद्विभज्य नोक्तानीत्याह-यत्रैक इत्यादि । अप्रकृतत्वादिति। तत् प्रदर्शनार्थं तेषामुदाहरणानामनुपात्तत्वादित्यर्थः । न च तत्प्रपञ्चने ग्रन्थलाघवार्थमुदाहरणसङ्कोच इति वाच्यम्, शिष्यबुद्धिवैशद्यार्थत्वादुदाहृतिप्रपञ्चस्य । अत एवाह—दोषान्तरसद्भावसूत्रणं स्वयं बहुधा विभज्य विशदबुद्धयः शिष्या व्युत्पन्ना भवन्त्विति ।

सम्प्रति केचिदेतेषु नित्यदोषाः केचिदनित्यदोषा इति विभागप्रकरणारम्भे पौनरुक्त्यस्य प्रायो निर्दोषतामाह—कर्णेत्यादि । कर्णादिध्वनीनां कर्णादिशब्दानां निर्मितिर्घटनमुपादानमिति यावत् । अपवादस्य प्रसक्तिपूर्वकत्वात्तामाह—कर्णाद्याभरणान्येवोच्यन्त इति सामर्थ्यलब्धा एवात्र कर्णादिशब्दा इति तदुपादनं पौन-रुक्त्यशङ्कावहमित्यर्थः । स्थितीति सन्निधानपदविवरणम् ।

---

१. अत्र चण्डीदासमतानुजीविनः श्रीवत्सलाञ्छनभट्टाचार्याः 'एतच्च लग्नं रागावृताङ्ग्या' इत्यत्र दोषाननेकान् प्रकाशयता ग्रन्थकृतैव प्रकाशितम् । तथा चोपाधिसङ्करोऽपीति भाव इति । 'यश्चाप्सर' इत्यत्राप्सेति संयुक्तवर्णस्य, आदावञ्जनेत्यत्र प्रोत्सर्पदिति च संयुक्तवर्णस्य, लग्नेत्यत्र च ष्टचेति प्रथमपादे, ष्टेति द्वितीयपादे, स्तेति तृतीयपादे च श्रवणात् श्रुतिकटुता ।

"सर्वैरुपरि सकारः सर्वे रेणोभयत्र संयुक्ताः ।
एकत्रापि हकारः परुषायां सर्वथा च शषौ ।।" इति ।
"परुषाभिधायिवचनादनुकरणच्चापरत्र नो परुषाम् ।
रचयेदथागतिः स्यात्तत्रापि हादयो हेयाः ।।"

अस्याः कर्णावतंसेन जितं सर्वं विभूषणम् ।
तथैव शोभतेऽत्यर्थमस्याः श्रवणकुण्डलम् ॥२८४॥

अपूर्वमधुरामोदप्रमोदितदिशस्ततः ।
आययुर्भृङ्गमुखराः शिरःशेखरशालिनः ॥२८५

अत्र कर्ण-श्रवण-शिरःशब्दाः सन्निधानप्रतीत्यर्थाः ।

विदीर्णाभिमुखारातिकराले सङ्गरान्तरे ।
धनुर्ज्याकिणचिह्नेन दोष्णा विस्फुरितं तव ॥२८६॥

अत्र धनुःशब्द आरूढत्वावगतये । अन्यत्र तु ज्याबन्धनिष्पन्दभुजेन यस्येत्यत्र केवलो ज्याशब्दः ।

प्राणेश्वरपरिष्वङ्गविभ्रमप्रतिपत्तिभिः ।
मुक्ताहारेण लसता हसतीव स्तनद्वयम् ॥२८७॥

अत्र मुक्तानामनन्यरत्नमिश्रितत्वबोधनाय मुक्ताशब्दः ।

सौन्दर्यसम्पत्तारुण्यं यस्यास्ते ते च विभ्रमाः ।
षट्पदान् पुष्पमालेव कान् नाकर्षति सा सखे ॥२८८॥

अस्या इति कर्णेऽवतंसः श्रवणे कुण्डलमिति विग्रहः । कर्णादीत्यादिपदफलमाह—शिरःशेखरेत्यादि । अत्रापि सप्तमीसमासः । सन्निधानादित्यादिफलं धनुर्ज्येति मुक्ताहारेति पुष्पमालेति च ।

ननु श्रवणकुण्डलमित्यादौ श्रवणगतमेव कुण्लं शोभाविशेषमाधत्ते, न तु केवलमित्यादि प्रत्यानुगुणसन्निधानादिबोधनार्थं यथा श्रवणादिपदमुपादीयते, तथा कङ्कणादौ च करादिपदोपादानं प्रसक्तम् ।

न चैतद् युक्तमित्याह—स्थितेष्विति । व्यवस्थितेषु साम्प्रदायिकेष्वित्यर्थः । एतद्व्यतिरिक्तमाह—न खल्विति ।

एतदुक्तं भवति— न वयं पौनरुक्त्यादिमात्रेण दोषत्वं ब्रूमः, किन्तु [1]चमत्कारव्याघातकत्वेनैव तेषामेव दोषता नेतरेषाम्, तल्लक्षणविरहात् । तेन

इति च रुद्रटवचनादादौ परुषत्वं ततस्तत्प्रयोजकं हेयत्वं तथात्वे च दोषत्वमित्यनुषञ्जनम् । उद्भटग्रन्थोऽप्येवमाह—"अनुप्रासः स च त्रिविधो वृत्तिसंश्रयात्" इति । मूलकृदाकूतप्रदर्शनपुरःसरं वचनम् । परुषायां वृत्तोरुद्भटकृतं लक्षणम्—"शषाभ्यां रेफसंयोगैष्टवर्गेण च योजिता । परुषा नाम वृत्तिः स्याद् ह्लह्व्याद्यैश्च संयुता ॥" इत्येवावतारयति ।

१. कपुस्तके तु वाक्यद्वयस्यास्य विपर्यासः । चमत्कारव्याघातकत्वेनैव' इत्यनन्तरमेव 'तेषामेव' इति तत्र पठचते ।

अत्रोत्कृष्टपुष्पविषये पुष्पशब्दः। निरुपपदो हि मालाशब्दः पुष्पस्रजमेवाभिधत्ते।

स्थितेष्वेतत्समर्थनम् ॥

न खलु कर्णावतंसादिवज्जघनकाञ्चीत्यादि क्रियते।
जगाद मधुरां वाचं विशदाक्षरशालिनीम् ॥

इत्यादौ क्रियाविशेषणत्वेऽपि विवक्षितार्थ प्रतीतिसिद्धौ"गतार्थस्यापि विशेष्यस्य विशेषणदानार्थं क्वचित्प्रयोगः कार्यः" इति न युक्तम्।

युक्तत्वे वा—

चरणत्रपरित्राणरहिताभ्यामपि द्रुतम्।
पादाभ्यां दूरमध्वानं व्रजन्नेष न खिद्यते ॥२८९॥

इत्युदाहार्यमिति—

च सामान्येन पौनरुक्त्यादिभेदाः क्रोडीक्रियन्ते। ततश्च जघनकाञ्चीकरकङ्कणादौ श्रवणकुण्डलमुक्ताहारादौ च प्रथमद्वितीयकल्पौ सहृदयहृदयसाक्षिका वित्युपपद्यत एव विभागः। अयञ्च परिहारः सन्निधानादिबोधार्थत्वादिनाऽन्वाचीयते, न तु तस्य मुख्यपरिहारार्थता, अन्यत्रापि प्रसङ्गात्। प्रसिद्धिरेव भगवती विशेषिकेति केचित्। न खलु प्रसिद्धिमात्रं प्रमाणं किन्त्वविरोधिनी प्रसिद्धिः, अन्यथोपमादावनेकेवशब्दादीनां विध्यादिभेदादीनां वा निर्दोषत्वप्रसङ्गात्। एतच्च समर्थनमिति वदता ग्रन्थकृता सूत्रितमेव। समर्थनं स्थगनमित्यनेकार्थत्वात् समर्थनमात्रम्, न तु सर्वथा निरवद्यमिति वदन्तस्तु ग्रन्थार्थमनुभवं चापहस्तितवन्तः[१]। एवमुत्तरत्राप्युन्नेयम्।

गतार्थस्य जगादेत्यनेनैव विशेष्यस्य वागित्यस्य विशेषणदानार्थमिति प्रकृतोपयोगितयोपात्तानां विशेषणानाम्, अन्यथाऽन्वयप्रसङ्गादित्यर्थः।

एतच्चोदाहृतिदूषणमात्रं न तु प्रायदूषणमित्याह—**युक्तत्वे वेति**। अत्र चरणपरित्राणरहितत्वस्य क्रियाविशेषणत्वे पादचारो न निश्चीयते, यानादिनाऽपि गम-

---

१. एते क इति नेदानीं निर्णेतुं शक्याः। एतेषां मते कथञ्चित् समर्थनमेव, न तु सर्वथाऽदोषत्वम्, यथा वैयाकरणनये दुर्घटपदानां घटना दुर्घटवृत्त्यादौ। श्रीधरमतेन एतस्यामग्रिमायां च कारिकायामधिकारसूत्रसमकक्षायां केषाञ्चिदपि प्राङ्निर्दिष्टानां दोषाणामतथात्वं स्थाप्यते। "न दोषः पुनरुक्तोऽपि प्रत्युतेयमलङ्कृति" इत्यादिप्रामाणिकाचार्यदण्डिवचनमेतेषां पुनः काव्यशोभाकरत्वपक्षमुज्जीवयति। अत एव 'न भवति दुष्टम्' इत्यादिनिषेधमुखस्वीकारमपोह्य "गुणत्वापत्तये नित्यं तेऽत्र दोषगुणाः स्मृताः" इत्यादिवचनं नीलाम्बुजक्रीडासरोहेमाङ्गदादिषु चौदार्यगुणाविष्कारस्तेषां मते सम्भवतीति।

ख्यातेऽर्थे निर्हेतोरदुष्टता

यथा—

चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥२९०॥

अत्र रात्रौ पद्मस्य सङ्कोचो दिवा चन्द्रमसश्च निष्प्रभत्वं लोकप्रसिद्धमिति तु न भुङ्क्त इति हेतुं नापेक्षते ।

अनुकरणे तु सर्वेषाम् ।

सर्वेषां श्रुतिकटुप्रभृतीनां दोषाणाम् । यथा—

मृगचक्षुशमद्राक्षमित्यादि कथयत्ययम् ।
पश्यैव च गवित्याह सुत्रामाणं यजेति च ॥२९१॥

वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः क्वचित् क्वचिन्नोभौ[1] ॥५९॥

वक्तृ-प्रतिपाद्य-व्यङ्ग्य-वाच्य-प्रकरणादीनां महिम्ना दोषोऽपि क्वचिद् गुणः क्वचिन्न दोषो न गुणः । तत्र वैयाकरणादौ वक्तरि प्रतिपाद्ये च रौद्रादौ च रसे व्यङ्ग्ये[2] कष्टत्वं गुणः । क्रमेणोदाहरणम्—

नस्य सम्भवात् । न च तत् कर्तृ क्रियाविशेषणं यानाद्यभावोपलक्षणं भवत्विति वाच्यम्, कष्टप्रायत्वात्, किन्तु चरणत्रपुरुषसम्बन्धः पदद्वारक एवेत्यावश्यकं तदुपादानम्[3] । ख्यातेऽर्थे हेतुमुपात्तम् ।

सर्वेषामिति विवृणोति—श्रुतिकटुप्रभृतीनामिति, नित्यानामनित्यानामित्यर्थः । मृगचक्षुषमित्यादि, श्रुतिकटु त्वसाधु । सुत्रामाणमितीन्द्रपर्यायत्वेऽपि कविभिरप्रयुक्तम् ।

सम्प्रति तेषु स्थानेषु श्रुतिकटुनिहतत्वादीनां निर्दोषतां दिङ्मात्रेणाह—**वक्त्रादिती** । औचित्यमानुरूप्यम् । दोषोऽपि श्रुतिकटुत्वादिधर्मवानपि गुणः । आस्वादरूपविशेषार्थकमुख्यगुणप्रचुरतोपकारित्वाद् भाक्तो व्यपदेशो नोभौ न गुणौ न

---

१. 'ख्यातेऽर्थे' इत्यादि आर्यया निबद्धायाः कारिकायाः पूर्वार्धमेतच्चोत्तरार्धम् । पूर्वार्धे 'ख्यातेऽर्थे निर्हेतोरदुष्टता', 'अनुकरणे तु सर्वेषाम्' इति भागद्वयम् ।

२. अत्रोदयनाचार्यस्य प्रसिद्धा पङ्क्तिर्युक्तित्वेनानूदिता ।

३. मूलकृन्मत उपरोक्तपद्ये न दोषसम्भावना काचित् । चरणत्रेत्यादौ न गतार्थता । द्रुतमित्यादि च क्रियाविशेषणतयाऽस्य समर्थनम् । काव्यप्रदीपे तु 'न युक्तमुदाहृतम्' इति मम्मटमतावधारणवैयर्थ्यसूचकं मन्तव्यमुपलभ्यते ।

दीधीङ्वेवीङ्समः कश्चिद् गुणवृद्ध्योरभाजनम् ।
क्विप्प्रत्ययनिभः कश्चिद् यत्र सन्निहिते न ते ॥२९२॥

यदा त्वामहमद्राक्षं पदविद्याविशारदम् ।
उपाध्यायं तदाऽस्मार्षं समस्प्राक्षं च सम्मदम् ॥२९३॥

अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम् ।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्-
व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति ॥२९४॥

वाच्यवशाद् यथा—

मातङ्गा किमु वल्गितैः किमफलैराडम्बरैर्जम्बुकाः
सारङ्गा महिषा मदं व्रजथ किं शून्येषु शूरा न के ।
कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः पुरः
सिन्धुध्वानिनि हुङ्कृते स्फुरति यत्तद्गर्जितं गर्जितम् ॥२९५॥

दोषः। दोषाभावात्मको गुणस्तदभावात्मको दोष इति मतद्वयं कटाक्षयति। अन्यथा परस्परविरोधे हि न प्रकारान्तरस्थितिः[1] स्यात्। न चैवम्, तदुभयविलक्षणस्यापि प्रकारस्यानुभवात्। गुणहीनमपि काव्यं न तथा रसप्रतीतौ मन्थरं यथा सदोषमिति स्वानुभवसिद्धमदः। किञ्च, यथा दोषतारतम्यादास्वादापकर्षतारतम्यं तथा गुणतारतम्यात् प्रकर्षतारतम्यमप्यनुभूयते। न चाभावे तारतम्यं युज्यते, नहि भवति घटाभावतरो घटाभावतम इति। वाच्यं करणीयम्। कष्टत्वमर्थस्य मन्थरप्रतीतिकता, शब्दस्य तु श्रवणरुपषता। तत्र द्वयमपि यथा दीधीती। अनयोर्गुणवृद्धिनिषेधः, क्विपः सर्वापहारी लोपोऽवशिष्ट इत्यर्थकष्टता। कश्चिदिति। गुणवृद्ध्योरिति क्विप्प्रत्ययेति च शब्दकष्टता।

द्वितीयं कष्टत्वम्—यदा त्वामिति। सम्मदो हर्षः। नलकं जङ्घास्थि। प्राग्भारः सेकः[2]। अत्र रौद्राङ्गक्षोभणो बीभत्सो वर्णबन्धवैकटचमोजःप्रकर्षकतया गुणः। परुषाः

---

१. एतदादावेवमन्यदनीत्यन्तेन प्रबन्धेन वृत्तिकृता यदुद्दिष्टं तत्र न दोषो न गुण इत्यनुषञ्जनीयम्।

२. रौद्राङ्गक्षोभं बीभत्सवर्णवैकण्ठ्यमोज इति क० रौद्रांशक्षोभणबीभत्सवर्णं बन्धेत्यादि ख०।

अत्र सिंहे वाच्ये परुषाः शब्दाः ।

प्रकरणवशाद् यथा—

रक्ताशोक कृशोदरी क्व नु गता त्यक्त्वाऽनुरक्तं जनं
नो दृष्टेति मुधैव चालयसि किं वातावधूतं शिरः ।
उत्कण्ठाघटमानषट्पदघटासङ्घट्टदष्टच्छद-
स्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः ॥२९६॥

अत्र शिरोधूननेन कुपितस्य वचसि ।

क्वचिन्नीरसे न गुणो न दोषः । यथा —

शीर्णघ्राणाङ्घ्रिपाणीन् व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्,
दीर्घाघ्रातानघौघैः पुनरपि घटयत्येक उल्लाघयन् यः ।
घर्मांशोस्तस्य वोऽन्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्ते-
र्दत्तार्घाः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमंहोविघातम् ॥२९७॥

अप्रयुक्तनिहतार्थौ श्लेषादौ न दुष्टौ । यथा—

शब्दाः कोपाटोपेत्यादयः। एवंविधे हि सरभससंरम्भशालिनी बन्धनीये[१] मृदुलाः शब्दा परमनौचित्यं पुष्णन्ति ।

रक्ताशोकेति । पुष्पोद्गमानुमितमुर्वशीदर्शनं[२] शिरोधूननेन गोपायतीति कोपोक्तौ । उत्कण्ठेत्यादि प्रस्तावानुगुणम् । अपघनैरङ्गैः । घृणा दया । घृणयो रश्मयः । उल्लाघनं रोगमोक्षणम् । अत्रौत्कर्षणीयस्यापकर्षणीयस्य वास्वादस्याभावान्न गुणदोषान्यतमता दैवगतरतिभावोत्कर्षणापकर्षणोदासीनस्य वर्णबन्धवैकटचस्य । एवं सर्वत्रापि नीरसे दैवगतस्तुत्यादिपरे बोद्धव्यः । सर्वथा आस्वादादिरहिते तु काव्याभासे सर्वेषामेव श्रुतिकटुप्रभृतीनामीदृशी शक्तिः । काव्याधर्मरूपाणां दोषाणां तत्राप्रवेशात् । श्रुतिकटुत्वादयस्तु सम्भवन्तोऽपि न वाक्यदोषाः ।

---

१. बन्धनीये काव्यबन्धविषयीभूते । अत्र ध्वन्यालोकमन्तव्यानि—"तत्र मुक्तकेषु रसबन्धाभिनिवेशिनः कवेस्तदाश्रयमौचित्यम्", "संदानितकादिषु तु विकटनिबन्धानौचित्यान्मध्यसमासदीर्घसमासे एव संघटने" "रौद्रादयो रसा दीप्त्या लक्ष्यन्ते काव्यवर्तिनः । तद्व्यक्तिहेतू शब्दार्थावाश्रित्योजो व्यवस्थितम्", । योग आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययोः । टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि ॥", तथा परुषाणामप्येषां न गुणत्वं नवा दुष्टत्वम्, रसं प्रत्येव वर्णानामौचित्ययोर्वक्ष्यमाणत्वात् ।

२. तथाहि विक्रमोर्वशीयपद्यमिदमिति व्याजेनाकरपरामर्शनम् । परन्तु बहुष्विदानीन्तनविक्रमोर्वशीपुस्तकेष्वयं श्लोको न लभ्यते । आधुनिका वैद्यनाथनागोजीभट्टादयश्चण्डीदासमतमिदं समर्थयन्ते ।

येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो,
यश्चोद्वृत्तभुजङ्गहारवलयोगङ्गां च योऽधारयत् ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ॥२९८॥

अत्र माधवपक्षे शशिमदन्धकक्षयशब्दावप्रयुक्तनिहतार्थौ ।

अश्लीलं क्वचिद् गुणः[1] । यथा सुरतारम्भगोष्ठ्याम् ।

"द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु" इति कामशास्त्रस्थितौ—

करिहस्तेन सम्बाधे प्रविश्यान्तर्विलोडिते ।
उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते ॥२९९॥

यत्तु क्वचन तथाविधानामपि दोषोदाहृतितया निदर्शनं तत् पृच्छानुपृच्छिकाप्रायेणैत्यवगन्तव्यम् । च्युतसंस्कृत्यसमर्थौ नित्यदोषाविति तावुपेक्ष्याह—अप्रयुक्तनिहतार्थाविति । एवमन्यत्रापि वृत्तिकारोपेक्षिते प्रायोऽनित्यदोषत्वमुन्नेयम् । तच्चार्थलभ्यमिति नोक्तं कण्ठतः । श्लेषादावित्यादिना यमकादिसंग्रहः[2] । न दुष्टाविति दोषाभावमात्रोक्तिः ।

येन ध्वस्तमनोभवेन भस्मीकृतकामेनेति । येनमाधवेन बलिजितो नारायणस्य कायः पुरा त्रिपुरजयकाले पुरेषु वाऽस्त्रीकृतः, यश्चोद्वृत्तभुजङ्गहारकङ्कणः यश्च गङ्गां देवनदीमधारयत्, यस्य च चन्द्रवदुत्तमाङ्गं हर इति नाम स्तुत्यं देवा आहुः नोऽन्धकदैत्यविनाशकरस्त्वां सर्वरूपेण पायादित्येकोऽर्थः । द्वितीयस्तु येन माधवेनानः शकटं ध्वस्तम् अभवेन संसारक्लेशसम्पर्कशून्येन येन बलिं जितवान् यः कायः स पुराऽमृतहरणे स्त्रीकृतः स्त्रीत्वं नीतः, उद्वृत्तस्य भुजङ्गस्य कालियाख्यस्य हन्ता, रवे शब्दब्रह्मणि लीनः, अगं गोवर्धनं कृष्णावतारेण गां पृथिवीं च यज्ञवराहः सन्नधारयत् । शशिनं मथ्नातीति शशिमद्राहुस्तस्य शिरोहर इति यस्य नाम स्तुत्यममरा वदन्ति । सर्वदोऽभीष्टदाता, अन्धकानां यादवानां क्षयकरः कृतद्वारकाख्यनिवासनिर्माणस्त्वां पायादिति ।

अत्र शशिमच्छब्दो राहावप्रयुक्तोऽन्धकक्षयशब्दौ च दैत्यविनाशयोरेव प्रसिद्धौ ।

करिहस्तः स्थूलहस्तो हस्तिन्यादिदृढयोषिद्द्रावणार्थं संयुक्ताग्रतर्जन्यनामिका-

---

१. पृथग्यत्ननिर्वर्त्यालङ्कारघटनेऽभियुक्तैरानन्दवर्धनादिभिर्निर्बन्धो गर्हित एवेति प्रतिपादितः । तथाप्यलङ्कारमहिमहृतचित्तानां केषाञ्चन कवीनामीदृशी वचनभङ्गिर्ययाऽसुकराणामप्यलङ्कारविशेषाणामुपयोगे दार्ढ्यमनुशीलितमनुशिष्टश्च । येन ध्वस्तेति श्लोकस्यान्ये बहवो व्याख्यानभेदा आकरतोऽवगन्तव्याः । सुभासितसङ्कलनेष्वस्य बहुलमुपलम्भः । क्वचित् पुनरस्य भारविकृतत्वनिर्देशश्चैतस्य विदग्धगोष्ठीषु प्रतिपत्त्यतिशयमनुमापयति ।

२. वैयाकरणादौ वक्तरीत्याद्यप्रयुक्तनिहतार्थावित्यादि चैतत् प्रसङ्गेऽनुवर्तनीयम् । एवमुत्तरत्र शमकथास्वित्यादिर्गर्भितत्वं तथैवेत्यन्तं वृत्तिविवरणमेकसन्दर्भत्वेन स्वीकरणीयम् ।

शमकथासु[१]—

उत्तानोच्छूनमण्डूकपाटितोदरसन्निभे ।
क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते ॥३००॥

निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डतनयाः सह माधवेन ।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥३०१॥

अत्र भाव्यमङ्गलसूचकम् ।

सन्दिग्धमपि वाच्यमहिम्ना क्वचिन्नियतार्थप्रतिपत्तिकारित्वे व्याजस्तुतिपर्यवसायित्वे च गुणः । यथा—

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम् ॥३०२॥

पृष्ठारूढमध्यमात्मकं कृत्रिमलिङ्गञ्च[१] । सम्बाधो जनबाहुल्यं वराङ्गसङ्कोचश्च । ध्वजः केतनं पुंवराङ्गञ्च । साधनं सैन्यं मदनमन्दिरञ्च । सुरतारम्भे गोष्ठ्यां तत्प्रकरणानुगुण्यान्न दुष्टत्वम्, प्रत्युत तस्यां कलावैराग्योत्पादवैलक्षण्यं प्रकटयच्चमत्काराधायकमेव । एवं जन्मभूमिरित्यादि लाक्षणिकाश्लीलानां सुभग-भगिनी-भगवती-दोहदमित्यादि लोकसंवृताश्लीलानां चास्वादस्य व्याघातकत्वाननुभवाददुष्टत्वं ज्ञेयम्[२] ।

शमाय प्राणिनां वैराग्योत्पादाय कथा शमकथा । उत्तानादिशब्दा घृणाकरार्था अपि शुद्धबीभत्सपोषकतया गुणाः । रक्ताऽनुरक्ता प्रसाधिता स्वायत्तीकृता भूयैः रक्तेन मण्डिता च भूयैरिति विग्रहः । विग्रहो विरोधः शरीरञ्च । स्वस्थाः कुशलिनः, स्वः स्वर्गे तिष्ठन्तीति[३] स्वस्थाः, सकारद्वयसद्भावेऽपि संयुक्तसजातीयानामुच्चारणाविशेषादेकरूपता । अत्र भाव्यमङ्गलसूचनं विवक्षितमुचितं चेति ।

कविकौशलप्रकटनद्वारा प्रतीत्युत्कर्षकता वाच्यमहिम्ना बोद्धव्यमहिम्ना प्रमाणान्तरसाम्येन हेतुना नियतस्य प्रकृतोचितस्यार्थस्य प्रतिपत्तिकारित्वे[४] सति ।

---

१. इदं कामसूत्रे वर्णितमनेकप्रकारकम् ।

२. अत्र 'च' पदमध्याहार्यम् ।

३. एतच्च काव्यालङ्कारसूत्रवृत्तिमनुसृत्य ।

४. अयं चण्डीदासधृतः पाठः साधीयान् । भट्टगोपालादयस्तु 'क्वचिन्नियतार्थप्रतिपत्तिं कृत्वैव' इत्यसंलग्नप्रायं पाठं दर्शयन्ति । कृत्वैव न कदाचितकृत्वेति तदविवरणं साहित्यचूडामणौ । नियतार्थप्रतीतिकृत्त्वेन व्याजस्तुतिपर्यवसायित्वे गुण इति प्रायशो गृहीतः सुसंहितश्च पाठः ।

प्रतिपाद्यप्रतिपादकयोर्ज्ञत्वे सत्यप्रतीतत्वं गुणो यथा--

आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोद्रेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्
तं मोहान्धः कथमयममुं वेत्ति देवं पुराणम् ॥३०३॥

स्वयं वा परामर्शो यथा--

षडधिकदशनाडीचक्रमध्यस्थितात्मा
हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः।
अविचलितमनोभिः साधकैर्मृग्यमाणः
स जयति परिणद्धः शक्तिभिः शक्तिनाथः ॥३०४॥

पृथुकानामार्तस्वराश्रयः पृथूनि कार्तस्वरपात्राणि सुवर्णभाजनानि च यत्र भुव्य-भूषितोऽलङ्कृतश्च विलसत्कैर्गर्तसम्बन्धिभिः रेणुभिर्धूलिभिर्विलसद्भिः करेणु-भिर्गजैश्च गहनम्।

अत्र वक्तृगृहे प्रथमः प्रतिपाद्यगृहे द्वितीयोऽर्थः प्रकरणनिश्चेय इति सन्दिग्धत्वं प्रत्युत हास्यपरिपोषकम्।

आत्मनि चिदानन्दमये विषये प्रत्याहृतषडिन्द्रियाः सन्तो रमन्त इत्यात्मा-रामाः। विकल्पो भेदसंसर्गप्रतिभासस्तद्रहितो निर्विकल्पः। "योगमेकत्वमिच्छन्ति वस्तुनोऽन्येन वस्तुना" इति दिशा ध्येयध्यात्रोर्जीवब्रह्मणोरेकत्वापत्तिः समाधिः। ज्ञानमात्मतत्त्वावभासः। तमो ग्रन्थिरविद्याकृतभेदबुद्धिदाढर्यम्। सत्त्वनिष्ठाविगलित-रजस्तमोविकाराः। तमसां प्रवर्तकोपास्यानां ज्योतिषां निवर्त्तकोपास्यानाञ्च परस्तात् तत्प्रतिभासे सर्वेषामेव तिरोभावादित्यर्थः। मोहान्धो मिथ्याज्ञानान्तरित-प्रकाशः, पुराणः प्रधानजगत्सिद्धेः प्रागपि सन्।

अत्र भीमसेनसहदेवयोः सकलशास्त्रवेदिनोस्तादृशि विषये तथाविधैव वागुचितेति वाक्यार्थपोषकतैवाप्रतीतपदार्थानाम्। स्वयं वा तद्वेदिनः परामर्शेऽनु-सन्धाने। इडापिङ्गलासुषुम्णागान्धारीप्रभृतिषोडशनाडीनां यच्चक्रं हृदयस्थाने तन्मध्यस्थो ध्येय आत्मा स्वरूपं शिवाख्यं यस्य तथा हृदि विनिहितरूपो भावितस्वरूपः।

सिद्धयः परापरमुक्तिभुक्तिरूपाः, तद्विदः परिपक्वसमाधयः। साधकैरुन्मुक्तै-रविचलितमनोभिः सिद्धतां प्राप्तैः सिद्धतमत्वप्राप्तये मृग्यमाणोऽन्वेष्यमाणः

अधमप्रकृत्युक्तिषु ग्राम्यो गुणः । यथा--

फुल्लुक्करं कमलकूरणिहं वहन्ति
जे सिन्धुवारविडवा मह वल्लहा दे ।
जे गालिदस्स महिसीदहिणो सरिच्छा
दे किं च मुद्धविअइल्लपसूणपुज्जा ।।३०९।।

(पुष्पोत्करं कलमभक्तनिभं वहन्ति
ये सिन्धुवारविटपा मम वल्लभास्ते ।
या गालितस्य महिषीदध्नः सदृक्षम्
ते किं च मुग्धविचकिलप्रसूनप्रञ्जाः ।। इति छाया ।।)

साक्षात्क्रियमाण[1] इति यावत् । शक्तिभिर्ज्ञानेच्छादिभिः परिणद्ध उपहितस्वरूपो निरुपधानदशायां मोक्षापत्तेः । शक्तिनाथस्तासां तदायत्तत्वात् ।

अत्र कपालकुण्डलोक्तावनुसंहितवक्तृस्वरूपाणां न प्रतीतिविलम्बः, प्रत्युत तन्मयीभावप्रकर्ष एव ।

कलमो धान्यभेदः, कूरं भक्तम्, गालिदस्स मथितस्य, सरिच्छा सदृक्षाः, विअइल्लं विचकिलं[2] मल्लिकेति यावत् । विदूषकोक्तावित्यनन्तरं हास्यपोषक इति शेषः । नेयार्थस्तु क्वचिच्छीघ्रप्रतीतिहेतुत्वे गुणः । यथा 'काञ्चीगुणस्थानमनिन्दितायाः' इत्यत्र[3] नायिकासङ्गमस्य विपरीतार्थविवक्षायाश्च विरुद्धमतिकृतो गुणत्वं ज्ञेयम् ।

सम्प्रति[4] वाक्यमात्राश्रितेषु दोषेषु प्रतिकूलवर्णादीनामनित्यत्वमिति तानुपेक्ष्य न्यूनपदत्वादीनामनित्यतां दर्शयति—**न्यूनपदमिती** । पदं न्यूनमित्यर्थः । एवमधिकपदमित्यपि । माऽति नातिपीडय । ईदृशपदन्यूनता हर्षग्लानिसम्मोहप्रकर्षबोधनद्वारा

---

१. अत्र श्रीधराद्या दृश्यमान इति मूले पाठं मन्यन्ते । 'साक्षात्क्रियमाणः' इति श्रीधरानुसारि चण्डीदासविवरणमेतदुपयोग्येव ।

२. साम्यं सम्प्रति सेवते विचकिलं षाण्मासिकैर्मौक्तिकैः" इति विद्धशालभञ्जिकायाः प्रयोगः स्मरणीयः ।

३. इयश्चाध्याहारप्रपूर्तिः श्रीधरकृतैवेति तामेवानुगृह्णाति चण्डीदासः । इहोत्तरत्र च श्रीधरग्रन्थानुवादः स्पष्ट एव (का. प्र. वि २४९ पृ०) ।

४. 'निर्वाणवैरदहना' इत्यादौ वेण्यां प्रस्तावनाश्लोके विरुद्धमतिकारित्वविवक्षा स्फुटैव । सा च न दुष्टा, तत्रैव विवक्षातात्पर्यात् ।

अत्र कलम-भक्त-महिषी-दधिशब्दा ग्राम्या अपि विदूषकोक्तौ ।

न्यूनपदं क्वचिद् गुणः । यथा--

गाढालिङ्गनवामनीकृतकुचप्रोद्भूतरोमोद्‌गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा ।
मा मा मानद माऽति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम् ॥३१०॥

क्वचिन्न गुणो न दोषो यथा--

तिष्ठेत् कोपवशात् प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः ॥३११॥

अत्र पिहितेत्यतोऽनन्तरं 'नैतद्यतः' इत्येतैर्न्यूनैः पदैर्विशेषबुद्धेरकरणान्न गुणः । उत्तरा प्रतिपत्तिः पूर्वां प्रतिपत्तिं बाधत इति न दोषः ।

अधिकपदं क्वचिद् न गुणः । यथा---

यद्वञ्चनाहितमतिर्बहु चाटुगर्भं
कार्योन्मुखः खलजनः कृतकं ब्रवीति ।
तत् साधवो न न विदन्ति विदन्ति किन्तु
कर्तुं वृथा प्रणयमस्य न पारयन्ति ॥३१२॥

अत्र 'विदन्ति' इति द्वितीयमन्ययोगव्यवच्छेदपरम् ।

यथा वा---

वद वद जितः स शत्रुर्न हतो जल्पंश्च तव तवास्मीति ।
चित्रं चित्रमरोदीद्धा हेति परं मृते पुत्रे ॥३१३॥

इत्येवमादौ हर्षभयादियुक्ते वक्तरि ।

रसं पुष्णातीति गुणता । न्यूनैरनुपात्तैः । वितर्कः विशेषबुद्धिः[१], प्रकर्षव्यञ्जनद्वारा चमत्काराप्रकर्षिका । उत्तरा प्रतिपत्तिर्दीर्घेत्यादिजन्या । तां हन्तुमिति क्रोधस्य, सा चेत्यादि शोकस्य च सद्भावेऽपि वितर्क एव विश्रान्तिरिति स एव प्रधानम् ।

न न विदन्तीत्ययोगव्यवच्छेदः । विदन्तीत्यनेन तु साधव एव विदन्तीत्यन्ययोगव्यवच्छेद इति विच्छित्तिविशेषात् काव्यानुगुण्यम् । तमेवार्थं विशेषबोधनेऽधिकपदस्यादूष्यतायामुदाहृत्यन्तरेण द्रढयति-*यथा वेति* । अत्र वीप्सया शीघ्रम् वदेत्यादिरर्थो हर्षसूचको गम्यते । एतच्चाधिककथितपदयोरप्युदाहृतिद्वयम् ।

---

१. बुद्धेः–क० ।

कथितपदं क्वचिद् गुणो लाटानुप्रासेऽर्थान्तरसंक्रमितवाच्ये विहितस्यानुवाद्यत्वे च। क्रमेणोदाहरणम्---

सितकरकररुचिरविभा विभाकराकार ! धरणिधर ! कीर्तिः ।
पौरुषकमला कमला सापि तवैवास्ति नान्यस्य ॥३१४॥

ताला जाअंति गुणा जाला दे सहिअएहिं घेप्पन्ति ।
रइकिरणणुग्गहिअाँइ होन्ति कमलाइँ कमलाइँ ॥३१५॥

(तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते ।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ॥ इति छाया ॥)

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः ॥३१६॥

पतत्प्रकर्षमपि क्वचिद् गुणः, यथोदाहृते प्रागप्राप्तेत्यादौ ॥३१७॥

समाप्तपुनरात्तं क्वचिन्न गुणो न दोषः, यत्र न विशेषणमात्रदानार्थं पुनर्ग्रहणम् अपि तु वाक्यान्तरमेव क्रियते, यथा अत्रैव प्रागप्राप्तेत्यादौ ॥३१८॥

अपदस्थसमासं क्वचिद् गुणो यथोदाहृते रक्ताशोकेत्यादौ ॥३१९॥

सम्प्रति शुद्धं कथितपदत्वमाह--कथितपदमिति। पौरुषकमला पौरुषलक्ष्मीः पौरुषमेव कमलं यस्या इति कमलाविशेषणत्वं वदन् सान्धिविग्रहिको भिन्नार्थतया लटानुप्रासभङ्गप्रसङ्गे न भाषणीयः[१] । सर्वेषाञ्चात्र द्विरुक्तपदानां लटानुप्रासता तल्लक्षणे स्फुटीभविष्यति । अत्र च लाटानुप्रासविच्छित्तिनिर्वाहात् प्रतीतिप्रकर्षता । ताला तदा, जाला यदा, दे ते, घेप्पन्ति गृह्यन्ते । अत्र द्वितीय 'कमल' पदेन जगन्मनोहरत्वसौरभातिशयपात्रत्वादिधर्मान्तरपरिणतपद्मबोधनम् । वाच्यवाचकमात्रापेक्षया चात्रापि लाटानुप्रासता । जितेन्द्रियत्वमित्यादौ विनयादिपदानां पुनरनुवादः प्रतीतिप्रकर्षकः। प्रागप्राप्तेत्यादौ चतुर्थपादो बन्धवैकट्यापकर्षकः परमेश्वरानुचिन्तनया तन्मयत्वप्रकाशनानुगुणः न गुणः, प्रकर्षाधानाभावात् ।[२] न दोषः, प्रकृतिप्रातिकूल्याभावात्। विशेषणमनूद्य यथेत्यादौ चतुर्थपादःपूर्ववाक्यसमाप्तावुपात्त इति शेषः ।

रक्ताशोकेत्यादावुत्कण्ठेत्याद्यतर्कितोपनतः समासः क्रोधानुगुणतया गुणः ।

---

१. अत्र श्रीधरग्रन्थः—सितेत्यादि । पौरुषमेव कमलं यस्याः सा । अत्र किल कर-विभा-कमलपदानां कथितानामपि लाटानुप्राससाधकत्वाद् गुणत्वमिति चण्डीदासमन्तव्यं सुस्थितमेव । वस्तुतस्तु पौरुषकमलापदं पौरुषलक्ष्मीः पुरुषाकारसम्पदिति व्याख्येयम् । तेन न लाटानुप्रासभङ्गप्रसङ्गः ।

२. न दोषो न वा गुण इति भावः ।

गर्भितं तथैव यथा—

हुमि अवहत्थिअरेहो णिरङ्कु सो अह विवेअरहिओ वि ।
सिविणे वि तुमम्मि पुणो पत्तिहि तन्ति ण पुमुसिम्मि[1] ॥३२०॥
(भवास्यपहस्तितरेखो निरङ्कुशोऽथविवेकरहितोऽपि ।
स्वप्नेऽपि त्वयि पुनः प्रतीहि चिन्तां न प्रस्मरामि ॥ इति छाया ॥)

अत्र प्रतीहीति मध्ये दृढप्रत्ययोत्पादनाय । एवमन्यदपि लक्ष्याल्लक्ष्यम् ।

व्यभिचारिरसस्थायिभावानां शब्दवाच्यता ।
कष्टकल्पनया व्यक्तिरनुभावविभावयोः ॥६०॥
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः ।
अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः ॥६१॥
अङ्गिनोऽननुसंधानं प्रकृतीनां विपर्ययः ।
अनङ्गस्याभिधानं च रसे दोषाः स्युरीदृशाः ॥६२॥

अवहत्थिअरेहो अपहस्तितमर्यादः, अणवत्थिअणेहो इति पाठेऽनवस्थितस्नेहः । प्राकृते तादृग्लिङ्गनियमाभावात् सर्वं स्वस्थम् । इयं हि मलयानिलादिसहचरसङ्गमे कामं प्रति यौवनस्योक्तिः । सिविणे स्वप्ने, तन्ति चिन्ताम्[2], पत्तिहि प्रतीहि ।[3] अस्मदर्थाक्षेपाद्वाक्यता, अस्य च दृढप्रत्ययोपादानमुखेन सकृद्विषयवति प्रकर्षाधायकतया गुणता । एवमन्यदिति । प्रक्रमभङ्गादौ । लक्ष्यादिति ल्यब्लोपे पञ्चमी, लक्ष्यं दृष्ट्वेत्यर्थः । लक्ष्यं ज्ञेयम् । अर्थदोषाणां प्रायशो नित्यत्वात् पुनरुक्तादेरनित्यत्वोक्तत्वाच्च न पुनरुक्तिः ।

अथाहत्यैव रसभङ्गहेतूनाह—व्यभिचारीति । रसादीनां शब्दवाच्यता स्वप्नेऽप्यवाच्यानां तेषामभिधानप्रत्याशया रसादिपदप्रयोगः । कष्टकल्पनया पृथक् श्लोकार्थसन्देहप्रकरणादिपर्यालोचनया, तु दैवादहमित्यादाविव झटित्येवाक्षेपमहिम्ना । अकाण्डेऽनवसरे, प्रथनं प्रस्तावनम्, छेदो विषयान्तरव्यासङ्गवर्णनया

---

१. 'पसुमरामि' इति वृत्तभङ्गदोषदुष्टः पाठः क्वचिदुपलभ्यते ।

२. गाथायां चतुर्थपादे पाठो विपर्यस्तप्रायः । लोचने इयं गाथोद्धृता, तत्रापि मुद्रितपुस्तक एषैव दशा । केचित् 'तन्तिम्' इत्यत्र 'भत्तिम्' इति पाठं धृत्वा भक्तिमिति छायां प्रदर्शयन्ति ।

३. युष्मदाक्षेपादिति क० पु० पाठः । तथात्वे 'पत्तिहि' इत्यस्याक्षेपः । गाथाया मूलतात्पर्यबाधेऽस्मदर्थाक्षेपस्यैव युक्ततरता आभाति । 'हुमि' 'पुमुसिम्मि' (प्रस्मरामीत्यर्थः) इति क्रियाद्वयेनाक्षिप्तार्थस्यान्वयः ।

स्वशब्दोपादानं व्यभिचारिणो यथा—

सव्रीडा दयितानये सकरुणा मातङ्गचर्माम्बरे
सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि ।
सेर्ष्या जह्नुसुताऽवलोकनविधौ दीना कपालोदरे
पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु वः ॥३२१॥

अत्र व्रीडादीनाम् ।

व्यानम्रा दयितानने मुकुलिता मातङ्गचर्माम्बरे
सोत्कम्पा भुजगे निमेषरहिता चन्द्रेऽमृतस्यन्दिनि ।
मीलद्भ्रुः सुरसिन्धुदर्शनविधौ म्लाना कपालोदरे ।

इत्यादि तु युक्तम् ।

रसस्य स्वशब्देन शृङ्गारादिशब्देन वा वाच्यत्वम् । क्रमेणोदाहरणम्—

तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकिताम् ।
नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः ॥३२२॥

आलोक्य कोमलकपोलतलाभिषिक्तव्यक्तानुरागसुभगामभिराममूर्तिम् ।
पश्यैष बाल्यमतिवृत्य विवर्तमानः शृङ्गारसीमनि [1]तरङ्गणमातनोति ॥३२३॥

स्थायिनो यथा—

सम्प्रहारे प्रहरणैः प्रहाराणां परस्परम् ।
ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत् ॥३२४॥

अत्रोत्साहस्य ।

कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डले शिशिररोचिषि तस्य यूनः ।
लीलाशिरोंऽशुकनिवेशविशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नवयौवना सा ॥३२५॥

तिरस्करणम् । अङ्गस्यानधिकारिसम्प्रत्ययस्य । अङ्गिनोऽनधिकारिणः । अनङ्गस्यानभ्यन्तरवाक्यार्थस्य रसनं रस आस्वादः । आस्वादत्वे तत्रत्याभासादीनामप्यवबोधः । सव्रीडेत्यादि । व्यभिचारिणो नहि निजविभावादिमुखेनैव प्रकाश्यमानाश्चमत्काराय प्रभवन्तीति । तथा च व्यानम्रेत्यादिपाठे स्फुट एवास्मात् पाठाद् विशेषस्तद्विदां मनसि प्रद्योतते ।

तरङ्गणं सखेलचङ्क्रमणम्, संप्रहारे संग्रामे, प्रहरणैरायुधैः । नयनावनिर्नयनप्रसारणभूमिः । कर्पूरत्वादि लीलेत्यादि चोद्दीपननिर्देशः, तस्य पुनः सेति चालम्बननिर्देशः । अनुभावार्थावसायिनो झटित्यप्रतीयमानानुभावप्रतिपालनया चमत्कारा-

१. एवं श्रीधरधृतपाठोऽपि । 'तरङ्गितम्' इति तु प्रायिकः पाठः ।

अत्रोद्दीपनालम्बनरूपाः शृङ्गारयोग्या विभावा अनुभावपर्यवसायिनः स्थिता इति कष्टकल्पना ।

परिहरति रतिं मतिं लुनीते स्खलति भृशं परिवर्तते च भूयः ।
इति बत विषमा दशाऽस्य देहं परिभवति प्रसभं किमत्र कुर्मः ॥३२६॥

अत्र रतिपरिहारादीनामनुभावानां करुणादावपि सम्भवात् कामिनीरूपो विभावो यत्नतः प्रतिपाद्यः ।

प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं
प्रिये ! शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः ।
निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं
न मुग्धे ! प्रत्येतुं प्रभवति गतः कालहरिणः ॥३२७॥

अत्र शृङ्गारे प्रतिकूलस्य शान्तस्यानित्यताप्रकाशनरूपो विभावस्तत्प्रकाशितो निर्वेदश्च व्यभिचारी उपात्तः ।

णिहुअरमणम्मि लोअणपहम्मि पडिए गुरुअणमज्झम्मि ।
सअलपरिहारहिअआ वणगमणं एव्व महइ वहू ॥३२८॥
(निभृतरमणे लोचनपथपतिते गुरुजनमध्ये ।
सकलपरिहारहृदया वनगमनमेवेच्छति वधूः ॥ इति छाया ॥)

ङ्कुरप्रादुर्भावे मान्थर्यमावहतः, यत्नप्रतिपाद्यतया झटित्यनुपनयनात् । प्रत्युत विषमा दशेत्यनेन द्राग्विपरीतसंस्पर्शादविलम्बानुसन्धेयः[१] प्रकरणगम्यः । शृङ्गारे सम्भोगे । निर्वेदश्चेति । सम्भोगो हि निर्वेदगन्धेनापि न परिच्छिद्यते,[२] तस्य विप्रलम्भतो वस्त्वन्तरत्वात् ।

मज्झम्मि मध्ये, सकलपरिहारे हृदयमिच्छा यस्याः सा[३] तथा,[४] महइ

---

१. "यन्नतः प्रतिपाद्यः" इति वृत्तिग्रन्थस्य विवरणमेतत् । 'द्रागविपरीतसंस्पर्शा' इति ख० असंलग्नः पाठः ।

२. अत्र श्रीधरः—"प्रणयकलहकुपितायां प्रियायां प्रसादार्थमनुनयनमुपक्रान्तम्" "शान्तरसस्य विभावः प्रकाशित इति प्रकृतरसभङ्गः, मनागपि निर्वेदानुवेधे सति रतेर्विच्छेदात् । ज्ञातविशेषे तत्त्वे हि जीवितसर्वस्वाभिमानं कथं भजते ! नहि ज्ञातशुक्तिको भजते तदुपादेयधियं कुरुते । अतः संवृतिमात्रायामेव प्रणयखण्डितायां प्रियायां नायकस्य क्रोधावेशवशस्य रौद्रानुभाववर्णनं विरुद्धं द्रष्टव्यम्" इत्याह ।

३. 'तथा' इति पदमनावश्यकमिव भाति, परन्तु 'महइ' इत्यनेनान्वये तन् स्वस्थमेव । तदा वनगमनमिति कर्मपदम् ।

४. 'वनगमनेच्छा तु प्रत्युत गुणायैवेति' इति श्रीधरमन्तव्यं निभृतरमणस्योपयोगायैवेति नायिकाया हृद्गत आशयः ।

अत्र सकलपरिहारवनगमने शान्तानुभावौ। इन्धनाद्यानयनव्याजेनोपभोगार्थे वनगमनं चेन्न दोषः।

दीप्तिः पुनः पुनर्यथा–कुमारसम्भवे रतिविलापे।

अकाण्डे प्रथनं यथा—वेणीसंहारे द्वितीयेऽङ्केऽनेकवीरक्षये प्रवृत्ते भानुमत्या सह दुर्योधनस्य शृङ्गारवर्णनम्।

अकाण्डेच्छेदो यथा—वीररचिते द्वितीयेऽङ्के राघवभार्गवयोर्दूराधिरूढे वीररसे 'कङ्कणमोचनाय गच्छामि' इति राघवस्योक्तौ।

अङ्गस्याप्रधानस्यातिविस्तरेण वर्णनं यथा हयग्रीववधे हयग्रीवस्य।

अङ्गिनोऽननुसंधानं यथा–रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमने सागरिकाया विस्मृतिः।

वाञ्छति। चेदित्यनन्तरमेवंजातीये वैशद्येन प्रतीते तदेति शेषः। यथाश्रुते तु तस्य विप्रलम्भता। तथैवाऽत्र वस्तुगत्या कवेर्विवक्षितम्, नह्यसौ कामतः स्वाभीष्टरसहृदयशून्यगुरुजनमध्ये प्रच्छन्नप्राणेश्वरं दृष्ट्वा तदप्राप्तिनिर्वेदात् सकलपरिहारवनगमनाभिलाष इति युवतीप्रकृत्यनुचितं प्रक्षिप्तवानिति निर्दोषतैव स्यात्। अस्त्वेवेति चेत्? न, झटिति विपरीतप्रतिभासात्[२]। **रतिविलाप इति**। तत्र हि स्वसामग्रीलब्धपरिपोषस्यापि कारुण्यस्य "अथ सा पुनरेव विह्वला" इत्यादिना पुनर्दीपनं कृत्वा मधुसंदर्शनकथनेन च विच्छिन्नप्रायं कृत्वा "तमवेक्ष्य रुरोद सा भृशम्" इत्यादिना पुनः प्रकाशनं परिभुक्तमालतीकुसुमपरिमलवद्वैरस्यावहं कृतमिति समग्रानुसन्धायिनां भावुकचक्रवर्तिनां मनसि न तादृक् स्वदते।

द्वितीयेऽङ्क इति। तत्र हि विलासरूपप्रतिमुखसन्ध्यङ्गनिर्वाहेच्छामात्रेणाकस्मिकसम्भोगवर्णनम् शोकमोहावसरपतिततया नास्वादप्रकर्षावहम्। **दूराधिरूढे** परमप्रकर्षमापन्ने, धाराऽधिरूढ इति पाठेऽविच्छिन्नप्रसरतया प्रवृत्ते।

वीररस इति। तन्मूले संग्रामं प्रत्युत्साहे प्रकर्षभावनाप्राणतया वा रसस्य तदीयतोक्तिः। 'कङ्कणमोचनाय गच्छामि' इति। नहि तादृशावसरे तादृशवीरस्यैवमुक्तिर्युज्यते, तथा सति वीररसस्यातर्कितविच्छेदे वैरस्यापत्तेः। अतिविस्तरेण प्रकृतिविरोधानुविधायितया।

हयग्रीववध इति। तत्र हि "वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि" इत्युक्तदिशा प्रारम्भणयोग्यं प्रतिपक्षचरितवर्णनं तथा विस्तारितं यथा मुख्यनायकचरितानुसन्धानं स्थगितं स्यादिति दुष्टता[३]। बाभ्रव्यस्य कञ्चुकिन आगमने विजयवर्मवृत्तान्ताकर्णनव्यासक्तस्य रत्नावलीनाममात्रस्याप्यग्रहणम्।

---

१. वनगमनं वानप्रस्थमाश्रयन्त्या एवोचितम्। प्रकरणोऽत्र प्रच्छन्नकामुकपरायणा नायिका, न तस्यामीदृशो निर्वेदः समञ्जसः।

२- नायं रसदोषेऽन्तर्भावमर्हतीति वृत्तदोषोऽयं वृत्तनायकस्याल्पवर्णनत्वादिति नाटचदर्पणे

प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्च, वीररौद्रशृङ्गारशान्तरसप्रधाना धीरोदात्त-धीरोद्धत्त-धीरललित-धीरप्रशान्ताः, उत्तमाधममध्यमाश्च। तत्र रतिहासशोकाद्भुतानि अदिव्योत्तमप्रकृतिवद् दिव्येष्वपि, किन्तु रतिः सम्भोगशृङ्गाररूपा उत्तमदेवताविषया न वर्णनीया। तद्वर्णनं हि पित्रोः सम्भोगवर्णनमिवात्यन्तमनुचितम्।

क्रोधं प्रभो! संहर संहरेति यावद् गिरः खे मरुतां चरन्ति।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥३२९॥

इत्युक्तवद् भ्रुकुट्यादिविकारवर्जितः क्रोधः सद्यः फलदः, स्वर्गपातालगगनसमुद्रोलङ्घनाद्युत्साहश्च दिव्येष्वेव। अदिव्येषु तु यावदवदानं प्रसिद्धमुचितं वा तावदेवोपनिबद्धव्यम्। अधिकं तु निबध्यमानमसत्यप्रतिभासनं नायकवद्वर्तितव्यं न प्रतिनायकवदित्युपदेशे न पर्यवस्येत्।

प्रकृतीनामिति कारिकांशं विवृणोति–**प्रकृतय इति**। दिव्या देवासुरगन्धर्वविद्याधरादिरूपाः, आदिव्या राजादिरूपमानुषात्मकाः, दिव्यादिव्या अंशावतारा मानुषरूपाः। धीरोदात्तेत्यतः पूर्वं प्रत्येकं चेति शेषः। धर्ममात्रप्रधानो धीरोदात्तः। वीररौद्रप्रधानो धीरोद्धतः। वीरश्शृङ्गाप्रधानो धीरललितः। धर्मोत्तरश्शृङ्गारदानधर्मशान्तप्रधानो धीरप्रशान्तः। उत्तमेत्यतः प्राक् प्रत्येकमिति शेषः। अत्र यद्विपर्ययो दोषस्तदेव तावदौचित्यं प्रथमतः प्रपञ्चयति–**तत्रेति**। अदिव्योत्तमप्रकृतयो राजादयः। सम्भोगश्शृगारोऽत्र चुम्बनालिङ्गनादिरूपो विवक्षितः, परस्परसन्दर्शनादीनामसत्यत्वविहरात्। अत्यन्तमनुचितं व्रीडातङ्कादिना चमत्कारप्रकर्ष[1]विघ्नविधानयोग्यत्वात्[2]। **सद्यः फलद इति**। दिव्येषु तथैव महानुभावत्वस्य प्रकृतरसपोषकस्य प्रतीतेः, अदिव्येषु तु तस्यादृष्टचरतया सम्प्रत्ययविरहेण चमत्कारव्याघातकत्वात्। **उत्साहश्चेति**। क्रोध इति समुच्चिनोति। अवदानं वृत्तं कर्म। तदपि लोकाविदितं न ग्राह्यमित्याह—**प्रसिद्धमिति**। नन्वेवं विक्रमोर्वश्यादौ

सिद्धान्तितम्। अनेन रसो वध्यस्य शौर्यादिवर्णनेन भूष्यत एव, न तु दूष्यत इति हेतुतया तत्रोपन्यस्तम्।

१. 'विघ्न' इति क नास्ति।

२. अत्रानन्दवर्धनाचार्याणां स्वमतोद्घोषणम्—"तस्मादभिनेयार्थे काव्ये च यदुत्तमप्रकृतेरुत्तमप्रकृतिभिर्नायिकाभिः सह ग्राम्यसम्भोगवर्णनं तत्पित्रोः सम्भोगवर्णनमिव सुतरामसह्यम्। तथैवोत्तमदेवताविषयम्। यत्त्वेवंविधे विषये महाकवीनामसमीक्ष्यकारिता दृश्यते, स दोष एव। स तु शक्तितिरस्कृतत्वात्तेषां न लक्ष्यते" इति। मम्मटमतं तु स्पष्टतराक्षेप्रप्रकटनपरम्। क्षेमेन्द्रोऽप्यनौचित्यमेव परं प्रबन्धार्थः पुष्णातीति स्वमतमाविश्चकार। एतदुपजीव्यालोचनमस्माभिरन्यत्र कृतमिति विरम्यते।

दिव्यादिव्येषु तूभयथाऽपि। एवमुक्तस्यौचित्यस्य दिव्यादीनामिव धीरोदात्तादीनामप्यन्यथा वर्णनं विपर्ययः।

तत्रभवन् भगवन्नित्युत्तमेन नाधमेन, मुनिप्रभृतौ न राजादौ, भट्टारकेति नोत्तमेन राजादौ प्रकृतिविपर्ययापत्तेर्वाच्यम्। एवं देशकालवयोजात्यादीनां वेषव्यवहारादिकमुचितमेवोपनिबद्धव्यम्।

अनङ्गस्य रसानुपकारकस्य वर्णनम्। यथा कर्पूरमञ्जर्यां नायिकया स्वात्मना च कृतं वसन्तवर्णनमनादृत्य वन्दिवर्णितस्य राज्ञा प्रशंसनम्। ईदृशाः (६२ का०) इति। नायिकापादप्रहारादिना नायककोपादिवर्णनम्। उक्तं हि ध्वनिकृता—

कविनोत्प्रेक्ष्य घटिताः कथाभागाः प्रकरणनाटिकादयश्च प्रबन्धाः सर्व एव दुष्टाः स्युरित्याह–**उचितमेवेति**।

अयमर्थः—सत्यमसत्यं वा भवतु कर्म, न तत्राभिनिवेशः। केवलं यन्निबन्धे विनेयानामश्रद्धया चमत्कारव्युत्पत्त्याधानविघातकसम्भावना तन्न ग्राह्यमित्युपदेशे न पर्यवस्येत्, [1]असत्यतया प्रतिभासेनादरणीयत्वाभावादित्यर्थः।

दिव्यादिव्येषु रामादिषु पूर्वागमप्रसिद्धिप्रत्ययादिवत् कर्मसूभयथाऽपि दिव्यौचित्येन च प्रसिद्धकृतवर्णनं न त्वधिकप्रसिद्धमनौचित्यात् कार्यं किन्त्वौचित्यादेव। एवमुक्तस्यौचित्यस्य दिव्यादीनामिव धीरोदात्तादीनामिति तेषां दिव्याद्यर्थान्तरविशेषतया तद्वचनेनैवोक्तप्रायत्वादित्यर्थः। अन्यथावर्णनमविषयवर्णनम्।

एवं कस्मादित्यनौचित्यमाह– **तत्रभवन्निति**। उत्तमेन वाच्यं न त्वधमेन। उत्तमेनापि मुनिप्रभृतौ वाच्यम्, न राजादौ एवमिति। प्रकृतिपदेन स्वभावार्थेन च तेषामप्युपग्रहादित्यर्थः। स्वर्गाङ्गनास्वमानुषवाग्वेशादिदेशानुचित , वसन्ते मेघादिकालानुचितम्। वार्द्धके शृङ्गारो वयोऽनुचितः, नायिकायाः स्वाभिप्रायसूचनाप्राकट्यं जात्यनुचितम्। आदिना विरहिण्या नेपथ्यादिवर्णनमवस्थाऽनुचितमित्यादि ग्राह्यम्।

वन्दिवर्णितस्य राज्ञा प्रशंसनम्—

"देवि एको अहं वड्ढावओ तुज्झ, तुमं एका वड्ढाविआ मज्झ।

किं उण दुव्वे वि अम्हे आसुकत्वाण चातुराण च ते वन्दिउत्तेहिं विभाविहा।

इत्येवमाद्युक्तेर्दुष्टता।

'ईदृशा' इतिपदेन प्रकारान्तर सद्भावसूत्रणपरेणेदं लब्धमित्याह– **नायिकेत्यादि** प्रणयकलहादौ प्राणेश्वरीपादप्रहारे रतिसर्वस्वभूते कोपौग्र्यादिकं परमा-

---

१. "धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च। करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिबन्धनम्॥" इति प्राचीनानामनुशासनम्। कान्तासम्मिततयोपदेशपरत्वञ्च काव्यस्येत्यभियुक्तसमयः। सान्द्रानन्दनिमग्नस्वान्तानां सहृदयशिरोमणीनामेतत्तु बहिरङ्गमिति ये मन्यन्ते, तेषामपि मत एषु स्थलेष्वौचित्यभङ्गाद् दोषस्पर्शो नापलपनीय एव।

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥ इति ॥

इदानीं क्वचिददोषा अप्येत इत्युच्यन्ते ।

न दोषः स्वपदेनोक्तावपि सञ्चारिणः क्वचित् ।

यथा—

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः ।
दृष्ट्वाऽग्रे वरमात्तसाध्वसरसा गौरी नवे सङ्गमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः ॥३३०॥

वैदग्ध्यलिङ्गतया भावकमनोवैमुख्यमाधत्ते । एवमौचित्यान्तरमपि[1] मृग्यमित्यन्वयव्यतिरेकयोराचार्यानुमतिं दर्शयति—**उक्तं हीति**। औचित्यपदार्थकथनम् प्रसिद्धेत्यतः[2] प्राक् प्रकृत्यनुरूपेणेति शेषः । उपनिषद्रहस्यं जीवातुभूतमिति यावत् ।

सम्प्रत्येतेषु केषाञ्चिदनित्यत्वप्रदर्शनपरकारिकाऽवतरणिकामाह—**इदानीमिति**। क्वचित् प्रस्तावविशेषे एते समनन्तरमुक्ताः केचन । **क्वचिदिति** । यत्राप्रधानस्य तस्य रसान्तरास्वादाङ्गभूतस्य विभावानुभावादिमुखेन विशदप्रतीतिर्न सम्भा-

---

१. तच्च देशवेषाचारानौचित्यम्, कालानौचित्यम् वयोऽनौचित्यम् जात्यनौचित्यमित्यादिभेदेन रुद्रटेन (६।१८-२०) प्रपञ्चितम् । मूलकृत्समानकालभाविना मूलकृदुपजीव्येन क्षेमेन्द्रेण चेतरथा—

पदे वाक्ये प्रबन्धार्थे गुणेऽलङ्करणे रसे ।
क्रियायां कारके लिङ्गे वचने च विशेषणे ॥
उपसर्गे निपाते च काले देशे कुले व्रते ।
तत्त्वेऽतत्त्वेऽप्यभिप्राये स्वभावे सारसंग्रहे ॥
प्रतिभायामवस्थायां विचारे नाम्न्यथाशिषि ।
काव्यस्याङ्गेषु च प्राहुरौचित्यं व्यापि जीवितम् ॥

लक्षितमुदाहृतं च ।

२. एवं ध्वन्यालोकसम्मतः पाठः । अर्वाग्भवास्तु केचित्—"औचित्योपनिबन्धस्तु" इति ग्रन्थं पठन्ति । अयञ्च ध्वन्यालोकपरिकरश्लोकः प्रसिद्धौचित्यबन्धपदेन लोकशास्त्रादिसम्मतमौचित्यं परामृशति, तथा च ध्वन्यालोकलोचने "प्रसिद्धमिति लोके भरतशास्त्रे च" इति विवृतम् । "सातवाहनादिषु तु येषु यावदपदानं श्रूयते तेषु तावन्मात्रमनुगम्यमानमनुगुणत्वेन प्रतिभासते । व्यतिरिक्तं तु तेषामेवोपनिबध्यमानमनुचितम्" इत्यानन्दवर्धनाचार्याणां दर्शनम् ।

अत्रौत्सुक्यशब्द इव तदनुभावो न तथा प्रतीतिकृत्। अत एव दूरादुत्सुकमित्यादौ व्रीडाप्रेमाद्यनुभावानां विवलितत्वादीनामिवोत्सुकत्वानुभावस्य सहसाप्रसरणादिरूपस्य तथाप्रतिपत्तिकारित्वाभावादुत्सुकमिति कृतम्।

सञ्चार्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा ॥६३॥

बाध्यत्वेनोक्तिर्न परमदोषः, यावत्प्रकृतरसपरिपोषकृत्। यथा—

"क्वाकार्यं शशलक्ष्मणः क्व च कुलम्" इत्यादौ ॥३३१॥

अत्र वितर्कादिषूद्गतेष्वपि चिन्तायामेव विश्रान्तिरिति प्रकृतरसपरिपोषः।

पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः।
आवेदयति नितान्तं क्षेत्रियरोगं सखि! हृदन्तः ॥३३२॥

इत्यादौ साधारणत्वं पाण्डुतादीनामिति न विरुद्धम्।

व्यते यत्र च विभावानुभावराहित्यमेवानुगुणं तत्रेत्यर्थः। त्वरा सरभसोपस्थानारम्भः। सहभुवा स्वाभाविकया वयःसन्ध्यलङ्कारभूतया तदनुभाव औत्सुक्यानुभावरूपो झटिति न प्रतीतिं करोति, भयादिनाऽपि तस्य सम्भवात्, शेषयोस्तु प्रकृतरसप्रतिकूलप्रायपरिपोषापातात्। एतदेव लक्ष्यानुसन्धानेन द्रढयति—**अतएवेति**। सहसा प्रसरणादीत्यादिपदेन पृथुविस्तार्यत्वादिसंग्रहः। तथाप्रतिपत्तिकारित्वाभावादिति। क्रोधावेगादिनाऽपि सम्भाव्यतया प्रतीतिमान्थर्यावहत्वादित्यर्थः।

विरुद्धस्य प्रकृतिप्रतिकूलाङ्गस्य गुणावहा अस्वादप्रकर्षिका। बाध्यस्येति कारिकापदं नानूद्यार्थम्, किन्तर्हि विधेयार्थमित्याह - **बाध्यत्वेनेति**। बाध्यत्वमभिप्रेत्येत्यर्थः। प्रकृतरसपरिपोषकृदिति। बाध्यता हि विरोधे शक्तिप्राधान्य एव स्यादिति तत्प्रतीत्या तत्कृतचमत्कारः प्रकृष्यत इति भावः। **क्वाकार्यमिति**। अत्र वितर्कमतिशङ्काधृतीनां प्रशमाङ्गानामौत्सुक्यस्मृतिदैन्यचिन्ताऽभिलाषाद्यैस्तिरस्कारः पर्यन्ते चिन्ताप्रधानमास्वादप्रकर्षमाविर्भावयति।

प्रकृतरसेति। रस्यत इति रसो भावशबलता। एवं शान्तप्रधाने भारतादौ[1] शृङ्गारवीरादीनां खण्डरसानामपि द्रष्टव्यम्।

पाण्डु क्षाममित्यादौ करुणानुभावानां बाह्याङ्गपाण्डिमादीनां विप्रलम्भे समारोपादङ्गभावप्राप्तानां न तु दुष्टत्वमिति ये मेनिरे, तन्मतमनुत्थानोपहतं विप्रलम्भेऽपि तेषामङ्गभावेनाविरुद्धत्वादित्याह—**पाण्ड्विति**। क्षेत्रं शरीरं तद्गतं क्षेत्रि-

---

१. भारतस्य शान्तरसप्रधानत्वं नव्यालङ्कारमतप्रतिष्ठापयितृणा आनन्दवर्धनाचार्येण "महाभारतेऽपि शास्त्रकाव्यरूपच्छायान्वयिनि वृष्णिपाण्डवविरसावसानवैमनस्यदायिनीं समाप्तिमुपनिबध्नता महामुनिना वैराग्यजननतात्पर्यं प्राधान्येन स्वप्रबन्धस्य दर्शयता मोक्षलक्षणः पुरुषार्थः शान्तो रसश्च मुख्यतया विवक्षाविषयत्वेन सूचितः।......मोक्ष-

सत्यं मनोरमा कामाः सत्यं रम्या विभूतयः।
किन्तु मत्ताङ्गनाऽपाङ्गभङ्गलोलं हि जीवितम् ॥३३३॥

इत्यत्राद्यमर्थं बाध्यत्वेनैवोक्तम्।

जीवितादपि अधिकमपाङ्गभङ्गस्यास्थिरत्वमिति प्रसिद्धभङ्गुरोपमानतयोपात्तं शान्तमेव पुष्णाति। न पुनः शृङ्गारस्यात्र प्रतीतिः, तदङ्गाप्रतिपत्तेः।

यम् सर्व शरीरव्यापि पीडाधायकमित्यर्थः। सत्यमित्यत्रान्त्यार्धे[1]तृतीयपादेन शृङ्गार-विभावपरिग्रहो बाध्यतया निर्दोष इति परपक्षनिरासार्थं स्वमतेन तावत् परिहरति— **सत्यं मनोरमा इति**। काम्यन्त इति कामा भोग्या अङ्गनादयः। आद्यमर्धं तत्प्र-त्याय्योऽर्थः। एवेत्यनेन विप्रतिपत्तिदौर्बल्यध्वननम्। एवं प्रथमार्धार्थं समर्थ्य तृतीयपादं समर्थयति —**जीवितादपीति**। अपिः समुच्चयार्थेऽस्थिरत्वमितीत्यन्तरं योज्यः, यथाश्रुतयोजनेऽर्थाधिक्याभावात्। भङ्गुरोपमानतया भङ्गुरत्वसाधर्म्येण जीवितोपमानतया। शान्तमेव पुष्णातीति। सर्वे एवामी कामा विभूतयश्च सत्येव जीविते तत्सौकर्यार्थमुपादेयाः। तच्च क्षणभङ्गुरमेवानुभूयत इति किं कृतमेषामुपा-देयत्वमिति सर्वनिःसारताबोधनं शान्तविभावतया विशिष्टोक्तिसमर्पितं शान्तमेव पुष्णाति। एवं स्व क्षमभिधाय शृङ्गाररसोऽत्र साध्यतामापन्न[2] इति केषाञ्चिन्मतम्, तान् कटाक्षयति—**नपुनरिति**। तस्याङ्गस्य विभावादिरूपकारणसमाजस्याप्रतिपत्ते-रप्रतिपादनात्।

ननु विभावस्तावत् प्रतिपादितस्ततश्च तेनैवान्यद्वयाक्षेपो[3] भविष्यतीति चेत्? न, तदास्वादजननावस्थायामेव तद्विभावत्वस्य मुख्यतया तद्विरहिण्यन्यत्रापारमार्थि-कत्वात्। तस्मादत्र शृङ्गाराङ्गभावः पूर्वसिद्धतया[4] प्रत्यभिज्ञानमात्रविषयः[5] न पुनः साम्प्रतिकः, येन तदुत्थापकता सम्भावनीया स्यात्।

लक्षण एवैकः परः पुरुषार्थः, शास्त्रनये काव्यनये च तृष्णाक्षयसुखपरिपोषलक्षणः शान्तो रसो महाभारतस्याङ्गित्वेन विवक्षित इति सुप्रतिपादितम्" इति महता प्रवन्धेन निर्णीतम्।

१. 'इत्यत्रार्धे इति निर्विशेषणोऽसङ्गतः पाठः–क०।

२. साध्यतयापन्न–क०।

३. 'तेन वाच्याद्वयाक्षेप' इत्यहृद्यः पाठः–क०

४. पूर्वप्रसिद्धतया–ख०

५. विमतन्तु खण्डितस्य मतस्याधिष्ठानभूतध्वन्यालोकग्रन्थोपरि श्लोकस्यैतस्य व्याख्यानपरे "प्रियतमकटाक्षा हि सर्वस्याभिलषणीया भवन्तीति तत्प्रतीत्या प्रवृत्तिमान् गुडजिह्वि-कया प्रसक्तानुप्रसक्तवस्तुतत्त्वसंवेदनेन वैराग्ये पर्यवस्यति विनेयः" इति सन्दर्भे लोचनकृता निर्दर्शितम्।

न च विनेयोन्मुखीकरणमत्र परिहारः, शान्तशृङ्गारयोर्नैरन्तर्यस्याभावात्। नापि काव्यशोभाकरणम्, रसान्तरादनुप्रासमात्राद्वा तथाभावात्।

एवं शृगारानुरोधाभावं प्रसाध्य तदनुरोधफलं विनेयोन्मुखीकरणं तदभावादेव नास्तीति[१] स्फुटत्वादुपेक्ष्य प्रकारान्तरेणापि नास्तीत्याह—**न चेति**। शृङ्गारिणो विनेयास्तदास्वादसुखपिण्डदानद्वारेण तद्बाधकं शान्तमास्वादयितारः[२] कटुकपान इव तपश्चर्यादिप्रशमोपाये निवेशयितव्या इति तवाकूतम्। तच्च[३] न सम्भवति, शृङ्गारास्वादेन तन्मयीभूते मनसि रसान्तास्वादव्यवधिं विना शान्तचमत्कारप्रकर्षानुदयात्, विगाढरागस्य तत्क्षणं प्रशमप्रावीण्य[४]विरहाच्च।

यदि पुनरङ्गनाऽपाङ्गभङ्गादिशृङ्गारानुगुणपदपरिशीलनलोभसन्दानिता राजपुत्रप्रभृतयः सुकुमारमतयो महाभारतादिशान्तरसप्रधानकाव्याभ्यासप्रवृत्ताः सन्तः क्रमशः समासादितशान्तचमत्कारप्रकर्षास्तत्पुच्छलग्न[५]हिताहितप्रवृत्तिभाजो भवन्तीत्युच्यते, तदा वाच्यप्रतीत्यर्थमेव तत्पदप्रयोग इत्यस्माक एव पक्षः संस्कृतः—केवलं शब्दगतः कश्चिद् विशेषो भवताऽभ्यूहितः[६]। ये तु शृङ्गारस्पर्श एव काव्यं शोभते, न तु तं विना रसान्तरालङ्कृतिसहस्रैरपीति तदङ्गविनिवेशं समर्थयन्ति तान् प्रत्याह—**नापीति**। रसान्तरादिति। न खलु शृगाराङ्गस्पर्शरहिते शान्तादिप्रधाने काव्ये वैरस्यदायिदोषमन्तरेणापि शोभाविरहोऽनुभूयते। आस्तां वा रसान्तरम्, नीरसेऽपि शृगारयोग्ये शब्दार्थरचनवैचित्र्यवति चित्रे शब्दान्तरापेक्षया कोऽपि प्रकर्षः सहृदयहृदयसंवेद्यो विद्यत एवेत्याह—**अनुप्रासमात्राद्वेति**। अलङ्कारादिवैचित्र्योपलक्षणमेतत्। यदि पुनरपाङ्गभङ्गादिशृङ्गारयोग्यकोमलपदविन्यासे विलक्षणा कोऽपि बन्धच्छाया समुन्मीलतीति[७] पूर्वपदार्थान्वयमात्रमुच्यते[८], तदा पूर्वक एव न्यायः।

१. 'स्फुटत्वात्' इत्युभयोरेव मातृकालिप्योः पाठः। अस्फुटत्वादिति पाठः स्यात्। विनेयोन्मुखीकरणं न तावदाकूत- मिति तु नामनोज्ञम्। तन्मतानुसारेण शृङ्गारप्रतिपत्तिमभ्युपगम्य तन्निराकरोतीति प्राक्तनांशे श्रीधरकृतावतरणिका।

२. आस्वाद्य—क०, आस्वादयिकत्वेत्यस्फुटपाठः—ख०।

३. शृङ्गारं प्रति सम्भाव्यमानविभावानुभावनापाङ्गस्य लोलतायामुपमानतोक्तेति लोचनकृतां समाधानम्।

४. प्रामाण्य—क०

५. रम्येयं प्रकाशभङ्गी। यथाऽलङ्कारकौस्तुभे—"यशः प्रभृत्येव" इत्युपक्रम्य "सान्द्रानन्दलयस्तु यः स एव परमो लाभ" इति काव्यप्रयोजननिर्देशे।

६. अभिहित—क०।

७. अनुभूयत इति—ख०।

८. पूर्ववदन्वाचयमात्रम्—क०।

आश्रयैक्ये विरुद्धो यः स कार्यो भिन्नसंश्रयः ।
रसान्तरेणान्तरितो नैरन्तर्येण यो रसः ॥६४॥

वीरभयानकयोरेकाश्रयत्वेन विरोध इति प्रतिपक्षगतत्वेन भयानको निवेशयितव्यः, शान्तशृङ्गारयोस्तु नैरन्तर्येण विरोध इति रसान्तरमन्तरे कार्यम्। यथा नागानन्दे शान्तस्य जीमूतवाहनस्य "अहो गीतमहो वादित्रम्" इत्यद्भुतमन्तर्निवेश्य मलयवतीं प्रति शृङ्गारो निबद्धः। न परं प्रबन्धे यावदेकस्मिन्नपि वाक्ये रसान्तरव्यवधिना विरोधो निवर्तते। यथा—

विरोधे समावेशप्रसङ्गेन प्रबन्धकर्तृशिक्षामाह—**आश्रयैक्य इति**। प्रकृतरसप्रकृत्या सहैकाश्रयप्रकृतिकत्व इत्यर्थः। विरुद्ध इति। इह खलु द्वयी रसानां गतिर्विरुद्धत्वमविरुद्धत्वञ्च। उभयमपि चाश्रयैक्यनैरन्तर्याद् आलम्बनैक्येन च। तत्र वीरशृङ्गारयोरन्त्यविरोधो न त्वाद्ययोः। यथा—

"कपोले जानक्याः करिकलभदन्तद्युतिमुषि ।
स्मरस्मेरं स्फारोड्डमरपुलकं वक्त्रकमलम् ।
निजं पश्यञ्छृण्वन् रजनिचरसेनाकलकलं ।
जटाजूटग्रन्थिं रचयति रघूणां परिवृढः ॥"

अत्र वीरशृङ्गारावेकाश्रयनिरन्तरौ भिन्नावलम्बनौ न दोषमावहतः। एवं हास्यवीरबीभत्सैः सम्भोगस्य वीरकरुणरौद्रादिभिर्विप्रलम्भस्य, त्रिधाऽप्यविरोधो यथा—वीरस्याद्भुतरौद्राभ्याम्, शृङ्गारस्याद्भुतेन, भयानकस्य बीभत्सेन। नैरन्तर्यमात्रेणाविरोधाद् वीरभयानकयोरित्येकाश्रयालम्बनत्वेन कर्तव्ये वीराश्रयमुख्यनायक प्रतिपक्षाश्रयस्य तु भयानकस्य परिपोषः प्रकृतवीरपरिपोषप्रकर्षको गुण एव न दोषावहः।

शान्तशृङ्गारयोस्तु नैरन्तर्यविभवैक्यविरोधिनोरेकाश्रयनिबन्धे रसान्तरान्तरितत्वं कार्यम्। अत्रोदाहरणमाह—**यथा नागानन्द इति। शान्तस्येति**। मलयवत्यनुरागतः पूर्वं विरक्तविषयं दृष्टतया स्वान्तविश्रमानन्दमनुभवतो दयावीरस्यापि जीमूतवाहनस्य शान्तरसः प्रकृतेः प्रशमाश्रयत्वात्, सततप्रशान्तप्रकृतौ तु शुकादौ शृङ्गारस्यासम्भव एवेति त्रिधाऽपि वर्णने विरोध एव। न परमित्यादिना प्रबन्धे प्रत्यवान्तरवाक्यादास्वादव्यक्तिभेदन्निष्क्रम्य एव विरोधपरिहारः। यस्मादेकत्रापि वाक्ये समूहालम्बनैकास्वादव्यक्तिकवलितयो[१]रपि विरुद्धांशान्तरसंमिश्रणे परस्परोपमर्दकतारूपदोषविरहोऽनुभूयत इत्याकूतम्।

भूरेणुदिग्धानिति। अत्र प्रत्येकं बीभत्सशृङ्गारानुगुणानां पदानां मध्ये वीरानुगुणपदोपादान विरहेऽपि वीरा इति कर्तृपदस्य प्रत्येकमन्वयात् तत्प्रत्याय्यवीरस्य व्यवधा-

---

१. तरलिकयोः :—ख०।

भूरेणुदिग्धान् नवपारिजातमालारजोवासितबाहुमध्याः ।
गाढं शिवाभिः परिरभ्यमाणान् सुराङ्गनाश्लिष्टभुजान्तरालाः ।।३३४।।
सशोणितैः क्रव्यभुजां स्फुरद्भिः पक्षैः खगानामुपवीज्यमानान् ।
संवीजिताश्चन्दनवारिसेकैः सुगन्धिभिः कल्पलतादुकूलैः ।।३३४अ।।
विमानपर्यङ्कतले निषण्णाः कुतूहलाविष्टतया तदानीम् ।
निर्दिश्यमानान् ललनाङ्गुलीभिर्वीराः स्वदेहान् पतितानपश्यन् ।।३३५।।

अत्र बीभत्सशृङ्गारयोरन्तर्वीररसो निवेशितः ।

स्मर्यमाणो विरुद्धोऽपि साम्येनाथ विवक्षितः ।
अङ्गिन्यङ्गत्वमाप्तौ यौ तौ न दुष्टौ परस्परम् ।।६५।।

यथा—

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ।।३३६।।

यकत्वमिति केचित्, तन्न, स्वातन्त्र्येण रसतया प्रतीतेः । वीर एवात्र रसो रतिजुगुप्से तु सञ्चारिणावेव तस्येत्यपि न, अप्रधानस्य सञ्चारिभावादिप्रकर्षायोगात् । अत्र तु तत्सद्भावश्च स्फुट एव, विभावप्रकर्षसद्भावादेवान्यद्वयाक्षेपात्[१] ।

तस्मात् त्रयोऽप्यमी खण्डरसा एव, परस्परमङ्गत्ववाच्यत्वाभावात्, प्राकरणिकस्यापि वीरस्य स्फुटतरप्रतिभासाभावेनाप्राधान्याच्चेत्येके । त्रयाणामपि स्वातन्त्रविश्रामाभावात् पार्यन्तिकसमूहालम्बनरूपो विलक्षण एवायं चित्रनामा रस इत्यपरे[२] । अत्रेत्यादिवृत्तिरप्येतदनुसारेणैव नेया ।

अथ स्थलान्तरे विरोधपरिहारमाह–स्मर्यमाण इति । साम्येनेत्यतः पूर्वमनुभावादिति शेषः । अथ वाऽर्थे । विवक्षितोऽप्रकृतोऽपि कविनाऽभिसंहितः । परस्परं न दुष्टौ परस्परकृतव्याघातपात्रतामप्राप्तौ भवतः ।

अयं स इति । अत्रालम्बनविच्छेदेन रतेरवश्यमात्मतया स्मर्यमाणानां[३] तदङ्गानां शोकोद्दीपकतया करुणानुकूलता । पूर्वावस्थास्मरणमिति । स्मर्यमाणा

---

१. द्वयापेक्षात्–क० । खण्डरसलक्षणं चण्डीदासकृतध्वनिसिद्धान्तसंग्रहे निर्दिष्टमग्रे सूचयिष्यते ।

२. एतन्मतसतत्त्वनिर्धारणे बीजं "तद्धि चित्रपटवद्विशेषसाकल्यात्" इति सूत्रे वामनेन साकल्यादिति पदेन समूहालम्बनप्रत्यायकेन सूचितम् । माघोऽपि—'प्रसारयन्ति कुशलाश्चित्रां वाचं पटीमिव" इति वर्णयति ।

३. 'अवश्यात्मस्मर्यमाणानाम्' इति क० स्खलितः पाठः ।

एतद् भूरिश्रवसः समरभुवि पतितं हस्तमालोक्य तद्वधूरभिदधौ। अत्र पूर्वावस्थास्मरणं शृङ्गाराङ्गमपि करुणं परिपोषयति।

दन्तैः क्षतानि करजैश्च विपाटितानि प्रोद्भिन्नसान्द्रपुलकैर्भवतः शरीरे।
दत्तानि रक्तमनसा मृगराजवध्वा जातस्पृहैर्मुनिभिरप्यवलोकितानि ॥३३७॥

अत्र कामुकस्य दन्तक्षतादीनि यथा चमत्कारकारीणि तथा जिनस्य। यथा वाऽपरः शृङ्गारी तदवलोकनात् सस्पृहस्तद्वदेतद्दृशो मुनय इति साम्यविवक्षा।

पूर्वावस्थेत्यर्थः। बुभुक्षाऽतिशयेन स्वकिशोरभक्षणप्रवृत्तायै सिंह्यै स्वशरीरं वितीर्णवन्तं बोधिसत्त्वं प्रति कस्यापीयमुक्तिर्दन्तैः क्षतानीत्यादि। रक्तमनुरक्तं रुधिरञ्च एवं प्राकरणिके दयावीरे शान्तेऽ[1]नुभावादिसाम्येन खण्डभूतस्य सम्भोगस्य प्रतिभासस्तमेवाङ्गिनं प्रकर्षयति।

केचित्तु बीभत्सोऽत्र मुख्य इत्याहुः, तदसत्, जुगुप्साप्रधानत्वानवभासात्। नन्वद्भुत एवात्र मुख्यो रसः, जातस्पृहमुनिदर्शनवृत्तान्तस्यैव प्राधान्यात्। शेषस्य तु तत्परिपोषकतयाऽङ्गत्वमेव। ततश्च 'क्रामन्त्य' इत्यादितुल्यतयाऽङ्गिन्यङ्गत्वमप्राप्तावित्यादिपरिहारविषयत्वमेवास्येति चेत्, सत्यमसि दीर्घदर्शी। ततश्चाद्भुतस्याप्यङ्गत्वं[2] वक्तृबोधिसत्त्वगतरतिभावमप्यस्त्वेवमिति चेत्, तर्हि साम्यसद्भावमात्रेण प्राचीनप्रणयानुरोधिना वृत्तिकृता गजनिमीलनेन तदवधीरितमिति[3] प्रतीतिः।

यद्वा तत्र साम्यं शाब्दमिव शब्दमाहात्म्यात्, अत्र तु नैवमित्येतावता भेदः[4]। शुद्धसाम्योदाहृतिस्तु।

"सरागया स्रुतघनघर्मतोयया कराहतिध्वनितपृथूरुपीठया।
मुहुर्मुहुर्दशनविलङ्घितोष्ठया रुषा नृपाः प्रियतमयेव भेजिरे॥"

अत्र हि वीरव्यभिचारिक्रोधवर्णनेऽनुभावसाम्येन खण्डसम्भोगोपनिबन्धस्तदास्वादसंस्कारकः।

---

१. दयावीरे शान्ते वा–क०। अत्र च दयावीरस्येति मूलप्रतीकोपरि ध्वन्यालोकलोचने—"दयाप्रयुक्तत्वादत्र धर्मस्य धर्मवीर एव दयावीरशब्देनोक्तः,...दयावीरशब्देन वा शान्तं व्यपदिशति" इति मन्तव्यं स्मरणीयम्।

२. 'अङ्ग नं' इत्यस्फुटः ख० पाठः।

३. प्राचीनप्रणयानुरोधादिति बाहुल्येन टीकाकृतोऽरुचिसूचनम्। ध्वन्यालोकमतमापाततो मम्मटेनानुसृतमित्यस्माकं प्रतिभानम्। न चोद्दिष्टात् शान्तादद्भुतस्य गरीयानुपयोगो येनैवमुक्तिः समाधीयते।

४. अत्रानुभावसाम्यं सहृदयानामतिरोहितमेव। 'प्रारब्धारे' अत्र तु कविप्रयुक्तोत्प्रेक्षाऽलङ्कारमहिम्नाऽवसेयम्। शुद्धसाम्यं तु 'सरागया' इति माघपद्ये स्फुटमेव।

क्रामन्त्यः क्षतकोमलाङ्गुलिगलद्रक्तैः सदर्भाः स्थलीः
पादैः पातितयावकैरिव गलद्बाष्पाम्बुधौताननाः ।
भीता भर्तृकरावलम्बितकरास्त्वच्छत्रुनार्योऽधुना
दावाग्नि परितो भ्रमन्ति पुनरप्युद्यद्विवाहा इव ।।३३८।।

अत्र चाटुके राजविषया रतिः प्रतीयते । तत्र करुण इव शृङ्गारोऽप्यङ्गमिति तयोर्न विरोधः । यथा—

एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ।।३३९।।

इत्यत्र एहीति क्रीडन्ति गच्छेति क्रीडन्तीति क्रीडनापेक्षयोरागमनगमनयोर्न विरोधः ।

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण ।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ।।३४०।।

क्रामन्त्य इति । बाष्पाम्बुपतनं भयञ्च विवाहकाले बन्धुजनसङ्गविच्छेदापरिशीलितपुरुषसङ्गकातर्यादङ्गनास्वादमांसलीकरणबीजम् । न विरोध इति । राजनिकटस्थिताततायिद्वयवत् परस्परोपमर्दनाननुभवात्[1] । अत्र दृष्टान्तमाह—**यथेति । क्रीडनापेक्षयोरिति** । क्रीडने विधेयेऽङ्गभावेनानूद्यमानयोरित्यर्थः । क्रीडनोपकीर्णयोरिति पाठे तु स एवार्थः । आगमनगमनयोरित्युपलक्षणं पतनोत्थानयोर्वदनमौनाचरणयोरपि ज्ञेयम् । **न विरोध इति** । द्वयोरपि विरोधिनोर्यत्र विधीयमानता तत्रैव स्वतन्त्रतया निरङ्कुशयोरन्योन्योपमर्दः स्यात् । अत्र त्वनूद्यमानत्वेनाप्रधानभावाद् स्वात्मविश्रामस्यापि दुर्लभतया दहनोद्विग्नवन्यदुष्टसत्वन्यायेन समावेशः गलितदर्पयोः स्वानुभवसिद्धतया दुरपह्नव एवेत्यर्थः ।

अत्र यथाऽनूद्यतया प्राधान्याभावस्तथा तत्राप्यङ्गतयेति साम्यमेवानयोरिति विषयव्याप्त्यर्थमुदाहृत्यन्तरमाह—**क्षिप्त** इत्यादि । क्षिप्तो वह्निपक्षे धृतः कामिपक्षे करविधूननेनाहतः । अवधूतोऽङ्गविक्षेपेण दूरे विक्षिप्तः । प्रभावातिशयस्य तद्गतरतिपोषकस्य त्रिपुरध्वंसं प्रत्युत्साहस्यापरिपुष्टतया रसपदवीपरिप्राप्त्यभावेन भावमात्रस्य करुणाङ्गम्, आस्वादापेक्षकत्वात् । तस्य तु शृङ्गार इतीर्ष्याविप्रलम्भरूपस्य शृङ्गारस्य कामीवेति साम्यबलादायातस्य परमेश्वरप्रभावं प्रति सोपयोगतया मुख्याङ्गकरुणापेक्षया शृङ्गारस्य दूरता बोद्धव्या । आस्वादोत्तरकालं विवेचनाद-

१. न्याय एष लोचनकृतोपन्यस्तः । राजनिकटरक्षिद्वयेति पाठोऽपि कुत्रचिदुपलभ्यते । मुद्रितध्वन्यालोकलोचनपाठोऽशुद्धः (पृ० १६७) संस्कार्यश्च ।

इत्यत्र त्रिपुररिपुप्रभावातिशयस्य करुणोऽङ्गं तस्य तु शृङ्गारस्तथापि न करुणे विश्रान्तिरिति तस्याङ्गतैव। अथवा प्राग् यथा कामुक आचरति स्म तथा शराग्निरिति शृङ्गारपोषितेन करुणेन मुख्य एवार्थ उपोद्बल्यते।

उक्तं हि—

गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते।
प्रधानस्योपकारे हि तथा भूयसि वर्तते॥ इति॥

शायामेवेदृशी व्यवस्थौचित्यात्। आस्वादे तु [1]घनचमत्काररूपेणेदृशविभागप्रतिभासः, ततः पूर्वमपि च खण्डास्वादरूपमात्राभासो न तु दुरितान्तरादस्य। तथापि न करुणे विश्रान्तिरिति। अप्राकरणिकतयाऽन्यस्योत्प्रेक्षितत्वादित्यर्थः[2]।

एव'मिव'शब्दस्योत्प्रेक्षाद्योतकत्वे विरोधं परिहृत्योपमाद्योतकोऽय'मिव' शब्दः पूर्वानुभूतनायकवृत्तान्तं सदृशत्वादुपस्थापयतीति ये मन्यन्ते तदनुसारेण परिहृति—**अथवेति**[3]। एतत्पक्षे स्मर्यमाणपूर्वावस्थायाः करुणाङ्गता सुव्यक्तैव। यासां पूर्वमीर्ष्याकलुषस्वव्यापाराणामपि प्राणेश्वरास्तथाविधचाटुप्रवणा आसन्, तासामेवेदानीं निःशरणानां शम्भुशरदहनस्तथाविधां दुर्दशामुपनयतीति मुख्य एवार्थः परमेश्वरोत्साहपुष्टतद्गतरतिप्रकर्षतयोपोद्बल्यते परमप्रकृष्टास्वादानुकूलतामानीयते।

अङ्गपरिपोषस्य मुख्योपकारितायां वृद्धसङ्गतिमाह—**उक्तं हीति**। गुणोऽङ्गं कृतात्मसंस्कारः स्वाङ्गसामग्र्या प्रधानं प्रतिपद्यते प्रधानमुपकरोति। उपकारमात्रं चस्त्वपुष्टाङ्गेऽप्यस्तीति विशेषमाह—**तथा हीति**। तथा सति स्वाङ्गपुष्टत्वे सति प्रधानस्य भूयसि अपुष्टाङ्गत्वसाध्य उपकारे परिपोषे वर्तते।

ननु यद्येवंविधं काव्यमभिनेयार्थं स्यात्तदा विरुद्धार्थाभिनयस्तावद् युगपदशक्यः, क्रमाङ्गीकारे तु काव्यभेदप्रसङ्ग इति चेत्, सत्यम्, समावेशोऽवश्यमनुभावादिसाम्य एव भवतीति प्रधानप्रकाशपरेणाप्यभिनयेन लेशतोऽप्रधानमपि सूचयितुं पर्याप्ता एव श्रीमद्भरतमहामुनिपाद परिचर्यालब्धसिद्धितया महाविज्ञानिनो नटबटुकाः[4]।

---

१. घनतम–ख०। तूरिति यद्यर्थः स्यात्।

२. "यद्यप्यत्र करुणो रसो वास्तवोऽप्यस्ति, तथापि स तच्चारुत्वप्रतीतौ न व्याप्रियत इत्यनेनाभिप्रायेण श्लेषसहितस्येत्येतावदेवावोचत्। न तु करुणसहितस्येत्यपि। एतमर्थमपूर्वतयोत्प्रेक्षितं द्रढीकर्तुमाह" इति लोचने विवृतिः।

३. श्रीधरस्तु 'अयं स रशनोत्कर्षी' इति न्यायेनापि न विरोध इत्याह अथवेति इति ग्रन्थं संगमयति।

४. अभिनयो हि नटबटुकानां कर्म। "विभावयति यथावच्च नानार्थं हि प्रयोगतः। शाखाऽङ्गोऽपाङ्गसंयुक्तस्तस्मादभिनयः स्मृतः॥" इति मुनिकृतं तल्लक्षणम्। तत्र "आङ्गिकं

प्राक्प्रतिपादितस्य रसस्य रसान्तरेण न विरोधः, नाप्यङ्गाङ्गिभावो भवतीति रसशब्देनात्र स्थायीभाव उपलक्ष्यते ।

इति श्रीकाव्यप्रकाशे दोषदर्शनो नाम सप्तमोल्लासः ।।

अत्र चोदाहृतिद्वयेऽपि साम्येनैव विरुद्धोपनयः। क्वचित्तु स्वारस्येनैव भवति। यथा—

"एकं ध्याननिमीलितं मुकुलितप्रायं द्वितीयं पुनः ।
पार्वत्या वदनाम्बुजस्तनभरे सम्भोगभावालसम् ।
अन्यद् दूरविकृष्टचापमदनक्रोधानलोद्दीपितं ।
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ।।"

अत्र शान्तशृङ्गाररौद्रखण्डरसपरिपुष्टा भगवद्विषयिणी भक्तिः ।

एवं विरोधिभावयोरप्येकरसाङ्गत्वे निर्विरुद्धता मृग्या। प्राक्प्रतिपादितरूपस्य समूहालम्बनात्मकपरिपूर्णघनानन्दरूपस्य न विरोधः, एकवाक्यनिवेशप्रादुर्भाव-यौगपद्यविरहेण परस्परोपमर्दकसम्भावनाया अभावात्। नाप्यङ्गाङ्गिभावः, द्वयोरपि परिपूर्णतया स्वतन्त्रविश्रान्तत्वात्, भिन्नदेशकालत्वाच्च। **स्थायिभाव इति**। स्थायिनः सकाशाद् भवतीति स्थायिभावः स्वतन्त्रविश्रामरहितः पूर्वरसाद् भावमात्राच्च विलक्षणतया सहृदयहृदयसंवेद्यस्वरूपः कैश्चित सञ्चारिनाम्नाऽस्मा-भिस्तु खण्डरसनाम्ना[१] व्यवहार्यः कश्चन विशेष इत्यर्थः। उपलक्ष्यते, तस्य स्वरूपतो

तु भवेच्छाखा"। इत्यङ्गाभिनये विविधदृष्टिभेदादिभिरुपाङ्गाभिनये च हस्तादीनां चारैः प्रयोगो नाटचशास्त्रदर्शितविधया समर्पितो नटकर्मणि परां काष्ठामधिरोप्यत इति हि टीकाकृतामाशयः ।

१. अत एवात्र प्रधानेतरेषु रसेषु स्वातन्त्र्मविश्रामराहित्यात् पूर्णरसभावमात्राच्च विलक्षण-तया सञ्चारिरसनाम्ना व्यपदेशः प्राच्यानाम्। अस्मत्पितामहानुजकविपण्डितमुख्य-श्रीचण्डीदासपादानां खण्डरसनाम्ना ।

"अङ्ग बाध्योऽथ संसर्गाद् यद्यङ्गी स्याद्रसान्तरे ।
नास्वाद्यते समग्रं यत्ततः खण्डरसः स्मृतः ।।"

इति साहित्यदर्पणे विश्वनाथः। यद्यङ्गी रसोऽपरिपुष्टतया भावमात्रवैलक्षण्येनापात-मात्रतः प्राधान्येनाभिव्यक्तः समग्रं नास्वाद्यत इति परतन्त्रत्वाद् न्यूनाङ्गसामग्रीकत्वात् समग्रापुष्टत्वाच्च" इति साहित्यदर्पणलोचने विश्वनाथतनुजोऽनन्तदासः ।

वाच्यतया [1]म्लेच्छितादिभिर्घटादितत्त्ववत् कृतसमयानां कथञ्चित् प्रतीतिपदवीं नीयते ।

ये तु स्थायिभावमात्ररूपो रत्यादिरित्याहुः, तेऽत्र स्थायिभावमात्रपदं मुख्यं भाक्तं वेत्यनुयोज्याः । तत्र नाद्यः, ''रसावस्थः परं भावः स्थायितां प्रतिपद्यते'' इति नयेन प्रत्यभिज्ञायमानलौकिकावस्थाऽनुभूतस्थैर्यविशिष्टशब्दाभिनयोपयोगिनि भरतादिसामग्रीसम्पत्प्रसादलब्धप्रतिबोधसहृदयहृदयगर्भगृहान्तश्चिरतरनिद्राणवासनान्तर्लीनरूपेत्यादौ किञ्चिदास्वादात्मका भावविलक्षणतया स्वसंवेदनसिद्धास्वादाङ्कुराविष्करणदशायामेव स्थायिपदस्य[2] मुख्यत्वात् । न द्वितीयः, 'क्रामन्त्य' इत्यादौ भावमात्रविलक्षणकरुणास्वादसम्भेदानुभावात् । अत आस्माकीनमेव व्याख्यानं ज्याय इति सर्वं सुसमञ्जसम् ।।

इति काव्यप्रकाशदीपिकायां[3] दोषदर्शनो नाम सप्तम उल्लासः ।।

---

१. म्लेक्षतादिभिः–ख० । वाच्यतयेश्वरेच्छादिभिः इति पाठः स्यात् । अयमाशयः–भावरसस्थायिव्यभिचारिप्रभृतिपदानां शास्त्रकृत्कृतसमयेनैवार्थव्यवस्था । तथा सति स्थायिपदं भावविशेषणकमेव भवितुमर्हति । परं लोचनकृत्–''तथा च भागुरिरपि (भारविरपीति का।चित्कः, भाल्लुकिरिति च शुभङ्करकृते सङ्गीतदामोदरे नामनिर्देशः) किं रसानामपि स्थायिसञ्चारिताऽस्तीत्याक्षिप्याभ्युपगमेनैवोत्तरमवोचद् बाढमस्ति'' इत्याह ।

''बहूनां समवेतानां रूपं यस्य भवेद् बहु ।
स मन्तव्यो रसः स्थायी शेषाः संचारिणो मताः ।।

इति मुनिवचनमत्र प्रमाणम् ।

२. स्थायिपदत्व-ख ।

३. इति श्रीमत्कापिञ्जकुलक्षीरोदकौस्तुभविद्वत्कविसहृदयगोष्ठीगरिष्ठश्रीचण्डीदासविरचितायाम्-इति ख० पाठः ।

अष्टम उल्लासः

एवं दोषानुक्त्वा गुणालङ्कारविवेकमाह—

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ।।६६।।

आत्मन एव हि यथा शौर्यादयो नाकारस्य, तथा रसस्यैव माधुर्यादयो गुणा न वर्णानाम् । क्वचित्तु शौर्यादिसमुचितस्याकारमहत्त्वादेर्दर्शनात् 'आकार एवास्य शूरः' इत्यादेर्व्यवहारादन्यत्राशूरेऽपि विततकृतित्वमात्रेण 'शूर' इति क्वापि

सम्प्रति गुणालङ्कारविशेषलक्षणेषु प्रकृतेषु गुणानामन्तरङ्गत्वात् प्रथमं तद्विशेषेषु लक्षणीयेषु तत्सौकर्याय सामान्यलक्षणं तावद् वाच्यम्, तदुक्तौ चार्थसिद्ध एवालङ्कारजातेर्विवेकः । गुणालङ्कारैक्याङ्गीकार उक्तस्फोरणायानूद्यत इत्याह-**एवमिति** । गुणालङ्कारविवेकं गुणानामलङ्कारेभ्यो वैजात्यमाह-स्वरूपोपदर्शककारिकाद्वयेन । **रसनं** रस आस्वादः, तस्याङ्गिनः काव्यात्मभूतस्य धर्माः स्वरूपविशेषा इति लक्षणभागः । गुणपदस्य प्रवृत्तिबीजमाह-**उत्कर्षहेतव इति**[1] । यथा खलु शौर्यादयः पुरुषोत्कर्षहेतवो गुणशब्दप्रतिपाद्यास्तथा माधुर्यादयोऽपि स्वसमर्पकस्य पदसन्दर्भस्य काव्यव्यपदेशौपयिकोत्कर्षानुगुण्यभाज इत्यर्थः । अचलस्थितयः काव्यनियन्त्रितस्थितयः, तज्जातीयायोगव्यवच्छेदेनैव काव्यत्वात् । अलङ्काराणां पुनरसत्त्वेऽपि न काव्यत्वविरोधः, तेषां तदात्मरूपास्वादस्वरूपात्मकत्वात् ।

क्वचिदिति । प्रायिकत्वश्चावर्जनीयसन्निधितामात्रेणेति भावः । आकारस्यावयवसंस्थानस्य । **रसस्यैवेति** । तज्जातिविशेषरूपेष्वेव तेषु वक्ष्यमाणविलक्षणविशेषसम्भवादित्यर्थः । न वर्णानामिति । तथा सत्यलङ्कारवैजात्यस्य दुर्लभत्वप्रसङ्गात् । क्वचित्तु शूरे आकारमहत्त्वमारोहपरिणाहशा-

---

१. एवं च रसस्योत्कर्षहेतुत्वे सति रसधर्मत्वम्, तथात्वे सति रसाव्यभिचारिस्थितित्वम्, अयोगव्यवच्छेदेन रसोपकारकत्वं चेति लक्षणत्रयं गुणानां द्रष्टव्यम् ।— — चण्डीदासस्तु रसधर्ममात्रं लक्षणम्, उत्कर्षहेतुत्वं तु गुणशब्दप्रवृत्तिबीजमित्याह, तदयुक्तमिति प्रदीपमन्तव्यमविचाररमणीयम् । प्राचा ध्वनिकारेण स्वीकृते गुणलक्षणे रसधर्मत्वमेवेतरव्यावर्तकतया समुपन्यस्तम्, अचलस्थित्वमपरिहार्यमानुषङ्गिकमात्रम् । अत्र च क्वचिदुपचारत इति वक्तव्यमिति प्रदीपमन्तव्यमपि न सुष्ठु ।

शूरेऽपि मूर्तिलाघवमात्रेण 'अशूर' इत्यविश्रान्तमतयो यथा व्यवहरन्ति, तद्वन्मधुरादिव्यञ्जकसुकुमारादिवर्णानां माधुर्यादिव्यवहारप्रवृत्तेरमधुरादिरसाङ्गानां वर्णानां सौकुमार्यादिमात्रेण माधुर्यादि मधुरादिरसाङ्गानां तेषामसौकुमार्यादेरमाधुर्यादि रसपर्यन्तविश्रान्तिप्रतीतिवन्ध्या व्यवहरन्ति। एत एव माधुर्यादयो रसधर्माः समुचितैर्वर्णैर्व्यज्यन्ते, न तु वर्णमात्राश्रयाः। यथैषां व्यञ्जकत्वं तथोदाहरिष्यते।

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥६७॥

लिशरीरसन्निवेशगाम्भीर्यशोभावहत्वम्। अन्यत्र पुरुषे विततकृतित्वमाकारमहत्त्वं[१] प्रकर्षनिर्वाच्यम्। क्वापि पुंसि मूर्तिः शरीरं तस्य लाघवमत्यन्तप्रकृष्टारोहपरिणाहशून्यता। अविश्रान्तमतयोऽपरिनिष्ठितबुद्धयः। माधुर्यव्यवहारेत्यत्र माधुर्यपदानन्तरमादिशब्दोपस्कारः। अमधुरादिरसाङ्गानां तदानुगुण्याभावेऽपि तद्विभावाद्युपनायकपदसन्दर्भाप्रतिष्ठानाम्। एवं मधुरादिरसोपकरणानामित्यपि। तेषां वर्णानां रसस्यास्वादभिन्नस्य पर्यन्ते रहस्ये विश्रान्ति परिनिष्ठामापन्ना या प्रतीतिर्बुद्धिस्तद्वन्ध्या प्राप्तसहृदयभावाः काव्यत्वपरीक्षका इत्यर्थः।

एतमेवार्थं द्रढयति--**एत एवेति**[२]। अतो न वर्णधर्मा इत्यर्थः। मधुरादिवर्णधर्मत्वे हि तेषां तदभावस्थले सर्वथा मधुराद्यास्वादायोग एव स्यात्। न चैवम्, अपकृष्टस्यापकृष्टतरस्य वा तस्यानुभवात्। अत एवेति क्वचित्पाठे तु।

ननु यद्येते एव माधुर्यादयो रसधर्माः समुचितैर्वर्णैर्व्यज्यन्ते, न वर्णविशेषधर्मा माधुर्यादयस्तदा मधुरादिवर्णवति काव्ये प्रकृष्टो माधुर्याद्यास्वादः, तदभाववति तु निकृष्ट इति कथमियं व्यवस्थेत्याशङ्क्य योज्या वृत्तिः। अस्मिन् पक्षे समुचितैरसमुचितैश्च[३] वर्णैर्व्यज्यत ईत्यनन्तरं यथायथं प्रकृष्टतया निकृष्टयेति शेषः। असमुचितैश्चेति पाठाभावेप्यत एवेति पाठे यतः सहृदयचक्रवर्तिना सूत्रकृता माधुर्यादीनामास्वादरूपविशेषता स्वानुभवसाक्षिकीत्वमुक्ता, अत एवास्माभि[४]रप्यनुभूत्यनुसारेण गुरुशिक्षया चेत्थमङ्गीक्रियत इत्यर्थः। अत एव माधुर्यादयो रसधर्माः समुचितैर्वर्णैर्व्यज्यन्ते न वर्णमात्राश्रया इति बहुपुस्तकदृष्टः सुगम एव सिद्धान्तप्रकटनपरः पाठः। पाठस्वरूपनिर्धारणे दृढतरं प्रमाणमस्तीति नास्माभिरेकतरपरिग्रहः क्रियते।

---

१. आकारमहत्त्वनिर्वाच्यम्—ख०।

२. एवमुभयोर्मातृकालिप्योर्मूलपाठः। अत एवेति प्रायिकः पाठः साधीयः।

३. समुचितैश्च वर्णैरिति खपुस्तके गलितः पाठः।

४. अस्मामिरिति वृत्तिकारेणेति चण्डीदासाशयः। चण्डीदासः केषाञ्चिदर्वाग्भवटीकाकृत्पक्षं मूलवृत्तिकृतोर्भेदं समर्थयत इतीतरत्रापि दृश्यते।

ये वाचकवाच्यलक्षणाङ्गातिशयमुखेन मुख्यरसं सम्भविनमुपकुर्वन्ति, ते कण्ठाद्यङ्गानामुत्कर्षाधानद्वारेण शरीरिणोऽप्युपकारका हारादय इवालङ्काराः ।

यत्र तु नास्ति रसस्तत्रोक्तिवैचित्र्यमात्रपर्यवसायिनः । क्वचित्तु सन्तमपि नोपकुर्वन्ति । यथा[१]—

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला ।।३४१।।

इत्यादौ वाचकमुखेन[२] ।

ननु यदि वर्णविशेषधर्मा माधुर्यादयस्तदा मधुरादिवर्णानामेव माधुर्याद्युत्कर्षक्षमतेति चेत् ? तत्राह—**यथेति** । एषां मधुरादिवर्णानां यथा येन प्रकारेण माधुर्यादीन् प्रति व्यञ्जकत्वमङ्गीक्रियते, तथा प्रकार उदाहरिष्यते, अनङ्गमङ्गलगृहेत्यादिना स्फोरयिष्यत इत्यर्थः । अयमर्थो व्यङ्ग्यव्यञ्जकभावस्तावन्न धर्मधर्मित्वप्रतिबद्धः, प्रायिकव्यभिचारित्वात्, किन्तु लक्ष्यदृष्ट्याऽन्वयव्यतिरेकगम्यः । लक्ष्येषु च मधुराणामेव माधुर्यं प्रति, परुषाणामेवौजः प्रति, प्रसन्नानामेव च प्रसादं प्रत्यन्वयव्यतिरेकसिद्धमानुकूल्यमिति तथैवाङ्गीक्रियते ।

तमित्यस्य मुख्यं रसमिति, सन्तमित्यस्य च सम्भविनमिति विवृतिः । शरीरिणोऽप्युपकारका इत्यलङ्करणौपाधिकत्वादलङ्कारपदस्या[३]लङ्करणदशायामेव मुख्यत्वनीत्या सजीव एव शरीरे शोभामावहतामलङ्काराणामात्मलाभो नान्यथा, मृतशरीरेऽपि शोभाधानप्रसङ्गादित्यर्थः ।

जातुचिदिति कारिकाप्रतीकं विशदयति—**यत्र त्विति** । ननु नीरसशब्दसन्दर्भगतानामनुप्रासोपमादीनामलङ्कारतैव नास्ति, तस्याः काव्यधर्मविशेषनिष्ठताऽनैयत्यादिति येषां साम्प्रदायिकानां मतं तान् प्रति प्रकारान्तरमाह—**क्वचित्त्विति** । एतदपि न साम्प्रतम्, रसानुपकारकस्यानलङ्कारत्वात् । न त्वेवं माधुर्यादिगुणाः, तेषां रसशरीराविश्लेषादिति भावः । क्रमेणेति क्वचित्पाठो रसोपकारकोदाहृत्यनन्तरं तदनुपकारकोदाहृतिरिति नेयः ।

घनसारः कर्पूरः । तीव्रमिति विसर्पणक्रियाविशेषणम् । विसर्पन् क्रमशो गाढीभवन् । निर्धूमं धूमनिरसनेन विधुतो वीजितः पावकोऽग्निरिव । इत इत इति मौग्ध्यविजृम्भितं तत्कालोद्वेगदुर्धरहृदयादिमर्मणां[४] भवतीति । बाला प्रकरणप्रति-

---

१. यथाक्रममुदाहरणमिति प्रायिकः पाठः । स च टीकाकृताऽपि विदितचरः कथञ्चित् समर्थनीयः ।

२. वाचकमुखेनेति कोमलया वृत्त्याऽनुप्रासद्वारा ।

३. "अत्र गुणालङ्कारविवेकस्य वक्तव्यत्वात्तस्य च तदुभयस्वरूपपरिज्ञानपूर्वकत्वादकाण्डेऽप्यलङ्कारलक्षणमुपक्षिपत्युपकुर्वन्तीत्यादि" इति सरस्वतीतीर्थविवरणं ग्रन्थकृन्मर्मसमर्थनपरं स्मरणीयम् ।

४. मर्मणां हस्तादीनां निर्देशनमिति खपुस्तके पाठः सम्यक् ।

मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं
प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव ।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो
न मां त्रातुं तातः प्रभवति न चाम्बा न भवती ।।३४१।।

इत्यादौ वाच्यमुखेनालङ्कारौ रसमुपकुरुतः ।

चित्ते विहट्टदि ण टुट्टदि सा गुणेसुं
सेज्जासु लोट्टदि विसट्टदि दिम्मुहेसुं ।
बोलम्मि वट्टदि पवट्टदि कव्वबन्धे
झाणेण टुट्टदि चिरं तरुणी तरट्टी ।।३४३।।
(चित्ते विघटते त्रुटचति सा गुणेषु
शय्यासु लुण्ठति विसर्पति दिङ्मुखेषु ।।
बचने वर्तते प्रवर्तते काव्यबन्धे
ध्यानेन त्रुटचति चिरं तरुणी प्रगल्भा ।। इति छाया)

इत्यादौ वाचकमेव ।

पाद्यलवङ्गिका । अलङ्कारावनुप्रासोपमे । रसं विप्रलम्भम् । उपकुरुत इति तदाकारसम्भेदवशोन्मिषितस्योत्कर्षस्य स्वसंवेदनसिद्धत्वात् । नीरसानुप्रासोपमाद्युदाहृतयः स्वयमाकरेषु मृग्या इत्याभिप्रेत्य रसवत्काव्यगताया अलङ्कृते रसानुपकारितामुदाहरति—**चित्ते** इति । ये त्वस्य नीरसोदाहरणतां मन्यन्ते ते न सम्यग्विदः, विप्रलम्भास्वादस्यानुभूयमानत्वात् । केवलं परुषाद्यनुप्रासस्य[1] तदनुकूलतया प्रकर्षराहित्यम् । रसस्यात्र विवक्षितत्वादनुप्रासस्योक्तिवैचित्र्यमात्रपर्यवसानमिति चेत्, किमिदमविवक्षितत्वं नाम ? कवितुः सर्वात्मनामङ्कारनिर्वाहदुर्ग्रह इति चेत्, किं[2] पुनस्तेन रसे सर्वथा विच्छेदः प्रकर्षविधातो वा ? नाद्यः, स्वसंविदि विपरीतत्वात् । नेतरः, अस्मत्पक्षनिक्षेपात् ।

विहट्टदि विगलति । खुट्टति कुण्ठतां याति । लोट्टति विपरिवर्तते । विसट्टदि विकसति । नोलम्मि वट्टदि वचसि वर्तते । पवट्टदि प्रवर्तते । झाणेण टुट्टदि त्रुटचति । तरट्टी प्रगल्भा ।

---

१. अनुप्रासः—स च त्रिविधो वृत्तिसंश्रयादितिका व्याऽङ्कारसारसंग्रहलघुवृत्ताववतरणिका ।
"शषाभ्यां रेफः संयोगैष्टवर्गेण च योजिता ।
परुषा नाम वृत्तिः स्याद् ह्लह्वह्याद्यैश्च संयुता ।।"
इत्युद्भटः प्राह । रुद्रटोऽप्येतत्सदृशं लक्षणं निर्दिशति ।

२. किं पुनस्तेन 'रसप्रातिकूल्यमुपात्तम्" इति—क० अधिकः पाठः ।

३. अत्र टवर्णानुप्रासः शब्दालङ्कारस्तमलङ्करोति नतु शङ्गारं प्रतिकूलत्वात् ।

मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति
क्रन्दत्सु भ्रमरेषु वीक्ष्य दयितासन्नं पुरः सारसम् ।
चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता
कण्ठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः ।।३४४।।

इत्यादौ वाच्यमेव न तु रसम्। अत्र बिसलता न जीवं रोद्धुं क्षमेति प्रकृताननुगुणोपमा ।

एवं सम्भविनो रसस्यानुपकारिकां शब्दालङ्कृतिमुदाहृत्यार्थालङ्कृतिमाह—**मित्र इति**। मित्रे सूर्ये सुहृदि च। बद्धानने सङ्कुचितमुखे शोकोपात्तमौने च। ताम्यति म्लानिमाप्तवति परितप्यमाने च। क्रन्दत्सु मधुरगम्भीरं शब्दायमानेषु रुदत्सु च। विसलता मृणालाङ्कुरकोटिः। अत्र चक्रवाकस्य प्रदोषे प्राणेश्वरीविरह-वेदनाविदूनमनसः सारसमिथुनस्वच्छन्दक्रीडाविलोकनप्रसभोद्दीपितमन्मथस्य शोकावेगध्यानजडिततन्मयीभावयोगेन भावुकमनोमोदमातन्वति मित्रादिशब्दे श्लेषमूलातिशयोक्तिसमर्पितो न कश्चिदतिशयः स्फुरतीति शब्दार्थालङ्कृत्योरास्वादानङ्गता, आदित्यास्तमयादीनान्तु विभावादिरूपतयाऽस्त्येवोपयोगः। रसमिति रसनमिति व्युत्पत्त्या पूर्वत्र विप्रलम्भमुत्तरत्र विप्रलम्भाभाससञ्चारिजडताभासम्। अर्गलेवेत्युत्प्रेक्षायामुपमाभ्रान्तिं प्रसङ्गान्निराचष्टे—**अत्रेति**। उपमाऽङ्गीक्रियमाणा प्रकृताननुगुणा सती दोषावहा स्यात्।

अयमर्थः—साधारणधर्मपुरस्कारेणैव ह्युपमा प्रवर्तते। स चात्र जीवरोधित्व-मेव न्याय्यम्[१]। तच्चार्गलाबिसलतयोरुपमानोपमेययोर्द्वयोरपि नास्ति। यदि त्वर्गलापदेन रोधकरणाभिधानं तदा तत्तत्र सम्भवदपि बिसलतायां न सम्भवति, ततश्चोपमीयतेऽनयेति व्युत्पत्त्या उपमा जीवरोधकता प्रकृत उपमेयेऽननुगुणा सम्भवाभावेन नानुकूल्यविधायिनी।[२] न चोत्प्रेक्षापक्षेऽप्ययं दोषः, तत्र यत्रार्गला निधीयते तेन द्वारेण निर्गच्छद्वस्तु निरुणद्ध्येवेति प्रसिद्ध्या वदननिहिताया बिसलताया अर्गलात्वेन सम्भावनायां जीवरोधक्षमत्वस्यापि प्रविष्टत्वात्। न च काल्पनिके वस्तुन्यनौचित्यं प्रसरति, तस्य तात्त्विकपदार्थाश्रयत्वात्, अन्यथोत्प्रेक्षामात्रोच्छेद-प्रसङ्गात्। केवलसम्भावनायां मूले विरोधाविरोधचिन्ता कार्या। सा चार्गलासा-दृश्यसम्भावनायां प्रसरति। सम्भावना चात्र[३] स्फुटमेव प्रतीयते। न चात्र दुष्टता-

---

१. एवमुभयोरेव मातृकालिप्योः पाठः। 'न्याय्यं स्यात्' इत्यनुषङ्गेण कथञ्चित् स समर्थ-नीयः। स धर्मः।

२. अत्र चोद्दीपनरूपाया बिलसतायाः प्रयत्नजीवहरणावसानोपकारकत्वाज्जीवननिरोधार्गल-रूपोत्प्रेक्षायां विप्रलम्भशृङ्गारतदाभासयोरननुगुणत्वान्नालङ्कारो रसस्योपकारकः। इह नोपमेत्युत्प्रेक्षानिरूपणे वक्ष्यत इति साहित्यदर्पणोपरि लोचनस्य मन्तव्यमवधानीयम्।

३. सा च सम्भावनामात्रेण—क०।

एष एव च गुणालङ्कारप्रविभागः ।

एवं च "समवायवृत्त्या शौर्यादयः, संयोगवृत्त्या तु हारादय इत्यस्तु गुणालङ्काराणां भेदः, ओजः प्रभृतीनामनुप्रासोपमादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डरिनिकाप्रवाहेणैवैषां भेदः" इत्यभिधानमसत्[1] ।

यदप्युक्तम्--"काव्यशोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलङ्काराः" इति, तदपि न युक्तम्, यतः किं समस्तैर्गुणैः काव्यव्यवहार उत कतिपयैः ? यदि

प्रतिभासः । ये तु प्रकृतास्वादाननुगुणेयमुपमा साधारण्यासम्भवेन दुष्टत्वादिप्रकृतोदाहृतित्वसङ्गमनपरत्वं व्याचक्षते, ते न सम्यग्वेदिनः, उक्तयुक्त्याऽनुपमात्वस्थैर्यात्[2], [3]एतदलङ्कारसौष्ठवेनास्वादेन कस्यचित् प्रकर्षस्यानुभूयमानत्वाच्चेति यथोक्तमेव ज्यायः ।

उक्तमेवार्थं मतान्तरनिरासदाढर्यायानुवदति–एष एवेति । च पुनरर्थे । प्रविभागो विवेचनम् ।

सम्प्रति परपक्षनिरासं स्फुटयति--एवञ्चेति । अस्मदुक्तव्यवस्थितौ निर्वाधायामित्यर्थः । समवायवृत्त्येति । पृथग् सिद्धेनाधारेणाधेयस्य योगः समवायः, शौर्यादिभिरात्मसम्बन्धश्च, तथा तेषामनन्यत्रसिद्धत्वात् । परस्परपरिहारेणान्यत्र वृत्तयोः पाश्चात्त्ययोगः संयोगः । स च हारादौ दत्तपदः, तेषां शरीरनिरपेक्षस्थितित्वादिति लौकिकगुणालङ्काराणामस्ति वैजात्यम् । काव्यगुणालङ्काराणान्तु शब्दार्थपृथक्सिद्धिराहित्येन तत्समवायाविशेषात् कथमिति ? गड्डरिकाप्रवाहेण गतानुगतिकतामात्रेण, भेदो भेदव्यवहारो न तु वास्तव इति [4]केषाञ्चिन्मतमसत् ।

यदपीति । काव्यस्य शब्दविशेष्यस्य शोभा व्यवहारनिदानभूतः कश्चनातिशयः तस्य कर्तारः स्वसन्निवेशबलेन तदाविर्भावका वर्णादिगतमसृणतादिरूपास्तदतिशयहेतवः काव्यस्य स्वजातीयावेशवैशिष्टयबीजभूताः । अस्मिन् पक्षे शब्दादिधर्मा

---

१. एवञ्चेत्यस्याभिधानमसदित्यनेनाऽन्वयः ।

२. उपमानुस्थैर्यादित्यस्पष्टः ख० पाठः ।

३. प्रकरणादेतद्धि क्वचित् सन्तमपि नोपकुर्वन्तीति वृत्तिग्रन्थे तृतीयकक्षाया उदाहरणम् । विमतास्तत्र रसस्य सत्तां स्वीकुर्वाणा अलङ्कारविषये सन्दिग्धतां प्रकटयन्तो ग्रन्थसङ्गमने प्रयतन्ते । तस्यैवाक्षेपपरौ युक्त्युपन्यास उपरिस्थटीकायां दर्शितः ।

४. गुणलङ्कारयोरभेदवादिनः प्राचीना भामहदण्डिप्रभृतय एवं मन्यन्ते । मतोद्धृतिरधुनाऽप्यनुपलभ्यात् प्रसिद्धादुद्भटकृताद् भामहविवरणग्रन्थादिति हेमचन्द्रादयः । उद्भटो जरत्तराणां मतमनुवदतीति तन्मतमाक्षिप्यते । अलङ्कारसत्ता च काव्यशरीरे सर्वथाऽप्यावश्यकीत्येषां पक्षः । भामहविवरणे सम्प्रति प्रकाशितेऽयमंशस्त्रुटितत्वान्न दृश्यते ।

समस्तैः तत्कथमसमस्तगुणा गौडी पाञ्चाली च रीतिः काव्यस्यात्मा ? अथ कतिपयैः, ततः—"अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूमः" इत्यादावोजःप्रभृतिषु गुणेषु सत्सु काव्यव्यवहारप्राप्तिः ।

स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी ।
अस्या रदच्छदरसो न्यक्करोतितरां सुधाम् ॥३४५॥

इत्यादौ विशेषोक्तिव्यतिरेकौ गुणनिरपेक्षौ काव्यव्यवहारप्रवर्तकौ ।

एव गुणास्त एव काव्याधीना इति तत्त्वम् । तन्न युक्तमित्याह—**तदपीति** । वर्णबन्धवैकटयोगिनी माधुर्यशून्या गौडी । मसृणबन्धवती विकटबन्धशून्या पाञ्चाली । रीतिः काव्यजातिः । काव्यस्यात्मेति स्वरूपेणोपलम्भहेतुतया स्वरूपकुक्षिनिक्षेपात्[१] । ओजः प्रभृतिष्विति वर्णबन्धवैकटयादिरूपाणां तेषामेवमादावपि सम्भवात् । अथ रसवदेव काव्यं ब्रूषे तर्हि शिष्यतामवलम्ब्य सर्वामिवास्मत्प्रक्रियामङ्गीकुर्विति भावः ।

गुणकृतविशेषातिशायित्वमलङ्कारत्वमित्यपि दूषयति—**स्वर्गेति** । विशेषोक्तिः पूर्वार्धे, व्यतिरेक उत्तरार्धे । गुणनिरपेक्षाविति । यद्यप्यत्र पद्ये आस्वादाविर्भावके तद्धर्मगुणसद्भावो दुरपह्नवस्तथापि परलक्षणानुसारेण शब्दादिधर्माणां माधुर्यादीनां नात्र वैशद्येन स्थितिरिति । काव्यव्यवहारप्रवर्तकाविति । रसादिकं काव्यात्मान-[२]मङ्गीकुर्वाणैर्हि गुणाभावस्थलेऽलङ्काराणां काव्यजीवातुताऽङ्गीक्रियते ।

इदानीमिति । सामान्यलक्षणप्रसङ्गेनालङ्कारवैजात्यप्रतिपादनानन्तरम् । गुणानां भेदं विभागं विशेषलक्षणोपयोगितया प्रकृतम् । ते गुणाः । त्रयाणामविभा-

---

१. एतच्च वामनीयानां मतम् । काव्यात्मभूताश्च गुणाः काव्याधीनाः, ते पुनस्तन्मतोपदिष्टाया रीतेर्विशेषा इति स्फुटैवासङ्गतिः । "रीतिरात्मा काव्यस्य", "विशिष्टा पदरचना रीतिः", "विशेषो गुणात्मा" इति वामनीयाः कारिकाः । उदाहृतं च तैः प्राचीनतराणामभियुक्तानां मन्तव्यम्—"किन्त्वस्ति काचिदपरैव पदानुपूर्वी यस्यां न किञ्चिदिवावभाति" इति । एवं नव्यसम्मतरसात्मताऽङ्गीकारे—"तमर्थमलम्बन्ते येऽङ्गिनस्ते गुणाः स्मृताः । अङ्गाश्रितास्त्वलङ्काराः" इति न काचिद् विप्रतिपत्तिः । "समवेता गुणाश्रित्ते" इति भट्टतौतमतमेतद् विशदयति ।

२. अपाकुर्वाणैः—ख० । वस्तुतस्तु भामहोद्भटादिमतेनैवैतेषु स्थलेषु काव्यत्वस्वीकारः । रसाद्यसत्त्वेऽप्यलङ्कारसत्त्वे काव्यत्वमव्याहतमिति तेषामाशयः । तत्कथमिति श्रीवत्सलाञ्छनाद्यास्तदतिशयहेतवस्त्वलङ्कारा इति वामनमतसपक्षत्वेनाङ्गीकुर्वन्तो ग्रन्थं समादधति । महेशचन्द्रन्यायरत्नास्तु-ग्रन्थकृता यत् काव्यस्वरूपनिरुक्तौ सगुणाविति विशेषणं दत्तं तन्न वामनाद्युक्तगुणयोगाभिप्रायम्, अपि तु स्वोक्तरसधर्मगुणयोगाभिप्रायमिति रससत्त्वे तदक्षतमिति न दोष इति वदन्तः काव्यव्यवहारमत्र समर्थयन्ति ।

इदानीं गुणानां भेदमाह--

माधुर्यौजःप्रासादाख्यास्त्रयस्ते न पुनर्दश ।

एषां क्रमेण लक्षणमाह—

आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् ।।६८।।

शृङ्गारे अर्थात् सम्भोगे द्रुतिर्गलितत्वमिव । श्रव्यत्वं पुनरोजःप्रसादयोरपि ।

गेन विभागस्य न्यूनाधिक्यव्यवच्छेदपरतया त्रित्वे लब्धे वाद्यन्तरविप्रतिपत्तिनिरास-सूत्रणायोक्तम्-**त्रय इति** एतदेव विशदयति-न पुनदर्श । दण्डचाद्युक्तरीत्येति । क्रमेणेत्यतः पूर्वं विभागेनेति शेषः ।

आह्लादकत्वमिति । यद्वशेनाह्लादशब्दप्रवृत्तिः काव्ये तदाह्लादकत्वमास्वाद एव । स चानन्दपर्यायः सर्वास्वादसाधारण इति मन्यमानो विशिनष्टि-**द्रुतिकारणमिति** । इन्नन्तात्[१]युट्प्रत्ययो बन्धादिसहकारित्वप्रकटनपरः । लक्षणन्तु "चित्तद्रवीभावमय आह्लादो माधुर्यम्" इत्येव हि । न पुनः कारणं हेतुरिति व्याख्यानं ज्यायः, द्रवीभावस्यास्वादस्वरूपाह्लादाभिन्नत्वेनातत्कार्यत्वात्[२] । यद्वा वासनाऽन्तर्लीनरत्यादिगतमास्वादकत्वमास्वादजननशक्तिः, आस्वादस्वरूपश्रुतिजनकं माधुर्यमिति ग्रन्थयोजना । लक्षणन्तु प्राचीनमेव ।

कुत्र पुनरास्वाद एतादृशः स्वरूपविशेष इत्याह[३]—**शृङ्गार इति** । विप्रलम्भस्य पृथगुपादानादयं शृङ्गारशब्दः सम्भोगमेवाहेत्याह वृत्तिकृत्—शृङ्गारेऽर्थात् सम्भोग इति । **गलितत्वमिति** । स्वाभाविकानाविष्टत्वात्मककाठिन्यमन्युक्रोधादिकृतदीप्तत्वविस्मयहासाद्युपहितविक्षेप-परित्यागेन रत्याद्याकारानुविद्धानन्दद्वारेण सहृदयचित्तस्यार्द्रप्रायत्वमित्यर्थः ।

नन्वास्वादधर्मत्वे गुणानां काव्यधर्मत्वं न स्यादिति चेत् ? सत्यम्, आस्वादस्य काव्यात्मस्वरूपत्वेन तद्धर्माणां काव्यधर्मत्वादास्वादोऽप्यात्मधर्मः । कथं शब्दसन्दर्भरूपकाव्यैकरूप इति चेत् ? न वयमेकरूपत्वमात्मत्वं ब्रूम, किन्तर्हि पार्यन्तिके प्रयोजकत्वमित्याचार्याः[४] ।

सिद्धान्ततत्त्वन्तु काव्यमेव कवितृवासनापरिणतिरूपं सहृदयहृदयलीनप्राचीनवासनोद्बोधात्मकास्वादरूपेण परिणमतीति । एतच्च सहचरवधव्याकुलक्रोञ्च्या-

१. इनिति कातन्त्रमते णिजन्तस्य संज्ञा ।

२. एनमेव मार्गमनुसृत्य विश्वनाथेन "माधुर्यं द्युतिकारणम्" इति लक्षणं दूषितम् चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते" इति सूत्रितञ्च ।

३. इत्याशङ्क्याह–क० ।

४. आचार्या इत्यभिनवगुप्तपादादयो रसात्मप्रतिष्ठापकाः । वस्तुतस्तु "शृङ्गार एव मधुरः' इति कारिकोपरि ध्वन्यालोककृदानन्दवर्धनेनैवमुट्टङ्कितम् ।

करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ।

अत्यन्तद्रुतिहेतुत्वात् ।

दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः ॥६९॥

चित्तस्य विस्ताररूपदीप्तत्वजनकमोजः ।

बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च ।

वीराद् बीभत्से ततो रौद्रे सातिशयमोजः ।

लोकप्रतिफलिततदीयशोकोद्बुद्धवासनादिकविवदनविनिर्गतानादिरसतत्त्वपरिणामरूपादिकाव्यप्रतिफलनात्मकसहृदयहृदयानन्दप्रतिपादकागमगम्यमेवेति नाप्रामाणिकतया स्वशिष्यव्यामोहमात्रमाशङ्कनीयमिति[१] ।

यत्तु "श्रव्यं नातिसमस्तार्थशब्दं मधुरमिष्यते" इति माधुर्यलक्षणं कैश्चिदुक्तम्[२], तन्न युक्तम्, श्रव्यत्वस्य शब्दधर्मत्वात् । भवतु वाऽविचाररमणीयं माधुर्यस्य शब्दधर्मत्वम्, तथाप्यतिव्यापकमित्याह—श्रव्यत्वं पुनरित्यादि । समग्रं लक्षणमुपलक्ष्यते । श्रव्यत्वं श्रवणानुकूलतामात्रम् । समस्तपदत्वं चौजसि "यो यः शस्त्रम्" इत्यादौ, प्रसादे च "जातं मे पुरुषेण भस्मरजसा" इत्यादौ तदुक्तरीत्या शब्दगुणे वर्तते ।

अतिशयो यथायथं तारतम्यम् । तत्र सम्भोगापेक्षया विप्रलम्भे तदपेक्षया करुणे तदपेक्षया शान्ते प्रकृष्टं माधुर्यम् ।

एतावांस्तु विशेषः—शृङ्गारकरुणयोर्निस्सपत्नं माधुर्यम्, शान्ते तु विषयजुगुप्साद्यनुगमादोजोलेशानुविद्धमिति अत्यन्तद्रुतिहेतुत्वादित्यास्वाद्यास्वादयोराहार्यभेदेन सूत्रद्वितीयव्याख्याऽनुसारेण वा सङ्गमनीयम् । दीप्त्या संवेत्तृजनप्रत्येयरूपया स्वाभिन्नया आत्मनश्चित्तस्य विस्तृतेरुल्लसितप्रायात्मिकया इति नेयम् ।

तदेव वक्ष्यति वृत्तिकृत्—**विस्ताररूपदीप्तत्वेति** । हेतुरित्यस्य पूर्ववत् सङ्गतिः[३] । बीभत्सेत्युपलक्षणम्, तदभावे तद्विधसञ्चार्यादिषु च ज्ञेयम् ।

एवं माधुर्यस्य शृङ्गाराभासादिषु स्थितिर्ज्ञेया । जनकमिति पूर्ववत् । रौद्रे

---

१. निहतसहचरीविरहकातरक्रौञ्चाक्रन्दजनितशोक इति ध्वन्यालोक आख्यानसूचना रामायणकथोपन्यासानुकूलैवेति विमर्शकानां केषामपि मतम् । एष एवागमः ।

२. भामहकृते काव्यालङ्कार एवं समर्थितम् ।

३. "माधुर्ये द्रुतिकारणम्" इति लक्षणविवरणे यथा सूचितम् ।

शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः ॥७०॥
व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः ।

अन्यदिति । व्याप्यमिह चित्तम् । सर्वत्रेति सर्वेषु सर्वासु रचनासु च ।

गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता ॥७१॥

गुणवृत्त्योपचारेण । तेषां गुणानामाकारे शौर्यस्येव ।

कुतस्त्रय एव न दश इत्याह—

केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः ।
अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ॥७२॥

वीरे च निःप्रतिभटमोजो वीभत्से तु माधुर्यलवानुविद्धम्, हास्याद्भुतभयानकेषु तु द्वयोरपि समावेशो ध्वनिसिद्धान्तसंग्रहोक्तरीत्या ज्ञेयः[१] ।

शुष्केन्धनमग्निरिव, स्वच्छजलं रत्नप्रभादिरिव झटित्वेवान्यद्व्यापकभूतस्यात्मनः प्रतियोगि व्याप्यतायोग्यं चित्तं यो व्याप्नोत्याविष्टं करोति स प्रसादनामास्वादविशेषत्वाद् गुणः ।

केचित्तु[२] वह्निदृष्टान्तेन झटिति व्यापकं स्वच्छजलदृष्टान्तेन च व्यासङ्गाभावरूपं नैर्मल्यं प्रचक्षते । इहेति योग्यतया प्रकरणावसेयमित्यर्थः ।[३] सर्वत्रेत्याधारनिमित्तयोस्तन्त्रेण निर्देश इत्याह—**सर्वेष्विति** । रसेष्वित्याधारसप्तमी, रचनास्विति निमित्ते । सर्वा एवातिरोहितशब्दार्थरचना शब्दार्थगताः समस्ता असमस्ताश्च निमित्तीकृत्य सर्वेष्वेव रसेषु कृतास्पदोऽयमाविर्भवतीत्यर्थः ।

सम्प्रति वर्णादिषु मधुरादिव्यवहारं समर्थयन्नाह—**गुणवृत्त्येत्यादि** । तेषां तत्पदवाच्यानां केषाञ्चिदतिशयानाम्, वृत्तिः स्थितिः, यद्वा तेषां तत्पदानां वृत्तिः प्रवृत्तिः । उपचारेण तद्व्यञ्जकेषु तन्मेणान्यत्र तत्साजात्येन बीजेन लब्धप्रसरया लक्षणयेत्यर्थः । गुणानामिति शौर्यस्येति च वृत्तिपदे तेषामिति कारिकावद् व्याख्येये ।

---

१. ग्रन्थस्य तस्य दुर्लभत्वात् साहित्यदर्पणलोचनतो मतस्यास्य संक्षेपः प्रस्तूयते—इह चानुक्तमप्यौचित्यादेव हास्ये विकासधर्मकत्वादोजसश्च प्रायः शृङ्गारनिष्ठतया च माधुर्यस्योत्कृष्टत्वम् । भयानके चित्तवृत्तेर्विकाशाभावाद् यद्यपि माधुर्यम्, तथापि विभावौचित्त्यादोजः समावेशः । अद्भुते शृङ्गारिगते द्वयोः साम्यम् । अत्र प्रकृष्टमोजः । यद्यपि बीभत्से प्रकृष्टतममोजस्तथापि माधुर्यमप्रकृष्टतरमिति ।

२. झटितीति शुष्ककाष्ठाग्निदृष्टान्तेनाकलुषोदकदृष्टान्तेन च तदकालुष्यं प्रसन्नत्वं नाम सर्वरसानां गुणः" इति ध्वन्यालोकलोचन आचार्याः ।

३. "समवेता गुणाश्रिते" इति काव्यकौतुकमन्तव्यात् सुस्थितमेतत् ।

बहूनामपि पदानामेकपदवद्भासमानात्मा यः श्लेषः, यश्चारोहावरोहक्रमरूपः समाधिः, या च विकटत्वलक्षणोदारता, यश्चौजोमिश्रितशैथिल्यात्मा प्रसादः,

---

त्रयस्ते न पुनर्दशेत्यत्र हेतूपन्यासपरां कारिकां शिष्यजिज्ञासामनूद्यावतारयति—**कुत इति**। एषु भक्त्या माधुर्यादिपदवाच्येषु शब्दार्थधर्मविशेषेषु । दोषत्यागादिति दोषाणां परिहार्यतयोरीकारात्, तदभावरूपाणां न त्वास्वादोत्कर्षकाणां तेषां ह्युपसंग्रहः सिद्ध इति भावः। अन्ये भजन्ति दोषत्वमिति। न चैवं मुख्यगुणा माधुर्यादय इति तद्विपरीतानां तेषां गुणवैजात्यम् ।

यद्वा दोषाविरहदशायां तेषामन्तर्भावो भविष्यतीति भावः। **दशेति**।

"श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ।।"

इत्युक्ताः।

बहूनामपि पदानामेकपदवद्भासनं यथा—

"उन्मज्जज्जयकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः
सर्वा पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथाऽयं तथा।
प्रायः प्रेङ्खदसंख्यशङ्खधवला वेलेयमुद्गच्छति ।।"

अत्र हि—
"अस्ति भयमस्ति च कौतुकमस्ति मन्दाक्षमस्ति चोत्कण्ठा।
अबलानां प्रणयिजने भावः कोऽप्येष नैकरसः ।।" इत्यादिवत्।
पदानामुच्चारणकाले भेदः सुव्यक्तं नावभासते।
अयञ्च बन्धवैकटयात्मकत्वादोज एव।

एवमन्यत्राप्यन्तर्भावरीतिः। प्रत्युदाहरणगतिश्च विस्तरभीत्याऽस्मदनुक्ता उन्नेया। आरोह उत्कर्षः, अवरोहोऽपकर्षः, तयोः क्रमो वैरस्यानावहो विन्यासः प्रागप्राप्तेत्यादौ। अत्र हि पादत्रयक्रमेण बन्धस्य गाढता, तूर्यपादे त्वपकर्षः। अत एव चतुर्थपादस्यापि तीव्रप्रायप्रयत्नेनौजस्विनी[1] रचना। विकटत्वं प्रत्येकं पदच्छेदात् पदानां नृत्यप्रायत्वम्। यथा—

"स्वचरणविनिविष्टैर्नूपुरैर्नर्तकीनां झगिति रणितमासीत्तत्र चित्रं कलं च" इति।

अत्र च तन्मतानुसारेण रसानुसन्धानमन्तरेणैव शब्दप्रौढिमात्रादोजः। ओजो

---

१. तीव्रप्रत्नोच्चार्यतया नोजस्विनीत्यहृद्यः क० पाठः।

तेषामोजस्यन्तर्भावः। पृथक्पदत्वरूपं माधुर्यं भङ्ग्या साक्षादुपात्तम्। प्रसादेनार्थव्यक्तिर्गृहीता। मार्गाभेदरूपा समता क्वचिद्दोषः।

तथा हि 'मातङ्गाः किमु वल्गितैः' इत्यादौ सिंहाभिधाने मसृणमार्गत्यागो गुणः। कष्टत्वग्राम्यत्वयोर्दुष्टताभिधानात्तन्निराकरणेनापारुष्यरूपं सौकुमार्यमौज्ज्वल्यरूपा कान्तिश्च स्वीकृता। एवं न दश शब्दगुणाः।

पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा।
प्रौढिर्व्याससमासौ च स्वाभिप्रायत्वमस्य च॥

इति या प्रौढिरोज इत्युक्तं तद्वैचित्र्यमात्रं न गुणः, तदभावेऽपि काव्यव्यवहारप्रवृत्तेः। अपुष्टार्थत्वाधिकपदत्वानवीकृतत्वामङ्गलरूपाश्लीलग्राम्याणां निराकरणेन

मिश्रशैथिल्यं "यो यः शस्त्रम्" इत्यादौ। **भङ्ग्या साक्षादुपात्तमिति**। वक्ष्यमाणमाधुर्यव्यञ्जककारिकायाम् अवृत्तिपदोपादानेन सूत्रकृता कण्ठोक्तप्रायमित्यर्थः। अर्थव्यक्तिर्झटित्यर्थसमर्पकत्वं पदानाम्। मसृणेन विकटेन वा मार्गेणोपक्रान्तस्य तेनैव परिनिष्ठानं मार्गाभेदो गुण इति। तथाविधे वर्णनीये विकटबन्धस्यैवोचितत्वात्। अनेवंविधस्थले यथायथं माधुर्यादावन्तःपातः। कष्टत्वं श्रुतिकटुता। तन्निराकरणेति। दुष्टताऽभिधानं निराकार्यतापरमेवेति भावः। **औज्ज्वल्यरूपेति**। हालिकादिप्रसिद्धपदविन्यासजन्यग्राम्यताबुद्धिवैपरीत्येनालौकिकशोभाशालिरूपे[2]त्यर्थः। स्वीकृतेति। तयोस्तदतिरिक्तशरीरत्वात्। एतावता दण्ड्याद्युक्त[3]शब्दगुणदशकस्यापृथग्वाच्यता सिद्धेत्याह—**एवमिति**। शब्दगुणा इत्यनन्तरं पृथग्वाच्या इति शेषः।

सम्प्रति वाद्यन्तरोक्तानामर्थगुणानामप्येषैव गतिरित्याह—**पदार्थ इति**। एकपदलभ्येऽर्थः इत्यर्थः। वाक्यरचनमनेकैः पदैर्वचनम्, यथा चन्द्र इति वाच्येऽत्रेर्नयनसमुत्थं ज्योतिरिति। वाक्यार्थेऽनेकपदप्रतिपाद्यार्थे पदाभिधैकेन पदेनाभिधानम्, यथा निदाघशीतलशीतकालोष्णसुकुमारशरीरायां वारयोषिति वरवर्णिनीति। व्यास एकस्यैव वाक्यार्थस्य किञ्चिद्विशेषसन्निवेशादनेकवाक्यैरभिधानम्, यथा—

असौ नानाकारो भवति सुखदुःखव्यतिकरः,
सुखं वा दुखं वा न भवति भवत्येव च ततः।
पुनस्तस्मादूर्ध्वं भवति सुखदुःखं किमपि तत्,
पुनर्यस्मादूर्ध्वं भवति न च दुःखं न च सुखम्॥

---

१. एष हि सार्वत्रिकः पाठः। अश्लीलग्राम्यत्वानामिति तु मनोज्ञा रचना।
२. शालित्वमित्यर्थः—ख।
३. एतदपि वामनादिमतमुद्दिश्य, दण्डिग्रन्थे शब्दार्थतया भेदस्यादर्शनात्।

च साभिप्रायत्वरूपमोजः, अर्थवैमल्यात्मा प्रसादः, उक्तिवैचित्र्यरूपं माधुर्यम्, अपारुष्यरूपं सौकुमार्यम्, अग्राम्यत्वरूपोदारता च स्वीकृतानि। अभिधास्यमान-स्वभावोक्त्यलङ्कारेण रसध्वनिगुणीभूतव्यङ्ग्याभ्यां च वस्तुस्वभावस्फुटत्वरूपाऽर्थ व्यक्तिर्दीप्तरसत्वरूपा कातिश्च स्वीकृता। क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूप-

---

अत्र येन संसारिणा यादृशं कर्म कृतं तदनुसारेणैव तथाविधो मिश्रितसुख-दुःखादिभोगः क्रियते। यदि कुतश्चिदात्मसाक्षात्कारः स्यात्तदैवास्य प्रवाहस्य शान्ति-रित्येव हि विवक्षितं। यथा—

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधारय।[१]
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥

अत्र परद्रव्यं न हरेत्, परजायां न गृह्णीयात्, परापवादो न वाच्य इत्यादि वाक्यगताभिधेयस्य द्वितीयार्थनाभिधानम्। प्रौढिरर्थस्य प्रतिपादनचातुर्यम्, वैचित्र्यमात्रं निर्दोषतामात्रम्, न तु रसोपकारकत्वम्। तदभावेऽपीत्यादेः काव्य-व्यवहारप्रवृत्तिनिमित्तानुपकारकत्वादिति भावः। यथाश्रुतयोजने तु माधुर्यादावति-प्रसङ्गः। नहि तदभात्रेऽपि काव्यव्यवहारप्रवृत्तिः, "यो यः शस्त्रम्" इत्यादावपि प्रसङ्गात्। साभिप्रायत्वमनाकाङ्क्षितानभिधानम्। वैमल्यं दूषकतामलप्रायस्या-प्रयोजकपदार्थस्याभिनिवेशः[२]।

उक्तिवैचित्र्यं विचित्रयोक्त्या तस्यैवार्थस्य भूयः समर्पणम्, यथा—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

अत्र शोभनतारूप एक एवार्थो रम्यं लक्ष्मीं तनोतीत्यादिशब्दवैचित्र्येणो-पनीतः।

पारुष्यमकाण्डे भयशोकादिदायिता तद्विलक्षणमपारुष्यम्, यथा—"मरणादौ यशःशेष" इत्यादि। अग्राम्योऽर्थो वैदग्धीवाच्यः। स्वीकृतानि तेषां तन्मात्ररूप-त्वात्। रसादस्य ध्वनिगुणीभूतव्यङ्ग्यपदाभ्यां प्रत्येकं सम्बन्धः। वस्तुस्वभावस्य कविवर्णनाहितातिशयस्य तात्त्विकस्य स्फुटत्वमप्रतीयमानत्वम्, यथा—"प्रथम-रुणच्छाय '(२५९)इत्यादौ। क्रमः क्रियासन्ततिः, कौटिल्यं विदग्धचेष्टितम्, अप्रसिद्ध-वर्णनाविरहोऽनुल्बणत्वम्। उपपादकयुक्तिविन्यास उपपत्तिः, तासां योगः संवलितता स एव रूपं यस्या घटनायाः, सैवात्मा यस्य श्लिष्यमाणतारूपस्य।

---

१. "श्रुत्वा चैवाऽवधार्यताम्" इत्यपरैः पठ्यते।

२. एवमुभयोमार्तृकालिप्योः पाठो दूषकतारूपस्य मलप्रायस्येत्यभिधानपरः।

घटनात्मा श्लेषोऽपि विचित्रत्वमात्रम् । अवैषम्यस्वरूपा समता दोषाभावमात्रं न पुनर्गुणः ।

कः खल्वनुन्मत्तोऽन्यस्य प्रस्तावेऽन्यदभिदध्यात् । अर्थस्यायोनेरन्यच्छाया-योनेर्वा यदि न भवति दर्शनं तत् कथं काव्यमित्यर्थदृष्टिरूपः समाधिरपि न गुणः ।

तेन नार्थगुणा वाच्याः

वाच्या वक्तव्याः ।

"दृष्ट्वैकासनसङ्गते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकन्धरः सपुलकः स्वेदोल्लसन्मानसा ।
मन्तर्हासवलत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥"

अत्र दर्शनादिक्रमस्योभयसमर्थनरूपकौटिल्यस्य लोकसंव्यवहाररूपस्यानुलब-णस्यैकासनसंस्थिते पश्चादुपेत्य नयने निमील्येषद्वक्रितकन्धर इति चोपपादकानां समवायः । वाच्योपपत्तिग्रहव्यग्रिम्णा चात्र रसास्वादो व्यवहित इत्यननुगुणता । अवैषम्यमुपक्रान्तप्रकृतिप्रत्ययाद्यविपर्यासेनार्थस्य विसंवादिताविरहः । दोषाभावमात्रं प्रक्रमभङ्गविरहानतिरिक्तशरीरत्वाद् ।

तद्वैपरीत्यस्य दोषरूपतां दर्शयति—कः खल्वित्यादि । अन्यस्य प्रस्तावेऽन्यस्य प्रकृत्यादेरुपक्रमे । अन्यत् प्रकृत्यादिकम् ।

अयोनेरर्थस्य[१] दर्शनं यथा—

"उहव पन्तरोल्लिख अचल हअपाअपडिलज्ज ।
दुन्दक्खमो गुल्मे कक्वउलकुसुमसमकुडंअं ॥"

अन्यच्छायायोनेर्यथा ।

'निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रतारिता काऽपि ।
नीलोत्पलेऽपि विमृशति करमर्पयितुं कुसुमलावी ॥

अत्राद्ये बकुलमकर्टयोः सादृश्यमनिबद्धपूर्वम्, द्वितीये नीलोत्पलनयनयोः सादृश्यं सहस्रशो निबद्धमपि विच्छित्तिविशेषेण निबद्धम् । **न गुण इति** । असाधा-रणशोभाऽतिशयाधायकत्वं हि गुणत्वं ब्रूमः, न तु काव्यशरीरमात्रनिर्वर्तकत्वमिति भावः ।

---

१. पुराणकविक्षुण्णे वत्मनि दुरापमस्पृष्टं वस्त्विवति कविः परप्रबन्धेष्ववहितो दृश्यते । परन्तू-क्तिवैचित्र्यतः काव्यस्य नवत्वमायातीति विचित्रोक्तिगर्भा रचनाऽयोनिरुच्यते । अतद्विधा त्वन्ययोनिरेव । एवं वामनादिमते । काव्यमीमांसाकाराः पुनर्निह्नुतयोनिरिति तृतीय-मपि भेदं कल्पयन्ति ।

प्रोक्ताः शब्दगुणाश्च ये ।

वर्णाः समासो रचना तेषां व्यञ्जकतामिताः ॥७३॥

के कस्येत्याह—

मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू ।

अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना मता ॥७४॥

ट-ठ-ड-ढवर्जिताः कादयो मान्ताः शिरसि निजवर्गान्त्ययुक्तास्तथा रेफलकारौ ह्रस्वान्तरिताविति वर्णाः, समासाभावो मध्यमः समासो वेति समासः, तथा माधुर्यवती पदान्तरयोगेण रचना माधुर्यस्य व्यञ्जिका ।

उदाहरणम्—

अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः ।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि ॥३४६॥

तदेतत् सर्वं बुद्धिस्थीकृत्य सूत्रकृदाह—तेनेति । अर्थगुणाः पराङ्गीकृता न वाच्याः शब्दगुणेभ्यो भिन्नाः । शब्देति । माधुर्यौजः प्रसादाख्याः व्यञ्जकता व्यञ्जकवर्गः । वर्गान्तं गच्छन्ति प्राप्नुवन्तीति वर्गान्त्यगाः । मतेति पदमुभयसम्बद्धम् । मता सन्मता सुकुमारेति यावत् सा । घटना माधुर्यव्यञ्जिका मता चिरन्तनाचार्यमतेनेत्यर्थः । णकारस्य पृथग्वचनाद् अटवर्गा इत्यत्र टवर्गचतुर्वर्णा एवार्थादित्याह—टठडढेति । एषां चैकद्वानां सुकुमारतरवर्णबन्धप्रविष्टानामदूषकता लक्ष्यतो बोध्या । स्पर्शा इत्यस्य विवृतिः कादय इति । एषाञ्च स्ववर्गोन्त्यमूर्धन्यानामेव मधुरता । न च यरलवादीनां तथाभावोऽस्तीत्याह—मान्ताइति । कादीनामनुनासिकाः स्ववर्गा एव मूर्धानमारोहन्तीत्याह—निजेति व्यञ्जनेषु लघ्वादिव्यवहारः स्वरोपधानादेवेत्याह ह्रस्वान्तरिताविति । मध्यमो द्वित्रिचतुरपदावयवो दीर्घसमासस्य प्रतीतिमान्थर्यावहत्वेन माधुर्याननुगुणत्वात् । माधुर्यवती सौकुमार्यवती ।

ननु निष्टवर्गान्याक्रान्तकादिरूपसुकुमारवर्णाभिधानेनैव गतार्थत्वात् कथं पृथगुक्तिः सुकुमारघटनाया इत्याह—पदान्तरयोगेनेति । व्यञ्जनसौकुमार्येऽपि क्वचित् सन्ध्यादिदौःश्रव्यं स्यात्तद्वर्जनार्थमित्यर्थः ।

अनङ्गेति । तत्र 'ङ्ग' रूपाः स्ववर्गाक्रान्तमूर्धानः स्पर्शाः 'आनताङ्ग्याः' इत्यत्र द्विपदावयवोऽनङ्गरङ्गप्रतिममिति शान्तापरचिन्तनानीत्यनयोस्तु त्रिपदावयवः समार्धः । आद्यास पदान्तरयोगे सुकुमारा रचना । एषां चात्र मधुरास्वादप्रकर्षत्वं

योग आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययोः ।
टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धृत ओजसः ॥७५॥

पवर्गप्रथमतृतीयाभ्यामन्त्ययोः द्वितीयचतुर्थयोः रेफेणाध उपर्युभयत्र वा यस्य कस्यचित्, तुल्ययोस्तेन तस्यैव सम्बन्धः । टवर्गोऽर्थात् णकारवर्जः शकारषकारौ दीर्घसमासो विकटा सङ्घटनौजसः । उदाहरणम्—मूर्ध्नामुद्वृत्तकृत्तेत्यादि ।३४८।

श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत् ।
साधारणः समग्राणां स प्रसादो गुणो मतः ॥७६॥

समग्राणां रसानां सङ्घटनानां च ।

उदाहरणम्—

परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः सन्तापं वदति विसिनीपत्रशयनम् ॥३४९॥

भावकानामपरोक्षमेव । अन्त्ययोः परयोष्टादिर्बहुसंप्रयुक्तः[१] । एवं शषावपि । उद्धतो विकटः । आद्यतृतीयौ प्रस्तावतो वर्गसम्बन्धिनावेव ग्राह्यावित्याह वृत्तिकृत्—**वर्गप्रथमतृतीयाभ्यामिति** । अन्त्ययोरिति प्रत्यासत्त्या तयोरेवेत्याह—**तदितरेणेति** सामान्येन निर्देशन्नियममाह— अध इति । तेन तस्यैवेति सजातीयस्य सजातीयेनैव । **अर्थादिति** । लध्वन्तरितस्य माधुर्याश्रयत्वादिरस्यापरुषप्रायत्वादित्यर्थः[२] । गुम्फः पदार्थसंघटनेति, ओजसो[३] व्यञ्जक इति सम्बन्धः ।

मूर्ध्नामित्यादौ यथायथं व्यञ्जकवर्ग उन्नेयः । केनातिशयेन स प्रसादो गुण इति व्यङ्ग्यव्यञ्जकताभेदमनादृत्य । समग्राणां रसानां साधारणः सर्वरसवृत्तिः । रसादीनामिति पाठे त्वादिना भावतदाभासादीनामास्वादानामवबोधः । समग्राणां समासानामल्पमध्यदीर्घाणां सङ्घटनानां शब्दार्थगतानां मसृणमध्यमपरुषाणां साधारणो व्यङ्ग्यः । झटित्यर्थसमर्पणनेत्यनुकूलवर्णादिनिवेशनमपि [४]नातिवैरस्य-

---

१. बहुलं संप्रयुक्तम्–ख० ।

२. सर्वे वर्णा दीर्घास्त्वरितपाठ्यत्वादिति दीर्घसमासेऽसमस्तानामल्पसमस्तानां वा दीर्घत्वपाठो नाट्ये वाचिकाभिनये स्वीकृतः ।

३. ओजसीति मूले वृत्तौ चोभयत्र प्रायिकः पाठः ।

४. झटित्यर्थसमर्पणेनेति कारिकास्थस्य त्वितिपदस्य विश्लेषणपरम् । तदुक्तमित्यनेन भामहमतोद्धरणेन समर्थितं च तत् ।

यद्यपि गुणपरतन्त्राः सङ्घटनादयस्तथापि—

वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् क्वचित् ।
रचनावृत्तिवर्णानामन्यथात्वमपीष्यते ॥७७॥

क्वचिद्वाच्यप्रबन्धानपेक्षया वक्त्रौचित्यादेव रचनादयः । यथा—

मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटाऽन्योन्यसङ्घट्टचण्डः ।

मावहति, "यो यः शस्त्रम्" इत्यादावविकटबन्धे ओजोहान्यदर्शनात् । तदुक्तम्—

"आविद्धदङ्गनाभालप्रसिद्धार्थं प्रसादवत् ।
स स सर्वरसव्यापी काव्यजीवातुरिष्यते ॥"

अत्र प्रसिद्धः काव्यगतो रस इति सम्प्रदायविदः । तनोरिति मध्यर्यविशेषणम् अत्र ग्राम्योपनागरपदावयवसंदर्भे मसृणविप्रलम्भात्मकप्रसादाभिव्यक्तिः । इह गुणाः सङ्घटनात्मका इत्येके । सङ्घटनाश्रया गुणा इत्येके । [१]तत्रोभयत्र सङ्घटनावद् गुणानां रसानियमः स्यादित्यभिप्रेत्य गुणप्रकर्षैकतया[२] तत्परतन्त्रा एव घटनादयः ।

तत्रापि च वक्त्रा औचित्याद् गुणद्यननुसन्धानेऽपि क्वचन न प्रवर्तत इत्येतदर्थप्रतिपत्तिपरां कारिकामवतारयति—**यद्यपीति**। गुणपरतन्त्रा गुणोपकारका न तु गुणप्रतिबद्धाः[३] । वक्ता कविस्तन्निबद्धो वा प्रत्येकश्च रसाविद्धस्तदितरो वा । रसोऽपि कथानायकाश्रयस्तत्प्रतिपक्षाद्याश्रयो वा । कथानायकश्च धीरोदात्तादिरूपः । वाच्यं वर्णनीयम् । तत्तद्रसाश्रयं तत्तदाभासाश्रयं चोत्तममध्यमाधमप्रकृतिकम् । प्रबन्धश्चाभिनेयोऽनभिनेयो यथास्वं [४]बहुप्रपञ्चः । एषामौचित्येनानुरूप्येण रचनाः कोमलोद्धतमध्याः, वृत्तयः स्वल्पमध्यमदीर्घाः, वर्णा मसृणमध्यमपरुषाः । अन्यथात्वं वक्त्रादीनां मध्ये कस्यचिदपेक्षया कस्यचिच्चानपेक्षया प्रवृत्तत्वम् ।

मन्थो मथनं क्षुब्धम्, धीरो गम्भीरः, कोणो वादनदण्डः, कृष्णा द्रौपदी, प्रतिरसितसखः प्रतिशब्दसदृशः, भीमसेनः धीरोद्धतप्रकृतिः ।

---

१. अत्र श्रीधरकृतकाव्यप्रकाशविवेको लोचनादिग्रन्थानुसारिसङ्कलनकल्पने चण्डीदासेनानुसृतः पुनः कुत्र कुत्रापि पाठः स्खलित एवोभयत्र तथैव प्रतिभाति ।

२. 'रसानियमः स्यात् । यद्यप्यभिप्रेत्य' इति पृथग् वाच्यगर्भः शिथिलप्रायः क० पाठः ।

३. प्रतिबन्धशब्दस्य पारिभाषिकं हेतुत्वाभिधानं नात्र गृह्यते ।

४. एवमादिषु ध्वन्यालोकादिसम्मतं वस्तुनेतृरसादिघटकं विषयविवेचनं काव्यविभेदप्रदर्शनपरमत्र मूलग्रन्थस्य परिपूरकतया मम्मटग्रन्थोपजीविना हेमचन्द्रेण प्राचीनकाव्यप्रकाशटीकाकृद्भिः श्रीधरादिभिश्च कृतम् । वस्तुतस्तु श्रीधरसंग्रह एव चण्डीदासेनानूदितः ।

कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽसौ ॥३५०॥

अत्र हि न वाच्यं क्रोधादिव्यञ्जकम् अभिनेयार्थश्च काव्यमिति तत्प्रतिकूला उद्धता रचनादयः । वक्ता चात्र भीमसेनः ।

क्वचिद् वक्तृप्रबन्धानपेक्षया वाच्यौचित्यादेव रचनादयः । यथा—

प्रौढच्छेदानुरूपोच्छलनरयभवत्सैंहिकेयोपघात-
त्रासाकृष्टाश्वतिर्यग्वलितरविरथेनारुणेनेक्ष्यमाणम् ।
कुर्वत्काकुत्स्थवीर्यस्तुतिमिव मरुतां कन्धरारन्ध्रभाजां
भाङ्कारैर्भीममेतन्निपतति वियतः कुम्भकर्णोत्तमाङ्गम् ॥३५१॥

क्वचिद् वक्तृवाच्यानपेक्षाः प्रबन्धोचिता एव ते । तथा हि—आख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः, कथायां रौद्रेऽपि नात्यन्तमुद्धता, नाटकादौ रौद्रेऽपि न दीर्घसमासादयः ।

एवमन्यदप्यौचित्यमनुसर्तव्यम् ॥

इति काव्यप्रकाशे गुणालङ्कारभेदनियतगुणनिर्णयो नाम अष्टमोल्लासः ॥

प्रौढेति । अत्र विकटे वस्तुनि वर्ण्यमाने कृत्यारावणाख्ये नाटके[1] वैतालिकेऽपि वक्तरि दीप्ततरा रचनादयः । आख्यायिकायामुच्छ्वासादिना वक्त्रापरवक्त्रादिना च युक्ततया गद्यप्राणभूता विकटबन्धप्रकर्षाश्रयाणां न मसृणेति नात्यन्तमसृणाः । कथायामुच्छ्वासादित्रिरहितायां वर्णनीयमहापुरुषादिप्रतिपत्तिसमर्पणानुरूपमसृणवर्णबद्धायाम्, नाटकादावभिनयविच्छित्तिसौकर्यानुगुणपृथक्प्रायसन्दर्भे । न दीर्घेत्यतः पूर्वमत्यन्तेति शेषः आदिना बन्धवैकट्यादिपरिग्रहः ।

एवमन्यदपीति । मुक्तकादावनौचित्यम् । तथा ह्येकस्मिन् छन्दसि वाक्यसमाप्तौ मुक्तकम्, द्वयोः सन्दानितकम्, त्रिषु विशेषकम्, चतुर्षु कलापकम्, पञ्चप्रभृति चतुर्दशान्ते कुलकम् । तत्र मुक्तके[2] रसबन्धाभिनिवेशिनः कवे रसाश्रयमौचित्यम्, यथा—शून्यं वासगृहमित्यादौ ।

---

१. एवमपि श्रीधरः । प्रदीपादयश्छलितरामनाम नाटकमेतदिति मन्यन्ते । अपरे तु यशोवर्मदेवकृतरामाभ्युदयस्थमिदं वदन्ति । तदानीन्तनपाठकैरनुपयुक्तत्वात् टीकाकृतां वितर्कमूलक एवाकरनिर्देशः स्यात् ।

२. अप्रबन्धे—क० । प्रबन्धादितरत्रेति तस्यार्थः । मुक्तकं संस्कृतप्राकृतापभ्रंशनिबद्धमिति, मुक्तमन्येन नालिङ्गितम्, तेन स्वतन्त्रतया परिसमाप्तनिराकाङ्क्षार्थमपि प्रबन्धमध्यवर्ति मुक्तकमित्युच्यत इति यथाक्रमं ध्वन्यालोकस्तल्लोचनग्रन्थश्च ।

नीरसे च कामचारः। सन्दानितकादिषु तु वाक्यसमाप्तौ वैकटचमिति तदौचित्यान्मध्यमदीर्घसमासे एव संघटने। एतेष्वेव च प्रबन्धगतेषु तत्रत्यमेवौचित्यं नात्मीयम्। अवान्तरवाक्यसमाप्तावपि सन्ध्याद्यनेकवर्णनीयोद्देशेन प्रवृत्तं महाकाव्यम्[1]। पर्यस्तानां मुक्तकानामेकप्रबन्धेनाबन्ध इति कृत्वा पर्याबन्धः। अत्र च संस्कृतप्राकृतदेशीभाषाबन्धे शृङ्गारबाहुल्यादसमासप्राया रचना।

क्वचित्तु वीरादिरसौचित्यादितरे। अत्र च दीर्घसमासेऽपि परुषग्राम्ये वृत्ती। प्राय इति तत्पदेन? पुरुषार्थं उद्दिश्यते[2]। एवं धर्मादिपुरुषार्थमुद्दिश्यमानेतिवृत्तवर्णनादौ परिकथायां सङ्घटनादौ कामचार[3]। कथामात्रतात्पर्येणेत्यनन्तरं रसानभिनिवेशादिति शेषः। समस्तफलान्तेतिवृत्तवर्णनं सकलकथा। एकदेशवर्णनं खण्डकथा। एतयोः कुलकादिबन्धबाहुल्याद् दीर्घसमासाऽपि रचना न विरुध्यते। परुषोपनागरग्राम्याणां च वृत्तीनां निजनिजरसानुकूल्यादौचित्यम्। कथामात्रतात्पर्येतिवृत्तेष्वपि कामचारप्रायैव घटना।

यदाह वाक्याभिनयलक्षणे मुनिः[4]—"वर्णैः पदैः प्रसन्नैः" इत्यादि। तत्रापि वीररौद्रादिवर्णने नायं नियमः। गद्यपद्यमयी चम्पूः। तत्र च रसानभिनिवेशे यथायोगं वर्णादयः। सर्वत्र च विषयाश्रयमौचित्यं रसबन्धौचित्यसहकृतमनुसर्तव्यम्। तदुक्तम्—"सर्वत्रैव रसौचित्यं विषयानुप्रकर्षवत्" इति॥

इति काव्यप्रकाशदीपिकायां गुणविभागो नामाष्टम उल्लासः॥

---

१. वसन्ताद्यनेकवर्णनीयोद्देशेनेति खपुस्तके मुद्रितलोचनग्रन्थानुसारी पाठः। वर्णना तु सर्गबन्धे महाकाव्ये जीवातुभूतेति सम्प्रदायविदः।

"तथा हि दर्शने स्वच्छे नित्येत्यादिकवेर्मुनेः।
नोदिता कविता लोके यावज्जाता न वर्णना"॥

इति भट्टतोतः। आदिकवेश्च शैलीमनुसरन्तो महाकाव्यकारा इति सर्वजनसंवेद्यम्।

२. उद्दिश्यते। नानेतिवृत्तिवर्णनात्—क०।

३. प्रकारवैचित्र्येणानन्त्यनिर्वृत्तवर्णना परिकथा। अस्यां कामचारः कथामात्रतात्पर्येणात्यन्तरसानभिनिवेशादिति लोचनकारमनुसृत्य श्रीधरः।

४. "नानारसार्थयुक्तैर्वृत्तनिबन्धैः कृतः संचूर्णपदैः" इति नाटचशास्त्रम्। नाटकादावप्यसमासैव घटनेति मुनिमतनिष्णाता आनन्दवर्धनाचार्याः।

अथ नवम उल्लासः

गुणविवेचने कृतेऽलङ्कारा: प्राप्तावसरा इति सम्प्रति शब्दालङ्कारान्।

यदुक्तमन्यथा वाक्यमन्यथाऽन्येन योज्यते ।
श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा ॥७८॥

तथेति श्लेषवक्रोक्ति: काकुवक्रोक्तिश्च । तत्र पदभङ्गश्लेषेण यथा—

नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो
वामानां प्रियमादधाति हितकृन्नैवाबलानां भवान् ।
युक्तं किं हितकर्तनं ननु बलाभावप्रसिद्धात्मनः
सामर्थ्यं भवत: पुरन्दरमतच्छेदं विधातुं कुत: ॥३५२॥

अभङ्गश्लेषेण यथा—

अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता ।
त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित् ॥३५३॥

उल्लाससङ्गतिमाह वृत्तिकृत्—गुणेति । विवेचने विशेषलक्षणे । **अलङ्कारा** इति । गुणसामान्यलक्षणानुषङ्गेण कृतसामान्यलक्षणाः कृतप्रायशब्दार्थालङ्काररूपसामान्यविशेषलक्षणाश्च । करणीयविशेषलक्षणान्तराय **प्राप्तावसरा** इति । परिशिष्टतया शब्दालङ्कारानिति ।

अन्तरङ्गाश्रिततयाऽलङ्कारेभ्यो विशेषं विवक्षन् सर्वालङ्काराधिष्ठानतया प्रथमं वक्रोक्तिमाह–यदिति । अथ च कारिकाप्रथमार्धेन सामान्यलक्षणश्लेषेण काक्वा वेति विशेषलक्षणं सूच्यते । एवमन्यत्राप्येवंविधे बोध्यम् । अन्यथान्याभिप्रायेणान्यथा योज्यते प्रकारान्तरेण सङ्गंस्यते ।

नारीणां स्त्रीणामिति केनचिदुक्ते नारीणां शत्रूणामिति कल्पनयाऽन्यदुत्तरमाह—**कश्चेतन** इति । वामानां प्रतिकूलानामिति विवक्षायामभङ्गेन वनितानामिति कल्पितम् । कृदिति । डुकृञ् करणे, कृती च्छेदन इत्यनयोः क्विपि तुल्यं रूपम् । अबलानां स्त्रीणां दुर्बलानाञ्च । बलं सामर्थ्यं तदभावेन प्रसिद्धात्मा दुर्बल:; बलनामदैत्यनाशेन विख्यातात्मा महेन्द्रश्च ।

दारुणा क्रूरेति विवक्षिते काष्ठेनेति काल्पयित्वाह–**त्रिगुणेति** । त्रिगुणोऽत्राशुग्राहित्वरूपप्रज्ञात्वापूर्वोल्लेखशालित्वरूपप्रतिभात्वस्थिरसंस्कारस्वरूपमेधात्वात्मको–

काक्वा यथा—

गुरुजनपरतन्त्रतया दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिलललिते नैष्यति सखि सुरभिसमयेऽसौ ।।३५४।।

वर्णसाम्यमनुप्रासः

स्वरवैसादृश्येऽपि व्यञ्जनसदृशत्वं वर्णसाम्यम् । रसाद्यनुगतः प्रकृष्टो न्यासोऽनुप्रासः ।

ऽतिशयः। त्रिगुणा सात्त्विकी राजसी तामसीत्येके। नैष्यति। निषेधपरं नायिकोक्तौ। सखीप्रतिवचने पुनः 'काक्वा' एष्यतीत्येतत् परम्। अस्याश्च शब्दान्वयव्यतिरेकानुविधायितया शब्दालङ्कारता।[1]

सम्प्रत्यावृत्तिनिबन्धेष्वलङ्कारेषु लक्षणीयेषु साङ्गतयाऽन्तरङ्गत्वेन प्रथममनुप्रासमाह—**वर्णसाम्यति**। पूर्वपूर्ववर्णानुभवजनितसंस्कारयोग्यसमानवर्णनिबन्ध इत्यर्थः। तदुक्तम्—पूर्वानुभवसंस्कारबोधिनी यद्यदूरता"[2] इति। एकस्य द्वयोस्त्रिचतुरादीनाञ्ज साम्यादनुप्रासो भवति। समानवर्णविन्यासः साम्यं सारूप्यम्, कण्ठताल्वाद्येकस्थानीयमपि यकारजकारादीनां साम्यं श्रुत्यनुप्रासाख्यमित्यन्ये। साम्यमेव वर्णानामतिशयलेशाधानबोधास्वादोत्कर्षकमित्यलङ्कृतिपदास्पदतामापद्यते। यमकेऽतिव्याप्तिं निरस्यति—स्वरेति। अपिना स्वरसादृश्यस्य क्वचित् सम्भविनोऽपि प्रयोजकता[3] निरस्यते। न चैवं यमके, तस्य स्वरव्यञ्जनसमुदायशरीरत्वात्। अनुप्रास इति लक्ष्यपदस्य प्रत्येकमवयवाप्रवृत्त्या निर्वक्ति—**रसाद्यनुगत इति**। अन्विति भागनिरुक्तिः, रसाद्यनुगतः रसाविष्टस्य कवेः पृथक्प्रयत्नमन्तरेणैव

---

१. सर्वालङ्काराधिष्ठानतयेत्यन्वर्थो हेतुनिर्देशः। यत्तु "वक्रोक्तिः काव्यजीवितम्" इति कैश्चिदभिहितत्वेन वक्रोक्तेश्चारुत्वातिशयात् स्फुटं शब्दालङ्कारत्वाच्च प्रथमं लक्षणमित्यधुनातनानां विवरणम्, तद्दुःसमर्थसमर्थनमेव। भामहेन निर्दिशितायाः कुन्तकेनोज्जीवितायास्तेनैव सर्वालङ्कारजीवातुत्वेन समर्थितायाः वक्रोक्तेरत्र प्रकरणे मम्मटेन ग्रहणं न कृतमित्यवधातव्यम्। परन्तु—"वक्रोक्तिरनुप्रासो यमकं श्लेषस्तथा परं चित्रम्। शब्दस्यालङ्काराः श्लेषः" इति रुद्रटमतानुसारिणा ग्रन्थकृता रत्नाकरादिकविसार्थैर्विच्छित्तिमत्वेनोद्भाविताया विशिष्टायाः कस्याश्चिदङ्कृतेः परामर्शः।

२. "वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च। पूर्वानुभवसंस्कारबोधिनी यद्यदूरता" इत्याचार्यदण्डी। प्राचीनैः कैश्चिदेतल्लक्षणेऽभ्यासावृत्त्यादिपदानि प्रयुक्तानि। मम्मटेन तु भामहोद्भटादिमतमनुसरता भङ्ग्यन्तरेण साम्यपदं लक्षणे निवेशितम्। दण्डितमतानुमतं स्वजातीयनैरन्तर्यं केवलं न घटकम्, परं तदनुकूलं व्यपेतमपीप्याकूतम्।

३. अतथात्वे खतरशरेत्युदाहरणेऽनुप्रासप्रसङ्गः। वर्णपदेन छन्दःशास्त्रे स्वरस्यैव प्रयोजकता

छेकवृत्तिगतो द्विधा ।

छेका विदग्धाः । वृत्तिर्नियतवर्णगतो रसविषयो व्यापारः । गत इति छेकानुप्रासो वृत्त्यनुप्रासश्च । किं तयोः स्वरूपमित्याह —

सोऽनेकस्य सकृत्पूर्वः

अनेकस्यार्थाद् व्यञ्जनस्य सकृदेकवारं सादृश्यं छेकानुप्रासः । उदाहरणम्—

ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी ।
दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम् ॥३५५॥

सुसन्निवेशः सहृदयहृदयतन्मयीभावप्रकर्षेणास्वादाङ्कुरोत्कर्षकत्वञ्च प्रशब्दनिरुक्तिः । **प्रकृष्ट इति** । प्रकर्षश्च पूर्वापरवर्णैकजातीयतया भावकहृदयावर्जकत्वम् 'आस' इत्यस्य न्यास इति वर्णवचनान्तरापेक्षया विशिष्टो विन्यास इत्यर्थः ।

सामान्यतो लक्षितमनुप्रासं विभजते—**छेकेति** । **नियतेति** । मधुरादिरसानुगुण्यनियतमसृणवर्णादिवर्णगतो व्यापारो बोधनाख्यः । वर्तन्ते प्रवर्तन्ते रसोत्कर्षेण वर्णा अनयेति व्युत्पत्त्या वृत्तिः, तदुपोद्बलकतया तदाश्रयानुप्रासो वृत्त्यनुप्रासः । एवं छेकैः प्रचुरप्रयोज्यतया तदाश्रितच्छेकानुप्रासः । गत इति कारिकापदं स्वाश्रयेणोपलक्षितनामकत्वप्रतिपत्तिपरमित्याह--छेकानुप्रासो वृत्त्यनुप्रासश्चेति ।

एवं विभागसूत्रं व्याख्याय लक्षणसूत्रावतरणिकामाह वृत्तिकृत्—किं तयोरिति स्वरूपं लक्षणम् ।

अर्थादिति । व्यञ्जनसाम्यस्यानुप्रासतया ध्रौव्यात्[1] । **अनेकस्येति** । अनेनाकाङ्क्षितमंशं वर्णसाम्यमित्यनुकृष्य पूरणीयमित्यभिप्रेत्याह--**सादृश्यमिति** । एवमुत्तरसूत्रेऽपि योज्यम् ।

तत इति । अत्र 'न्द न्दो ण्ड ण्डु' इत्यनेकव्यञ्जनस्यैकवारसादृश्यनिबन्धः ।

द्विरिति । ध्रुवीकृतस्यैकस्यानेकस्य वा व्यञ्जनस्य ततोऽन्याभ्यां द्वाभ्यामे-

---

स्वीकृता । सा पुनर्व्यञ्जनाश्रयिणी, स्वरव्यतिरेकेण व्यञ्जनस्योच्चारणसामर्थ्यात् । अत्र पुनर्वर्णपदेन मुख्यत्वे व्यञ्जनघटकत्वमेव गृहीतम् वर्णस्यैव साम्यं न पुनर्वर्णघटिताया स्वरव्यञ्जनसंहतेरिति यमकाद् व्यावृत्तिः । अतिप्राचीनैः "शब्दाभ्यासस्तु यमकम्" इति निर्दिशद्भिरनुप्रासो न पृथग् भणितः । तत्र शब्दपदेन वर्णाः पदं तदैकदेशश्चेति सर्वमायाति ।

१. अनुप्रासहृदयध्रौव्यात्–क० ।

एकस्याप्यसकृत्परः ॥७९॥

एकस्य, अपिशब्दादनेकस्य, व्यञ्जनस्य द्विर्बहुकृत्वो वा सादृश्यं वृत्त्यनुप्रासः। तत्र—

माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते।

ओजःप्रकाशकैस्तैस्तु परुषा

उभयत्रापि प्रागुदाहृतम्।

कोमला परैः ॥८०॥

परैः शेषैः तामेव केचिद् ग्राम्येति वदन्ति। उदाहरणम्—

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥३५६॥

केषाञ्चिदेता वैदर्भीप्रमुखा रीतयो मताः।

एता एव तिस्रो वृत्तयो वामनादीनां मते वैदर्भी-गौडी-पाञ्चाल्याख्या रीतयो मताः।

काभ्यामनेकाभ्याञ्चेत्यर्थः। एवं बहुकृत्व[1] इत्यपि व्याख्येयम्। उपलक्षणं चैतत्। तेनैकव्यञ्जनस्यैकधासादृश्येऽपि ज्ञेयम्। वृत्तीनामनुप्रासविशेषलक्षणावतारस्तत्रेति। तत्रेति वृत्त्यनुप्रासे। नागरिकया मसृणपथ्यरचनयोपनीतोपनागरिका, परुषवर्णावयवा परुषा प्रागिति। अनङ्गरङ्गेति, मूर्ध्नामुद्वृत्तकृत्तेत्यादि च। कोमलाऽनन्त्यन्तपरुषावर्णावयवा। शेषैरुपनागरिकापरुषयोरनुपयुक्तैः प्रसादानुगुणैः।

ग्राम्येति। अत्यन्तकान्तिराहित्येन ग्राम्यनारीसाम्यात्। एता एवेति। तास्वासां प्रायिकत्वात्। तासाञ्च शब्दविन्यासापृथग्रूपत्वाद् विन्यासमात्रे च नातिशयिनि विलक्षणनामायोगात्। रीतिर्मार्गः[2]। रीङ् गतावित्यतो रीयतेऽनयेति व्युत्पत्त्या। वैदर्भीत्यादिनामविशेषस्तु तद्देश्येषु कविषु प्रायेणोपलम्भात्। प्रसादव्यञ्जककोमलप्रायवर्णमयी वैदर्भी, ओजोव्यञ्जकपरुषप्रायवर्णमयी गौडी, माधुर्यव्यञ्जकमसृणप्रायवर्णमयी पाञ्चाली।

---

१. एवं बहुत्वमिति कपुस्तकेऽशुद्धः पाठः।

२. "वैदर्भादिकृतः पन्था काव्ये मार्ग इति स्मृतः।
रीङ् गताविति धातोः स्याद् व्युत्पत्त्या रीतिरुच्यते॥"

इति सरस्वतीकाण्ठाभरणकारः। मार्ग इति विवरणादस्योपयोगश्च टीकाकृता सूचितः।

शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः ॥८१॥

पौनरुक्त्या द्विर्निरुक्तिभेदः। शब्दगतोनुप्रासः शब्दार्थयोरभेदेऽप्यन्वयमात्र-भेदाल्लाटजनवल्लभत्वाच्च लाटानुप्रासः : एष पदानुप्रास इत्यन्ये[1]।

पदानां सः

स इति लाटानुप्रासः। उदाहरणम्—

यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।
यस्य च सविधे दयिता दवदहनस्तुदिनदीधितिस्तस्य ॥३५७॥

पदस्यापि

अपिशब्देन स इति समुच्चीयते।। उदाहरणम्—

वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः।
सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत् ॥३५८॥

वृत्तावन्यत्र तत्र वा।

नाम्नः स वृत्त्यवृत्त्योश्च

एकस्मिन् समासे, भिन्ने वा समासे, समासासमासयोर्वा नाम्नः प्रातिपदिकस्य न तु पदस्य सारूप्यम्। उदाहरणम्—

एवमर्थानुसन्धानविरहिवर्णमात्रवृत्तिरूपमनुप्रासं लक्षयित्वा शब्दार्थवृत्ति-शरीरं लाटानुप्रासमाह—**शाब्दस्त्विति**। शब्दचते सूच्यतेऽनेनेति शब्दः प्रातिपदि-कादिः, तदाश्रितः शाब्दः। 'तुः' पूर्वतो व्यतिरेकसूचकः। पौनरुक्त्या द्विनिरुक्ति-भेद इति तात्पर्यपदविवृतिः। **अन्वयेति**। वाक्यार्थानुसंधाने विशेषप्रतीतिर्न तु पदार्थमात्रानुसन्धान इत्यर्थः[2]। तद्भेदं तल्लक्षणम्।

पदानामिति सुपतिङन्तसमुदायस्येति। यस्येति। अत्राद्येऽर्धे 'तुहिनदीधि-तिपदम्' अनूद्यार्थम्। द्वितीये[3] तु विधेयार्थम्। स इति।

एकार्थसम्बन्धिनोरससुच्चेयता[4]। **वदनमिति**। अत्र चन्द्रवाचिनः सुधाकर-

---

१. अन्ये वामनादयः प्राचीनाः।

२. 'अर्थापेक्षया शब्दस्याप्रतीतावन्तरङ्गत्वेऽपि प्रथममर्थगतधर्मनिर्देशश्चिरन्तन-प्रसिद्धया पुनरुक्तवदाभासत्य पूर्वलक्षणार्थम्' इत्यलङ्कारसर्वस्वे प्रकृतम्। अत्र तु पुनरुक्तवदा-भासस्योल्लेखेऽपि न त्वाद्यालङ्कारत्वेन तन्निर्देशे तस्योभयालङ्कारत्वेन ग्रन्थसङ्गतिः शब्दार्थालङ्कारयोः सेतुतया च स्थितिरेव हेतुः।

३. 'द्वितीये तु विधेयार्थम्' इत्यंशो गलितः खपुस्तके।

४. एकार्थसम्बन्धिनोरेव समुच्चेयत्वादत्—ख०।

सितकरकररुचिरविभा विभाकरकार धरणिधव[१] कीर्तिः।
पौरुषकमला कमला साऽपि तवैवास्ति नान्यस्य ॥३५९॥

तदेवं पञ्चधा मतः ॥८२॥

अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः।

यमकम्

'समरसमरसोऽयम्' इत्यादावेकेषामर्थवत्त्वेऽन्येषामनर्थकत्वेभिन्नार्थानामिति न

पदस्य पूर्वार्धे विधेयार्थतोत्तरे त्वनूद्यार्थता। विकलो हीनः। श लाटानुप्रासः। अवृत्तिः समासाभावः।

सितेति। अत्र करेति प्रातिपदिकवृत्तिरेकत्र समासे विभेतयस्य भिन्ने[1] कमलेत्यस्य समासपदभावयोः।

उपसंहारसूत्रम्—**तदेवमिति**। पञ्चधेति। पदानां पदस्य चेति द्वौ प्रातिपदिकस्य भेदत्रयमिति। अत्र च पदादिमध्यान्तादिगततया भेदान्तरमपि ज्ञेयम्। पादानुप्रासःपादयमकवदिति वचनात्[२]। अयं[३] चान्यैरुभयालङ्कारतयोक्तोऽपि शब्दविशेषान्वयव्यतिरेकानुविधायितया शब्दालङ्कारमध्ये लक्षितः।

वर्णानामिति बहुबचनमविवक्षितम्, द्वयोरपि वर्णयोरावृतौ यमकाङ्गीकारात्। नानाकारेण कान्तभ्रूराराधितमनोभुवा। "विविक्तेन विलासेन ततक्ष हृदयं नृणाम्' इत्यादौ स्वरैकव्यञ्जनवृत्तावपि केचिद् यमकमामनन्ति[४]। अर्थद्वारा भिन्ना अर्थ भिन्नाः, भिन्नार्था इत्यर्थः।

एतच्चाव्यापकभित्याशङ्क्य कारिकाप्रतिकान्तरयोजनेनाह—वृत्तिकृत्—**समरेति**। समरसो भयोद्वेगादिराहित्येनाप्रतिहतोत्साहः। अनर्थकत्वं शमरतेऽमरतेजसीत्यादौ[५]। द्वयोरप्यनर्थकत्वेत्विति शेषः। एतच्च यथायोगं वक्ष्यमाणप्रकार-

---

१. धरणीधर—ख०। स च प्राचीनतमका० प्र०मातृकायां धवेति पाठदर्शनादनुपादेयः।

२. एवं भट्टवामनः का० अ० सू० वृत्तौ। पादा एकस्यैव च पादस्यादिमध्यान्तभागा अनेकस्य पादस्य त एव यमकमिति वृत्तिः। उदाहरणानि च लक्षणोचितानि तव निवेशितानि।

३. अन्यैरलङ्कारसर्वस्वकृदादिभिः।

४. पादाः पादस्यैकस्येत्यादयोऽनेके भेदास्तैरत्र दर्शिताः। तत्राक्षरयमकमेकाक्षरमनेकाक्षरञ्च। विविनानेत्यादि हरिप्रबोधकाव्यपद्यमाद्यस्योदाहरणम्।

५. रघौ (८।४)। धन्यात्मभूते काव्ये यमकनियन्त्वणे ध्वन्यालोककृतामरुचिरेव बीजम्। परन्तु सर्गबन्धादौ कविसमयभूम्नैषां प्रयोगो दोषावह इति च तदनुसारिणामाकूतम्। परन्तु सर्गबन्धादौ कविसमय-वदस्य सम्प्रदायमर्यादा।

युज्यते वक्तुमित्यर्थे सतीत्युक्तम् । सेति सरो रस इत्यादिवैलक्षण्येन तेनैव क्रमेण स्थिता ।

पादतद्भागवृत्ति तद् यात्यनेकताम् ॥८३॥

प्रथमो द्वितीयादौ, द्वितीयस्तृतीयादौ, तृतीयश्चतुर्थे, प्रथमस्त्रिष्वपीति सप्त । प्रथमो द्वितीये तृतीयश्चतुर्थे, प्रथमश्चतुर्थे द्वितीयस्तृतीये इति द्वे । तदेवं पादजं नवभेदम् ।

अर्धावृत्तिः श्लोकावृत्तिश्चेति द्वे ।

द्विधा विभक्ते पादे प्रथमादिपादादिभागः पूर्ववद् द्वितीयादिपादादिविभागेषु अन्तभागोऽन्तभागेष्विति विंशतिर्भेदाः । श्लोकान्तरेषु हि नासौ भागावृत्तिः । त्रिखण्डे त्रिंशत्, चतुःखण्डेचत्वारिंशत् ।

सम्पृक्तसार्थकानर्थकोभयरूपभेदत्रयसूत्रणपरं द्रष्टव्यम् । तेनैव क्रमेण स्वरादिविपर्यासरहितेन । यथोक्तम्—'स्वरव्यञ्जनसमुदायपौनरुक्त्यं यमकम्'[1] इति ।

पूर्वानुपूर्व्या वर्णावृत्तिस्थानविशेषेषु यम्यत इति यमकमन्वर्थनामकथनम् । तद् यमकं पादतद्भागवृत्ति सत् प्रकारवैचित्र्येणानेकतां बाहुल्यं याति । प्रथमो द्वितीयादाविति । आवर्तत इति शेषः । पादावृत्तौ यदि प्रथमद्वितीययोरैक्यं तदा मुखं नाम, प्रथमस्य तृतीयेनैक्ये सन्देशः, तुर्येण वृत्तिर्नाम । द्वितीयस्य तृतीयेन गर्भः, चतुर्थेन सन्दष्टकम्, तृतीयस्य तुर्येण पुच्छम् । प्रथमस्य द्वितीयादिभिरेकत्रैक्ये षङ्क्तिरिति सप्त शुद्धाः । विमिश्रेण तु मुखपुच्छयोगे युग्मकम्, गर्भवृत्तियोगे, परिवृत्तिः । प्रथमो द्वितीये तृतीयश्चतुर्थे इत्यत्रेतिशब्दः प्रकारसूचकः । एवमुत्तरत्रापि पादजं पादावृत्तिरूपम् ।

पादतद्भागेति कारिकाप्रतीकेन पादद्विपदावृत्तिश्चतुर्णामेव पादानामवृत्तिरूपगृहीतेत्याह—अर्धावृत्तिः श्लोकावृत्तिश्चेति । यथायथं समुद्गकमहायमकनामके ।

पादभागवृत्तिप्रकारानाह—**द्विधेति** । प्रथमादीनां पादानामादिभागः । पूर्ववत् पदावृत्तिवत् । द्वितीयादीनां पादानामादिभागेषु वर्तते इति दशैव, प्रथमादीनामन्तभागो द्वितीयादीनामन्तभागेष्वित्यपि दश, तेन विंशतिः ।

ननु पूर्ववद्भेदगणने प्रत्येकमेकादशतया तयोर्द्वाविंशतिर्न विंशतिरित्याह—**श्लोकान्तरेष्विति** । श्लोकावृत्तिवत् श्लोकान्तरे पादाद्यन्तविभागावृत्तिर्न पेशलेति

---

१. एवमलङ्कारसर्वस्वे लक्षणम् । अत्रैतदुपधाय यमकभेदप्रदर्शने शैली रुद्रटेनैव सम्यक् प्रकटितेति तद्ग्रन्थ एव टीकाकृद्भिरनुसृतः ।

प्रथमपादादिगतान्त्यार्धादिभागो द्वितीयपादादिगते आद्यार्धादिभागे यम्यते—इत्याद्यन्वर्थताऽनुसरणेनानेकभेदम् । अन्तादिकमाद्यन्तिकं तत्समुच्चयः । मध्यमादिककादिमध्यमन्त्यमध्यं मध्यान्तिकम् तेषां समुच्चयः। तथा तस्मिन्नेव पादे आद्यादिभागानां मध्यादिभागेषु, अनियते च स्थाने आवृत्तिरिति प्रभूततमभेदम् ।

तदेतत् काव्यान्तर्गडुभूतमिति नास्य भेदलक्षणं कृतम् । दिङ्मात्रमुदाह्रियते—

शिष्टैराम्नातेत्यर्थः । पादे त्रिखण्डे कृते पूर्ववन्मध्यभागावृत्तिप्रकारदशकानुप्रवेशात्त्रिंशत् । पादे चतुःखण्डे कृते चत्वारिंशत् । पञ्चादिखण्डकल्पना त्वनुष्टुभादिपादे न सम्भवतीत्यसार्वत्रिकतया नाद्रियते । एवं गद्येऽपि यथायोगं भागकल्पनया प्रकारता-अन्वयः[1] । प्रथमादिपादानामर्धरूपेऽर्धस्य वा भागः, द्वितीयादीनां पादानामित्यादावर्धरूपार्धस्य विभागे यम्यते नियम्यत इत्यादीनां प्रकाराणामन्वर्थताऽनुसारेण नामविशेषनिवेशनायां प्रभूततमप्रकारं यमकम् तेष्वेवान्वर्थनामकप्रकारेषु किञ्चिदाह **अन्तादिकमिति** । प्रथमादिपादानामन्तभागस्य द्वितीयादिपादानामन्तादिभागेष्वावृत्तावन्तादिकम्, द्वितीयादिपादानामादिभागस्य तुर्यादिपादान्तभागेष्वावृत्तावाद्यन्तिकम् । द्वयोरप्यनयोरेकत्र मिश्रणे समुच्चयः ।

एवं प्रथमादिपादमध्यभागस्य द्वितीयादिपादादिभागयमने मध्यादिकम् । तथा प्रथमादिपादान्तभागस्य द्विनीयादिपादमध्यभागावृत्तावन्तमध्यकम् । प्रथमादिमध्यभागस्य तु द्वितीयादिपादादिभागावृत्तौ मध्यादिकम् । अत्र च द्वयोस्त्रयाणां चतुर्णां वा मिश्रणे समुच्चय इत्याह तेषामिति । एकस्यैव पादस्यादिभागो मध्यभागे, मध्यभागोऽन्तभागोऽन्तभागे, एवमित्यादावावर्तत इत्याह—**तस्मिन्नेवेत्यादि** भागेष्वित्यन्तम् । एते च भागकल्पनया स्थाननियमेनावृत्तिप्रकाराः । क्वचित्तु स्थानानियमेनावृत्तिर्यथा "सुवदनावदनासवसम्भृतादरसंहत" इत्यादि । अत्र हि प्रथमाकारायमनेन प्रथमादिभागायमनमित्यादिदर्शनादस्यानन्त्यमित्याह-अनियते च स्थाने आवृत्तिरिति ।

प्रभूततमभेदमिति । ननु तेषां भेदानां किमिति विशेषलक्षणानि न कृतानीत्याह **तदेतदिति** । अन्तर्गडुभूतस्य प्रायः रसानुपकारकतया वास्तवकाव्याङ्गता-

---

१. "प्रायश्छन्दांसि विषयोऽस्य" इति रुद्रटमन्तव्यात् प्रायोग्रहणाद् गद्यमपि क्वापीति तट्टीकाकृतां निर्देशाच्च । कथाख्यायिकाचम्पूप्रभृतिष्वस्य प्रचुरतराः प्रयोगाः ।

१. "यमकानां गतिरेषा देशावयवावपेक्षमाणानाम् ।
अनियतदेशावयवं त्वरमसंख्यं सदेवास्ति ॥"

इत्याह रुद्रटः । देश आदिमध्यान्तलक्षणः । अवयवोऽर्धत्रिभागादिरिति तट्टीकाकृच्च ।

सन्नारीभरणोमायमाराध्य विधुशेखरम् ।
सन्नारीभरणोऽमायस्ततस्त्वं पृथिवीं जय ॥३६०॥

विनाऽयमेनो नयताऽसुखादिना विना यमेनोनयता सुखादिना ।
महाजनोऽदीयत मानसादरं महाजनोदी यतमानसादरम् ॥३६१॥

सत्वारम्भरतोऽवश्यमबलं विततारवम् ।
सर्वदा रणमानैषीदवानलसमस्थितः ॥३६२॥

सत्त्वारम्भरतोऽवश्यमवलम्बिततारवम् ।
सर्वदारणमानैषी दवानलसमस्थितः ॥३६३॥

विरहात्, किन्तर्हि गड्डुरिकाप्रवाहपतितैर्महाकविभिरपि सर्गबन्धादिषूपनिबन्धाल्लेशतो दर्शितमिति भावः[1] । दिङ्मात्रमित्यसारविस्तरभीत्येत्यर्थः ।

मुख्याख्यं यमकं युग्मकोदाहृत्योहृतं भविष्यतीति सन्दंशमुदाहरति—**सन्नारिति** । एवमन्यत्रापि वृत्तकृदभिप्राय उन्नेयः । सतीर्नारी बिभर्ति या तामुमां याति गच्छति यं तं विधुशेखरमाराध्य पृथिवीं जय । सन्ना अवसादं गता अरीणामिभा यत्र तथाविधो रणो यस्येति विग्रहः । तृतीये पादेऽमायो मायाशून्यः ।

युग्मकं यथा **विनेति** । एनोऽपराधं नयता स्वस्थानं गमयता विना विहगपुरुषो यमेन मानसाच्चित्तादरं द्रुतमदीयताखण्डचत । असुखादिना प्राणभक्षकेनोनयता हानिं कुर्वता सुखादिना सुखं भक्षयता च्छेदयता । महाजनो महात्मेति विनेत्यस्य विशेषणम् । महानुत्सवानजन्ति क्षिपन्ति ये दुर्जनास्तन्नोदनशीलः । यत्नवतां यतमानानां सादमवसादं एति ददातीति यथा 'अदीयत' क्रियाविशेषणम् ।

महायमक[2] यथा—**सत्त्वेति** । स तु महात्मा, आरमरिसमूहम्, भरतो भरादवश्यमनायत्तमबलं दुर्बलं वितितारवं दीर्घाक्रान्तं सर्वदा सर्वकालं रणं संग्राममनैषीत् प्रापयामास[3] । अलसं कर्तव्यतामूढमवानवगच्छन् अपि तु त्वरितं गच्छन् । अस्थीनि तस्यति तक्ष्णोतीत्यस्थितः "अत्वसन्तस्य चाधातोः सौ' इति निषेधाद्दीर्घाभावः[4] । अवश्यं नियतं सत्त्वं बलं तस्यारम्भे रतः, अवलम्बितमाश्रितं तारवं

---

१. तथा च रुद्रटः—"इति यमकमशेषं सम्यगालोचयद्भिः सुकविभिरभियुक्तैर्वस्तु चौचित्यविद्भिः" इत्यादि । भामहश्च—

"प्रतीतशब्दमोजस्वि सुश्लिष्टपदसन्धि च ।
प्रसादि स्वभिधानं च यमकं कृतिनां मतम् ॥" इत्याह ।

२. एतच्च रुद्रटसम्मतलक्षणोदाहरणोपन्यासेन दर्शितं मूलकृता । भट्टिकृतनिदर्शनेषु (१० मे सर्गे) अस्य तु संज्ञाऽन्तरमुवलभ्यते ।

३. अनाययामास–ख० । अन्तर्भावितण्यर्थोऽयं प्रयोगः ।

४. एवं कातन्त्रे सूत्रम्—(शब्द ९७ सू) पाणिनिसूत्रन्तु 'अत्वसन्तस्य चाधातोः इति ।

अनन्तमहिमव्याप्तविश्वां बेधा न वेद याम्।
या च मातेव भजते प्रणते मानवे दयाम् ॥३६४॥

यदानतोऽयदानतो नयात्ययं न यात्ययम्।
शिदेहितां शिवे हितां स्मरामितां स्मरामि ताम् ॥३६५॥

[1]सरस्वति प्रसादं मे स्थितिं चित्तसरस्वति।
सर स्वति कुरु क्षेत्र-कुरुक्षेत्र-सरस्वति ॥३६६॥

ससार साकं दर्पेण कन्दर्पेण स-सारसा।
शरन्नवाना बिभ्राणा नाविभ्राणा शरन्नवा ॥३६७॥

तरुवनं[२] येनेत्यारमित्यस्य विशेषणम्। सर्वेषां दारणो यो मानश्चित्तोन्नतिस्तदेषणशीलो दवानलेन शत्रुभिर्दुःसहतया समं स्थितं स्थितिर्यस्य।

पादार्धावृत्तिप्रकारास्तु केचन पादावृत्त्युदाहृत्यैव गतार्थप्राया इति पादान्त्यार्धवृत्तिसन्दष्टकं वैशद्यार्थमुदाहरति—**अनन्तेति**। यां देवीं वेधाः प्रजापतिर्न वेद तत्त्वतो न वेत्ति, या च प्रणते मानवे मातेव दयां भजते।

आद्यान्तं यमकमप्येवं यथा **यदानत इति**। यस्यामानतः प्रणतोऽयस्य शुभावहविधेर्दानाद् न यात्ययं नीतिविप्लवं न याति न गच्छत्ययं लोकः शिवमीहितं यस्यास्तां शिवे भगवति हितामनुकूलां स्मरेण कामेनामितामपरिच्छिन्नां स्मरामि चिन्तयामि[3]। अन्तादिमुक्तम्[४]।

आद्यन्तिकं व्यपेतं यथा **ससार** जगाम साकं सह दर्पेण सारसैः पक्षिभिर्युक्ता शरं काण्डं बिभ्राणा पुष्टिं पाकलक्षणां नयन्ती। नवाना[५] नवान्यनांसि शकटानि यस्याः। शरद् नवा नूतना। न विद्यते वीणां पक्षिणां भ्राणः शब्दो यत्र तथाभूता[६]।

---

१. सृ गतौ भौवादिको धातुः। स्वति कुरु=चित्तसरस्वति समुद्रे अवस्थानं सुष्ठु कुरु इत्यर्थः।

२. 'तरुव [दवनम] नम्' इति पाठः स्यात्। तरुसमूह इति ख पाठस्तु भिन्नकल्पः।

३. ध्यायामि—ख०।

४. एषां विस्तरो रुद्रटग्रन्थे एव लभ्यते। प्रथमार्धे सरस्वतीत्यादौ सरस्वतीत्यन्ते च। द्वितीयार्धे सरस्वति सरस्वतीत्याद्यन्तिकं कुरुक्षेत्रकुरुक्षेत्रेत्यन्तादिकम्।

५. अत्र 'नवानाः' इति विसर्गान्तपदम्, सन्धिप्रक्रियायामीदृग् रूपम्।

६. अपि तु पक्षिरुतयुतेति शेषः।

मधुपराजि-पराजित-मानिनीजनमनःसुमनःसुरभि श्रियम् ।
अभृत वारितवारिजविप्लवं स्फुटितताम्रतताम्रवणं जगत् ।।३६८।।
एवं वैचित्र्यसहस्रैः स्थितमन्यदुन्नेयम् ।

वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः ।
श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा ।।८४।।

उक्तरूपभागानियमेन पादगमेकपादगतमध्ययमकं यथा—मधुपेति । मधुपराज्या भ्रमरश्रेण्या पराजितां निर्मानीकृताम् । मानिनीजनमनोभिस्तासां सुमनसां कुसुमानां सुरभिश्रियं सौगन्ध्यलक्ष्मीं[1]जगदभृत । वारितपङ्कजोपप्लवं स्फुटितानि विकसितानि ताम्राण्यालोहितानि ततानि विस्तीर्णान्याम्रवणानि यत्र । एवमिति । उक्तदिशा वर्णयमकान्तरं पादयमकञ्च "तन्वां तन्वां न सम्माति तस्याः लावण्यसञ्चयः"[२] इत्यादि स्थितमाकरेषु प्रसिद्धम् ।

वाच्यभेदेनेति ।

"वसुधामहित सुराजित नीरागमना भवांश्च वर्षाश्च ।
अवचितवराहवपुषस्तव च हरेश्चोपमा घटते ।।"

इत्यादावेकशब्दाश्रितनानाविषयाभिधावादे द्वयोरप्यभिधयोः स्वसामग्रीसाचिव्येन क्रमश उज्जीवनमित्येके । शब्दभेदमाश्रित्य तन्त्रेणोच्चारितयोः शब्दयोः क्रमेण स्वार्थबोधनमित्यपरे । तत्राद्ये शब्दान्वयव्यतिरेकानुविधायितया ध्वनिविषयपरिहारेणार्थद्वयप्रतिपत्तौ शब्दश्लेषः, अन्यथा त्वर्थश्लेषः । द्वितीये तु यत्र शब्दपरिवृत्तिसहिष्णुता तत्रार्थश्लेषः । तत्राद्ये प्रथमं निरुद्धाया द्वितीयाभिधायाः पुनरुत्था-

---

१. एवमपि प्राचीनतमस्य टीकाकृतो रुचकस्य व्याख्यासरणिमनुसृत्य श्रीधरसोमेश्वरादयः । वस्तुतस्तु प्रकृत उदाहरणे 'नवपलाशपलाशवनं पुरः" इत्यादि "स सुरभिं सुरभिं सुमनो भरैः" इति माघपद्य इवात्र हरिविजयपद्ये प्रस्तुते वसन्तवर्णने सुरभेर्वसन्तस्य शोभामिति मनोज्ञतरं व्याख्यानम् ।

२. तन्वां श्लक्ष्णायां तन्वां कामाकृताविति यमकप्रयोजकं भिन्नार्थत्वम् । टीकाकृत्तु परामृष्टा आकरग्रन्था भामहादिरुद्रटान्तकाश्मीरकसम्प्रदायलक्षणमनुसृत्य विभागे भेदमामनन्ति । यथाऽलङ्कारसर्वस्वोपरि विमर्शिनीकृतामुद्धृतौ "यदुक्तं पदमनेकार्थमक्षरं चावृत्तं स्थानविषये यमकम्' इत्याकारायाम् इदं च स्थाननियममन्तरेण न भवतीति सम्प्रदायविदां सिद्धान्तः । अतः स्वरव्यञ्जनसमुदायपौनरुक्त्यस्य स्थाननियमाभावाद् प्रवर्तितास्ते यमकाभासा एव । ते तु वृत्त्यनुप्रास एवान्तर्भाव्या इति विमर्शिनीकृदाशयः । तत्र प्रथमप्रकारस्य भेदलक्षिते श्लोक इति ध्येयम् . वर्णानुप्रासालोचनानन्तरं पदानुप्रासाश्चन्द्रालोककृदाद्यनेकैर्लक्षिताः । परं पदयमकस्य न तैः पृथक् सत्ता प्रत्यभिज्ञाता, तैः स्तवकसंघातातिदिशा वर्णोपादान एव निहितो यत्नः ।

'अर्थभेदेन शब्दभेदः' इति दर्शने 'काव्यमार्गे स्वरो न गण्यते' इति च नये वाच्यभेदेन भिन्ना अपि शब्दा यद् युगपदुच्चारणेन श्लिष्यन्ति भिन्नं स्वरूपमपह्नुवते स श्लेषः। स च वर्ण-पद-लिङ्ग-भाषा-प्रकृति-प्रत्यय-विभक्ति-वचनानां भेदादष्टधा।

नाभावेन "जनस्थाने भ्रान्तम्" इत्यादाविवात्रापि द्वितीयार्थे व्यञ्जनं व्यापारः। द्वितीये तु पक्षे भिन्नयोः शब्दयोः कथमेकदा निष्पत्तिः? उभयार्थप्रतिपादनसमीहया वक्तुः प्रवृत्तत्वादिति चेत्तर्हि घटसहस्रं चिकीर्षुः कुलाल एकदा सर्वं कर्तुं शक्नुयात्।

यदाहुरत्रभवन्त उद्द्योतकराचार्याः—क्रमवृत्तित्वाद् वाच[1] इति। प्रतिप्रसवपक्षस्तु पूर्वमेव दूषितः। तस्माद् घटपटादिशब्दवद्भिन्ना एव सभङ्गाभङ्गरूपाः समानश्रुतयः शब्दा अनेकार्थप्रतिपादकानेकप्रयत्नोच्चार्या इति प्रकरणादिवशेन प्रथमप्रत्येयार्थवाचकस्यैव शब्दस्यार्थान्तरे शक्त्यन्तरमङ्गीकार्यम्। प्रकरणाद्यभावे तु सन्देहतः।

इदमेव काव्यप्रस्थाने स्वरभेदादेः शब्दभेदकत्वानङ्गीकृतितात्पर्यम्, अन्यथा साऽपि निर्मूला स्यात्। एवमेव वक्ष्यमाणेषु सर्वेषु श्लेषोदाहरणेष्वपि। ग्रन्थकारस्तु प्राचीनप्रसिद्धिव्यामोहेन तन्त्रोच्चारणमङ्गीकृतवान्, अन्यथा 'भद्रात्मनः' इत्यादौ 'जले स्थले चान्तरिक्षे' इत्यादाविव 'न स्यादपि भूः' इति सम्प्रदायः।

दर्शन इत्यनन्तरं प्रामाणिक इति शेषः। एकशब्ददर्शने हि शब्दश्लेष इत्यभिधानमनर्थप्रायं स्यात्। भिन्नशब्दयोरेव हि श्लेषः संयोगः प्रसिद्धः।

ननु विधा शब्दा भिद्यन्ते—स्वरूपतः स्वरतोऽर्थतश्च। ततश्च भङ्गश्लेषादौ स्वरभेदात् कथमैक्यमित्याह—काव्येति। स्वरः श्लिष्टशब्दभेदनिश्चयप्रत्यायको नाङ्गीक्रियते, व्यञ्जनामार्गालोचनदशायाम्, अन्यथाऽर्थान्तरप्रत्ययाभावप्रसङ्गादित्यर्थः। नय इति नीयते यथाकथञ्चन व्यामृष्यानेनेति नयः प्राचीनमार्गः।[2] भिन्ना निश्चितभेदाः।

---

१. "आप्तोपदेशः शब्दः" इति सूत्रकृतां ग्रन्थक्रममादाय भाष्यकृता वात्स्यायनेनोट्टङ्कितमन्तव्यमनुगृह्णन्तो वर्तिककारा उद्द्योतकराचार्याः "न्यायप्राप्तं क्रमाभिधानं क्रमवृष्टित्वाद्वाचः" इत्येवमाहुः अत्र चण्डीदासटीकामातृकायां "क्रमवृत्तित्वाद्वाचः' इति पाठ उपलभ्यते।

२. प्राचीनयोः—क०। तत्र यौगपदेनासार्वत्रिकः स्वीकारः सूचितो यथोद्दिष्टं द्वितीयोल्लासटीकायां टीकाकृता। अत्र द्वितीयोल्लासे टीकाकृतां वेद इवेति वदता

क्रमेणोदाहरणम्—

अलङ्कारः शङ्करनरकपालं परिजनो
विशीर्णाङ्गो भृङ्गी वसु च वृष एको बहुवयाः ।
अवस्थेयं स्थाणोरपि भवति सर्वामरगुरो-
र्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी ॥३६९॥

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम् ॥३७०॥

भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी
ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये ।
लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती
युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः ॥३७१॥

अक्षरशब्दार्थः वर्णेत्यनेनादिशब्दार्थश्च पदेत्यादिना व्याचष्टे—**स चेति**। प्रत्ययग्रहणेनैव विभक्तिसंग्रहे गोबलीवर्दन्यायेन पृथगुक्तिः। यद्वा प्रत्ययनान्तरसाध्यविच्छित्तिसम्भवादित्येके[1]। तन्न, विभक्तिशब्देनात्र सुप्तिङन्ताभिधानस्यैव स्फोरयिष्यमाणत्वात्। विभक्त्यादिविभागेन वर्णानामेकाकारत्वे वर्णश्लेषः। **यथा विधाविति**।

अत्र हि विधु विधिशब्दयोरेकदेशयोरिकारोकारयोः सप्तमीविभक्तियोगादौकाररूप एकरूपो विकारः। अस्य च केचित् पदश्लेषान्तर्भावमाहुः। विभक्त्यादिश्लेषाभावादेववर्णाधीनत्वाच्च। नेति ग्रन्थकृदभिसन्धिः। यत्र पदभङ्गे विभक्तिसमासवैलक्षण्यप्रतीतिः स पदश्लेषः प्रागेव व्याख्यातः। स्त्रीपुंनपुंसकादीनां यत्र दीर्घत्वसमासादिभिरैकरूप्यं स लिङ्गश्लेषः। यथा **भक्तीति** नीतेहितस्य श्रेयसः प्राप्तये नीता ईहितस्य वाञ्छितस्य प्राप्तये, तनुपक्षे महानिधिरिति विसर्गस्य रसिके रेफे परे लोप उपधादैर्घ्यञ्च। कुरुतामिति परस्मैपदद्विवचनात्मनेपदैकवचनयोरैकरूप्यम्।

बहुलप्रयोगो नास्त्युदात्तादेः, क्वाचित्कस्तु विद्यत एवेत्यभिप्रेतमिति मन्तव्यमनुस्मरणीयम्। प्राचीनानां रुचकश्रीधरादीनां पाठमनुसृत्य चण्डीदासो वेद इवेति मूले पठति। दर्पणमाकृतामाक्षेप एतदुपलक्षे लक्षणीयः। अत्र टीकाग्रन्थे यथेतरत्र मम्मटाचार्याणामुद्भटादिप्राचीनमतनियन्त्रितत्वमधिक्षिप्तम्। 'भद्रात्मन' इत्यादौ श्लोके शब्दशक्तिमूलाया व्यञ्जनायाः स्वीकृतिरुद्भटादिप्राचीनमतविरोधिनीति चाक्षेपबीजम्।

१. एतदाक्षेपवचनं 'तत्र प्रत्ययग्रहणेनैव लब्धे विभक्तिपदस्य पुनरुपादानं विशेषतश्चारुत्वातिशयप्रकाशनार्थम्'' इति सान्धिविग्रहिकश्रीधरमन्तव्यं लक्ष्यीकृत्य प्रवृत्तम् (का० प्र० वि० ३०५ पृ०)।

एष वचनश्लेषोऽपि ।

> [1]**महदे सुरसन्धम्मे तमवसमासंगमागमाहरणे ।**
> **हरबहु सरणं तं चित्तमोहमवसर उमे सहसा ॥३७२॥**
> **अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति ।**
> **सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः ॥३७३॥**
> **रजनिरमणमौलेः पादपद्मावलोक-**
> **क्षणसमयपराप्तापूर्वसम्पत्सहस्रम् ।**

एवं प्रणयिनी इत्यादावपि स्त्रीलिङ्गैकवचननपुंसकद्विवचनयोरित्याह—**एष इति** । एवं भाषाश्लेषाद्याद्युदाहरणेऽपि पदश्लेषादियोगो ज्ञेयः । यत्र सभङ्गाभङ्ग-रूपेणैकभाषासङ्गतिः स भाषाश्लेषः । तत्राद्यो यथा **महेति** । महदे उत्सवदे सुरसन्धं देवसहितं मे मम तं समासङ्गम् आग्रहम् आगमाहरणे विद्योपादाने, अव रक्ष । उमे गौरि अवसरे समये बहुसरणं बहुप्रकारं तं चित्तमोहं हृदयतमो हर अपनय । एतच्च संस्कृते । प्राकृते तु–मह मम देसु दत्तां रसं रतिं धम्मे धर्मे तमवसं तमोवशाम् आसं आशां गमागमा गमागमात् संसारात् । हर अपनय । बहु प्रकृष्टमास्तरणं शरणं तम् हरबहु हरवधु इति वा । चित्तमोहं चित्तमोहः, प्राकृते लिङ्गनियमाभावात् । अव-सरउ अपसरतु । मे मम सहसेति । द्वितीयं यथा[2]—

> "चारुसमीरणरमणे हरिणकलङ्ककिरणावली सविलासा ।
> आरब्धराममोहा वेलासूले विभावरी परिहीणा ॥"

लेशः शरीरादीनां वेशः, अर्थभेदेन[3] चात्र भाषाभेदमात्रत्वेन श्लेषत्व-मङ्गीक्रियते[4] ।

यत्र प्रत्ययाद्यभेदेन भिन्नप्रकृतिकानामपि पदानां सारूप्यं स प्रकृतिश्लेषः । **यथा अयमिति** । अत्र वक्ष्यति धारयिष्यति चेति वहिवच्योः, कृदिति कृन्तति करोति चेति कृतिकृञोश्चैकरूप्यम् ।

प्रत्ययद्वारा पदसारूप्यं प्रत्ययश्लेषो यथा रजनीति । पादपद्मावलोक एव क्षण उत्सवस्तत्समये पराप्तं प्राप्तमपूर्वमाश्चर्यभूतं सम्पत्सहस्रं सुखबा-

---

१. आनन्दवर्धनप्रणीते देवीशके ७६ श्लोकः ।

२. भट्टिकाव्ये भाषासमसर्गे आदिमः श्लोकोऽयम् । अत्राभङ्गरूपेणैकभाषासङ्गतिमयो भाषाश्लेषः ।

३. 'विलासः शरीरादीनां विशेषः' इति पाठः स्यात् । स तु नोभयोर्मातृकालिप्योरुपलब्धः ।

> "स्थानासनगमनानां हस्तभ्रूनेत्रकर्मणां चैव ।
> उत्पद्यते विशेषो यः श्लिष्टः स तु विलासः स्यात् ॥"

इति मुनिकृतं विलासलक्षणम् ।

४. 'अङ्गीक्रियते' इत्यारभ्य पङ्क्तिदशकपरिमितं वाक्यं क० नास्ति ।

प्रथमनिवहमध्ये जातुचित् त्वत्प्रसादा-
दहमुचितरुचिः स्यान्नन्दिता सा तथा मे ३७४॥

सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः ।
नयोपकारसाम्मुख्यमायासि तनुवर्तनम् ॥३७५॥

भेदाभावात् प्रकृत्यादेर्भेदोऽपि नवमो भवेत् ।

नवमोऽपीत्यपिर्भिन्नक्रमः । उदाहरणम्—

हुल्यं यत्रेति क्रियाविशेषणम् । विसर्गान्तपाठे तु कर्तृविशेषणम् । प्रथमनिवहमध्ये गणसमूहमध्ये । अत्र स्यात् स्यामिति प्रथमोत्तमपुरुषैकवचनयोः सन्धावेकरूपता । अत्र च प्रत्ययांशगतमेकसन्धावैकरूप्यमिति प्रत्ययश्लेषत्वमित्येके । प्रत्ययकृतं वास्तवमेकत्वं नास्ति, किन्तर्हि पदसन्धिकृतमिति पदश्लेष इत्यपरे ।

एतच्च (एवञ्च) नत्वा (पदा ?) वापोद्वापेनापि पदत्वव्यवस्था न स्यात्. अन्यथा वक्ष्यतीत्यादौ सर्वत्र पदश्लेष एव स्यात् ।

एतावांस्तु भेदः--क्वचिदेकाकारमेव पदं भवति, क्वचित्तु पदं कृत्वा पश्चादुपाधियोगेनैकाकारं भवतीति । नन्दितेति । तृचि नन्दिनो गणस्य भाव इति तलि चैकरूप्यम् । तत्र च तृचि नन्दकः स्याम् । सा च मे उचिता रुचिस्तथा स्यादिति ।

क्वचित्तु[१]— अहमुचितरुचिः स्याम् । तथा सा नन्दिता मम स्यादित्यर्थः ।

सुप्तिङोः सारूप्यं विभक्तिश्लेषो यथा-**सर्वस्वमिति**। हर भगवन् सर्वस्य जनस्य स्वं सर्वस्वं भवस्य संसारस्य च्छेदपरो यतो नयोपकारयोः साम्मुख्यं तनुवर्तनं शरीरवृत्तिम् आयासि आगच्छसीत्येकोऽर्थः । अन्यस्तु त्वं सर्वस्य सर्वस्वं हर नय । छेदस्तत्परो भव । आयासि खेदकारि उपकारसामुख्यं नय विरचय, वर्तनं जीवनं तनु विस्तारय । क्रियासमभिहारे [२]पञ्चमी (लोट्) मध्यमैकता । अत्र प्रकरणादिना नियमाभावान्न शब्दशक्तिमूलध्वनिः ।

भेदाभावादुभयत्र संहतसारूप्यात् । प्रकृत्यादेरित्यादिना प्रकृतवचनादिसंग्रहः ।

ननु कारिकायां भेद इत्यनन्तरमपि शब्दो न युक्त इत्याह—**नवमोऽपीति** । पूर्वं समुच्चयेन योजतेति शेषः । नैवं सूत्रे प्रतीतिरित्याह—**अपिर्भिन्नक्रमोऽर्थसङ्गत्यपेक्षया क्रमभेदेन योजनीय इत्यर्थः** ।

---

१. क्वचित् पाठान्तर इति यावद् ।

२. पञ्चमीति लोटः स्थाने कातन्त्रव्याकरणस्य बहुत्रैव टीकाकृद्भिः परामृष्टस्यानुमोदिता संज्ञा ।

योऽसकृत्परगोत्राणां पक्षच्छेदक्षणक्षमः ।
शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते ॥३७६॥

अत्र प्रकरणादिनियमाभावाद् द्वावप्यर्थौ वाच्यौ ।

ननु स्वरितादिगुणभेदाद् भिन्नप्रयत्नोच्चार्याणां तदभाववादभिन्नप्रयत्नोच्चार्याणाञ्च शब्दानां बन्धेऽलङ्कारान्तरप्रतिभोत्पत्तिहेतुः शब्दश्लेषोऽर्थश्लेषश्चेति द्विविधोऽप्यर्थालङ्कारमध्ये परिगणितोऽन्यैरिति कथमयं शब्दालङ्कार उच्यत इति । उच्यते—इह दोषगुणालङ्काराणांशब्दार्थगतत्वेन यो विभागः सोऽन्वयव्यतिरेका-

---

परगोत्राणां शत्रुवंश्यानां पक्षच्छेदाय सहायनाशाय क्षणेनाविलम्बेन क्षमः । शतानि कोटीश्च ददाति वितरति विबुधेन्द्रो बुद्धिमत्तम इति राजपक्षे । अन्यत्र तु विबुधेन्द्रो देवेन्द्रः शतकोटिना वज्रेण द्यति खण्डयति यः पराणामसाधारणानां गिरीणां पक्षच्छेदक्षणाय पतत्रलवनोत्सवाय । अत्र गोत्रशब्दे लिङ्गभेदेऽपि तत्कृतरूपविपर्यासाभावान्न क्षतिः । ध्वनिरित्याशङ्कां निराचष्टे[१]—**अत्रेति ।**

इह भिन्नप्रयत्नोच्चार्यशब्दलेषस्य जतुकाष्ठन्यायेन संयोग इति शब्दश्लिष्टता । अभिन्नप्रयत्नोच्चार्यस्थले त्वेकेनैवोच्चारणेनैकवृन्तगतफलद्वयन्यायेनार्थयोः श्लिष्टः स्यात् । यत्र चार्थानुसन्धानमन्तरेणेदं श्लिष्टवैचित्र्यं नानुसन्धीयत तत्रार्थालङ्कार एवायम् ।

तस्य च सर्वत्रैवालङ्कारान्तरत्वविच्छित्यनुग्राह्यतया निरवकाशत्वादन्यापवादरूपेणानेनैवार्थेनैवंविधस्थले व्यपदेशो ज्यायानिति ये मन्यते तत्पक्षमुपन्यस्यति- **नन्विति** । स्वरित उदात्तानुदात्तमिश्रणकारः । [गुण इति] वर्णधर्मः स्वरविशेषः । **भिन्नेति** । स्वराणां विजातीययत्नसाध्यत्वात् । अलङ्कार इत्यादि बहुव्रीहिः[२] । प्रतिभाविच्छित्तिरुत्पत्तिनिर्वाहः ।

उच्यत इति । समाधानोपायकम्[३] । कष्टत्वं श्रुतिकटुता, गाढत्वं वर्णदार्ढ्यम् व्यर्थत्वमपुष्टत्वं पौनरुक्त्यं वा, प्रौढिर्व्याससमासादिरूपा । परवीक्षणे अर्थगुण-

---

१. अत्र प्रकरणादिकं न नियामकम्, येनानेकार्थस्य शब्दस्येत्यादि द्वितीयोल्लासकारिकाया अवसरः स्यात् । अन्यच्च तत्र द्वितीयोऽर्थो व्यङ्ग्यः, अत्र तूभावेव वाच्यौ ।

२. अलङ्कारान्तरस्य प्रतिभाविच्छित्तिः सैवोत्पत्तिहेतुनिर्वाहफलरूपा यस्येति श्लेषस्य बहुव्रीहिसमासेन निर्देशश्चण्डीदाससम्मतः । अपरे तु हेतुर्हेतुंभूत इति तत्पुरुषमेवाश्रयन्ति ।

३. व्यर्थत्वादयोऽर्थदोषाः प्रौढ्यादयो वामनप्रोक्तौजोगुणाधायका उपमादयश्चार्थालङ्कारा इति प्रकरणोपमोगिनी सङ्गतिः ।

वस्तुतस्तु आद्ययोः संज्ञा न मूलकृन्निर्देशानुसारिणी, परन्तु प्राचीनानुगामिन्येव । प्रथमकक्षायामपुष्टत्वादिना द्वितीयायार्थगुणानामत्र पृथगङ्गीकाराद् वृत्तिरियं ग्रन्थकृतोऽपरमतोद्धारं सूचयति । परवीक्षणे अपरमते ।

भ्यामेव व्यवतिष्ठते । तथा हि—कष्टत्वादिगाढत्वाद्यनुप्रासादयो व्यर्थत्वादि-प्रौढचाद्युपमादयस्तद्भावतदभावानुविधायित्वादेव शब्दार्थगतत्वेन व्यवस्थाप्यन्ते ।

"स्वयं च पल्लवाताम्रभास्वत्करविराजिता" इत्यभङ्गः,

"प्रभातसन्ध्येवास्वापफलजुब्धेहितप्रदा" इति सभङ्गः,

इति द्वावपि शब्दैकसमाश्रयाविति द्वयोरपि शब्दश्लेषत्वमुपपन्नम्, न त्वाद्यस्यार्थश्लेषत्वम् । अर्थश्लेषस्य तु स विषयो यत्र शब्दपरिवर्तनेऽपि न श्लेषत्व-खण्डना । यथा—

स्तद्भावः शब्दार्थयोरन्वयस्तदभावस्तयोर्व्यतिरेकः । अनुविधायित्वं तदधीनमन्वय-व्यतिरेकित्वम् । न केवलं न तथाभूतस्य हिमवतः सुता स्वयं चैवंविधेति चशब्देन प्राकरणिकसमुच्चयः । भास्वद्भ्यां कान्तिमद्भ्यां काराभ्यां पाणिभ्याम्[१], अस्वापे दुरापे फले लुब्धानामीहितं वाञ्छितमिति गौरीपक्षे ।

सन्ध्यापक्षे तु भास्वतः सूर्यस्य करैरंशुभिः, स्वापेन निद्रानाशेन यत् फलं तत्र लुब्धे जने हितं श्रेय इति ।

तत्र प्रथमार्धे स्वरादिसाम्येनापृथक्प्रयत्नोच्चार्यमित्यर्थस्य श्लेषता, द्विती-यार्धे तु समासे स्वरादिशब्दश्लेषता कैश्चिदिष्यते[२], तन्निराचष्टे—द्वयोरपीति । सुवर्णादिगौरवप्रादर्शिका शिखरशलाका तुलाकोटिः । अवान्तरादिस्थाने स्वल्पादि-निवेशेऽपि न द्वयर्थताहानिः । न चैवं यश्चेत्यादौ मिश्रिताकारः सङ्करालङ्कारः । उपमाप्रतिभोत्पत्तिहेतुरिति चोभयत्र बहुव्रीहिरेवमुत्तरत्राप्येवं ज्ञेयम् । अत्र श्लेषस्य सामान्यनिर्वाहकतया तदङ्गता, न तु सामान्यस्य तन्निर्वाहकतेति न तस्य मुख्यता[३] स्यात् । **यथेति ।**

---

१. अत्र विराजितेत्यत्र विराजिनीति प्रकृतश्लोकस्योद्भटकृतस्य टीकाकृद्भिः प्रतीहारेन्दुराजा-दिभिर्धृतः पाठः श्रेयान् ।

२. एतन्मतं लघुवृत्तावेवमुद्दिष्टम् "ये तन्त्रेणोच्चारयितुं शक्यन्ते ते एकप्रयत्नोच्चार्याः । तद्बन्धे सत्यर्थश्लेषो भवति । ये तेषामेवैकप्रयत्नोच्चार्याणां शब्दानां सादृश्यं बिभ्रति तदुपनिबन्धे च शब्दश्लिष्टमिति । आद्यपद्येऽर्थपौनरुक्त्यादेवार्थाश्रितत्वादर्थालङ्कारत्वम्, अन्त्ये तु शब्दधर्मत्वेम शब्दाश्रयत्वाच्छब्दालङ्कारत्वमिति तावदाश्रयाश्रयिभावमुपजीवतां प्राचां मतेन । सम्मटादयोनवीनास्वत्वन्यथा समादधतीति मूलत एव स्पष्टीभविष्यति ।

३. उपमाप्रतिभोत्पत्तिहेतुः श्लेषः । स चालङ्कारान्तराणां निरवकाशत्वं साधयतीति हि काव्यालङ्कारसारसंग्रहेश्लेष लक्षणे प्रतिमां जनयदिति विशेषणेन । अत्र तु "शब्दा-नामत्यसरूपाणामपि" इत्यादिना "प्रतिभोत्पद्यते" इत्यन्तेन गलितप्रायेण मुद्रितपुस्तको-पलब्धग्रन्थेन भामहविवरणीयेन च उद्भटो मन्यते । श्लेषस्यैव मुख्यता । प्राधान्ये-नैव व्यपदेशा भवन्तीति न्यायेन श्लेषालङ्कारः नव्यमते तु श्लेषानुप्राणितोपमैव ।

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥३७८॥

न चायमुपमाप्रतिभोत्पत्तिहेतुः श्लेषः, अपि तु श्लेषप्रतिभोत्पत्तिहेतुरुपमा । तथा हि—यथा "कमलमिव मुखं मनोज्ञमेतत् कचतितराम्" इत्यादौ गुणसाम्ये क्रियासाम्ये वोपमा, तथा—"सकलकलं पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिव" इत्यादौ शब्दमात्रसाम्येऽपि सा युक्तैव । तथा ह्युक्तं रुद्रटेन—

स्फुटमर्थालङ्कारावेतावुपमासमुच्चयौ किन्तु ।
आश्रित्य शब्दमात्रं सामान्यमिहापि सम्भवतः ॥ इति ॥

ननु गुणक्रियासाम्येनैवोपमात्वम्, न चात्र तथा, शब्दमात्रे साम्येऽप्युपमाया अलङ्कारस्य सुलभापदेशमात्रत्वात् । तथा हि—'साधर्म्यमुपमा' इत्येवाविशिष्टं सूत्रम्, वास्तवसाम्भ्र एवोपमा सिद्धा, न चात्र तथा, स्वरूपशब्दमाहात्म्यमात्रेणैवोपक्षेपादिति चेन्मैवम्, तावताऽपि बाध्यभूतोपमाऽङ्गीकारात् ।

तदेव लक्ष्यान्तरदर्शनेनाङ्गीकारयति—**तथा हीति** । सकलकलं ध्वनिसहितं सम्पूर्णावयवं च । यदि युक्तेरप्रतिषिद्धत्वादेवंविधभेदमङ्गीकुरुषे, तदा तत्राप्यङ्गीकुरु, द्वयोरप्यनयोराग्रहमन्तरेण विशेषाभावात् । क्वचित् कण्ठत एवोच्यते । तदाह—**तथा हीति** । इहापीति शब्दालङ्कारगणनायाम्[1] । सम्भवतो न व्यावर्तेते इत्यर्थः । ततश्चैवंविधयोरनयोरुभयालङ्कारतेति भावः । तदुदाहृतिस्तु समुच्चयस्य 'वसुधामहित' इति पूर्वत्र[2] ।

इह केचिदाहुः—यत्र साधारणपदोद्धारेऽपि नोपमाभङ्गः स एव तद्व्यपदेशविषयः, यथा 'कमलमिव' इत्यदि । एवं पुरचन्द्रयोः साम्यस्याप्रसिद्धेरित्याह—

---

१. रुद्रटमतेनात्र स्वपक्षं समर्थयंस्तद्वचन (का०अ०४।३२) मुदाहृत्यात्रोपमास्वीकार उद्भटमतखण्डनपरमुत्वेनोल्लिखति ग्रन्थकृत् ।

२. अत्र पाठः सम्यङ् न लगति, तदुदाहृतिरिति तत्पदेनोपमासमुच्चययोः परामर्श इति मते पूर्वत्र (पूर्वतो वा) इति पदस्यान्वयो न सुघटः । यदि तावत् पूर्वत्र इति स्थले 'रुद्रटः' इति पाठो गृह्यते, तदा समुच्चयस्येति पदं निराकाङ्क्षं स्यात् । 'तदुदाहृतिस्तु वसुधामहितेति रुद्रटः' इति पाठे सर्वं स्वस्थम् । एतच्चात्र श्रीधरकृतविवेकग्रन्थपाठानुसारीति (३१०-३११ पृ०) । यत्र रुद्रटीयकाव्यालङ्कारस्य द्वौ श्लोलावुपमासमुच्चयौ यथाक्रममभिदधतः । तत्रोपमोदाहरणस्य प्रकृते ग्रन्थे सत्त्वात् समुच्चयालङ्कारलक्ष्यं चण्डीदासेन रुद्रटीयं द्वितीयं पद्यमुपमासमुच्चयोदाहरणरूपेणोद्धृतं स्यात् ।

वसुधामहित सुराजित नीरागमना भवांश्च वर्षाश्च ।
सुरचितवराहवपुषस्तव च हरेश्चोपमा घटते ॥" इति समग्रं तत्पद्यम् ।

न च 'कमलमिव मुखम्' इत्यादिः साधारणधर्मप्रयोगशून्य उपमाविषय इति वक्तुं युक्तम्, पूर्णोपमाया निर्विषयत्वापत्तेः ।

देव त्वमेव पातालमाशानां त्वं निबन्धनम् ।
त्वं चामरमरुद्भूमिरेको लोकत्रयात्मकः ॥

इत्यादिः श्लेषस्य चोपमाद्यलङ्कारविविक्तोऽस्ति विषय इति द्वयोर्योगे सङ्कर एव । उपपत्तिपर्यालोचने तूपमाया एवायं युक्तो विषयः, अन्यथा विषयापहार एव पूर्णोपमायाः स्यात् ।

न चेति । निर्विषयत्वं तद्विषयबहिर्भावः । उभयत्रैव हि साम्यपदोद्धारे पूर्णोपमापरित्यागः । स चैवमुपमाऽन्तरे तु पुरचन्द्रमण्डलयोरपि कथञ्चित् सम्भवति ।

यद्वा कमलमिवेत्यत्राप्यर्थश्लेषोऽप्यस्ति, मनोज्ञत्वस्य प्रतिसम्बन्धिभिन्नत्वादिति । शब्दार्थश्लेषग्रस्तविषयतया श्लेषबाध्यताऽङ्गीकारे सर्वत्रैव पूर्णोपमाव्यपदेशो निरवकाशतामासादयेदित्यर्थः ।

एवं तर्हि श्लेषविषयापह्नवः स्यादिति चेदाह—**देवेति** । पाता रक्षिता, अलमत्यर्थं पर्याप्तः, पातालं नागलोकः, आशानां निबन्धनं धनादिप्रार्थनाविषयो दिशां प्रतिष्ठा च । चामराणां वालव्यजनानाम्, मरुत् पवनः. पक्षान्तरे तु त्वं चेति । चः समुच्चये । अमराणां देवानाम् । मरुतां प्रवहादिवायुस्कन्धानाम् । अमरमरुतां देववायूनामित्येके ।

यद्यप्यत्र त्वमेव पातालादि चेत्यादिरूपकं विद्यते, तथापि विविक्तविषयताऽभिहिता, तस्य व्यङ्ग्यताद्वाराऽलङ्कारापेक्षया प्रस्तुताधिकारप्रवृत्तेः, यत्नेनाभिव्यक्तस्यापि रूपकस्य श्लेषगुणाभावे तन्मुख्यताया अत्र निर्विवादत्वात् । 'येन ध्वस्तमनोभवेन' इत्यादौ तु स्पष्टमेव विविक्तविषयत्वम् । द्वयोरुपमाश्लेषयोर्योगे सति । स्वयं चेत्यादौ सङ्कर एवाङ्गाङ्गिभावरूपः । न च शब्दालङ्कारविषये नायमस्तीति वाच्यम्, अर्थानुसन्धानविरहिण्यनुप्रासादावेव तथाऽङ्गीकारात् ।

ननु श्लेषप्रतिभोत्पत्तिहेतुरुपमेति पूर्वमुक्तम्, तत् कथं सङ्कर इत्युच्यते—**उपपत्तीति** । अङ्गाङ्गिभावसङ्करः एकस्याङ्गत्वमन्यस्याङ्गित्वम् । यस्य चाङ्गित्वं तद्द्वारा व्यपदेशः । तच्चात्र युक्तिमुखेनोपमाया एव व्यवतिष्ठत इति तन्मुखेन पूर्वं व्यपदेशो युक्त इति न किञ्चिदनुपपन्नमिति भावः । केयमुपमामुख्यतायामुपपत्तिरिति शङ्कायां पूर्वोक्तामेव तां लेशतः स्मारयति—अन्यथेति । विषयापहार इति निर्विषयत्ववद् व्याख्येयम् ।

न च "अबिन्दुसुन्दरी नित्यं गलल्लावण्यबिन्दुका" इत्यादौ विरोधप्रतिभोत्पत्तिहेतुः श्लेषः, द्वितीयार्थस्य प्रतिभातमात्रस्य प्ररोहाभावात् । न च विरोधाभास इव विरोधः श्लेषाभासः श्लेषः । तदेवमादिषु वाक्येषु श्लेषप्रतिभोत्पत्तिहेतुरलङ्कारान्तरमेव ।

तथा च--

"सद्वंशमुक्तामणिः" ।।३८०।।

"नाल्पः कविरिव स्वल्पश्लोको देव महान् भवान्" ।।३८१।।

अनुरागवती सन्ध्या दिवसस्तत्पुरः सरः ।
अहो दैवगतिश्चित्रा तथाऽपि न समागमः ।।३८२।।

आदाय चापमचलं कृत्वाऽहीनं गुणं विषमदृष्टिः ।
यश्चित्रमच्युतशरो लक्ष्यमभाङ्क्षीन्नमस्तस्मै ।।३८३।।

एदमुपमाविषये क्लेषस्य बाध्यतामुपपाद्यालङ्कारान्तरविषयेऽप्युपपादयति । अप्सु प्रतिबिम्बित इन्दुरबिन्दुः[1] । गलदित्युत्प्रेक्षागर्भकम् । बिन्दुरहितानां कथं बिन्दवो गलन्तीति विरोधः । उपपत्तिमाह--नह्यत्रेति । प्रतिपादको निष्कम्पप्रतीतिकारकः, प्ररोहाभावादिति । यत्र हि विरुद्धार्थप्रतीतेराभानमाविर्भावोऽन्त्यतयैव प्राकरणिकप्रतीत्योन्मूलनम्, तत्रैव विरोधालङ्कार इति, अन्यथा दोषप्रसङ्गात् । श्लेषाभाषः श्लेष इति । तथा सति पुनरुक्तवदाभासादावतिप्रसङ्गादित्यर्थः । वंशः कुलं वेणुश्च । अत्रैकदेशविवर्तिरूपकम् । श्लेषे तु पद्यं कीर्तिश्च अत्र श्लेषव्यतिरेकः । अनुरागोऽनुगतलौहित्यमासक्तिश्च । पुरोऽग्रे सरति [पुरःसरः] । "अहो दैवगतिश्चित्रा तथापि न समागमः" इत्युत्तरार्धस्य क्वचित् पाठः । अत्र समासोक्तिः ।

अचलं पर्वतं निश्चलश्च । अहीनां नागानामिनं स्वामिनं धनुषोऽन्यूनप्रमाणं च । विषमा दुर्दशाऽस्थिरा च । दृष्टिश्चक्षुस्तद्व्यापारश्च । अच्युतो नारायणोऽनि-

---

१. अबिन्दुरित्यस्य व्याख्याप्रसङ्गे लघुवृत्तिकारः "उदकमध्यवर्तितया च योऽप्सु उदके प्रतिबिम्बित इन्दुः" इत्याह । उद्भटकृतं कुमारसम्भवकाव्यं कविकुलगुरोस्तन्नामकस्य-काव्यस्यानुरणनं विदधदिवास्ते ।

निनाय साऽत्यन्तहिमोत्किरानिला सहस्यरात्रीरुदवासतत्परा"

इति पार्वत्यास्तपःप्रकारवर्णने कालिदासवचः । उदकमध्यवर्तितयेत्यध्याहारेण प्रतिहारेन्दुराजेन तद्वस्तु स्मारितं स्यात् । "गलल्लावण्यबिन्दुका" इत्युत्प्रेक्षागर्भवर्णने 'स्थिताः क्षणम्' इत्यादिपद्यस्य प्रथमोदबिन्दूना वस्तुभूतानां भावरूपेण निवेशः समञ्जस एव ।

इत्यादावेकदेशविवर्तिरूपक-श्लेषव्यतिरेक-समासोक्तिविरोधत्व-मुचितम्, न तु श्लेषत्वम् ।

शब्दश्लेष इति चोच्यते, अर्थालङ्कारमध्ये च लक्ष्यत इति कोऽयं नयः ? किञ्च, वैचित्र्यमलङ्कार इति य एव कविप्रतिभासंरम्भगोचरस्तत्रैव विचित्रतेति सैवाऽलङ्कारभूमिः । अर्थमुखप्रेक्षित्वमेतेषां शब्दानामिति चेत्, अनुप्रासादीनामपि

र्गतश्च । लक्ष्यं शरव्यं त्रिपुराख्यं सैन्यसंख्याविशेषश्च । अभाङ्क्षीद् विध्वस्तवान् जितवांश्च । अव विरोधः ।

एवं व्यपदेशे श्लेषःसर्वालङ्कारबाधक इति दूषयित्वा 'स्वयं च' इत्यादावर्थालङ्कारत्ववादिमते पुनरपि सिंहवत् परिवृत्त्यात्रलोक्य दूषणमाह--**शब्देति** । यो हि यदाश्रयः स एव तत्सम्बन्धितया व्यपदिश्यते, ततश्च शब्दश्लेषेण व्यपदेशादर्थालङ्कार्यालङ्कारभावस्य लोकवदाश्रयाश्रयित्वनयेन शब्दालङ्कारत्वमाक्षिप्यत इत्यर्थालङ्कारमध्ये गणनम् । अयमपरोऽस्य विशेषः । "स्वयमपि लिखितं स्वयं न वाचयति" इत्याभाणकमनुकरोतीत्यर्थः ।

शब्दभङ्गस्थले शब्दयोः श्लिष्यमाणतया शब्दमूलत्वेन शब्दश्लेषता, न तदलङ्कारतयेत्याशङ्क्याह--किञ्चेति । शब्दयोर्वैचित्र्यं लोकोत्तरविच्छित्तिः । कवेः प्रतिभास्फूर्तिस्तस्याः संरम्भः सरभसमाविष्करणम् । तद्गोचरश्चात्र शब्द एव मुख्यतया तस्यैवात्रैवंविधवैचित्र्यबोधोपायत्वेन कविप्रतिभयोट्टङ्कनात् । भूमिराश्रयो धर्मीति यावत् ।

नन्वेवंधिस्य वैचित्र्यस्यार्थानुसन्धानमन्तरेणानुपलम्भ इति शब्दमूलत्वेऽप्यर्थाश्रयत्वमेवेति तदलङ्कारतैव श्रेयसीत्याशङ्कते[१]—**अर्थेति** । अर्थमुखप्रेक्षित्वं तदनुसन्धानगम्यवैचित्र्यैकतया । अत्रातिप्रसङ्गमाह--**अनुप्रासादीनामिति** ।

---

१. 'सद्वंशमुक्तामणिः' इत्यादिषु चतुर्षु लक्ष्येषु यथाक्रममेकदेशविवर्तिरूपकं श्लेषविद्धो व्यतिरेकः समासोक्तिर्विरोधश्चेत्यलङ्काराः स्फुटा एव, न तूद्भटमतश्लेषेणेव निरवकाशास्ते इति ग्रन्थकृदाकूतम् । एकदेशविवर्तीति प्राचां भामहोद्भटादीनां संज्ञा यस्यैव परम्परितेति मम्मटग्रन्थे निर्देशः । समस्तोऽयं सन्दर्भः श्लेषाख्यशब्दालङ्कारबाधकत्वेनात्र वरीवर्तीति उद्भटमतोपजीविनस्तट्टीकाकारस्य तिलकस्य मन्तव्यनिर्देश इत्यस्माकं प्रतिभाति । आद्योदाहरणं सद्वंशमुक्तामणिरिति (यस्य काव्यप्रकाशे सद्वंशमुक्तारत्नेतिरूपेण शोधनं रूपकालङ्कारप्रसङ्गे मम्मटेन विहितम्) उद्भटविवृतिनाम्ना प्रकाशिते विवरणान्तरे लभ्यते । विवरणञ्च तत्र प्राचीनटीकाकृतां तट्टीकाकृतोर्वा ग्रन्थान् सङ्कलनकल्पमित्यतिरोहितम् प्रेक्षावताम् । अत्रार्थालङ्कारपक्ष एवोद्भटमतानुयायीति तद्दूषणे आटोपो मूलग्रन्थकृतो मम्मटस्य । अयमपरोऽस्य विशेष इत्यादिना एतन्मतोप-

तथैवेति तेऽप्यर्थालङ्कारा: किं नोच्यन्ते ? रसादिव्यञ्जकस्वरूपवाच्यविशेषसव्यपेक्षत्वेऽपि ह्यनुप्रासादीनामलङ्कारता । शब्दगुणदोषाणामप्यर्थापेक्षयैव गुणदोषता । अर्थगुणदोषालङ्काराणां शब्दापेक्षयैव व्यवस्थितिरिति तेऽपि शब्दगतत्वेनोच्यन्ताम् । 'विधौ वक्रे मूर्ध्नि' इत्यादौ च वर्णादिश्लेषे एकप्रयत्नोच्चार्यत्वेऽर्थश्लेषत्वं शब्दभेदेऽपि प्रसज्यतामित्येवमादि स्वयं विचार्यम् ।

तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ॥८५॥

सन्निवेशविशेषेण यत्र न्यस्ता वर्णाः खङ्ग-मुरज-पद्माद्याकारमुल्लासयन्ति तच्चित्रं काव्यम् । कष्टकाव्यमेतदिति दिङ्मात्रं प्रदर्श्यते । उदाहरणम्—

नन्वनुप्रासादीनां शब्दश्रुतिमात्रगम्यस्वरूपाणामर्थोन्मुखता कुतस्त्येत्याह—**रसादीति**। अन्यथा वृत्तिविरोधादिदोषस्योक्तत्वादिति भावः। तदनुसन्धानानुसन्धेयरूपतामात्रेण तद्धर्मताऽङ्गीकारमात्रेण केवलमतिप्रसङ्गः। किन्तर्हि शब्दगुणदोषेष्वपीति बहुविप्लवः[१] स्यादित्याह—शब्देत्यादि उच्यन्तामित्यन्तम् । अर्थस्य गुणाः प्रसादादयः, दोषा अश्लीलादयः। नहि शब्दानुसन्धानमात्रेणानुसन्धेयाः, किन्तर्हि तथाविधार्थप्रतिपाद्याः। एवमर्थस्यापि गुणास्तत्सदृशाः प्रौढ्यादयः प्रसादादयो वा दोषाश्चाधिकादयोऽलङ्काराश्चोपमादयः शब्दापेक्षस्थितितया तदनुसन्धानान्तरेणागम्या इति शब्दधर्माः सर्वे चोभयधर्माः स्युः। यच्चोक्तमेकप्रयत्नोच्चार्यत्वेऽर्थश्लेषोऽन्यत्र तु शब्दश्लेष इति तत्राप्यतिव्याप्तिमाह—**विधाविति**। एकप्रयत्नोच्चार्यत्व इति। औकारस्यावैषम्याच्छब्दभेदे भवताऽपि शब्दश्लेषतयाऽङ्गीकृते। एवमादीति तदनुसन्धानयोग्यतया तद्धर्माङ्गीकारे सर्वेषामेव रसादिधर्मता स्यादित्यादि विचार्यं विचारविषये यथायोगमुपयोज्यम्।

वर्णानामिति। तथाविधवर्णविन्यासवशेनैव तादृशो लिपिविन्यासो निर्वहतीति वर्णान्वयव्यतिरेकार्थविधायितया शब्दाश्रितमिति भावः। अलङ्कारताबीजं चात्र कविनैपुण्याविष्कारवशेन विस्मयावेशः प्राचीनदिशा समाश्रयणीयः। सम्यक्कविविवक्षितनिर्वाहौपयिकतया निवेशो विरचनं सन्निवेशः। तस्य विशेषौ यथास्वं प्रतिनियतः। तेन हेतुना न्यस्ता वर्णा धर्मिणो यत्रालङ्कारे खङ्गमुरजपद्मादीनामाकारसदृशसंस्थानं तत्तद्विशेषव्यपदेशविषयमुल्लासयन्ति निर्वाहयन्ति तच्चित्रनामालङ्करणम्[२]। कष्टं क्लेशनिर्वाह्यं नीरसतया वैमनस्यदं वा काव्यं कविनिर्वाह्यम्,।

जीविनां मतासङ्गतिमपि पद्येन स्वयं लिखितमपि न वाचयतीत्याभाणकोल्लेखेन टीकाकारः स्मारयति। असङ्गतिस्त्वन्यथा टीकायां प्रकटितैव ।

१. विमतवादिना अस्य दर्शिताऽसङ्गत्यपाकरचेष्टा यत्र निर्दिश्यते, तस्या असद्भावञ्च प्रकटयति टीकाकरोऽत्र सन्दर्भे ।

२. वक्तृविप्लवः—क० ।

मारारिशक्ररामेभमुखैरासाररंहसा ।
साराब्धस्तवा नित्यं तदार्तिहरणक्षमा ॥३८४॥

माता नतानां सङ्घट्टः श्रियां बाधितसंभ्रमा ।
मान्याऽथ सीमा रामाणां शं मे दिश्यादुमादिमा ॥३८५॥

(खङ्गबन्धः)

सरला बहुलारम्भतरलालिबलारवा ।
वारलाबहुलामन्दकरलाबहुलामला ॥३८६॥

(मुरजबन्धः)

यद्वा कष्टेन प्राचीनगौरवयन्त्रणादुःखेन काव्यनाम्ना व्यपदेश्यं कष्टकाव्यम् । दिङ्मात्रमेतद्विषये व्युत्पत्त्याधानं यावता निर्वहति तावतेत्यर्थः ।

मारस्य कामस्यारिः परमेश्वरः शक्र इन्द्रः । रामो हलायुधः । इभमुखो गणेशः । एभिरासारसदृशरंहसा । तेषा स्तुवतामार्तिः पीडा ।

नतानां भक्तानां माता श्रियां सम्पदां संघट्टः सम्मेलनस्थानं बाधितसम्भ्रमा निरुद्वेगा रामाणां नारीणां सीमा परमोत्कर्षः शं कल्याणमादिमा आदिशक्तिः । अद्रिजेति क्वचित् पाठः ।

अनेन श्लोकद्वयेन खङ्गः प्रस्तीर्यते । ताजि(कर्णि)कान्तरे 'मा' शब्दं विन्यस्य तिर्यगधःक्रमेण 'रा' शब्दादि[1] हकारान्तं वर्णचतुर्दशकं न्यसेदित्येका धारा । ततः शिखायां सेति श्लिष्टं ततस्तिर्यगूर्ध्वक्रमेण 'रा' शब्दादि क्षान्तं वर्णचतुर्दशकं न्यस्यापरधारां कुर्यादित्येषा पट्टिका । माशब्दस्तु पूर्वं 'मा' शब्दप्रविष्टः ।

एवमपरमपि माशब्दं तत्र प्रविष्टं कल्पयित्वा तस्य दक्षिणपार्श्वे तिर्यक्क्रमेण 'ट्ट' इत्यन्तं वर्णसप्तकं न्यस्य वामपार्श्वे तिर्यग्विलोमेन 'श्रि' कारादि 'भ्र' कारान्तं वर्णसप्तकं लिखेत् । माशब्दस्तु पूर्ववदित्येषा द्राढिका । ततोऽपरं 'मा' कारं तत्र कल्पयित्वा तदुपरि 'न्या' शब्दादि 'सी' शब्दान्तं गण्डिकायां लिखेत् । ततः त्सरुमध्ये 'मा' शब्दं बिन्यस्य तन्मध्ये 'रा' कारादि 'श' मित्यन्तं वर्णचतुष्टयं न्यस्य वामतो

---

१. एवं रुद्रटस्तत्प्रकरणस्यावतारिकायाम्—

भङ्गयन्तरकृततत्क्रमवर्णनिमित्तानि वस्तुरूपाणि ।
साङ्कानि विचित्राणि च रच्यन्ते यत्र तच्चित्रम् ॥
यन्नाम नाम तत् स्यात् तदाकृतिर्लक्षणं मतं तस्य ।
तल्लक्ष्यमेव दृष्ट्वाऽवधार्यमखिलं तदन्यदपि ॥ इति ॥

द्वितीयकारिकायां 'द्वितीयनामशब्दः प्राकाश्ये' इति टीकाकृन्नमिः साधुः । इयमत्र पश्चादुद्धृता टीकाकृता ।

भासते प्रतिभासार रसाभाताहताविभा ।
भावितात्मा शुभा वादे देवाभा बत ते सभा ॥३८७॥
(पद्मबन्धः)

रसासार रसा सारसाऽऽयताक्ष क्षतायसा ।
सातावात तवातासा रक्षतस्त्वस्त्वतक्षर ॥३८८॥
(सर्वतोभद्रम्)

विलोमेन 'मे दिश्यात्' इति लिखेत् । माशब्दकः पूर्व एवेति शेषः । अन्तिमवर्णाभ्याञ्च फलकमिति खड्गनिष्पत्तिः । सरलेति प्रक्रान्तशरद्विशेषणम् । बहुलारम्भो महारम्भस्तरलानामलिबलानां भ्रमरवृन्दानामारावो यत्र । वारलाबहुला हंसीप्राया । करं लान्तीति करला राजानस्तेऽमन्दा उद्योगिनो यत्र । बहुले कृष्णपक्षे अमला नक्षत्रादिभिन्नेति शेषः । क्रमेण षड्क्तिचतुष्टये कृते प्रथमद्वितीयतृतीयपादानां यथाक्रमं प्रथमद्वितीयतृतीयवर्णानां चतुर्थपादस्य चतुर्थपञ्चमयोस्तृतीयद्वितीयचतुर्थपादानां षष्ठसप्तमाष्टमानां ग्रहणे प्रथमपादः । द्वितीयात् प्रथमं प्रथमाद् द्वितीयतृतीयौ द्वितीयतृतीयाभ्याञ्च चतुर्थे चतुर्थाद् द्वितीयतृतीयौ तृतीयात् प्रथमं गृहीत्वा द्वितीयतृतीयाभ्यां पञ्चमौ चतुर्थात् षष्ठसप्तमौ तृतीयादष्टमं गृहीत्वा द्वितीयपादः । द्वितीयादष्टमं प्रथमात् सप्तमषष्ठौ द्वितीयतृतीभ्यां पञ्चमौ चतुर्थात् षष्ठसप्तमौ तृतीयादष्टमं गृहीत्वा तृतीयपादः । चतुर्थतृतीयसप्तमषष्ठाः ? प्रथमद्वितीयतृतीयान् प्रथमाच्चचतुर्थपञ्चमौ द्वितीयतृतीयचतुर्थेभ्यः षष्ठसप्तमाष्ठमान् गृहीत्वा तुरीयः पाद। प्रस्तारे मुरजसिद्धिः ।

हे प्रतिभासार वादे रसेनाभाता हता अविभा अशोभा यस्यां सा भावितात्मा एकाग्रीभूतहृदया शुभा शोभना देवाभा देवसदृशी बत विस्मये तव सभा भासते । अत्र कर्णिकायां भाशब्दं विन्यस्यापराक्षरद्वयं यत्र तत्र दिग्दले दत्त्वा विदिग्दलेन[१] प्रवेश्य भाशब्दादुपरि वर्णद्वयाभ्यां दिग्दले निर्गमप्रवेशौ । पुनः कोणे भाशब्दोपरितनवर्णद्वयं दत्त्वा दिशा प्रवेश्य निर्गम्य च विदिशा निर्गमप्रवेशौ[२] प्रथमदिग्दलेनेत्यष्टदलपद्मविस्तारः ।

हे साररसासार ! उत्कृष्टरसाभिलाषस्य वेगवद्वृष्टे आयताक्ष ! दीर्घनयन ! सात ! सुखमय ! अवात ! अचपल ! अतक्षम् अतनूक्तिं रातीति तव भवतो रक्षतः ।

---

१. इतोधिकं 'विदिग्दलेनापरद्वयम्' इति क० लभ्यते ।

२. 'ततो विदिशा प्रविश्य निर्गम्य च प्रथमदिग्दलेनेत्यष्टदलपद्मप्रस्तार' इत्यधिकः पाठः खपुस्तके । चित्रकाव्यानां चित्राणि रुद्रटकाव्यालङ्कारे (नि०सा०सं०) , सरस्वतीकण्ठाभरणे (नि०सा०सं०), कविकर्णपूरकृतेऽलङ्कारकौस्तुभे कुतूहलिभिरवलोकनीयानि ।

सम्भविनोऽप्यन्ये प्रभेदाः शक्तिमात्रप्रकाशका न तु काव्यरूपतां दधतीति न प्रदर्श्यन्ते ।

पुनरुक्तवदाभासो विभिन्नाकारशब्दगा ।

एकार्थतेव

भिन्नरूपसार्थकानर्थकशब्दनिष्ठमेकार्थत्वेन मुखे भासनं पुनरुक्तवदाभासः । स च—

अस्तु भवतु । रसा भूः । अतासा अनुत्क्षेपा । क्षतः अस्तः आयो धनागमो यैस्तानस्यति नाशयतीति क्षतायसा । इदं सर्वतोभद्रम् । प्रतिपादं प्रतिलोमेऽपि स एव पाठः ।

अधः क्रमेण पङ्क्तिचतुष्टये कृतेऽधः क्रमेण पाठे प्रथमादि प्रथमैरुपचर्युपरि पाठे तुर्याद्यन्तिमैः प्रथमः पादः । एवं द्वितीयसप्तमैः द्वितीयस्तृतीयषष्ठैस्तृतीयश्चतुर्थपञ्चमैस्तुर्य इत्यादिवैचित्र्यमत्र प्रतिपादितम् । एवं प्रतिपादं वर्णचतुष्टयद्वयस्याध उपरि क्रमेणावृत्तावर्धभ्रमोऽपि ।

सम्भविनोऽपीति ।

तच्चक्रखड्गमुसलैर्बाणासनशूलशक्तिहलैः ।
चतुरङ्गपीठविरचितरथतुरगगजादिपादपीठैः ।।
अनुलोमप्रतिलोमैरर्धभ्रममुरजसर्वतोभद्रैः ।
इत्यादिभिरन्यैरपि वस्तुविशेषाकृतिप्रभवैः ।।

भेदैर्विभिद्यमानं संख्यातुमनन्तमस्मि नैतदलम् ।
तस्मादेतस्य मया दिङ्मात्रमुदाहृतं कवयः ।।
यन्नाम नाम यत्स्यात्तदाकृतिर्लक्षणं मतं तस्य ।
तल्लक्ष्यमेव दृष्ट्वावधार्यमखिलं ततोऽन्यदपि ।।"

इति रुद्रटोक्तदिशा शक्तिमात्रं कवेस्तद्विषये नैपुण्यमात्रम्, न तु काव्यरूपतां दधति, अत्यन्तनीरसत्वात् ।

एकार्थतेव । इवशब्देनाभासमात्रं प्रदर्श्यते । **सार्थकानर्थकेति** । यथायोगं वक्ष्यमाणभेदानुक्तप्रकारसूत्रणम् । मुखे आपाततः । स च इत्युत्तरसूत्रावतारः ।

अरिवधदा ईहा यत्र तथाभूतं शरीरमस्येति विग्रहः । साहसा[1] बलेन सन्ति

---

१. एवमुभयोरपि लिप्योः पाठः । एतत्पक्षे सहसेति अलुक्गर्भं समग्रं समस्तवाक्यम् । सन्तीति वर्तमानानीत्यर्थे मध्यमपदलोवी समास आश्रयणीयः । प्रचलितविवरणप्रथायां सहसारथिनः सारथिना सह वर्तमाना इति विवरणम् ।

शब्दस्य

सभङ्गाभङ्गरूप केवलशब्दनिष्ठः । उदाहरणम्—

अरिवधदेहशरीरः सहसा रथिसूततुरगपादातः ।
भाति सदानत्यागः स्थिरतायामवनितलतिलकः ॥३८९॥

चकासत्यङ्गनारामाः कौतुकानन्दहेतवः ।
तस्य राज्ञः सुनमसो विबुधाः पार्श्ववर्तिनः ॥३९०॥

तथा शब्दार्थयोरयम् ॥८६॥

उदाहरणम्—

तनुवपुरप्यन्योऽसौ करिकुञ्जररुधिररक्तखरनखरः ।
तेजोधाममहःपृथुमनसामिन्द्रो हरिर्जिष्णु ॥३९१॥

रथिनः सभङ्गे यथा—अरीति । सूतास्तुरगाः पादातानि च यस्य । सदा सर्वदा अनत्याऽगः । अनमनेन स्थिरतया, अगः पर्वतः । इत्थं प्राकरणिकार्थदेहादिप्रतिभासने पुनरुक्तमिव शरीरादिशब्दैः प्रतिभासते[1] ।

अभङ्गे यथा—चकासतीति । अङ्गनाभिरारमन्ते ये ते विबुधाः पण्डिताः, कौतुकेनापूर्ववस्तुदर्शनेन आनन्दस्य सन्तोषस्य हेतवः । सुमनसः प्रशस्तहृदयाः । आपाततः पुनरङ्गना रामा इति कौतुकानन्देति सुमनसो विबुधा इति चैकार्थमिवावभासते । अत्र चान्यतमस्यापि शब्दस्य परिवर्तने न तथा प्रतिभास इति शब्द मात्रालङ्कारोऽयम् ।

सम्प्रति पुनरुक्तवदाभासस्योभयालङ्कारत्वमत्रैव दर्शयति–**तथेति** । तनुवपुः कृशशरीरोऽयमप्यन्यः कृशशरीरादृष्टपूर्वपराक्रमशाली करिणां जृम्भतां कुञ्जराणां रुधिरेण रक्तान्युज्ज्वलीकृतानि खराणि तीव्राणि नखराणि यस्य । तेजसः पराक्रमस्य धामाश्रयो महसा दीप्त्या पृथूत्तुङ्गं मनो येषां तेषामिन्द्रः श्रैष्ठः । हरिः सिंहः । जिष्णुर्जयशीलः । मुखतस्तनुवपुःशब्दौ करिकुञ्जरशब्दौ रुधिररक्तशब्दौ तेजोधाममहःशब्दा इन्द्रजिष्णुहरिशब्दाश्चैकार्थवदाभासन्ते ।

एकस्मिन्निति । तनुकरिरक्तादीनां स्थाने कृशहन्तिलोहितादिविन्यासे । अपरस्मिन्निति । वपुःकुञ्जररुधिरादिस्थाने शरीरगजशोणितादिविन्यासे ।

---

१. व्याख्यानमेतदुद्द्योते नागेशभट्टेन दूषितम्––"द्वितीयपदस्य परिवृत्तिसहत्वेनोभयालङ्कारत्वापत्तौ शब्दमात्रोदाहरणत्वानुपपत्तेः" इति वदता । एतन्मते अरिवधदा इहा चेष्टा येषां तादृशा ये शरिणः शरयुक्तास्तानीस्यति प्रेरयतीति शब्दविश्लेषणभङ्गी ।

अत्रैकस्मिन् पदे परिवर्तते नालङ्कार इति शब्दाश्रयः, अपरस्मिंस्तु परिवर्तितेऽपि स न हीयत इत्यर्थनिष्ठ इत्युभयालङ्कारोऽयम् ॥

इति काव्यप्रकाशे शब्दालङ्कारनिर्णयो नाम

नवम उल्लासः ॥

[1]केचित्तु शब्दान्वयव्यतिरेकानुविधानमेकदेशे समुदाये चेति तदविशिष्टमेवेति शब्दालङ्कार एवायमित्याहुः ।

एवं "कुपतिमपि कलत्रवल्लभम्" इत्यादौ विरोधालङ्कारादिस्थले मृग्यम् । प्राचीनप्रसिद्ध्याऽर्थालङ्कृतिमध्ये गणनमिति सर्वमनाकुलम्[2] ॥

इति काव्यप्रकाशदीपिकायां शब्दालङ्कारविवेको नाम

नवम उल्लासः

१. अयमेव उद्भटीयकाव्यालङ्कारसारसंग्रहोपरि विवरणे धृतः पाठः । कृशशरीरादृष्टपूर्वपराक्रमशालीति चण्डीदासव्याख्यानेन तनुवपुरप्यजघन्योऽसावित्येव टीकाकृत्सम्मतः पाठः । श्रीधरश्रीविद्याचक्रवर्त्तिनोश्च टीकयोरजघन्यपदव्याख्यानादर्शनेन स एव पाठः प्राचीनसम्मत इति प्रतिभाति । तनुवपुरप्यजघन्योऽसाविति प्रचलितपाठे पुरुषाणां कृशत्वमाक्षिप्तं स्यादिति नारोचकम् ।

२. न्याय्यं चैतत् । भोजेन स्वग्रन्थे उभयालङ्कारकक्षाधिकारे तस्याश्च बहूनामलङ्काराणां चतुर्विंशतिरितीतरत्रैव संख्यासाम्यमाविष्कुर्वता तथैव गणितम् । मूलग्रन्थे,पि दशमोल्लासान्ते पक्षस्यास्य समर्थनं लभ्यते ।

अथ दशम उल्लासः

अर्थालङ्कारानाह—

साधर्म्यमुपमा भेदे

उपमानोपमेययोरेव, न तु कार्यकारणादिकयोः, साधर्म्यं भवतीति तयोरेव समानेन धर्मेण सम्बन्ध उपमा। भेदग्रहणमनन्वयव्यवच्छेदाय।

उल्लाससङ्गतिमाह वृत्तिकृत्—**अर्थालङ्कारेति**। शब्दालङ्कारादनन्तरं प्रकान्तमित्यर्थः। आहेति-विशेषेण[1] लक्षयतीत्यर्थः। प्रकारवैचित्र्येणानेकालङ्कृति-जीवातुत्वात्[2] प्रथममुपमां लक्षयति—**साधर्म्येति**। सधर्माणां भावः साधर्म्यम्। चातुर्वर्ण्यादित्वात् ष्यञ्। प्रथमं तावत् सर्वगतसामान्येनाविशिष्टमेव लक्षणमिति न प्रत्यक्षाद्युपनीत[3]साधर्म्येऽतिव्याप्तिः। एवमन्यत्राप्येवंविधस्थले बोद्धव्यम्।

ननु साधर्म्यमिति सम्बन्धप्रतिपादकं पदम्, स च सम्बन्धिद्वयनिष्ठः। न च तत्प्रतिपादितम्, तच्च कुतो ज्ञेयमित्याशङ्क्य सामर्थ्यलभ्यमेव तदित्याह—**उपमेति**। उपमानेति प्रकृतप्रकरणप्रत्यायकं तत्समानगुणक्रियमुपमानं चन्द्रादिसमानक्रियागुण-मप्रकृतप्रत्याचयोत्कर्षाधिकरणम्, प्रकृतमुपमेयं वदनादि। **कार्यकारणादिकयोरिति**। साधर्म्ये सति तयोरपि तदन्तर्भावादित्यर्थः। समानेनेति सदृशेनेत्यर्थः। सादृश्यञ्च 'कमलमिव सुरभि मुखम्' इत्यादौ साजात्यम्।

"पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन।
आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः॥"

इत्यादौ बिम्बप्रतिबिम्बभावे समानाकारत्वम्।

"साऽलङ्कृति[4] मृदुवचोरचनाऽभिरामं माधुर्यधुर्यमवलम्बितसौकुमार्यम्।
कान्तामुखेन्दुसुभगं कविसूक्तिसारं जागर्ति सन्ततरसं सुकविप्रणीतम्॥"

---

१. विशेषतो लक्षयति—क०।

२. वैचित्र्येणालङ्कृतिबीजत्वात्—क०।

३. प्रत्यक्षाद्युपमित—क०।

४. एवमुभयोरेव मातृकालिप्योः पाठः। परं तथात्वे छन्दोभङ्गः। सालङ्क्रियमिति पाठः स्यात्। एवमपि भामिनीविलासीये पण्डितराजपद्ये—
"निर्दूषणा गुणवती रसभावरम्या सालङ्कृतिः श्रवणमङ्गलवर्णराजिः।
सा मामकीनकवितेव मनोऽभिरामा रामा कदापि हृदयान्मम नापयाति॥" इति।

पूर्णा लुप्ता च

उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानामुपादाने पूर्णा, एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता ।

साऽग्रिमा ।

श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा ॥८७॥

अग्रिमा पूर्णा । यथेववादिशब्दा यत्परास्तस्यैवोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणान्येते, तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत् सम्बन्धं प्रतिपादयन्तीति तद्भावे श्रौत्युपमा । तथैव "तत्र तस्येव" इत्यनेनेवार्थे विहितस्य वतेरुपादाने ।

एवमादौ तु समानशब्दनिवेद्यत्वम् ।

ननु भिन्नयोरेव साधर्म्यं इति भेद इत्यनर्थकमिति, अनन्वये त्वेकस्यैवाऽऽहार्यभेदमादाय साधर्म्यमुपमानोपमेयता चोपनिबध्यते । तद्व्यवच्छेदकं चात्र पारमार्थिकभेदपरं भेदग्रहणमित्यर्थः ।

उपमां सामान्यतो लक्षयित्वा भेदलक्षणार्थमाह—पूर्णेति । लक्ष्यपदप्रत्यालोचनेनैव लक्षणलाभ इत्यत आह—**उपमानेति** । उपमाप्रतिपादका इवादिशब्दाः । एकस्य चतुर्ष्वपमेयं त्यक्त्वा कस्यचिद् द्वयोस्त्रयाणां वेति । वृत्तिरत्र द्वयमेव लक्ष्यदर्शनादग्रे प्रपञ्चयिष्यति[1] । लोपेऽनुपादाने ।

प्रभेदमुक्त्वा[2] तत्प्रभेदद्वयमाह—**सेति** । श्रूयत इति श्रुतिः शब्द, तेन साक्षादेव द्योतिता श्रौती, तदितरा आर्थी । वाक्यं वैयाकरणभाषया समासाभावः । अग्रिमा पूर्णा, समनन्तरसूत्रे प्रथममुपात्तत्वात् । यत्परा यतः परमुपात्तास्तस्यैवोपमानताप्रतीतिरिति । यद्यप्येते यथेवादिशब्दा उपमानविशेषणान्युपमानानन्तरप्रयुक्ततुल्यादिपदसाधारणानि, तथापि समर्थसादृश्यलक्षणं श्रुत्यैव श्रुतिमात्रेणैव प्रतिपादयन्ति । न पुनस्तुल्यादिशब्दवदर्थानुसन्धानान्तरव्यापारका इति योजना ।

तद्धिते श्रौती व्युत्पादयति—**तथेति** । यथेववादीनामुपादान इत्यर्थः ।

साम्यपर्यालोचनयेति । साम्यं समानधर्मयोगस्तस्य पर्यालोचनोपमानोपमेयधर्माणामभेदप्रतीतिः 'कमलसदृशं सुरभि मुखम्' इत्यादौ हि कमलमिव मुखं सुरभीत्यादिवत् झटित्येव द्वयोरपि सौरभ्यान्वयो न प्रतीयते, किन्तु कमलसदृशमिति विचारान्तरमेव ।

---

१. धर्मोपमाद्योतकयोर्धर्मोपमानोपमाद्योतकोपमेययोर्द्वयोर्धर्मादीनामन्यतमानामिति त्रयाणां लोपे।

२. भेदयुक्ते–क० ।

'तेन तुल्यं मुखम्' इत्यादावुपमेये एव 'तत्तुल्यमस्य' इत्यादौ चोपमाने एव, 'इदं च तच्च तुल्यम्' इत्युभयत्रापि तुल्यादिशब्दानां विश्रान्तिरिति साम्यपर्यालोचनया तुल्यताप्रतीतिरिति साधर्म्यस्यार्थत्वात्तुल्यादिशब्दोपादाने आर्थी। तद्वत् 'तेन तुल्यं क्रिया चेद्वतिः' इत्यनेन विहितस्य वतेः स्थितौ।

"इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च" इति नित्यसमासे इवशब्दयोगे समासगा। क्रमेणोदाहरणम्—

स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा ॥३९२॥

चकितहरिणलोललोचनायाः किमपि रुषाऽरुणतारहारिकान्ति।
सरसिजमिदमाननं च तस्याः सममिति चेतसि सम्मदं विधत्ते ॥३९३॥

अत्यायतैर्नियमकारिभिरुद्धतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः।
शौरिर्भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीविलासभवनैर्भुवनं बभार ॥३९४॥

एवं वाक्ये आर्थीमुक्त्वा तद्धित आह—तद्वदिति। तुल्यादिपदवद्व्याख्यासौकर्येण पश्चादुपात्तमपि तद्वदिति पदमुपमाऽर्थानुगुणतया 'वाक्य' इति पदव्याख्यानन्तरं व्याख्याय समास इति श्रौत्यनुगुणसाचिव्येन सर्वं द्रष्टव्यमिति व्याचष्टे। इवशब्दयोग इति नियमपरम्। यथेवादिभिः समाससमाधानेऽस्त्वेवंविधः समासो येषां नानुमतस्तेषामेव त्रिधा श्रौत्यपि नास्ति। एतदेवासूत्रयितुं वाक्यगतश्रौतीव्युत्पादनपरे यथेववाशब्दा इत्यादाविवशब्दस्य प्रयोगः। आर्थी तु समासगा वाक्यगतार्थीव्युत्पादनेनैव व्युत्पादितप्रायेति पृथङ्नोक्ता।

क्रमेण सौत्रेणेति यावत्[१]। पत्युः स्वाधीना [२]स्वाधीनपतिव्रतेत्यर्थः। तस्याः प्रभावस्य प्रभवमाश्रयम्। अत्र न मुञ्चतीति साधारणधर्मः, यथाशब्दश्चोपमाद्योतकः। किमपि किञ्चिद् रुषा कोपेनारुणा तारहारिणी अत्यन्तमनोहरा भवतीति भावः। क्रुधि तरुणारुणेति पाठे क्रुधि सत्यां तरुणारुणवत् तारहारिणी। अत्रोत्तरार्धगतोपमाऽपि प्रकृतोपयोगिनी। सम्मदविधानं साधारणम्। उपायैः सामदानभेददण्डैः।

यद्यपि मानोपेक्षे रसान्तरमप्युपायतयेति सप्तोपायास्तथाऽपि तेषां कैश्चिन्नीतिशास्त्रविद्भिरनुक्तत्वाल्लोकाप्रसिद्धत्वाच्च चत्वार एवोपायाः। गङ्गाभुजङ्गवदिति। इवार्थे वतिः। निदाघाम्बररत्नवदिति तुल्यार्थे। अत्र चानुशासनव्युत्पन्नानां

---

१. क्रमेण सौत्रेणेतीयानेव पाठः—ख०।
२. स्वाधीनः आयत्तः पतिर्यस्या सा इति विग्रहः।

अवितथमनोरथपथप्रथनेषु प्रगुणगरिमगीतश्रीः ।
सुरतरुसदृशः स भवानभिलषणीयः क्षितीश्वर न कस्य ॥३९५॥

गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत् ।
दुरालोकः स समरे निदाघाम्बररत्नवत् ॥३९६॥

स्वाधीनपतिका कान्तं भजमाना यथा लोकोत्तरचमत्कारभूस्तथा जयश्रीस्त्वदासेवनेनेत्यादिना प्रतीयमानेन विना यद्यपि नोक्तैवैंचित्र्यम्, वैचित्र्यं चालङ्कारः, तथापि न ध्वनिगुणीभूतव्यङ्ग्यव्यवहारः । न खलु व्यङ्ग्यसंस्पर्श-

---

प्रत्ययार्थानुसन्धानात् सादृश्यप्रतीत्यविलम्बविलम्बौ सुप्रतिपादौ[1] । तदव्युत्पन्नानां तु काव्यपरीक्षाऽनधिकारित्वमेव । समग्रकाव्याङ्गोपाङ्गव्युत्पत्तिविज्ञानिन एव मुख्यतस्तत्परीक्षकाः ।

अत्र सर्वालङ्काराणां ध्वनिगुणीभूतव्यङ्ग्यचित्रात्मकत्रिविधकाव्याङ्गता यद्यपि ध्वनितन्त्रविशारदैरङ्गीक्रियते, तथापि चित्रान्तर्गत एव समस्तालङ्कारवर्गप्रपञ्चः । चित्रं च विद्यमानेऽप्यस्फुटरसादौ भवतीति वादिनां मतमाश्रित्यास्फुटव्यङ्ग्यं काव्यं चित्रमुच्यते । तद्गता एवालङ्कारा उदाहर्तव्याः, तेषां तद्धर्मत्वात् । तेषु चोदाहरणेषु वस्तुरूपस्य व्यङ्ग्यस्योद्भटस्य प्रायेण क्वचित्तु रसस्यापि सम्भेदोऽस्ति ।

किञ्चोपमादिविषयेऽन्यदपि शब्दार्थालङ्करणं क्वचन दृश्यते । ततश्च सङ्करेण व्यपदेशो न्याय्यो न पुनरेकान्तमुपमादिनेति शङ्कां निराचष्टे--स्वाधीनेति । लोकोत्तरः सामान्यलोकवृत्तं विषयीकृत्यानुत्पद्यमानश्चमत्कारो विस्मयस्तस्य भूर्विषयो वैचित्र्यम्, [2]काव्यव्पदेशजीवातुभूतभावुकमनोविस्तारोऽत्र चमत्कारानुगुण्यम् । न खल्वित्यादिना वस्तुरूपस्यास्य ध्वनिगुणीभूतव्यङ्ग्यव्यपदेशबीजस्फुटत्वाभावः प्रदर्श्यते । वाच्यस्य वैचित्र्यं परस्परसदृशधर्मद्वयोपश्लेषात्मकम् ।

एतदुक्तं भवति-त्रिविधं हि व्यङ्ग्यं प्रधानमप्रधानञ्च अस्फुटं चेति । तत्राद्यद्वयं यथायथं ध्वनिगुणीभूतव्यवहारस्य निदानम्, चरमं तु चित्रव्यवहारस्य । तत्र चोक्तरूपं व्यङ्ग्यं स्फुटप्रतीयमानं नानुभूवते । किन्त्वनवस्थितप्रायं[3] वाक्यार्थप्रत्ययानन्तरं विवेचनायामेव स्फुटं प्रतिभासते । रसादिसम्भेदेऽपि चित्रता, न

---

१. न चार्थ्यामुपमायां सदृशस्य वाच्यतया सादृश्यस्यावाच्यत्वेनाव्याप्तिरिति वाच्यम्, शक्यताऽवच्छेदकसादृश्येऽपि शक्तिमत्त्वेन तस्यापि वाच्यत्वादिति राकागमे गागाभट्टानां पूर्वपक्षमुखेनोत्थापिताया असङ्गतेः समाधानम् ।

२. व्यपदेशबीजभूत--क० ।

३. किन्त्वनवसितप्रायम्--ख० ।

परामर्शादत्र चारुताप्रतीतिः, अपि तु वाच्यवैचित्र्यप्रतिभासादेव। रसादिस्तु व्यङ्ग्योऽर्थोऽलङ्कारान्तरं च सर्वत्राव्यभिचारीत्यगणयित्वैव तदलङ्कारा उदाहृताः। तद्रहितत्वेन तूदाह्रियमाणा विरसतामावहन्तीति पूर्वापरविरुद्धाभिधानमिति न चोदनीयम्।

तद्वद्धर्मस्य लोपे स्यान्न श्रौती तद्धिते पुनः।

धर्मः साधारणः। तद्धिते कल्पबादौ त्वार्थ्येव। तेन पञ्च। उदाहरणम्—

ध्वनिः, अलङ्काराणामेवात्र प्राधान्येन विवक्षितत्वात्[1] तत्तद्रसास्वादनप्रत्यग्रव्यग्रे भावुकचेतसि रसादेदुर्लभत्वात्। अलङ्कारान्तरसम्भेदेऽपि च प्रधानेनैव व्यपदेश इति नयेन न काचित् क्षतिः। न च रसादिभिरलङ्कारान्तरैश्च सर्वथा सम्भेदरहित उपमादिविषयोऽस्तीत्याह—**रसादीति**। अगणयित्वैवेति। औदासीन्यमवलम्ब्येत्यर्थः।

ननु चन्द्र इव धवलः पट इत्यादौ लौकिकवाक्ये कविवाक्ये चैवंविधे रसादिभिरलङ्कारान्तरैश्चासङ्कीर्ण उपमादिविषयोऽस्ति, तत्कथं सङ्कीर्णविषयता भवेदित्याह—**तद्रहितत्वेनेति**। विरसतामिति। एवंविधवाक्यानामकाव्यतयैतद्गतोपमादीनामप्यकाव्याङ्गत्वेन रसानुपकारकतयाऽलङ्कारत्वमिति सुधीभिर्विभाव्यम्। 'शब्दचित्रं वाच्यचित्रम्'' इति वृत्तौ चित्रमिति गुणालङ्कारयुक्तमित्यलङ्काराणां चित्रधर्मस्यापरत्र च प्रकृतोदाहरणादिध्वनिगुणीभूतव्यङ्ग्ययोरप्यङ्गत्वस्य विरुद्धयोरभिधानं पूर्वापरविरुद्धाभिधानम्। न चोदनीयमिति। प्राचीननये समनन्तरोक्तदिशा साम्प्रदायिकमते च शब्दार्थोभयालङ्काराणां ध्वनिगुणीभूतव्यङ्ग्याख्यकाव्यद्वयविलक्षणचित्राख्यकाव्यावयवस्याङ्गतया दोषाभावात्।

एवं षड्विधां पूर्णामुक्त्वा लुप्ताप्रपञ्चे वक्तव्ये एकलोपं तावत् प्रपञ्चयति—**तद्वदिति**। पूर्णावदित्यर्थः। अत्रापवादमाह—**नेति**। इवादिसमानार्थतद्धितविषये एवंविध उपमाया अभावादित्यर्थः। एवमुत्तरत्रापि विषयसङ्कोचेऽयमेव न्यायोऽनुसन्धेयः। साधारणः सादृश्यप्राणभूतगुणक्रियादिरूपः। साधारणगुण इति पाठे गुणशब्देन क्रियाऽप्युपलक्ष्यते[2]। तेनेति प्राचीनेनैव क्रमेण। चेत इति सम्बुद्धिः।

---

३. न खल्वलङ्कारकाराणां रसध्वनौ निर्बन्धो यथा चित्रविषयके सिद्धान्ते ध्वनिवादिनाम्। तथापि तद्विषयविभागलोभादुदाह्रियमाणास्ते न चमत्काराय कल्पन्ते। इत्थं गुणीभूतव्यङ्ग्यालङ्कारयोः प्रकारोऽप्यावापोद्वापबुद्ध्यैव विवेचनीय इत्यभियुक्तानां वचनमत्र प्रमाणम्।

१. साधारणधर्मत्वमेव साधर्म्यलक्षणघटकम्। साधारणगुण इति पाठः क्वाचित्कत्वादुपेक्षणीयः। क्रियायाः गुणान्तर्भावो गुणशब्दनिर्वचनेन लब्धो भाक्त एव, परं प्राचीनानां वामनादीनां गुणलेशतः साम्यमुपमेति लक्षणदर्शनेन नातिनिर्बन्धमूलकः सः।

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः ।
करणीयं वचश्चेतः सत्यं तस्यामृतं यथा ।।३९७

आकृष्टकरवालोऽसौ संपराये परिभ्रमन् ।
प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः ।।३९८

करवाल इवाचारस्तस्य वागमृतोपमा ।
विषकल्पं मनो वेत्सि यदि जीवसि तत् सखे ।।३९९

उपमानानुपादाने वाक्यगाऽथ समासगा ।।८८।।

सअलकरणपरवीसामसिरिविअरणं ण सरसकव्वस्स ।
दीसइ अहव णिसम्मइ सरिसं अंसंसमेत्तेण ।।४००
(सकलकरणपरविश्रामश्रीवितरणं न सरसकाव्यस्य ।
दृश्यतेऽथवा निशम्यते सदृशमंशाशमात्रेण ।।
इति संस्कृतम्)

'कव्वस्स' इत्यत्र 'कव्वसमं' इति, 'सरिसं' इत्यत्र च 'णूणं' इति पाठे एषैव समासगा ।

वादेर्लोपे समासे सा कर्माधारक्यचि क्यङि ।

कर्मकर्त्रोर्णमुलि

वाशब्द उपमाद्योतक 'इति वादेरुपमाप्रतिपादकस्य लोपे षट् समासेन, कर्मणोऽधिकरणाच्चोत्पन्नेन क्यचा, कर्तुः क्यङा, कर्मकर्त्रोरुपपदयोर्णमुला च भवेत् ।

अमृतवचसोः साम्यं परिणतिसौहित्यादिनोक्तम् । संपराये संग्रामे । सकलानां कृत्यानां करणस्य विश्रामेण निरोधेन श्रीर्यत्र तथाभूतं विरचनं विरचनीयम् । 'कव्वसमं' इति पाठे यद्यपि श्रौत्यपि सम्भवति, तथापि प्राचीनैरनादृतत्वात्तथा नोक्तम् । अत्र व्यतिरेकस्योपमामूलतयोपमासामग्री[1] ग्राह्या । सा च काव्ये प्रतिनिधिवस्त्वन्तरस्य गम्यमानत्वादसमग्रेत्येकलोपः ।

---

१. एतत्तु "पद्मं बहुरजश्चन्द्र" इत्याद्याचार्यदण्डिप्रदर्शितोदाहरणानां दृष्टचोपमाव्यपदेशसमर्थनाय प्राचीनप्रयुक्तस्योपमाप्रपञ्चपदस्यालङ्कृतिसामान्यपरत्वपक्षमुररीकृत्य गुप्तपादा अप्याहुः—"उपमाप्रपञ्च एव सर्वोऽलङ्कार इति विद्वद्भिः प्रतिपन्नमेव" इति । "उपमा कविवंशस्य मातैवेति मतिर्मम" इति कविविपश्चितामुद्भावनमप्येतदर्थेऽनुकूलम् । प्रायो नव्यैर्गृहीतानामलङ्काराणामुपमातः कालक्रमाद् युक्तिबलेन विश्लेषणं विचारचर्चासमुत्थमिति ज्ञायते । प्राचीनप्रतीच्यकोविदानां मतनिष्कर्षोऽप्येतत्कल्पे समन्वयसाधकः ।

उदाहरणम्—

[1]ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता ।।४०१

तथा—

असितभुजगभीषणासिपत्रो रुहरुहिकाऽऽहितचित्ततूर्णचारः ।
पुलकिततनुरुत्कपोलकान्तिः प्रतिभटविक्रमदर्शनेऽयमासीत् ।।४०२

पौरं सुतीयति जनं समरान्तरेऽसावन्तःपुरीयति विचित्रचरित्रचुञ्चुः ।
नारीयते समरसीम्नि कृपाणपाणेरालोक्य तस्य चरितानि सपत्नसेना ।।४०३।।

षडिति समासे कर्मधारयोः क्यचि क्यङि कर्मकर्त्रोर्णमुलोरिति गणनया । कर्मणः कर्मत्वोपगृहीतार्थप्रतिपादकत्वेनाभिसंहितायाः प्रकृतेः । एवमधिकरणादिष्वपि क्यचा क्यङा णमुलेति । अत्र द्योत्येति शेषः । तथेति । अस्मिन्नेवार्थे उदाहरणमिति शेषः

असिपत्रेति । सूक्ष्मनिशिताग्रतया पत्रम् । रुहरुहिकाम् औत्सुक्यं तेनाहितः समर्पितश्चित्ते तूर्णचारस्त्वरया रणसञ्चरणं यस्य । चरितानि क्रीडतानि । निदाघघर्मांशुदर्शं पश्यन्तीति "कषादिषु तैरेवानुप्रयोगः" इत्यनुशासनाद् द्विरुक्तिः प्रत्येकं कर्मणोः सम्बन्धत्वविवक्षया साध्वी । पार्थो धनञ्जयः । अत्र श्रौत्यादिविशेषचिन्ताविरहो यथातुल्यादिविरहात् ।

ननु नारीयत इत्यादौ कथमौपम्यप्रतिपादकभावः, क्यङादीनामेव तदर्थविवक्षया तत्कर्मक्षमत्वात् । अथैषां प्रत्ययत्वेनास्वतन्त्रतया इवादिशब्दप्रयोगाभावेन च न सम्यगौपम्यप्रतीतिरिति ब्रूषे, तर्हि वतिकल्पबादावपि तथैव प्रसज्येत । नहि प्रत्ययतया तद्धिताख्यातयोः कश्चन विशेषः । कल्पबादय इवादितुल्यतयौपम्यवाचकाः, क्यङादयस्तु द्योतका एवेत्यपि न, इवादीनामपि वाचकत्वसन्देहात् । सम्भवतु तेषां वाचकत्वम्, तथापि समुदितमेव पदं वाचकं प्रकृतिप्रत्ययौ स्वस्वार्थबोधकाविति मतद्वयेऽपि वत्यादिक्यङाद्योः साम्यमेवेति सत्यम्, तथापि प्राचीनानुरोधनियन्त्रितोऽयमाचार्यः ।

उपमासामग्र्यामुपमानोपमेयतद्गतसाधर्म्यादयो गृह्यन्ते । ते च सर्व एव तिष्ठन्ति, परं सादृश्यतो विलक्षणतायाः प्रतिभासेनोभयथाप्याश्रयव्याप्तिरक्रियत इत्यत्र समग्रत्वं तस्याः ।

१. ततः कुमुदनाथेनेत्युद्भटेन भामहविवरण उपमात्वेनैब गृहीतम् । तत्र च वामनमतलब्धविषयकस्य कविप्रसिद्धिमूलकसादृश्यस्य खण्डनमस्ति । वस्तुतस्तु नवीनानां मतेऽत्र प्रतीपालङ्कारस्पर्शः स्फुटः ।

मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे।
स पुनः पार्थसञ्चारं सञ्चरत्यवनीपतिः ॥ ४०४ ॥

३३१ एतद्द्विलोप क्विप्समासगा ॥८९ ॥

एतयोर्धर्मवाद्योः। उदाहरणम्—

सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः।
यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि ॥४०५ ॥

परिपन्थिमनोराज्यशतैरपि दुराक्रमः।
संपरायप्रवृत्तोऽसौ राजते राजकुञ्जरः ॥४०६ ॥

"उपरोधो न कर्तव्यः कर्तव्यः परिमाणतः।
उपरोधस्य महात्म्यान्नोक्षा भवति गर्भिणी ॥"

इत्यादिपद्येन तादृशनिष्कर्षतः शङ्कसङ्कुचितानि सङ्कटानि प्रविशतीत्यत्र किं ब्रूमः ?[१]

वस्तुतस्तु सुतीयतीत्यादौ स्नेहनिर्भरत्वादेर्गम्यमानतया[२] धृता निचिता करमिलिता तरङ्गिता सम्मदोत्तरलिता। अर्थिततिर्याचकचयः। प्रभावो माहात्म्योत्कर्षः। जेतुं सप्रवणीकर्तुमित्यादिकेति। आदिशब्देनोदाहृतिप्रकारान्तरसंग्रहः।

एवंविधेति। यथा "शुकमुखद्युति किंशुकमाभवौ" इत्यादौ लौकिकी, "सद्योमुण्डितमत्तहूणचिबुकप्रस्पर्द्धि नारङ्गकम्" इत्यादौ चोत्पादिता, "पाण्ड्योऽयम्" इत्यादौ बिम्बप्रतिबिम्बभावः,

"यान्त्या मुहुर्वलितकन्धरमाननं तदावृत्तवृन्ताशतपत्रनिभं वहन्त्या।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या गाढं निखात इव मे हृदये कटाक्षः ॥'

इत्यादौ वलितत्वावृत्तत्वस्यैव धर्मस्य सम्बन्धिभेदनिर्देशः।[२]

धर्मलोपोदाहरणान्यमून्येवंविधविचारान्तरङ्गदशायामन्वितोभयलोपोदाहृतियोग्यानि। प्रकृतोदाहरणं पुनरेवं प्रत्ययलोपच्छले कातन्त्रदिशा।

"कुर्वन् घोरविरावं गर्दभति प्रसभमस्य पृष्ठोऽयम्।
तापतनुर्विधुरपि सवितरति प्रियवियोगिन्याः ॥"

इत्यादि मृग्यम्[३]। परिपन्थिनः शत्रवः। मनोराज्यं मनोरथम्।

---

१. साहित्यदर्पणकारा मान्यानामुपजीव्यानामेतेषामेव मतमत्रोपजीवन्तीति तद्ग्रन्थतः प्रतीयते। परं मम्मटमतेऽसङ्गतिप्रदर्शने निर्बन्धोऽनेन टीकाकृता तस्य प्राचीनानामुद्भटादीनां पारतन्त्र्यघोषणापरः।

२. 'धृता' इत्यादिः 'निर्देशः' इत्यन्तो दीर्घः सन्दर्भः 'अनवरत' इत्याद्यंशस्य टीका मूललिपिपत्रव्यत्यासाद् विपर्यस्तप्राया।

३. अत्र टीकाकृतां विवृत्तौ क्रमभङ्गः सूचीकटाहन्यायेन समर्थनीयः।

१३२ धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते ।

ढुण्ढुण्णन्तो मरिहसि कण्टअकलिआइं केअइवणाइं ।
मालइकुसुमसरिच्छं भमर भमन्तो ण पाविहिसि ॥४७॥
(टुण्टुणायमानो मरिष्यसि कण्टककलितानि केतकीवनानि ।
मालतीकुसुमसदृक्षं भ्रमर भ्रमन् न प्राप्स्यसि ॥ इति छाया) ॥

'कुसुमेण समं' इति पाठे वाक्यगा ।

१६३ क्वचि वाद्युपमेयासे

आसे निरासे ।

अरातिविक्रमालोकविकस्वरविलोचनः ।
कृपाणोदग्रदोर्दण्डः ससहस्रायुधीयति ॥४०८॥

अत्रात्मोपमेयः ।

टुण्टुण्णतो समुत्पतन्नवस्थितं चङ्क्रम्यमाणः । कलिआइँ कलितानि । 'कुसुमेन समम्' इति पाठे यद्यपि श्रौतीसम्भवस्तथापि प्रसिद्धिविरहादयमनादृतः ।

आसे निरास इति । अनुपादान इत्यर्थः । कैश्चित्[1] पुनरार्थ्यादिरिति (रीतिः?) विसंवादः ? तथाप्येतद्विवादस्य प्रकृतानुपयोगितया प्रायिका (प्रमाणिका ?) प्रसिद्धत्वेन पाणिन्यादितन्त्रमेवाश्रितवान्[2] ग्रन्थकृत् ।

ननु कणादोक्ता (कलापोक्ता ?)नुशासनविरहादेव तद्विषयो न विशिष्यते । यत्तु केनचिदुक्तं वत्यादय इवाद्यर्थेऽनुशिष्यन्ते, क्यजादयस्त्वाचारार्था इति वैषम्यमिति, तदति रिक्ततरम् । नहि क्यजादय आचारमात्रार्थाः, किं तर्हि सादृश्याचारार्था इति विधवतीत्यादौ पाणिन्यादिभिः क्विबन्तं विशिष्यते (क्विबन्तमनुशिष्यते) सहस्रायुधैः सह वर्तत इति ससहस्रायुधः, स इवाचरति स सहस्रायुधीयति । न तु स इति भिन्नं पदम्, उपमेयानुपादानविरहप्रसङ्गात् ।

समानधर्मानाह विशेषणपदद्वयार्थम्—अत्रात्मेति। केवलस्य[3] तस्मादेव (तस्य) सहस्रायुधात् सोऽर्थः, कृत्याक्षमत्वेनान्यत्वादिति भावः। अत्र पूर्वोक्त एव न्यायोऽसन्देहार्थः ।

---

१. एवमुभयोरपि लिप्योरसंलग्नप्रायः पाठः । आस्थितवानिथत्यतः पश्चाद् इत्याहेति शेषोऽध्याहार्यो न वेति पाठभ्रंशाद् न निश्चीयते । एवमपि नन्विति वाक्ये ।

२. श्रीधरकृतविवेकेऽस्य मन्तव्यस्यांशिकत्वेन लाभस्तन्मतमेवाक्षिप्तमित्यनुमापयति । परन्तु चिन्त्यमिदम्, दूषितं च दर्पणे । एषु स्थानेषूत्प्रेक्षैव सम्भावनोत्थापनादिति तद्विवरणे सा० द० लो० ।

३. एवमपि—उभयत्र पाठः ।

१३४ त्रिलोपे च समासगा ॥९०॥

त्रयाणां वादिधर्मोपमानानाम् । उदाहरणम्—

तरुणिमनि कृतावलोकना ललितविलक्षवितीर्णविग्रहा[१] ।
स्मरशरविसराचितान्तरा मृगनयना हरते मुनेर्मनः ॥४०९॥

अत्र सप्तम्युपमानेत्यादिना यदा समासलोपौ भवतस्तदेदमुदाहरणम् ।

क्रूरस्याचारस्यःशूलतयाऽध्यवसायादयःशूलेनानुहरति आयःशूलिक इत्यतिशयोक्तिः, न तु क्रूराचारोपमेय-तैक्ष्ण्यधर्म-वादीनां लोपे त्रिलोपेयमुपमा ।

एवमेकोनविंशतिर्लुप्ताः, पूर्णाभिः सह पञ्चविंशतिः ।

असङ्कीर्णपद्यतोदाहृतिस्तु—"गर्दभति श्रुतिपरुषं सततं (व्यक्तं) निनदन् महात्मनां पुरतः" इति । गर्दभतीत्यादौ विधवतीत्यादौ च सादृश्यप्राणतया सा ।

"कस्तूरीतिलकन्ति भालफलके देव्या मुखाम्भोरुहे ।
रोलम्बन्ति तमालवालमुकुलोत्तंसन्ति मौलावपि ।
याः कर्णे विकचोत्पलन्ति कुचयोरंसे च कालागुरु ।
स्थासन्ति प्रथयन्तु तास्तव शिवं श्रीकण्ठकण्ठत्विषः ॥

इत्यादाविवालङ्कारसर्वस्वकारोक्तदिशोत्प्रेक्षापर्यवसानं प्रायः[२] ।

विलक्षः पराधीनीकृताः विसरः समूहः । हरते हरति । मृगस्य नयने इव दीर्घे चञ्चले वा नयने यस्या इति विग्रहे उपमानोत्तरस्य लोपः । कालाम्बा (कालापा) नुशासनिकशङ्कां परिहरति—**अत्रेति** । समासो लोपश्च यदा तदैवं निष्पाद्यत इति वाक्यशेषः । अत्र केचिदुपमेयधर्मवादिलोपः[३] त्रिलोपप्रकारान्तरमस्तीति मन्यन्ते तान् प्रत्याह—**क्रूरस्येति** । अनुहरति[४] व्यवहरति । अतिशयोक्तिरिति । विषयिणा विषयनिगरणमध्यवसायः । स च व्यापारप्रधानो व्यापार्यप्रधानश्च यथायथमुत्प्रेक्षाऽतिशयोक्तिविषयः । अयं चात्र द्वितीयः पर्यायो न तु सादृश्यमात्रप्रतीतिविश्राम इति नोपमेत्यर्थः ।

---

१. अत्र विलासवितीर्णविग्रहेति प्रचलितः पाठः ।

२. अत्र यद्यपि सर्वप्रातिपदिकेभ्यः क्विबित्युपमानात् क्विब्विधा आमुख उपमाप्रतीतिस्तथाऽप्युपमानस्य प्रकृते सम्भवौचित्यासम्भवेन उत्प्रेक्षायां पर्यवसानमिति तेषामुक्तिस्तथा निर्देशे हेतुः ।

३. धर्मे वादिलोपस्तमित्यर्थेऽयम् ।

४. अन्विच्छतीति पाठःश्रीधरादिसम्मतः । तत्रान्विच्छतीति अनुसरतीत्यर्थे—इति वैयाकरणाः ।

अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विता।
मम्लौ साऽथ विषादेन पद्मिनीव हिमाम्भसा ॥४१०

इत्यभिन्ने साधारणे धर्मे,

ज्योत्स्नेव नयनानन्दः सुरेव मदकारणम्।
प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी ॥४११

इति भिन्ने च तस्मिन्, एकस्यैव बहूपमानोपादाने मालोपमा। यथोत्तरमुपमेयस्योपमानत्वे पूर्ववदभिन्नभिन्नधर्मत्वे —

अनवरतकनकवितरणजललवधृतकरतरङ्गितार्थिततेः।
भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरतिविमला ॥४१२

मतिरिव मूर्तिर्मधुरा मूर्तिरिव सभा प्रभावचिता।
तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषाम् ॥ ४१३

इत्यादिका रशनोपमा च न लक्षिता, एवंविधवैचित्र्यसहस्रसम्भवादुक्तभेदानतिक्रमाच्च।

एवं पूर्वोक्तरीत्यैकलोपे पञ्च, द्विलोपे त्रयोदश, त्रिलोप एकेत्यूनविंशतिः। पूर्णाभिः षड्भिः। अभिन्न एकपदबोध्ये। न त्वेकत्र तदीये प्रतिसम्बन्धिस्थानेऽभिन्नरूपत्वात्।

एवमत्र 'शुकमुखद्युति' इत्यत्र धर्मोपमानेवादिलोपः, 'मत्तहूण'[1] इत्यादौ धर्मलोपः, समास इत्यादौ स्वयमूह्यम्। एवकारो वैचित्र्यस्फोरणार्थः। भिन्ने भिन्नशरीरेऽभिन्नपदबोध्ये च। **यथोत्तरमिति**। उत्तरोत्तरक्रमेणेत्यर्थः। पूर्ववन्मालोपमावत्। **अभिन्नधर्मत्व** इति। अत्राभिन्नपदानन्तरं भिन्नपदाभावो लेखकप्रमादात्। क्वचिच्च तथाविध एव पाठः।

केचित्तु निरनुबन्ध्यमानोदाहृतिमध्ये भिन्नधर्मत्वेनेति पठन्तीति त्रिविध एव पाठः। चन्द्रवदनेत्येकपदगतत्वं चन्द्र इव वदनमस्या इत्यादावेकवाक्यगतत्वमित्यादि स्वयमूह्यम्।

ननु वैचित्र्यसहस्रसम्भवे प्रत्युत वैशद्याय लक्षणीयमित्याशङ्क्याह–**उक्तेति**। अस्मत्प्रदर्शितप्रकाराः कमप्यस्मद्दर्शितप्रकारं नियमेनानुबन्धतीति सामान्यलक्षणसन्दर्शनव्युत्पन्नानां स्वयमेवोत्प्रेक्षितुं सुकरा इति ग्रन्थगौरवभयान्न प्रपञ्चिता इत्यर्थः[2]।

---

१. वामनीयकाव्यालङ्कारसूत्रवृत्तावुदाहृते।

२. उपमाविभागविषये शब्दशास्त्रव्युत्पत्तिकौशलशालिनामेषैव सरणिः। सा चालङ्कारमाहात्म्यवादिनामुद्भटमतानुयायिनां प्रायेण सर्वेषामपि निबन्धकृतां ग्रन्थेषु लक्ष्यते। रुद्रटमते

१३५ उपमानोपमेयत्व एकस्यैवैकवाक्यगे ।

अनन्वयः

उपमेवोपमायामप्येकस्योपमानोपमेयताऽस्तीत्याह—एकवाक्यग इति । ननु
कमलं व तीएँ वअणं तीए वअणं व कमलम्पि ।
दट्टुं सलिलविहारे भमरं जणा विमुज्झन्ति ॥"

अत्रापि महावाक्यापेक्षयैव वाक्यात्वमस्तीत्याशङ्क्य—एकस्यैवेति सूत्रे तस्य तं प्रत्येवेति विवक्षितमित्याहुः । उपमानादन्तरस्य भिन्नस्यार्थादुपमेयस्य सम्बन्धाभावो यत्र स उपमानान्तरसम्बन्धाभावोऽनन्वय इति ।

यद्वा—उपमानान्तरेणोपमेयातिरिक्तोपमानेन सम्बन्धस्यान्वयापरनाम्नोऽभावो यत्रेत्यन्वर्थनामा निरुक्तिपरेयं वृत्तिः ।

केचिदुपमानान्तरसम्बन्धाभावोऽत्रास्तीत्यर्शआदित्वेन मत्वर्थयोगात् प्रत्ययं मन्यमानाः सादृश्यसम्बन्धाभावो वर्णनीयाद्युत्कर्षप्रतिपत्तिपरः, एकस्यैव विरुद्धधर्मसंसर्गो द्वितीयसब्रह्मचारिनिवृत्त्यर्थं इत्युक्तदिशाऽलङ्कारजीवातुभूतोऽत्र प्रत्याय्य इत्याहुः ।

तु वाक्योपमा समासोपमा प्रत्ययोपमेति त्रिधा मुख्यो भेदस्तदवान्तरभेदाश्च दश । उपमास्वरूपविषये कुन्तकेन या नवीना दिगुन्मीलिता, तस्या आभासत्वेन द्वयोः प्रस्तुतपदर्मिणोः साधारणधर्मोक्तिर्वाच्यवाचकसामान्यमात्रस्याभिप्रेतत्वं न पुनरजातवदस्यैकवाक्यार्थेऽन्वितत्वञ्चेमानि मुख्यानि लिङ्गानि स्मृतानि । तानि च "साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः" इति विश्वनाथकृतलक्षणे निर्दिष्टानि । अत्र रुचकेनालङ्कारसर्वस्व अस्याश्च पूर्णालुप्तादिभेदाच्चिरन्तनैर्बहुविधत्वमुक्तमिति । एवञ्च तेषां गणने न तथा वैचित्र्यं किञ्चिदिति सूचितमिति जयरथमन्तव्यदिशाऽनादरः स्फुट एव । तेन पुनः कुन्तकसरणिमनुसरता साधारणधर्मस्य क्वचिदनुगामितयैकरूपेण निर्देशः क्वचिद्वस्तुप्रतिवस्तुभावेन द्विधाक्लृप्तेनेति यो नूतनत्वोपन्यासः साधितस्तस्य परिचयोऽलङ्कारविमर्शिनीतो जिज्ञासुभिर्लक्ष्यः । "तेऽलङ्काराः परां छायां यान्ति ध्वन्यङ्गतां गताः" इति ध्वन्यालोकोक्तदिशोपमादीनामंशतो विवेचनं कुन्तकेनादौ, अर्वाग्भवैः चित्रमीमांसाकृद्भिस्तथा पण्डितराजेन जगन्नाथेन सुष्टु व्यधायीति तद्ग्रन्थत एवावलोकनीयम् । प्रकाशटीकाकृतस्तु मूलग्रन्थमेव व्याचक्षत इति तद्विषये प्रायशो निश्चेष्टा इति महदिदं वैशसं काव्यशोभामनुशीलयतां सहृदयपाठकानाम् । क्वचित् पुनः प्रसङ्गस्यास्योल्लेखमात्रम्, यथात्रैवोत्प्रेक्षाप्रसङ्गे । यद्यप्येते ध्वनिगुणीभूतव्यङ्ग्येष्वेवान्तर्भवन्तीति टीकाकृदुक्तदिशा सर्वं समञ्जसम्, तथापि विशेषविश्लेषणमुद्देशमर्हत्येव ।

उपमानान्तरसम्बन्धाभावोऽनन्वयः। उदाहरणम्—

न केवलं भाति नितान्तकान्तिर्नितम्बिनी सैव नितम्बिनीव।
यावद्विलासायुधलास्यवासास्ते तद्विलासा इव तद्विलासाः ॥ ४१४

१३६ विपर्यास उपमेयोपमा तयोः ॥९१॥

तयोरुपमानोपमेययोः परिवृत्तिरर्थाद्वाक्यद्वये। इतरोपमानव्यवच्छेदपरा उपमेयेनोपमेति 'उपमेयोपमा' उदाहरणम्—

कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः।
धरणीव धृतिर्धृतिरिव धरणी सततं विभाति बत यस्य ॥ ४१५

ननु कथमेकस्यैवोपमानोपमेयतानिबन्धस्तयोर्यथायोगमप्राकरणिकप्राकरणिकाधिष्ठाननियमात्? नायं दोषः, तयोरत्र वैवक्षिकमात्रत्वेन[1] वास्तवविरोधाभावात्। किञ्च, प्राकरणिकमुपमेयमप्राकरणिकमुपमानमिति प्रायोवाद एवायम्।

"परिमलनन्दितमधुपा युवजनमनसां विमर्दरङ्गभुवः।
सम्प्रत्यत्यनुमितशोभा माला इव भान्ति भामिन्यः॥"

इत्यादौ[2] प्रदोषवर्णने प्रकृते मालानां युवतीनां चात्र प्रकृतत्वेन तदङ्गतया प्रतीतत्वेन चाविशेषविरहात्। नितान्तं सन्ततं कान्तिः कमनीयता यस्याः सा नितान्तकान्तिः। यावदिति। अपि त्वित्यर्थे। विलासायुधः कामस्तस्य लास्यवासा रङ्गगृहास्त इति स्वयंवेद्याव्यपदेश्यस्वरूपा।

विपर्यास इत्यस्य बिवृतिः परिवृत्तिरिति। एतौ परस्परमेव सदृशौ, न त्वनयोः सदृशं वस्त्वन्तरमस्तीत्याकार उपमानान्तरव्यवच्छेदः, तत्परा प्रतीतिप्रयोजनेत्यलङ्कारताबीजोद्घाटः। उपमेयेनोपमेति। समनन्तरमेवोपमेयतया निबद्धेन वस्तुना सम्प्रत्युपमानतानिबन्धेन समनन्तरोपमानतानिबद्धस्यैव वस्त्वन्तरस्योपमानोपमेयत्वमवच्छिद्यत इत्यर्थः। उपमेयेनोपमा सादृश्यमिति यथाश्रुतव्याख्याने सर्वत्रैवंविधतासौलभ्येनासाधारण्यं नोक्तं स्यात्। 'कमलेव मतिः' इत्यादौ सर्वजनोपास्यत्वाद्यसाधारण्यं गम्यम्। एवं पूर्णत्वमनयैव दिशाऽनन्वये मृग्यम्। धृतिर्धैर्यम्।

प्रकृतस्य सम्भविनो वर्णनीयस्य उपमानेनेति सदृशतयोपकल्पितेनासम्भविनेत्यर्थः। एतदनन्तरं सहैकरूप्येणेति शेषः। अत्र क्वचिदैकरूप्यमात्रस्यासत्त्वम्,।

---

१. वैवक्षिकपदत्वेन—ख०।
२. इत्यादौ तु—ख०।

१८७ संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्—

समेनोपमानेन । उदाहरणम्—

उन्मेषं यो मम न सहते जातिवैरी निशाया-
मिन्दोरिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः ।
नीतः शान्ति प्रसभमनया वक्त्रकान्त्येति हर्षा-
ल्लग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः ॥ ४१६

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ ४१७

क्वचित्तु तथा सम्भाव्यमानत्वम् । [1]तत्राद्यं यथा ममैव "कण्ठे लसत्काञ्चनयज्ञसूत्रे" इत्यादि । अत्र हि सम्भाव्यमानतादात्म्याख्यसम्बन्धमात्रस्यैव सत्त्वम्, न तु सम्बन्धिनोः ।

द्वितीयं यथा—

"स वः पायादिन्दुर्नवबिसलताकोटिकुटिलः
स्मरारेर्यो मूर्ध्नि ज्वलनकपिशे भाति निहितः ।
स्रवन्मन्दाकिन्याः प्रतिदिवससिक्तेन पयसा
कपालेनोन्मुक्तः स्फटिकधवलेनाङ्कुर इव ॥"

इत्यत्र सम्भाव्यमानस्य कपालाङ्कुरस्यापि शशविषाणसगोत्रत्वमेव । एषा च हेतुस्वरूपफलसम्भावना त्रिधा ।

तत्राद्यं यथा—**उन्मेषमित्यादि** । अत्र हि स्वाभाविकमेव पादलग्नत्वं हर्षहेतुकपादलग्नत्वैकरूपतया सम्भावितम् । अथवा यः पक्ष्मलाक्ष्याः स्वाभाविकपादलगनहेतुः स हर्षतादात्म्येन सम्भावितः ।

द्वितीयं यथा—**लिम्पतीवेति** । अत्र लक्षणयोगमाह—**व्यापनादीति** । केचित्तु—उत्प्रेक्षायां द्वयी गतिर्विषयस्योपादानं निगरणं चेति । तत्राद्ये पूर्वमुदाहरणं शेषे स्फोरणार्थमियं वृत्तिरित्याहुः । तदसत्, पूर्वत्रापि स्वाभाविकस्य लगनहेतोरुत्प्रेक्षणत्वे तददिति विषयस्योपादानविरहात् । विषयोपादानन्तु यथा मम —

प्रचण्डसीत्कारसमीरनिर्यत्सुकुम्भमुक्तानिकरावदातम् ।
निदाघतापागमविप्रकीर्णं भाति द्विपानां करशीकराम्भः ॥

---

१. एतच्च विषयित्वेन संभावनमुत्प्रेक्षेति प्राचां लक्षणमनुसृत्य । सम्भावनमध्यवसाय इति पारिभाषिकः पर्यायभेदः ।

इत्यादौ व्यापनादि लेपनादिरूपतया संभावितम् ।

वनेषु यस्यासिविदीर्णकुम्भिकुम्भावमुक्ताः प्रतिभान्ति मुक्ताः ।
[1]भूचारहृष्टा जितराजलक्ष्मीधम्मिल्लमल्लीमुकुलामलाभाः ।।

इत्यादौ मृग्यम् । न चैतदुदाहृतिद्वयं नोत्प्रेक्षाविषयः, सम्भावनाप्राणत्वात्तु तथैव ।

तृतीयं यथाऽस्मत्तातानां सरोवर्णने—
"कलङ्कपङ्कः किल यो वियोगदीनाबलापीडनदुर्यशोभिः ।
तन्मार्जनायेव जले यदीये निमज्जतीन्दुः प्रतिबिम्बभङ्ग्या ।।"

अत्र स्वारसिकमेव मज्जनं कलङ्कप्रक्षालनप्रयोजनैकमज्जनैकरूप्येणोत्प्रेक्षितम् । इयमेव च सापह्नवोत्प्रेक्षायामुदाहृतिः । उत्प्रेक्षणीयश्च द्रव्यगुणक्रियाजातिरूपेण चतुर्विधमुक्तं प्राचीनैः ।

तत्राद्यं यथा मम—
"पायात् समस्तस्य तनुर्मुरारिर्यस्याच्छपुच्छोच्छलितैः क्षणेन ।
पयोधिपूर्वैर्जगदश्नुवानैर्विनिर्मिताऽद्वैतमयीव वृष्टिः ।।"

अत्र सम्भाविताया जलमात्रमय्या वृष्टेः सजातीयाप्रसिद्धेः प्रसिद्धेनैकार्थ्येन वैयाकरणरीत्या गुणोत्प्रेक्षा हर्षादिति ।

यथा वा मम[2] विलासमञ्जरीकाव्ये ग्रीष्मवर्णने—
"एते गताः पुष्टकपुत्रभावं सकृत् प्रजानां कलकण्ठधाराः ।
तत्संकथाकर्णनलज्जयेव नोदीरयन्ति स्वगुणं स्वरेषु ।।"

अत्र लज्जा गुणः । क्रियोत्प्रेक्षा लिम्पतीवेति । जात्युत्प्रेक्षाऽङ्कुर इवेति । उत्प्रेक्षोत्थाननिमित्तश्च क्वचिन्निबध्यते क्वचिद् विशीर्यत इति द्वयी गतिः ।

आद्ये यथा मम—
"एषा रतीशोत्पलपत्रपङ्क्तिः प्रकम्पतेऽस्याः सुदृशो भ्रमन्त्याः ।
कर्णान्तिपर्यन्तविलोलनेत्रविघट्टनत्राससमाकुलेव ।।"

अत्र सम्भावनाहेतुरुपादेयकम्पः ।

---

१. भूचारः पृथिव्यां विचरणम्, तेन हृष्टा सुस्थिता मुक्ता ।

२. कविमुख्यानां टीकाकृतां कस्या अपि नाटिकाया नामतोऽप्यधुनाऽपरिज्ञाताया इयमुदाहृतिरुद्धृता स्यात् । स्वरूपणोत्प्रेक्षाया उपमातो भेदः श्रीविद्याचक्रवर्तिभिर्निर्दिष्टो यथा—"यदाऽयमुपमानांशो लोकतः सिद्धिमृच्छति ।
तदोपमैव येनेवशब्दः साधर्म्यसूचकः ।।
यदा पुनरयं लोकादसिद्धः कविकल्पितः ।
तदोत्प्रेक्षैव येनेवशब्दः सम्भावनापरः ।।" इति ।।
मूलग्रन्थकृत्पारिभाषिकपदप्रयोगमय एष इति सर्वमवदातम् ।

१३८ ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः ॥९२॥

भेदोक्तौ यथा—

अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् ।
कृतान्तः किं साक्षान्महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः ॥४१८

'भेदोक्तौ' इत्यनेन न केवलमयं निश्चयगर्भो यावन्निश्चयान्तोऽपि संदेहः स्वीकृतः । यथा—

द्वितीये यथा—"वर्षतीवाञ्जनं नभः" इत्यत्रोर्ध्ववर्तिनो नीलिम्नः सन्ततधाराकारेणाधःसंयोगो वर्षणसम्भावनाहेतुर्गम्यः ।

क्वचिद् भावोऽभिमन्यते क्वचिदभाव इत्यपि द्वैतम् । तत्राद्येऽमून्येव निदर्शनानि । द्वितीये तु ममैव—

"त्वद्वियोगपरिक्लेशपराधीनान्तरात्मनः ।
दीप्यमानः पुरोऽप्येतन्नास्त्येवाद्य जगन्मम ॥"

उक्तवैचित्र्यसङ्कलनया च प्रकारसंख्यानियमो ग्रन्थगौरवभीत्याऽनुक्तोऽपि लक्ष्यप्रसिद्धिमनुसृत्य प्राचीनदिशा बोद्धव्यः[1] । प्रतीयमाना चेयं पूर्वोक्तदिशा ध्वनिगुणीभूतव्यङ्ग्ययोरेवान्तः पतति । वाच्या प्रतीयमाना चेति द्वैविध्याभिधानमलङ्कारान्तरसाधारण्येन मन्दप्रयोजनम् ।

स सन्देह इति क्वचित् सन्देह इत्यप्युच्यते, भेदोक्तौ वैधर्म्योपादाने प्राचीन एव संशयो निर्णयसम्बलनया वैचित्र्यमाविष्कुर्वाणोऽलङ्करणतां भजते । तदनुक्तौ तु शुद्ध एव । निश्चयगर्भ इत्येकस्मिन्नेव विषये प्रथमं संशयस्ततो निश्चयः, पुनरपि संशयो निश्चयश्चेत्येवंरूपः ।

निश्चयान्त इति । बहुधा सन्दिग्धनिश्चयरूपः । क्व कलङ्क इति सन्देह एवोपोद्बलितः सूच्यते न तु निश्चयः, तत्प्रतिभासविरहात् ।

---

१. श्लेषापह्नुतयाद्यलङ्कारान्तरसङ्करवैचित्र्यादनन्तभेदोऽयम् । उत्प्रेक्षावाचकशब्दानां संग्रहे—

"मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः ।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥"

इत्याचार्यदण्डी । व्यज्यते द्योत्यत इत्यर्थः । आदिपदेन 'किं' 'नु' पदयोर्ग्रहणम् । तत्र किंपदप्रयोगे उत्प्रेक्षा यथा—

"बालप्रसूनावलिमूर्मिहस्तैः सञ्चारयन्ती भजतां सुदूरम् ।
विक्रीय कैवल्यममुष्य मूल्यं वराटसंख्यां किमियं करोति ॥"

इति सा० द० लोचनोद्धृते कस्यचित् पद्ये परिवृत्तिस्पृष्टेयं मनाग्नैव ।

इन्दुः किं क्व कलङ्कः सरसिजमेतत् किमम्बु कुत्र गतम् ।
ललितसविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं परतः ।।४१९

किन्तु निश्चयगर्भ इव नात्र निश्चयः प्रतीयमान इत्युपेक्षितो भट्टोद्भटेन । तदनुक्तौ यथा—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ।।४२०

१३९ तद्रूपकमभेदो य उपमानोपमेययोः ।

अतिसाम्यादनपह्नुतभेदयोरभेदः ।

ननु यद्येवंप्रकारः सम्भवति, तर्हि किं भवदुपजीव्यैः प्राग्भिरलङ्कारकारैर्न-निबद्ध इत्याह—**किन्त्विति** । यद्यपि लक्ष्यप्रसिद्ध्या दुरपलपं तथापीत्यर्थः । नात्र निश्चयः प्रतीयमान इति विशिष्ठप्रायतया वैचित्र्याधायकसंशयसहकारितयेति शेषः । भट्टोद्भटेनोपेक्षितो न तु सर्वैरित्यर्थः[1] । अस्या उर्वश्याः । वेदेत्युत्तरार्धम्[2] । पूर्वार्धं पूर्वार्धप्रतिपाद्यसंशयोपोद्बलकम् ।

अभेद इति । अत्रत्याविद्यमानो भेदो यत्रालङ्कार इति विग्रह इत्याह—

---

१. न तु सर्वैरिति यथा रुद्रटादिभिः । मम्मटेन रुद्रटमतमेवात्रानुसृतम् । अलङ्कार सर्वस्वेऽपि त्रिधैवायं गृहीतः । "एवं चास्य सादृश्यनिमित्तत्वात् समानधर्मानेकधर्मनिमित्तत्वेन विभेदत्वं न व्याकार्यम् सादृश्यनिमित्तत्वेनैवास्य सन्देहसिद्धेः, विप्रतिपत्त्यादिनिमित्ता-न्तरसारत्वाभावाच्च" इति जयरथः । एतत्तु ससन्देहस्य सादृश्यमूलकत्वपक्षमुपजीव्य, परन्तु तस्याध्यवसायमूलत्वमपि रुचकादिभिः स्वीक्रियते कुन्तकमतमनुसरद्भिः । तत्रो-दाहृतश्च "रञ्जिता तु विविधास्तरुशैलाः" इति हिमालयवर्णनप्रसङ्गे स्थितेन किरातीयपद्येन ।

२. श्लोकोऽयमलङ्कारनिर्णयव्यापारे उदाहरणकूटस्थलेन उल्लेखयोग्यः । अत्र उर्वशीसृष्टौ निर्माता किं चन्द्रः किं वा मदन उत वा वसन्त इत्यनेककोटिकः संशय इति कृत्वा तत्र-भवन्तोऽलङ्काररत्नाकरकाराः प्रायश्च मीमांसादावनेकधर्मनिमित्त एव प्रत्यधिकरणं सन्देह इति युक्तिमनुसृत्य मम्मटं समर्थयन्ते । अर्वाग्भवा विमतसिद्धान्तमलङ्कारसर्वस्व-साहित्यदर्पणचित्रमीमांसादिस्थितं प्रजापतिसम्बन्धेऽप्यन्यसम्बन्ध उक्त इत्यतिशयोक्तिभेदं खण्डयन्तो रसगङ्गाधरकारा अप्येवम् । यदि सादृश्यमूलतैवात्र बीजभूता संशयोत्थापन इति मन्यते, तदा तदाद्यः पक्षः बलीयानेव । विमर्शिनीकाराद्या अध्यवसायमूलतामपि सन्देहकोटावनुप्रवेशयन्ति, तेन च निर्णये जटिलता जाघटीति । विमर्शिनीकारा अत्र

१४० समस्तवस्तुविषयं श्रौता आरोपिता यदा ।।९३।।

आरोपविषया इव आरोप्यमाणा यदा शब्दोपात्तास्तदा समस्तानि वस्तूनि विषयोऽस्येति समस्तवस्तुविषयम् । आरोपिता इति बहुवचनमविवक्षितम् । यथा—

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी-
न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम् ।
द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्यच्छलेन ।।४२१

अत्र पादत्रयेऽन्तर्धानव्यसनरसिकत्वमारोपितधर्म एवेति रूपकपरिग्रहे साधकमस्तीति तत्संकराशङ्का न कार्या ।

अनपह्नुतेति[1] । अलङ्कारश्चात्राहार्यस्तादात्म्यारोप इत्यवधेयम् । रूपकसामान्यलक्षणमुक्त्वा तद्विशेषलक्षणप्रपञ्चार्थमाह—**समस्तेति** । **आरोपेति** । इवेति प्रत्ययद्योत्यविशेषाभावमारोप्यमाणा इति वृत्तिसङ्गतिः[2] । समस्तानि सकलानि । सूत्रे लिङ्गं संख्या कालश्चातन्त्राणीति न्यायमूरीकृत्याह—**आरोपिता इति** । बहुवचनमविवक्षितमिति । तेन "दन्तांशुकेशरालीभिस्तुल्यं भाति मुखाम्बुजम्" इत्याद्यपि संगृहीतमिति भावः । व्यसनं कौतुकम् । मुद्राकपाल इति दीक्षाकालगृहीतोपकरणेषु मुद्रोपादानं पाषण्डानां व्यवहारः । परिमलं क्षोदम् । अत्रेति । पादत्रये यद्रूपकं तस्य साधकमारोपितधर्म एव रात्रावसम्भवितयोपमाननिरसनद्वारेणेति निश्चायकमन्तर्धानरसिकत्वमस्ति । तत्र उपमारूपकसन्देहसङ्करशङ्का न कार्या । ततश्च निःशङ्कमेवेदं रूपकोदाहरणमित्यर्थः । अत्र चारोप्यारोपविषयानेकत्वेऽपि नालङ्कारानेकत्वं सम्भूयैव वैचित्र्यप्रकर्षाधायकत्वात् । एवं मालोपमारशनोपमोपमेयोपमादौ बोद्धव्यम् ।

श्लोकविवरणे तूष्णीमासीना लक्ष्यन्ते । 'नु'पदानि प्रथमद्वितीयपादयोः किंपदसमानार्थानि । अत्राध्यवसायोत्थापनां स्वीकृत्यापि ये केचित् तस्यासिद्धतानिरासादुत्प्रेक्षेति मन्यन्ते ते त्वत्रैवाध्यवसायस्य सिद्धतासाध्यतयोर्युगपद् साधुत्वे पर्यनुयोज्याः । वस्तुतस्तु उर्वशीसृष्टिव्यापारे सुष्ठु प्रजापतेरसादृश्यपक्ष एव कवेरभिप्रेत इति तन्मूलक एवालङ्कारनिर्देशः श्रेयान् ।

१. सूत्रग्रन्थेऽपह्नुतत्वस्य निर्देशासवात् वृत्तौ च तत्सत्त्वादित्थं निर्वन्धष्टीकाकृद्व्याख्याने । अपह्नुतभेदत्वेऽतिशयोक्तेर्भावादिति रुचकमन्तव्येऽतिशयोक्तिः खलु सादृश्यमपवदतीति हेतोरयं व्याख्याप्रकारः ।

२. आरोपिता इत्यादिवाक्यं न श्रीधरादिभिर्मूलग्रन्थे पठितम् । आरोपिता इत्यस्यारोप्यमाणाइत्यर्थे प्रयोगष्टीकाकृत्कृतदिशा समाधेयः ।

१४१ श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत् ।

केचिदारोप्यमाणाः शब्दोपात्ताः, केचिदर्थसामर्थ्यादवसेया इत्येकदेशवि-वर्तनादेकदेशविवर्ति । यथा—

जस्स रणन्ते उरए करे कुणन्तस्य मण्डलग्गलअं ।
रससंमुही वि सहसा परंमुही होइ रिउसेणा ॥४२२
(यस्य रणान्तःपुरे करे कुर्वतो मण्डलाग्रलताम् ।
रससम्मुख्यपि सहसा पराङ्मुखीभवति रिपुसेना ॥ इति छाया ।)

अत्र रणस्यान्तः पुरत्वसारोप्यमाणं शब्दोपात्तम्, मण्डलाग्रलताया नायिकात्वं रिपुसेनायाश्च प्रतिनायिकात्वमर्थसामर्थ्यादवसीयत इत्येकदेशे विशेषेण वर्तनादेकदेशविवर्ति ।

एकदेशविवर्तीति । एकदेशवर्तीत्यपि क्वचन व्यवहृतिः[1] ।

मण्डलाग्रस्य लतात्वे रूपितेऽपि नायिकात्वरूपणमेव चारुत्वावहमिति वाच्य-रूपणेऽनास्थोक्तिः । मण्डलाग्रलताया नायिकात्वमिति । अर्थसामर्थ्यादिति रणस्यातः-पुरत्वरूपणस्यान्यथाऽव्यवस्थितप्रायत्वादित्यर्थः ।

इह केचिदाहुः—रूपकाणां परम्पराऽपेक्षित्वे परम्परिततैव स्यादिति । तन्न, परम्परितत्वे[2] तन्त्रेण भेदेन वा द्वयोरपि रूपणयोः शाब्दत्वात्, इह तु तदभावा-दित्येके । एवञ्च सति समस्तवस्तुविषयात्तस्य भेदो दुरुपपादः स्यात्, अवान्तर-वैधर्म्यमात्रेण च परम्परितावान्तरत्वमेव स्यात् ।

वस्तुतस्तु परम्परिते 'विद्वन्मानसहंस' इत्यादौ हृदयादीनां सरस्त्वादिरूपण-मन्तरेण राजादीनां हंसत्वादीनां रूपणं सर्वथैवासङ्गतं स्यात्, सादृश्यासम्भवात्; तत्सम्भवेऽपि वा हृदयादीनां हंसादिभिः सम्बन्धानुपपत्तेः । इह तु रणस्यान्तःपुरेण सुखसञ्चारतया तारकादीनाञ्चास्थिप्रभृतिभिर्धारणादिना सादृश्यं सुप्रतिपादमिति । अत एव रूपणं नासम्भवि, किन्तु तथाविधवैचित्र्यवन्न स्यादिति विवेकः ।

"खड्गः क्ष्मासौविदल्लः समिति विजयते मालवाखण्डलस्य" इत्यादौ[3]

---

१. एकदेशविपर्तीति मूलपदं प्रतीहारेन्दुराजेन लघुवृत्तौ भामहविवरणीयोद्भटनिरूपणमनुसृत्य एकदा अन्यदा ईशः प्रभविष्णुर्यो वाक्यार्थस्तद्वृत्तित्वमिति व्याख्यातम् । यत्र कस्य-चिदार्थत्वमेकदेशविवर्ति तदिति दर्पणे एकदेशविवर्तिन्युपमौद्गृहीता । उपमासाम्याद् एकदेशविवर्तिरूपकमिति संज्ञा ।

२. परम्परितेनेति तत्वेन—क० ।

३. "पर्यङ्को राजलक्ष्म्या हरितमणिमयः पौरुषाब्धेस्तरङ्गो
भग्नप्रत्यर्थिवंशोल्बणविजयकरिस्त्यानदानाम्बुपट्टः ।
संग्रामत्रासताम्यन्मुरलपतियशोहंसनीलाम्बुवाहः"
इति श्लोकस्य यथाक्रमं प्रथमद्वितीयतृतीयपादाः ।

१४२ साङ्गमेतत्

उक्तद्विभेदं सावयवम् ।

१४३ निरङ्गं तु शुद्धं

यथा—

कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्
सखीं कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत् ।
अनिद्रं यच्चान्तः स्वपिति तदहो वेद्म्यभिनवां
प्रवृत्तोऽस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम् ॥

१४४ माला तु पूर्ववत् ॥९४॥

मालोपमायामिवैकस्मिन् बहव आरोपिताः । यथा—

सौन्दर्यस्य तरङ्गिणी तरुणिमोत्कर्षस्य हर्षोद्गमः
कान्तेः कार्मणकर्म नर्मरहसामुल्लासनावासभूः ।
विद्या वक्रगिरां विधेरनवधिप्रावीण्यसाक्षात्क्रिया
बाणाः पञ्चशिलीमुखस्य ललनाचूडामणिः सा प्रिया ४२४

१४५ नियतारोपणोपायः स्यादारोपः परस्य यः ।
तत्र परम्परितं श्लिष्टे वाचके भेदभाजि वा ॥ ॥९५॥

परम्परितमप्येकदेशविवर्ति, क्षमाया अवरोधवधूत्वरूपणं विना खड्गसौविदल्लता-रूपणस्य सर्वथाऽसङ्गतेः । विशेषेण शब्दोपात्ततया स्फुटत्वेन ।

अङ्गाङ्गिसमुदायारोपरूपत्वात् साङ्गम् । प्रश्नयति प्रश्नविषयीकरोति । अन्तः स्वपिति बाह्यं किमपि न वेत्ति ।

पूर्ववदिति । पूर्ववत् शब्देनोपमासामान्यलक्षणसंगृहीततया बुद्धिस्थां मालोपमां निर्दिशति सूत्रकृदित्याह[1]—मालोपमायामिवेति । यथा मालोपमायामेकत्रोपमेये बहून्युपमानानि सम्बध्यन्ते तथाऽत्रैकस्मिन्नेवारोपविषये बहव आरोप्यन्त इत्यर्थः । कार्मणकर्म मन्त्रौषधादिभिर्वशीकरणम्, नर्मरहसां क्रीडारहस्यानां विद्या शिक्षाशास्त्रम्, अनवधि अपर्यन्तम् । अत्र रूप्यमाणानां परस्परमङ्गाङ्गीभावान्निरवयमाला ।

नियतस्य मुख्यस्यारोपणं वस्त्वन्तरतादात्म्यप्रतीतिस्तस्योपायः कारणं यः परस्यामुख्यस्यारोपस्तत् परम्परा कार्यकारणरूपा जाता अस्मिन्निति परम्परित-

---

१. एतच्च सूत्रकृद्वृत्तिकृतोरभेदसूचनायेति साम्प्रदायिकाः । तदनुसङ्गि विवेचनं काव्यप्रकाशविवेकोपोद्घाते विहितमिति तत्रैवावधेयम् ।

यथा—

विद्वन्मानसहंस ! वैरिकमलासंकोचदीप्तद्युते !

दुर्गामार्गणनीललोहित ! समित्स्वीकारवैश्वानर !

सत्यप्रीतिविधानदक्ष ! विजयप्राग्भावभीम ! प्रभोः !

साम्राज्यं वरवीर ! वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥ ४२५

अत्र मानसमेव मानसम्, कमलायाः संकोच एव कमलानामसंकोचः, दुर्गाणाममार्गणमेव दुर्गाया मार्गणम् समितां स्वीकार एव समिधां स्वीकारः, सत्ये प्रीतिरेव सत्यामप्रीतिः, विजयः परपराभव एव विजयोऽर्जुन एवारोपनिमित्तो हंसादेरारोपः।

यद्यपि शब्दार्थालङ्कारोऽयमित्युक्तं वक्ष्यते च तथापि प्रसिद्ध्यनुरोधादत्रोक्तः।

एकदेशविवर्ति हीदमन्यैरभिधीयते। भेदभाजि यथा—

आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः

पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः।

संग्रामामृतसागरप्रमथनक्रीडाविधौ मन्दरो

राजन् ! राजति वीरवैरिवनितावैधव्यदस्ते भुजः ॥ ४२६

मिति सामान्यत उक्तस्य विभागः। श्लिष्टे एकरूपे भिन्नरूपे वा। वाचके शब्दे न तु वाचकत्वाश्रये पूर्वोक्तयुक्त्या व्यञ्जकत्वादिति कारिकाऽन्वयः। वरवीर महावीर। वैरिञ्चं वत्सरशतं मानुषसंख्यया संवत्सरपरार्धद्वयम्। उच्चैरिति साम्राज्यं विशिष्यते। एवमारोपनिमित्त इति बहुव्रीहिणा सिद्धम्। शब्दार्थालङ्कार इति। मानसादिपदपरिवृत्तौ परिवृत्तेः हंसादिपदपरिवृत्तावपि चापरिवृत्तेरित्यर्थः। उक्तमन्यैरस्माभिरेव वा[1] पुनरुक्तवदाभासवदयुक्तसाधारणयुक्तिविषयीकृतत्वात्। वक्ष्यते चास्माभिरेव ग्रन्थान्तसमीप इत्यर्थः। प्रसिद्ध्यनुसारात् पूर्वाचार्यनिबन्धनानुरोधादित्यर्थः।

ननु तैरपि किमर्थमुभयालङ्कारोऽयमर्थालङ्कारमध्ये लक्षित इत्याह—एकदेशविवर्तीति। तथा च सति मनःप्रभृतीनां सरस्त्वादिरूपणमार्थमेव न शाब्दमित्युभयालङ्कारत्वाभावाद्युक्तमेवार्थालङ्कारमध्ये लक्षणमिति भावः।

---

१. अस्माभिरिति। ग्रन्थान्ते वृत्तौ—"यथा पुनरुक्तवदाभासः परम्परितरूपकं चोभयोर्भावाभावानुविधायितयोभयालङ्कारौ" इति सन्दर्भे। यद्यप्यलकपरिपूरितेंऽश एवैतदुपलभ्यते, तथाप्यन्वयव्यतिरेककृतभावाभावविधायितायाः स्पष्टं निर्देशादयं मम्मट पक्ष इति निश्चयः।

अत्र जयादेर्भिन्नशब्दवाच्यस्य कुञ्जरत्वाद्यारोपे भुजस्यालानत्वाद्यारोपो युज्यते।

अलौकिकमहालोकप्रकाशितजगत्त्रयः।
स्तूयते देव ! सद्वंशमुक्तारत्नं न कैर्भवान् ॥४२७॥

निरवधि च निराश्रयं च यस्य स्थितमनिर्वर्तितकौतुकप्रपञ्चम्।
प्रथम इह भवान् स कूर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकन्दः ॥४२८॥

इति च मालारूपकमपि परम्परितं द्रष्टव्यम्।

किसलयकरैर्लतानां करकमलैः कामिनां मनो जयति।
नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः ॥४२९॥

इत्यादि रशनारूपकं न वैचित्र्यवदिति न लक्षितम्।

१४६ प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः।

उपमेयमसत्यं कृत्वोपमानं सत्यतया यत् स्थाप्यते सा त्वपह्नुतिः। उदाहरणम्—

अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये !
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि।
अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे
रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ॥४३०॥

युज्यत इति। निर्वहतीत्यर्थः। सद्वंशो महाकुलमुत्कृष्टतृणध्वजश्च। मुक्तारत्नमिति। मुक्तारत्नमिव तज्जातिश्रेष्ठपरं यथा नारीरत्नमिति[१]। निरवधि कालावच्छेदहीनं स्थितं स्थितिः। चतुर्दशलोक एव वल्लिरूर्ध्वनिःसृता दीर्घावस्थानात्।

वैचित्र्यवदिति। वैचित्र्येत्यत्र पूर्वमधिकेति शेषः। न लक्षितमिति। पृथगित्यर्थः[२]। प्रकृतमित्यस्योपमेयमिति निषिध्येत्यस्यासत्यं कृत्वेति अन्यदित्यस्योपमानमिति साध्यत इत्यस्य सत्यतया स्थाप्यते उपनिबध्यत इति विवृतिः।

अवाप्त इत्यादावपह्नवः शाब्दः, शेषद्वये चार्थः।

---

१. अत्र 'क'पुस्तके चतुर्थोल्लासांशस्य धारावाहिकतयांऽशतोऽस्य निवेशो लिपिकारानवधानादिति निर्णीतं चतुर्थोल्लासटीकाग्रन्थे। निर्धारितं च सामञ्जस्यमुपोद्घाते।

२. क्वचिच्छलव्याजादिशब्दैरसत्यत्वप्रतिपादकैरपह्नवः क्वचिदणुतरसत्यत्वं क्वचित् वस्त्वन्तररूपताविधायिशब्दनिबन्धनमित्येवंप्रकारतया भङ्ग्यन्तरापातानीत्याकूतम्। वस्तुतस्तु भङ्गिभेदो न सर्वत्र प्रकारभेदप्रयोजकः।

इत्थं वा—

बत सखि ! कियदेतत् पश्य वैरं स्मरस्य
प्रियविरहकृशेऽस्मिन् रागिलोके तथा हि ।
उपवनसहकारोद्भासिभृङ्गच्छलेन
प्रतिविशिखमनेनोट्टङ्कितं कालकूटम् ।।४३१।।

अत्र हि न सभृङ्गाणि सहकाराण्यपि तु सकालकूटाः शरा इति प्रतीतिः । एवं वा—

अमुष्मिल्लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः ।
यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः ।।४३२।।

अत्र न रोमावलिर्धूमशिखेयमिति प्रतिपत्तिः । एवमियं भङ्ग्यन्तरैरप्यूह्याः ।

१४७ श्लेषः स वाक्य एकस्मिन् यत्रानेकार्थता भवेत् ।।९६।।

एकार्थप्रतिपादकानामेव शब्दानां यत्रानेकोऽर्थः स श्लेषः ।

उदाहरणम्—

उदयमयते दिङ्मालिन्यं निराकुरुतेतरां
नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः ।

पिशुना सूचिका । भङ्ग्यन्तरैरिति[1] ।

"अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च संजगदिरे भूच्छायमैच्छन् परे ।
इन्दौ यद् गलितेन्द्रनीलशकलश्यामं दरीदृश्यते
तन्मन्ये परिपीतमन्धतमसं कुक्षिस्थमालक्ष्यते ।।" इतीदृशैरित्यर्थः ।

वाक्य एकस्मिन्निति । वाक्ये पदानां सम्बलनशरीर एवार्थद्वयप्रतीतिर्न तु कस्यचित् पदस्य विशिष्टा शक्तिः, सर्वेषामेव पदानां प्रत्येकं परिवृत्तिसहिष्णुत्वादित्यर्थः । एकार्थप्रतिपादकानामिति । प्रकरणादिसाहित्यानवभासे प्रत्येकप्रतिपत्तियोग्यानामित्यर्थः । अनेकोऽर्थोऽनिर्धारितशरीरः ।

उदयो माहेन्द्रयां दिशि प्रथमदर्शनमुपचयश्च । दिशां मालिन्यमन्धकाराभिभवो दुराचारप्राप्तिश्च । निद्रा सुषुप्तिर्व्यामोहश्च । तया मुद्रा कर्तव्यानारम्भरूपः सङ्कोचश्च । क्रियाः सन्ध्योपासनाद्या इष्टापूर्ताद्याश्च । स्वैराचाराणां पांशुलत्वा-

---

१. अत्रापह्नवपूर्वक आरोपो यस्य 'अवाप्तः प्रागल्भ्यम्'. इत्यादिमूलोदाहृतपद्येऽवसरः, परं भङ्गीभेदो वरीवर्तीति पृथक्तया निर्दिष्टष्टीकाकृता ।

रचयतितरां स्वैराचारप्रवर्तनकर्तनं
बत बत लसत्तेजःपुञ्जो विभाति विभाकरः ॥ ४३३ ॥

अत्राभिधाया अनियन्त्रणाद् द्वावप्यर्कभूपौ वाच्यौ ।

३४८ परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः ।

प्रकृतार्थप्रतिपादकवाक्येन श्लिष्टविशेषणमाहात्म्यान्न तु विशेष्यस्य सामर्थ्यादपि यदप्रकृतस्यार्थस्याभिधानं सा समासेन संक्षेपेणार्थद्वयकथनात्

दीनां परद्रव्यापहारादीनां वा प्रवर्तनं प्रसरणं स्वेच्छाचारेषु प्रवृत्तिर्वा, तस्य कर्तनं विनाशनम् । तेजः प्रकाशः प्रभावश्च । विभां प्रभां करोति व्यनक्तीति सूर्यो विभायाः कान्तेराकर आश्रय इति राजा च विभाकरः ।

प्रकृतोदाहृतौ ध्वनिशङ्कां[१] निरस्यन् लक्षणानुगममाह—**अत्राभिधाया अनियन्त्रणादिति ।** निद्रादिपदेऽभिधैव व्याप्रियते न तु लक्षणेति । क्रियादिपदो-च्चयमेवाभिधानीयमिति प्रकरणादिविरहादनियमेनेत्यर्थः ।

प्रकृतार्थः प्रकरणादिनिर्धारितोऽर्थः । श्लिष्टं साधारणं[३] यद्विषेणं क्रियागु-णादिबोधकपदं तस्य माहात्म्यात् सामर्थ्यात्, न तु विशेष्यस्य धर्मिवाचकस्य सामर्थ्याच्छक्तेरपीति ध्वनिश्लेषव्यवच्छेदः । अप्रकृतस्याप्रस्तुतस्यावर्णनीयजयल-क्ष्म्यादिगततया प्रतीयमाननायिकादिव्यवहारस्याभिधानं प्रत्यायनं व्यञ्जन-मिति यावत्[४] ।

---

१. श्लेषद्वारैव साधारण्यं विशेषणमहात्म्यादायातीति टीकाकृतामाकूतम् । परन्तु न तट्टीकाका-रभङ्गीतः स्फुटमुपलभ्यते । ध्वन्यालोकादिप्रदर्शितदिशा समासोक्तौ प्रकृतार्थस्यावगमे व्यवहारसमारोप एव बीजम् । परं न तत् प्राचीनैर्लक्षितम् मम्मटग्रन्थे सूत्रे वृत्तौ न वाभिहितम् । अत एवालङ्कारसर्वस्ववृत्तौ "विशेषणसाम्यादप्रस्तुतं प्रस्तुतावच्छेदकत्वेन प्रतीयते । अवच्छेदकत्वं च व्यवहारसमारोपः, न तु रूपसमारोपः" इत्यन्वर्थकः परिष्कारः ।

२. क्रियापदोच्चयम्—ख० । वस्तुतस्तु पदोच्चयेऽपि समासान्त्यावयवे नपुंसकत्वं चिन्त्यम् ।

३. श्लिष्टं साधारणम्—ख० । साधारण्यं सम्बन्धभेदभिन्नैकधर्मवत्त्वम् ।

४. "अलङ्कारान्तरगतां प्रतिभां जनयत् पदैः" इति काव्यालङ्कारसारसंग्रहे, तथा "श्लिष्टं साधारण्यमुपमाद्यलङ्कारप्रतिभोत्पादनद्वारेणालङ्कारता, प्रतिपद्यं स्थितेन तयाऽलङ्कारान्तरे वाक्यान्तरे वा प्रतिभोत्पद्यते" इति भामहविवरणे यथालब्धेंऽशे । सिद्धान्तमिममनुवदन्तो रसगङ्गाधरकाराः "अयं चोक्तमेव स्वातन्त्र्येणापि तत्र तत्र सकलालङ्कारग्राहकतया स्थितः सरस्वत्या नवं नवं सौभाग्यमाविर्भावयन्नानाविधेषु लक्ष्येषु सहृदयैर्विभावनीयः" इति निर्दिशन्ति । परमुद्भटमतमुभयथाऽप्यनेनैवापोद्यत इति मतभेदः स्पष्टः ।

समासोक्तिः। उदाहरणम्—

लहिऊण तुज्झ बाहुप्फंसं जीए स को वि उल्लासो।
जअलच्छी तुह विरहे ण हूज्जला दुब्बला णं सा ॥ ४३४ ॥
(लब्ध्वा तव बाहुस्पर्शं यस्याः स कोप्युल्लासः।
जयलक्ष्मीस्तव विरहे खलूज्वला दुर्वला ननु सा ॥ इति छाया)

अत्र जयलक्ष्मीशब्दस्य केवलं कान्तावाचकत्वं नास्ति।

ष्फंसं संस्पर्शम्। उदाहृतौ लक्षणयोगमाह—अत्रेति। जयलक्ष्मीशब्दस्य केवलं कान्तावाचकत्वं नास्ति, तदर्थस्य तु कान्ताव्यवहारतया प्रतीतिरस्त्येवेति भावः[१]। अत्रालौकिके लौकिकव्यवहारसमारोपः।

अलौकिके शास्त्रीयव्यवहारसमारोपो यथा मम—

'यं स्वाश्रयान्तमपि मातुमक्नुवन्तः सन्तोऽपि सन्ततिजुषस्तमसा भवन्ति।
तत्त्वैकसंख्यफलकल्पमहीरुहाय तस्मै नमो भगवते मकरध्वजाय ॥"

अत्रमकरध्वजे लौकिके सकलसत्त्वमहाशयतयोपनिषत्सिद्धपरमात्मतत्त्व-व्यवहारप्रतीतिः।

शास्त्रीये लौकिकव्यवहारसमारो यथा मम—

'तत्तद्रसामृतमयान् विषयान् विहाय मुग्धश्चिरं श्रयति मोक्षमरुस्लीं यः।
तस्यात्मनः कथमिवास्तु गुणे विशेषो भोगात्ययेन विफला विभुताऽपि यस्य।'

अत्रोपलावस्थतया वैशेषिकदर्शने तदसन्निहितवस्तुज्ञानम्।

शास्त्रीये शास्त्रीयव्यवहारसमारोपो यथा मम—

'मेघसम्भृतवायव्ययन्त्रसञ्चारयोगतः।
नाड्यो गर्भमधुः सौर्य्यो दिव्यमम्भो रसात्मकम्।'

अत्र मेघलग्नवाय्वभ्रयोगिन्यः सूर्यमरीचयो भूम्यादिगतं जलमादाय गर्भं गृह्णन्तीति पुराणादिगम्ये वस्तुनि कामशास्त्रादिगर्भग्रहणप्रकारव्यवहृतिः। अस्याश्च प्रकृतादिवाप्रकृतादप्यत्र कृतप्रतीतिर्विषयः।

परोक्तिरिति सामान्यनिर्देशाद् यथा मम—

सम्प्राप्तः सकलाङ्गनिर्वृतिकरीं निद्रामभीकश्चिरं
संतृप्तो मधुनः सुखेन रजनीमस्मिन्ननैषीर्ननु।
तत् किं पङ्कजतल्पमल्पविदलत्वत्रान्तरोद्घाटना
दृष्टाऽन्तर्विवरं मनाङ् मधुप रे निर्भिद्य निर्गच्छसि ॥

---

१. एतेनैय यत्राप्रकृततादात्म्येन प्रकृतप्रतीतिस्तत्र रूपकम्। यत्राप्रकृतव्यवहारवतः प्रकृतस्य स्वतन्त्रैव प्रतीतिस्तत्र समासोक्तिरिति चण्डीदासमतेन घृतमिति सा० द०।

२. अद्वैतसौख्यफल–ख०।

१४९ निदर्शना ।

अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः ॥ ९७ ॥

निदर्शनं दृष्टान्तीकरणम् । उदाहरणम् —

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ ४३५ ॥

अत्रोडुपेन सागरतरणमिव मन्मत्या सूर्यवंशवर्णनमित्युपमायां पर्यवस्यति ।

यथा वा—

उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् ।
वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ॥ ४३६ ॥

अत्र कथमन्यस्य लीलामन्यो वहतीति तत्सदृशीमित्युपमायां पर्यवसानम् ।

अत्र महानुभावं कञ्चिदाश्रित्य निस्तीर्णविपदस्तद्विपत्तौ च निर्गच्छतः कृतघ्नस्य सम्बोधने प्रकृतेऽप्रकृतभ्रमरवृत्तान्तेन कृतघ्नवृत्तान्ताक्षेपः ।[1] ग्रन्थान्तर-दिशा चास्य वैचित्र्यान्तरविस्तरं भीत्याऽनुक्तमपि स्वयं मृग्यम् ।

अभवन् यथाश्रुतमात्रेण सम्भवन् वस्तुसम्बन्धोऽर्थसङ्गतिः । उपमापरिक-ल्पकः सादृश्यपर्यवसानः । निदर्शनेति लक्ष्यपदार्थमाह — **निदर्शनमिति** । एतदपि निर्वक्ति दृष्टान्तीकरणमिति प्रतिबिम्बोपनयनमित्यर्थः । उपमायां पर्यवस्यतीति । उपमामाक्षिप्य सङ्गच्छत ऐत्यर्थः । वाक्यार्थमुदाहृत्य पदार्थमुदाहरति—**यथा वेति इत्येके** । तन्न, उदयतीत्यादावप्येकपदार्थमात्रेणास्याः प्रतीत्यभावात् ।

वस्तुतस्तु पूर्वत्र वाक्यभेद उत्तरत्र त्वेकवाक्यतेत्युदाहरणद्वयसङ्गतिः । असम्भवद्वैचित्र्येण वा पूर्वत्र ह्युडुपेन समुद्रतरणवृत्तिः कालिदासकृतसूर्यवंशवर्णनो-द्यमे सर्वथैवासम्भविनी । उत्तरत्र वारणेन्द्रसम्बन्धिलीलासम्बन्धिभेदमात्रेण रैवत-

---

१. ग्रन्थान्तरपदेनात्रालङ्कारसर्वस्वस्य परामर्शः । तदेवाश्रित्यार्वाचीना निबन्धकृतः प्रायो वर्तन्ते । यत् पुनः पण्डितराजेन जगन्नाथेन सर्वस्वकृतो व्यवहारसमारोपसिद्धान्ते स्खलन-मर्यादा तदलङ्कारस्यास्य स्वरूपोद्घाटनप्रसङ्गे न तथा वैमत्वसूचकं यथा तन्निर्देशक-सूक्ष्मेक्षिकायां तद्भङ्गीभणने । "अप्रकृताभिन्नतयाऽध्यवसितः प्रकृतव्यवहारः स्वविशेष्ये तद्विशेष्याभिन्नतयाऽवस्थिते भासते । तत्राप्रकृतार्थोपकारकतयेति प्रकार एव रमणीयः" इति तदुक्तिरेवात्र निदर्शनम् । समासोक्तिपर्यायोक्तादिप्रधानकाव्येषूत्कर्षाधायकं तन्निर्णये उत्तमकाव्येऽन्तर्भुक्तं तस्यालङ्कारपदार्थस्य बोधकत्वे सहायत्वं विदधातीति तद्ग्रन्थत एव विमर्शनीयम् ।

दोर्भ्यां तितीर्षति तरङ्गवतीभुजङ्गमादातुमिच्छति करे हरिणाङ्कबिम्बम् ।
मेरुं लिलङ्घयिषति ध्रुवमेष देव ! यस्ते गुणान् गदितुमुद्यममादधाति ॥ ४३७ ॥

इत्यादौ मालारूपाऽप्येषा द्रष्टव्या ।

१५० स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च साऽपरा ।

क्रिययैव स्वस्वरूप-स्वकारणयोः सम्बन्धो यदवगम्यते साऽपरा निदर्शना ।

यथा—

उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् ।
शैलशेखरगतो दृषत्कणश्चारुमारुधुतः पतत्यधः ॥ ४३८ ॥

अत्र पातक्रियया पतनस्य लाघवे सत्युन्नतपदप्राप्तिरूपस्य च सम्बन्धः ख्याप्यते ।

कगिरावित्युपमायां पर्यवसानमिति[1] उपमाया आक्षेपो न तूपमायाः प्राधान्यमिति
ज्यायसी व्याख्या ध्वनिग्रस्तविषयत्वात्तस्याः प्राधान्यप्रतिभासाभावाच्च । यस्त इति
पाठे[2] एष यच्छब्दार्थे । यत्त इति पाठे त्वेष इति लोक इत्यर्थः । यदिति यस्मादित्यर्थः ।
क्रिययैवेति । असम्भवमन्तरेणैव सदृशवस्त्वन्तरवृत्तान्तान्वयप्रतीतिः । अप
रेति । अनेन लक्षणबीजपूर्वरूपानुगमाद्यभावं विवक्षन् नाम्नैवानयोः साम्यमासूत्र-
यतीत्येके, तन्न, बिम्बप्रतिबिम्बप्रत्यायनोपाधेः सामान्यात् । तदुक्तम्— 'सम्भवताऽ-
सम्भवता वा वस्तुसम्बन्धेन गम्यमानं प्रतिबिम्बकरणं निदर्शना'' इति[3] । लक्षण-
भेदस्तत्र प्रपञ्चार्थः सम्बन्धो वस्त्वन्तरसम्भवित्वम् । लघुपदप्रवृत्तिनिमित्तलङ्घन-

---

सादृश्यमूलकत्वेऽपि नात्र सादृश्य एव विश्रान्तिः, यथात्वे तूपमैव स्यादिति भावः ।
१. सादृश्यमूलकत्वेऽपि नात्र सादृश्य एव विश्रान्तिः ... दृष्टान्तीकरणमिति ग्रन्थकृतां वृत्तौ पाठोऽस-
सादृश्यमत्र गुणीभूतव्यङ्ग्यतयोपस्थाप्यते । दृष्टान्तीकरणमिति ग्रन्थकृतां वृत्तौ पाठोऽस-
म्भवद्वस्तुसंबन्धे सुसमञ्जसः, अन्यत्र तु कथमपि समाधेयः । ध्वनिग्रस्तत्वादिति टीका-
कृन्मन्तव्य उपमायाः प्राधान्ये तन्मूलो व्यपदेश उपमाध्वनिरिति यावत् ।
२. 'ध्रुवमेतदेव यस्ते' इति पाठान्तरम् । एष इति पाठे परिदृश्यमानो लोकसाधारण्येन
ज्ञायमानः । 'यत्ते' इति पाठे एष देव इत्यादिकं वाक्यं सरामृष्टम् । तेन च ततः
शाब्दबोध एतद्गुणगदनोद्यमाधानं नदीतितीर्षणस्य करे चन्द्रादानस्य मेरुलिलङ्घयिषणस्य
च समकक्षमिति शेषः । तरङ्गवतीनां नदीनां भुजङ्गो भोगादिलीलानायकः समुद्रः ।
३. एतच्चालङ्कारसर्वस्वकृतां निदर्शनालक्षणम् । अलङ्काररत्नाकरकारादयः पुनरसत्येव
संबन्धे निदर्शनं नियमयन्ति । ''एवं च रूपकादेः संबन्धभावस्य विद्यमानत्वान्निदर्शना-
पवादत्वम् । तेन श्रौतार्थसामानाधिकरण्यनिर्देशमन्तरेण यत्र संबन्धावघटकत्वं तत्र
निदर्शना, अन्यत्र तु रूपकालङ्कारः'' इति तेषां सिद्धान्तः । परं नेदं न्याय्यं सम्प्रदाया-
नुमोदितं वा ।

१५१ अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ॥९८॥

अप्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽप्रस्तुतप्रशंसा ।

सा च—

१५२ कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ।
तदन्यस्य वचस्तुल्येऽतुल्यस्येति च पञ्चधा ॥ ९९ ॥

तदन्यस्य कारणादेः । क्रमेणोदाहरणम्—

याताः किं न मिलन्ति सुन्दरि ! पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशाऽसि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥४९३॥

अत्र प्रस्थानात् किमिति निवृत्तोऽसीति कार्यं पृष्टे कारणमभिहितम् ।

राजन् ! राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुब्जे ! भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते ।
इत्थं नाथ ! शुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरा-
च्चित्रस्थानवलोक्य शून्यवलभादेकैकमाभाषते ॥४४०॥

अत्र प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वदरयः पलाय्य गता इति कारणे प्रस्तुते कार्यमुक्तम् ।

एतत्तस्य मुखात्कियत् कमलिनीपत्रे कणं वारिणो
यन्मुक्तामणिरित्यमंस्त स जडः शृण्वन् यदस्मादपि ।

क्रियापेक्षया प्राक्त्वेऽवाच्येति त्वोत्पत्तिः[1] । पतनस्येत्यनन्तरं शैलशेखरगतत्वेनेति शेषः । सम्बन्धः ख्याप्यते सादृश्यं प्रकाश्यते ।

प्रशंसा वर्णना सैवाप्रस्तुतप्रशंसैवेति लक्ष्यनिर्देशः । प्रस्तुताश्रया प्रस्तुतोत्कर्ष-प्रतिपत्तिपर्यवसानेत्यलङ्करणताबीजस्फोरणपूर्वमतिव्याप्तिपरिहारसूत्रणम् । आक्षेप इति ध्वनिशङ्कानिरासः । विशेषप्रतिपादककारिकाऽवतारमाह—सा चेति ।

कारणादेरिति । यथाप्रतियोगि ग्राह्यमित्यर्थः[2] । न मिलन्ति नागच्छन्ति । निपतदेव पीतं संगृहीतमश्रु येनेति विग्रहः । धाराश्रुणेति पाठे धारारूपमश्रिति नेयम् । भाविन्यावश्यके मरणे उत्साहो वियोगदुःखशान्तिवाञ्छया । कार्ये पृष्ट इति

---

१. त्वाप्रत्ययस्य तत्स्थानीयस्य ल्यप्प्रत्ययान्तस्य ।

२. एवमादिस्थले टीकाकृद्व्याख्याने बह्वपेक्षितं भवति । न केवलं श्लोकव्याख्यानभागे, अलङ्कारत्त्वनिष्कर्षमयेऽप्ययमयत्नः सुस्पष्ट एव । प्राचीनटीकातस्तदानीन्तनपाठकैः परिपूरितं स्यादिति नाडम्बरो विहित इति समर्थनमगतिकगतिः ।

अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैः
कुत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तःशुचा ॥४४१॥

अत्रास्थाने जडानां ममत्वसम्भावना भवतीति सामान्ये प्रस्तुते विशेषः कथितः ।

सुहृद्वधूबाष्पजलप्रमार्जनं करोति वैरप्रतियातनेन यः ।
स एव पूज्यः स पुमान् स नीतिमान् सुजीवितं तस्य स भाजनं श्रियः ॥४४२॥

अत्र 'कृष्णं निहत्य नरकासुरवधूनां यदि दुःखं प्रशमयसि तत् त्वमेव श्लाध्यः' इति विशेषे प्रकृते सामान्यमभिहितम् ।

तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः श्लेषः समासोक्तिः सादृश्यमात्रं वा तुल्यातुल्यस्य ह्याक्षेपे हेतुः । क्रमेणोदाहरणम्—

पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि यायाद्यदि प्रणयने न महानपि स्यात् ।
अभ्युद्धरेत्तदपि विश्वमितीदृशीयं केनापि दिक् प्रकटिता पुरुषोत्तमेन ॥४४३॥

येनास्यभ्युदितेन चन्द्र ! गमितः क्लान्तिं रवौ तत्र ते
युज्येत प्रतिकर्तुमेव न पुनस्तस्यैव पादग्रहः ।
क्षीणेनैतदनुष्ठितं यदि ततः किं लज्जसे नो मना—
गस्त्येवं जडधामता तु भवतो यद् व्योम्नि विस्फूर्जसे ॥४४४॥

आदाय वारि परितः सरितां मुखेभ्यः किं तावदर्जितमनेन दुरर्णवेन ।
क्षारीकृतं च वडवादहने हुतं च पातालकुक्षिकुहरे विनिवेशितञ्च ॥४४५॥

अस्मादेवोत्तरादुन्नीयत इति भावः । [१] मुखात् कियत् श्रुतमित्यर्थः । वैरप्रतियातनं कृत आघाते प्रत्याघातः ।

श्लेषसमासोक्तिशब्दावत्र तदाभासपरौ[२] । अप्रकृतात् प्रकृतप्रतीतौ तल्लक्षणाभावाद् भावे वा[३] ताभ्यामेव ग्रस्ततया मूलोच्छेदापत्तेः । पुंस्त्वात् प्रविचलनमैकत्र स्वशरीरप्राप्तिः, अन्यत्र नु पुरुषताहानिः । अधोगमनं पातालप्रवेशः स्वपदभ्रंशश्च । प्रणयनेनापूर्वोत्कर्षप्राप्त्या । महान् महाकाय आसादितोच्चैःपदश्च । विश्वं भुवनं सर्वजनश्च । केनाप्यनिर्बाच्यमहिम्ना । दिङ् मार्गः । पुरुषोत्तमो नारायणः प्रकृत्या महानुभावश्च । अत्रावयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसीति न्यायेन पुरुषोत्तमशब्दः

---

१. मुखादिति । लोकप्रसिद्ध्यऽत्र मुखमाकृतिः । अपेक्षितक्रियं चैतदपादानं जाड्यावेदकम् । एतच्छरीरादन्यज्ज्ञातमित्यर्थ इति रुचकः । चण्डीदासेन तु साकस्येन ज्ञातमित्यनेनैव समाधानं साधितम् ।

२. तदभ्यासार्थौ—ख० ।

३. भावे वेति यथाकथञ्चित्तथात्वे ।

इयञ्च काचिद् वाच्ये प्रतीयमानार्थानध्यारोपेणैव भवति। यथा—

अब्धेरम्भः स्थगितभुवनाभोगपातालकुक्षेः
पोतोपाया इह हि बहवो लङ्घनेऽपि क्षमन्ते।
आहो रिक्तः कथमपि भवेदेष दैवात्तदानीं
को नाम स्यादवटकुहरालोकनेऽप्यस्य कल्पः ॥४४६॥

क्वचिदध्यारोपेणैव यथा—

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायाऽपि परोपकारकरणे मार्गस्थितस्यापि मे ॥४४७॥

क्वचिदंशेष्वध्यारोपेण यथा—

सोऽपूर्वो रसनाविपर्ययविधिस्तत् कर्णयोश्चापलं
दृष्टिः सा मदविस्मृतस्वपरदिक् किं भूयसोक्तेन वा।
सर्वं विस्मृतवानसि भ्रमर हे ! यद् वारणोऽद्याप्यसा
वन्तः शून्यकरो निषेव्यत इति भ्रातः ! क एष ग्रहः ॥४४८॥

अत्र रसनाविपर्यासः शून्यकरत्वं च भ्रमरस्यासेवने न हेतुः, कर्णचापलं न हेतुः, मदः प्रत्युत सेवने निमित्तम्।

प्रथमं भगवत्येव प्रतीतिमाधत्त इति तदनुरोधेनान्येऽपि शब्दास्तत्संसर्गयोग्यार्थ-प्रत्यायकतयैव प्रथमतः स्फुरन्ति, ततश्च प्रकरणपर्यालोचनयाऽर्थान्तरप्रतीतिरिति श्लेषाभासता। न च प्रकरणमेव सर्वापवादकमिति वाच्यं सामग्रीवशेनात्र प्राकरणिकताभानस्य प्रथममनुभूयमानत्वात्। पादग्रहः शुक्लपक्षे वृद्धचर्थं मरीचिसंश्रयः प्रणामश्च। जडधानता शीतरश्मिता मन्दप्रभता च। अनध्यारोपेणैवापाततोऽशमात्रेणाऽप्यनपेक्षया। पोतोपाया वहित्ररूपा उपायाः। अत्र प्रतीयमानार्थानुसन्धानं विनाऽप्यसङ्गतेः सर्वथैव तदपेक्षयेत्यर्थः।

वामेनेति वामपार्श्वेनेत्येकत्रार्थः, प्रतिकूलेन शीलादिनेत्यन्यत्र। मार्गो वर्त्म सदाचारश्च। शाखोटकस्य भूतावासता छायाऽनाश्रयणे हेतुः। अत्राचेतनेन सार्धं वाकोवाक्यं नोपपद्यत इति प्रथमत एव व्यङ्ग्यार्थापेक्षिता।

अंशेष्वेकदेशेषु। करिणां जिह्वापरिवृत्तिर्ब्रह्मर्षिशापेन प्रसिद्धा[२]। न हेतुरिति। न तत्रांशे व्यङ्ग्यापेक्षितत्वमापाततोऽपीत्यर्थः। कर्णचापालं तु हेतुरिति।

---

१. अत्र वाच्यार्थस्य प्रधानतो विवक्षितत्वात् तेन च चमत्कारोदयादेवम्।

२. ब्रह्मर्षिशापादिति प्रसिद्धिः—ख०।

१५६ निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् ।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥
कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ।
विज्ञेयाऽतिशयोक्तिः सा

उपमानेनान्तर्निगीर्णस्योपमेयस्य यदध्यवसानं सैका । यथा—

कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥४४९॥

अत्र मुखादि कमलादिरूपतयाऽध्यवसितम् ।

यच्च तदेवान्यत्वेनाध्यवसीयते साऽपरा । यथा—

अण्णं लडहत्तणअं अण्णा विअ का वि वत्तणच्छाआ ।
सामा सामण्णपआवइणो रेह च्चिअ ण होई ॥ ४५०
(अन्यत्सौकुमार्यम् अन्यैव च कापि वर्तनच्छाया ।
श्यामा सामान्यप्रजापतेः रेखैव च न भवति ॥ इति छाया)

'यद्यर्थस्य' यदिशब्देन [१]चेच्छब्देन वोक्तौ यत्कल्पनम् (अर्थादसम्भविनोऽर्थस्य) सा तृतीया । यथा—

मदगन्धलुब्धानां मधुपानां कर्णाघातविघटितानामपि वारितवामत्वेनाहंपूर्विकया निपातनौत्सुक्यस्य गाढगाढीभावः । प्रत्युत सेवने निमित्तमिति । असेवननिमित्तप्रत्याशयोपक्षिप्तोऽपि वाच्यार्थप्रतीतिदशायां नायं तथाभूत इति सर्वथा व्यङ्ग्यापेक्षयैव व्यवस्थितिरित्यर्थः ।

उपमानेनान्तर्निगीर्णस्योपमेयस्येत्यद्रस्तुततादार्थ्यप्रतिभाससामग्रीप्राबल्यस्थगितस्वरूपस्य प्रस्तुतस्येत्यर्थः । अध्यवसानं द्रढीयसी बुद्धिः । अन्यत्वेनाविविक्ताकारवस्त्वन्तरत्वेन ।

लडहत्तणं लटभत्वं लावण्यमित्यर्थः । वत्तणच्छाया निर्माणशोभा । रेहच्चिअ ण होई रेखैव रेखानिर्मितिरेव न भवति । निर्माणपरिपाटीमात्रमप्यत्र नास्तीति भावः । यदिशब्देनेति[1] यथा—

उभौ यदि व्योम्नि पयःप्रवाहावाकाशगङ्गापयसः पतेताम् ।
तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥

---

१. यदिशब्देनेत्यस्य मूले निदर्शनं टीकाकृता प्रसिद्धतरं पद्यं "पुष्पं प्रवालोपहितं यदि स्यात्" इत्यादिना स्मर्यतेऽत्र । उभयत्रैव सम्भावनामूलत्वमिति योजना ।

राकायामकलङ्कं चेदमृतांशोर्भवेद् वपुः ।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात् ।। ४५१ ।।

कारणस्य शीघ्रकारितां वक्तुं कार्यस्य पूर्वमुक्तौ चतुर्थी । यथा –

हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन ।
चरमं रमणीवल्लभ ! लोचनविषयं त्वया भजता ।।४५२।।

१५४ प्रतिवस्तूपमा तु सा ।१०१।।

सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः ।

यथा—

साधारणो धर्म उपमेयवाक्ये उपमानवाक्ये च कथितपदस्य दुष्टतयाऽभिहितत्वाच्छब्दभेदेन यदुपादीयते सा वस्तुनो वाक्यार्थस्योपमानत्वात् प्रतिवस्तूपमा । यथा—

देवीभावं गमिता परिवारपदं कथं भजत्वेषा ।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम् ।। ४५३ ।।

यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः ।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता ।। ४५४ ।।

कार्यकारणयोः पौर्वापर्यविपर्यये द्वयी गतिः, कार्यस्य पूर्वभावो द्वयोः समकालता च । तत्राद्यामाह—कारणस्येति । पूर्वमुक्तौ पूर्वंभावोक्तौ । द्वितीया यथा—

"अविरलविलोलजलदः कुटजार्जुननीपसुरभिवनवातः ।
अयमायातः कालो हन्त हताः पथिकगेहिन्यः ।।"

बस्तुनो वाक्यार्थस्येति प्रतिवस्तूपमानामनिरुक्तिपरम् । देवीभावमित्यादेरेवंविधस्थलेऽपि[1] परिवारत्वपरिभोगयोरर्थविप्रकर्षाभावात् प्रतिवस्तूपमैवेति संशयनिरासे तात्पर्यमित्येकोऽयं भवतु न खल्वित्यनयोः समानार्थतया सङ्गतिरिति तु साम्प्रदायिकाः ।

स्फुटोदाहृतिर्यथा मम—

"मदललितहरिणनयनानयनोपनिषत्सु नागरा कुशलाः ।
गीरसवहाः सुकृतिनो नारायणवन्दनानिपुणाः ।।"

---

१. परिवारपरिभोगपदयोर्न यद्यपि पर्यायत्वप्रसिद्धिस्तथाप्यायत्यामर्थसामर्थ्यादेवम् । एतदेवोद्धृतसम्प्रदायसंमतयुक्तेराकूतम् । आचार्यदण्डिप्रभृतिसम्मताया वाक्यार्थोपमाया अवयवावयविगतत्वेन द्विधैव वाक्यार्थस्यौपम्यकरणम् । इवशब्दप्रयोगश्चेतो भेदबीजम् । वस्तुतस्तु वाक्यार्थोपमाया अपरिभाषिताया एव प्रतिवस्तूपमाया उपमाप्रपञ्चत्वेन उद्भावनम् ।

इत्यादिका मालाप्रतिवस्तूपमा द्रष्टव्या ।

एवमन्यत्राप्यनुसर्तव्यम् ।

१५५ दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् ॥१०२॥

एतेषां साधारणधर्मादीनां दृष्टोऽन्तो निश्चयो यत्र स दृष्टान्तः ।

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम् ।
आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्वत्या ॥ ४५५ ॥

एष साधर्म्येण । वैधर्म्येण तु—

तवाहवे साहसकर्मशर्मणः करं कृपाणान्तिकमानिनीषतः ।
भटाः परेषां विशरारुतामगुः दधत्यवाते स्थिरतां हि पांसवः ॥४५६॥

१५६ सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥ १०३ ॥

अत्र कुशलत्वनिपुणत्वे शब्दमात्रेणैव भिन्ने[१] । किमद्भुतं किं ततः सदैव प्रकृतिरेवेत्यमीभिः सर्वैरेव तत्तद्धर्माभावायोगव्यवच्छेद एव प्रत्याय्यस्यैकतया साधारण्यमिति ।

एवमिति । अन्यत्रापीति ।

"इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमदलं श्यामेव हेमप्रभा ।
कार्कश्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव ॥"

इत्यादावप्रस्तुतप्रशंसादौ वृत्ते—

"उत्क्षिप्तं सह कौशिकस्य पुलकैः सार्धं मुखैर्नामितं
भूपानां जनकस्य संशयधिया प्रीत्या समास्फालितम् ।
वैदेहीमनसा समञ्च सहसा कृष्टं ततो भार्गव-
प्रौढाहङ्कृतिकन्दलेन च समं तद्भग्नमैशं धनुः ॥"

इत्यादौ सहोक्तिप्रभृतौ वर्तिष्यमाणे मालारूपत्वमनुसर्तव्यम् ।

प्रतिबिम्बनं बिम्बप्रतिबिम्बभावनिर्देशः । दृष्टः साधितः । निश्चय उपमानिर्वाहः । वैधर्म्येण विपर्ययेण । सादृश्यपर्यवसायिना साहसकर्मणा शर्म सुखं यस्येति विग्रहः । विशरारुतां व्यूहभङ्गेन विक्षिप्तताम् ।

---

१. अतिरिक्तमुदाहरणं टीकाकृत्कृतं 'नैसर्गगुणविनीतम्-' इत्यादि ।

प्राकरणिकाप्राकरणिकानामर्थाद्रुपमानोपमेयानां धर्मः क्रियादिरेकवारमेव यदुपादीयते तदेकस्थस्यैव समस्तवाक्यदीपनाद् दीपकम् । यथा—

किवणाणँ धणं णाआणं फणमणी केशराई सीहाणं ।
कुलबालिआणं त्थणआ कुत्तो छिप्पन्ति अमुआणं ॥४५७॥
(कृपणानां धनं नागानां फणमणिः केसराः सिंहानाम् ।
कुलबालिकानां स्तनाः कुतः स्पृश्यन्तेऽमृतानाम् ॥
इति संस्कृतम्)

कारकस्य च बह्वीषु क्रियासु सकृद्वृत्तिर्दीपकम् । यथा—

खिद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्यक् ।
अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया वधूः शयने ॥४५८॥

१५७ मालादीपकमाद्यं चेद्यथोत्तरगुणावहम् ।

पूर्वेण पूर्वेण वस्तुनोत्तरमुत्तरं चेदुपक्रियते तन्मालादीपकम् । यथा—

संग्रामाङ्गणमागतेन भवता चापे समारोपिते
सम्प्राप्ते परिपन्थियोधनिवहे साम्मुख्यमासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥४५९॥

वृत्तिरुपादानम् । प्रकृता प्रकृतात्मनामित्यस्य धर्मस्येत्यनेनैव सम्बन्धः । सैव सकृद्वृत्तिरेव क्रियासु बह्वीषु सतीषु । इति शब्द- प्रकारे । एवम्प्रकारमलङ्करणं दीपकमित्यर्थः । अर्थादिति । तथैव पर्यवसानादिति भावः । क्रियादिरित्यादिपदेन गुणोपग्रहः । दीपनादलङ्कारणात् । कुलबालिआणं कुलपालिकानां कुलस्त्रीणां च । छिपयन्ति स्पृश्यन्त इति क्रिया सकृदेवोपात्ता । अत्र कुलपालिकावृत्तमेव प्रस्तुतम् ।

गुणस्य सकृदुपादानं यथा मम—

"मुक्तास्थलीनामुपलैर्निघर्षणं दावानलैरम्बुरुहाञ्च तापनम् ।
मुग्धाङ्गनानाञ्च विटैर्विमर्दनं खलैर्निरासः कृतिनाञ्च नोचितम् ॥"

अत्रोचितत्वं गुणः खलकृतिवृत्तान्त एव च प्रकृतः । कूणति सवितर्कं वीक्षते । वेल्लति परिवर्तते । निमिषति मुद्रितप्रायं किञ्चिद् विस्तारयति ।

मालादीपकमिति । मालोपमादौ यथोपमादिलक्षणातिरिक्तं तत् स्वरूपबाहुल्यं विना किञ्चिदपि नास्ति नात्र तथा किन्तर्हि उपकार्योपकारकतया परस्परसंश्लेषेण मालाभावमापन्नानां दीपकं सकृद्धर्मनिर्देश इति पूर्वदीपकानन्तर्गतत्वम् । आद्य-मिति—पूर्वमित्यर्थ इति विवृणोति पूर्वेणेति । संप्राप्य इत्यादि पाठान्तरं पूर्वोक्त-दोषपरिहाराय ।

१५८ नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ॥१०४॥

नियतानां प्राकरणिकानामेवाप्राकरणिकानामेव वा। क्रमेणोदाहरणम्—

पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः।
आवेदयति नितान्तं क्षेत्रियरोगं सखि! हृदन्तः ॥४६०॥

कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः का।
अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे तवाननस्य ॥४६१॥

१५९ उपमानाद्यदन्यस्य व्यतिरेकः स एव सः।

अन्यस्योपमेयस्य। व्यतिरेक आधिक्यम्।

क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते नित्यम्।
विरम प्रसीद सुन्दरि! यौवनमनतिवर्ति यातं तु ॥ ॥४६२॥

इत्यादावुपमानस्योपमेयादाधिक्यमिति केनचिदुक्तं तदयुक्तमत्र यौवनगतास्थैर्याधिक्यं हि विवक्षितम्—

१६० हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते ॥१०५॥
शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वत् त्रिरष्ट तत्।

व्यतिरेकस्य हेतुरुपमेयगतमुत्कर्षनिमित्तमुपमानगतमपकर्षकारणं तयोर्द्वयोरुक्तिरेकतरस्य द्वयोर्वाऽनुक्तिरित्यनुक्तित्रयम्। एतद्भेदचतुष्टयमुपमानोपमेयभावे शब्देन प्रतिपादिते, आर्थेन च क्रमेणोक्ताश्चत्वार एव भेदाः, आक्षिप्ते चौपम्ये

धर्म इत्यनन्तरं यत्रोपादीयत इति शेषः। पाण्डु क्षाममित्यादि पूर्वमेव व्याकृतम्। विरहानुभावतया सर्वेषामेव प्राकरणिकत्वं कुमुदादीनाममृतादीनाञ्चात्राप्राकरणिकता, दृशोराननस्य च प्रकृतत्वात्। साधारणधर्मत्वं च पूर्वार्धे किंस्विद् द्योत्यस्याधिक्षेपस्योत्तरत्र च प्रतिहतत्वस्य च।

"उपमानादुपमेयस्याधिकगुणत्वे न्यूनगुणत्वे वा व्यतिरेकः"

इत्युक्त्वा न्यूनगुणत्वमसत्त्वमिति क्षीणः क्षीण इत्यादौ यौवनस्यास्थिरस्य पुनर्निवृत्त्यभावाच्चन्द्रापेक्षया निकृष्टत्वाद् द्वितीयोदाहृतित्वं केचिदिच्छन्ति[१]।

---

१. एवमलङ्कारसर्वस्वकारः स्वलक्षणेनोदाहरणप्रदर्शनेन च। परं मम्मटादर्वाचीनस्य तस्य परामर्शो मूलकृतो नोचितः। रुद्रटेन—

"यो गुण उपमाने वा तत्प्रतिपन्थीव दोष उपमेये।
भवतो यत्र समस्तौ स व्यतिरेकोऽयमन्यस्तु॥"

इति लक्षणेनानेनैवोदाहरणेन च सूचितभेदं तयोर्वा खण्डनपरमिदम्। परं निष्कर्षोत्कर्षस्थले दोषगुणपदविन्यासोऽत्र कृतः।

तावन्त एव, एवं द्वादश। एते श्लेषेऽपि भवन्तीति चतुर्विंशतिर्भेदाः। क्रमेणोदाहरणम्—

असिपत्रसहायस्य प्रभूतारिपराभवे।
अन्यतुच्छजनस्येव न स्मयोऽस्य महाधृतेः ॥४६३॥

अत्रैव तुच्छेति महाधृतेरित्यनयोः पर्यायेण युगपद् वाऽनुपादानेऽन्यद् भेदत्रयम्। एवमन्येष्वपि द्रष्टव्यम्। अत्रेवशब्दस्य सद्भावाच्छाब्दमौपम्यम्।

असिमात्रसहायोऽपि प्रभूतारिपराभवे।
नैवान्यत्तुच्छजनवत् सगर्वोऽयं महाधृतिः ॥४६४॥

अत्र तुल्यार्थे वतिरित्यार्थमौपम्यम्—

इयं सुनयना दासीकृततामरसश्रिया।
आननेनाकलङ्केन जयतीन्दुं कलङ्किनम् ॥४६५॥

अत्रेवादितुल्यादिपदविरहेणाक्षिप्तैवोपमा।

जितेन्द्रियतया सम्यग्विद्यावृद्धनिषेविणः।
अतिगाढगुणस्यास्य नाब्जवद् भङ्गुरा गुणाः ॥४६६॥

अत्रेवार्थे वतिः। गुणशब्दः श्लिष्टः, शाब्दमौपम्यम्।

अखण्डमण्डलः श्रीमान् पश्यैष पृथिवीपतिः।
न निशाकरवज्जातु कलावैकल्यमागतः ॥४६७॥

अत्र तुल्यार्थे वतिः। कलाशब्दः श्लिष्टः।

मालाप्रतिवस्तूपमावद् मालाव्यतिरेकोऽपि सम्भवति। तस्यापि भेदा एवमूह्याः। दिङ्मात्रमुदाह्रियते। यथा—

तच्चास्माभिरत्रैवान्तर्भावयितुं शक्यमित्याह—क्षीणः क्षीण इति [१] शब्दार्थाभ्यां निवेदित इत्यन्वयः। उत्कर्षनिमित्तमुत्कृष्टगुणसम्बन्धो निकर्षकरणं तद्विरहः।

पत्रम् असिरेव पत्रं सूत्रनिशितत्वात् असि मात्रेऽति तु पाठो व्यक्त एव [२]। एवमिति पाठविपर्यासे चतुर्भेदोदाहृतियोग्यत्वं गुणा गाम्भीर्यादयस्तन्तवश्च। मण्डलमौशनसादितन्त्रप्रसिद्धं द्वादशराजकं दिक्चक्रवालञ्च। कला विज्ञानानि भागाश्च। कलाशब्द इत्युपलक्षणं मण्डलशब्दोऽपि योज्यः [३]। प्रतापः प्रकृष्टतापः प्रभावश्च।

---

१. इत्यादिशब्दाभ्याम्–क०।

२. अयमेव प्रचलितः पाठः।

३. योग्यः–क०।

हरवन्न विषमदृष्टिर्हरिवन्न विभो विधूतविततवृषः ।
रविवन्न चातिदुःसहकरतापितभूः कदाचिदसि ॥४६८॥

अत्र तुल्यार्थे वतिः । विषमादयश्च शब्दाः श्लिष्टाः ।

नित्योदितप्रतापेन त्रियामामीलितप्रभः ।
भास्वताऽनेन भूपेन भास्वानेष विनिर्जितः ॥४६९॥

अत्र ह्याक्षिप्तैवोपमा, भास्वतेति श्लिष्टः । यथा वा—

स्वच्छात्मतागुणसमुल्लसितेन्दुबिम्बं बिम्बप्रभाधरमकृत्रिमहृद्यगन्धम् ।
यूनामतीव पिबतां रजनीषु यत्र तृष्णां जहार मधु नाननमङ्गनानाम् ॥४७०॥

अत्रेवादीनां तुल्यादीनां च पदानामभावेऽपि श्लिष्टविशेषणैराक्षिप्तैवोपमा प्रतीयते । एवञ्जातीयकाः श्लिष्टोक्तियोग्यस्य पदस्य पृथगुपादानेऽन्येऽपि भेदाः सम्भवन्ति । तेऽप्यनयैव दिशा द्रष्टव्याः ।

१६१ निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ।
वक्ष्यमाणोक्तिविषयः स आक्षेपो द्विधा मतः ॥

विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीकार्यस्याशक्यवक्तव्यत्वमतिप्रसिद्धत्वं वा विशेषं वक्तुं निषेधो निषेध इव यः स वक्ष्यमाणविषय उक्तविषयश्चेति द्विधा आक्षेपः । क्रमेणोदाहरणम्—

भास्वतेत्यनन्तरं प्रतापेन चेति शेषः । विषमा स्थिरा दृष्टिर्यस्याथ च विषमास्तिस्रो दृष्टयो यस्येति विग्रहः । वृषो दानवभेदो धर्मश्च । करो रश्मिर्धनादानञ्च[1] ।

निषेध इत्यादि पूर्वार्धमाक्षेपसामान्यलक्षणम् । वक्ष्यमाणेत्यादि तु विभागपरम् । अनुपसर्जनीकार्यस्य वचनायोग्यस्य । अशक्यवक्तव्यत्वमिति दारुणतया वक्तुमशक्यं तद्वक्तव्यं वचनार्हञ्चेति विग्रहानन्तरं त्वप्रत्ययेण प्रत्येकं योगः । एतच्च वक्ष्यमाणविषयेऽतिप्रसिद्धमित्युक्तविषयमिति व्यवस्थितविकल्पार्थो वा[2] शब्दो निषेध इवेति—शब्दगतया प्रतीयमानोऽर्थानुप्रतिसन्धाने त्वनवतिष्ठमानो निषेध इत्यर्थः। ए इति साम्मुख्यामन्त्रणाय । अत्र विरहवेदनाजनितदुर्दशाप्रकर्षो विवक्षितोऽप्यशक्यवचनतया नोक्तः । आ इति[3] साभ्यर्थनाऽनुनयप्रकोपे ।

---

१. हरवदित्यादि पद्यमत्र मूल एव पठितम् । एवमन्यैष्टीकाकृद्भिः । परं रुचकश्रीधरादयस्तु प्राचीनास्तथा न पठन्ति ।

२. एतच्च मूलेऽस्पष्टस्य वक्ष्यमाणोक्तविषय इति पदस्य विवरणार्थम् । ततश्च सूत्रवाक्यत एव भेदद्वयसिद्धिरित्याशयः ।

३. तृतीयचरणस्याद्यात् पदात् परम् आ इति निपातः ।

ए एहि किंपि कीए वि [1]कए णिक्किव भणामि अलमह वा ।
अविआरिअ-कज्जारम्भ-आरिणी मरउ ण भणिस्सं ॥४७१॥

(ए एहि किमपि कस्या अपि कृते निष्कृप भणामि अलमथवा ।
अविचारितकार्यारम्भकारिणी प्रिय तां न भणिष्यामि ॥इति संस्कृतम्)

ज्योत्स्ना मौक्तिकदाम चन्दनरसः शीतांशुकान्तद्रवः
कर्पूरं कदली मृणालवलयान्यम्भोजिनीपल्लवाः ।
अन्तर्मानसमास्त्वया प्रभवता तस्याः स्फुलिङ्गोत्कर-
व्यापाराय भवन्ति हन्त किमनेनोक्तेन न ब्रूमहे ॥४७२॥

१६२ क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना ॥१०७॥

हेतुरूपक्रियाया निषेधेऽपि तत्फलप्रकाशनं विभावना । यथा—

कुसुमितलताभिरहताऽप्यधत्त रुजमलिकुलैरदष्टाऽपि ।
परिवर्तते स्म नलिनीलहरीभिरलोलिताऽप्यघूर्णत सा ॥४७३॥

१६३ विशेषोक्तिरखण्डेषु कारणेषु फलावचः ।

मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिः । अनुक्तनिमित्ता, उक्तनिमित्ता, अचिन्त्यनिमित्ता च । क्रमेणोदाहरणम्—

निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते ।
श्लथीकृताश्लेषरसे भुजङ्गे चचाल नालिङ्गनतोऽङ्गना सा ॥४७४॥

क्रिया[2] कारणव्यापारः । एतदेव स्फुटयति वृत्तिकृद् हेतुरूपक्रियाया इति । तज्जन्यस्तज्जन्यजनको व्यापार इत्युक्तदिशा फलं प्रति हेतुरूपाया इत्यर्थः । परिवर्तते स्म व्यावर्तते ।

सामान्यलक्षणसंगृहीतान् सूत्रकृताऽनुक्तानपि विशेषोक्तिविशेषान् वृत्तिकृदाह—अनुक्तेति । अनुक्तनिमित्तोक्तनिमित्तेति च द्विधा भूता, अनुक्तनिमित्तायाश्चिन्त्याचिन्त्यनिमित्ततया द्वैविध्यात् त्रिविधेति भावः । क्रमेणेत्यतः पूर्वमुक्तेति शेषः । निद्रेत्यादावनुक्तमपि स्मरसमरनिःसहत्वादिभाव्यमेवालिङ्गनापरित्यागनिमित्तम् ।

---

१. एकणेति दुष्टः पाठः प्रचलितमुद्रितपुस्तकेषु । गाथासत्तसईटीकाकृद् गङ्गाधरधृतपाठस्त्वितो भिन्नः ।

२. धातोरध्यस्तकृत्प्रत्ययवयचा आन्तरव्यापार इति लिपिकृतां टिप्पणीत्वेनानुमीयमानोऽधिकः पाठः—ख० ।

कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने ।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे[१] ॥४७५॥

स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरताऽपि तनुं यस्य शम्भुना न बलं हृतम् ॥४७६॥

१६४ यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ॥१०८॥

एकस्त्रिधा वससि चेतसि चित्रमत्र
देव ! द्विषां च विदुषां च मृगीदृषां च ।
तापं च सम्मदरसं च रतिं च पुष्णन्
शौर्योष्मणा च विनयेन च लीलया च ॥४७७॥

१६५ सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥१०९॥

स एक इत्यादौ तनुहरणेऽपि बलाहरणनिमित्तं निरूप्यमाणतायामपि दुर्विज्ञानत्वेनाचिन्त्यम् । कर्पूर इत्यादौ दाहेऽपि शक्तिमत्वेऽवार्यवीर्यत्वमुपात्तमेव निमित्तम् ।

क्रमिकाणां क्रमेणोपात्तानां क्रमेणोपात्तैरेव सम्बन्धान्तरैर्यथार्थ्यासमन्वयो यथासंख्यम् ।

सामर्थ्यत उपपन्नतया ख्याप्यते[२] । कौमुदीमहसि चन्द्रिकाप्रकाशे ।

---

१. "तस्मै कुसुमधन्वने" इति वैकल्पिकः पाठः ।

२. अर्थान्तरन्यासे समर्थनस्य प्रयोजकता प्राचीनैर्लक्षणेनाविनाभावितया नोद्दिष्टा । आचार्यदण्डिनो

"जगदानन्दयत्येष मलिनोऽपि निशाकरः ।
अनुगृह्णाति नितरां सदोषोऽपि द्विजेश्वरः ॥"

इति लक्ष्ये समर्थनं त्वाभासमात्रम् । तल्लक्षणेऽपि समर्थनस्य न प्रवेशः । आधुनिकनये दृष्टान्तालङ्कारेणैव साध्यत इदम् । प्राचीनाधुनिकनययोर्मध्ये सेतुर्बद्धः कुन्तकेन—":मुख्यतात्पर्यसाम्येन समर्थकतयादितः" इति तल्लक्षणे व्यवस्थापनात् । साम्यतः सादृश्यात् । समर्पकत्वादुपपत्तियोजनेनेति तद्वृत्तिरेव पक्षं कक्षीकरोति । हिशब्देनाप्युक्तोऽर्थान्तरन्यासो भामहेन पृथक्संस्थत्वेनोद्दिष्टः । "एको हि दोषः" इत्यादिकुमारपद्येऽर्थान्तरन्यासो वाऽलङ्कारान्तरं वेति वादविषयीभूते उपमारात्या विशेषत्य न्यसनमिति वदन् सामान्यगोचरीभूतो विशेषसदाचारश्च क्वचिदर्थतानवच्छिन्नत्वं क्वचिच्च पदवेद्यत्वमिति दिगिति सिद्धन्तेनाहुः कौस्तुभकृतो विश्वेश्वरपण्डिताः ।

साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण यत् समर्थ्यते विशेषो वा सामान्येन सोऽर्थान्तरन्यासः। क्रमेणोदाहरणम्—

निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम्।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्[1] ॥४७८॥

[2]सुसितवसनालंकारायां कदाचन कौमुदी
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः।
तदनु भवतः कीर्तिः केनाप्यगीयत येन सा
प्रियगृहमगान्मुक्ताशङ्का क्व नासि शुभप्रदः ॥४७९॥

गुणानामेव दौरात्म्याद् धुरि धुर्यो नियुज्यते।
असंजातकिणस्कन्धः सुखं स्वपिति गौर्गलिः ॥४८०॥

अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम्।
त एव धन्याः सुहृदः पराभवं जगत्यदृष्ट्वैव हि ये क्षयं गताः ॥४८१॥

१६६ विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः।

वस्तुवृत्तेनाविरोधेऽपि विरुद्धयोरिव यदभिधानं स विरोधः।

१६७ जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद् गुणैस्त्रिभिः। ११०
क्रिया द्वाभ्यामपि द्रव्यं द्रव्येणैवेति ते दश।

क्रमेणोदाहरणम्—

अभिनवनलिनीकिसलयमृणालवलयादि दवदहनराशिः।
सुभग! कुरङ्गदृशोऽस्या विधिवशतस्तद्वियोगपविपाते ॥४८२॥

धुर्य्येनन्यसाध्ये कर्मणि धुर्य्यः समर्थः। विरुद्धयोरिव यदभिधानमिति विरोधबोधकमभिधानमित्यर्थः। ध्वनिभेदपिण्डनोक्तदिशा पूर्वपूर्वानुप्रवेशादुत्तरोत्तरमेकैकह्रासक्रमेण गुणैस्त्रिभिरिति सङ्गतिः। अभिनवेत्यादौ नलिनीकिसलयमृणालवतयादिशब्दस्य दवदहनशब्दस्य चानेकव्यक्तिवाचकत्वाज्जातिशब्दत्वम्। गिरय इत्यादौ गिरिमरुदब्धिशब्दानां जातिशब्दत्वं विश्वम्भराशब्दस्त्वखण्ड[3]नवखण्डभूवाचको न जाति विरोधोदाहृतिविषयः। अनुन्नताचलगम्भीरलघुशब्दास्तु गुणाः। अनुरज्यते प्रेमनिर्भरो भवति। स्नेहं वशीकृतत्वं पराप्नोतीति। क्रियते[4] खङ्गजाता-

१. एतदुत्तरं 'सुसितवसने' इत्यादिपद्यं सप्तमोल्लासोद्धृतमत्र बहुभिरतिरिक्ततया पठ्यते। तच्चार्थान्तरन्यासोदाहरणतयोद्भटविवरणकृता दर्शितम्। चण्डीदासोऽपि तथा पठति।

२. सामान्येन विशेषस्य समर्थनं साधर्म्येण उदाहरणं क्वचित् अधिकः।

३. नवखण्डेत्यादि—क०। अखण्डमनरुणा इति—ख० अदृष्टत्वात्। विश्वम्भराशब्दस्य द्रव्यवाचित्वं टीकाकृद्दर्शितदिशा।

४. तीक्ष्णखङ्गजाता—क०।

गिरयोऽप्यनुन्नतियुजो मरुदप्यचलोऽब्धयोऽप्यगम्भीराः ।
विश्वम्भराऽप्यतिलघुर्नरनाथ ! तवान्तिके नियतम् ॥४८३॥

येषां कण्ठपरिग्रहप्रणयितां संप्राप्य धाराधर-
स्तीक्ष्णः सोऽप्यनुरज्यते च कमपि स्नेहं पराप्नोति च ।
तेषां सङ्गरसङ्गसक्तमनसां राज्ञां त्वया भूपते !
पांसूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकम् ॥४८४॥

सृजति च जगदिदमवति च संहरति च हेलयैव यो नियतम् ।
अवसरवशतः शफरो जनार्दनः सोऽपि चित्रमिदम् ॥४८५॥

सततं मुसलासक्ता बहुतरगृहकर्मघटनया नृपते ।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः ॥४८६॥

पेशलमपि खलवचनं दहतितरां मानसं सतत्त्वविदाम् ।
परुषमपि सुजनवाक्यं मलयजरसवत् प्रमोदयति ॥४८७॥

क्रौञ्चाद्रिरुद्दामदृषद्दृढोऽसौ यन्मार्गणानर्गलशातपाते ।
अभून्नवाम्भोजदलाभिजातः स भार्गवः सत्यमपूर्वसर्गः ॥४८८॥

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारःकोऽप्यन्तर्जडयति च तापं च कुरुते ॥४८९॥

वसम्भवितया विरुद्धाऽनुरज्यते शोणितसंघाल्लौहित्यमाधत्ते स्नेहमौज्ज्वल्यं पराप्नोतीति च समाधिः ।

ये तु तीक्ष्णस्यानुरागः स्नेहश्च विरुद्धाविति व्याचक्षते तन्मते तैक्ष्ण्यस्य गुणतया नेयं जातिक्रियाविरोधोदाहृतिः स्यात् । पांसुपटलैः प्रसाधननिर्वर्तन-प्रक्रिया नाम जातिविरुद्धा ।

सृजतीत्यादौ शफरादिशब्दस्यैकवाचकतया द्रव्यत्वम् । स इति प्राक्-कालिकमहानुभाववाचकस्य सर्वनामतया जातित्वम् । सततेत्यादौ काठिन्यसौकुमार्ययोर्विरोधः । पेशलत्वपारुष्यगुणाभ्यां दहनप्रमोदनक्रिययोर्विरोधः । क्रौञ्चाद्रिरित्यादौ दार्ढ्यगुणस्य नवाम्भोजदलाभिजातभावरूपयोश्च क्रियायाः विरोध इत्येके, तन्न, पूर्वाविशेषप्रसङ्गात्, गुणद्रव्यविरोधोदाहृत्यनन्तरानुपादानाच्च । क्रौञ्चाद्रिशब्दस्यैकव्यक्तिवाचितया द्रव्यस्याम्भोजदलवत् कोमलत्वगुणस्य च विरोध इति व्याख्यानं ज्यायः ।

परिच्छेदेत्यादौ च जडीकरणतापकरणक्रिययोर्विरोधः ।

अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥४९०॥

समदमतङ्गजमदजलनिस्यन्दतरङ्गिणीपरिष्वङ्गात्।
क्षितितिलक ! त्वयि तटजुषि शङ्करचूडापगाऽपि कालिन्दी॥४९१

१६८ स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् ॥१११॥

स्वयोस्तदेकाश्रययोः रूपं वर्णः संस्थानं च।

उदाहरणम्—

पश्चादङ्घ्री प्रसार्य त्रिकनतिविततं द्राघयित्वाऽङ्गमुच्चै-
रासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण ॥४९२॥

अयमित्यादौ लवणजलधिद्रव्यपानक्रिययोर्विरोधः। समदेत्यादौ गङ्गायमुनाख्यद्रव्यतादात्म्यविरोधः।

स्वशब्दः क्रियारूपशब्दाभ्यां प्रत्येकमन्वीयत इत्यभिप्रेत्याह **स्वयोरित्यादि**[1]।

वर्णो वर्णनम्। पश्चादित्यादि तुरङ्गमक्रियावर्णनम्। त्रिकं पृष्ठवंशाधरास्थिग्रन्थिः। इयञ्चोदाहृतिर्डिम्भादेरित्यतद्गुणसंविज्ञानबहुव्रीतिसूचनपरेति नाशङ्कनीयम्। किन्तर्हि प्रसिद्धिवशादेव धूलिधूसरेत्यादिडिम्भक्रियास्वरूपवर्णनदर्शनात्। वर्णनस्वभावोक्तिर्यथा 'प्रथममरुणच्छाय' इत्यादि।

संस्थानस्वभावोक्तिर्यथा—

"पृष्ठेषु शङ्खशकलच्छविषु च्छदानां राजीभिरङ्कितमलक्तकलोहिनीभिः।
गोरचनाहरितबभ्रुबहिःपलाशमामोदते कुमुदमम्भसि पल्वलस्य॥"

---

१. क्रियापदेनास्योचितचेष्टानां परिग्रहः। स्वपदेन न केवलं स्वरूपं परमवयवसंस्थानमिति घट्टकम्। यदाह रुचकः सहृदयलीलायाम्—"अवयवानां रेखा रूपाद्यम्। रूपमिति निदर्शनेन मूलग्रन्थकृतामुदाहरणे प्राचीनानामाचार्यदण्डिप्रभृतीनां प्रभावः स्पष्टः। लक्षणे तु रुद्रटकृतलक्षणस्येव प्रभावो वरीवर्ति। अत्र श्रीधरकृतकाव्यप्रकाशविवेके टिप्पणी द्रष्टव्या। चण्डीदासः श्रीधरमतमनुवर्तत इति तदतिरिक्तोदाहरणतो व्यक्तीभवति। धूलिधूसरेति रुद्रटोदाहरणम्

१६९ व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा ।

व्याजरूपा व्याजेन वा स्तुतिः । क्रमेणोदाहरणम्—

हित्वा त्वामुपरोधवन्ध्यमनसां मन्ये न मौलिः परो
लज्जावर्जनमन्तरेण न रमामन्यत्र संदृश्यते ।
यस्त्यागं तनुतेतरां मुखशतैरेत्याश्रितायाः श्रियः
प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः ॥४९३॥

हे हेलाजितबोधिसत्त्व ! वचसां किं विस्तरैस्तोयधे !
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ।
तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो-
भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः ॥४९४॥

१७० सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् ॥११२॥

एकार्थाभिधायकमपि सहार्थबलाद् यदुभयस्याप्यवगमकं सा सहोक्तिः ।

यथा—

सह दिअहणिसाहिँ दीहरा सासदण्डा
सह मणिवलएहिँ वाप्पधारा गलन्ति ।
तुह सुअह विओए तीअ उव्विग्गिरीए
सह अ तणुलदाए दुब्बला जीविदासा ॥४९५॥

(सह दिवसनिशाभिर्दीर्घाः श्वासदण्डाः
सह मणिवलयैर्बाष्पधारा गलन्ति ।
तव सुभग वियोगे तस्या उद्विग्नायाः
सह च तनुलतया दुर्बला जीविताशा ॥

इति संस्कृतम्)

श्वासदण्डादिगतं दीर्घत्वादि शाब्दम्, दिवसनिशादिगतं तु सहार्थसामर्थ्यात् प्रतिपद्यते ।

व्याजरूपेति द्वितीयपक्षे सङ्गमनीयम् । शेषस्तु प्रथमपक्षे । लज्जावर्ज्जनं स्वातन्त्र्येण परिहारः । बोधिसत्त्वो बुद्धः । आपाततः स्तुतिरुपक्रान्ताऽपि मरुसाधारण्येन विकलजनसम्भाव्यतारूपायां निन्दायां पर्यवस्यति ।

एकार्थाभिधायकमिति । अभिधानगत्यैकार्थसम्बन्धगुणाद्यर्थम् । यदिति । यस्यामित्यर्थः । उभयस्यावगमकमुभयसम्बन्धं द्योतयदिति गुणादिवाचकं प्रथमान्तम् । सा सहोक्तिरिति तत्प्रयोज्यतया तदभेदनिर्देशः ।

१७१ विनोक्तिः सा विनाऽन्येन यत्रान्यः सन्न नेतरः ।

क्वचिदशोभनः, क्वचिच्छोभनः । क्रमेणोदाहरणम्—

अरुचिर्निशया विना शशी शशिना सापि विना महत्तमः ।
उभयेन विना मनोभवस्फुरितं नैव चकास्ति कामिनोः ॥४९६॥

मृगलोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः ।
अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसूनुः ॥४९७॥

१७२ परिवृत्तिर्विनिमयो योऽर्थानां स्यात् समासमैः ॥११३॥

परिवृत्तिरलङ्कारः । उदाहरणम्—

लतानामेतासामुदितकुसुमानां मरुदयं
मतं लास्यं दत्वा श्रयति भृशमामोदमसमम् ।
लतास्त्वध्वन्यानामहह दृशमादाय सहसा
ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम् ॥४९८॥

अत्र प्रथमेऽर्धे समेन समस्य, द्वितीय उत्तमेन न्यूनस्य ।

सन्न इति विवृणोति अशोभन इति । नेतर इत्यस्य विवृतिः शोभन इति । नास्ति रुचिः कान्तिर्यस्येत्यरुचिः । महत्तम इति तद्बहुलतया तत्त्वोपचार इति । प्रतिभा स्तुतिरेव प्रभा शोभा तया प्रगल्भश्चतुरोऽलौकिकी प्रभा राज्ञे इतिवत् प्रभा शब्दः प्रभावार्थो वा ।

समासमैरिति। सामान्यतो लक्षितस्य[1]भेदकथनं समैरसमैश्चेत्यर्थः । किञ्चद् दत्वा कस्यचिदादानं परिवृत्तिस्तदेव विनिमय इति ।

परिवृत्तिर्विनिमय इत्यत्र किं लक्ष्यपदं किञ्च लक्षणपदमिति सन्देहं निराचष्टे—**परिवृत्तिरलङ्कार इति**। नायं परिवृत्तिशब्दो विनिमयमात्रार्थः, अलङ्कारविशेषरूपलक्ष्यवाचकत्वादित्यर्थः । न च विनिमयशब्दस्याप्यलङ्कारवाचकता, प्राचीनव्यवहारविरहात्[2] । मतं मनोहरं लास्यं नर्तनं व्यतिकरो मेलकम् ।

---

१. अत्र सामान्यलक्षणेनैकस्य विच्छित्तिः सूचिता । यैस्तु कुन्तकादिभिरस्य ''सदयं बुभुजे महाभुजम्'' इत्यादि रघुपद्यसाजात्येन साम्यसद्भावपरत्वमेव विनिगमकमिति कृत्वोपमामध्ये यदन्तर्भावितस्तैर्गजनिमीलिकया विनिमयकृता चारुता न लक्षितेति महद् वैशसम् ।

२. व्यवहारविधानात्—ख० ।

नानाविधप्रहरणैर्नृप ! संप्रहारे स्वीकृत्य दारुणनिनादवतः प्रहारान् ।
दृप्तारिवीरविसरेण वसुन्धरेयं निर्विप्रलम्भपरिरम्भविधिर्वितीर्णा ॥४९९॥

अत्र न्यूनेनोत्तमस्य ।

१७३ प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः ।

तद् भाविकम्

भूताश्च भाविनश्चेति द्वन्द्वः । भावः कवेरभिप्रायोऽत्रास्तीति भाविकम् । उदाहरणम्—

आसीदञ्जनमत्रेति पश्यामि तव लोचने ।
भाविभूषणसम्भारां साक्षात्कुर्वे तवाकृतिम् ॥५००॥

आद्ये भूतस्य द्वितीये भाविनो दर्शनम् ।

१७४ काव्यलिङ्गं हेतोर्वाक्यपदार्थता ॥११५॥

वाक्यार्थता यथा—

स्वीकृत्य विसरेण संहत्या निर्गतो विप्रलम्भो वियोगो यत्र तथाभूतः परिरम्भविधिर्यस्या इति विग्रहः ।

भूतभाविनोऽसन्निहिता अप्यर्था वस्तुनो माहात्म्येन साक्षादिव यत् प्रतीयन्ते तदलङ्करणं भाविकम्[1] । भावः कवेरभिप्रायोऽत्रास्तीते निरुक्तमात्रपरं न तु शासनात् । आसीदित्यादि भूतभविष्यतो रञ्जनभूषणसम्भारयोर्वचनयोर्न प्रत्ययार्थकथनपरम् । भाविकमित्यन्तस्येकअन्तत्वादिकणश्चास्त्यर्थेऽप्रस्फुरणमिवानुभूयत इति यथायोगं भाविकद्वयम् । दर्शनमित्यतः परं साक्षादिति शेषः ।

पञ्चम्यादिविभक्तिपदात् प्रतिपादितस्य हेतोः संसृष्टनैकपदरूपवाक्याबोध्यत्वे संसृष्टैकात्म्यप्रतिपादनराहित्येन च वाक्यरूपवाचकानेकावयवप्रत्येयत्वे एक-

---

१. भाविकस्य प्रबन्धगुणत्वं प्राचीनैर्न निरदर्शि, तन्मते गुणालङ्कारयोरभेद इत्ययमलङ्कारतयोपदिष्टश्च 'तद् भाविकमिति प्राहुः प्रबन्धविषयं गुणम्" इति । नवीनमताश्रयिणामाचार्यहेमचन्द्राणां मन्तव्यम्—"भाविकं तु भूतभविष्यदर्थप्रत्यक्षीकारात्मकमभिनेयप्रबन्ध एव भवति । यद्यपि मुक्तकादावपि दृश्यते, तथापि न तत स्वदते" इति । भूतभाविशब्दयोः परोक्षमात्रलक्षणपरत्वे परोक्षाणां पुरःस्फुरद्रूपत्वहेतुवर्णनम् इति तु व्याख्याने स्वभावोक्तेरयमलङ्कारो न भिद्यत इति श्रीधरमन्तव्यं प्रणिधानमर्हति ।

२. 'इकण' इति पाणिनीयतन्त्रे 'ठक' इत्यस्य' स्थाने कातन्त्र व्याकरणानुसारेण । तस्य अस्त्यर्थे न कुत्रापि विधानमिति पर्यनुयुनक्ति टीकाकृत् । भावेन निर्वृत्तमिति तु

वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न प्रायः क्वचिदपि भवन्तं प्रणतवान् ।
नमन्मुक्तः संप्रत्यहमतनुरग्रेऽप्यनतिभाङ्-
महेश ! क्षन्तव्यं तदिदमपराद्धयमपि ॥५०१॥

अनेकपदार्थता यथा

प्रणयिसखिसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥५०२॥

एकपदार्थता यथा

भस्मोद्धूलन ! भद्रमस्तु भवते रुद्राक्षमाले ! शुभं
हा सोपानपरम्परां गिरिसुताकान्तालयालङ्कृतिम् ।
अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखा-
लोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे ॥५०३॥

एष्वपराद्धये पूर्वापरजन्मनोरनमनं भुजपाते शस्त्रोपक्षेपो महामोहे सुखालोकोच्छेदित्वं च यथाक्रममुक्तरूपो हेतुः ।

पदबोध्यत्वे वा त्रिधा काव्यलिङ्गम् । जन्मनीत्यस्य विशेषणं पुरेति । सम्प्रति नमन्नग्रे मुक्तः शरीरस्ततोऽनतिभाक् कायव्यापारूपनमनायोग्यः । यद्यप्यस्यामप्युदाहृतौ नतिमत्त्वे तनुत्वं तत्र च मुक्तत्वपदार्थरूपो हेतुरिति तृतीयप्रकारकाव्यलिङ्गसम्भवः, तथापि प्रपञ्चार्थे पृथगुदाहरणम् ।

अकाण्डे यमदण्डोऽतर्कितोपनतयमदण्ड इत्यर्थः । अत्र शस्त्रोपक्षेपस्य विशकलितपदात्मवत् पदबोद्धव्यम्, न तु समस्तवाक्यबोद्धव्यम् । सूर्यस्यालोकः प्रकाशोऽनुभव इति यावत् । लोकोच्छेदिनीति समस्तत्वादेकपद्यम् । उक्तरूपो वाक्यानेकपदैकपदार्थरूपो[1] बोधननिदानत्वेनाश्रयभूते शब्दे वसतीति वस्तु ।

निर्वचनमुभयथाऽप्युपादेयम् । परं मूले भावोऽत्रास्तीति भागे भावनाया पुनः पुनश्चेतसि निवेशनम् । सोऽत्रास्तीत्यलङ्कारसर्वस्ववृत्तौ वचनोपलम्भाद् निर्वचनाभासताऽस्य भाति । सा च भावशब्दस्य वृत्तिविश्लेषणेन भावपदेन भावनाग्रहणेन दूरीभवति । वस्तुतस्तु सेयं निर्देशभङ्गी "भावोऽस्मिन् विद्यत इति भाविकम्" इति प्रतीहारेन्दुराजोक्तिमनुसृत्य । परं तत्रापि "कविसम्बन्धिनो भावस्य श्रोतृभावाभेदाध्यवसितस्य पुरःस्फुरद्रूपस्य विद्यमानत्वाद् भाविकव्यपदेशः" इति विवरणेन सर्वमनाविलं भवति ।

१. सरगङ्गाधरेऽस्याश्च वृत्तेर्गम्यस्य येनाकारेण गम्यता तदितिरिक्ताकारेण वाच्यता । तेन पर्यायेण भङ्ग्यन्तरेणोक्तमभिहितं व्यङ्ग्य यत्रेति मम्मटपक्षं समर्थयितुं युक्तिः । इयं च

१७५ पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः ।

वाच्यवाचकभावव्यतिरिक्तेनावगमनव्यापारेण यत् प्रतिपादनं तत् पर्यायेण भङ्ग्यन्तरेण कथनात् पर्यायोक्तम् ।

उदाहरणम्—

यं प्रेक्ष्यचिररूढाऽपि निवासप्रीतिरुज्झिता ।
मदेनैरावणमुखे मानेन हृदये हरेः ॥५०४॥

अत्र रावणशक्रौ मदमानमुक्तौ जाताविति व्यङ्ग्यमपि शब्देनोच्यते । तेन यदेवोच्यते तदेव व्यङ्ग्यम्, यथा तु व्यङ्ग्यं न तथोच्यते ।

यथा गवि शुक्ले चलति दृष्टे 'गौः शुक्लश्चलति' इति विकल्पो यदेव

वाच्यवाचकत्वेन विना, वाच्यतया व्यङ्ग्यः शब्दार्थः । तदेवाह—अवगमनव्यापारेणेति । व्यञ्जनाव्यापारेणेत्यर्थः व्यङ्ग्यमित्युपात्तपदसम्बन्धिनोऽसङ्केतितया वाच्यमपि शब्देनोपात्तेनोच्यते बोध्यते ।

ननु व्यङ्ग्यार्थसम्भेदे ध्वनित्वं कुतो न स्यादित्यत आह—तेन शब्देन यदेवोच्यते मदमानयोर्निवासप्रीतिपरित्यागरूपं वस्तु तदेव तज्जातीयमेव स्फुटतया व्यङ्ग्यमिदमानमुक्तम् ।

ननु यदि तयोरैकजात्यं कुतस्तर्हि वाच्यव्यङ्ग्यताभेद इत्याह—यथा येन प्रकारेण समयनिरपेक्षत्वादिना तुल्यं व्यञ्जनावृत्त्या बोधनीयं सम्भवति तथा तेन प्रकारेण नोच्यते नाभिधया प्रतिपाद्यते, तस्याः सङ्केतसापेक्षत्वस्य नैयत्यात् । तस्मात् स्फुटत्वेनैकजातीयत्वेऽपि बोधनव्यापारभेदाद् भेद इत्यर्थः ।

ननु तयोरप्यर्थयोः समानरूपलक्षणोपसृष्ट एकार्थप्रतिपादकराहित्येनैकरूपवाक्याद्यनेकावयवार्थकाप्तप्रत्ययत्वे समाने च शब्दसंलग्नत्वे स्वपरविशिष्टे ज्ञानावान्तरवैजात्यं दृष्टस्ति, येनात्र तद्वैजात्यात् व्यापारवैजात्यमित्याह—यथा गवि शुक्ले च दृष्ट्वे गौः शुक्लश्चलतीति विकल्प इति ।

अयमर्थः ।

"अस्ति ह्यलोचनज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं मुग्धवस्तुजम् ।
ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया ।

व्यङ्ग्यत्ववाच्यत्वयोर्विरोधादसंगतेति नोचिता शङ्का, एकस्यैव प्रकारान्तरे वाच्यत्वव्यङ्ग्यत्वयोरविरोधादिति तदुपोद्वलनात् ।

दृष्टं विकल्पयति न तु यथादृष्टं तथा यतोऽभिन्नासंसृष्टत्वेन दृष्टं भेदसंसर्गाभ्यां

बुद्ध्याऽवसीयते साऽपि प्रत्यक्षत्वेन सम्मता ॥''

[1]इत्युक्तदिशा निर्विकल्पकयोरनिरपेक्षतया समानेऽपीन्द्रियलक्षणे ज्ञापकेऽर्थस्य तत्संलग्नत्वे च यथा सामग्रीभेदादवान्तरवैजात्यं तथा शब्दार्थयोरपि वाच्यव्यङ्ग्य-प्रतीत्योस्तदुपपन्नमेव। न च तत्र संयुक्तसंयोगसंयुक्तसमवायादिव्यापाराद् भेदः। तद्वदत्रापि प्रसञ्जनीयं पूर्वमेव निरस्तत्वात् (?), ज्ञानावान्तरजातिभेदमात्रं प्रत्येक-निदर्शनोपक्षेपात्। कः पुनर्वाच्यव्यङ्ग्यप्रतीत्योर्विशेष इति चेद् रसादौ तावदुद्भट एव वाच्यप्रतीतौ विशेषः। व्यङ्ग्यान्तरप्रत्ययेऽप्यनुभूयत एव सहृदयहृदयसाक्षिकः कश्चन वाच्यप्रत्ययाद् विशेषः।

अन्यथा तस्यैवार्थस्य वाच्यत्वदशापेक्षया व्यङ्ग्यत्वदशायां [2]सहृदयव्यञ्जन-प्रकर्षानुपपत्तिः। चमत्कारप्रत्यासत्तिकृत एव तत्प्रकर्ष इति चेत्, साऽपि व्यङ्ग्य-तायामेव न तु तस्यैवार्थस्य वाच्यतायामित्यतोऽपि वैलक्षण्यमायातीति दुरपह्नव एव वाच्यव्यङ्ग्यप्रतीत्योर्विशेषः।

न च तत्र विषयभेदात् प्रतीतिभेद इत्याह—**यदेव दृष्टं तदेव विकल्पयतीति** सविकल्पकनिर्विकल्पकोपहिता एव गोत्वद्रव्यगुणचलनक्रियास्तत्सम्बन्धात् चक्षुरा-दिभिर्न प्रतीयन्त एव तत्सम्बन्ध इति चेन्न, सर्वत्रैव निर्विकल्पके वाऽनुगृहीत-सम्बन्धस्य विशिष्टप्रत्यये गृहीतदण्डस्य देवदत्तस्यागृहीततत्सम्बन्धस्यापि दण्डी देवदत्त इति प्रतीतिप्रसङ्गात्। नाद्यः, प्रत्यक्षेण योगस्य सन्निहितस्य द्रव्यादिसा-धारणतया स्वरूपमात्रस्फुरणे भावाभावात्। नेतरः तस्माद्वैशिष्टयभानतद्विरहो ज्ञानस्वभाव एव विषयस्तूभयत्र तथा स्थित एव।

ननु न यदि विषयभेदस्तर्हि प्रतीतिभेदोऽपि कुतोऽस्तीति प्रत्येतव्यमित्याह— **न तु यथादृष्टं** यत्प्रकारकं तथा तत्प्रकारकमेव सविकल्पकम्। यतो तथा येन प्रकारेण दृष्टं गवादि वस्तु तथा तेन प्रकारेण विकल्पयति तयोर्वैजात्यस्यानुभवि-कत्वादित्यर्थः।

एतदेव विवृणोति—अभिन्ना संसृष्टत्वेन द्रव्यत्वेन द्रव्यत्वगुणत्वकर्मत्वाख्य-

---

१. संसृज्यन्ते न भिद्यन्ते स्वतोऽर्थाः पारमार्थिकाः।
रूपमेकमनेकं च तेषु बुद्धेरुपप्लवः।

इत्याहुर्बौद्धन्यायप्रमातारो धर्मकीर्तिपादाः प्रमाणवार्त्तिके। टीकाकृदुपष्टम्भ एतदभि-प्रायक एव। परं वाच्यव्यङ्ग्ययोर्भेदो दुरपलप इति पर्यायोक्तस्य नवीनैर्विगृहीतस्य ध्वनेर्भेद आत्यन्तिक एव स्वीकार्यः।

२. सहृदय—ख०।

विकल्पयति।

१७६ उदात्तं वस्तुनः सम्पत्

सम्पत् समृद्धियोगः। यथा—

मुक्ताः केलिविसूत्रहारगलिताः सम्मार्जनीभिर्हृताः
प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः।
दूराद्दाडिमबीजशङ्कितधियः कर्षन्ति केलीशुकाः
यद्विद्वद्भवनेषु भोजनृपतेस्तत् त्यागलीलायितम् ॥५०५॥

१७७ महतां चोपलक्षणम् ॥११५

उपलक्षणमङ्गभावोऽर्थादुपलक्षणीयेऽर्थे। उदाहरणम्—

तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी।
निवसन् बाहुसहायश्चकार रक्षःक्षयं रामः ॥५०६॥

वैजात्यापुरस्कारेणासंसृष्टत्वेन संसर्गासंसर्गौदासीन्येन स्वरूपत एव दृष्टं निर्विकल्पकं-भेदसंसर्गाभ्यां भेदेन द्रव्यत्वादिवैधर्म्यपुरस्कारेण संसर्गेण पुरस्कृतव्यवच्छेद्यव्यवच्छेदकभावेन वैशिष्ट्येन विकल्पयतीति।

ये तु यथालिखितं पठन्तः सर्वस्या एवास्या वृत्तेः स्वरूपतो वाच्यव्यङ्ग्ययोर्नास्ति भेद इति प्रतिपत्तिपरास्ते तु न सम्यग्वादिनः, मदमानयोर्निवासप्रीतिपरित्यागस्य वाच्यस्य तन्नाशस्य व्यङ्ग्यस्य च दुरपह्नवभेदत्वात्।

किञ्च, 'स्पष्टास्ता नन्दन' [1]इत्यत्र पर्यायोक्त्युदाहृत्यन्तरे वाच्यपारिजातमञ्जरीस्पर्शस्य व्यङ्ग्यस्य स्वर्गविजयस्य च कार्यकारणतया सामान्यविशेषतायाः स्फुट एव भेद इति यथोक्तमेव ज्यायः। यदि वस्तुस्थितिमाश्रित्य मदमानयोर्विनाश एव, परिजातमञ्जरीस्पर्शात् स्वर्गविजय एव, अन्यथा कार्यकारणसामान्यविशेषभावसद्भावेऽप्रस्तुतप्रशंसातो भेदो न स्यादित्युच्यते, तत् सत्यमेव यथाश्रितव्याख्यानमिति स्थितम्।

समृद्धियोग इति समृद्धिमद्वर्णनम् उदात्तमिति। विसूत्रेति च्छिन्नसूत्रेत्यर्थः। हृता अवचिताः। उपलक्षणीय इति प्राकरणिके वर्णनाविषय इत्यर्थः। व्यसनी आसक्तः। बाहुसहाय इति सहायशून्य इत्यर्थः।

ननु राम उत्साहातिशय एव चमत्कारनिदानं तस्य च प्रधानत्वे विच्छित्त्यन्तरविरहात् किंविषयोऽयमलङ्कारव्यपदेश इत्याशङ्का, तस्य प्राधान्ये सत्येव

---

१. अलङ्कारसर्वस्वे दर्शित इति यावत्।

न चात्र वीररसः, तस्येहाङ्गत्वात् ।

१७८ तत्सिद्धिहेतावेकस्मिन् यत्रान्यत्तत्करं भवेत् ।

समुच्चयोऽसौ

तस्य प्रस्तुतस्य कार्यस्यैकस्मिन् साधके स्थिते साधकान्तराणि यत्र सन्ति स समुच्चयः । उदाहरणम्—

दुर्वारः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं
गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम् ।
स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत् कालः कृतान्तोऽक्षमो
नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं शठः ॥५०७॥

अत्र विरहासहत्वं स्मरमार्गणा एव कुर्वन्ति तदुपरि प्रियतमदूरस्थित्याद्युपात्तम् ।

एष एव समुच्चयः सद्योगेऽसद्योगे च पर्यवस्यतीति न पृथग् लक्ष्यते । तथाहि—

कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतिशालिनी
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम् ।
प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो
व्रजति सुतरां दर्पं राजन् ! त एव तवाङ्कुशाः ॥५०८॥

अतः सतां योगः । उक्तोदाहरणे त्वसतां योगः ।

ध्वनिविषयत्वं स्यात् । एतच्चासिद्धमित्याह—न चात्र वीरो रसः । प्रधानमिति शेषः । अत्रोपपत्तिस्तस्येति रसवदलङ्कारस्य तद्गततयैव तद्व्यतिरिक्तविषयता महापुरुषचरितस्य सामग्रीवशेन भावमात्रत्वेऽप्ययमलङ्कारो न तु भावालङ्कार उक्तादेव न्यायात् ।

साधके स्थिते व्यवस्थिते साधकत्वात् पर्याप्त इत्यर्थः । सन्ति[१] सम्भवन्ति तिष्ठन्तीति वा । स्मरमार्गणा एवेति तद्वेधविधूननोक्तौ[२] तेषामेव प्रधानत्वाद् विशेष्योक्तिः । तदुपरीति तदुपमर्दनक्षमतया तुल्यकक्षताप्रकटनायोक्तिः ।

एषोऽप्यलक्षितो न पृथग् लक्ष्यते । ग्रन्थान्तररीत्या पृथक् लक्षणे प्रयोजनाभावात् । कुलमित्यादावखण्डितं प्रभुत्वमेव निदर्शननिमित्तं तन्निवारणाङ्कुशः,

---

१. सन्तीति प्रचलितः साम्प्रदायिकः पाठः ।

२. विदूरावास्त्रव उक्तावित्यसंलग्नपाठश्च ख पुस्तके ।

शशी दिवसधूसरो गलितयौवना कामिनी
सरोविगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥५०९॥

अत्र शशिनि धूसरे शल्ये शल्यान्तराणीति शोभनाशोभनयोगः ।

१७९ स त्वन्यो युगपद् या गुणक्रियाः ॥११६॥

गुणौ च क्रिये च गुणक्रिये च गुणक्रियाः । क्रमेणोदाहरणम्—

विदलितसकलारिकुलं तव बलमिदमभवदाशु विमलं च ।
प्रखलमुखानि नराधिप ! मलिनानि च तानि जातानि ॥५१०

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ॥५११

कलुषञ्च तवाहितेष्वकस्मात् सितपङ्केरुहसोदरश्रि चक्षुः ।
पतितञ्च महीपतीन्द्र ! तेषां वपुषि प्रस्फुटमापदां कटाक्षैः ॥५१२॥

"धुनोति चासिं तनुते च कीर्तिम्' इत्यादेः, 'कृपाणपाणिश्च भवान् रणक्षितौ ससाधुवादाश्च सुराः सुरालये' इत्यादेश्च दर्शनाद् 'व्यधिकरणे' इति 'एकस्मिन् देशे' इति च न वाच्यम् ।

शेषास्तु प्रासङ्गिका एव। शशीत्यादौ तु खलस्य सत्त्वं स्फुटयति—अत्रेति। शशिनि धूसरे शल्य इति विशिष्योक्तिः प्रकरणापेक्षया सङ्गमनीया[1] । अन्यः समुच्चयः ।

गुणेन सहिताः क्रिया इति गुणक्रिया इति विशेषविवक्षाविरहात् सजातीययोगो विजातीययोगलक्षणायोगश्च संगृहीत इत्याह—गुणौ च क्रिये च विमलं च इत्यादौ गुणक्रिये चेत्यादिः । विमलत्वमलिनत्वे गुणौ । अयमित्यादावुपनत इति भवितव्यमिति च क्रिये। कलुषं चेत्यादौ कलुषत्वं गुणः । पतितमिति क्रिया ।

प्रकारवैचित्र्यं सूचयन्नाह— धुनोतीति । तच्च पूर्वोदाहृतिपर्यालोचनेन लभ्यम्, तत्र सर्वत्रैव समुच्चीयमानयोर्भिन्नाधारत्वात् । देशे आश्रये । न वाच्यमिति । लक्षणस्य साधारण्यलक्षणे चोभयथा दर्शनादित्यर्थः ।

---

१. शशिनि धूसर इति शोभनाशोभनत्वं निदर्शितम् । "शल्ये शल्यान्तराणीति शोभनाशोभनस्यैव तादृशेनैव योगः" इति श्रीधरविवरणम् । न त्वत्र कश्चित् समुच्चीयमानशोभनेभ्योऽशोभने इति सदसद्योगो व्याख्यायेय इति यावत् । वस्तुतस्तु "नृपाङ्गणगतः खलः" इति सहचरभिन्नतया प्रक्रमभङ्गेन वा दुष्ट एवाभिधानप्रकारः ।

१८० एकं क्रमेणानेकस्मिन् पर्यायः

एकं वस्तु क्रमेणानेकस्मिन् भवति क्रियते वा स पर्यायः। क्रमेणोदाहरणम्—

[1]नन्वाश्रयस्थितिरियं तव कालकूट !
केनोत्तरोत्तरविशिष्टपदोपदिष्टा।
प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ
कण्ठेऽधुना वससि वाचि पुनः खलानाम् ॥५१३॥

यथा वा—

विम्बोष्ठ एव रागस्ते तन्वि ! पूर्वमदृश्यत।
अधुना हृदयेऽप्येष मृगशावाक्षि ! लक्ष्यते ॥५१४॥

रागस्य वस्तुतो भेदेऽप्येकतयाऽध्यवसितत्वादेकत्वमविरुद्धम्। अतिशयोक्तिगर्भीभूता[2] (?) यथा—

एतेन सामानाधिकरण्यवैयधिकरण्यादमी प्रकाराः प्रत्येकं द्विधेत्यर्थसिद्धम्।

केचित्तु यौगपद्यमनादृत्य जातिद्रव्ययोरप्येकाश्रयसमुच्चयमिच्छन्ति। तत्र जात्योर्यथा—

"हेम्नां सरसिजानाञ्च सारैरस्याः कृतं मुखम्।
कुतोऽन्यथा स्फुरद्गौररससौरभहारि तत् ॥"

द्रव्ययोर्यथा—

"भास्वतः शिशिरांशोश्च तेजोजालमुदित्वरम्।
यस्य प्रतापयशसी व्यञ्जयेतामहर्निशम् ॥"

भवतीति प्रयोजकानिर्देशमभिप्रैति, क्रियत इति तु तन्निर्देशः। ये तु भवतीत्यनेनैवावस्थितिः क्रियत इति चागन्तुकी विवक्षितेत्याहुस्तेषां खलवचनस्य कालकूटस्थितिर्वास्तवी प्रसज्येत। आश्रयस्थितिराश्रयव्यवस्था। उत्तरोत्तरं विशिष्टं पदं स्थानं यस्यामाश्रयस्थितौ सा तथा। रागस्यैकत्र लौहित्यात्मनः, अपरत्र स्नेहात्मनः। एकत्वमविरुद्धमिति। अतिशयोक्तिगर्भीकारतद्विरहाभ्यां प्रत्येकं द्वैविध्ये चतुर्विधमिदमलङ्करणमिति भावः। न च कण्ठेऽधुनेत्यत्राप्यतिशयोक्तेरसम्बन्धे सम्बन्धरूपाया विद्यमानत्वेन कथमेवं व्यवस्थितम्, व्यङ्ग्यभेदाभेदरूपाया ध्रुवीकरणादिति।

वस्तुतस्तु प्रकरणप्रायिक्यतिशयोक्तिरिति द्वितीयां विधामतिशयोक्तिगर्भी-

---

१. भल्लटशतकस्थमिदं पद्यम्।

२. अयं पाठो बहुसम्मतोऽपि प्रयोजनाभावात् क्वचिदसंग्रहः।

श्रोणीभागस्त्यजति तनुतां सेवते मध्यभागः
पद्भ्यां मुक्तस्तरलगतयः संश्रिता लोचनाभ्याम् ।
धत्ते वक्षः कुचसचिवतामद्वितीयञ्च वक्त्रं
तद्गात्राणां गुणविनिमयः कल्पितो यौवनेन ॥५१५॥

तं ताण सिरिसहोअररअणाहरणम्मि हिअअमेक्करसं ।
बिम्बाहरे पिआणं णिवेसिअं कुसुमबाणेण ॥
(तत्तेषां श्री सहोदररत्नाभरणे हृदयमेकरसम् ।
बिम्बाधर प्रियाणां निवेशितं कुसुमबाणेन ॥ इति छाया)

१८१ अन्यस्ततोऽन्यथा ॥

अनेकमनेकस्मिन् क्रमेण भवति क्रियते वा सोऽन्यः । क्रमेणोदाहरणम्—

मधुरिमरुचिरं वचः खलानाममृतमहो प्रथमं पृथु व्यनक्ति ।
अथ कथयति मोहहेतुमन्तर्गतमिव हालहलं विषं तदेव ॥५१६॥
तद्गेहं नतभित्तिमन्दिरमिदं लब्धावकाशं दिवः
सा धेनुर्जरती नदन्ति करिणामेता घनाभा घटाः ।
स क्षुद्रो मुसलध्वनिः कलमिदं सङ्गीतकं योषिता-
माश्चर्यं दिवसैर्द्विजोऽयमियतीं भूमिं समारोपितः ॥५१७॥

अत्रैकस्यैव हानोपादानयोरविवक्षितत्वान्न परिवृत्तिः ।

भूतां प्रथममुदाहरति—श्रोणीत केचित्, तन्न । अत्र तनुताया उभयत्रैकरूप्येण तरलगतीनाञ्च प्रतिसम्बन्धिभेदेन द्वयोरप्युदाहरणत्वात् । धत्ते वक्ष इत्यत्रापि पूर्ववत् । वक्त्रस्थाद्वितीयत्वमर्थसामर्थ्यावसेयमित्यस्यालङ्कारस्य सम्भवः ।

द्वितीयपर्यायमतिशयोक्तिरहितं प्रपञ्चार्थमुदाहरति[१]—तमिति । ताणं तेषां पातालवासिनामसुराणामित्यर्थः ।

अन्यः पर्याय इति शेषः । मधुरिमेति । आदावमृतव्यक्त्यन्तर्गतविषयकथने ह्येकस्मिन् खलवचसि प्रयोगमन्तरेणोपविबद्धमिति भवतीति पक्ष उदाहरणतापत्तिः[2] ।

तदित्यादौ तु दिवसैरिति काललक्षणप्रयोजकनिर्देशात् क्रियत इति पक्षोदाहृतित्वम् । न चैकस्य रूपस्य परिहारपूर्वकं रूपान्तरापत्तिरूपत्वादन्तिमोदाहरणे परिवृत्तिविषयतया नेदमलङ्करणं स्यादित्याह—अत्रेति । उदाहरण इत्यर्थः । एकस्यैव कर्तुर्हानमन्यस्य वस्तुनः परत्र समर्पणमुपादानम् । अविवक्षितत्वादिति तथाविधविवक्षायां लतानामित्यादाविव तथैवोपपत्तिरनुप्रसङ्गादिति भावः ।

---

१. प्रपञ्चार्थं पृथगुदाहरणम्—ख० ।
२. पक्षोदाहरणेनोपपत्तिरित्यत्रानन्तरे च वाक्ये पाठः—क० ।

१८२ अनुमानं तदुक्तं यत् साध्यसाधनयोर्वचः ११७

पक्षधर्मान्वयव्यतिरेकेण त्रिरूपो हेतुः साधनम्, धर्मिण्ययोगव्यवच्छेदो व्यापकस्य साध्यत्वम् । यथा—

यत्रैता लहरीचलाचलदृशो व्यापारयन्ति भ्रुवं
यत्तत्रैव पतन्ति सन्ततममी मर्मस्पृशो मार्गणाः ।
तच्चक्रीकृतचापमञ्चितशरप्रेङ्खत्करः क्रोधनो
धावत्यग्रत एव शासनधरः सत्यं सदासां स्मरः ॥५१८॥

साधनपदं निर्वक्ति—हेतुरिति । हेतुरपि क उच्यत इत्याकाङ्क्षानिरासायाह—त्रिरूप इति । पक्षधर्मान्वयव्यतिरेकेणेति भावपरोऽयं निर्देशः । पक्षधर्मस्यान्वयव्यतिरेकवत्त्वेनेत्यर्थसङ्गतिः । पक्षधर्मान्वयव्यतिरेकित्वेनेति पाठेऽन्वयव्यतिरेकौ विद्येते अस्येति अर्शआदित्वादचि भूते पक्षधर्मश्चान्वयव्यतिरेकश्चेति कर्मधारयानन्तरं त्वप्रत्ययः । पक्षधर्मत्वञ्च प्रकृते धर्मिणि सत्त्वम्, अन्वयः सपक्षधर्मत्वम्, व्यतिरेको विपक्षव्यावृत्तिः । यतश्चान्वयव्यतिरेकिणि सामग्र्यम्, केवलव्यतिरेकिणि त्वन्वयाभावः, केवलान्वयिनि व्यतिरेकाभावो धर्मिण्यप्रकृतेऽयोगव्यवच्छेदो विद्यमानता व्यापकस्योद्देश्यस्योपलभ्यमानव्यापकधर्मवति अन्वये लभ्यमानव्यापकधर्मवर्णनमनुमानालङ्करणमिति रहस्यार्थः[1] ।

यत्रेति । कामिन्यो धनुर्धरस्मरपुरःसराः प्रपतन्मदनबाणत्वादिति च्छायया काव्यबन्ध इति प्रतिपादिता प्रकारावगतिः स्मरमार्गणपातः प्रत्यक्षवद् गम्यत इति कविमतसिद्धतया सिद्धोऽसिद्धो वेति समर्पणीयः । न च तत्राप्यनुमानालङ्कारता, तच्छाययाऽनिर्देशात् । व्यङ्ग्यमस्त्विति चेद् व्यञ्जनाया अपि तदाकारस्फुरणविरहात् ।

नन्वत्र प्रकारद्वयं सम्भवति, साधनस्य साध्यस्य वा प्राङ्निर्देशात् । तत्राद्यं यथा—प्रकृतायामेवोदाहृतौ ।

द्वितीयं यथा—

"मधु तिष्ठति वाचि योषितां हृदये चैव हलाहलं विषम् ।
अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते ॥" इति ।

---

१. एतच्च काव्यानुमानं न तर्कशास्त्रसम्मतमनुमानम् । भोजस्तु सरस्वतीकण्ठाभरणे तर्कशास्त्रसम्मतमपि पृथगलङ्कारतयाऽनुमोदते । एतत्प्रसङ्गे च तस्य "षट् प्रमाणानि च जैमिनेः" इति श्रुत्यर्थापत्तिप्रभृतीनां काव्यालङ्काररूपेण स्वीकारो लक्षणीयः । जयरथस्तर्कानुमानसमकक्षमेवास्यानुमानस्य लक्षणमिति कविकर्मण एवालङ्कारनिबन्धेनोक्तत्वादित्याह । परे तु यत्र 'नु' 'जाने' 'नूनम्' इत्त्रादिपदप्रयोगमहिम्ना स्वप्रति-

साध्यसाधनयोः पौर्वापर्यविकल्पे न किञ्चिद् वैचित्र्यमिति न तथा दर्शितम् ।

१८३ विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः ।

अर्थाद् विशेष्यस्य । उदाहरणम्—

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ।
न संहतास्तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ।।५१९।।

यद्यप्यपुष्टार्थस्य दोषताऽभिधानात् तन्निराकरेण पुष्टार्थस्वीकारः कृतस्तथाप्येकनिष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलङ्कार-मध्ये गणितः ।

१८४ व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ।।११८।।

निगूढमपि वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यदपह्नूयते

तत् कुतः साधारण्येनैवाभिधानमित्याह—साध्येति । वैचित्र्यं न किञ्चिदिति प्रातीतिकमिति शेषः ।

साकूतैर्गर्भीकृतकिञ्चिद्रहस्यैः । संहताः परस्परानुपजप्याः[१] भेदवृत्तयोऽन्यो-न्यस्पर्धया स्वामिकृत्यमप्युपेक्षमाणा असुभिरसुव्ययेनापि तस्य प्रियाणि समीहितुं कर्तुं वाञ्छन्तीति योजना । दोषविपर्यासमात्रात्मतयाऽलङ्कारतामस्यासहमानान् प्रति दोषविपर्यासमात्राधिक्येन चमत्कारानुगुण्यस्य विच्छित्तिविशेषानु-भावकतयाऽस्यालङ्कृतित्वं दुरपह्नवमित्याह—यद्यपीति । बहूनां विशेषणानामिति । विशेषणैरिति सूत्रे वचनेन बहुविशेषणोपनिबन्ध एवेदं वैचित्र्यमुल्लसति । ततश्च तस्यामेव दशायामस्यालङ्करणत्वमेकत्वोपनिबन्धे तु दोषाभावमात्रत्वमिति सूत्रित-मित्यभिप्रायः । एवमिति । प्रकृतोदाहृतिदृष्टरीत्या वैचित्र्यमित्यलमिति शेषः ।

निगूढमप्यपरिस्फुटमपि तथाभूतस्यैव कुतश्चित् स्फुटीभावापलापे व्याजोक्तिः । लक्ष्यप्रसिद्ध्या सूत्रेऽनुपात्तमप्येतदुक्तम् । प्रभिन्नं स्फुटीकृतम् । यथाश्रुतानुसारेण लक्षणस्यातिव्याप्तिं परिहरति—न चेति । प्रकृताप्रकृतावेवोभयं तन्निष्ठस्य साम्य-स्येहासम्भवात् । तदित्यनेन स्वरूपेण लक्षणस्य विशेषणीयत्वादित्यभिसन्धिः । ततश्च प्रथमस्फुटता ततः कुतश्चिदुद्भिन्नत्वं ततो गोपनमिति । इयं सामग्री

पत्तिनिश्चयस्तत्रानुमानम् । न च तत्र लिङ्गलिङ्गिनोः कार्यकारणयोर्वा समर्थनरूपं किञ्चिदित्याहुः ।

१. परस्परोपजन्या—क० ।

सा व्याजोक्तिः। न चैषाऽपह्नुतिः प्रकृतोभयनिष्ठस्य साम्यस्येहासम्भवात्। उदाहरणम्—

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्-
रोमाञ्चादिव संष्ठुलाखिलविधिव्यासङ्गभङ्गाकुलः।
हा[१] शैत्यं तुहिनाचलस्य करयोरित्यूचिवान् सस्मितं
शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद् वः शिवः ॥५२०॥

अत्र पुलकवेपथू सात्त्विकरूपतया प्रसृतौ शैत्यकारणतया प्रकाशितत्वादपलपितस्वरूपौ व्याजोक्तिं प्रयोजयतः।

नापह्नुतावस्ति। अपि तु वैधर्म्यमिह वाच्यम्, साम्यसम्भवे सत्यप्येवंविधवैचित्र्येऽपह्नुतेरङ्गीकारात्। यथा—

"आकृष्टादावमन्दग्रहमलकचयं वक्त्रमासज्य वक्त्रे
कण्ठे लग्नः स्वकण्ठं प्रभवति कुचयोर्दत्तगाढाङ्गसङ्गः।
बद्धासक्तिर्नितम्बे पतति चरणयोर्यः स एव प्रियो मे[१]
बाले लज्जा निरस्ता नहि नहि सरले चोलकः किं त्रपाकृत् ॥"

न चात्रापह्नवार्थं एव सादृश्योपक्षेपः। निर्विवादापह्नुतौ तु सादृश्यमेवापह्नवोपक्षेप इति नेयमपह्नुतिरिसि वाच्यम्, उभयथाऽपि तदङ्गीकारात्[२]। यदाह—

"सादृश्यव्यक्तये यत्रापह्नवः साऽपह्नुतिः।
अपह्नवाय सादृश्यं यत्र सैषाऽप्यपह्नुतिः ॥" इति।

प्रतिपाद्यमानेति दीयमानेत्यर्थः। उपगूढ इति भावोक्तिः। रोमाञ्चादिना विसंष्ठुलो विहस्तश्चासावखिले स्तुतिपठनादौ विधौ प्रस्तुतकृत्ये व्यासङ्गस्यान्यपरतया प्रवृत्तेर्भङ्गेनाकुलश्चेति विग्रहः। मातरः शचीप्रभृतयः। तासां मण्डलगणाः समूहपरिषदः। नन्वत्र पुलकादेस्ताद्रूप्येण प्रतीयमानत्वेन निगूहनाभावात् कथं व्याजोक्तिरित्याह—अत्रेति। पुलकवेपथू इति। रोमाञ्चादीत्यादिशब्देन वेपथुपरिग्रह इत्यभिप्रैति। अपलपितस्वरूपाविति। निह्नुतावान्तरवैजात्यावित्यर्थः।

---

१. 'स तादृक् प्रियो मे' इत्यलङ्कारसर्वस्वधृतो पाठः।

२. व्याजोक्तेरितरालङ्कारव्यावर्तकत्वं रुचकेन का० प्र० सङ्केते इत्थं निर्दिष्टम्। क्वचित् प्रकृतनिष्ठं साम्यं यथा 'बुभुजे महीभुजः' इति समुच्चितोपमायाम्। क्वचिदप्रकृतनिष्ठं यथा कस्याञ्चित् तुल्ययोगितायाम्। क्वचित् तदुभयनिष्ठं व्यानापह्नुतिरेव स्यात्। स चापह्नवपूर्वकसादृश्यरूपोऽपह्नुतेर्भेद इति।

१८५ किञ्चित् पृष्टमपृष्टं वा कथितं यत् प्रकल्पते ।
तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता ॥११९

प्रमाणान्तरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनान्तराभावात् सदृशवस्त्वन्तरव्यवच्छेदाय यत् पर्यवस्यति सा भवेत् परिसंख्या । अत्र च कथनं प्रश्नपूर्वकं तदन्यथा च परिदृष्टम् । तथोभयत्र व्यपोह्यमानस्य प्रतीयमानता वाच्यत्वं चेति चत्वारो भेदाः । क्रमेणोदाहरणम्--

किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः
किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः ।
किमाराध्यं पुण्यं किमभिलषणीयं च करुणा
यदासक्त्या चेतो निरवधि विमुक्त्यै प्रभवति ॥५१२॥

किं भूषणं सुदृढमत्र यशो न रत्नं किं कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं जानाति कस्त्वदपरः सदसद्विवेकम् ॥५२२॥

पृष्टमपृष्टं वेति विशेषसूत्रणम् । शेषस्तु परिसंख्यासामान्यलक्षणं किञ्चित् कथितम् । तादृगन्यव्यपोहाय यत् प्रकल्पते कथितस्य तादृशवस्त्वन्तरव्यवच्छेदनप्रतीत्यै यत् कल्पनं सा परिसंख्येत्यर्थः ।

नन्वेकस्य कथने कथमितरेषां व्यवच्छेदप्रतीतिरित्याह--प्रमाणेति । यथा भोजयितव्यता बहुषूपस्थितेषु 'देवदत्तो भोजयितव्यः' इत्युक्ते परेषामभोजयितव्यमर्थसिद्धम्, तदा किमासेव्यमित्यादावपि गङ्गायाः सविधं सेव्यमित्युक्तेऽर्घादितरेषामसेव्यत्वप्रतिपत्तिः । तदाहुः--

"तत्र चान्यत्र च प्राप्तौ परिसंख्येति कीर्त्यते" इति ।

प्रयोजनान्तराभावादिति । एतदन्यप्रयोजनानामसङ्गततया बुद्ध्यनारोहेण शब्दप्रयोगस्य चावश्यकं किञ्चिदभिसन्धानपूर्वकत्वानुसन्धानेऽस्यैव स्फुरणादिति भावः । वाच्यत्वं चेति । यद्यप्यनुपादानेऽपि व्यपोहसिद्धिस्तथापि व्यपोह्यं क्वचन शाब्दत्वादात्मनोऽत्यन्तासत्त्वप्रकटनेन प्रकृतविधेर्दार्ढ्यातिशयमाधत्ते । यथा द्वयोरुपस्थितयोर्मैत्रं स्मर मा चैत्रमित्यत्रेति भावः । चत्वार इति अतः पूर्वमत्रेति, प्रकारद्वये पूर्वमपोह्यस्य व्यङ्ग्यत्ववाच्यत्वद्वयेन सङ्कलनयेति शेषः । पृष्ठमित्यस्य सूत्रे प्राथमिकत्वेन प्रश्नपूर्वकप्रकारयोः प्रथमतः शेषयोरित्यर्थः । द्यु सरितः सविधं न तु राजसदनादि । कौस्तुभभृतश्चरणयुगलं न तु धनसञ्चयादि । पुण्यं न तु वाणिज्यादि । करुणा न तु रणादि । निरवधि निष्प्रत्यूहं यथा स्यात् ।

---

१. आः शैत्यमिति प्रचलितः पाठः ।

कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते ।
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति ॥५२३॥
भक्तिर्भवे न विभवे व्यसनं प्रेम्णि न युवतिकामास्त्रे ।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् ॥५२४॥

१८६ यथोत्तरं चेत् पूर्वस्यार्थस्य हेतुता ।
तदा कारणमाला स्यात्

उत्तरमुत्तरं प्रति यथोत्तरम् । उदाहरणम्—

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः ॥५२५॥

'हेतुमता सह हेतोरभिधानमभेदतो हेतुः इति हेत्वलङ्कारोऽत्र न लक्षितः

अत्र जगति । कौटिल्यं कुञ्चिततारूपं चेतसि, 'रागो लौहित्यरूपः करादिषु, न तु पक्षपातरूपो बुद्धौ, काठिन्यं दार्ढ्यरूपं कुचयोर्न तु कृपणत्वं हृदये भावप्राप्ति-विलम्बनस्वरूपं सुरतेऽसौकुमार्यरूपं वा न त्ववयवान्तरे । तरलत्वं चलाचलतारूपं नयनयोर्न त्वस्थिरतारूपं प्रेम्णि व्यसनमासक्तिः । युवतिकामास्त्र इति युवतिरूपे कामास्त्र इत्यर्थः ।

ननु पूर्वोत्तरशब्दयोः परस्परसम्बन्धित्वात् पूर्वशब्दे वीप्सादर्शनादन्यत्रापि तथाभावो युज्यते, न त्वेवं सूत्रे दृश्यत इत्याह—**उत्तरमुत्तरं प्रति** । 'यथा' शब्द एवायं वीप्सार्थं इत्यर्थः ।

ननु कार्यकारणताभावालङ्करणप्रपञ्चप्रसङ्गेनात्र हेत्वलङ्कारस्याप्यभिधानं प्राप्तोति तत् किमित्यसौ नोक्त इत्याह—**हेतुमतेति** । अभेदतः सामानाधिकरण्येन । इतीत्यनन्तरं कैश्चिल्लक्षित इति शेषः । अत्र ग्रन्थे न लक्षित इति [3]सूत्रेणेति शेषः ।

---

१. अत्र रागपदेन रोषो विवक्षित इति श्रीधरः । भूयांसः प्रयोगा बाणभट्टादिकविभिः कृता एतन्मन्तव्यसमर्थनपरा उपलभ्यन्ते ।

२. 'शास्त्रे' इति प्रचलितः पाठः ।

३. सूत्रेण न लक्षितो वृत्तावत्र पठितोऽपि प्रत्याख्यात इत्यवधेयम् । यत्तु प्राचीनैष्टीकृद्भिः कैश्चिद् अनेन प्रघट्टकेनोद्भटमतमाक्षिप्तमिति, इदानीन्तनैरप्यनवहितैस्तथा निर्धारितञ्च । तदप्रमाणम्, अनाकरत्वात् । उद्भटकृतकाव्यालङ्कारसारसंग्रहे नास्य दर्शनम् । तत्र मात्रावृत्तेनार्यामियेन सूत्रग्रन्थनमेव निर्देशकमिति च स्थूलत एवाभाति । यद्यपि भामहग्रन्थेऽस्यालङ्कारस्य नामत उल्लेखो दृश्यते, तथापि ''हेतुश्च सूक्ष्मलेशौ च

आयुर्घृतमित्यादिरूपो ह्येष न भूषणतां कदाचिदर्हति, वैचित्र्याभावात् ।

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः ।
रम्योऽयमेति सम्प्रति लोकोत्कण्ठाकरः कालः ॥५२६॥

अनलङ्करणे किं बीजमित्याकाङ्क्षायां पृथग् लक्षणीयभावनायामुत्तरं हेतुमतेत्यादिपरलक्षणस्याभावादित्यर्थः । [1]यथाश्रुत्यतिव्याप्तिं तावदाह—**आयुरिति** । **एष** इति लक्षणानुसारेण सम्भावित इत्यर्थः । भूषणतामलङ्कारताम् । वैचित्र्याभावादिति । आस्वादस्याविद्यमानत्वेनाङ्गोत्कर्षद्वारा तदुत्कर्षणस्यालङ्कारसामान्यलक्षणस्याभावादित्यर्थः ।

अत्र तथाऽलङ्कारान्तरतया विशेषणीयं लक्षणमिति नातिव्याप्तिरिति चेदत्रासाम्प्रदायिकतया[2] नादरणीयतामाह—**अविरलेति** । काव्यरूपतामिति । रूपं विद्य-

---

नालङ्कारतया मताः'' इति तन्निष्कर्षस्तत्र वैमुख्यपरः । अत एवोद्भटकृते भामहविवरणेऽपि नास्य सद्भावः कल्पनीयः ।

न चोद्भटो भामहविवरणे स्वकीयं लक्षणं रचयतीति स्मरणीयम् । एवं निर्दिष्टस्य हेत्वलङ्कारस्य स्वीकारो रुद्रटेन स्वग्रन्थे कृतः, यद्यप्यधुनातनोपलब्धः पाठस्तत्र किञ्चिद् विलक्षणः । यथा—

"हेतुमता सह हेतोरभिधानमभेदकृद् भवेद् यत्र ।
सोऽलङ्कारो हेतुः स्यादन्येभ्यः पृथग्भूतः ॥" इति ।

यथाऽन्यत्रालङ्कारे विषयः पूर्णया आर्यया विहितस्तथापि स एव मूलकृदुद्दिष्ट इति नास्ति विप्रतिपत्तिः । आयुर्घृतमित्याद्युदाहरणोल्लेखोऽप्येत देव समर्थयते । आयुर्घृतम्, नदी पुण्यम्, भयं चौरः, सुखं प्रिया—इत्याद्युदाहरणं रुद्रटटीकाकृता नमिसाधुना दत्तं मूलकृताम् अविरलकमलविकास इत्यादेरनुपूरकतया । यदि तावन्निर्बन्धः पाठभेदत आकरभेदे तदा प्राचीनस्य कस्याप्येतल्लक्षणम्, आयुर्घृमित्यादि च तस्यैवोदाहरणमिति क्षीणा काचित् संभावना जागर्ति । उदाहृतलक्षणमप्यार्याया उत्तरार्धे उद्गीतेर्वा कस्मिन्नप्यर्धे स्थितं स्यात् । न भूषणतां कदाचिदर्हतीत्यादिर्मूले प्रत्याख्यानहेतुनिर्देशगर्भोक्तिस्तु रुद्रटग्रन्थीयस्य अन्यतः पृथग्भूत इत्यस्य खण्डनपरत्वेनैव समञ्जसा । रुद्रटोदाहरणस्यालङ्कृतकाव्यतयाऽन्यथा समाधानमत्र स्थितमप्येतदर्थकमेवेत्यनुमानमदुष्टम् । तत्र हेतु पदेन काव्यहेतुपर्यायेण तन्नाम्नोद्भटेन च निर्दिष्टेन 'श्रुतमेकम्' इत्यादिना लक्षणेन काव्यालङ्कारसारसंग्रहे लक्षितेन ग्रहो न सुदूरपराहत इति मूलकृतामाकूतं वा स्यात् ।

१. यथाश्रुतीत्यादिर्लक्षणस्याभावादित्यन्तः सन्दर्भ ख० पुस्तके नास्ति ।
२. महत्तराणामुद्भटाचार्याणामननुमोदनमेवात्र निगूढो हेतुरिति पर्यन्ते पर्यवस्यतीति ।

इत्यत्र काव्यरूपतां कोमलानुप्राससमहिम्नैव समाम्नासिषुर्न पुनर्हेत्वलङ्कारकल्पनयेति पूर्वोक्तं काव्यलिङ्गमेव हेतुः ।

१८७ क्रियया तु परस्परम् ॥१२०

वस्तुनोर्जननेऽन्योन्यम्

अर्थयोरेकक्रियामुखेन परस्परं कारणत्वे सत्यन्योन्यनामाऽलङ्कारः ।
उदाहरणम्—

हंसाणँ सरेहिँ सिरी सारिज्जइ अह सराण हंसेहिं ।
अण्णोण्णं विअ एए अप्पाणं णवर गरुअन्ति ॥५२७॥
(हंसानां सरोभिः श्रीः सार्यते अथ सरसां हंसैः ।
अन्योन्यमेव एते आत्मानं केवलं गरयन्ति ॥
इति संस्कृतम्)

तेऽस्येति अर्शआदित्वादचि कृते रूपं रूपवत् तस्य भावो रूपताऽलङ्कृतत्वमिति भावः । समाम्नासिषुः प्राचीनाः । न पुनः कल्पनयेत्यनन्तरं ततोऽस्माभिरपि तस्य लक्षणं न कृतमिति शेषः ।

ननु प्राचीनालक्षणत्वेऽपि सम्भवति विच्छित्तिविशेषे पृथग् लक्षणं न्याय्यमेव । यदुक्तम्—

"काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।
ते चाद्यापि विकल्प्यन्ते कस्तान् कात्स्न्र्येन वक्ष्यति ॥" पूर्वोक्तमिति ।

काव्यलिङ्गमिति तद्विशेषतया यथा पृथिव्येव घट इति हेतुरित्यनन्तरं मतः पृथग् न लक्षितमिति शेषः । तथाहि रम्यत्वेनोत्कण्ठाकरत्वेऽविरतेनैकपदार्थरूपो हेतुरुपात्त इति काव्यलिङ्गमेवेदम् । अविरलेत्यादौ काव्यलिङ्गता काव्यत्वं कोमलानुप्रासमहिम्नाऽऽयातीति किमलङ्कारान्तरकल्पनया ? ततश्च काव्यलिङ्गत्वहेतुः काव्यलिङ्गापरपर्याय एव काव्यसीम्नि[1] हेतुशब्दो न तु हेतुर्नामालङ्करणान्तरमस्तीति न ज्यायसी व्याख्या। अलङ्काराणां काव्यजीवातुतानिषेधात्, एकालङ्कारवत्यलङ्कारान्तरानुसरणनादावप्यतिशयोक्त्यविविक्ताविषयाणामुत्प्रेक्षादीनामप्यनादरणप्रसङ्गाद् हेतुपदस्य काव्यलिङ्गविशेषवाचकतया तत्पर्यायताऽयोगाच्च[2] ।

एकक्रियामुखेन परस्परं कारणत्व इति । सिद्धस्वरूपयोर्वस्तुनोरेकजातीयक्रियाविशेषं प्रति परस्परं जनकत्व इत्यर्थः । सारिज्जइ सारीक्रियते ।

---

१. एवमुभयोरेव मातृकालिप्यो पाठः ।
२. परन्तु काव्यहेतुपदं काव्यलिङ्गपर्यायतया प्रयुक्तमुद्भटेन का०आ०सारसंग्रहे ।

अत्रोभयेषामपि परस्परं जनकता मिथःश्रीसारतासम्पादनद्वारेण ।

१८९ उत्तरश्रुतिमात्रतः

प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा सति ॥ १२१

असकृद् यदसम्भाव्यमुत्तरं स्यात् तदुत्तरम् ॥

प्रतिवचनोपलम्भादेव पूर्ववाक्यं यत्र कल्प्यते तदेकं तावदुत्तरम् ।

उदाहरणम्—

वाणिअअ हत्थिदन्ता कुत्तो अम्हाण वग्धकित्ती अ ।
जाव लुलिआलअमुही घरम्मि परिसक्कए सोण्हा ॥५२८॥
(वाणिजक हस्तिदन्ताः कुतोस्माकं व्याघ्रकृतयश्च ।
यावत् लुलितालकमुखी गृहे परिष्वक्कते स्नुषा ॥
इति संस्कृतम्)

हस्तिदन्तव्याघ्रकृतीनामहमर्थी ता मूल्येन प्रयच्छेति क्रेतुर्वचनममुना वाक्येन समुन्नीयते। न चैतत् काव्यलिङ्गमुत्तरस्य ताद्रूप्यानुपपत्तेः । नहि प्रश्नस्य प्रतिवचनं जनको हेतुः । नापीदमनुमानम्, एकधर्मि-

---

तत्र प्रश्नेऽसम्भाव्यं चमत्कारि पूर्ववाक्यम् । कित्ती कृत्तयः (चर्माणि) । परिसक्कए परिष्वक्कते परिभ्रमतीत्यर्थः । सोण्हा स्नुषा इत्यर्थः । हस्तिदन्तेत्यादि । वस्तुसद्भावजिज्ञासागर्भत्वेन प्रश्नत्वमुक्तम् । अमुना तूत्तररूपेण वाक्येन समुन्नीयते व्यज्यते । अत्र वाक्येनेति पाठेनास्यामुदाहृतौ क्रेतृवचनमुन्नीयते । केन हेतुनेत्यपेक्षायमाह--वाक्येनेति ।

ननु हेतुर्वाक्यार्थतया काव्यलिङ्गमेवेदम् । न च हेतुमात्राच्छाव्दतया नैवमिति वाच्यम्[१], अवान्तरप्रकारतयाऽप्युपपत्तेरित्याह--न चेति । उत्तरस्येत्यनन्तरं प्रश्नं प्रतीति शेषः । ताद्रूप्येत्यत्र तदा पदार्थमात्रयोग्यत्वेनानुकृष्यते । ततश्च लिङ्गविषयत्वानुपपत्तेरित्यर्थः । ननूत्तरं कार्यतामापद्यमानमेव प्रश्नोन्नयनोपायस्तत् कथं लिङ्गत्वानुपपत्तिरिति काव्यलिङ्गलक्षणे हेतुशब्देन ताद्रूप्येत्यत्र च तदनुकृष्यमाणत्वेन लिङ्गशब्देन जनक एवोच्यते । न चात्र तथा सङ्गच्छत इत्यर्थः ।

यद्वा उत्तरस्य शब्दरूपस्य ताद्रूप्यानुपपत्तेः काव्यलिङ्गव्यपदेशविषयपदार्थवाक्यार्थात्मकहेतुरूपत्वानुपपत्तेः । उत्तरार्थस्य ताद्रूप्योपपत्तेर्भविष्यतीति चेदत्राह–नहीति । हिरलङ्कारे । प्रश्नस्य प्रश्नविषयस्य । प्रत्युच्यत इति प्रतिवचनमुत्तरार्थः । जनको हेतुरिति पूर्ववत् । अथवैतदिति समनन्तरोदाहृतिगतमलङ्करणमित्यर्थः । उत्तरस्यालङ्करणता द्रव्यानुपपत्तेः । कुत इत्याह--नहीति । प्रथमपक्षे योजना । न

---

१. 'नैवमेवेदं न च हेतुना तादृशशब्देनैवम्' इति वाक्यम् इति वाक्यम् इति ख० पुस्तके ।

निष्ठतया साध्यसाधनयोरनिर्देशात् । इत्यलङ्कारान्तरमेवोत्तरं साधीयः। प्रश्नादनन्तरं लोकातिक्रान्तगोचरतया यदसम्भाव्यरूपं प्रतिवचनं स्यात् तदपरमुत्तरम् । अनयोश्च सकृदुपादानान्न चारुताप्रतीतिरित्यसकृदित्युक्तम् । उदाहरणम्—

> का विसमा देव्वगई किं लद्धं जं जणो गुणग्गाही ।
> किं सोक्खं सुकलत्तं किं दुग्गेज्झं खलो लोओ ।।५२९।।
>
> (का विषमा दैवगतिः किं लब्धव्यं यत् जनो गुणग्राही ।
> किं सौख्यं सुकलत्रं किं दुःखं यत् खलो लोकः ।। इति संस्कृतम्)

प्रश्नपरिसंख्यायामन्यव्यपोह एव तात्पर्यमिह तु वाच्य एव विश्रान्तिरित्यनयोर्विवेकः ।

१८९ कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते ।।१२२
धर्मेण केनचिद् यत्र तत् सूक्ष्मं परिचक्षते ।।

कुतोऽप्याकारादिङ्गिताद्वा । सूक्ष्मस्तीक्ष्णमतिसंवेद्यः । उदाहरणम्—

तूत्तरार्थः[1] प्रश्नत्वं प्रति जनकतयाऽनुमानालङ्कृतिरस्त्वित्याशङ्क्याऽयमत्र गौतमादितन्त्रप्रसिद्धानुमानप्रयोगच्छायाप्रतिपादनशरीरो न सम्भवतीत्याह—**नापीति** । एकेत्यादौ साध्यसाधनयोरेकधर्मिनिष्ठतया निर्देशादप्रकाशितत्वादिति साध्यसाधनयोश्च तयोस्त्वनिर्देशाच्छब्देनाप्रतिपन्नत्वात् साध्यत्वे साधनत्वाकारेणानिर्देशादिति विवक्षितम्। एतच्च श्रुतिमात्रत इति सूचितमेव । श्रुतिमात्रेणोत्तराद्यनुसन्धानात् विप्रतिपत्तेः। अलङ्कारान्तरं काव्यलिङ्गानुमानाभ्यां भिन्नोऽलङ्कारः। साधीयः प्रशस्ततरं निरवद्यमलङ्कारविषयमिति यावत् । प्रश्नादित्यतः पूर्वमुक्तादिति शेषः । लोकातिक्रान्तं वस्तु गोचरं विषयो यस्येति लोकातिक्रान्तगोचरं तस्य भावस्तत्ता तथा लोकातिक्रान्ततयाऽनयोः प्रश्नोत्तरयोः सकृदुपादानादेकैकयोरुपादानात्। विषमादुर्ज्ञाना। लब्धं लाभः। यज्जनो गुणग्राही तल्लब्धमित्यर्थः। दुग्गेज्झं दुर्ग्राह्यम् । अन्यव्यपोह एव, न तु वाच्ये कर्हिचित् । तात्पर्यं वाक्यस्य परिविश्रामः। वाच्य एव न त्वन्यव्यपोहहेतुरननुभवादित्यर्थः ।

कुतोऽपि कुतश्चित् सूक्ष्मोऽपीत्यपिना विस्मयद्योतकेन चमत्करणोपायत्वसूचनम् । केनचिद् धर्मेण लोकोत्तरेण ज्ञाने आकाराज्जीवनयोनिप्रयत्नजन्यात् स्वेदरोमाञ्चादेः। इङ्गितादिच्छापूर्वप्रयत्नजन्यानुष्ठानान्निमीलनादेः । तीक्षणमतिभिश्चिन्त्यः तीक्षणमतिभिः सूक्ष्ममतिभिश्चिन्तया गम्यः ।

---

१. उत्तरार्थज्ञापकहेतुविषयकानुमानतया सम्भाव्यमानमिति यावत् ।

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं काऽपि कण्ठे।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खङ्गलेखां लिलेख ॥५३०॥

अत्राकृतिमवलोक्य कयाऽपि वितर्कितं पुरुषायितमसिलतालेखनेन वैदग्ध्यादभिव्यक्तिमुपनीतम् पुंसामेव कृपाणपाणितायोग्यत्वात्।

यथा वा—

सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया।
ईषन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥५३१॥

अत्र जिज्ञासितः सङ्केतकालः कयाचिदिङ्गितमात्रेण विदितो निशासमयशंसिना कमलनिमीलनेन लीलया प्रतिपादितः।

१९० उत्तरोत्तरमुत्कर्षो भवेत् सारः परावधिः ॥१२३

परः पर्यन्तभागोऽवधिर्यस्य धाराधिरोहितया तत्रैवोत्कर्षस्य विश्रान्तेः।

उदाहरणम्—

राज्ये सारं वसुधा [1]वसुन्धरायां पुरं पुरे सौधम्।
सौधे तल्पं तल्पे वराङ्गनाऽनङ्गसर्वस्वम् ॥५३२॥

१९१ भिन्नदेशतयाऽत्यन्तं कार्यकारणभूतयोः।
युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसङ्गतिः ॥१२४

आकारोदाहृतिमुक्त्वेङ्गितोदाहरणमाह—तथा चेति। उपभुक्तक्षीणसम्पत्तिर्नागरानुचरो विटः। ईषदापरितोषात् फुल्लेन नेत्रेणार्पितं दत्तं प्रकाशितमिति यावत्, आकूतं रहस्यं येनेति विटविशेषणम्। ये तु निमीलनक्रियाविशेषणमित्याहुस्तेषामिङ्गितमात्रेण विदित इत्युक्तग्रन्थानुपपत्तेः। इङ्गितानुपादाने ततोऽन्यतो वेति सन्देहाज्जिज्ञासित इत्यतः पूर्वं विटेनेति शेषः। लीलया वैदग्ध्यव्यञ्जकचेष्टया प्रतिपादितो बोधितः।

पर्यन्तभागः पद्यस्य गद्यखण्डस्य वा[2] (?) गुणक्रियाक्रमिकया सहृदयहृदयप्रकर्षतयोत्कर्षस्य गुणक्रियात्मनः। विश्रान्तेः स्वात्मना स्थिरीभावादित्यर्थः। अनैवंभूतस्थाने त्वलङ्कृतयैव पर्याप्नोतीति भावः।

---

१. वसुधायामिति प्रचलितः पाठो दुष्टः, आकरे रुद्रटग्रन्थे तथाऽनुपलम्भादार्यालक्षणभङ्गाच्च।

२. अत्र द्वयोरेव मातृकालिप्योर्घुणाक्षरन्यायेन ग्रन्थपाते संवादः। तत्र ख० पुस्तकस्य क-पुस्तकादन्यत्र बहुशः पाठभेददर्शवान्न तयोरेकापर्शतः प्रतिलिपित्वाशङ्का सङ्गता। न चापि चण्डीदासटीका।

इह यद्देशं करणं तद्देशमेव कार्यमुत्पद्यमानं दृष्टं यथा धूमादि। यत्र तु हेतुफलभूतयोरपि धर्मयोः केनाप्यतिशयेन नानादेशतया युगपदवभासनं सा तयोः स्वभावोत्पन्नपरस्परसङ्गतित्यागादसङ्गतिः

उदाहरणम्—

जस्सेअ वणो तस्सेअ वेअणा भणइ तं जणो अलिअं।
दन्तक्खअं कबोले बहुइ वेअणा सवत्तीणं ।।५३३।।
(यस्यैव व्रणस्तस्यैव वेदना भणति तज्जनोऽलीकम्।
दन्तक्षतं कपोले बध्वाः वेदना सपत्नीनाम् ।। इति संस्कृतम्)

एषा च विरोधबोधिनी, न विरोधः, भिन्नाधारतयैव द्वयोरिह विरोधितायाः प्रतिभासात्। विरोधे तु विरोधित्वमेकाश्रयनिष्ठमनुक्तमपि पर्यवसितम्, अपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थितेः। तथा चैवं दर्शितम्।

१९२ समाधिः सुकरं कार्यं कारणान्तरयोगः।

भिन्नदेशतयेत्यस्यैवोपस्कारकम्, अत्यन्तमिति तु पृथगुपयुज्यमानार्थं भिन्नदेशताऽतिरिक्तप्रसक्त्यौपयिकार्थविरहाच्च। युगपदित्यपि स्वरूपानुवादमात्रं न तु लक्षणोपयोगि। यथोक्तं कार्यकारणयोर्भिन्नविषयत्वेऽसङ्गतिरिति। केनाप्यतिशयेनेति कमप्यतिशयमनुसन्धायेत्यर्थः। ख्यातिरित्यस्य विवृतिरवभासनमिति प्रतिपादनमित्यर्थः स्वभावोत्पन्नेति अनौपाधिकेत्यर्थः। सङ्गतित्यागादिति सामानाधिकरण्याख्यसम्बन्धाभावख्यापनशरीरत्वादित्यर्थः।

ननु कार्यकारणयोः भिन्नाधिकरणताविरोधात् तस्य चात्र भावाद् विरोधालङ्कृतिरेव न पृथगित्याह–एषा चेति। भिन्नाधारतयेत्युभयसम्बद्धत्वम्, तयोः सम्बन्धिनोर्भिन्नाधारतयैव प्रतिभासात्।

समाधिरिति। असङ्गतिवैपरीत्यादत्र निर्देशः। केनचिदारब्धस्य कार्यस्य सहकारिकारणान्तरसम्बन्धात् सुकरत्वं सम्यगाधानात् समाधिः। सहकार्यन्तर-

---

समाधिप्रकरणादितद्गुणप्रकरणपर्यन्तेऽलङ्कारचतुर्दशकमये ग्रन्थे नासीदेवेति समाधानं समञ्जसम्, क पुस्तकेऽव्यवहितपूर्वांशे भिन्नाधारयेति प्रतीकव्याख्यानात् परं यदाह वृत्तिकृदित्युपक्रम्यानन्तरे व्याख्यातालङ्कारवृत्तिपरामर्शप्रकारस्तत्रैवाव्यवहितपूर्ववाक्यं वाक्यान्तरमपेक्षते। तदेव ग्रन्थगलनपक्षे विनिगमकन्। ख पुस्तकेऽपि व्यापारस्येत्यनन्तरग्रन्थो व्यापारस्य सम्बन्धितः प्रकरणत एवाकाङ्क्ष्यते। एवमगतिकगत्याऽत्र श्रीधरकृतात् काव्यप्रकाशविवेकग्रन्थात् त्रुटितांशोपरि विवरणमिह वन्धनीद्वयमध्यस्थमन्तर्भाव्यते व्याख्यापूरणाय।

साधनान्तरोपकृतेन कर्त्रा यदक्लेशेन कार्यमारब्धं समाधीयते स समाधिर्नाम। उदाहरणम्—

मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् ॥५३४॥

१९३ समं योग्यतया योगो यदि सम्भावितः क्वचित् ॥१२५

इदमनयोः श्लाध्यमिति योग्यतया सम्बन्धस्य नियतविषयमध्यवसानं चेत्तदा समम्। तत् सद्योगेऽसद्योगे च। उदाहरणम्—

धातु शिल्पातिशयनिकषस्थानमेषा मृगाक्षी
रूपे देवोऽप्ययमनुपमो दत्तपत्रः स्मरस्य।
जातं दैवात् सदृशमनयोः सङ्गतं यत् तदेत-
च्छृङ्गारस्योपनतमधुना राज्यमेकातपत्रम् ॥५३५॥

यथा वा—

चित्रं चित्रं बत बत महच्चित्रमेतद् विचित्रं
जातो दैवादुचितरचनासंविधाता विधाता।
यन्निम्बानां परिणतफलस्फीतिरास्वादनीया
यच्चैतस्याः कवलनकलाकोविदः काकलोकः ॥५३६॥

सम्बन्धश्च विवक्षितपूर्वोऽन्यथा वेति द्विविधः। अत्रापि प्रत्येकं दैवादैवकृतत्वेनायं चतुर्धा। मानमित्यादि। दिष्ट्येत्यानन्दोक्तौ। उदीर्णमुद्गतं 'प्रणामान्तो मानः' इति माननिराकरणे कार्ये प्रणतिरुपायः। तत्सौकर्यार्थं घनगर्जितस्य कारणान्तरस्य प्रक्षेपः। सौकर्यं चोपकारायेत्यादिना प्रकाशितम्, तदियं दैवकृता सहायसम्पत्तिः। अविवक्षितपूर्वैव दैवकृता यथा—

''अनुशासतमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रज।
स्वयमर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः॥''

अत्र भीमानुशासनोपक्रमकाल एव व्यासागमनस्य तदुपकाराय प्रक्षेपः। एवं चिन्तितपूर्वोऽपि द्रष्टव्यः।

सममित्यन्वर्थं नाम। सम्यक् साम्यादस्य प्रस्तावः। योग्यतास्वरूपमाह—इदमनयोः श्लाघ्यमिति। एतच्चाभिरूपानभिरूपविषयत्वेन द्विविधमिति क्रमेणोदाहरणमाह—धातुरित्यादि। अत्राभिरूपस्यैव नायकयुगलस्य संघटनमुचितमुपात्तम्। द्वितीयं यथा—चित्रमित्यादि। अत्राभिरूपाणां निम्बानां काकानां चानुरूप्यात् समत्वव्यपदेशः।

१६४ क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात् ।
कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद् भवेत् ॥१२६
गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये ।
क्रमेण च विरुद्धे यत् स एष विषमो मतः । १२७

द्वयोरत्यन्तविलक्षणतया यदनुपपद्यमानतयैव योगः प्रतीयते, यच्च किञ्चिदारभमाणः कर्ता क्रियायाः प्रकाशान्न केवलमभीष्टं यत् फलं न लभेत यावदप्रार्थितमप्यनर्थं विषयमासादयेत्, तथा सत्यपि कार्यस्य कारणरूपानुकारे यत्तयोर्गुणौ क्रिये च परस्परं विरुद्धतां व्रजतः, स समविपर्ययात्मा चतूरूपो विषमः । क्रमेणोदाहरणम्—

शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना ।
अयं क्व च कुकूलाग्निकर्कशो मदनानलः ॥५३७॥

सिंहिकासुतसन्त्रस्तः शशः शीतांशुमाश्रितः ।
जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः ॥५३८॥

क्वचिदिति समवैधर्म्यादत्र लक्षणम् । श्लेषोऽत्र संयोगः[१] । अयं चतुर्धा । शिरीषादित्यादि । कुकूलं तुषाग्निः । सिंहिकेत्यादि । सिंहिकासुतः सिंहो राहुश्च । अत्र न परं शशेनात्मरक्षा समासादिता यावदेष स्वयमेवाधिगतमहाबाधः । आश्रयबाधनमाश्रयणक्रियाध्वंसं चकारेत्यनर्थान्तरप्रापिकाश्रयणक्रिया[२] ।

"तीर्थान्तरेषु मलपङ्कमयीं विहाय पुण्यां तनुं तनुभृतः प्रसभं लभन्ते ।
वाराणसि त्वयि तु मुक्तकलेवराणां लाभोऽस्तु मूलमपि यात्वपुनर्भवाय ॥"

अत्रानर्थोत्पत्तिर्व्याजस्तुतिपर्यवसायिनीति सङ्कीर्णता । सद्य इत्यादि । अत्र कृष्णवर्णात् शुक्लवर्णस्योत्पत्तिः आनन्दमित्यादि । अत्र कारणगतयोः क्रिययोर्विरोधः ।

---

१. यथाऽनुरूपयोः संसर्गे समालङ्कारस्तथाऽननुरूपयोः संसर्गे विषमम् । न केवलं तयोः स्वयं विरूपत्वं यावत् संघटनाया अन्याननुरूपत्वमिति हि न श्लेषघटनामियादिति लक्षणवाक्यस्याशयः । अलङ्कारसर्वस्वे त्रिविधमिदम् । अत्र तृतीयभेदस्य द्विप्रकारत्वम्, न चतूरूपत्वम् । वस्तुतस्तु सतोरसतोश्च सम्बन्धानुकूलतया द्विविधमिदम् । ततश्च कारणकार्यरूपताऽपि सम्बन्धविशेषः । ततस्त्रिविधमिति केचित् । एवं विषमालङ्कारपक्षेऽपि ।

२. सिंहिकासुतेति श्लोकस्योत्तरार्धे पाठभेदः कश्चित् श्रीधरकृतविवरणात् प्रतिभाति । मूलपाठे तु 'स्वाश्रयो जग्रसे' इति । तत्र आश्रयणक्रिया शाब्द्येव ।

सद्यःकरस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाललेखा ।
तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोक्याभरणं प्रसूते ॥५३९॥

आनन्दममन्दमिमं कुवलयदललोचने ! ददासि त्वम् ।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥५४०॥

अत्रानन्ददानं शरीरतापेन विरुध्यते । एवम्—

विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये ।
मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा ॥५४१॥

इत्यादावपि विषमत्वं यथायोगमवगन्तव्यम्[1] ।

१९५ महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात् ।
आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकं तु तत् ॥१२८

आश्रितमाधेयमाश्रयस्तदाधारस्तयोर्महतोरपि विषये तदपेक्षया तनू अप्याश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्रमं यदधिकतरतां व्रजतस्तदिदं द्विविधमधिकं नाम । क्रमेणोदाहरणम्—

अहो विशालं भूपाल ! भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥५४२॥

एवं वितुलेनेत्यादि । अत्र दीनेन गुरुकार्यं कृतमिति विषमत्वम् । एवमधिकोऽपि यत्र स्वल्पमपि प्रयोजनं न विदधाति तदपि विषमं [2]यथा—

"किं ददातु किमश्नातु भर्तव्यभरणाकुलः ।
उदारमतिराप्तोऽपि जगत्त्रितयमात्रके ॥" इति ।

महतोरित्यादि । वैषम्यप्रस्तावात् तदनन्तरमस्य लक्षणम् । महतोराधेयाधारयोर्विषये यथाक्रममाधाराधेयौ तनुत्वेऽपि यन्महीयांसौ स्यातां तदधिकं नामालङ्कार इति योजना । प्रयोजनं च वर्णनीयप्रकर्षः । तत्राधारस्य तनोरप्याधिक्यं यथा—अहो विशालमित्यादि । माति वर्तते । अत्राधेयस्य यशसो वैपुल्येऽपि तदपेक्षया तनोरपि भुवनत्रितयोदरस्याधारस्य महत्त्वमुक्तम्, अन्यथा मानस्या-

---

१. अनुसर्तव्यमिति क्वाचित्कः पाठः ।

२. अनिष्टफलावाप्तिरनर्थप्राप्तिश्चैकमपि लब्धमागमकं द्विधाविभज्य फलानवाप्तिरपि अनिष्टस्याप्य-वाप्तिश्च इति तत्रत्ये लक्षणे 'अपि' शब्दाद् गृहीतायाः "इष्टानवाप्तेश्च संग्रहः" इति भेदकत्वेन स्वीकृता कैश्चित् । तदायं पक्षः । स च कुवलयानन्दकृता "अनिष्टस्याप्य-लक्षितः ।

युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत ।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः ।।५४३।।

१९६ प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया ।
या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते ।।१२९।।

निकृतिपरमपि विपक्षं साक्षान्निरसितुमशक्तेन केनापि यत्तमेव प्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्करणं तदनीकप्रतिनिधितुल्यत्वात् प्रत्यनीकमभिधीयते । यथाऽनीकेऽभियोज्ये तत्प्रतिनिधिभूतमपरं मूढतया केनचिदभियुज्यते, तथेह प्रतियोगिनि विजेये तदीयोऽन्यो विजीयत इत्यर्थः ।

उदाहरणम्—

त्वं विनिर्जितमनोभवरूपः सा च सुन्दर ! भवत्यनुरक्ता ।
पञ्चभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव कामः ।।५४४।।

यथा वा—

यस्य किञ्चिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः ।
कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनाऽपि बाधते ।।५४५।।

इन्दोरत्र तदीयता सम्बन्धिसम्बन्धात् ।

सम्भवात् । तदेतदाधिक्यमेव चारुत्वहेतुः[१] । युगान्तेत्यादि । अत्रैककैटभारितनोराधारस्य वैपुल्येऽपि तदपेक्षया तन्वीनामपि मुदां यन्महत्त्वमुक्तं तच्चारुताऽऽस्पदम् ।

प्रतिपक्षमिति । आश्रिताश्रयप्रस्तावादस्य सङ्गतिः । निकृतिरपकारः । अन्वर्थतामाह—अलीकेत्यादि । प्रतिपत्तृगतत्वेन बलवत्त्वख्यापनं प्रयोजनम् । त्वमित्यादि । अत्र त्वत्सम्बन्धिनीं स्मरस्तापयतीति तद्विषये स्मरस्याबलत्वं ख्याप्यते । यस्येत्यादि । अत्र राहोर्भगवान् कृष्णो बलवान् प्रतिपक्षः, तत्सम्बन्धि वक्त्रं तेनेन्दोः सादृश्यमुखेन सम्बन्धः । तस्य दुर्बलस्य तिरस्काराद्भगवतः प्रकर्षोऽवगम्यते ।

---

१. आधिक्यं कविप्रौढोक्त्या साधितमत्र । त च तया विना कापि विच्छित्तिर्भवतीत्यलङ्कारसामान्यलक्षणे एव तन्निवेशः । अत एवाभियुक्तैर्भेदस्य विषमभेदेनालङ्काररत्नाकरादावुपदर्शितं तन्निरस्तम्, चारुत्वप्रतीतिवैलक्षण्येऽलङ्कारभेदस्यापि दुरपलपत्वात् ।

१९७ समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते ।
निजेनागन्तुना वाऽपि तन्मीलितमिति स्मृतम् ॥१३०॥

सहजमागन्तुकं वा किमपि साधारणं यल्लक्षणं तद्द्वारेण यत् किञ्चित् केनचिद् वस्तुना वस्तुस्थित्यैव बलीयस्तया तिरोधीयते तन्मीलितमिति द्विधा स्मरन्ति । क्रमेणोदाहरणम्—

अपाङ्गतरले दृशौ मधुरवक्रवर्णा गिरो
विलासभरमन्थरा गतिरतीव कान्तं मुखम् ।
इति स्फुरितमङ्गके मृगदृशः स्वतो लीलया
तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते ॥

अत्र दृक्तरलताऽऽदिकमङ्गस्य लिङ्गं स्वाभाविकं साधारणञ्च, मदोदयेन तत्राप्येतस्य दर्शनात् ।

ये कन्दरासु निवसन्ति सदा हिमाद्रे-
स्त्वत्पातशङ्कितधियो विवशा द्विषस्ते ।
अप्यङ्गमुत्पलकमुद्वहतां सकम्पं
तेषामहो बत भियां न बुधोऽप्यभिज्ञः ॥५४७॥

अत्र तु सामर्थ्यादवसितस्य शैत्यस्यागन्तुकत्वात् तत्प्रभयोरपि कम्पपुलकयोस्ताद्रूप्यं समानता च, भयेष्वपि तयोरुपलक्षितत्वात् ।

समेनेति तिरस्कारप्रस्तावादस्य सङ्गतिः । वस्तुना वस्त्वन्तरतिरोधानं मीलितमित्यन्वर्थं नाम । न चायं सामान्यालङ्कारः ।

तथाहि—सहजेनापाङ्गतरल इत्यादावङ्गत्वेन मदोदयस्य च धर्मसाम्यादैकात्म्यमतिशयायाविवक्षितमपि नासादितम् । तत्स्वभावमिदं वस्तु, अत एव बलीयस्तया तस्य तिरोधानहेतुः । सामान्येन तु यत्रैकात्म्यं तदसदेव, प्रस्तुततिरोधानातिशयोक्त्या विवक्षितमिति सिद्धोऽस्य ततो व्यतिरेकः । तेनात्र दृक्तारल्यादिना स्वाभाविकेन चिह्नेन मदोदये दैवकृता बाधा विधीयत इति मीलितम् । आगन्तुकेन यथा—ये कन्दरास्वित्यादि । त्वत्पातेति । पातः पातनम्[1] । अत्र हिमाद्रिकन्दरनिवाससामर्थ्यप्रतिपन्नेन शैत्येन समुद्भावितावागन्तुकौ । कम्परोमाञ्चयोर्भयकृतयोस्तिरोधायके तत्त्वादेव च मीलितव्यपदेशः[2] ।

---

१. पातः पतनम्, आगमनमिति यावदित्येव वरम् । टीकाकृद्विवरणे णिजन्तताऽऽऽश्रयणम् ।

२. अयमंशोऽलङ्कारसर्वस्ववृत्तौ स्थितः । तत्र 'तत्त्वात्' इत्यस्य स्थाने 'तिरोधायकत्वात्' इति पाठः । 'कम्परोमाञ्चोभयकृतयोस्तिरोधायकत्वात् इति ख पुस्तकेऽवद्यः पाठः ।

१९८ स्थाप्यते वापि यथापूर्वं परं परम् ।

विशेषणतया यत्र वस्तु सैकावली द्विधा ॥१३१॥

पूर्वं पूर्वं प्रति यथोत्तरस्य वस्तुनो वीप्सया विशेषणभावेन यत् स्थापनं निषेधो वा सम्भवति सा द्विधा बुधैरेकावली भण्यते ।

क्रमेणोदाहरणम्—

पुराणि यस्यां सवराङ्गनानि वराङ्गना रूपपुरस्कृताङ्ग्यः ।
रूपं समुन्मीलितसद्विलासमस्त्रं विलासाः कुसुमायुधस्य ॥५४८॥

न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद् यदलीनषट्पदम् ।
न षट्पदोऽसौ कलकुञ्जितो न यो न गुञ्जितं तन्न जहारयन्मनः ॥५४९॥

पूर्वत्र पुराणां वराङ्गनाः, तासामङ्गविशेषणमुखेन रूपम्, तस्य विलासाः तेषामप्यस्त्रमित्यमुना क्रमेण विशेषणं विधीयते। उत्तरत्र प्रतिषेधेऽप्येवं योज्यम् ।

१९९ यथाऽनुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः ।

स्मरणम्

यः पदार्थः केनचिदाकारेण नियतो यदा कदाचिदनुभूतोऽभूत् स कालान्तरे स्मृतिप्रतिबोधाधायिनि तत्समाने वस्तुनि दृष्टे सति यत् तथैव स्मर्यते तद् भवेत् स्मरणम् ।

स्थाप्यत इति मीलितवैपरीत्यादस्य सङ्गतिः। यथापूर्वमिति पूर्ववदव्ययीभावः। तेन पूर्वं पूर्वं प्रति यत्र परं परं विशेषणत्वेन स्थाप्यते स एकावलीग्रन्थनन्यायादेकावल्याख्योऽलङ्कारः । तत्र विशेषणत्वं स्थापनेन वा निवर्तनेन वेति द्विधेति। तत्र स्थापनेन यथा—पुराणि यस्यामित्यादि। पुराणि गृहाणि। अत्र वराङ्गनाः पुराणां विशेषणं स्थापनीयत्वेन स्थितम् । एवं वराङ्गनानां रूपमित्यादि ज्ञेयम्। निवर्तनेन यथा—न तज्जलमित्यादि। अत्र जलस्य सुचारुरूपपङ्कजत्वं विशेषणं प्रतिषेधत्वेन निबद्धम् । एवं पङ्कजानां लीनषट्पदत्वमित्यादि ।

यथानुभवमिति। दृष्ट इति दृशिरत्रोपलब्धिमात्रवचनः। तत्सदृश इति सदृशानुभवात् सदृशस्य वस्तुनः स्मृतिः स्मरणं नामालङ्कारः। अविनाभावादिदं नानुमानम्। सादृश्यं विना तु स्मृतिर्नायमलङ्कारो यथा—

"अत्रानुगोदं मृगयानिवृत्तस्तरङ्गवातेन विनीतखेदः ।
रहस्तदुत्सङ्गनिषण्णमूर्धा स्मरामि वानीरगृहेषु सुप्तः ॥"

उदाहरणम्—

निम्ननाभिकुहरेषु यदम्भः प्लावितं चलदृशां लहरीभिः ।
तद्भवैः कुहरुतैः सुरनार्यः स्मारिताः सुरतकण्ठरुतानाम् ॥५५०॥

यथा वा—

करजुअगहिअजसोआत्थणमुहविणिवेसिआहरपुण्डस्स ।
संभरिअपञ्चजण्णस्स णमह कण्हस्स रोमञ्चं ॥५५१॥

(करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरपुटस्य ।
संस्मृतपाञ्चजन्यस्य नमत कृष्णस्य रोमाञ्चम् ॥ इति संस्कृतम् ।)

२०० भ्रान्तिमानन्यसंवित् तत्तुल्यदर्शने ॥१३२॥

तदित्यन्यदप्राकरणिकं निर्दिश्यते । तेन समानमर्थादिह प्राकरणिक-माश्रीयते । तस्य तथाविधस्य दृष्टौ सत्यां यदप्राकरणिकतया संवेदनं

प्रेयसोऽलङ्कारस्य तु सादृश्यव्यतिरिक्तनिमित्तोपस्थापिता स्मृतिर्विषयः । यथा—अहो कोपेऽपि कान्तं मुखम्[1] इति । **निम्नेत्यादि** । 'स्मारिता' इति घटादिषु पठितस्य स्मरतेर्मित्वेऽपि 'मितां ह्रस्वः' इति न ह्रस्वः, 'तद्विभाषा वेति' व्यवस्थित-विभाषायास्तत्रानुवृत्ताया आश्रयणात् । करजुअ इत्यादि ।

"करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरमुटस्य ।
संस्मृतपाञ्चजन्यस्य नमत कृष्णस्य रोमाञ्चम् ॥"

अत्र भगवतो देहदेशान्तरानुभूतार्थस्मरणं सुप्रतिबुद्धस्येव पूर्वेद्युरवगताना-मर्थानाम्[2] । अत एव तदनुभावरोमाञ्चस्य नमस्कारः ।

भ्रान्तिमानिति । भ्रान्तेः स्मृतिपूर्वकत्वात् तदनन्तरमस्य सङ्गतिः । अतस्मिन् तदिति निश्चयो भ्रान्तिश्चित्तधर्मः, स विद्यते यस्मिन् भणितिप्रकारे स भ्रान्ति-

---

१. "क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा । दोषाणां प्रशमाय न श्रुतमहो कोपेऽपि कान्तं मुखम्" इत्यादिविक्रमोर्वशीयपद्यं चतुर्थोल्लासे भावशबलतयोदाहृते । अलङ्कारसर्वस्वाद्यालङ्कारिकाणां मतानुयायिनां "रसभावौ तदाभासौ" इत्यादि दर्पणकृतां कारिकातो गुणीभूतत्वकृता तदलङ्कारता । प्राचीनानामुद्भटादीनां मते यथा-स्थितानां भावादीनामलङ्कारत्वं प्रेयः प्रभृतितया । टीकाकृदत्रालङ्कारसर्वस्वमत-मेवानुवदति ।

२. शङ्खसदृशे स्तनेऽधरपृष्ठे जन्मान्तरानुभूतस्य पाञ्चजन्यस्य स्वकीयाधारदृढसक्तध्वनेः स्मरणम्, इत्यलङ्कारसादृश्यं विना स्मृतिर्नायलङ्कार इति लक्षणलक्षितत्वात् । दार्शनि-करीत्या तस्य सुप्रतिबुद्धस्येवेत्यादिर्मनोज्ञः प्रकाशष्टीकायाम् ।

स भ्रान्तिमान् । न चैष रूपकं प्रथमाऽतिशयोक्तिर्वा, तत्र वस्तुतो भ्रमस्याभावादिह चार्थानुगमनेन संज्ञायाः प्रवृत्तेस्तस्य स्पष्टमेव प्रतिपन्नत्वात् । उदाहरणम्—

कपाले मर्जारः पय इति कराँल्लेढि शशिन-
स्तरुच्छिद्रप्रोतान् बिसमिति करी संकलयति ।
रतान्ते तल्पस्थान् हरति वनिताऽप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विह्वलयति ।।५५२।।

२०१ आक्षेप उपमानस्य प्रतीपमुपमेयता ।
तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धनम् ।।१३२।।

अस्य धुरं सुतरामुपमेयमेव वोढुं प्रौढमिति कैमर्थ्येण यदुपमानमाक्षिप्यते, यदपि तस्यैवोपमानतया प्रसिद्धस्योपमानान्तरविवक्षयाऽनादरार्थमुपमेयभावः कल्प्यते, तदुपमेयस्योपमानप्रतिकूलवर्तित्वादुभयरूपं प्रतीपम् । क्रमेणोदाहरणम्—

लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव ! त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।
इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिन्तारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ।।५५३।।
ए एहि दाव सुन्दरि कण्णं दाऊण सुणसु वअणिज्जं ।
तुज्झ मुहेण किसोअरि चन्दो उअमिज्जइ जणेण ।।५५४।।

मानिति—उत्तरकालभाविना सम्यग्ज्ञानेन यत्र बाधस्तदेव विपर्ययज्ञानम्, अतस्तद्रूपत्वाच्छुक्तिकाऽऽदौ रजतादिबुद्धेरपि भ्रान्तेर्मुख्यत्वमेव, न तु गौणत्वमित्युक्तमेव । तुल्यदर्शन इत्यनेन गात्रमर्मप्रहारादिजन्यभ्रान्तिरस्य न विषयः । यथा—

"दामोदरकराघातव्याकुलीकृतचेतसा ।
दृष्टं चाणूरमल्लेन शतचन्द्रं नभस्तलम् ।।" इति ।

सादृश्यहेतुकाऽपि भ्रान्तिर्विच्छित्यर्थं कविप्रतिभोत्थापितैव गृह्यते, न तु स्वरसोत्थापिता शुक्तिका रजतवदिति । यथा कपाल इत्यादि । कपालं घटादेः शकलम् । कपोल इत्यपि पाठः । विह्वलयति विप्लवयति । अत्र प्रभामत्तस्य शशिनः करेषु मार्जारादीनां पयःप्रभृतिरूपभ्रान्तिः कविप्रतिभोत्थापितैव । प्रथमाऽतिशयोक्तिर्भेदेऽभेदरूपा ।

आक्षेप इति । सादृश्यप्रस्तावादस्य प्रस्तावः । उपमेयस्यैवोपमानभारोद्वहनसामर्थ्यादुपमानस्य चन्द्रादेः कैमर्थक्येनाक्षेप आलोचनं क्रियते तदेकं प्रतीपम् ।

(अयि एहि तावत् सुन्दरि कर्णं दत्वा शृणुष्व वचनीयम् ।
तव मुखेन कृशोदरि चन्द्र उपमीयते जनेन ।। इति संस्कृतम् ।)

अत्र मुखेनोपमीयमानस्य शशिनः स्वल्पतरगुणत्वादुपमित्यनिष्पत्त्या 'वअणिज्जम्' इति वचनीयपदाभिव्यङ्ग्यस्तिरस्कारः ।

क्वचित्तु निष्पन्नैवोपमितिक्रियाऽनादरनिबन्धनम् । यथा—

गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि भद्रे ।
सन्तीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि ।।५५५।।

इहोपमेयीकरणमेवोत्पलानामनादरः

अनयैव रीत्या यदसामान्यगुणयोगान्नोपमानभावमप्यनुभूतपूर्वं सहते तस्य तत्कल्पनायामपि भवति प्रतीपमपि प्रत्येतव्यम् ।

उपमानप्रतिकूलत्वादुपमेयस्य प्रतीप इति व्यपदेशः । यदप्युपमानतया प्रसिद्धस्योपमानान्तरप्रतितिष्ठापयिषाऽनादरादुपमानत्वं कल्प्यते तत् पूर्वोक्तगत्या द्वितीयं प्रतीपम् । तथा चोक्तं वामनेन--"उपमानेनाक्षेपश्चायमाक्षेप[1]" इति ।

क्रमेणोदाहरति--**लावण्येति** । अत्र लावण्यनिदानत्वादित्थं वोढुं वर्णनीयो राजैव समर्थं इतीन्दुप्रभृतीनानुपमानानां कैमर्थक्यनिबन्धन आक्षेपः । अत्र यद्यपि यथासंख्यत्वमप्यस्ति, तथापि तदपेक्षयाऽऽक्षेपरूपैव विच्छित्तिश्चारुतरेत्युदाहृतवान् । ए एहीत्यादि ।

"अय्येहि तावत् सुन्दरि कर्णं दत्वा शृणुष्व वचनीयम्[2] ।
तव मुखेन कृशोदरि ! चन्द्र उपमीयते जनेन ।।"

अयीति सम्बोधनमभिमुखीकरणाय । अत्रोपमानत्वेन प्रसिद्धस्य चन्द्रमसो निकर्षार्थमुपमेयत्वं कल्पितम् । वदनस्य चोपमानत्वविवक्षात्र प्रयोजिका ।

क्वचित् पुनर्निष्पन्नमेवौपम्यमनादरकारणम् । यथा—**गर्वमित्यादि** । असंवाह्यं गुरुतरं भद्र इति वाच्यं चिन्त्यम्[3] । अत्रोत्कर्षभाज उपमानस्य प्रादुर्भाव एव न्यक्कारकारणम् । अनयैव रीत्येति । अनेन बहुप्रकारेण वैचित्र्यं सम्यग् दर्शितम्,

---

१. इत्थमस्यापेक्षलङ्कारात् प्राचीनतरैर्वामनप्रभृतिभिः स्वीकृताद् नवीनतरैर्मूलकृदादिभिरुट्टङ्कितान्च भेदः । नवीनमतेऽस्य प्रतीपमिति संज्ञा यथाऽत्र दर्शिता । वामनसूत्रस्योपमानस्याक्षेपतः प्रपिपत्तिरिति वृत्तौ विशदेनेन नवीनानाँ समासोक्तिरुद्दिष्टा । आक्षेपः सामर्थ्यादाकर्षणमित्यभिनवगुप्तरस्तन्मतानुशीलनम् । (द्रष्टव्यं ध्वन्यालोकलोचनम्) ।

२. वचनीयं बाक्यम् । अथ च तन्त्र तो निन्दापि ।

३. अधिक्षेपणतयाऽस्य संबोधनस्येति यावत् । 'भद्र' इत्यत्र 'मुग्ध' इति पाठे कैश्चित् स्वीकृते सर्वं सुस्थं स्यात् ।

यथा—

अहमेव गुरुः सुदारुणानामिति हालाहल तात मा स्म दृप्यः ।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनानाम् ॥५५६॥

अत्र हालाहलस्योपमानत्वमसम्भाव्यमेवोपनिबद्धम् ।

२०२ प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया ।
ऐकात्म्यं बध्यते योगात् तत सामान्यमिति स्मृतम् ॥१३४

अतादृशमपि तादृशतया विवक्षितुं यदप्रस्तुतार्थेन संस्पृक्तमपरित्यक्तनिजगुणमेव तदेकात्मतया निबध्यते तत् समानगुणनिबन्धात् सामान्यम् । उदाहरणम्—

मलयजरसविलिप्तनवो नवहारलताविभूषिताः
सिततरदन्तपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः ।
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः
प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः ॥५५७॥

अत्र प्रस्तुततदन्ययोरन्यूनानतिरिक्ततया निबद्धं धवलत्वमेकात्मताहेतुः । अत एव पृथग्भावेन न तयोरुपलक्षणम् । यथा वा—

तेनोपमानस्योपमेयताऽभिधानं विनाऽर्थकल्पनयाऽत्र प्रतिपादनमपि प्रतीपम् । यथा—"वदनमिदं सममिन्दोः सुन्दरमपि ते[1]" इत्यादि । हेयत्वकल्पना प्रतीपमेव । यथा अहमित्यादि । गुरु प्रधानम् । सुदारुणानां सम्प्रयुक्तदोषत्वादसम्भाव्यमानोपमानत्वमप्युपमेयत्वेन निबद्धम् ।

प्रस्तुतस्येति । गुणाःशुक्लादिधर्माः । अपरित्यक्तनिजगुणमेवेति तद्गुणादस्य विशेषं दर्शयति । अत्रैकस्य स्वगुणपरिहारात् तदेकात्मता । भेदानध्यवसायादेकरूपत्वं समासकृत्तद्धितेषु सम्बन्धोऽभिधाननिमित्तमिति समानत्वसम्बन्धभेदात् सामान्यम्[2] । न चेदमपह्नुतिः, किञ्चिन्निषिध्य कस्यचिद्प्रतिष्ठापनात् । मलयजेत्यादि । सिततरदन्तपत्रं शङ्खताटङ्कः । अत्र मलयजरसविलेपनादीनां

---

१. उपमानस्योपमेयताऽनुकम्पामात्रप्रतिपादनमस्ति प्रतीपम् । यथा—
"वदनमिदं सममिन्दोः सुन्दरमपि ते कियच्चिरं न भवेत् ।
मलिनावधःकपोलौ लोचनसलिलं हि कज्जलवत् ॥"
इत्याकरग्रन्थे रुचककृतकाव्यप्रकाशसङ्केते प्रस्तुतोपयोगी पाठः । स च प्रतोपप्रतिपत्तिपरः ।

२. एतच्च चतुष्टये स्थितं कातन्त्रीयमतानुवादि । पाणिनीये तु 'परार्थाभिधानं वृत्तिः इत्यादिप्रकारेणानुशिष्टश् ।

वेत्रत्वचा तुल्यरुचां वधूनां कर्णाग्रतो गण्डतलागतानि ।
भृङ्गाः सहेलं यदि नापतिष्यन् कोऽवेदयिष्यन्नवचम्पकानि ।।५५८।।

अत्र निमित्तान्तरजनिताऽपि नानात्वप्रतीतिः प्रथमप्रतिपन्नमभेदं न व्युदसितुत्सहते, प्रतीतत्वात् तस्य, प्रतीतेश्च बाधायोगात् ।

२०३ विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः ।
एकात्मा युगपद् वृत्तिरेकस्यानेकगोचरा ।।१३५।।
अन्यत् प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः ।
तथैव करणं चेति विशेषस्त्रिविधः स्मृतः ।।१३६।।

प्रसिद्धाधारपरिहारेण यदाधेयस्य विशिष्टा स्थितिरभिधीयते स प्रथमो विशेषः । यथा—

दिवमप्युपयानानामाकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वन्द्याः ।।५५९।।

एकमपि वस्तु यदेकेनैव स्वभावेन युगपदनेकत्र वर्तते स द्वितीयः ।

यथा—

सा वसइ तुज्झ हिअए सा च्चिअ अच्छीसु सा अ सवणेसु ।
अह्मारिसाण सुन्दर ओआसो कत्थ पावाणं ।।५६०।।
(सा वसति तव हृदये सैवाक्षिषु सा वचनेषु ।
अस्मादृशीनां सुन्दर अवकाशः कुत्र पापानाम् ।।
इति संस्कृतम् ।)

यदपि किञ्चिद् रभसेनारभमाणस्तेनैव यत्नेनाशक्यमपि कार्यान्तरमारभते सोऽपरो विशेषः । यथा—

चन्द्रप्रभया सहाविभाव्यतां गता इत्यादि भेदप्रतीतिर्दर्शिता । यथा वा वेत्रत्वचेत्यादि । पूर्वोदाहरणाद्विशेषं दर्शयति—प्रतीतेश्चेति । नहि ज्ञानमज्ञानं भवतीति ।

विना प्रसिद्धमिति । इहाधारमन्तरेणाधेयं न वर्तत इति यत् परिहारेणाधेयस्योपनिबन्धः स एको विशेषालङ्कारः । दिवमित्यादि । अत्र कवीनामाधाराणामभावेऽप्याधेयानां गिरामवस्थितिः । रमयन्तीत्यत्र भावो विषयार्थ इति विषयत्वेन तेषामाधारत्वात् ।

द्वितीयो यथा—सा वसइ इत्यादि । "सा वसति तव हृदये सैवाक्षिषु सा च श्रवणयोः । अस्मादृशानां सुन्दर अवकाशः कुत्र पापानाम् ।।" अत्रैकस्या एव

स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजताऽनवद्यविद्यम् ।
विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च ।।५६१।।

यथा वा—

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां बत किं न मे हृतम् ।।५६२।।

सर्वत्रैवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते, तां विना प्रायेणालङ्कारत्वायोगात् । अत एवोक्तम्—

"सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ।।" इति ।

२०४ स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत् ।
वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः ।।१३७।।

वस्तु तिरस्कृतनिजरूपं केनापि समीपगतेन प्रगुणतया स्वगुणसम्पदोपरक्तं तत्प्रतिभासमेव यत्समासादयति स तद्गुणस्तस्याप्रकृतस्य गुणोऽत्रास्तीति ।

उदाहरणम्—

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या ।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः ।।५६३।।

योषितो हृदयादौ युगपदवस्थानम् । स्फुरदित्यादि । अत्र रभसेन त्वां सृजतो विधेस्तेनैव प्रयत्नेनासम्भाव्यमानं भुवि मनोभुवः सवितुर्बृहस्पतेश्च कारणं निबद्धमिति लोकोत्तरवस्तुसम्पादनरूपोऽर्थं विशेषः ।

संहारे[1] यथा—गृहिणीत्यादि । मिथःसखी रहस्यसखी । अत्रैकामेव नायिकां हरता मृत्युना गृहिण्यादिकमनेकप्रकारं वस्तु हृतमिति विशेषोक्तिः । अतिशयोक्तिश्च सर्वप्राणितमित्युक्तमेव[2] ।

स्वमुत्सृज्येति । यत्र परिमितगुणस्य वस्तुनः समीपवर्तिप्रकृष्टगुणेन स्वीकरणं तस्योत्कृष्टगुणस्य गुणा अस्मिन्निति कृत्वा । न चेदं मीलितम् । तत्र हि प्रकृतं वस्तु वस्त्वन्तरेणाच्छादितत्वेन प्रतीयते । इह त्वपह्नुतस्वरूपमेव प्रकृतं वस्तु वस्त्वन्त-

---

१. परमानन्दचक्रवर्तिप्रभृतय एतदेव श्रीधरदर्शितं विवरणमनुसरन्ति ।

२. यस्या उपष्टम्भे "सैषा वक्रोक्तिः" इति भामहवचने वक्रोक्तिरतिशयोक्तिः ।

"अलङ्कारान्तराणामप्येकमाहुः परायणम् ।
वागीशमहितामुक्तिमिमामतिशयाह्वयाम् ।।" इति दण्डी ।

अत्र रवितुरगापेक्षया गरुडाग्रजस्य तदपेक्षया च हरिन्मणीनां प्रगुण-वर्णना।

२०५ तद्रूपाननुहारश्चेदस्य तत् स्यादतद्गुणः।

यदि तु तदीयं वर्णं सम्भवन्त्यामपि योग्यतायामिदं न्यूनगुणं न गृह्णीयात् तदा भवेदतद्गुणो नाम। उदाहरणम्—

धवलोऽसि जइ वि सुन्दर तह वि तुए मज्झ रञ्जिअं हिअअं।
राअभरिए वि हिअए सुहअ णिहित्तो ण रत्तोऽसि॥५६४॥

अत्रापि रक्तेनापि मनसा संयुक्तो न रक्ततामुपगत इत्यतद्गुणः। किञ्च तदित्यप्रकृतमस्येति च प्रकृतमत्र निर्दिश्यते। तेन यदप्रकृतस्य रूपं प्रकृतेन कुतोऽपि निमित्तान्नानुविधीयते सोऽतद्गुण इत्यपि प्रतिपत्तव्यम्। यथा—

गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः।
राजहंस! तव सैव शुभ्रता चीयते न च न चापचीयते॥५६५॥

रगुणोपरक्ततया प्रतीयत इत्यनयोर्भेदात्। विभिन्नेत्यादि। गरुडाग्रजोऽरुणः। रथे साधवो रथ्याः। सूर्यस्येत्युक्तेरश्वप्रतीतिः। करीरमङ्कुरः वंशपदसमभिव्याहारात्तु तत्सम्बन्धोऽत्राधिकृतः। स एवात्र नीलः प्रतीयते। अत्र रविरथाश्वानामरुणबर्ण-स्वीकारः, तस्यापि गारुत्मतमणिप्रभास्वीकार इति तद्गुणत्वम्।

तद्गुणप्रस्तावात् तद्विपर्ययरूपमतद्गुणं कथयति—तद्रूपेति। इह न्यूनगुणस्यो-त्कृष्टगुणपदार्थस्वीकारः प्रत्यासत्त्या न्याय्यः। यत् पुनरुत्कृष्टगुणसन्निधानेन योग्य-तायामपि तद्रूपस्याननुहरणं न्यूनगुणेनाननुवर्तनं भवति सोऽतद्गुणः, तस्योत्कृष्टस्य गुणा अस्मिन् सन्तीति।

"धवलोऽसि यद्यपि सुन्दर तथापि त्वया मम रञ्जितं हृदयम्।
रागभृतेऽपि हृदये सुभग निहितो न रक्तोऽसि॥"

धवलो धुरन्धरबृषः कामुकश्च। रञ्जितं जनिताभिष्वङ्गं रागप्रसक्तिरपि।

अत्र पूर्वार्धे विरोधो न तूत्तरत्र, भिन्नाधारतयैव रक्तारक्तयोः प्रतीतेः। तेनातिरिक्तहृदयसम्पर्कात् कामुकस्य धवलपदवाच्यस्य प्राप्तमपि रक्तत्वं निष्पन्न-मित्यतद्गुणः। किञ्चेति। स्फीततमोऽपि गुणो गुणान्तरसम्पर्केण किञ्चिदन्यथात्वं गतो दृष्टः। यदा तु न गच्छति तदाप्यतद्गुण इति प्रकारान्तराश्रयणम्। गाङ्ग-मिति। अत्राप्रकृतस्य गङ्गायमुनाजलसम्पर्केऽपि हंसस्य प्रकृतस्य न तद्रूपतेत्यय-मप्यद्गुणः। अङ्गेत्यभीष्टामन्त्रणे। सैव नान्यादृसी या न चीयत इत्यध्याहृतेन यच्छब्देन योजना]

[इति समाधिलक्षणात् प्रभृत्येतदन्तस्य विवरणं चण्डीदासमातृकयोर्द्वयोरे-बादर्शनात् काव्यप्रकाशविवेकतो दीयते।]

२०६ यद्यथा साधितं केनाप्यपरेण तदन्यथा ।।१३८।।

तथैव यद् विधीयेत स व्याघात इति स्मृतः ।

येनोपायेन यदेकेनोपकल्पितं तस्यान्येन जिगीषुतया तदुपायकमेव यदन्यथाकरणं स साधितवस्तुव्याहतिहेतुत्वाद् व्याघातः । उदाहरणम्—

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः ।।५६६।।

२०७ सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः ।। १३९

एतेषां समनन्तरमेवोक्तस्वरूपाणां यथासम्भवमन्योन्यनिरपेक्षतया यदेकत्र

---

[१]यदाह वृत्तिकृत्—तदुपायकमेवेति व्याघातनाम निर्वक्ति । साधितवस्तुव्याहतिहेतुत्वादिति विजिगीषुव्यापारस्येति शेषः । यद्वा साधितवस्तुव्याहतिर्हेतुर्मूलं यस्यालङ्करणस्य तस्य भावस्तत्त्वम्, तस्मात् । व्याहतिरेव हि वैचित्र्याश्रयेण व्याघातनामाऽलङ्कारः ।

एवं शब्दार्थयोरलङ्कारान् विविच्य तेषां परस्परयोगे बद्धनिचितहिरणमयाङ्गद वदधिकं रम्यत्वमुल्लसतीति सोऽपि पृथगलङ्कारतया वाच्यस्तेषां च सम्पर्क उद्भटभेदानां चेति द्विधा, तत्र प्रथमं संसृष्टिनाम्ना व्यवह्रियत इत्याह—**सेष्टेति** ।

ननु यदि तेषां सम्पर्के भिन्नालङ्कारता तदा विभिन्नवर्णैत्यादावनेकालङ्कारसम्भेदादिरूपेणोदाहरणं युज्यत इति चेत्, सत्यम्, सम्पर्कस्यैव पृथगलङ्कारता, सम्पर्किणां तु प्रातिस्विकस्वभावपरित्याग एव । संसृष्टावङ्गाङ्गिभावैकाश्रयानुप्रवेशेषु सन्देहहेतुसन्दिह्यमानयोश्च विश्रान्तिविरहादेव न पृथगवस्थानसम्भवः । अङ्गाङ्गितायामपि स्वातन्त्र्येण विश्रान्तिविरह इति चेत्, न, तत्र स्वरूपस्थितेरभावाद् ।

केवलप्रादुष्कार्यप्रकर्षमनालम्बप्रतीतेर्विश्रामविरह इति 'अविश्रामजुषामात्मनि' इत्युच्यते । वस्तुतस्त्वस्त्येवाङ्गस्याङ्गिनश्च तदपेक्षस्य स्वरूपविश्रामः । एतच्च

---

१. अत्र चण्डीदासकृतं प्रकृतसूत्रव्याख्यानांशे मन्तव्यमपेक्षितं भवतीति प्रागेवावेदितम् । उदाहरणान्तरं यथा—

"तव करकमलस्थां स्फाटिकीमक्षमालां नखकिरणविभिन्नां दाडिमीबीजबुद्धया ।
अनुकलमनुकर्षन् येन कीरो निरुद्धः स भवतु मम भूत्यै वाणि ते मन्दहासः ।।

इति कमलाकरस्य कवेर्भ्रान्तिमदलङ्कारस्थले तदीयोदाहरणे । परं न तु भ्रान्तिमदंशे तद्गुणस्पर्शो यतो भ्रान्तिमति स्मर्यमारोपो इत्यस्ति विशेष इति केषामपि मतमुद्धतमलङ्कारकौस्तुभे विश्वेश्वरपण्डितैः ।

शब्दभागे एवार्थविषय एवोभयत्रापि वाऽवस्थानं सैकार्थसमवायस्वभावा संसृष्टिः ।

तत्र शब्दालङ्कारसंसृष्टिर्यथा—

कुसुमसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसम्भृतशोभया ।
चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशाऽन्यया ।।५६७।।

अर्थालङ्कारसंसृष्टिस्तु—

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ।।५६८।।

पूर्वत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टिं प्रयोजयतः, उत्तरत्र तु तथाविधे उपमोत्प्रेक्षे । शब्दार्थालङ्कारयोस्तु संसृष्टिः—

सो णत्थि एत्थ गामे जो एअं महमहन्तलाअण्णं ।
तरुणाण हिअलूडि परिसक्कन्तीं णिवारेइ ।।५६९।।
(स नास्त्यत्र ग्रामे य एनां महमहायमानलावण्याम् ।
तरुणानां हृदयलुण्ठाकीं परिष्वक्कमाणां निवारयति ।। इति संस्कृतम्)

वृत्तिकृदेव सचेतसां प्रभूततरचमत्कृति[1]निमित्तमिति वदन् स्फुटयिष्यति । उक्तस्वरूपाणां[2] लक्षितस्वरूपाणामलङ्काराणां शब्दगतानामर्थगतानां च । यथासम्भवमिति लक्ष्यप्रसिद्धिमनुसरति । भेदेनेत्यस्य विवरणमन्योन्यनिरपेक्षतयेति । आश्रयतः स्वरूपतश्चेति शेषः । अत्राश्रयत इत्यनेनैकपदसमावेशलक्षतैकाश्रयानुप्रवेशसङ्करव्युदासः, स्वरूपत इत्यङ्गाङ्गिभावस्य व्यवच्छेदः । शब्दभाग इति । तथाविधार्थे विशिष्टात्मनः काव्यस्य शब्दरूपे विशेषात्मनि भागे स्वांश इत्यर्थः । एतच्च शब्दालङ्काराणां संसृष्टिग्रहणपरम्, अर्थविषय एवेत्यर्थालङ्काराणाम् । उभयत्रेति । शब्दालङ्कृतेरर्थालङ्कृतेश्चोभयालङ्काराणां वा लाटानुप्रासप्रभृतीनामवस्थानं विश्रान्तिरिति सन्देहसङ्करतिरस्कारः । एकार्थसमवायस्वभावेत्येकस्मिन्नेव विशिष्टात्मनि काव्ये समाश्रितभावात्मिकेत्यर्थः ।

कुसुमेत्यादौ[3] परिभ्रमद्भ्रमरेत्यनुप्रासः, कलकलोलकलोल इति यमकम् । अनुप्रासयमकयोश्च कलोऽलकलोल इति साधारणाश्रयतया न संसृष्टिः, किन्तु तृतीय-

---

१. तिमित्तं वदन्निति ख. पु. पाठः ।

२. उक्तस्वभावानामिति ख. पु. पाठः ।

३. 'वदनसौरभ' इति रुचककृतेऽलङ्कारसर्वस्वे काव्यप्रकाशटीकाकृद्भिरनेकैश्च स्वस्वटीकासु गृहीतः पाठः । शिशुपालवधादुद्धृतोऽयं श्लोकः । तत्र वल्लभमल्लिनाथादयो व्याख्यातारोऽपि तथा पठन्ति । वदनसौरभे पद्मिन्या नायिकाया मुखसौगन्ध्यलोभेनाभिलाषेति विवृतिः

अत्रानुप्रासो रूपके चान्योन्यानपेक्षे, संसर्गश्च तयोरेकत्र वाक्ये छन्दसि वा समवेतत्वात् ।

२०८ अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु सङ्करः ।

एत एव यत्रात्मन्यनासादितस्वतन्त्रप्रभावात् परस्परमनुग्राह्यानुग्राहकतां दधति स एषा संकीर्यमाणस्वरूपत्वात् सङ्करः । उदाहरणम्—

आत्ते सीमन्तरत्ने मरकतिनि हृते हेमताटङ्कपत्रे
लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते ।
शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये
राजन् गुञ्जाफलानां स्रज इति शबरा नैव हारं हरन्ति ॥५७०॥

सङ्कर एव । परस्परनिरपेक्षाविति पूर्वानुसारेण योज्यम् । तथाविधे परस्परनिरपेक्षे । शब्दार्थालङ्कारयोरिति । एकस्य शब्दालङ्कारस्यापरस्यार्थालङ्कारस्येत्यर्थः । महमहन्तेति प्रतिक्षणं नवनवीभवदित्यर्थः । हिअअलूडि हृदयाध्वन्यां[1] महती सहृदयहृदयव्यामोहिनीमित्यर्थः । भूमिमिति पाठे परस्परस्पर्धाबन्धमित्यर्थः । परिसक्कन्तीम् अनुरूपं रमणमनासाद्येतस्ततः प्रसरन्तीम् । णिवारेइ स्वायत्तीकृत्य पुरुषान्तरप्रसङ्गाद् व्यावर्तयति । अनुप्रास इति । णत्थि एत्थेति । रूपकं हिअअलूडिमिति ।

ननु अत्यन्तं विरहविषयत्वात्[2] कथमनयोः संसृष्टिरित्याह–संसर्गश्चेति । वाक्ये परस्परमव्याहतपदपदार्थात्मनि । यत्तच्छब्दापेक्षयाऽवान्तरवाक्यभेदमाश्रित्याह— छन्दसीति । पद्य इत्यर्थः । एतेनैवम्भूतमिश्रीभावे संसृष्टिः, अत्यन्तप्रसन्नतायां तु सङ्कर एवेति । सूचितम् । अनयैव दिशा भिन्नयोरुभयालङ्कारयोः शब्दोभयालङ्कारयोरर्थोभयालङ्कारयोश्चैतेषु प्रकारेषु बह्वलङ्कारसंसृष्टावुदाहृतिर्मृग्या ।

आत्मन्यनासादितस्वतन्त्रभावात्[3], अङ्गस्य चारुत्वोत्कर्षार्थमङ्ग्य[4]पेक्षणात्, आत्मनश्च आत्मलाभार्थं तदपेक्षणादित्यर्थः । परस्परमनुग्राह्यानुग्राहकतां दधतीति । अङ्गनिष्पादनद्वाराऽङ्गिनमनुगृह्णन्ति । अङ्गी च चारुत्वप्रकर्षणद्वाराङ्गमिति भावः । संकीर्यमाणेति । परस्परानुयुज्यमानेत्यर्थः । लुप्तायाम् आच्छिन्नायाम् । तुलाकोटौ नूपुरे । इत्वरीणामिति सृजीणनशां [5]क्वरप् । परितो गमनशीलानामित्यर्थः । गुञ्जाफलानां गुञ्जाबीजानाम् । प्रादुर्भूतमिति । आत्मलिङ्ग इत्यर्थः । प्रभूता

---

१. हृदयाध्वन्यामिति ख पुस्तके नास्ति ।
२. एवमुभयोरेव मातृकालिप्यो पाठः । 'विषमविषयत्वात्' इति पाठः स्यात् ।
३. '····स्वतन्त्रभावा' इति प्रायिक, णाठः ।
४. '····कर्षार्थमव्याङ्ग्यापेक्षणादिति ख पुस्तके पाठः, स चामनोरमः ।
५. कातन्त्रे कृत्प्रत्ययप्रकरणे २९३ सूत्रम् ।

अत्र तद्गुणमपेक्ष्य भ्रान्तिमता प्रादुर्भूतम्, तदाश्रयेण च तद्गुणः सचेतसां प्रभूतचमत्कृतिनिमित्तमित्यनयोरङ्गाङ्गिभावः । यथा वा—

जटाभाभिर्भाभिः करधृतकलङ्काक्षवलयो
वियोगिव्यापत्तेरिव कलितवैराग्यविशदः ।
परिप्रेङ्खत्तारापरिकरकपालाङ्किततले
शशी भस्मापाण्डुः पितृवन इव व्योम्नि चरति ॥५७१॥

उपमा रूपकमुत्प्रेक्षाश्लेषश्चेति चत्वारोऽत्र पूर्ववदङ्गाङ्गिभावतया प्रतीयन्ते । कलङ्क एवाक्षवलयमिति रूपकपरिग्रहे करधृतत्वमेव साधकप्रमाणतां प्रतिपद्यते । अस्य हि रूपकत्वे तिरोहितकलङ्करूपमक्षवलयमेव मुख्यतयाऽवगम्यते, तस्यैव च करग्रहणयोग्यतायां सार्वत्रिकी प्रसिद्धिः । श्लेषच्छायया तु कलङ्कस्य करधारणमसदेव प्रत्यासत्त्योपचर्य योज्यते, शशाङ्केन केवलं कलङ्कस्य मूर्त्यैवोद्व-

---

प्रकृष्टेत्यर्थः । भाभिरिति विशेषणे तृतीया । करो रश्मिः हस्तश्च । अक्षवलयो मण्डलाकारग्रथितरुद्राक्षबीजानि । वियोगिव्यापत्तेरिति मुहुर्मुहुर्भावितायाः इति ज्ञेयम् । वैराग्यमुदयदशादृष्टलौहित्यत्यागो निर्वेदश्च । विशदः शुक्लः प्रशान्तचेतो विकारश्च । परिकरः समूहः भस्मापाण्डुरिति लुप्तोपमा तृतीयया च तत्पुरुषः । पितृवने श्मशाने ।

चत्वारोऽत्र पूर्ववदङ्गाङ्गितया प्रतीयन्त इति । उत्प्रेक्षा वैराग्यविशद इति श्लेषोत्पत्तिहेतुः, तदनुसन्धानादेवार्थान्तरप्रतीतेः । श्लेषस्तु रूपकोपमयोरुत्पत्ति-निदानं निर्वेदप्रतीतावेव जटाक्षवलयधारणप्रतीतिसङ्गतेः । चन्द्रगततया महाव्रति-वृत्तान्तप्रतीतिरूपा समासोक्तिः पुनरमीषां सर्वेषामेव पर्यन्तभूता चारुत्वोत्कर्षहेतुः पञ्चमी सुव्यक्तैवेत्यतस्तामनादाय चत्वार इत्युक्तम् । ननु कलङ्काक्षवलय इति रूपकमुपमा वेति सन्देहात् कथमैकान्तिको रूपकव्यपदेश इति सन्देहसङ्करोदाहृति रूपोऽयं स्यादित्याह—कलङ्क एवेति ।

कथं पुनः करधृतत्वमित्याह —**अस्य हीत्यादि** । तिरोहितकलङ्करूपं स्थगित-कलङ्कस्वात्मभूतभेदमक्षवलयं कलङ्कतादात्म्यानारोपितम् ।

ननु मा भूद् वलयस्य मुख्यतयाऽवभासः, न हि तेन किञ्चित् कलङ्कमस्ती-त्याशङ्क्यान्यथा कलङ्कस्योद्भटत्वप्रतिभासे करधृतत्वमसङ्गतमित्याह—**तस्यै-वेति** । वलयस्यैवेत्यर्थः । ननु कलङ्कस्य करधृत्वमप्रसिद्धया यदि नाद्रियते तदा कर-धृत इत्यादि पदं प्रकृतार्थसम्बद्धमेव स्यात्, तन्त्रे तद्वतोऽक्षबलयस्याभावादित्याह—**श्लेषेति** । छाया लेशः । करधारणमसदेव रश्मिभिरुद्वहनसम्भवमेव । कथं पुनरिदमित्याह—**शशाङ्केनेति** । ननूपमापक्षे कलङ्कस्य चन्द्रेणाक्षवलयस्य महा-

हनात् । कलङ्कोऽक्षवलममिवेति तूपमायां कलङ्कस्योत्कटतया प्रतिपत्तिः । न चास्य करधृतत्वं तत्त्वतोऽस्तीति मुख्येऽप्युपचार एव शरणं स्यात् । एवंरूपश्च सङ्करः शब्दालङ्कारयोरपि परिदृश्यते । यथा--

राजति तटीयमभिहतदानवरासाऽतिपातिसारावनदा ।
गजता च यूथमविरतदानवरा साऽतिपाति सारा वनदा ॥५७२॥

अत्र यमकमनुलोमप्रतिलोमश्च चित्रभेदः पादद्वयगते परस्परापेक्षे ।

२०९ एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः ॥१४०

व्रतिना सम्बन्धः सम्भवति । न च धृतत्वं सम्भवति न कलङ्क इति वाच्यम्, तस्य कलङ्काक्षवलयेति समुदायसम्बन्धिनः प्रत्येकसम्बन्धस्यायत्नसिद्धत्वात् । उपचारः पक्षे कष्टदायी नाश्रितः स्यादित्याशङ्कयते--उपमायामपह्नवेन कलङ्काक्षवलयोः संघटितभावात्मकः समुदायोऽपि न निर्वहतीति कुतः करधृतत्वस्य समुदायसम्बन्धः, कुतस्तरां च तद्द्वारकः प्रत्येकसम्बन्धः । उपचारग्रहश्चात्र केशग्रह इव विमुञ्चतीत्याह--कलङ्क इत्यादि स्यादित्यन्तम् । उत्कटतया भिन्नतया । मुख्येऽपीत्यतः पूर्वं कलङ्कस्य चन्द्रसम्बन्धे सम्भवितयेति च परतश्च कृत इति शेषः । एवंरूपोऽनुग्राह्यानुग्राहकभावात्मकः । इयं तटी स्थली राजति । किम्भूता ? परस्परमभिहतानां विप्रतिपत्तिहतानां दानवानां रासेन संरम्भगर्जितेनातिपातिनोच्छलेन तटमतिक्रान्ताः सारावाः सशब्दनदा यस्याः सा । साऽतिप्रसिद्धा गजता गजसमूहः । अतिपाति अतिशयेन रक्षति । अविरतेन सततप्रवृत्तेन दानेन मदेन वरा श्रेष्ठा । सारा उत्कृष्टा । वनं द्यति खण्डयति वनदा । अलोमप्रतिलोमश्चेति पुंस्त्वपाठे पादद्वयगत इति नपुंसकत्वं समाहारेऽन्यतरस्यामिति[१] नपुंसकपाठे तु स्फुटमेव । परस्परापेक्षे इति यमकनिर्वाहप्रवृत्तस्य कवेः पृथक् प्रयत्ननिर्वर्त्यतयाऽनुलोमप्रतिलोमस्योत्पत्तौ यमकापेक्षिता । यमकञ्चात्र तदाश्रयेणैव दुष्कररीतिवासनावासितानां मनसि कमप्यास्वादिकं परितोषमाधत्त इति प्राचीनानाभिसन्धिः । ग्रन्थकारश्च गौरवेण तानेव प्रमाणीचकार ।

वस्तुतस्तु कविर्यमकनिर्वाहे चित्रनिर्वाहे वा प्रवृत्त इति नास्त्येव निश्चायकम् । अस्तु वा यमकनिर्वाहप्रयत्नादेव चित्रनिर्वाहः, तथापि चित्रोत्पत्तौ न हेतुर्यमकम् । एवं चित्रं यमकोत्पत्तिहेतुरित्यपि नास्ति । आस्वादिकन्तोषदानेऽपि न किमप्यपेक्ष्यमिति विविच्य न बुद्ध्यामहे मानचक्षुषः । यथाहुः--यथा न शब्दयोः परस्परोपकारकत्वं तथा शब्दालङ्कारयोरपीति[२] । न चात्र संसृष्टिर्दूरविषयत्वात् तस्मादे-

---

१. अत्र पाठोऽस्पष्टः । समाहारे नपुंसकत्वं नित्यमेकवच्चान्यतरस्यामिति वैकल्पिकमेकत्वम् । समाहारे नपुंसकता कातन्त्रमतेऽपि नित्या ।

२. एवमुभयोरेव मातृकालिप्यो पाठः ।

द्वयोर्बहूनां वाऽलङ्काराणामेकत्र समावेशेऽपि विरोधान्न यत्र युगपदवस्थानम्, न चैकतरस्य परिग्रहे साधकं तदितरस्य वा परिहारे बाधकमस्ति। येनैकतर एव परिगृह्यते, स निश्चयाभावरूपो द्वितीयः सङ्करः, समुच्चयेन सङ्करस्यैवाक्षेपात्। उदाहरणम्—

जह गहिरो जह रअणणिब्भरो जह अ णिम्मलच्छाओ
तह किं विहिणा एसो सरसवाणीओ जलणिही ण किओ ॥५३७॥

(यथा गभीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः।
तथा किं विधिना एष सरसपानीयो जलनिधिर्नकृतः॥ इति संस्कृतम्)

अत्र समुद्रे प्रस्तुते विशेषणसाम्यादप्रस्तुतार्थप्रतीतेः किमसौ समासोक्तिः, किमब्धेरप्रस्तुतस्य मुखेन कस्यापि तत्समगुणतया प्रस्तुतस्य प्रतीतेरियमप्रस्तुतप्रशंसेति सन्देहः। यथा वा—

नयनानन्ददायीन्दोर्बिम्बमेतत् प्रसीदति।
अधुनाऽपि निरुद्धाशमविशीर्णमिदं तमः॥५७४॥

अत्र किं कामस्योद्दीपकः कालो वर्तते इति भङ्ग्यन्तरेणाभिधानात् पर्यायोक्तम्, उत वदनस्येन्दुबिम्बतयाऽध्यवसानादतिशयोक्तिः किं वा एत-

---

काश्रयानुप्रवेशसङ्कर एव ज्यायान्। यमकस्य चित्रव्यक्तिभ्यां[1] सह द्वितीयपदे तुर्यपादे च दत्तपदत्वात्। अङ्गाङ्गिभावसन्देहयोस्तु सङ्करयोरर्थालङ्कार एव विषयः। तृतीयसङ्करस्य शब्दार्थगततया विजातीयालङ्कृतिमात्रविषयत्वं सजातीयोदाहृतिदर्शनेन विघटयिष्यामः।

समावेशेऽपीति। प्रतिभासमानतयाऽत्यन्तसत्त्वाविरहेऽपीत्यर्थः। यदुक्तम्—

"अनेकालङ्क्रियोल्लेखे समं तद्वृत्त्यसम्भवे।
एकस्योपग्रहे न्यायदोषाभावे च सङ्करः॥" इति।

अवस्थानमवस्थायम्भवो विश्रान्तिसम्भवः। स सन्देहविषयीभूतोऽलङ्कारः परिगृह्येत व्यवस्थिततया स्वीक्रियेत। समुच्चयेन प्रतिभासमानतया द्वयोरप्यत्यन्ताभावविरहेण। आक्षेपादर्थसिद्धत्वात्। सरसवाणीओ सुस्वादपानीयः कोमलवाणीकश्च। अत्र प्रकरणाद्यनिश्चयाद् द्वावपि समासोक्त्यप्रस्तुतप्रशंसाऽलङ्कारावुल्लिख्येते। न चैकतरनिर्धारणेऽस्ति किञ्चित् प्रमाणम्।

वस्तुतः पुनः समुद्रपुंसोरेकतरस्य प्रस्तुतत्वाद् द्वयोरलङ्कृत्योर्नास्ति वृत्तिः। सन्देहश्चायं नित्य एवेति नैकतरविश्रान्तिरित्याह—इतरस्य कस्यापि तत्समगुणतया समुद्रसमानधर्मतया प्रतीतेरित्यन्वयः।

---

१. एवमुभयोरेव मातृकालिप्यो पाठः। समाधानमेवम्—अनुलोमा एका व्यक्तिः, प्रतिलोमा द्वितीया।

दिति वक्त्रं निर्दिश्य तद्रूपारोपवशाद् रूपकम्, अथवा तयोः समुच्चयविवक्षायां दीपकम्, अथवा तुल्ययोगिता, किमु प्रदोषवर्णने विशेषणसाम्यादानन्दस्यावगतौ समासोक्तिः, आहोस्विन्मुखनैर्मल्यप्रस्तावादप्रस्तुतप्रशंसेति बहूनां सन्देहादयमेव सङ्करः ।

यत्र तु न्यायदोषयोरन्यतरस्यावतारस्तत्रैकतरस्य निश्चयान्न संशयः । न्यायश्च साधकत्वमनुकूलता । दोषोऽपि बाधकत्वं प्रतिकूलता । यत्र—

सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिः ।५७५।।

इत्यत्र मुख्यतयाऽवगम्यमाना हासद्युतिर्वक्त्रे एवानुकूल्यं भजत इत्युपमायाः साधकम्, शशिनि तु न तथा प्रतिकूलेति रूपकं प्रति तस्या अबाधकता ।

वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्यतः ।।५७६।।

इत्यत्रापरत्वमिन्दोरनुकूलं न तु वक्त्रस्य प्रतिकूलमिति रूपकस्य साधकतां प्रतिपद्यते न तूपमाया बाधकताम् ।

द्वयोः सन्देहमुदाहृत्य बहूनामुदाहरति—**यथा वेति** । निरुद्धाशं स्थगितसकलदिशम् । तमोऽन्धकारं वियोगः व्यामोहो वा । अतिशयोक्तिपक्षे आरोपविषयं वदनं निगीर्यावस्थितस्येन्दुरित्यस्य विशेषणमेतदिति तद्रूपारोपवशाद् इन्दुबिम्बरूपारोपविषयत्वात् । तद्रूपवशादिति पाठे तु नेत्रेषु बिम्बेन रूपवशादारोपवशादित्यर्थः । समुच्चयविवक्षायां प्रसीदतीत्येकक्रियासंवलिततया द्वयोर्विशकलितयोः समावेशविवक्षायाम् । अत्राप्येतदिति वक्तुं निर्दिश्येत्यनुषज्यते । दीपकमेकस्य प्राकरणिकत्वेऽपरस्याप्राकरणिकत्वे । तुल्ययोगिता वर्ण्यमानवस्त्वन्तरङ्गतया द्वयोरप्यप्रकृतत्वेन । प्रदोषवर्णन[1] इति । चन्द्रबिम्बस्य प्रकृतत्वमभिप्रेत्य । मुखनैर्मल्येत्यनन्तरं वर्णनेति शेषः ।

न्यायदोषशब्दौ करणसिद्धौ, अन्यथा साधकत्वमित्यादिना सामानाधिकरण्यानुपपत्तिः साधकत्वबाधकत्वयोर्विवृत्तिः । अनुकूलता प्रतिकूलतेति । मुख्यतयाऽवगम्यमाना, उपमेयतया निबद्धत्वात् । न तथा प्रतिकूलेति । तस्या असम्भवेऽपि तत्प्रतिकूलज्योत्स्नासम्भवात् अपरत्वमिन्दोरनुकूलमिति । वक्त्ररूपे एकस्मिन्निन्दौ किमपरेणेन्दुनेति प्रतिभासात् । न तु वक्त्रस्य प्रतिकूलमिति । इन्दुसामान्यगुणे तव वक्त्रे सति किमपर इन्दुरुदित इत्यपि प्रतिभासेऽन्ततोऽसङ्गत्यभावात् । सदृशं राजानम् । असम्भवादनुपादानाद् लक्ष्म्यालिङ्गनस्यानुपपत्तेश्चेति शेषः । **रूपकस्य बाधकमिति** । उपमाया उत्कटभेदतया स्वतन्त्रतया प्रतीतेन पादेन

---

१. प्रदोषसमन इति क्वाचित्कः पाठः । प्रदोषवर्णनं प्रस्तुतमिति श्रीविद्याचक्रवर्तिनोऽपि ।

राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम् ॥५७७॥

इत्यत्र पुनरालिङ्गनमुपमां निरस्यति, सदृशं प्रति परप्रेयसीप्रयुक्तस्यालिङ्गनस्यासम्भवात्।

पादाम्बुजं भवतु नो विजयाय मञ्जु-
मञ्जीरशिञ्जितमनोहरमम्बिकायाः।[१] ५७८

इत्यत्र मञ्जीरशिञ्जितमम्बुजे प्रतिकूलमसम्भवादिति रूपकस्य बाधकम्, न तु पादेऽनुकूलमित्युपमायाः साधकमभिधीयते, विध्युपमर्दिनो बाधकस्य तदपेक्षयोत्कटत्वेन प्रतिपत्तेः। एवमन्यत्रापि सुधीभिः परीक्ष्यम्।

२१० स्फुटमेकत्र विषये शब्दार्थालङ्कृतिद्वयम्। व्यवस्थितञ्च

अभिन्न एव पदे स्फुटतया यदुभावपि शब्दार्थालङ्कारौ व्यवस्थां समासादयतः सोऽप्यपरः सङ्करः। उदाहरणम्—

मञ्जीरशिञ्जितसम्बन्धः सम्भवति, रूपके तु भेदस्थगनेनाच्छादितनिजस्वरूपेण पादेनाम्बुजतया प्रतीतौ न सम्भवति तत्सम्बन्ध इति भावः।

ननु यथा मञ्जीरशिञ्जितमम्बुजसम्भावनरूपकबाधकम्, तथा पादसम्भावनोपमासाधकमपि तत् कथं रूपकबाधकमात्रं तस्योक्तमित्याह—**न त्विति**। विध्युपमर्दिन इति। विधीयत इति विधिः कार्यं तदुपमर्दिनस्ततो बलीयसः।

एतदुक्तं भवति—मञ्जीरशिञ्जितस्य पादसम्भवमात्रेण नोपमा निश्चेतुं शक्यते यावदम्बुजेत्यत्र तद्विरहो न प्रतीयत इति। यद्वा बाधक एव प्रथमं बुद्धिमारोहति तन्मुखेनैव व्यपदेश इति। तदिदमाह—तदपेक्षया साधकापेक्षया, उत्कटत्वेन प्रतिपत्तेः प्रतीतेरिति।

स्फुटं व्यवस्थितमिति सन्देहव्यवच्छेदः। एकत्र विषय इति विवृणोति—**अभिन्ने पद** इति। पदशब्दश्चात्रोपलक्षणार्थः क्वचिदपि 'पादेऽपि[२] दृष्टः। एकस्मिन्नपृथग्भूते विषय इत्यपि पाठे विवरणार्थं एव। शब्दार्थालङ्काराविति शब्दार्थस्यालङ्कारार्थस्यालङ्कारौ। शब्दस्यैकोऽलङ्कारोऽर्थस्यापर इति द्विधाऽर्थः। तेन कश्चिद् (क्वचित्) यथाश्रुतदूषणेऽपि न क्षतिः, दूरस्यानभिज्ञानात्।

---

१. पञ्चस्तव्यां घटस्तवे प्रथमश्लोकस्योत्तरार्धमिदम्। पूर्वार्धं तु—"आनन्दमन्थरपुरन्दरमुक्तमाल्यं मौलौ हठेन निहितं महिषासुरस्य"।

२. "पदं व्यवसितत्राणस्थानलक्ष्म्याङ्घ्रिवस्तुषु।" अङ्घ्रिः पादः। क्वचिद् यथा छन्दोनिबन्धेषु।

स्पष्टोल्लसत्किरणकेसरसूर्यबिम्ब-
विस्तीर्णकर्णिकमथो दिवसारविन्दम् ।
श्लिष्टाष्टदिग्दलकलापमुखावतार-
बद्धान्धकारमधुपावलि सञ्चुकोच ॥५७९॥

अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ ।

तत्राद्ये यथा--

"विरचिता मधुनोपवनश्रियामभिनवादवपत्रविशेषकाः ।
मधुलिहां मधुदानविशारदाः कुरवका रवकारणतां ययुः ॥"

अत्र रवका रवका इति यमो यथा वरकाराद्यावाराशयापेक्षा[1] ।

द्वितीये यथा--

"अहिणअपओअरसिएसु पहिअसामाइएसु दिअहेसु ।
सोअइ पसारिअगीआण णच्चिअं मोरविन्दोश्णाणं ॥"

अत्र पथिकश्यामायितेत्युपमा । पथिकसामाजिकेष्विति च रूपकम् । पहिअसामाइएसु इत्येकाश्रयानुप्रविष्टे ।

तृतीयमुदाहरति--स्पष्टेति । ऊषा[2] रात्रिस्तस्या अवतार आविर्भावः । बद्धेति सन्निरुद्धेति । सञ्चुकोच संक्षिप्तमासीत्, निमिमीलेति यावत् । एकपदेति समासे विभक्तिलोपेन पृथक्पदत्वखण्डनात्, आश्रयार्थो वा पदशब्दः । रूपकाऽनुप्रासौं । किरणकेसरसूर्यबिम्बेति विस्तीर्णकर्णिकेति श्लिष्टाष्टदिग्दलकलापबद्धान्धकारमधुपावलीति च व्यक्तिभेदेनावस्थितौ ।

अत्र स्फुटमेकत्र विषय इति कारिकास्थाने एकत्राभिन्ने च पद इति पाठं निक्षिप्य तदनुकारिणीमेव वृत्तिमामनन्तः केचिद् भिन्नपदेऽप्यलङ्कारद्वयावस्थानसङ्करमेनं वाञ्छन्ति । सो णत्थि एत्थेत्येव च तदुदाहरणमित्याहुः[3], तदसत् संसृष्टिपार्थक्याभावात् । अत्र हि रूपकानुप्रासौ संसृष्टाविति पूर्वमेवोक्तम् ।

---

१. अत्र यमकसर्गे रघुवंशेऽनुप्रासयमकयोर्विजातीययो शब्दालङ्कारयोः संसृष्टिः । यमष्वकाद्यन्तेभ्यवारोपापेक्षीति ख पाठः । एवमादौ यमक एव कवयितुः संरम्भातिशयः स्यात् । यमकस्य प्राधान्यमनुप्रासस्य तदङ्गत्वं च ।

२. उषावतारेति काश्मीरीयाणां पाठः । उषाऽवतारः प्रदोषः । अवतरत्यस्मिन्निति कृत्वेत्यलकटीकायाम् ।

३. एतत् खल्वलङ्काररत्नादीनां मतस्यानुसरणम् । ये संसृष्टिं सङ्करतो व्यतिरिक्तां न सहन्ते । परं तन्मतं विचारासहमिति जयरथोऽलङ्कारविमर्शिन्यां प्रतिपेदे । तत एवैतदालोचनमवलौकनीयम् ।

२११ तेनासौ त्रिरूपः परिकीर्तितः ।।१४१।।

तदयमनुग्राह्यानुग्राहकतया सन्देहेनैकपदप्रतिपाद्यतया च व्यवस्थितत्वात् त्रिप्रकार एव सङ्करो व्याकृतः । प्रकारान्तरेण तु न शक्यो व्याकर्तुम् **आनन्त्यात्तत्प्रभेदानामिति प्रतिपादिताः** शब्दार्थोभयगतत्वेन त्रैविध्यजुषोऽलङ्काराः ।

कुतः पुनरेष नियमो यदेतेषां तुल्येऽपि काव्यशोभातिशयहेतुत्वे कश्चिदलङ्कारः शब्दस्य कश्चिदर्थस्य कश्चिच्चोभयस्येति चेत्, उक्तमत्र यथा काव्ये

'मुरारिनिर्गता नूनं नरकस्य विरोधिनी ।
तत्रापि मूर्ध्नि गङ्गेव चक्रधारा पतिष्यति ।।'

इत्यत्र,

"सप्ताक्षरोद् 'द्योतितरङ्गशोभिन्यमन्दमारब्धमृदङ्गवाद्ये ।
उद्यानवापीपयसीव यस्यामेणीदृशो नाट्यगृहे रमन्ते ।।"

इत्यत्र विशेषणपदस्य तु साधारणधर्मपरत्वेनोपनिबद्धतया श्लेषः । साधारणधर्मप्रतीतेश्चेवशब्दमाहात्म्यादुपमाश्रय इव शब्दश्लेषस्यानुप्रवेशादिति सङ्करमलङ्कारवृत्तिकारस्तदनुसारिणश्च धर्मदत्तप्रभृतयः । तदसमञ्जसम्, विशेषणेषु श्लेषो विशेष्यासम्बन्धे च शब्द उपमेति विषयभेदात् ।

वस्तुतस्त्वत्र श्लेषप्रयोजितं शब्दसाम्यमुपमामुत्थापयति, तौ च परम्पराश्रयेणाधिकं चमत्कारमावहत इत्यङ्गाङ्गिभावाङ्गीकृतिर्ज्यायसी । असौ **सङ्करः** पृथग्व्यवस्थाविरहितालङ्कारमिश्रीभावसामान्यलक्षकः । प्रकारान्तरेणावान्तरेणेत्यत्र सङ्कलनम् । आनन्त्यादिति सङ्कीर्यमाणालङ्कारप्रकारानन्त्यप्रयोजितादिति भावः । प्रतिपादिता उल्लासद्वयेन ।

उक्तमत्रेति । अत्रालङ्काराणां शब्दादिगतत्वनियमने बीजं श्लेषप्रसङ्गे पूर्वमुक्तम् । तदेव स्मारयति--**यथेति** । शब्दार्थोभयगतत्वेनेत्यस्य दोषगुणालङ्काराणामित्यनेन यथासम्भवमन्वयः, दोषगुणयोरुभयगतत्वनियमात् । न हि लाटानुप्रासाद्यलङ्कारवत् श्रुतिकटुप्रभृतयो दोषा उपचारेण शब्दार्थवृत्तयो यथा प्रसादादयो गुणा व्यासज्योभयवृत्तय उक्ताः निमित्तान्तरस्य परप्रतिपन्नस्याभावात्, अनुपपद्यमानत्वाद् अन्वयव्यतिरेकावन्तरेणाविद्यमानत्वात् ।

१. भिन्नकक्षाणामप्यलङ्कराणां संघटमानत्वेन प्रतीतावेकावसाय इति युक्तमेव संसृष्टेरलङ्कारवृत्तिकारः कोऽपि जयरथेनात्रापि स्मृतः । अत्र स परासृष्टः स्यात् । धर्मदत्तो मैथिलो रसविषये निबन्धं निर्ममावित्युत्कलीयानां ग्रन्थोऽलङ्कारविषयकः स एव वेत्यादि ग्रन्थादस्माद् निर्णेतुं न शक्यते ।

दोषगुणालङ्काराणां शब्दार्थोभयगतत्वेन व्यवस्थायामन्वयव्यतिरेकावेव प्रभवतो निमित्तान्तरस्याभावात्। ततश्च योऽलङ्कारो यदीयान्वयव्यतिरेकावनुविधत्ते स तदलङ्कारो व्यवस्थाप्यत इति। एवञ्च यथा पुनरुक्तवदाभासः परम्परितरूपकं चोभयोर्भावानुविधायितयोभयालङ्कारौ तथा शब्दहेतुकार्थान्तरन्यासप्रभृतयोऽपि द्रष्टव्याः। अर्थस्य तु तत्र वैचित्र्यमुत्कटतया प्रतिभासत इति वाच्यालङ्कारमध्ये वस्तुस्थितिमनपेक्ष्यैव लक्षिताः।

योऽलङ्कारो यदाश्रितः स तदलङ्कार इत्यपि कल्पनायामन्वयव्यतिरेकावेव समाश्रयितव्यौ। तदाश्रयमन्तरेण विशिष्टस्याश्रयाश्रयिभावस्याभावादित्यलङ्काराणां यथोक्तनिमित्त एव परस्परव्यतिरेको ज्यायान्।

एषां दोषा यथायोगं सम्भवन्तोऽपि केचन।
उक्तेष्वन्तर्भवन्तीति न पृथक् प्रतिपादिताः ॥१४२॥

दोषगुणालङ्कारेषु साधारण्येनोक्तान् प्रकृतेष्वलङ्कारेषु विविच्याह--**ततश्चेति**। यदीयान्वयेति नियम्य शब्दस्यार्थस्य वा भावे यस्यालङ्कारस्य भावः, अभावे चाभावः स तदलङ्कारस्तस्य शब्दार्थस्य वाऽलङ्कारो व्यवस्थाप्यते व्यवह्रियते। इत्युक्तमिति पूर्वेणानुषङ्गः। एवं व्यवस्थिते उभयोर्भावाभावानुविधायितेति। **तनुवपुरित्यादि**। तनुशब्दस्थाने रूपादिशब्दप्रयोगे पुनरुक्तवदाभासो न भवतीत्यस्य शब्दान्वयव्यतिरेकानुविधायिता। वपुःशब्दस्थाने तु शरीरादिपदनिवेशेनापि न क्षतिरिति तदन्वयव्यतिरेकानुविधायित्वमेव'। एवं परम्परितरूपकेऽपि।

"श्रीनृसिंह महीपाल स्वस्त्यस्तु तव बाहवे।
आहवे जगदुद्दण्डराजमण्डलराहवे ॥

अत्र राजमण्डलपरिवृत्तौ रूपकपरिवृत्तिः। राहुशब्दपरिवृत्तौ तु तादवस्थ्यमेव। एवं शब्दहेतुकार्थान्तरन्यासेऽपि हि शब्दाभावे तदभावादितरशब्दपरिवृत्तावपि चाभावादित्यर्थः। प्रभृतिशब्देन नाल्पः कविरिवस्वल्पश्लोकादेव महान् भवानिति श्लिष्टव्यतिरेकादिसंग्रहः। वस्तुस्थितिं सिद्धान्तव्यवस्थाम्। कुतः पुनरन्वयव्यतिरेकाभ्यां विनाऽलङ्काराणां शब्दार्थोभयगतत्वविभागो न सम्भवतीत्याह--**योऽलङ्कार इति**। अलङ्कार्यालङ्करणभावस्य लोकवदाश्रयाश्रयिभावेनावस्थितेरित्येव हि विवक्षायां परममन्त्रः[२]। समाश्रयितव्यावङ्गीकार्याविति मूलतया भावेन व्यवस्था-

---

१. अन्वयव्यतिरेकावाश्रित्यैव मम्मटग्रंथे ध्वनिभेददोषाणामलङ्कारप्रकारव्यवस्था प्राचीनैस्तात्कालिकैस्तिलकादिभिस्तदर्वाग्भवै रुचकाद्यैश्चाश्रयाश्रयिभावेनैषां व्यवस्था सम्मानितेति तन्मस्य चिन्त्यत्वमत्रोद्घुष्यते टीकाकृता मूलकृतमनुसरता।

२. परममनन्तमिति ख० पाठः।

तथाह्यनुप्रासस्य प्रसिद्ध्यभावो वैफल्यं वृत्तिविरोध इति ये त्रयोऽनर्थास्ते प्रसिद्धिविरुद्धतामपुष्टार्थत्वं प्रतिकूलवर्णतां च यथाक्रमं न व्यतिक्रामन्ति, तत्स्वभावत्वात्।

क्रमेणोदाहरणम्—

चक्री चक्रारपङ्क्तिं हरिरपि च हरीन् धूर्जटिर्धूर्ध्वजाग्रा-
नक्षं नक्षत्रनाथोऽरुणमपि वरुणः कूबराग्रं कुबेरः।
रंहः संघः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य
स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचः सोऽवतात् स्यन्दनो वः ॥५८०

अत्र कर्तृकर्मप्रतिनियमेन स्तुतिरनुप्रासानुरोधेनैव कृता न पुराणेतिहासादिषु तथा प्रतीतेति प्रसिद्धिविरोधः।

भण तरुणि ! रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि !
यदि सल्लीलोल्लापिनि गच्छसि तत् किं त्वदीयं मे ॥५८१

पकतयाऽङ्गीक्रियते, किमन्तर्गडुनाऽऽश्रयाश्रयिभावेनेति भावः। तदाश्रयमर्थव्यतिरेकाश्रयम्! शब्दस्यार्थस्य वाऽन्वयव्यतिरेकानुविधानादेव हि तदाश्रयत्वं वाच्यम्, विशिष्टस्य नियतस्याभावादित्यतः पूर्वं निश्चयेति शेषः। व्यतिरेको वैजात्यम्।

एषामुल्लासद्वयेनाभिप्रेतानामलङ्काराणां केषाञ्चित्। यथायोगमुक्तेष्वन्तः पतन्तीत्यन्वयः। केवललक्ष्यप्रसिद्ध्या प्राचीनान्तर्भावप्रकारमुपपादयति वृत्तिकृत्—**तथाहीति**। प्रसिद्ध्यभावः प्रसिद्धार्थविरहः। वैफल्यमास्वादोत्कर्षकत्वविरहः। वृत्तेरनुप्रासभेदस्य प्रधानीभूतास्वादविरोधित्वं वृत्तिविरोधः। न अर्थ्यन्ते प्रार्थ्यन्त इत्यनर्था दोषाः। नातिक्रामन्ति न व्यभिचरन्ति। तेषां स्वभावः प्रतिनियतो धर्मो-लक्षणं विद्यतेऽस्येति[१] तत्स्वभावाः, तेषां भावस्तत्त्वम्, तस्माद् विशेषरूपत्वादित्यर्थः।

चक्री विष्णुः, हरिरिन्द्रः, हरीनश्वान्। तथा प्रतीतेरिति। प्रतीतिः प्रतिपादनमिति यावत्। रमणमन्दिरं यदि गच्छसीत्यन्वयस्तदा त्वदीयं त्वन्मतं किमन्यत् प्रयोजनमस्तीत्यर्थः। अलघु उच्चैः। अरुणचरण इति सम्बुद्धिः। अकारणमिति क्रियाविशेषणम्। पूर्वानुरागं विनैव विचिन्त्यमानं निरूप्यमाणमपि। अकारणमिति क्रियाविशेषणम्। कलकण्ठीति दूतीसम्बोधनम्। कण्ठार्तिं कण्ठपीडाम्। परुषवर्णाडम्बरः परुषवर्णतानिष्पाद्यश्चित्तक्षोभः। प्रतिकूलवर्णतैव वृत्तिविरोधः पूर्वपदार्थो विधेयः। यमनं बन्धनम्। अप्रयुक्तत्वं कविपरम्पराप्रयोगविरहः। सदम्भा इत्यत्राम्भःशब्देन सप्रभाः।

---

१. एषामिति स्यात्।

अनणुरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम् ।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते ॥५८२

अत्र वाच्यस्य विचिन्त्यमानं न किञ्चिदपि चारुत्वं प्रतीयत इत्यपुष्टार्थतैवानुप्रासस्य वैफल्यम् । अकुण्ठोत्कण्ठयेति[1] । अत्र शृङ्गारे परुषवर्णाडम्बरः पूर्वोक्तरीत्या विरुध्यत इति परुषानुप्रासोऽत्र प्रतिकूलवर्णतैव वृत्तिविरोधः ।

यमकस्य पादत्रयगतत्वेन यमनमप्रयुक्तत्वं दोषः । यथा—

भुजङ्गमस्येव मणिः सदम्भा ग्राहावतीर्णेव नदी सदम्भाः ।
दुरन्ततां निर्णयतोऽपि जन्तोः कर्षन्ति चेतः प्रसभं सदम्भाः ॥५८३॥

उपमायामुपमानस्य जातिप्रमाणगतशून्यत्वमधिकता वा तादृश्यनुचितार्थत्वं दोषः । धर्माश्रये तु न्यूनाधिकत्वे यथाक्रमं हीनपदत्वमधिकपदत्वं च न व्यभिचरतः । क्रमेणोदाहरणम् —

चण्डालैरिव युष्माभिः साहसं परमं कृतम् ॥५८४॥

वह्निस्फुलिङ्ग इव भानुरयं चकास्ति ॥५८५॥

अयं पद्मासनासीनश्चक्रवाको विराजते ।
युगादौ भगवान् वेधा विनिर्मित्सुरिव प्रजाः ॥५८६॥

पातालमिव ते नाभिः स्तनौ क्षितिधरोपमौ ।
वेणीदण्डः पुनरयं कालिन्दीपतसन्निभः ॥५८७॥

द्वितीये तु जलमुच्यते, दुरन्ततां परिणामदुःखदायिताम् । निर्णयतो ननिश्चिवतः । [2]सदम्भाः सकपटाः । प्रमाणं परिमाणम् । तादृशी जात्या प्रमाणे वा कृता शुभाश्रय उत्कृष्टे उपमानधर्माश्रयणीये अनुचितार्थत्वमिति पदं न्यूनाधिकत्वमित्यनेनैव गतार्थमित्यर्थः ।

---

१. सम्पूर्णः श्लोको यथा—

अकुण्ठोत्कण्ठया पूर्णमाकण्ठ कलकण्ठि माम् ।
कम्बुकण्ठयाः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर ॥
(काव्यप्रकाशसप्तमोल्लासे)

२. सदम्भा सदं सततं भा यस्येति कृत्वा सततप्रभावानित्यर्थे प्रथमे पादे । सदमिति सदेत्यर्थे निपातश्छान्दस इति का० प्र० विवेके श्रीधरः । सदा शोभनमम्भो जलं यस्येति द्वितीयपादे । सह वर्तन्ते इति चतुर्थपादे । अत्र पादत्रये यमनं न चतुर्षु पादेष्विति कविभिरनादृतत्वादयमत्र युक्तवद् दोष इति प्रागेवाभिहितम् । यमकं तु विधातव्यं न कदाचिदपि त्रिपादित्यालङ्कारिकाणामाम्नायः ।

अत्र चण्डालादिभिरुपमानैः प्रस्तुतोऽर्थोऽत्यर्थमेव कदर्थित इत्यनुचितार्थता।

स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन्।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान् ॥५८८॥

अत्रोपमानस्य मौञ्जीस्थानीयस्तडिल्लक्षणो धर्मः केनापि पदेन न प्रतिपादित इति हीनपदत्वम्।

स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः।
शतह्रदेन्द्रायुधवान् निशायां संसृज्यमानः शशिनेव मेघः ॥५८९॥

अत्रोपमेयस्य शङ्खादेरनिर्देशे शशिनो ग्रहणमतिरिच्यत इत्यधिकपदत्वम्।

लिङ्गवचनभेदोऽप्युपमानोपमेययोः साधारणं चेद् धर्ममन्यरूपं कुर्यात् तदैकतरस्यैव तद्धर्मसमन्वयावगतेः सविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा प्रतीयमानेन धर्मेण प्रतीयत इति प्रक्रान्तस्यार्थस्य स्फुटमनिर्वाहादस्य भग्नप्रक्रमरूपत्वम्। यथा—

चिन्तारत्नमिव च्युतोऽसि करतो धिङ् मन्दभाग्यस्य मे ॥५९०॥

सक्तवो भक्षिता देव! शुद्धा कुलवधूरिव ॥५९१॥

अयमित्यादौ वेधसो जातिशब्दत्वं प्रतिसर्गं ब्रह्मणो भेदात् पातः प्रवाहः। पात्रेणेत्यपि पाठे स एवार्थः, पात्रशब्दस्य जलाशयार्थत्वात्। सम्भाव्यगुणवत्तया मौञ्जीस्थानीयो मौञ्जीप्रतिनिधिभूतः।

उपमेयस्य कृष्णस्य शङ्खादेरेव। शशिनो ग्रहणमिति। गृह्यते प्रतीयतेऽनेनेति ग्रहणं वाचकपदं शशिन इति शब्दपरं ग्रहणमुपादानम्[१]।

साधारणमुभयप्रत्याशया निबद्धम्। अन्यरूपमेकरूपमसाधारणलिङ्गादियोगेन व्याहतसाधारण्यमित्यर्थः। प्रतीयमानेनोपात्तादन्येन। चिन्तारत्नमित्यादौ त्रैलोक्यसारभूतत्वादिना धर्मेण गुणेन सक्तव इत्यादौ प्रतीयमानसाधर्म्यविरहः सूचितः। न चासौ सार्वत्रिकः। यत्राप्यस्ति, तत्रापि न दोषनिरसनक्षम इति प्रत्ययात् प्रक्रान्तस्येति। उपमानोपमेययोरेकस्य हि यादृशः सविशेषणो निर्विशेषणो वा क्रमः, सोऽपरस्यापि निर्वाह्य एवेति दण्डी। स्वरूपतो नोपपद्यते तथाऽवस्थितमेवोपमायोग्यं भवति। न तत्रैतद् दूषणावतारः। यथोक्तम्—"न लिङ्गवचने

---

१. भामहकृते काव्यालङ्कारे प्राचीनालङ्कारिकवर्यस्य रामशर्मणः श्लोकत्वेनोद्धृतोऽयम्। अत्र शशिनेवेत्युपमायामुपमानस्योपमेयो योग्यो न निर्दिष्टं इत्युपमेयाभावाद् धर्माधिक्यम्।

यत्र तु नानात्वेऽपि लिङ्गवचनयोः सामान्याभिधायि पदं स्वरूपतो नोपपद्यते न तत्रैतद्दूषणावतारः, उभयथाप्यस्य कृतार्थानुगमस्वभावत्वात् । यथा—

गुणैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः ॥५९२॥

तद्वेषोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः ।
दधते स्म परां शोभां तदीया विभ्रमा इव ॥५९३॥

कालपुरुषविध्यादिभेदेऽपि न तथा प्रतीतिरस्खलितरूपतया विश्रान्तिमासादयतीत्यसावपि भग्नप्रक्रमतयैव व्याप्तः । यथा—

भिन्ने न हीनाधिकताऽपि वा" इत्यादि दण्डी । [१]कृतार्थानुगमस्वभावत्वात् [२]उभयसम्बन्धयोग्यस्वभावात् ।

गुणैरित्यादि । अनर्घ्यैरिति गुणैरित्यादिपदद्वन्द्वेन प्रसक्तेरभिन्नरूपमिति नोभयानुगतिव्याहतिः । अन्याभिः स्त्रीभिः सदृशोऽन्यासु स्त्रीषु सम्भवन्तः । अत्र दधत इति मधुरताभृत इति च भेदेऽप्युभयगामिवचनभेदात् । दोषोदाहृतिस्तु वसुधामहित सुराजितनीरागमना भवांश्च वर्षा[३] इति लिङ्गादि । प्रतिपादितस्य विध्यादेरर्थस्योभयानुगमविरहो विध्यादिभेदः । अस्य च कालभेदे नान्तर्भावो लिङादौ कालविशेषाविवक्षणात्[४] । प्रतीतवाक्यार्थाविगमेऽसंवलिततदाश्रयतया विश्रान्तिं नासादयन्तीति । अनैवंविधस्थले च निराकाङ्क्षा नोत्पद्यन्त एवेत्यर्थः । भग्नप्रक्रमतयैवेति । उपमानोपमेययोरेकं सक्रियं प्रक्रम्यापरत्र तथा निर्वाहविरहा-

---

१. अनुगमक्षमस्वभावत्वादिति त्वन्येषां पाठः । यस्य प्रदीपे गोविन्दठक्कुरैरनुगमयोग्यस्वभावत्वादिति प्रतिशब्देन विवरणं दत्तम् । अनुगमोऽनुषङ्गोऽन्वय इति यावत् । वस्तुतष्तु पाठद्वयमप्यस्पष्टशब्दविन्यासेनावद्यम् तात्पर्यं तूपरि प्रकटितमेव ।

२. "उपमादूषणायालं यत्रोद्वेगो न धीमताम्" इति कारिकापरिपूर्तिरेवैतत्समर्थनपरा ।

३. रुद्रटीये उपमासमुच्चयोदाहृणमिदम् उत्तरार्धमार्याया अस्याः—"सुरचितवराहवपुषस्तव च हरेश्चोपमा घटते" इति । अत्रोभयोरर्द्धयोः साधारणशब्दयोगात् साम्यं श्लेषोपाश्रितमुपमाघटकम् । पूर्वार्धे प्रस्तुतस्य नृपस्य 'वर्षा' इति स्त्रीलिङ्गबहुवचनप्रयुक्तपदेनोपमानं धीमतामुद्वेगं जनयतीति टीकाकृतां निर्बन्धः । 'लिङ्गादि' अत्रादिपदेन वचनभेदस्यापि ग्रहणमिष्टम् । अत्र वचनभेददूषणं पारिभाषिकम् वर्षाशब्दे बहुवचनप्रयोगस्यानुशिष्टत्वादित्यवधेयम् ।

४. अयमेव पाठ उभयोरपि लिप्योः लिङादितिङन्ते कालावाचित्वं न क्लिष्टकल्पनम् । परमादिपदेन केषां ग्रहणमित्यनुयोगस्यावकाशो बाढमास्ते । अथवा किं तावद् लिङ्गादाविति टीकाकृद्ग्रन्थः स्यात् ।

अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती ।
पश्चिमाद् यामिनीयामात् प्रसादमिव चेतना ॥५९४॥

अत्र चेतना प्रसादमाप्नोति न पुनरापेति कालभेदः ।

प्रत्यग्रमज्जनविशेषविविक्तमूर्तिः कौसुम्भरागरुचिरस्फुरदंशुकान्ता ।
विभ्राजसे मकरकेतनमर्चयन्ती बालप्रबालविटपप्रभवा लतेव ॥५९५॥

अत्र लता विभ्राजते न तु विभ्राजस इति सम्बोध्यमाननिष्ठस्य परभागस्यासम्बोध्यमानविषयतया व्यत्यासात् पुरुषभेदः ।

गङ्गेव प्रवहतु ते सदैव कीर्तिः ॥५९६॥

इत्यादौ च गङ्गा प्रवहति न तु प्रवहत्वित्यप्रवृत्तप्रवर्तनात्मनो विधेः । एवञ्जातीयकस्यान्यस्यार्थस्योपमानगतस्यासम्भवाद् विध्यादिभेदः ।

ननु समानमुच्चारितं [1]प्रतीयमानं वा धर्मान्तरमुपादाय पर्यवसितायामुपमायामुपमेयस्य प्रस्तुतधर्माभिसम्बन्धान्न कश्चन कालादिभेदोऽस्ति । यत्राप्युपत्तिनैव सामान्यधर्मेणोपमाऽवगम्यते यथा युधिष्ठिर इवायं सत्यं वदतीति, तत्र

दिति भावः। प्राप्नोतीत्यनन्तरमिति युक्तमिति शेषः । न पुनरापेति । अत्र वृत्ताविरते वर्तमानैवेति युक्तेत्यर्थः ।

न तु विभ्राजस इति । युष्मदर्थ एव मध्यमपुरुषाद्यनुशासनादिति भावः । असम्बोध्यमानो योऽसौ नायिकारूपोऽर्थस्तन्निष्ठस्य । परभागस्य क्रियमाणमध्यमपुरुषरूपेण विशेष्यावलीनस्य लतारूपोऽर्थस्तद्विषयतया व्यत्यासादसङ्गतः । परभावस्येति तु पाठे परशब्दोऽयं यत्परस्तत्पर इत्यादाविवायत्तवाचकः । तथा च सम्बोध्यनिष्ठस्य परभावस्य नायिकारूपार्थतत्त्वस्यासम्बोध्यमानविषयतया व्यत्यासाद् न तावताऽप्यर्थसम्बन्धस्यापि विवक्षिततया व्याघातादित्यर्थः । प्रवहत्वित्याशंसायां [2]पञ्चमी प्रवहतीत्यप्रवृत्तौ वर्तमानाया एवानुशासनादिति भावः । [3]एवंजातीयस्य पञ्चम्यभिधेयस्याशीर्निमन्त्रणामन्त्रणादेः । उच्चारितमुपात्तं वाचकम् । प्रतीयमानं धर्मान्तरं क्रियातोऽन्यं धर्ममुपादायाश्रित्य । प्रस्तुतधर्मसम्बन्धात् प्रस्तुतविचाराश्रयक्रियाभिसम्बन्धाङ्गीकारात् । कश्चन कालादिभेदोऽस्तीत्युभयगामिक्रियासम्बन्धेऽनुभयगामिकालादिनिबन्ध एव न पुनरेकमात्रगामिनि क्रियानिबन्धे तस्याभावादित्यर्थः । उपात्तेनैवेति । प्रतीयमानधर्मान्तरविरहात् । प्रतिपत्स्यामह इति ।

---

१. प्रतीतंवेति क्वचित् पाठः ।

२. पञ्चमीति लोटः कातन्त्रे संज्ञा ।

३. एवंजातीयस्येत्यादि सम्बन्धाङ्गीकारादित्यन्तं वाक्यं ख पुस्तके नास्ति ।

युधिष्ठर इव सत्यवाद्ययं सत्यं वदतीति प्रतिपत्स्यामहे । [१]सत्यवादी सत्यं वदतीति च न पौनरुक्त्यमाशङ्कनीयम्, रैपोषं[२] पुष्णातीतिवद् युधिष्ठिर इव सत्यवदनेन सत्यवाद्ययमित्यर्थावगमात् ।

सत्यमेतत्, किन्तु स्थितेषु प्रयोगेषु समर्थनमिदं न तु सर्वथा निरवद्यम्, प्रस्तुतवस्तुप्रतीतिव्याघातादिति सचेतस एवात्र प्रमाणम् । असादृश्यासम्भवावप्युपमयायामनुचितार्थायामेव पर्यवस्यतः । यथा—

ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम् ॥५९७॥

अत्र काव्यस्य शशिनाऽर्थानां च रश्मिभिः साधर्म्यं कुत्रापि न प्रतीतमित्यनुचितार्थत्वम् ।

युधिष्ठिरोपमाननिबन्धन ताच्छील्यस्य सुप्रतिपादितत्वादित्यभिसन्धिः । रैपोषमिति न व्ययपोषेण न त्वर्थकार्पण्येन यथाकथञ्चित् पुष्णाति संवर्धयतीत्यत्र यथा न पौनरुक्त्यमवशिष्टार्थविरहात् । यथा युधिष्ठिरवदाजन्मस्वभावशुद्धत्वेन न तु लाभपूजाख्यातियुक्तेन । सत्यवादी । न च सत्यवादित्वप्रसिद्धिः, अयं महात्मा सम्प्रति सत्यं वदतीत्यर्थाद् वाक्यसामर्थ्यादेवावगमात् प्रतीतेः । अत्रापि न पौनरुक्त्यमित्यर्थः ।

सत्यमिति । अस्यैव विवृतिः सत्यमिति वचनमेतदित्यङ्गीकृतमेवैतदित्यर्थः । तर्हि क्व दुष्टत्वमित्याह —**किन्त्विति** । स्थितेषु संवृतिसिद्धया परम्परया व्यवस्थितेषु समर्थनं यथाकथञ्चित् समाधानं न तु सर्वथा निरवद्यमित्यर्थः. वस्तुवृत्ताद्यसम्भवादिति भावः । प्रस्तुतेति । काव्ये प्रस्तुतस्य वस्तुनो रसादेः प्रतीतिव्याघातादास्वादनिरासात् । सचेतसः सहृदयाः प्रमाणं साक्षिणः ।

एतदुक्तं भवति—काव्यार्थानुभवात् कालान्तरमेव विजिगीषुकथामारभ्यात्मना विचारणम् । कथञ्चित् समर्थितेऽप्येवंविधानां निर्दोषत्वे काव्यार्थप्रतीतिप्रकर्षव्याहतिरन्यथा कृता न भवति, तदन्वयव्यतिरेकावाश्रित्यैवमस्माभिर्दोषतदभावविभागः क्रियत इति पार्श्ववचनम् । असादृश्यमुपमानोपमेययोः समानधर्मताविरहः । असम्भव उपमाऽर्णवाकाशत्वे शशविषाणसमगोत्रता । उपमायामिति । उत्प्रेक्षायां सम्भावनाप्राणायां नायं दोषः । तेन —

"पतत्पतङ्गप्रतिमस्तपोनिधिः पुरोऽस्य यावन्न भुवि व्यलीयत ।
गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः ॥"

इत्युदाहृतोऽयमिति । लोकप्रसिद्धयभावादुत्प्रेक्षायां न दुष्टता ।

---

१. अत्र 'सुप्यजातौ णिनिस्ताच्छील्ये' इत्यनेन णिनिः ।

२. अत्र करणे हनः इत्यतः णमुलोऽनुवृत्तौ स्वे पुषः इत्यनेन णमुलि सिद्धम् ।

निपेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः ।
जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषिणोऽर्कात् ॥५९८॥

अत्रापि ज्वलन्त्योऽम्बुधाराः सूर्यमण्डलान्निष्पतन्त्यो न सम्भवन्तीत्युपनिबध्यमानोऽर्थोऽनौचित्यमेव पुष्णाति ।

उत्प्रेक्षायामपि सम्भावनं ध्रुवेवादय एव शब्दा वक्तुं सहन्ते न यथाशब्दोऽपि, केवलस्यास्य साधर्म्यमेव प्रतिपादयितुं पर्याप्तत्वात्, तस्य चास्यामविवक्षितत्वादिति तत्राशक्तिरस्यावाचकत्वं दोषः ।
यथा—

उद्ययौ दीर्घिकागर्भात् कुड्मलं मेचकोत्पलम् ।
नारीलोचनचातुर्यशङ्कासङ्कुचितं यथा ॥५९९॥

उत्प्रेक्षितमपि तात्त्विकेन रूपेण परिवर्जितत्वान्निरुपाख्यप्रख्यं तत्समर्थनाय यदर्थान्तरन्यासोपादानं तदालेख्यमिव गगनतलेऽत्यन्तमसमीचीनमिति निर्विषयत्वमेतस्यानुचितार्थतैव दोषः । यथा—

ग्रथ्नामीत्यादौ ग्रथनमेव चन्द्रेऽसम्भावितत्योपमानगमकम्, तेनानुदयित्वादिकल्पनाऽपि न कारणं प्रसिद्धिविरहात् । अनुचितार्थत्वमिति । तादृशस्य तादृशं प्रत्युपमानानुचितत्वात् उपनिबध्यमान इत्यनन्तरमयमिति शेषः । अनौचित्यमेव पुष्णातीत्यसदर्थोपनिबन्धस्यात्यनुचितत्वादिति भावः । ध्रुवेवादय इत्यादिपदेन मन्ये किं प्रायो नूनमित्यादिसंग्रहः । केवलस्योदाहरणादन्यत्र प्रयुक्तस्य । न केवलस्य उत्प्रेक्षादन्यत्र प्रयुक्तस्येति व्याख्या ज्यायसी । इवादिसाधारण्यात् साधर्म्ये सादृश्यमेव, न तु सम्भावना । अविवक्षितप्रधानत्वादुत्प्रेक्षायामशक्तिः सम्भावनाबोधनासामर्थ्यं प्रचुरतरप्रयोगविरहे सन्देहः । न निश्चितं तस्य यथाशब्दस्य शक्तिः कुत्रान्तर्भवतीत्यवाचकत्वं दोष इति । उत्प्रेक्षितं सम्भावनाविषयः । तर्हि केन स्वरूपेण निरुपाख्यमलीकं वाजिविषाणादिवदुत्प्रेक्षितम् । तादृगेतस्य सम्भाव्यमानस्य न कदाचिदननुपपत्तिरेव भवतीति सम्भावनयैव भगवत्या निखिलानुपपत्तिनिरासात् ।

नहि वास्तव्युपपत्तिरलीके किञ्चिद् विवशाङ्ग [1]उपमानविशेषं सदृशवस्तुविशेषं प्रकाशयति प्रत्ययगततया च तद्दृष्टान्तप्रत्यायनाबुद्धिमङ्गीकरोति । प्रयोजनाभावादनुपादेयत्वं यत उपादानेऽपुष्टार्थत्वं दोषः । ननु अन्यलभ्यस्यार्थस्य मुख्यानुत्कर्षकतायामेवापुष्टार्थता । अत्र चास्ति प्रकारान्तरलभ्यत्वं

---

१. उपमानविशेषणमिति प्रायिको हृद्यः पाठः । समासोक्तावुपमानमनुपादेयं प्रयोजनाभावादिति यदुक्तं तदपुष्टार्थत्वपौनरुक्त्याभ्यां नातिरिच्यत इत्याहेति श्रीधरकृतविवरणेऽतिरोहितं सर्वम् । तस्यैव स्पष्टीकरणमत्र चण्डीदासेन साधितम् ।

दिवाकराद् रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसामतीव ॥६००॥

अत्राचेतनस्य तमसो दिवाकरात् त्रास एव न सम्भवतीति कुत एव तत्प्रयोजितमद्रिणा परित्राणम् ? सम्भावितेन तु रूपेण प्रतिभासमानस्यास्य न काचिदनुपपत्तिरवतरतीति व्यर्थ एव तत्समर्थनायां यत्नः ।

साधारणविशेषणवशादेव समासोक्तिरनुक्तमप्युपमानविशेषं प्रकाशयतीति तस्यात्र पुनरुपादाने प्रयोजनाभावादनुपादेयत्वं यत् तदपुष्टार्थत्वं पुनरुक्तता वा दोषः । यथा—

स्पृशति तिग्मरुचौ ककुभः करैर्दयितयेव विजृम्भिततापया ।
अतनुमानपरिग्रहया स्थितं रुचिरया चिरयाऽपि दिनश्रिया ॥६०१॥

अत्र तिग्मरुचेः ककुभां च यथा सदृशविशेषणवशेन व्यक्तिविशेषपरिग्रहेण च नायकतया नायिकात्वेन च व्यक्तिस्तथा ग्रीष्मदिबसश्रियोऽपि प्रतिनायिकात्वेन भविष्यतीति किं दयितयेति स्वशब्दोपादानेन ।

श्लेषोपमायास्तु स विषयो यत्रोपमानस्योपादानमन्तरेण साधारणेष्वपि विशेषणेषु न तथा प्रतीतिः । यथा—

स्वयं च पल्लवाताम्रभास्वत्करविराजिता ।
प्रभातसन्ध्येवास्वापफललुब्धेहितप्रदा ॥६०२॥इति॥

तस्यार्थस्येत्याशङ्क्य प्रकारान्तरमाह—पुनरुक्तता वेति । विजृम्भिततापया अतनुमानपरिग्रहया सौभाग्यगर्वस्थितया स्वीकृतात्यन्तदीर्घभावया वा, दिनश्रीपक्षे मानशब्दस्य परिमाणार्थत्वात् । नायिकापक्षे तु परिगृहीतेति शामिताऽहङ्कारया विनयाबाह्यया वा । चिरया दीर्घया । तिग्मरुचौ ककुभः सदृशेति दिनश्रियाप्येवंभूतया स्थितयेत्यपि सङ्गतिः । व्यक्तिविशेषपरिग्रहेण लिङ्गविशेषोपादानेन । नायकतयेति पुनरेकशेषः । एतच्च नायकव्यवहार एव स्फुटयतीति बोद्धव्यमिति न सर्वसमासोक्तिग्रस्तविषयश्लिष्टोऽयमित्याह—श्लेषोपमायास्त्विति । तथा प्रतीतिवैशद्येनोपमाप्रतीतिः । स्वयञ्चेति । प्रभातसन्ध्येव । स्वपदोपादनं न स्फुटप्रतिभानम् । अप्रस्तुतप्रशंसायामपीति । अप्रस्तुतप्रशंसया यत्र गतत्वं तत्र नोपमाग्रहः कार्य इत्यभिसन्धिः । उपमेयं प्रस्तुतम् । अनयैव रीत्या समासोक्तौ प्रस्तुतवर्णनेनाप्रस्तुतवर्णनयैव कार्यस्य गम्यत्वादित्यभिव्यक्तम् । प्रयोगेणेत्यतः पूर्वमुपमानेनेति शेषः । कदर्यता कल्पनादुष्टतया सहृदयविरागपात्रताम् आयान् आगच्छन् । वारणफलं प्रभातिशयाभ्यां हीनः कुतश्चित् कारणाल्लोके मणिशब्दवाच्यो मरकता-

अप्रस्तुतप्रशंसायामप्युपमेयमनयैव रीत्या प्रतीतं न पुनः प्रयोगेण कदर्थतां नेयम्। यथा—

आहूतेषु विहङ्गमेषु मशको नायान् पुरो वार्यते
मध्येवारिधि वा वसंस्तृणमणिर्धत्ते मणीनां रुचम्।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक् सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वान्तरम्॥६०३॥

अत्राचेतनस्य प्रभोरप्रस्तुतविशिष्टसामान्यद्वारेणाभिव्यक्तौ न युक्तमेव पुनः कथनम्।

तदेतेऽलङ्कारदोषा यथासम्भविनोऽप्येवञ्जातीयकाः पूर्वोक्तयैव दोषजात्याऽन्तर्भाविता न पृथक् प्रतिपादनमर्हन्तीति सम्पूर्णमिदं काव्यलक्षणम्।

दिमणिरूपतया मानहृत्। सामान्यं महत्तत्वहीनमचेतनं विवेकरहितम्। अनामृष्टं न पर्यालोचितं तत्त्वान्तरं स्वरूपप्रकर्षाप्रकर्षविशेषो येन तमनामृष्टतत्त्वान्तरम्। अचेतनस्यातः प्रकृतस्य विशिष्टसामान्यद्वारेणेति। अनामृष्टतत्त्वान्तरत्वेन विशेषितस्य सामान्यद्वारेण समतयेत्यर्थः।

प्रकृतार्थमुपसंहारन् ग्रन्थस्य समाप्तिमाचष्टे—**तदेतदिति**। अन्येऽप्येवंजातीयका इत्यनुक्ता अप्युक्तानुसारेण मृग्या इत्यर्थः। यथाऽप्रस्तुतप्रशंसायां प्रकृताप्रकृतयो रसानुगुण्यमुत्प्रेक्षायां वर्णनीयविशेषप्रतिपत्तिरूपके विषयिणोः सादृश्यप्रसिद्धिरनुचितार्थत्वं दोषः। क्रमेणोदाहरणम्—

"सद्वृत्ते महति प्रसादधवले यत्रास्ति बद्धो गुणै-
र्यस्ते संयुगहेतुतामुपगतो यत्रापि विश्राम्यति।
तस्याक्षेपपरम्पराभिरभितो दोलायमानस्थिते-
रालानस्य मतङ्गजैष कलमा निर्मूलने दुर्ग्रहः॥"

अत्र गजस्यालान ग्रहो निर्मूलनग्रहो युक्त एवेति। नह्यालानं गजस्योपकरोति। प्रस्तुतस्य तु कृतघ्नस्य प्रचुरतरोपकारिमहापुरुषदौःस्थ्यापदेशेन प्रयुक्तप्रकृतवदितरयोरसारूप्यम्।

"नेत्रद्वयं नीलसरोजकान्ति विभाति कान्तावदनेन्दुबिम्बे।
विधुन्तुदस्योद्गतदन्तदंशत्विषा विभक्तेव कलङ्करेखा॥" ममायम्।

अत्र नयनद्वयस्य द्विधाभूतकलङ्कलेखेथोत्प्रेक्षया वर्णनीयकान्तामुखस्य सकलङ्कचन्द्रप्रतीतिरित्यनुचितार्थता।

इत्येष मार्गो विदुषां विभिन्नोऽप्यभिन्नरूपः प्रतिभासते यत् ।
न तद् विचित्रं यदमुत्र सम्यग्विनिर्मिता संघटनैव हेतुः ॥

इति काव्यप्रकाशेऽर्थालङ्कारनिर्णयो नाम दशमोल्लासः ।

समाप्तश्चायं काव्यप्रकाशः ॥

"कैलासः काव्यशम्भोः कुसुमशरकवेर्नाटचनान्दीविशेषः
सिद्धान्तः कोपिनीनां त्रिभुवनवलभी कान्तिरस्तप्रतापा ।
क्षीराब्धेः कीर्तिलोपस्त्रिदशपरिषदः सुप्रसन्नो गणानां
लक्ष्मीलावण्यपक्षी त्रिजगति जयति व्यञ्जनांशुः सुधांशुः ॥"

अत्र काव्यशशिना नान्दीनिवेशस्य चन्द्रसादृश्यमप्रसिद्धं समासोक्तौ लिङ्गासङ्गतिरसमर्थत्वं दोषः, यावदर्थविवक्षया कविना पदं निबद्धं तावति तस्य सामर्थ्यविरहात् ।

"उत्सङ्गे ककुभो निधाय विरुतैरम्भोमुचां स्फोरयन्
मन्ये मुद्रितचन्द्रसूर्यनयनं व्योमापि निद्रायते ।"

अत्र व्योमपदेन नायकव्यवहारविशेषमाकाशं प्रत्याययितुमिष्टं कविना, न चास्य तावती शक्तिः पुंलिङ्गात्मकसहकारिविरहात् । यत्र तु भाषान्तरे लिङ्गविशेषविधिस्तत्र नास्य दोषस्यावकाशः । यथा मम— उअ तिमिरेत्यादि । अत्र सरःशब्दस्य संस्कृते नपुंसकस्यापि न वसन्तप्रावृट्शरदः पुंसीति श्रीमदाचार्यकात्यायनानुशासनात् प्राकृते पुंस्त्वमिति तद्विदां मनसि नोद्वेगं इत्यदुष्टता । अत्यसभ्येन चार्थेन व्याजस्तुतावनुचितार्थमेव, यथा—

"आसीन्नाथ पितामही तव मही माता ततोऽनन्तरं
जाता सम्प्रति साऽम्बुराशिरशना जाया कुलोद्भूतये ।
पूर्णे वर्षशते भविष्यति पुनः सैवानवद्या स्नुषा
युक्तं नाम समस्तनीतिविदुषां लोकेश्वराणामिदम् ॥"

अत्र भवद्वंशे पृथिवीस्वाम्यमनवच्छेदीति स्तुतौ विवक्षायामपि वाच्यस्यात्यन्तगर्हास्पदत्वेन दूषितता । एवमादयः शास्त्रतो लक्ष्यतश्चानुसन्धेयाः । दोषजात्या दोषपौनरुक्त्यादिना सम्यग् मात्रमपि न्यूनभावराहित्येन । पूर्णे समाप्तमस्माभिर्व्याख्यातं कारिकासमूहरूपमिदमित्यस्माभिर्निबद्धं तद्विवरणरूपम् । काव्यं साङ्गोपाङ्गं लक्ष्यतेऽत्रेति काव्यलक्षणम् । अत्रास्माकमुल्लासदशकव्याख्याने

प्रमादादनैपुण्येन वा यद् दर्शितं तत् सूक्ष्मतरबुद्धिभिः पूरणीयमिति सर्वतः शिवम्[१] ।

काव्यप्रकाशतरुरेष कुसम्प्रदायव्याख्याविलोलमरुदाकुलितप्रतानः ।
सिक्तः पुनश्च प्रतिपल्लवतामुपैतु श्रीचण्डिदासकविवागमृतप्रवाहैः ॥

सायं सूर्यात्मजायाः पुलिनपरिसरे बालकैरावृतः सन्
धावन् धावन् [समन्तात्] कृतविविधरवो गोसमूहं विचिन्वन् ।
स्वैरं गोपाङ्गनाभिः कृतविविधरसक्रीडनी दैत्यवंश-
ध्वंसी वंशीविलासी व्रजकुलतिलकः पातु वो गोपवेशः ॥

इति कापिञ्जल[२]कुलतिलकषड्दर्शनीयचक्रवर्तिमहाकविचक्रचूडामणिसहृदयगोष्ठीगरिष्ठमहामहोपाध्यायश्रीचण्डीदासकृतौ ।

काव्यप्रकाशदीपिकायां ।

दशम उल्लासः ॥

---

१. क पुस्तकेऽतिरिक्तमिदं दृश्यते —

अत्र चण्डिदास इति ह्रस्वेकारयुक्तनामनिर्देशोऽनुशासनबलात् सुसमाधोऽपि नानवद्यः। कारोक्ष्या वहतिकाली कालिदासपद इवात्रापीति महत् साहसिकमेव । उपोद्धात एतदालोचनं प्रसङ्गतः कृतमित्यलम् । काण्डोश्याक्ष चण्डीदासकृतप्रबोधचन्द्रोदयटीकावतरणिकायामपि–

"कविचण्डिदास" इति ह्रस्वेकारयुक्तः पाठ उपलभ्यते ।

लब्धप्रख्या दीपिका ध्वान्तनाशे ख्यातेऽन्वाख्येऽदीपि काव्यप्रकाशे ।
येयं कालामोचितस्वप्रकाशा दिष्ट्या बाधामोचिताऽद्धाऽवतात् सा ॥

२. अशक्तेऽशरणे सद्भिर्नियोगो यः पुराऽर्पितः ।
विश्वेश तस्य पूर्णोऽयं सार्थकोऽस्तु विधिस्तव ॥

काव्यप्रकाशकारिका

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारतीकवेर्जयति ॥१॥

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥२॥

शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥३॥

१ तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि ।
२ इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः ॥४॥

३ अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।
४ शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ॥५॥

५ स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा ।
६ वाच्यादयस्तदर्थाः स्युः
७ तात्पर्यार्थोऽपि केषुचित् ॥६॥

८ सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते ।
९ साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचकः ॥७॥

१० संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।
११ समुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ॥८॥

१२ मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया ॥९॥

१३ स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥१०॥

१४ सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा ।
१५ विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात्साध्यवसानिका ॥११॥

१६ भेदाविमौ च सादृश्यात्संबन्धान्तरतस्तथा ।
गौणौ शुद्धौ च विज्ञेयौ,
१७ लक्षणा तेन षड्विधा ॥१२॥

१८ व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने ।
१९ तच्च गूढमगूढं वा,
२० तदेषा कथिता त्रिधा ॥१३॥

२१ तद्भूर्लाक्षणिकः,
२२ तत्र व्यापारो व्यञ्जनात्मकः ।
२३ यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ॥१४॥

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।
२४ नाभिधा समयाभावात् ।
२५ हेत्वभावान्न लक्षणा ॥१५॥

२६ लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो ।
न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः ॥१६॥

२७ एवमप्यनवस्थास्याद् या मूलक्षयकारिणी ।
२८ प्रयोजनेन सहितं लक्षणीयं न युज्यते ॥१७॥

२९ ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ।
३० विशिष्टे लक्षणा नैवं
३१ विशेषाः स्युस्तु लक्षिते ॥१८॥

३२ अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥१९॥

३३ तद्युक्तो व्यञ्जकः शब्दः ।
३४ यत्सोऽर्थान्तरयुक् तथा ॥२०॥

३५ अर्थाः प्रोक्ताः पुरा तेषाम्,
३६ अर्थव्यञ्जकतोच्यते ।
३७ वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसंनिधेः ॥२१॥

प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम् ।
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥२२॥

३८ शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः ।
अर्थस्य व्यञ्जकत्वे तत् शब्दस्य सहकारिता ॥२३॥

३९ अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद् ध्वनौ ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ॥२४॥

४० विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः ।
४१ कोऽप्यलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रमः परः ॥२५॥

४२ रसभावतदाभासभावशान्त्यादिरक्रमः ।
भिन्नो रसाद्यलंकारादलंकार्यतया स्थितः ॥२६॥

४३ कारणान्यथ कार्याणि सहकारीणि यानि च ॥
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥२७॥

विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः ॥२८॥

४४ शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥२९॥

४५ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥३०॥

४६ निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥३१॥

व्रीडा चपलता हर्षं आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥३२॥

सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥३३॥

त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥३४॥

४७ निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।
४८ रतिर्देवादिविषया व्यभिचारी तथाञ्जितः ॥३५॥

४९ भावः प्रोक्तः–तदाभासा अनौचित्य प्रवर्तिताः ।
५० भावस्य शान्तिरुदयः संधिः शवलता तथा ॥३६॥

५१ मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन ।
५२ अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः ॥३७॥

शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितोध्वनिः ।
अलंकारोऽथ वस्त्वेवशब्दाद्यत्रावभासते ॥३८॥
५३ प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ।
५४ अर्थशक्त्युद्भवोऽप्यर्थो व्यञ्जकः संभवीस्वतः ॥३९॥

प्राढोक्तिमात्रात्सिद्धो वा कवेः तेनोम्भितस्य वा ।
वस्तु वालंकृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत् ।।४०।।

वस्त्वलंकारमथ वा तेनायं द्वादशात्मकः ।
५५ शब्दार्थोभयभूरेकः—
५६ —भेदा अष्टादशास्य तत् ।।४१।।

५७ रसादीनामनन्तत्वाद्भेद एको हि गण्यते ।
५८ वाक्ये द्व्युत्थः—
५९ —पदेऽप्यन्ये—
—प्रबन्धेऽप्यर्थशक्तिभूः ।।४२।।
६०

६१ पदैकदेशरचनावर्णेष्वपि रसादयः ।
६२ भेदास्तदेकपञ्चाशत्
तेषां चान्योन्ययोजने ।।४३।।
६३

संकरेण त्रिरूपेण संसृष्टचा चैकरूपया ।
वेदखाब्धिवियच्चन्द्राः (१०४०४)
६४ शरेषुयुगखेन्दवः (१०४५५) ।।४४।।
६५

अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
६६ संदिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ।।४५।।
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः स्मृताः ।
एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत् ।।४६।।
६७ सालंकारैर्ध्वनेस्तैश्च योगः संसृष्टिसंकरैः ।
६८ अन्योन्ययोगादेवं स्याद्भेदसंख्यातिभूयसी ।।४७।।
६९ शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतम् ।
७० गुणप्राधान्यतस्तत्र स्थितिश्चित्रार्थशब्दयोः ।।४८।।
मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः ।
७१ उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः ।।४९।।
दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थम् ।
७२ निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलम् ।।५०।।
संदिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम् ।
अविमृष्टविधेयांशं विरुद्धमतिकृत्समासगतमेव ।।५१।।

७४ अपास्य च्युतसंस्कारमसमर्थं निरर्थकम् ।
वाक्येऽपि दोषाः सन्त्येते पदस्यांशेऽपिकेचन ॥५२॥

७५ प्रतिकूलवर्णमुपहतलुप्तविसर्गविसंधिहतवृत्तम् ।
न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तम् ॥५३॥

अर्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यम् ।
अपदस्थपदसमासं संकीर्णं गर्भितं प्रसिद्धिहतम् ॥५४॥

भग्नप्रक्रममक्रमममतपरार्थं च वाक्यमेव तथा ।
७६ अर्थोऽपुष्टः कष्टाव्याहतपुनरुक्तदुष्क्रमग्राम्याः ॥५५॥

संदिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च ।
अनवीकृतः सनियमानियमविशेषाविशेषपरिवृत्ताः ॥५६॥

साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः ।
विध्यनुवादायुक्तस्त्यक्तपुनः स्वीकृतोऽश्लीलः ॥५७॥

७७ कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः ।
संनिधानादिबोधार्थम्—
७८ —स्थितेष्वेतत्समर्थनम् ॥५८॥

७९ ख्यातेऽर्थे निर्हेतोरदुष्टता—
८०(अ) —अनुकरणे तु सर्वेषाम् ॥
८१ वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः क्वचित्क्वचिन्नोभौ ॥५९॥

८२ व्यभिचारिरसस्थायिभावानां शब्दवाच्यता ।
कष्टकल्पनया व्यक्तिरनुभावविभावयोः ॥६०॥

प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः ।
अकाण्डे प्रथनच्छेदौ अङ्गस्याप्यतिविस्तृतिः ॥६१॥

अङ्गिनोऽननुसंधानं प्रकृतीनां विपर्ययः ।
अनङ्गस्याभिधानं च रसे दोषाः स्युरीदृशाः ॥६२॥

८३ न दोषः स्वपदेनोक्तावपि संचारिणः क्वचित् ।
८४ संचार्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा ॥६३॥

८५ आश्रयैक्ये विरुद्धो यः स कार्यो भिन्नसंश्रयः ।
रसान्तरेणान्तरितो नैरन्तर्येण यो रसः ॥६४॥

८६ स्मर्यमाणो विरुद्धोऽपि साम्येनाथ विवक्षितः ।
अङ्गिन्यङ्गत्वमाप्तौ यौ तौ न दुष्टौ परस्परम् ॥६५॥

८७ ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥६६॥

८८ उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलंकारास्तेऽनुप्रासोपमादयः ॥६७॥

८९ माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश ।
९० आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् ॥६८॥

९१ करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ।
९२ दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थिति ॥६९॥

९३ बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च ।
९४ शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसेव यः ॥७०॥

९५ व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः ।
गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता ॥७१॥

९६ केचिदन्तर्भवन्त्येषु दोषत्यागात्परे श्रिताः ।
अन्ये भजन्ति दोषत्वं कुत्रचित् न ततो दश ॥७२॥

९७ तेन नार्थगुणा वाच्याः—
९८ —प्रोक्ताः शब्दगुणाश्च ये ।
वर्णाः समासो रचना तेषां व्यञ्जकतामिताः ॥७३॥

९९ मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू ।
अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा ॥७४॥

१०० योग आद्यतृतीयाभ्यामन्त्ययोरेण तुल्ययोः ।
टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि ॥७५॥

१०१ श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत् ।
साधारणः समग्राणां स प्रसादो गुणो मतः ॥७६॥

१०२ वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित्क्वचित् ।
रचनावृत्तिवर्णानामन्यथात्वमपीष्यते ॥७७॥

१०३ यदुक्तमन्यथा वाक्यमन्यथान्येन योज्यते ।
श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा ॥७८॥

१०४ वर्णसाम्यमनुप्रासः—
१०५ —छेकवृत्तिगतो द्विधा ।

१०६ सोऽनेकस्य सकृत्पूर्वः—
१०७ —एकस्याप्यसकृत्परः ॥७९॥

१०८ माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते ।
१०९ ओजः प्रकाशकैस्तैस्तु परुषा—
११० —कोमला परैः ॥८०॥

१११ केषांचिदेता वैदर्भीप्रमुखारीतयो मताः ।
११२ शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः ॥८१॥

११३ पदानां सः—
११४ —पदस्यापि
११५ —वृत्तावन्यत्र तत्र वा ।
नाम्नः स वृत्त्यवृत्त्योश्च—
११६ —तदेवं पञ्चधा मतः ॥८२॥

११७ अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः ।
यमकम्—
११८ पादतद्भागवृत्ति तद्यात्यनेकताम् ॥८३॥

११९ वाच्यभेदेन भिन्ना यत् युगपद्भाषणस्पृशः ।
श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा ॥८४॥

१२० भेदाभावात्प्रकृत्यादेर्भेदोऽपि नवमो भवेत् ।
१२१ तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ॥८५॥

१२२ पुनरुक्तवदाभासो विभिन्नाकारशब्दगा ।
एकार्थतेव—
१२३ —शब्दस्य
१२४ तथा शब्दार्थयोरयम् ॥८६॥

१२५ साधर्म्यमुपमा भेदे—
१२६ —पूर्णा लुप्ता च
१२७ —साग्रिमा ।
श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा ॥८७॥
१२८ तद्वत् धर्मस्य लोपे स्यात् न श्रौती तद्धितेपुनः ।
१२९ उपमानानुपादाने वाक्यगाथ समासगा ॥८८॥

१३० वादे लोपे समासे सा कर्माधारक्यचि क्यङि ।
कर्मकर्त्रोर्णमुलि—
१३१ एतद्द्विलोपे क्विप्समासगा ॥८९॥

१३२ धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते ।
१३३ क्यचि वाद्युपमेयासे—
१३४ —त्रिलोपे च समासगा ॥९०॥

१३५ उपमानोपमेयत्वे एकस्यैवैकवाक्यगे ।
अनन्वयः—
१३६ —विपर्यास उपमेयोपमा तयोः ॥९१॥

१३७ संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।
१३८ ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः ॥९२॥

१३९ तद्रूपकमभेदो य उपमानोपमेययोः ।
१४० समस्तवस्तुविषयं श्रौता आरोपिता यदा ॥९३॥

१४१ श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत् ॥
१४२ साङ्गमेतत्—
१४३ —निरङ्गं तु शुद्धम्—
१४४ —माला तु पूर्ववत् ॥९४॥

१४५ नियतारोपणोपायः स्यादारोपः परस्य यः ।
तत् परंपरितं श्लिष्टे वाचके भेदभाजि वा ॥९५॥

१४६ प्रकृतं यन्निषिध्यान्यत् साध्यते सात्वपह्नुतिः ।
१४७ श्लेषः स वाक्ये एकस्मिन् यत्रानेकार्थता भवेत् ॥९६॥

१४८ परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः
१४९ निदर्शना ।
अभवन् वस्तुसंवन्ध उपमापरिकल्पकः ॥९७॥

१५० स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च सापरा ।
१५१ अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ॥९८॥

१५२ कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा ॥९९॥

१५३ निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् ।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥१००॥

कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ।
विज्ञेयातिशयोक्तिः सा—
१५४ —प्रतिवस्तूपमा तु सा ॥१०१॥

सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः ।
१५५ दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिविम्बनम् ॥१०२॥

१५६ सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥१०३॥

१५७ मालादीपकमाद्यं चेद्यथोत्तरगुणावहम् ।
१५८ नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ॥१०४॥

१५९ उपमानाद्यदन्यस्य व्यतिरेकः स एव सः ।
१६० हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते ॥१०५॥

शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वत्त्रिरष्टतत् ।
१६१ निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ॥१०६॥

वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ।
१६२ क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना ॥१०७॥

१६३ विशेषोक्तिरखण्डेषु कारणेषु फलावचः ।
१६४ यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ॥१०८॥

१६५ सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥१०९॥

१६६ विरोधःसोऽविरोधेऽपि विरुद्धत्वेन यद्वचः ।
१६७ जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद्गुणस्त्रिभिः ॥११०॥

क्रियाद्वाभ्यामपि द्रव्यं द्रव्येणैवेति ते दश ।
१६८ स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् ॥१११॥

१६९ व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वारुढिरन्यथा ।
१७० सा सहोक्तिः सहार्थस्य वलादेकं द्विवाचकम् ॥११२॥

१७१ विनोक्तिः सा विनान्येन यत्रान्यः सन्ननेतरः ।
१७२ परिवृत्तिर्विनियमो योऽर्थानां स्यात्समासमैः ॥११३॥

१७३ प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः ।
तद्भाविकम्—
१७४ —काव्यलिङ्गं हेतोर्वाक्यपदार्थता ॥११४॥

१७५ पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः ।
१७६ उदात्तं वस्तुनः संपत्—
१७७ —महतां चोपलक्षणम् ॥११५॥
१७८ तत्सिद्धिहेतावेकस्मिन् यत्रान्यत्तत्करं भवेत् ।
समुच्चयोऽसौ—
१७९ —सत्त्वन्यो युगपद् या गुणक्रियाः ॥११६॥
१८० एकं क्रमेणानेकस्मिन् पर्यायः—
—अन्यस्ततोऽन्यथा ।
१८१ अनुमानं तदुक्तं यत् साध्यसाधनयोर्वचः ॥११७॥
१८२ विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः ।
१८३ व्याजोक्तिश्छद्मनोद्भिन्न वस्तुरूपनिगूहनम् ॥११८॥
१८४ किंचित् पृष्टमपृष्टं वा कथितं यत् प्रकल्पते ।
१८५ तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता ॥११९॥
यथोत्तरं चेत् पूर्वस्यार्थस्य हेतुता ।
१८६ तदा कारणमाला स्यात्—
—क्रियया तु परस्परम् ॥१२०॥
१८७ वस्तुनोर्जननेऽन्योन्यम्—
—उत्तरश्रुतिमात्रतः ।
१८८ प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा सति ॥१२१॥
असकृद् यद् असंभाव्यमुत्तरं स्यात् तदुत्तरम् ।
कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते ॥१ २॥
१८९ धर्मेण केनचिद् यत्र तत् सूक्ष्मं परिचक्षते ।
उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः ॥१२३॥
१९० भिन्नदेशतयात्यन्तं कार्यकारणभूतयोः ।
१९१ युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसंगतिः ॥१२४॥
समाधिः सुकरं कार्यं कारणान्तरयोगतः ।
१९२ समं योग्यतया योगो यदि संभावितः क्वचित् ॥१२५॥
१९३ क्वचिद्यदतिवैधर्म्यान्नश्लेषो घटनामियात् ।
क्वचिद्यदतिवैधर्म्यान्नश्लेषो घटनामियात् ।
१९४ कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद्भवेत् ॥१२६॥
गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये ।
क्रमेण च विरुद्धे यत् स एष विषमो मतः ॥१ ७॥
महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात् ।
१९५ आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकं तु तत् ॥१२८॥

१९६ प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया ।
या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते ॥१२९॥
१९७ समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते ।
निजेनागन्तुना वापि तन्मीलितमिति स्मृतम् ॥१३०॥
१९८ स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परम् ।
विशेषणतया यत्र वस्तु सैकावली द्विधा ॥१३१॥
१९९ यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः ।
स्मरणम्—
२०० —भ्रान्तिमान् अन्यसंवित्तत्तुल्यदर्शने ॥१३२॥
२०१ आक्षेप उपमानस्य प्रतीपमुपमेयता ।
तस्यैव यदिता कल्प्या तिरस्कारनिबन्धनम् ॥१३३॥
२०२ प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया ।
ऐकात्म्यं बध्यते योगात्तत्सामान्यमितिस्मृतम् ॥१३४॥
२०३ विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः ।
एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा ॥१३५॥
अन्यत् प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः ।
तथैव करणं चेति विशेषस्त्रिविधः स्मृतः ॥१३६॥
२०४ विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः ।
२०४ स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत् ।
वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः ॥१३७॥
२०५ तद्रूपाननुहारश्चेदस्य तत् स्यादतद्गुणः ।
२०६ यद्यथा साधितं केनाप्यपरेण तदन्यथा ॥१३८॥
तथैव यद्विधीयेत स व्याघात इतिस्मृतः ।
२०७ सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः ॥१३९॥
२०८ अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु संकरः ।
२०९ एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः ॥१४०॥
२१० स्फुटमेकत्र विषये शब्दार्थालंकृतिद्वयम् ।
व्यवस्थितं च—
२११ —तेनासौ त्रिरूपः परिकीर्तितः ॥१४१॥
२१२ एषां दोषा यथायोगं संभवन्तोऽपि केचन ।
उक्तेष्वन्तर्भवन्तीति न पृथक् प्रतिपादिताः ॥१४२॥

इति काव्यप्रकाशकारिकाः

—ः समाप्ताः :—

क-परिशिष्टम्

काव्यप्रकाशोदाहृतनिदर्शनानां वर्णक्रमानुसारिणी सूची
यथासंभवमाकरनिर्देशश्च
(ग = नाटकीयगद्यम्)

—०—

ख—परिशिष्टम्

काव्यप्रकाशे प्रमाणोद्धृतयः

नाम

ध्वन्यालोकः
ध्वन्यालोकलोचनम्
नाट्यशास्त्रम्
कात्यायनवार्त्तिकम्
भामहविवरणम्
मीमांसासूत्रम्
मीमांसकाः
रुद्रटकाव्यालङ्कारः
वाक्यदीयम्
व्यक्तिविवेकः
शबरभाष्यम्

—०—

ग–परिशिष्टम्

काव्यप्रकाशे तद्वृत्तौ च स्मर्यमाणानि प्रमाणानि
(ग्रन्थकारनामानुक्रमेण सूची)

अभिनवगुप्तः

(क) अभिनवभारती

व्याघ्रादयो विभावाः =अ० भा० तत्रानुभावानां विभावानां···

निर्वेदस्थायि =अ० भा० शान्तो नाम

आदिशब्दान्मुनि =···अ० भा० आर्द्रतास्थायिकः स्नेहोऽपि··· भक्तावपि वाच्यम्····

(ख) ध्वन्यालोकलोचनम्

प्रभुसम्मित सुहृत्सम्मित कान्तेव =ध्व० आ० लो० प्रभुसम्मितेभ्यो ··· जायासम्मितत्वलक्षणो ··

उपकृतं बहु···· =ध्व० आ० लो० किमिवोपकृतं न तेन ममेति ।

रसस्तै·· र्न लक्ष्यते =ध्व० आ० लो० इवशब्देन न संलक्ष्यते ।

तदाभासा अनौचित्या =अनौचित्येन तदाभासाः ।

भावस्य शान्तिः =व्यभिचारिण उदयस्थित्यपाय आदिग्रहणेन गृहीतानि ।

अलङ्कार्यस्यापि ब्राह्मण =यत् पूर्वं क्वापि ब्राह्मणश्रमणन्यायेन ।

अत्र लिप्तेति संकरः =प्रतीयमानस्तु चित्रपानकरस चर्वणापदं भवति ।

मथ्नामि कौरव =काकुयोजनायां सर्वत्र ·· अत एव मथ्नामि कौरव ।

रसादिलक्षण ·· न वाच्यः =यस्तु स्वप्नेऽपि न स्वशब्द······ रसध्वनिरिति ।

निःशेषच्युत इत्यादौ =यस्त्वत्रापि · तात्पर्येन तु रसे ।

यदप्युच्यते नैमित्तिकानु··· =निमित्तेषु संकेतः···मीमांस कस्य प्रपौत्रं प्रति नैमित्तिकत्वमभिप्रेतम् ।

ये त्वभिदधति··· = योऽप्यन्विताभिधानवादी···।

यदि च शब्दश्रुतेरनन्तरम्··· = विभावाद्यर्थोऽपि पुत्रजन्महर्षन्यायेन।

किमिति च··बलीयस्त्वम् = अन्यथा···श्रुतिलिङ्गादि··।

किञ्च कुरु रुचिम् = श्रुतिदुष्टा ह्यर्थदुष्टा··यथा कुरु रुचिमित्यत्र।

न च लक्षणात्मकत्वमेव··· = अतएव यत् केनचिल्लक्षितलक्षणेति नाम कृतं तद्··नमात्रम् शक्तिभेदः स्पष्ट एव।

अखण्डबुद्धिनिर्ग्राह्ययो··- येऽप्यविभक्तं स्फोटं वाक्यं तदर्थः रूपमित्याहुस्तैरप्यविद्यापदपतितैः··· प्रक्रिया।

(का० प्र० वि० १७१-१७२ द्र०)

सत्यंमनोरमा रामा = न खल्वलीकवैराग्यगुडजिह्विकया वैराग्ये—
(टि० द्र०)

अयं स रशनोत्कर्षी··= तस्माद् वाक्यार्थीभूतस्य रसस्य श्रृङ्गारवस्तुना भङ्गिविशेषाश्रयेण संयोजनं रसपरिपोषायैव जायते।

न विरोधः = नन्वनयोः विरुद्धत्वविधिः। विकल्प·· वाक्यविदः।

क्षिप्तो हस्तावलग्नः = एतदुक्तंभवति··न कश्चिद् विरोधः।

उक्तं हि गुणः···= अङ्गीभूतान्यपि रसान्तराणि·अयमेव उदन्तः·· यदाह तत्रभवान्—गुणः कृतात्म ।

कथमसमग्रगुणा गौडी···= एतदेव काव्यतत्त्वं यथोदितेन···निरूपण···।

शुष्केन्धनाग्निवत्··· = झगिति शुष्ककाष्ठाग्निदृष्टान्तेनाकलुषोदकदृष्टान्तेन च··गुणः।

गुणवृत्त्या पुनस्तेषां····= ननु शब्दार्थयोर्माधुर्यादयो··· एतदुक्तं भवति—तत्·····शब्दार्थयौरुपाचरितम्।

श्लिष्टविशेषण ·····= सभासोक्तिस्तु··· श्लेषपदैरात्मानं···प्रालभत।

एतत् तस्य मुखात्····अत्रास्थाने···अप्रस्तुतं तु·····

तेनासौ त्रिरूपः = योगबलादेतेषां तिलतण्डुलवच्चा··· दुग्धजलवच्च सङ्कर उत्पद्यते।

रसस्यैव हि ··=वस्तुतो माधुर्यं नाम श्रृङ्गारादे रसस्यैव गुणः। आनन्दवर्धनः (ध्वन्यालोकः)

नियतिकृतनियमरहितां ··=तथा चेदमुच्यते—अपारे काव्यसंसारे।

रसस्य च ·=नाच्यचारुत्वहेतूनां···यत्र स ध्वनेर्विषयो मतः।

अन्यैरपि न्यग्भावित ··=यत्रार्थः शब्दो वा···।

चित्रमिति ··=चित्रं शब्दार्थभेदेन परिकल्प्यते।

नाभिधा समयाभावात् ··=व्यापारश्च नाभिधात्मा··न लक्षणात्मा।

न च शब्दः स्खलग्दतिः···=मुख्यां वृत्तिं परित्यज्य···शब्दो नैव स्खलद्गतिः।

आदिग्रहणात्···=अशब्दस्यापि चेष्टादेः···प्रसिद्धेः।

रसस्तैर्न लक्ष्यते···=तत्र तु शब्दस्य···रसादौ न प्रतीयते, वाच्येन तस्य सहैव प्रतीतिः।

गुणीभूतव्यङ्ग्ये रसवत्···=रसभावादितात्पर्यं···अलङ्कारत्वसाधनम्, (द्र० ध्व०आ०लो० पृ० ७५) एवं ध्वनेः···अनेन भावाद्यलङ्कारा अपि गृह्यन्ते।

एकावयवस्थितेन···=ध्व० आ० (वृ० ३।१ द्रष्टव्या)।

यथा गृध्रगोमायुसंवादादौ =अस्य··· ···यः प्रभेद उदाहृतः सोऽपि प्रबन्धेषु····

वाणीरकुडङ्गु···=एवंविधे विषये···।

तब गुणीभूतव्यङ्ग्ये···=अयं चास्य स्वरूपभेदः···वाचकत्वादत्यन्तं विभिन्नमेव।

लक्षणीयस्यार्थस्य नानार्थे···=वाच्याद् भिन्नविषयत्वेन व्यवस्थापितः (तत्र ध्व० आ० लो० द्रष्टव्यम्)

व्यक्तिवादिना···=वक्त्रभिप्रायरूपलिङ्गतया···तद्विषयीकृते तु प्रतिपाद्यतया···व्यञ्जकत्वमेव।

गुणः प्राधान्यतस्तत्र···=गुणप्रधानभावेन तयोर्व्यवस्थापनात्।

स्फुटस्य रसस्यानुपलम्भात् ··=न च तदस्ति वस्तु··रसादिशून्यतार्थस्य परिकल्प्यते।

रसे दोषाः स्युरीदृशाः···=विभावानुभावसञ्चार्यौ···न तु केवलया शास्त्र···।

अकाण्डे प्रथनम्···=(३।१४) वृत्तिर्न तु केवलं शास्त्र···यथा वेणीसंहारे द्वितीयाङ्के।

तद्वर्णनं हि पित्रोः··=तस्मादभिनेयार्थौ च काव्ये···पित्रोः सम्भोगवर्णनमिव सुतरामसह्यम्।

यथा नागानन्दे···–यथा शान्तशृङ्गारौ नागानन्दे निवेशितौ।

भूरेणुदिग्धान्···–रसान्तरान्तरित···यथा भूरेणु··।

····क्रामन्त्य···अत्र चटुके··=क्रामन्त्यः···निर्विशेषत्वमवगन्तव्यम्।

रसस्यैव माधुर्यादयो··=तमर्थमवलम्बन्ते ये··· ते गुणाः स्मृताः।

हारादिवदलङ्काराः···=(३।७) अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्।

माधुर्यं द्रुतिकारणम् =(२।८) शृङ्गार एव मधुरः····माधुर्यं प्रतितिष्ठति॥

ओजो वीररसस्थिति··=(२।१०) रौद्रादयो रसा···ओजो व्यवस्थितम्।

क्वचिद् वक्तृप्रबन्धापेक्षया····=विषयाश्रयः—रचना विषयापेक्षा तत्तु किञ्चद् विभेदवत्।

वक्तृवाच्यानपेक्षाः···=(३।६ वृ०) प्रबन्धाश्रयेषु यथोक्त अनुसर्तव्यम्।

तद्रहितत्वेन तूदाह्रियमाणा···आवहन्ति··=(२।१७) अपृथग्यत्ननिर्वर्त्य···मतः। तत्प्रतिपादकैश्च शब्दैः····अलङ्काराः।

उद्भटः (का० अ० सा० स०, भा० वि०)

अनैकान्तिकत्वाद् मिलिता निर्दिष्टाः=का अ० सा० स० ३।२२

एते च रसवदाद्या अलंकारा····=का० अ० सा० स० ४।४२।४५

समवायवृत्त्या····भेदः=भा० वि० ३५४

उपनागरिका परुषा कोमला=का० अ० सा० स० १।४-६

साऽग्रिमा=का० अ० सा० स० १।१६-२१

तद्वद्धर्मस्य=का० सा० सं०, २।२९

उपमानानुपादाने···=का० अ० सा० स०, २।२७, २८

···वादेर्लोपे····कर्मकर्त्रोर्णमुलि=का० अ० सा० स० १।१९-२०

सैका····सापरा सा तृतीया उक्तौ चतुर्थी=का० अ० सा० स० ४।४३-४४

वस्तुनो वाक्यार्थस्य···प्रतिवस्तूपमा=का० अ० सा० स० १।२२-२३

एकस्य च ग्रहे····दनिश्चयः=का० अ० सा० स० ५।१२ अनेकालङ्क्रिया··· एकस्य च ग्रहे····सङ्करः····।

प्रकृतार्थ····समासोक्तिः=का० अ० सा० स० २।३३ प्रकृतार्थेन वाक्येन ···समासोक्तिरुदाहृता।

कुन्तकः (वक्रोक्तिजीवितम्, व० जी०)

पदैकदेश··· =व० जी० २।१०-१२

अत्र···इमनिजव्ययीभाव ·· =अव्ययीभावमुख्या ·· २।१९

द्वयं गतं······ =व० जी० अत्र ···कपालिन इति कामापि वाचकवक्रतां विदधाति।

सदा मध्ये यासां··· =व० जी० सन्ति तत्र त्रयो मार्गाः ·· सुकुमारो विचित्रश्च ··।

वैचित्र्यं चालङ्कारः =व० जी० तयोः पुनरलङ्कृतिः। वैदग्धीभङ्गीभणितिरुच्यते।

कुमारिलः (श्लो० वा०)

प्रविशेति=श्लोकवात्तिके (टिप्पणी द्र०)

अर्थशक्ति ·· सामान्यरूपाणाम् =श्लोकवार्तिके (टिप्पणी द्र०)

शब्दवृद्धाभिधेयांश्च=श्लोकवा० १४०-१४२ सम्बन्धाक्षेपपरिहारे द्र०

तच्चेष्टयाऽवधारयति =श्लोकवा० (५ टिप्पणी द्र०)

क्षेमेन्द्रः (औ० वि० च०)

न च विनेयोन्मुखी······ = ·· अत्र भगवता जन्तु हिताभिनिविष्ठेन····सकलजनमनः प्रह्लादने बालगुडजिह्विकया ··शृङ्गारे। ····मा भूत विभूतिषु ·· अत्र निःसारतां संसारस्य।

जयन्तभट्टः (न्या० म०)

सङ्केतो गृह्यते जातौ ··साक्षात् सङ्कतितम् =जातिमती व्यक्तिः शब्दार्थः।

तद्वान्··· =कोऽयं तद्वान् नाम···जातिमती व्यक्तिः।

एवमप्यनवस्था स्यात्···मूलक्षतिकारिणी =मूलक्षतिकरीमाहुरनवस्थां हि दूषणम्।

उत्तमवृद्ध··· =वृद्धव्यवहारो वाक्येन बालस्तत्र व्युत्पद्यते न पदेन। तथैव बुध्यते श्रोता तथैव च तटस्थितः।

ज्ञानश्रीमिश्रः (निबन्धावली)

अपोहो वा ··· =निबन्धावली (अपोहप्रकरणे, पृ० ०३) नाप्यन्य व्यावृत्तिमात्रम् ···किन्त्वन्यव्यपोहः।

उक्तं हि···अयमेव हि··· =क्षणभङ्गाध्याये, पृ० ४९ द्र०।

तिलकः (उ० वि०)

सुहृद्वधू····अत्र =सुरवधूः····परमतिसामान्याभिधानं यथापरममित्रनरकासुरवधूः।

नयनानन्ददायीन्दोः····इति बहूनां सन्देहात् =नयनानन्द इति किमतिशयोक्तिः किं दीपकं किं तुल्ययोगिता किं पर्यायोक्तमिति वस्त्वलङ्कारसन्देहः।

नमिसाधुः (रु० का० अ० टीकाग्राम्)

कष्ट ··· =३।५९ यदुक्तम्—यमकानुलोम···अभिधानमात्रमेतत्···।

आयुर्घृतम्=७।८३ इदं तूदाहरणं यथा आयुर्घृतम्।

पतञ्जलिः (महाभाष्यम्)

साध्यः पूर्वापरीभूतावयवः क्रियारूपः=(म० भा० १।३।१) क्रियावचनो धातुः क्रिया नामेयं पिण्डीभूता·· न शक्या निदर्शयितुम्···· ···· आख्यातपदवाच्या पूर्वापरीभूतावयवा (म० भा० प्रदी० द्र०)

चतुष्टयी शब्दानां प्रवृत्तिः=१।१।२ चतुष्टयी शब्दानां प्रवृत्तिरिति भाष्यकारः। ·· जातिशब्दाः···।

क्वचित् स्वस्वामिभावात्=४।१।८····चतुर्भिः प्रकारैः। तादर्थ्यात् ताद्धर्म्यात् (महाभाष्यप्रदी० द्र०)।

प्रतीहारेन्दुराजः (का० अ० सा० स० ल० बृ०)

अत्र हि···इत्यपरे=पृ० ११ ल० बृ० केचिदत्र···अयमेव च··· दृश्यते।

अन्यत्र तु · अलंकाराः · पृ० ५१ ल० बृ०।

छेका विदग्धाः=ल० बृ० पृ० ४ अथवा छेका विदग्धाः।

तेन तुल्यं क्रिया चेद्वतिः=पृ० स० ल० बृ० १।१५-१६ यथा शब्दश्च·· ···द्योतयति···कर्मसामान्ये वतिः।

प्रकृतार्थ··=ल० बृ० यत्र प्रस्तुतार्थनिष्ठं··सा समासोक्तिः।

भट्टतोतः (का० कौ०)

निपुणं कविकर्म=प्रज्ञा···वर्णनानिपुणः कविः। तस्य कर्म स्मृतं काव्यम्।

भट्टनायकः (हृ० द०)

निपुकर्णविकर्म········=हृदयदर्पणोद्धृतिः (अभिनवभारत्यां द्वितीयखण्डे, शब्दप्राधान्यमाश्रित्य ··काव्यगीर्भवेत्।

रसश्च मुख्यः · =हृदयदर्पणोद्धृतिः (ध्व० आ० लोचने) यथोक्तं त्वयैव काव्ये रसयिता सर्वो न बोद्धा न नियोगभाक्।

भर्तृहरिः (वा० प०)

सामर्थ्यमौचिती देशः=२।३१६

बुधैर्वैयाकरणैः···प्रधानभूतः स्फोट इति व्यवहारः कृतः=उद्धृतिः (ध्व० आ० लो० पृ० ४७) यथाह भगवान् भर्तृहरिः—यः संयोगवियोगाभ्यां करणैरुपजन्यते। स स्फोटः शब्दजः शब्दो ध्वनिरित्युच्यते बुधैः॥

दध्ना जुहोति=जातिसमुद्देशे तृतीयखण्डे।

अखण्डबुद्धि····=तु० व्यक्तिविवेकव्याख्याने रुचकः, अपोद्धृत्येति वैयाकरणदर्शने वाक्यस्यैव वाचकत्वं ततः पदानाम् अपोद्धृत्य···।

भरत। (ना० शा०)
शृङ्गारवीर (२९ का०) ना. शा.=६।१५
रतिर्हासश्च (३० का० ना. शा. =६।१७
शास्त्राणां....छन्दो....ग्रन्थानाम्=१।९ शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः । लोको युक्तिः कलाश्चेति मन्तव्याः काव्यहेतवः (योनयः) ॥ भा० वि० ८०
तददोषौ शब्दार्थौ=त० १।९ शब्दार्थौ सहितौ काव्यम् ।
तथा चोक्तं...रूपकादिरलङ्कार =१।१३-१५
क्रियायाः प्रतिषेधेऽपि=२।७७ क्रियायाः प्रतिषेधे या तत्फलस्य विभावना।
प्रत्यक्षा इव " भाविकम्=३।५२ भाविकत्वमिति प्राहुः....भूतभाविनः।
सैषा सर्वत्र वक्रोक्तिः....=२।८५ सैषा सर्वत्र वक्रोक्तिः....
भोजराजः (स० क० आ० शृ० प्र०)
गुणक्रियायदृच्छानां खड्गमुकुरतैल....=शृ० प्र० १ म खण्डे २०६ यथा काच....।
हिमपय....=शृ० प्र० २०५-२०६ जातिरेव हि शब्दार्थः...इति जैमिनीयाः
भेदाविमौ=तु० शृ० प्र० यदुपात्तशब्देषु मुख्यगौणी.... शब्दशक्तिभिः
एद्दहमेत्तात्थणिआ=शृ० प्र० एद्दहमेत्तात्थणिआ...स० क० आ० पृ० ३४०
केषाञ्चिदेता....रीतयो मताः=स० क० आ० २।३-४ जातिर्गती रीतिवृत्तिच्छायामुद्रोक्तियुक्तयः.... २।२७ वैदर्भादिकृतः पन्थाः काव्ये मार्ग ...व्युत्पत्त्या रीतिरुच्यते ॥
तथा शब्दहेतुकार्थान्तरन्यासप्रभृतयोऽपि....=स० क० आ० ४।१-४ उपमादिः प्रतीयते....उभयालङ्क्रिया मताः । उपमा रूपकं "साक्षेपोऽर्थान्तरन्यासः....
महिमभट्टः (व्यक्तिविवेकः)
ये त्वभिदधति=
यत्तु विषं भक्षय=
भम धम्मिअ=
उभयोपयोगिनः स्युः=अन्तरङ्गबहिरङ्ग....इष्टः।
यद्यप्यसमर्थ....विभज्योक्ताः=अनेन च वाच्यावचनेन....संगृहीतं वेदितव्यम्।
मुकुलभट्टः (अ० वृ० मा०)
वस्तुधर्मोऽपि द्विविधः=यस्य च वस्तुधर्मत्वेन द्वैविध्यं साध्यसिद्धताभेदात्
प्राणप्रदो...तत्राद्यो जातिः=कस्यचित्खलु...यदुक्तं वाक्यपदीये नहि गौः गौः स्वरूपेण गौर्नाप्यगौर्गोत्वाभि....

गुणक्रियायदृच्छानां····भेदात् = गुणक्रियाशब्द····
न भेदरूपं ताटस्थ्यम् = ···न शुक्लादिशब्दानां जातिशब्दत्वम् ।
तटस्थे लक्षणा शुद्धा = पृ० ९.५ का०
लक्षणा तेन षड्विधा = ···८ पृ० एतेन····षट्प्रकारा लक्षणा वक्तव्या ।
स्थास्तु यशस्तनुते···अन्योपकार····।

रुद्रटः (का० अ०)
काव्यं यशसेऽर्थकृते = अर्थमनर्थोपशमं ··अपरे रोगविमुक्ति ··
शास्त्राणां····व्युत्पत्तिः = १।१३ फलमिदमेव····शुचिपदवाक्यप्रमाणशास्त्रेभ्य ।
हेतुर्न तु हेतवः = तस्यासार···त्रितयमिदं व्याप्रियते....
तददोषौ शब्दार्थौ = ननु शब्दार्थौ काव्यम् ··
अत्र किमित····उत्तरालङ्कारेण = ८।७२ यत्र ज्ञातादन्यत्···तदुत्तरं ज्ञेयम् ॥
अत्र हेत्वलङ्कारेण = ७।८२ हेतुमता सह हेतोः···योऽलङ्कारो हेतुः···
दुष्टं पदं = ६।२ असमर्थमप्रतीतं··भवेद् दुष्टम् ॥
सुधाकर · अकार्यमित्रम् = ६।१६ पूर्वार्थे ··पदमकार्यमित्रमिव ॥
अपास्य वाक्येऽपि = ६।१ पदवाक्यस्थो दोषो···टी-पदस्थो वाक्यस्थश्च ·।
प्रतिकूलवर्णे = ६।४० वाक्यं भवति तु दुष्टम्...
अर्थोऽदुष्टः ··= ११।२ अपहेतुरप्रतीतो···दुष्टोऽर्थः ॥
अनुकरणे तु सर्वेषाम् = ६।४७ अनुकरणभावमविकलं···
व्यभिचारि···। रसदोषाः स्युरीदृशाः = १९।९-१२, १४ ग्राम्यत्वमनौचित्यम्···
तत्र भवन् भगवन् ··= ६।१९ तत्र भवन् भगवन्निति
एवं देशकाल···· = ११।९ देशकुलजाति···
पादतद्भाग = ३।४० आवृत्तानि तु···, ३।४८ पादस्त्रिधा विभक्तः···दश···
तदेतत् काव्यान्तर्गडुभूतम् = वस्तु चौचित्यविद्भिः···विरचनीयं···
तच्चित्रम्··· = ५।१,४ भङ्ग्यन्तरकृत···तच्चित्रम् ॥ भेदैर्विभिद्यमानं···
समेनोपमानेन······ = ८।३२ अतिसारूप्यादैक्यं···सोत्प्रेक्षा ।
सैव क्रियासु बह्वीषु ··दीपकम् = ७।६४ यत्रैकमनेकेषां···दीपकं द्वेधा ।
विशेषणैः····परिकरस्तु सः = ७।७२ साभिप्रायैः····परिकरः स भवति ।
तेनासौ त्रिरूपः···· = तु १०।२५ योगवशात् सङ्कर उत्पद्यते··· ।

वामनः (का० अ० सू० वृ०)
लोकस्य स्थावरजङ्गमात्मक··· = का० अ० सू० वृ० २।३।२ लोकवृत्तं लोकः।
तददोषौ····सगुणौ··· = का० अ० सू० वृ० २।२।१-३ काव्यशोभायाः कर्तारो गुणधर्माः···पूर्वे नित्याः ।
अत्र विरोधालङ्कारेण····समकालमेव····तुल्ययोगिता = ४।३।२६ विशिष्टेन साम्यार्थमेककालक्रियायोगस्तुल्ययोगिता ।

निरर्थकं पादपूरणमात्र···पदम् = २।१।९ पूरणार्थमनर्थकम् ।

त्रिधेति व्रीडा = २।१।२० तत् त्रैविध्यं व्रीडाजुगुप्सामङ्गलातङ्क···

अप्रतीतं यत केवले शास्त्रे = २।१।८ शास्त्रमात्रप्रयुक्तमप्रतीतम् ।

ग्राम्यं यत् स्थितं = २।१।७ लोकमात्रप्रयुक्तं ग्राम्यम् ।

क्लिष्टं यतोऽर्थ··· = २।१।२१ व्यवहितार्थप्रत्ययं क्लिष्टम् ।

····सन्धेर्वैरूप्यम् = २।२।७ ८ विरूपपदसन्धि विसन्धि······पदसन्धे वैंरूप्यं विश्लेषोऽश्लीलत्वं कष्टत्वं च ।

कर्णावतंसादिपदे··· = २।२।१४-१७ कर्णावतंस····करिकलभशब्दे···

स्थितेष्वेतत् समर्थनम् = २।२।१९ तदिदं प्रयुक्तेषु ।

बहूनामपि दश शब्दगुणाः = तु० ३।१।१०-२५ मसृणत्वं श्लेषः······औज्ज्वल्यं कान्तिः ।

या प्रौढिरोजः '' समाधिरपि न गुणः = तु० ३।२-१४ अर्थस्य प्रौढिरोज ···दीप्तरसत्वं कान्तिः ।

प्रतिवस्तूपमा तु सा = ४।३।२ उपमेयस्योक्तौ····प्रतिवस्तु ।

क्रियायाः प्रतिषधेऽपि विभावना = ४।३।१३ क्रियाप्रतिषेधे विभावना ।

घ–परिशिष्टम्

(का० प्र० दी० धृतानि निदर्शनानि)

—०—

S चिह्नाङ्कितानि अलङ्कारसर्वस्वे का प्र० वि० वा उदाहृतानि ।

ϕϕ एतानि पद्यानि चण्डीदासकृतानि ।

ϕ एतानि पद्यानि मूलकृता प्रसङ्गान्तरे धृतानि ।

ङ–परिशिष्टम्

काव्यप्रकाशदीपिकायामुद्दिष्टानि धृतानि वा प्रमाणानि

(क) अलङ्कारनिबन्धानुसारीणि

(T श्रीधरमनुसृत्य चण्डीदासोद्धृतिः)

अभिनवगुप्तः (ध्व० आ० लो०) = (पृ० २३४, २४९, ३५७, आचार्याः टि० द्र०)
कविसहृदयानन्दहेतुः काव्यम् = लो० १ पृ० सरस्वत्यास्तत्त्वं कविसहृदयाख्याम् ।
ध्वन्यत इति····ध्वनिशब्दः = लो० ३३ पृ० स इति ··ध्वननमिति
रसाः प्रतीयन्त इति···व्यवहारः = लो० ६९ पृ०
काल्पनिकं···कर्मकर्तरि वा प्रत्ययः लो० १६७ पृ०
अत एवात्र वृद्धाः = २१३ पृ० (टिप्पणी द्रष्टव्या)
ज्योत्स्नापूरः····पूर्वम् = लो० ११२ पृ०
पाण्डुक्षामं वदनं···न विरुद्धम् = नह्यत्र···राजनिकटस्थाततायिद्वयन्यायेन विरोधः स्यात् ।
क्षिप्तो हस्तावलग्न···इति = लो० १७१ पृ० एतदुक्तं भवति ··भूयसि वर्तत इति ।
यत्तु माधुर्य··शान्ते प्रकृष्टं·· = लो० ७९ पृ० ननु श्रव्यं ·····मधुरतर मधुरतमत्वं च····
एतेष्वेव····अनुसर्तव्यम् = लो० १४२ पृ० यदि वा प्रबन्धेष्वपि ।
है····क्रिययैव····निदर्शना = लो० २०९ पृ० क्रिययैव तदर्थस्य····इष्टा निदर्शना इति ।
आसीन्नाथ पितामही ··मिदम् = पृ० ४४-४५

अलङ्कारवृत्तिकारः = रुचकः

अलङ्कारवृत्तिकारस्तदनु···· = अ० स० २५७ पृ० आश्रयाश्रयि···चिरन्तनमतानुसृतिरिति ।

आनन्दवर्धनः (ध्व० आ०)(६८पृ०) २५४ पृ०, ३२०पृ०, ३३५ पृ०, ३६४ पृ० ।
अन्यैः श्रीमदानन्दवर्धनाचार्यप्रभृतिभिः = १।१३ यत्रार्थः शब्दो वा
ध्वनिः····व्यवहारः कृतः = ध्व० आ० २।२३····
गुणप्रधान····तच्चित्रमभिधीयते = (ध्व० आ० ३।४२) प्रधानगुणभावाभ्यां
नाट्ये····प्रगीतादौ दर्शनात् = लक्षणमिवाप्रगीतानां······अगोचर एवासावर्थः ।
तदुक्तमाचार्यैः 'रसः···मतः' इति = (३।४३) संग्रहश्लोकः—रसभावादि···मतः ।

सिद्धान्ततत्त्वं तु···एतच्च सहचरवध ···गम्यमेवेति { ··· =(१।५ बृ०) काव्यस्यात्मा सन्निहित-सहचरी परिणता

कथामात्र····यदाह मुनिः—चूर्णैः पदैः=मुक्तकादौ···कामचारः

रसादिः····विवक्षितत्वात्= ।५ प्रधानेऽन्यत्र··मे मतिः।

अहिणअ···अनुप्रविष्टे=अत्र ध्वनेः संकीर्णत्वमेकव्यञ्जकानुप्रवेशात्।

उद्भटः (भा० वि०, का० अ० स० स०) [(चिरन्तनदिशा तु····नाट्यशास्त्रे षष्ठाध्याये प्रक्षिप्तांशः)
३३२-३३३ पृ०, ३८८,]

केचित्···रसनिष्पत्तिमाहुः
अतो न विभावा···रसस्य। } =तु० पञ्चरूपा रसाः (लघुवृत्तावुद्धृतिः ४८,४९ पृ०

—श्रुतिकटुता
मूर्ध्नि वर्गान्त्य···
नागधिकथा····परुषा
| का० अ० सा० स० १।४,५,६ शषाभ्यां सरूपसंयोगयुतां शेषैर्वर्णैर्यथायोगं···· ग्राम्यां वृत्तिं

भेदो···न वास्तवः=३५४ ४ टि० द्र०

प्राकरणिकमुपमेयम् प्रायोवाद एवायम्=भा० वि० fr 23 a प्रसिद्धमुपमानमप्रसिद्धमुपमेयमिति···

उक्तानि प्राचीनैः=का० आ० सा० स० ४।४२-४५

यदुक्तं अनेकालङ्क्रिय सङ्करः=का० अ० सा० स० ५।६२ अनेकालङ्क्रिया ····

चण्डीदासः (ध्व० सि० स०)

(पृ० १३, २६, ४५, १०४. १४६. १४९, २००, ३३७, ३४१ २५८ द्र०)

न च सामान्यक्रोडीकाराच्छक्यं तदिति वाच्यं······

इत्यादिध्वनिसिद्धान्तसंग्रहोक्त्या·····

सर्वस्यैव काव्यरूपस्य···स्वप्रकाशरसाद्यास्वाद···

एतच्च **सिद्धान्तसंग्रहे** निपुणं निरूपितमस्माभिः।

तिलकः (उ० वि०)

····उच्यत इति। परवीक्षणे =टिप्पणी द्र०।

केचित्तु शब्दान्वयव्यतिरेका·······
······इत्याहुः
अलङ्कारवृत्तिकारप्रभृतयः
| =तु० अ० स० वि० २५७ पृ०····
(यत्त्वन्यैरन्वय······)।
एतच्च राजानकतिलकेनोक्तम्।

दण्डी (का० आ०) (३५६ पृ० ३६१ पृ०)

तत्र हि वंशवीर्यं···इत्युक्तदिशा=१।२२

न पुनर्दश दण्डयाद्युक्तरीत्या = १।४१-४२
पूर्वानुभवसंस्कार अदूरता = १।५५
यकारजकारादीनां साम्यं श्रुत्यनुप्रासाख्यम् = १।५३
यदुक्तं काव्यशोभाकरान्—= २।१
न लिङ्गवचने—दण्डी = २।५१

धनञ्जय-धनिकौ (द० रू०)

रसावस्थः परं भावः—प्रतिपद्यते = ४।१
तदुक्तम्—एकोनपञ्चाशत्—परिपोषयन्ति = ४।४९ एकोनपञ्चाशत्—
पुष्टिर्नाट्येषु नैतस्य = ४।३५ शममपि केचित् प्राहुः पुष्टिर्नाट्येषु—
यद्यपि मानोपेक्षे रसान्तरं—= ४।६१ [श्रृ० ति० २।४२——]

धर्मदत्तः

श्रीमन्नारायणपादैः—धर्मदत्तो महाकविः स्थगितः =(सूचना द्र०)
अलङ्कारवृत्तिकारधर्मदत्तप्रभृतयः = तु० अ० स० वि०–यत्त्वन्यैरन्वयव्यतिरेको—तदयुक्तमेव—एतच्चोद्भटविवेके राजानकतिलकेन सप्रपञ्चमुक्तम् ।

भट्टतोतः (काव्यकौतुकम्)

तदुक्तं काव्यकौतुके—प्रज्ञानवनवो——काव्यम्

भट्टनायकः-(हृदयदर्पणम्)

शब्दप्राधान्य—भवेत्
स्वादुकाव्यरसोन्मिश्रं भेषजम्
यदुक्तं ध्वनिध्वंसे…
यत्तु हृदयदर्पणे उक्तम् ।
रसोद्देशपरः श्लोको…नाटकम् (टि० द्र०)
रामाऽसौ इत्यत्रालौकिकप्रभावत्वादयो रामपदेन लक्ष्यन्त एव इति भवद्भिरप्यङ्गीक्रियते (तु० ध्व० आ० लो० पृ० ६६२)

भरतः (नाट्यशास्त्रम्)

यदाः मुनिः—उपपादयेत्…हास्यश्रृङ्गारयोः…उपादपेत्
(ना० शा० १७ अ० १२७ पृ०)

लेशतोऽप्रधानमपि…श्रीद्भरतमहामुनि…नटवटुकाः
(ना० शा० २१, २२ अ०)

यदाह मुनि चूर्णैः···पदैः · इत्यादि—ना० शा० २२।४२

इदमेव काव्यप्रस्थाने स्वरभेदादेः · निर्मूला स्यात्=१७ अ० १२५—
१२८ पृ०

(भामहः) का० अ०

श्रव्यं नातिसमस्तार्थशब्दः···
तदुक्तम्—अविद्धदङ्गना··· } = २।३

तास्वासां प्रायिकत्वात्···नामायोगात्=१।३२ गतानुगतिकन्यायाद् नानाख्येयं सुमेधाम्····(का० प्र० वि० २९४ पृ० टि० द्र०)

भोजः (शृ० प्र०, स० क० आ०)

एक एव रसः न तु तस्य विशेषः···· =शृ० प्र० १।६ शृङ्गारवीर···वयं तु····१।७ वीराद्भुतादिषु च ये हि रस-प्रसिद्धाः सिद्धाः कुतोऽपि वटयक्षवदाविभाति।

इतः स दैत्यः···=शृ० प्र० (१ मखण्डे) २४५ पृ० अपदेशेन यथा इतः स···स० क० आ० १६६ पृ० उपदेशः···। यथा इतः····

तेन अधमपात्रतिर्यगादेरवबोधः=स० क० आ० ५।१०२ तिर्यक्षु च तदाभासः।

पर्याबन्धः पर्यस्तानां···खण्डकथा परिकथा···=शृ० प्र० (११ प्रकाशः) राघवन्—कृतनिबन्धे पृ० २८

रीङ्गताविस्यतो रीयतेऽनया इति व्युत्पत्या=स० क० आ० २।२७ रीङ्गताविति···रीतिरुच्यते।

महिमभट्टः (व्य० वि०)

रसस्य व्यापारो विभावादिः···=९५ पृ० कविव्यापारो हि विभावादियोजनात्मा।

काव्यस्यात्मनि संज्ञिनि····विमतिः=१०५ पृ०

वस्तुतस्तु भिन्न एव ·स्यादिति=२४-२५ पृ० अन्यद् हि व्युत्पत्तिसिद्धो भवति।

महिमभट्टखण्डनकृदादयः।

भमधम्मिअ=४०१ पृ० तत्र भमधम्मिअ=४०१ पृ० तत्र भम धम्मिअ···तत्प्रतिषेध-स्त्वनुमेय एव न वाच्यः।

तदुक्तम्-अर्थान्तराभिव्यक्तौ···=४५५ पृ० याऽर्थान्तराभिव्यक्तौ····सम्मता।

{ स वः शशिकलामौलि···=१६७-१६८ पृ०
{ अनेन आत्मा जानामि यत्पापम्=

समासान्तरे तत्पुरुषादौ ··=तु० २०५-२०९ पृ० किं लोभेन····तेन विषय इति युक्तः पाठः।

पतत्प्रकर्षः ··· यत्र जायते इति
तदुक्तं प्रक्रमस्यान्यथाभावः··· गुणः } टिप्पणी द्र०।

प्रक्रमस्यानन्यथात्वे गुणः =
उत्कर्षो वाऽपकर्षो वा } टिप्पणी द्र०

सद्वृत्ते ··· भट्टेति ··गजस्यालानम् ··=३८३-८४ सद्वृत्ते···तन्त्रासिद्धमेव।

मुकुलभट्टः (अभिधावृत्तिमातृका)

तटस्थे लक्षणा शुद्धा=अ०वृ०मा०(पृ०९-५ का०)तटस्थे लक्षणा शुद्धा।

रुचकः (का०प्र०सङ्केतः अ० सर्वस्वःव्य० वि०व्या०)।

अत्र स्फुटो नेति—सन्देहसङ्करः=का० प्र० सं० २३ पृ०, अ० स० १६१-१६२ पृ०

केचिदिति सांप्रदायिकाः=व्य० वि० व्या० २५२ पृ० अपत्यवतोऽपीति युक्तः पाठ

इत्यत्र केचित् समर्थयन्तो विशेषतः स्निह्यन्तो दृश्यन्ते। —तदेतदस्य ग्रन्थकारस्य हृदयमनालोक्यैव।

यथोक्तं स्वरव्यञ्जनसमुदायपौनरुक्त्यं यमकमिति=अ० स०-स्वरव्यञ्जन— यमकम् (पृ० २६)

पाण्डचोऽयमंसार्पित—इत्यादौ बिम्बप्रतिबिम्बभावे समानाकारत्वम्=अ० स०, ३४ पृ० पाण्डचोऽयं—प्रतिबिम्बत्वेन निर्दिष्टौ।

संसृष्टेनैकपद—त्रिधा काव्यलिङ्गम्=अ० स० १८२-१८३ पृ०, पूर्वत्र—अनेकार्थं-वाक्यार्थरूप—हेतुत्वेनोपन्यस्तः। उत्तरत्र तु—अनेकप र्थौं हेतुत्वेनोक्तः। एवमेक-वाक्यार्थपदार्थत्वेन काव्यलिङ्गम्।

स्पृष्टास्ता नन्दन इत्यत्र ··=अ० सं० १४२ पृ० स्पृष्टास्ता नन्दने····पर्यायोक्तस्यायं विषयः

तीर्थान्तरेषु···सङ्कीर्णता=अ० स० १६६ पृ०, तीर्थान्तरेषु···। अत्र ·· कलेवरात्य-न्तापहार····अनर्थान्तरोत्पत्तिरिति केवलमनर्थोत्पत्तिरत्र व्याजस्तुतिपर्यवसायिनी।

[एतदतिरिक्तानि १६१-१६२, ४१३ ४२१, ४३२, ४३४, ४६५, ४६६, ४८५, ५०१, ५०२-५०३ पृ० टिप्पणीतोऽनुमेयानि।]

रुद्रटः (का० अ०) [३१५, ३३४-३५, ३७९-८०, ३९१, ३९९, ४००, ४५१, ५०८पृ० टिप्पणीतो द्रष्टव्यानि।]

तदुक्तं शृङ्गार रक्त इति=का० अ० १४।३६

पादावृत्तौ ··परिवृत्तिः=का० अ० ३।३। पर्यायेणान्येषामावृत्तानां ··। मुखसन्देशोक्तयः क्रमेण यमकानि जायन्ते।

अधोवृत्ति एवं गद्येऽपि प्रभूततमप्रकारं यमकम्=का० अ० ३।१, ३, ७ १३, १६, २०, ११ नभिसाधुटीका ३।१, अस्य च यमकस्य प्रायो बाहुल्येन छन्दांसि पद्यं विषयः। प्रायो ग्रहणाद् गद्यमपि क्वापीति।

वाचस्पतिमिश्रः [पृ० १७, १३१, २८८, ३६०, ३६१, ३७६, ४१८ पृ० टिप्पणी द्रष्टव्या।]

वामनः (का० आ० सू० वृ०)

जघनकाञ्चीकरकङ्कणादौ ··विभागः=का० अ० सू० वृ०, २।२।१४, १६, १९ (तदिदं प्रयुक्तेषु)

दोषाभावात्मको गुणः कटाक्षयति=का० आ० सू० वृ, १।२।१ (गुणविपर्ययात्मानो दोषाः)

यथा काञ्चीगुणस्थान का० आ० सु० वृ०, २।१।२१ (अरूढावपि ··न तत् क्लिष्टं यथा काञ्चीगुणस्थानम्।

मरणादौ यशःशेष इति=का० आ० सू० वृ०, ३।२।११ (यथा मृतं यशःशेषमित्याहु।
पादयमकञ्च—का० आ० सू० वृ०, ४।१।२ (एकपादस्यादिमध्यान्तयमकानि यथा)

सद्योमुण्डित इत्यादौ चोत्पादिता=का० आ० सू० वृ०, ४।२।२। गुणबाहुल्यतश्च कल्पिता। तद्यथा सद्योमुण्डितमत्तहूणचिबुकप्रस्पर्धिनारङ्गकम्।

श्रीधरः (का० प्र० वि०), (पृ० ५, ९, १४ ५३ ७१, ९२, १९३, २६५ २७४, ३१० ३२५, ३३१, ४१३, ४५१ पृ० प्रभृतीनि। टिप्पणी द्रष्टव्या)।

तदेवं भेदलक्षणाभिधानं तत् सामान्यलक्षणान्तरमेव सुप्रतिपदं भवतीति =का० प्र० वि०, पृ० १३ सिद्धे काव्यसामान्यलक्षणे विभागो विशेषलक्षणं च वक्तव्यमित्याहुः।

रामोऽस्मीत्यादौ शौण्डतादयः=का० प्र० वि० १६८ पृ०। रामोऽस्मीत्यादौ प्रत्याख्यानत ··नोचितम्। इत्यत्र ··वामदेन साहसैकरसिक उदथः।

तत्र वीर कपोले जानक्याः का० प्र० वि०, २६३ पृ०। तत्र वीरशृङ्गारयोः··· यथा कपोले जानक्याः।

अन्तरङ्गाश्रिततया प्रथमं वक्रोक्तिमाह=का० प्र० वि०, २९० पृ०। अतोऽर्थापेक्षया शब्दस्य प्रतीतावन्तरङ्गत्वमिति···सर्वेषामेवालङ्काराणां···कविसंरम्भगोचरवैदग्धीभङ्गीभणितेः स्वभावत्वख्यापनाय···प्रथमं वक्रोक्तिं लक्षयति।

(२) शास्त्रान्तरेषु निहितानि—

(३) लौकिकन्यायमयानि

वज्राग्निवत् समुदितं वा कार्याणाम् ।
क्रीडया कपालं विपाटय पुनः सन्धानायौषधनिर्लेपः ।
किमार्द्रकवणिजो वहित्रचिन्तया ।
अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ।
नन्वनवस्थाऽपि क्वचिद् बीजाङ्कुरवत् ।
कर्कटीकण्टकन्यायेन ।
अम्बुजपत्रसहस्रव्यतिभेदवत् ।
यथा दीपोऽन्यथाभावे…(घटप्रदीपन्यायः)
दध्यादिन्यायेन ।
एतच्चोभयमङ्गीकुर्वतामुपनीय वाससि बद्धो ग्रन्थः ।
यष्टिलग्नवदकामेनापि अङ्गीकार्या ।
रसालयष्टिचर्वणन्यायेन ।
पानकादौ कर्पूराद्यंशवत् ।
नीरसप्रायशुष्कनारिकेलचर्वणवत् ।
कनकधूपामोदादौ मङ्गल्यादिभाग इव ।
काकनयनन्यायेन ।
तन्त्रन्यायेन ।
तृणजलौकान्यायेन ।
अजागलस्तनन्यायेन ।
स्वभवनोत्सवाय तदेव बिक्रीतवान् (तु० ध्व० आ० लो० २१५ पृ० स देवं विक्रीय तद्यात्रोत्सवमकार्षीत्) ।
क्षीरजलवत् क्रोडीभावः ।
घट्टकुटयामेव प्रभातं भवति ।
दण्डापूपिकान्याय एवं ।
हवनकरीत्या ।
किमस्माकमनया परगृहचिन्तया ।
तदिदं कुरुभक्तभोजिनः पाण्डवकार्यकरणम् ।
स्वाङ्गं न व्यवधायकम् ।
सिंहवत् परिवृत्यावलोक्य; क्रमेलकगललम्बमानकर्कटीप्रायम् ।
उभयतः पाशारज्जुः ।
कटुकपान इव ।
गजनिमीलनेन ।
राजनिकटस्थिताततायिद्वयवत् ।

दहनोद्विग्नदुष्टसत्त्वन्यायेन ।

गोबलीवर्दन्यायेन ।

जतुकाष्ठन्यायेन ।

एकवृन्तगतफलद्वयन्यायेन ।

स्वयमपि लिखितं स्वयं न बाचयति ।

उपरोधो न कर्तव्यः कर्तव्यः परिमाणतः ।

उपरोधस्य माहात्म्याद् नोक्षा भवति गर्भिणी ।

बद्धनिश्चितहिरण्याङ्गदवत् (तु० रचिता रत्नमालेव, का० प्र० वि० ४२१ पृ०)

मूलग्रन्थे उद्दिष्टाः का० दी० व्याख्याता कौकिकन्याया अत्र नान्तर्भुक्ताः। ते च मुख्यत एते (१) अदग्धदहनन्यायः (१५५ पृ०), (२) अनुरणनन्यायः (९१ पृ०) (३) इषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः (१५४ पृ०) (४) कामिनीकुचलकलशवत् (१२७ पृ०), (५) चित्रतुरगन्याय (६० पृ०), (६) पानकरसन्याय (६७ पृ०), (७) ब्राह्मणश्रमणन्यायः (९५ पृ०), (८) घटप्रदीपन्यायः ।

•

च–परिशिष्टम्

शब्दसूची

(१) काव्यप्रकाशे

(२) का० प्र० दीपिकायाम्

—०—

ग्रन्थनामसंकेतपञ्जी

संकेत:	ग्रन्थनाम	संस्करणम्
अ. को.	अमरकोष:	
अ. कौ.	अलङ्कारकौस्तुभ:	(कविकर्णपूरकृत:V.R.S.
अभि.श.	अभिज्ञानशाकुन्तलम्	ईश्वरचन्द्रविद्यासागरकृतं संपादनम्)
अभि.भा.	अभिनवभारती	
अ. रा.	अनर्घराघवम्	
अ. वृ.मा.	अभिधावृत्तिमातृका	(नि. सा. १९१६ खृ.)
अ. श.	अमरुशतकम्	
अ. स.	अलङ्कारसर्वस्वम्	(निर्णयसागरस्थ संस्क० १९३८)
उ. रा.	उदात्तराघवम्	
उ. रा. च.	उत्तररामचरितम्	(ईश्वरचन्द्रविद्या०, सं०)
ऊ. ह.	उषाहरणम्	
औ. वि. च.	औचित्यविचारचर्चा	(काव्यमाला १ मो गु०)
क. अ.	कप्फिणाभ्युदयम्	(श्रीगौरीशङ्करसम्पादितम् Motilal Das & Co.)
क. म.	कर्पूरमञ्जरी	
काद.	कादम्बरी	
का.अ.सा. सं.	काव्यालङ्कारसारसंग्रह:	(नि० सा. १९१५ खृ.)
....ल. वृ.	...लघुवृत्ति:	(प्रतीहारेन्दुराजकृता काव्यमालासं.)
....उ. वि. (ब)	उद्भटविवृति:	(वरोदा सं.)
का. अ. सू. वृ	काव्यालङ्कारसूत्रवृत्ति:	(विद्याविलास मु.)
का. आ.	काव्यादर्श:	
का. कौ.	काव्यकौतुकम्	
का. त.	कातन्त्रम् (कलापव्याकरणम्)	
का. प्र. द.	काव्यप्रकाशदर्पण:	
का. प्र. दी.	काव्यप्रकाशदीपिका	(चण्डीदासकृता)
का. प्र. सं.	काव्यप्रकाशसङ्केत: (सोमेश्वर)	राजस्थान-ग्रन्थमाला

संकेत	ग्रन्थानाम	संस्करणम्
का. प्र. रु. सं.	··रुचककृतसङ्केतः	(Cal. Or. Journal, 1935)
का. प्र. स. प्र.	·· सम्प्रदायप्रकाशिनी	(अनन्तशयन सं०)
का. प्र. सा. चू.	···साहित्यचूडाम. ाः	
का. मी.	काव्यमीमांसा	(बरोदा सं०)
का. वि.	कालविलासः	(काव्यमाला)
का. सू.	कामसूत्रम्	(वात्स्यायनकृतम्)
कि. अ.	किरातार्जुनीयम्	
कु. म.	कुट्टनीमतम्	(Bib. Ind edn.)
कु. स.	कुमारसम्भवम्	
कृ. रा.	कृत्यारावणम्	
द. ख. प्र.	दशावतारखण्डप्रशस्तिः	
गा. स.	गाहासत्तसई	(निर्णयसागर सं.)
गा. स. वे.	गाहासत्तसई	(वेबरसम्पादिता)
चो. प.	चोरपञ्चाशिका	
छ. रा.	छलितरामम्	
त. वा.	तन्त्रवार्त्तिकम्	
ता. वत्स.	तापसवत्सराजम्	(यतिराज सं०)
द. च.	दरिद्रचारुदत्तम्	(भासकृतम्)
द. रु.	दशरूपकम्	(निर्णयसागर सं०)
दे. श.	देवीशतकम्	(काव्यमाला ९ मो गु.
ध्व. आ.	ध्वन्यालोकः	(निर्णयसा. सं. २ य संस्क.)
ध्व. आ. वृ.	ध्वन्यालोकवृत्तिः	
ध्व. आ. लो.	ध्वन्यालोकलोचनम्	
न. सा. च.	नवसाहसाङ्कचरितम्	(नि. सा. सं.)
ना. आ.	नागानन्दम्	
ना. द.	नाटकदर्पणम्	(G. O. S.)
ना. शा.	नाट्यशास्त्रम्	(१–२७ बरोदा सं० २८-३६ निर्णयसा० सं०)
नी. श.	नीतिशतकम्	
न्या. कु. अ.	न्यायकुसुमाञ्जलिः	

संकेत	ग्रन्थनाम	संस्करणम्
न्या. म.	न्यायमञ्जरी	
न्या. सू.	न्यायसूत्रम्	
न्या. सू. भा.	न्यायसूत्रे वात्स्यायनभाष्यम्	
न्या. सू. वा.	न्यायसूत्रवार्त्तिकम्	
प त.	पञ्चतन्त्रम्	
प. स्त.	पञ्चस्तवी	(काव्यमाला ३ गु०)
पा.	पाणिनिसूत्राणि	(अष्टाध्यायी)
पा. वा.	पाणिनिसूत्रवार्त्तिकम्	
पू. मी. सू.	पूर्वमीमांसासूत्राणि	
प्र. वा.	प्रमाणवर्त्तिकम्	(राहुलसांकृत्यायनसं०)
बा. भा.	बालभारतम्	(राजेशखरकृतम्)
बा. रा.	बालरामायणम्	,, ,,
भ. का.	भट्टिकाव्यम्	
भ. स.	भल्लटशतकम्	(काव्य माला ४ गु०)
भा. का. अ.	भामहकृतकाव्यालङ्कारः	
भा. वि.	भामहविवरणम्	(ed. by R. Gnoli, Rome, 1962)
म. ना.	महानाटकम्	
म. भा.	महाभारतम्	(चित्रशाला सं०)
म. भाष्य.	महाभाष्यम्	
म. भा. प्र.	महाभाष्यप्रदीपः	
म. वी. च.	महावीरचरितम्	
मा. मा.	मालतीमाधवम्	
मी. सू.	मीमांसासूत्रम्	
मृ. श.	मृच्छकटिकम्	
मे. दू.	मेघदूतम्	
मे. पू.	,, पूर्वमेघः	
मे. उ.	,, उत्तरमेघः	
यो. सू.	योगसूत्रम्	
यो. सू. भा.	,, व्यासभाष्य	

संकेत	ग्रन्थनाम	संस्करणम्
र. ग.	रसगङ्गाधरः	
र. वं	रघुवंशम्	
रत्ना.	रत्नावली	
रा.	रामायणम्	(वङ्गवासी सं.)
रा. अ.	रामाभ्युदयम्	
रा. आ.	राघवानन्दम्	
रा. च.	रामचरितम्	(G.O.S.)
रु. का. अ.	रुद्रटकाव्यालङ्कारः	(नि. सा. सं.)
…न. सा.	नमिसाधुटीका	(काव्यमाला सं.)
रु. सं.	रुचककृतकाव्यप्रकाशसङ्केतः	(Cal. Or J.)
व. जी.	वक्रोक्तिजीवितम्	(द्वतीय सं.)
व. ल.	वजलग्गा	(आसियातिक सोसाइटी सं.)
वा. प.	वाक्यपदीयम्	(काशी सं.)
वि. उ.	विक्रमोर्वशीयम्	
वि. का.	विह्लणकाव्यम्	(काव्यमाला १३)
वि. पु.	विष्णुपुराणम्	
वि. बा. ली.	विषमबाणलीला	
वि, शा. भ.	विद्धशालभञ्जिका	
वे. सं.	वेणीसंहारम्	
वै. श.	वैराग्यशतकम्	
वै. सू.	वैशेषिकसूत्रम्	
व्य. वि.	व्यक्तिविवेकः	(काशी सं. १९३६ खृ.)
व्य. वि. व्या.	…व्याख्यानाम्	(रुचककृतम्)
श. भा.	शबरभाष्यम्	
श. व्या. वि.	शब्दव्यापारविचारः	(नि. सा. १९१६ खृ.)
शि. पा. व.	शिशुपालवधम्	
शृ. प्र.	शृगारप्रकाशः	(महीशूर सं. १ म खण्डः)
शृ. श.	शृङ्गारशतकम्	
श्लो. वा.	श्लोकवर्त्तिकम्	
स, क. भा.	सरस्वतीकण्ठाभरणम्	(निर्णयसागर सं.)
सा. का.	सांख्यकारिका	

संकेत	ग्रन्थनाम	संस्करणम्
सा. द.	साहित्यदर्पणम्	(Motilal Banarasidas)
लो.	,, लोचनम्	
सु. र. को.	सुभाषितरत्नकोषः	(Harvard Or. Series)
सू. श.	सूर्यशतकम्	(काव्यमाला)
ह. च.	हर्षचरितम्	
ह. प्र.	हरिप्रबोधम्	
ह. व.	हयग्रीववधम्	
ह. वि.	हरविजयम्	

(उः—उद्धृति; तु—तुलनीया; द्र—द्रष्टव्यम्, श्लो०—श्लोक इत्यादीनि)

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय